अङ्गिराः पृथिव्यादीना ब्रह्माण्डस्य शिव आदीना शरीरस्य रसोऽन्तर्यामिरूपेणाऽवस्थित (पुरुष=ईश्वर) ३१ १. अङ्गाना रसरूप. प्राण इव ५ ४५ ७ अङ्गेषु रसवद्वर्त्तमान. (अतिमेधाविजन) ३ ३१.७ प्राण इव प्रियो वत्स १ ८३ ४ अङ्गाना रस इव वर्त्तमानो यद्वाऽङ्गिभ्यो जीवात्मभ्यो सुख राति ददाति स (परमेश्वरो विद्वान्वा) ३४ १२ प्राणविद्यावित् (कण्व=मेधाविजन) १ १३९ ९ **अङ्गिरोभिः**=प्राणैर्वलै १ ६२ ५ वायुभि ६ १८ ५ अङ्गेषु रसभूतै प्राणै सह १ १००.४ अङ्ग सदृशै किरणै २ १५ ८ **अङ्गिरोभ्यः**=प्राणेभ्य इव विद्वद्भ्य. १ १३२ ४ प्राणविद्याविद्भ्यो (देवेभ्यो=विद्वद्भ्य) १ १३९ ७ प्राणरूपेभ्यो वायुभ्य, प्र०—'प्राणो वा अङ्गिरा, शत० ६.१ २ २८ १ १५१ ३ [गत्यर्थक 'अगि' धातो 'अङ्गेरसि' उणा० ४ २३६ सूत्रेणासि प्रत्यय, इरुडागमश्च]

अङ्गुलयः अङ्गन्ति प्राप्नुवन्ति याभिस्ता १८.२२. **अङ्गुलीः**=करचरणाऽवयवा २० ६ [गत्यर्थक 'अगि' धातोर् औणादिक उलि प्रत्यय। अङ्गुलय कस्माद्=अग्रगामिन्यो भवन्तीति वाग्रगालिन्यो भवन्तीति वाग्रकारिण्यो भवन्तीति वाग्रसारिण्यो भवन्तीति वाङ्कना भवन्तीति वाञ्चना भवन्तीति वापि वाभ्यञ्चनादेव स्यु ॥ नि० ३ ८ नानावीर्या अङ्गुलय ॥ तैम० ६ १ ६ ५]

अङ्गेन कमनीयेन (अणुना) २३ ५० **अङ्गेभिः**=विविधाऽङ्गै ३ ७४ **अङ्गेषु**=राज्याऽवयवेषु २० १०.

अङ्गैः=शिर आदि भिर्हृद्-चर्यादिभिर्वा १ ८९ ८ श्रोत्रादि इन्द्रियो, अङ्गो तथा सेनादि उपाङ्गो से आर्या० २ २७ योगाङ्गै १९ ९३ अवयवै ३ १ ५ अञ्जू [व्यक्तिम्रक्षणकान्तिगतिषु) धातोर्भावे घञ्प्रत्यये रूपम्]

अङ्घ शोधय १३ ४१ [गत्यर्थक 'अगि' धातोर्लोट्. वहुल छन्दसीति शपो लुक्]

अङ्ग्याः अङ्गेषु भवा (सूचीका=वृश्चिकादय) १ १९१ ७ [अङ्गप्राति० 'भवे छन्दसि' (अ० ४४ ११०) सूत्रेण यत् प्रत्यय]

अङ्घारिः अङ्घस्य कुटिलगामिनो जीवास्याऽरि. शत्रु (भगवान्) ५.३२ स्वभक्तो का जो अघ पाप उसके अरि शत्रु होकर उस समस्त पाप के नाशक (ईश्वर) आ० वि० २ १७ **अङ्घारे**=अङ्घस्य छलस्याऽरिरतत्सम्बुद्धौ (सज्जन) ४ २७ [अघि गत्याक्षेपे भ्वादि, तत पचाद्यच् प्रत्ययेऽङ्घः, तस्यारि। अङ्घारिरसि वम्भारि मै० १ २ १२]

अङ्घ्रिणा गमनसाधनेनाऽग्निना २ ८. [अघि गत्याक्षेपे (भ्वादि०) धातो औणादिक क्रिन् प्रत्यय]

अच ऊर्ध्व गच्छति ५ ८३ ८ **अचथः**=गच्छथ ५.७८ ६ [अञ्चु गतौ याचने च। अचु इत्येके धातोर्लोट् लडर्थे]

अचक्रत् करोति ४ १८ १२.

अचक्रया अविद्यमानचक्राकारया (गत्या) ४ २६ ४ **अचक्रे**=अप्रतिहते १ १२१ ४ **अचक्रेभिः**=अविद्यमानचक्रै. (दण्डसाधनै) ५ ४२ १०. [चक तृप्तौ प्रतिघाते च, डुकृञ् करणे धातोर्वा क प्रत्य०। 'कृञादीना के द्वे भवत' (अ० ६ १ १२) वार्ति० द्वित्वे चक्रम् (चक्र चकतेर्वा निरु० ४ २७]

अचक्षयत् दर्शयति २ २४ ३ **अचचक्षम्**=कथयेयम् ५ ३० २. [चक्षिङ् व्यक्ताया वाचि, अय दर्शनेऽपि (अदादि०) तस्य णिचि रूपम्]

अचरत् चरति ४ ३.१० आचरेत् ३ ४८ ३ **अचारिषम्**=चरितवान् २ २८ अनुतिष्ठामि, प्र०—अत्र लडर्थे लुङ् १ २३ २३ चरेयम् २० २२ [चर गतो भक्षणे च (भ्वादि०)]

अचरन् स्थिर (ईश्वर) ३ ५६ २ [चर गतौ धातो शतृ प्रत्यय, तत्प्रतिषेध]

अचरन्ती इतस्तत. स्वकक्षा विहाय गतिरहिते (द्यावापृथिवी) १ १८५ २ [चर गतौ, तत शतृ+ङीप्, छान्दसत्वान् नुमोऽभाव]

अचरमाः नाऽन्याऽदयवा (वायव) ५ ५८ ५ [न चरमा अचरमा इति नञ्समास]

अचष्ट उपदिशति, प्रकाशितवान्, प्रख्यापयेत् ४.१८ ३ [चक्षिङ् व्यक्तायां वाचि, दर्शनेऽपि (अदादि०) धातो सामान्ये लुङ्]

अचिकित्वान् अविद्वान् (जन) १ १६४ ६ [कित निवासे रोगापनयने च, ततो लिट स्थाने क्वसु चिकित्वाश्चेतनवान् निरु० ३ ११]

अचिक्रदत् शब्द कुर्वन् (विद्युद्रूपोऽग्नि) ३८ २२ भृशमाक्रन्दति ४ २४ ८ विकलयति १ ५८ २ आह्वयेत् ७ २० ९ आह्वयति ७ ३६ ३ [क्रदि आह्वाने रोदने च। क्रद इत्यपरे तस्य णिचि लुडि रूपम्]

अचित्तम् चेतनरहित (छर्दि = गृहम्) ६ ४६ १२ चेतनतारहितम् (वस्तु) ४ २ ११ **अचित्तात्**=अविद्यमान चित्त यत्र तस्मात् (तनयित्नो = विद्युत) ४ ३ १ **अचित्तान्**=प्राप्तदारिद्र्याऽवस्थान् (जनान्) ३ १८ २ [चिती सज्ञाने (भ्वादि०) तत क्त प्रत्यय चितामिति प्रज्ञा नाम निघ० ३ ९ चित्त चेतते निरु० १ ६]

अचित्तिम् अकृतचयना (क्रियाम्) ४ २ ११ अज्ञानम् २७ ६ **अचित्तिभिः**=अचेतनाभि (अज्ञानादिभि) ४ १२ ४ **अचित्ती**=अचित्त्या अविद्यया ४ ५४ ३ [चिती सज्ञाने तत क्तिन्। चित्तिभि = कर्मभि निरु० २ ९]

अचित्रम् अनद्भुत (सत्कर्म) ६ ४९ ११ **अचित्रे**= अनाऽश्चर्ये (विमध्ये = विशेषाऽन्धकारे) ४ ५१ ३ [चिञ् चयने धातो 'अभिचिमि०' उणा० ४ १६४ सूत्रेण क्त प्रत्यय । चित्रम्=चायनीयम् (धनम्) निरु० ४ ४]

अचिध्वम्=प्राप्नुत गच्छथ ५ ५५ ७ सञ्चिनुत १ ८६ २ [अञ्चु गतौ याचने च, अचु इत्येके, अथवा चिञ् चयने धातोर्लुङि रूपम्]

अचिष्टु.=गमनकर्त्ता (त्वष्टा=विद्युत्) २० ४४ [गत्यर्थक 'अचु' धातो ताच्छील्ये तृन् प्रत्यय षुगागमश्च]

अचुक्रुधत् भृश क्रोधयति ५ ३४ ७ [क्रुध कोपे, ततो णिजन्ताल् लुङ्]

अचुच्यवीतन प्रेरयन्ति प्राप्नुवन्ति वा, प्र०—अत्र लडर्थे लुङ् 'बहुल छन्दसीति शप श्लु 'बहुल छन्दसीतीडागम' 'तपतनप्०' इति तनबादेश, पुरुषव्यत्यय, सायणाचार्येणेद भ्रान्त्या लुडन्त व्याख्याय 'बहुल छन्दसि' इति शप शलुरिति सूत्र योजित, तत्र च्लेरपवादत्वाच्छवेव नाऽस्ति, 'कुत श्लु कस्य लुक् ? तस्मादशुद्धमेव १ ३७ १२ **अचुच्यवुः** च्यावयन्ति नाशयन्ति १२ ८४ प्राप्नुवन्ति, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ १६८ ४ च्यावयेयु ५ ५३ ६ च्यवन्ता प्राप्नुवन्तु १ ४५ ८. [च्युङ् गतौ ततो णिजन्ताल् लुङ्]

अचेत् चेतयति ४ २४ ८ **अचेतयत्**=चेतयेत् सञ्ज्ञापयेत् ३ ३४ ५ **अचेति**=सञ्ज्ञाप्यते । प्र०—अत्र 'चिती सञ्ज्ञाने' इत्यस्माल्लुङि कर्मणि चिण् १ ८८ ५ सम्यग् विज्ञायताम् १ ११३ ४ चेतयति ६ २७ ४ सञ्ज्ञायते १ ३९.४ **अचैत्**=चिनुयात् ६ ४४ ७.

अचेतसम् अज्ञानिनम् (दुर्जनम्) ७ ६० ६ जडबुद्धिम् (जनम्) ७ ६० ७ **अचेतसः**=निर्बुद्धय (भाग्यहीना जना) ७ १८ ८ **अचेतानस्य**=चेतनता रहितस्य मूर्खस्य ७ ४.७ **अचेताः**=ज्ञानरहिता (जना) १ १२० २ ['चेत' इति प्रज्ञानाम निघ० ३ ९ अचेतानस्य=अचेतयमानस्य तत्प्रमत्तस्य भवति निरु० ३ २१]

अचोदते अप्रेरकाय (हिसकाय जनाय) ५ ४४ २ [प्रेरणार्थक चुद धातो शतृ]

अचोदयः धर्मे प्रेरये, प्र०—अत्र लिडर्थे लङ् १ ४२ ५ **अचोदयत्**=प्रेरयति ५ ३१ ३ [प्रेरणार्थकचुद (चुरादि०) धातो रूपाणि]

अच्छ=श्रेष्ठाऽर्थे ३ २५ सम्यग्रीत्या ४ २० सुष्ठु १ १०४ ५ श्रैष्ठ्ये ३ ५७ ३ यथाक्रमम् २ १९ ३ उत्तमरीत्या १ १२३ ४ निश्शेषार्थे १ १३० १ शोभनतया १ १२९ ५ उत्तमेन प्रकारेण १ ४४ ४ सुष्ठुरीत्या २० ४९ शोभने ३३ ५५ सम्यक् ३ ११ अन्व०—प्रशस्तम् १ ६ ६ साक्षात् १ २ २ [अच्छाभेराप्तमिति शाकपूणि निरु० ५ २८ २]

अच्छान् यच्छन्तु प्रददतु । प्र०—अत्र 'छान्दसो वर्ण-लोपो वा' इति यलोप ६ २८ ५ [यमु उपरमे धातो सामान्ये लङ् । यच्छादेश]

अच्छान्तः विद्ययाऽऽच्छादयन्त (विद्वास) १ १६५ १२ [छद अपवारणे धातोर्णिजन्तान् छतृ प्रत्यय । छन्दसो दकारलोपश्च]

अच्छिद्यमानया छेत्तुमनर्हया (सूच्या=सीवनसाधनया) २ ३२ ४ [छिदिर् द्वैधीकरणे कर्मणि शानच्]

अच्छिद्रम् छिद्रवर्जितम् (शर्म=गृहम्) ५ ६२ ९ छेदरहित (सङ्गम्) ६ ४९ ७ **अच्छिद्रस्य**=अखण्डितस्य (दृते=मेघस्य) ६ ४८ १८ **अच्छिद्रा**=अच्छिन्नानि (शर्म=गृहाणि) ३ १५ ५ छिद्ररहितानि भा०—रोगरहितानि (गात्रा=गात्राणि) २५ ४७ द्विधाभाव-रहितानि (गात्रा=अङ्गानि) १ १६२ १८ अच्छिद्राणि

(गर्माणि) १५८८ अच्छिन्ना (पदार्था) १३१५५ **अच्छिद्राः**=छिद्ररहिता (पदार्था) ११५२१ **अच्छिद्रेण**=न विद्यते छिद्र छेदन यस्मिँस्तेन (यज्ञेन) १३१ छिद्ररहितेन एकरसेन (पाणिना=किरणसमूहेन व्यवहारेण) ११६ छिद्ररहितै (रश्मिभि=किरणै) ११२ निरन्तरेण व्यापनेन प्रकाशेन वा (पाणिना=स्तुतिसमूहेन) १२० निरन्तरेण (यज्ञेन) १३१ अविनाशिना विज्ञानेन ४४ अविच्छिन्नेन निरन्तरेण (पवित्रेण=व्यवहारेण) १०६ **अच्छिद्रे**=अदोषे (विद्युदन्तरिक्षे) ११३० [छिदिर द्वैधीकरणे तत, स्फायितञ्चि० इत्युणादिना रक् तत्रनिषेध]

अच्छिद्रोतिः अच्छिद्राऽच्छिन्ना द्वैधीभूता ऊतीरक्षणादिक्रिया यस्मात् स (शिशु) ११४५३ [अच्छिद्रा+रक्षणाद्यर्थक-अवधातो क्तिनि 'ऊतियूति०' निपातनात्साधु]

अच्छिन्नपत्राः अविच्छिन्नानि पत्राणि कर्मसाधनानि यासा ता (देवी=विदुषा स्त्रिय) १२२११ अच्छिन्नानि पत्राणि यासा ता (प्रजा) १३३० अखण्डितानि पत्राणि वस्त्राणि यानानि वा यासा ता (देवी=दिव्यगुणप्रदा स्त्रिय) ११६१ **अच्छिन्नम्** छेदभेदरहितम् [अच्छिन्नम्=नञ्+छिद्+क्त । पत्रम्=पत्लृगतौ धातो 'दाम्नीशस०' (अ० ३२१८२) सूत्रेण करणे ष्ट्रन् प्रत्यय] (इन्द्र=विद्युतम्) २०४३ **अच्छिन्नस्य**=अखण्डितस्य (द्रव्यस्य) ७१४ [नञ्+छिद्+क्त]

अच्छेत अच्छ निर्मल स्वरूपमित प्राप्त (विश्वकर्मा=सभापति) ८५४ [अच्छ+इण् गतौ+क्त]

अच्छेदि छिद्येत् १११६१५ [छिदिर् द्वैधीकरणे धातो कर्मणि लुङ्]

अच्छोक्तिभि. अच्छ श्रेष्ठा उक्तयो वचनानि यासु स्तुतिषु ताभि १६१३ शोभनैर्वचोभि ११८४२ **अच्छोक्तौ**=सत्योक्तौ सम्यग्वचने वा ५४११६ [अच्छ+वच्+क्तिन् । वकारस्योकार सप्रसारणेन]

अच्यत सम्यक् प्राप्नुत ५५४१२ [अचु गतौ धातो रूपम्]

अच्यवयत् निपातयति २४४२ [च्युङ् गतौ, ततो णिजन्तात् लङ्]

अच्युतच्युत् योऽच्युतेषु च्यवते नाऽच्यावयति (इन्द्र=परमैश्वर्ये विद्युद्वा) २१२६ योऽच्युतमचलन्त च्यावयति (सूर्य) ६१८५ [अत्र पर्णशुषिवण् णिलुक् । अच्युत=च्युङ् गतौ+क्त, तत्रनिषेध । च्युत्=च्युङ् णिच्+क्विप् । एतयो समास]

अच्युतम् कारणरूपेण प्रवाहरूपेण वाऽविनाशि (रज=पृथिव्यादिलोकम्) १५६५ नाशरहितम् (विद्युज्ज्योति) ६१५१ अविनाशिनम् ७३३ **अच्युतः**=अक्षय (इन्द्र) १५७२ नाशरहित (गन्ध) २०२३ **अच्युता**=नाशरहितानि (गम्भराणि=अभ्राणि) २२४२ अविनाशिना (प्रेम्णा) ६२२६ क्षेतुमशक्येन (ओजसा) १८५४ क्षयरहितानि (जन्तुविशेषाणि) ६३१२

अच्युतानाम् कारणजीवानाम् ७२५ **अच्युतानि**=अक्षीणानि शत्रुसैन्यानि ३३०४ [अग्निरस्तुत श० १६१६]

अच्युतक्षित् योऽच्युतान् नाशरहितान् पदार्थान् क्षियति निवासयति स (ईश्वर) ५१३

अच्युतक्षित्तमः योऽच्युत क्षियति निवासयति सोऽतिशयित (ईश्वर) ७२५ [अच्युतोपपदात् 'क्षि निवासगत्यो' धातो क्विप् । अच्युतक्षिदसि दिव दृह (अन्तरिक्ष सभान) तै स० १२१२३]

अज जानीहि ११७४३ अजति प्रकाश प्रक्षिप्य द्योतयति, प्र०—अत्र व्यत्ययो लडर्थे लोडन्तगतो ण्यर्थश्च १२३१३ प्रक्षिप १४२३ समन्ताद् दूरे प्रक्षिप ६४७३१ विज्ञापय ६५५६ [अजगतिक्षेपणयोर् धातोर्लोट्]

अजकावम् योऽजान् जीवान् कावयति पीडयति तम् (रोग पापाचरण वा) ७५०१ [कुशब्दे धातोर्णिजन्तात् 'कर्मण्यण्' (अ० ३२१) सूत्रेणाण् प्रत्यय । अनेकार्थत्वाद् धातूनामत्र पीडनार्थे कु धातु]

अजगन् गच्छेत् । प्र०—अत्र लङि तिपि 'बहुल छन्दसि' इति शप श्लु 'मो नो धातो' इति मस्य न ११३०६ गच्छन्ति ११८३७ गतवत्यु ५३११० पुन पुन प्राप्नोति ११६१४ प्राप्नुया ३६७ गच्छन्तु ७१८७ [अजगन्=गतिकर्मा निघ० २१४]

अजगरः महान् सर्प २४३८

अजतम् प्रापयत २३६७ **अजति**=गच्छति ५३७८ प्राप्नोति ५३४८ जानाति प्रक्षिपति वा ११६११० प्रक्षिपति ६६६७ प्राप्य रक्षति १३३३ **अजतु**=ददातु प्राप्नोतु वा ६५४१० **अजते**=क्षिपति प्र०—अत्र व्यत्ययेनात्मनेपदम् । १.६५७ **अजथ**=गच्छथ ५५४४ **अजध्वम्**=प्राप्नुत ६४८११ [अज गतिक्षेपणयोर् धातो रूपाणि]

अजनत् जनयन्ति ४५५ **अजनन्**=जनयन्ति

२ १३ ५ **अजनयत्**=जनयति १२ १ **अजनयतु**=प्रसिद्ध करे स० वि० १३४ **अजनयन्**=जनयन्ति १ ६६.२ उत्पादयन्तु २०.३० **अजनयन्त**=जनयन्ति ४ १ १२. उत्पादयन्ति १ १६८ ६ प्रकटयन्ति १ ५६ २ **अजनयः**= जनयसि, प्र०—अत्र लडर्थेलङ् १ ६१ २२ जनये ३४ २२ **अजनि**=जनयेत् २ ३४ २ जनयति १ ७४ ३ जायेत १ १४४ ४ जायते २ ५ ४ **अजन**=जनयति २ १३ ७ **अजनिष्ट**=जायते १ १२३ ६ जनितवान् १७ ३२ जनयति ५ ३२ ३ जात १५ २७ जनयेत् २.५ १ जायते १ १३३ १ जनयति ५ ३२ ३ [जनी प्रादुर्भावे धातो रूपाणि । पर्णाडुपिवण्णेर्लुक् । छान्दसत्वात् शप श्यन् न भवति]

अजयत् बढाते हो ६ ३२ जयति २३ १७ जयेत् ४ ७ ११ जयेदुत्कर्षेत् ६ ३१ **अजयः**=जय १६ ७१. जयति १ ३२ १२ **अजयताम्**=उत्तम करो ६ ३१ [जि जये धातो रूपाणि]

अजनयन् अप्रकटयन् (जन) २ १० ३ [जनी प्रादुर्भावे+णिच्+शतृ । नञ्समास]

अजनयः अजायमाना (मरुत =वायव) १ १३४ ४ [नञ्+जनी प्रादुर्भावे+इण् (उणादि) प्रत्यय]

अजपालम् अजाना रक्षकम् (जनम्) ३० ११ [अज+ पा रक्षणे धातोर् णिजन्तात्+अण् प्रत्यय]

अजभर्त्तन धारण करो स० वि० १६८ [डुभृञ् धारणपोषणयोर् धातो रूपम्]

अजरन्तीम्=वयोहानिरहिताम् (मही=भूमिम्) २१ ५ [जरन्तीम्=जॄष् वयोहानो धातो शतृ+ङीप् । नञ्समास]

अजर! जरादोषरहित (अग्ने=विद्वज्जन) १ १२७ ६ योऽजे जन्मरहित ईश्वरे रमते तत्सम्बुद्धो (अग्ने=विद्वज्जन) प्र०—अत्र 'वाच्छन्दसि' इत्यविहितो ड १ १२७ ६ स्वय जरादोषरहित (अग्ने=ईश्वर) १ ५८ ४ जरारोगरहित (ब्रह्म) ६ २ ६ **अजरम्**=जरारहितम् (अग्निम्=ईश्वरम्) ५ ६ ४ जरादिरोगरहितम् (चक्रम्) १ १६४ २ वयो नाशहीनम् (श्रव =यश) १.१२६ २ जरारहित शरीरम् ६ २११ हानिरहितम् (इन्द्र =विद्युतम्) ६ ३८ ३ जराव्याधिरहितम् (रुद्र=परमात्मानम्) ६ ४६ १० सनातन नाशरहित (राष्ट्रम्) ऋ० भू० २२३ जरादोषरहित (चक्रम्) १ १६४ १४ अक्षय (ब्रह्म=महद्धनम्) ३ ८ २ नाशरहित (क्षत्र=राज्य धन वा) ७ १८ २५ **अजरः**=जरारोगरहित (सूर्यो जीवात्मा परमात्मा वा) ६ ६८ ६ स्वस्वरूपेण जीर्णाऽवस्थारहित (ईश्वर) १ ५८ २. जरारहित (राजा) ६ ४८ ३ वृद्धावस्थारहित (राजा) ५ ४४ ३ नाशरहित (पावक) ५ ७ ४ अवृद्धः (राजा) ५ ४ २ हानिरहित (सूर्य) १ १४५ २ नित्य (अग्नि =पावक) ३ २३ १ जरादोषरहित (परमेश्वर) ६ ४ ३ **अजरा** वयोहानिरहिता (उषा) १ ११३ १३ जरारहिता (रात्रि) ५ ३४ १ **अजरासः**=वयोहानिरहिता (अग्न्यादय पदार्था) ३३ १ जरारोगरहिता (मनुष्या) ७ ५४ २ **अजराः**=जन्मजरामृत्युधर्मादिरहितत्वात् कारणरूपेण नित्या (रुद्रा) १ ६४ ३ वयोहानिरहिता (प्रजाजना) १ १२७ ५ जरारोगरहिता (सज्जना) ३ १८ २ व्ययरहिता (अग्नय) ७ ३ ३ हानिरहिता. (त्वेषा =विद्यासुशीलप्रकाशा) १ १४३ ३ **अजरे**=अजीर्णे (द्यावापृथिवी=भूमिसूर्यौ) ६ ७० १ जीर्णाऽवस्थारहिते अहोरात्रे ३ ६ ४ स्वस्वरूपेण जरानाशरहिते (द्यावापृथिवी =सूर्यभूमी) ३४ ४५ **अजरेभिः**=जराऽऽदिरोगरहितैः (ज्ञानैः) ६ ६ २ अजरैर्हानिरहितैः (प्रबन्धैः) १ १६० ४. जरारहितैः (अश्विना=सभासेनाध्यक्षौ) १ ११२ ६ अविनाशिनौ (पक्षौ=परिग्रहो कार्यकारणरूपौ) १८ ५२ [जॄष् वयोहानौ धातो पचाद्यच् प्रत्यये जर, न जरोऽजर । अजरम्=अजरणधर्माणम् निरु० ४ २७]

अजरयू जरादिदोषरहितौ (सूर्याचन्द्रमसौ) १ ११६ २० ['अजर' सुबन्तादाचारेऽर्थे क्यच् । 'क्याच्छन्दसि' (अ० ३ २ १७०) सूत्रेण उ प्रत्यय । 'न छन्दस्यपुत्रस्य' इति प्रतिषेधान्न दीर्घो न चेकारादेश]

अजलः पक्षिविशेष २४ ३४

अजवसः वेगरहित (इन्द्र =सूर्य) २ १५ ६. जु वेगिताया गतौ, ['जुरिति सौत्रो धातु ' जवति गतिकर्मा निघ० २ १४ 'ऋदोरप्'इत्यप् प्रत्यय । "जवसवी छन्दसि०" वा० ३.३ ५६ इति वा अच् प्रत्यय । तत्प्रतिषेध]

अजस्य अनुत्पन्नस्याऽनादेर्जीवस्याऽव्यक्तस्य वा १७ ३० प्रकृतेर्जीवस्य वा १ १६४ ६ [जनी प्रादुर्भावे, ततो नञ्पूर्वात् ड प्रत्यय । ब्रह्म वाऽअज श० ६ ४.४ १५ आजा ह वै नामैषा यदजैतया ह्येन (सोम) अन्तत आजति तामेतत् परोऽक्षमजेत्याचक्षते श० ३ ३ ३ ६. प्रजापतेर्वै शोकादजा समभवन् श० ६ ५ ४ १६ यज्ञस्य शीर्षच्छिन्नस्य शुगुदक्रामत्ततोऽजा समभवत् श० १४ १ २ २३ तपसो ह वा एषा प्रजापते सम्भूता यदजा तस्मादाह तपसस्तनूरसीति श० ३ ३ ३ ८ आग्नेयी वा एषा यदजा तै० ३ ७ ३ १ अजा ह सर्वा ओषधीरत्ति श० ६ ५ ४ १६ सा (अजा) यत् त्रि सवत्सरस्य

विजायते तेन परम पशु श० ३ ३ ३ ८ सा (अजा) यत् त्रि सवत्सरस्य विजायते ते प्रजापतेर्वर्ण श० ३ ३ ३ ८ वाचोऽजम् श० ७ ५ २ ६

अजस्रम् सततम् १ १०० १४ निरन्तरव्यापक (ज्योति = तेज) स० वि० १६६ निरन्तरम् २६ ६ भा०— नित्यम् १२ १८ **अजस्रया**=निरन्तरया क्रियया ७ १ ३ अनुपक्षीणया (सूर्म्या=ऐश्वर्येण) १७ ७६ **अजस्रः**=अजस्र गमन विद्यते यस्य स (घर्म =यज्ञ) प्र०—अत्र 'अर्शआदिभ्योऽच्' इत्यच् १८ ६६ वहुरजस्र प्रकाशो निरन्तर विद्यते यस्मिन् स (भानु =सूर्य) ११ ५४ निरन्तर (जीव) ३ १ २१ निरन्तर गन्ता (घर्म =सूर्य) ३ २६ ७ **अजस्राः**=अहिंसका (आप्ता विद्वास) ४ ५५ २ (जमु मोक्षणे) दिवादि०, जमु हिसायामिति चुरादि०, जमु ताडने चुरादि०, ततो नञ्पूर्वात्। 'नमिकम्पिस्म्यजस०' अ० ३ २ १६७ इति सूत्रेण र प्रत्यय। स्वभावादय क्रियासातत्ये। 'अग्निरजस्र' श० ६ ७ ४ ३)

अजहात् जह्यात् १६ ७२ जहाति त्यजति ४ २६ ७ [ओहाक् त्यागे सामान्ये लड्]

अजुह्वत स्पर्द्धन्ते १ ५१ ५ **अजुह्वत**=स्पर्द्धन्ते १ ५१ ५ [ह्वेञ् स्पर्धाया शब्दे च, विकरणव्यत्ययेन श्लु, लडि रूपम्]

अज. न जायते य [illegible] (विद्वज्जन) १ १६२ २ प्राप्तव्यश्छाग १ १६२ ४ जन्मरहित (अर्वा=अग्न्यश्व.) १ १६३ १२ य कदाचिन्न जायते स ईश्वर ६ ५० १४ न जायते कदाचित् स (अहि =मेघ) २ ३१ ६ जिसका जन्म कभी न हो वह (ईश्वर) आर्याभि० २ १८ छागजातिविशेप २४ ३२ क्षेपणशील (अर्वा=गन्ताऽश्व) २६ २३ जन्म-मरण से रहित (परमेश्वर) स० प्र० ४२८ अजर-अमर आत्मा स० वि० १८६ पशुविशेप २५ २७ जन्मादिरहित (जीव) २५ २५ प्राप्तव्यो मेप २१ २६ प्रेरक (इन्द्र =सूर्य) ३ ४५ २ [नञ्+जनी+ड प्रत्यय]

अजा जन्मरहिता प्रकृति २३ ५६ पशुविशेप (छाग) ६ ४६ १२ **अजा इव**=यथाऽजौ २ ३६ २ [गतिक्षेपणार्थकाद् अजधातो पचाद्यच् स्त्रियाम् अजादिपाठाट्टाप्]

अजातशत्रुम् न जाता शत्रवो यस्य तम् (सत्पुरुपम्) ५ ३४ १ [जातशत्रुपदयोर्वहुव्रीहौ 'निष्ठा' अ० २ २ ३६ सूत्रेण जातशब्दस्य पूर्वनिपात]

अजातान् अप्रकटान्, भा०—अप्रसिद्धान् (अन्व०—शत्रून्) १५ १ युद्धेऽप्रकटान् शत्रुमेविनोऽमित्रान् (राजद्रोहिजनान्) १५ २ [जनी प्रादुर्भावे तत क्त प्रत्यय आकारश्चान्तादेश, तत्प्रतिपेध]

अजाति समन्ताज्जातिर्जनन यस्मिन् कुले तत् ५ २ ५ प्राप्नुयात् ५ २ १२ [जनी प्रादुर्भावे तत. स्त्रिया क्तिन् प्रत्यय]

अजानन् जानन्ति १ ७२ ८ **जानीयुः** १ ७२ १० [ज्ञा अवबोधने, सामान्ये लड् जादेशश्च]

अजानाम् जानीयाम् १ १६३ ६ **जानामि** २६ १७ **अजानि**=जानीयाम् २३ १६ दूर फैंकू आर्याभि० २ ४६। ['अजगतिक्षेपणयो' धातोर्लड्]

अजामयः सपत्न्य इव शत्रव ६ २५ ३ **अजामिम्**=भोजन-रहित स्थानम्। प्र०—अत्र जमुधातोर्वपादिभ्य इतीञ् १३ १३ अभार्याम् १ १२४ ६ अप्रसिद्ध वैरिणम्। १ १११ ३ अन्यामसम्बन्धाम् (प्रजाम्) ६ ४४ १७ अभोगम् ४ ४ ५ **अजामिभिः**=अवन्धुवर्गै शत्रुभि १ १०० ११ **अजामीन्**=असम्बन्धिनो दुष्टान् ६ १६ ८ [जमु अदने धातोर् इञ् प्रत्यय। याधातोर्वा वाहुलकान् मि प्रत्यय आदेश्च जकारादेश। जमतेर्गतिकर्मण नि० ३ ६ जाम्यतिरेकनाम, वालिशस्य वा निरु० ४ २० तत्प्रतिपेध]

अजामि प्राप्नोमि ५ १६ ४ **अजाव**=प्राप्नुयाव १ १७६ ३ अज [गतिक्षेपणयो धातोर्लेटि लोटि च रूपाणि]

अजायत जात ३१ १२ **जायते** ३१ ५ उत्पन्नोऽस्ति १ ११ ४ **जायेत** १ १२८ ४ **अजायथाः**=एतद्विद्याप्राप्त्या प्रकटो भव, अन्व०—प्रसिद्धो भव प्र०—अत्र लोडर्थे लड् १ ६ ३ प्रादुर्भूतो भव १ ५ ६ जायेथा १ १४१ ६ **अजायन्त**=उत्पन्ना ३१ ८ जायन्ते प्र०—अत्र लडर्थे लड् ३४ १२ प्रादुर्भवन्ति १ ३७ २

अजायमानः स्वस्वरूपेणाऽनुत्पन्न सन्, भा०—स्वयमनुत्पन्न (ईश्वर) ३१ १६ अनुत्पन्नोऽज ऋ० भू० १३२ [जनी प्रादुर्भावे कर्मणि शानच्, तत्प्रतिपेध]

अजावयः अजाश्चावयश्च ते ३१ ८ वकरी, भेड आदि दूध देने वाले पशु स० वि० १४७ वकरी, भेड तथा उपलक्षण मे अन्य सुखदायक पशु आर्याभि० २ ४६ [अजावि आलभते भूम्ने तै० स० ५ १ ६ २ तस्मादेता (अजावय) त्रि सवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्ति श० ४ ५ ५ ६

अजाऽश्व । अजोऽनुत्पन्नो विद्युदश्वो यस्य तत्सम्बुद्धौ

(विद्वज्जन) ६ ५५ ३ अजा अश्वाश्च विद्यन्ते यस्य तत्सम्बुद्धौ (विद्वन्) १ १३८ ४ **अजाऽश्वम्**=अजाऽश्वाश्वाश्चाऽस्मिँस्तम् (आदित्यम्) ६ ५५ ४ **अजाश्व**=अजा अश्वाश्च यस्य स (देव=विद्वान्) ६ ५८ २ [अजाश्वेतिपूषणमाह । अजाश्व अजा अजना निरु० ४ २५]

अजासः पुष्टिकर्त्तुरश्वा ६ ५५ ६ गन्त्राऽस्त्र-प्रक्षेपका (राजादयो जना) ७ १८.१६ [अज गति-क्षेपणयो पचाद्यच्, प्रथमाबहुवचने जसि असुग् आगम]

अजासि प्राप्नुया २३ १६ [अज गतिक्षेपणयोर्धातो सामान्ये लट्]

अजाः नित्या (वह्नय=वोढार) ६ ५७ ३ [न जायन्त इत्यजा, नञ्युपपदे जनेर्ड]

अजिगात् प्राप्नोति, प्र०—अत्र लडर्थे लङ् 'जिगातीति गतिकर्मसु पठितम् निघ० २ १४ १ ३३ १३

अजिघांसत् हन्तुमिच्छति ४ १८ १२ [हन् हिंसागत्योर्धातोरिच्छाया सन्, ततो लङि रूपम्]

अजिनसन्धम् जेतुमयोग्यान् य सन्दधाति तम् (नरम्)। प्र०—अत्र जिधातो कर्मणि नक् उणा० ३ २,३० १५ [नञ्+'जि जये' धातो 'इण्सिञ्०' उणादि० ३ २ सूत्रेण नक् प्र०—सन्ध=सम्युपपदे डुधाञ् धातो 'आतश्चोपसर्गे' सूत्रेण कर्तरि क प्रत्यय । तयो समास]

अजिन्वतम् प्रीणितम् १ ११२ ६ **अजिन्वत्**=जिन्वेत् १ १५६ ५ [जिवि प्रीणनार्थे भ्वादि०, ततो लङ् । जिन्वति गतिकर्मा निघ० २ १४ पदनाम निघ० ४ ३]

अजिरम् विषयादिषु प्रक्षेपक जराद्यवस्थारहित वा (मन) ३४ २ गन्तार प्रक्षेप्तारम् (विद्युदाख्य वह्निम्) ३ ६ ८ ज्ञानवन्तम् (विद्वासम्) १ १३८ २ प्राप्तव्य प्रक्षेपक वा (शस्त्राऽस्त्रम्), ४ ४३ ६ गतिमान् (मन=मन को) स० प्र० २४७ **अजिर**=य शीघ्र न गच्छति स (शूर) ६ ६४ ३ **अजिरा**=गन्तारौ ५ ५६ ६ यानाना प्रक्षेप्तारौ (हरी=अश्वौ) ३ ३५ २ **अजिराः**=अजिराणि क्षेप्तु गमयितुमनर्हाणि (वस्तूनि) १ १३४ ३ **अजिराय**=अश्ववार प्रक्षेप्त्रे (अश्वाय) १६ ३१ **अजिरासः**=प्राप्तशीला (कृपीवला) १ १४० ४ वेगवन्त (परमाणव) ५ ४७ २ [अज गतिक्षेपणयोर्धातो 'अजिरशिशिर' उणादि० १ ५३ सूत्रेण किरच् । निपातनात् 'वी'रादेशो न भवति । अजिरमिति क्षिप्रनाम । निघ० २ १५ अजिरा इति नदीनाम । निघ० १ १३

एष वै मृत्युर्यद्वायुरजिर एव नाम । जै० १ २६]

अजिहीत प्राप्नोति २ २३ १८ [ओहाङ् गतौ जुहोत्यादि० ततो लङ्]

अजीगः भृश प्राप्नुयात् १ १६३ ७ भृश गिरति ५ १ ३ जागरयति ६ ६५ १ प्राप्नोति ३ ५८ १ स्वव्याप्त्या निगरतीव १ ११३ ४ प्रगल्भान् करोषि १ ११३ ६ गच्छति प्राप्नोति ६ ४७ ३ जागरयति ७ १० १ अन्धकार निगरति । प्र०—गॄ निगरणे इत्यस्माद् 'बहुल छन्दसि' इति शप स्थाने श्लु 'तुजादीनाम्०, इति दीर्घश्च १ ६२ ६ [गॄ निगरणे धातोर्णिजन्ताद्वा लुङ् 'अजीग' इति पदनाम निघ० ४ ३]

अजीगमम् सम्यक् प्राप्नुयाम् ८.२६ [गम्लृ गतौ धातो 'बहुल छन्दसि' इति शप स्थाने श्लु]

अजीजनत् जनयन्ति ३ २३ ३ जनयति ४ ५३ २ **अजीजनन्**=जनयन्ति ३ २६ १३ **अजीजनः**=जनयति २२ १८ जनय ५ ८३ १० [जनी प्रादुर्भावे ततो णिजन्तात् सामान्ये लुङ् । अजीजनन्=अजनयन् । निरु० ७ २८]

अजीजपत जापयत ६ १२ उत्कर्षयत ६ १२ सम्यक् प्रापयत ६ १२ [जि जये धातोर्णिजन्तात् लुङ् 'क्रीङ्जीना णौ' अ० ६ १ ४८ सूत्रेणाकारादेशे । पुगागमे च रूपम्]

अजुर्यम् यदजूर्यु हानिरहितेषु साधु तत् (पदम्) १ १४६ ४ जीर्णाऽवस्थारहितम् (त्वाष्ट्र=सूर्यस्येद तेज) ३ ७ ४ अजीर्णम् (इन्द्र=शत्रुविदारक राजानम्) ६ १७ १३ युद्धविद्यासङ्गतम् (व्यवहारम्) १ ६७ १ हानिरहितम् (श्रव=श्रवणम्) ३ ५३ १५ **अजुर्य**=अजीर्णो युवा (इन्द्र=राजा) ६ ३० १ अजीर्णेषु भव (विद्वान् श्रीमज्जन) २ ८ २ **अजुर्या**=अजीर्णौ (जलाग्नी) २ ३६ ५ **अजुर्याः**=शरीरात्मजीर्णाऽवस्थारहिता (देवा=विद्वास) ३ ७ ७ अजीर्णा (उषस=प्रातर्वेला) ४ ५१ ६ ज्वररहितेषु साध्वी (पतिव्रता स्त्रिय) २ ३ ५ **अजुर्य**=अजीर्ण (जन) ६ २२ ६ [नञ् उपपदे 'जॄ वयोहानौ' धातो क्विपि अजुर्, 'बहुल छन्दसीति उकारादेश' 'तत्र साधुरिति' यत्]

अजुर्यमुश्च प्रक्षिपेयुर्नियच्छेयुश्च ५ ६ १० [अजु०=अजगतिक्षेपणयो धातो रूपम् । यमु=यमु उपरमे धातो रूपम्]

अजुषन्त जुषन्ते ४ ३३ ६ प्रीतवन्त सेवितवन्त (जना) ४ १ **अजुष्टम्**=सेवेध्वम् ५ ७७ २ **अजुषन्**=

सेवन्ते, प्र० अत्र 'बहुल छन्दसीति रुडागम १ ७१ १ अजुषत=प्रसन्न रहो २ ३७ ४ [जुप प्रीतिसेवनयोर्धातो रूपाणि। जुपते कान्तिकर्मा निघ० २ ६]

अजुष्टा असेविनौ (चन्द्रौषधिगणौ) २ ४० २ **अजुष्टात्**=धर्ममसेवमानात् (दुर्जनात्) ७ १ १३ [नञ्+जुप प्रीतिसेवनयोर्धातो क्त प्रत्यय]

अजुष्टिः असेवनम् ६ ३ २ अजुष्टो=अप्रतीताव-सेवने १ ६३ ५ [नञ् + जुप प्रीतिसेवनयोर्धातोर्भावे क्तिन्]

अजूर्यतः अप्राप्तजीर्णावस्थस्य (राज्ञ) ५ ४२ ६ अजीर्णस्य (राज्ञ) ३ ४६ १ **अजूर्यन्**=वृद्धा जायन्ते १ १५२ २ [जूष् वयोहानौ धातो जूरी हिंसावयोहान्यो (दिवादि०) धात्वोर्वा रूपम्]

अजेत प्रक्षिपेत्। प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ १२६ ६ [अज गतिक्षेपणयोर्धातोर्लिडि रूपम्]

अजेव यथाऽजौ २ ३९ २ [अजा+इवेति विग्रह अजा पशुविशेष]

अजोषाः जुषसे । प्र०—अत्र 'छन्दस्युभयथा' इत्यार्धधातुकसञ्ज्ञाश्रयणाल्लघूपधगुण 'छान्दसो वर्णलोपो वा' इति थासस्थकारस्य लोपेनेद सिध्यति १ ९ ४

अजोष्य. असेवनीय (पदार्थ) १ ३८ ५ [जुष् प्रीति-सेवनयोर्धातोर्ण्यत् प्रत्यय]

अजोहवीत् पुन पुन स्पर्द्धेत् १ ११७ १५ भृशमाह्वयेत् १ ११७ १६ भृश गृह्णीयात् १ ११६ १३ भृशमाह्वयति ५ ७८ ४ [ह्वेञ् स्पर्द्धायां शब्दे च, धातोर्णिजन्ताल् लुङ्, आदानार्थकजुहोतेर्वा]

अज्ञातकेताः अज्ञात केत प्रज्ञा यैस्ते मूढा (चोरा) ५ ३ ११ ['केत' इति प्रज्ञानाम । निघ० ३ ९]

अज्ञाताः न ज्ञाता (शत्रुसेना) ४ २३ ७ [नञ्+ज्ञा अवबोधने+क्त प्रत्यय]

अज्ञायि ज्ञायते ६ ६५ १ [ज्ञा अवबोधने तस्य कर्मणि लुडि रूपम्]

अज्म अजन्ति प्रक्षिपन्ति शत्रून् येन यस्मिन् वा। प्र०—अत्र 'सुपा सुलुग्०' इति विभक्तेर्लुक् 'अज्मेति सङ्ग्रामनाम०, निघ० २ १७,१७ ३८ विजय प्राप्नुम ऋ० भू० २२४ प्राप्तव्यम् (अन्नम्=अत्तव्य द्रव्यम्) ६ ४४ बलम् १ १५८ ३ **अज्मन्**=अजन्ति प्रक्षिपन्ति शत्रून् यस्मिन्नत्र (सङ्ग्रामे) १ ११२ १७ मार्गे ६ ३१ २ **अज्मनि**=पथि १ १६९ ५ **अज्मम्**=अजन्ति गच्छन्ति यस्मिन् मार्गे तत् (मार्गम्) ३ २ १२ गमनाऽधिकरण मार्गम् १ १६३ १० अजन्ति गच्छन्ति यस्मिंस्त मार्गम् ७९ २१ **अज्मस्य**=अन्तरिक्षे प्रक्षिप्तस्य (भुवनस्य) ४ ५३ ४ **अज्मेषु**=सङ्ग्रामेषु । १ ८७ ३ अजन्ति गच्छन्ति येषु सङ्ग्रामेषु ५ ८७ ७ प्रापकक्षेपकादिगुणेषु सत्सु १ ३७ ८ [अज गतिक्षेपणयोर्धातोर् औणादिको 'म' प्रत्यय, बाहुलकात् 'वी' भावो न भवति । 'अज्म' इति गृहनाम निघ० ३ ४ अज्मम् अजिनमाजिम् । निरु० ४ १३]

अज्यताम् मयुज्यताम् १२ ७०

अज्यते प्रक्षिप्यते ३ १७ १ व्यज्यते १ १८८ २ प्राप्यते, भा०—गृह्यते ३३ ८२ [गतिक्षेपणार्थकाद् अजधातो कर्मणि रूपाणि]

अज्यमानः चाल्यमान (अश्व) ५ ३० १४ [अज गतिक्षेपणयोर्धातो कर्मणि शानच्]

अज्यसे गम्यसे ६ २ ८ प्राप्यसे ३ ४० ६ [अज धातो कर्मणि लट्]

अज्येष्ठासः ज्येष्ठभावरहिता (भ्रातर =बन्धव) ५ ६० ५ **अज्येष्ठाः**=अविद्यमानो ज्येष्ठो येषान्ते (मर्या =मनुष्या) ५ ५९ ६ [ज्येष्ठ =वृद्धशब्दाद् आतिशयिक इष्ठन्, ज्यादेशश्च, तत्प्रतिषेध]

अज्राणाम् प्राप्तव्यानाम् (पदार्थानाम्) २१ ४३ कमनीयानाम् (जनानाम्) २१ ४४ **अज्रान्**=येऽजन्ति नित्य गच्छन्ति तान् (राजसेवकान्) ४ १९ ७ जगति प्रक्षिप्तान् (व्याप्तान् पदार्थान्) ४ १ १७ सततगामिन (लोकान्) ५ ५४ ४ **अज्राः**=प्रक्षेप्तार (गिरय =मेघा) ६ २४ ८ सततगामिन ५ ५४ ४ [गतिक्षेपणार्थकाद् अज धातोर्बाहुलकाद् उणादि 'रक्' प्रत्यय । 'अज्रा' इति क्षिप्रनाम । निघ० २ १५]

अञ्ज प्राप्नुहि २७ ४५ [अञ्चु गतियाचनयो, तस्य लोटि रूपम्]

अञ्जते प्रापयन्ति १ ९२ १ कामयन्ते १ १५१ ८ गच्छन्ति व्यक्ति कुर्वन्ति ७ ५७ ३ गच्छन्ति ७ २ ५ अञ्जन्ति गच्छन्ति १ ९२ ५ प्रकटीकुर्वन् (विद्वज्जन) २ ३ २ प्रकटीकुर्यु ३ ३८ ३ **अञ्जन्ति**=कामयन्ते प्रकटयन्ति वा ५ ४३ ७ कामयन्ते ३ ८ १ सुप्रकटयन्ति ६ ११ ४ व्यक्तीकुर्वन्ति ५ ३ २ प्रकटयन्ति ३ १४ ३ **अञ्जन्तु**=प्रकटीकुर्वन्तु ६ ६९ ३ कामयन्ताम् २३ ८ **अञ्जतः**=कामयेयाम् २ ३ ७ **अञ्जाते**=प्रसिध्यत

२ ६ १ प्रकाशयत २१ ३५ **अञ्जाथे**=प्रकट करो ३३ ३३ **अञ्जे**=कामये, प्र०—अत्र विकरणलुक् व्यत्ययेनात्मनेपदञ्च १ ६१ ५ स्वेच्छया गृह्णामि १ ६४ १ [अञ्जू व्यक्तिक्षणकान्तिगतिषु, ततो व्यत्ययेनात्मनेपद शप् च]

अञ्जन् व्यक्तो भवन् (अग्नि) २६ १ [अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, धातो शतृ प्रत्यय]

अञ्जय: प्रसिद्ध-प्रशसा (जना) १ १६६ १० [अञ्जू धातोर् औणादिक इनुप्रत्यय]

अञ्जसा शीघ्रम् १ १३६ ४

अञ्जसा व्यक्तेन शत्रूणा म्लेच्छनेन कान्त्या ज्ञापनेन वा ५ ५ साक्षात् ६ ५४ १ स्वच्छन्देन वेगवत्त्वेन ६ १६ ३ **अञ्जसि**=प्रकटे १ १३२ २ कामयमाने (सेनापतौ) १ १३२ २ **अञ्जसी**=प्रसिद्धा (वीरपत्नी) १ १०४ ४ **अञ्ज.**=सर्वै कमनीय (विद्वज्जन) १ १९० २ व्यक्तागमनशील, प्र०—'अञ्जू व्यक्तिकरण' इत्यस्य प्रयोग १ ३२ २

अञ्जान प्रसिद्धो, दिव्यान् गुणान् प्रकटीकुर्वन् (अग्नि =पावक) ३ १० ४ **अञ्जाना:**=ज्ञापयन्त (कन्या =कुमार्य्य) १७ ९७ प्रकटयन्त्य (कन्या = कुमार्य्य) ४ ५८ ९

अञ्जि व्यक्त रूपम् १ १२४ ८ कमनीय रूपम् १७ ९७ व्यक्त सुलक्षणम् ४ ५८ ९ गमनम् ७ ५७ ३ **अञ्जिभि** =प्रकटै (प्रकाशादिभि) २ ३४ १३. व्यक्तै रक्षणविज्ञानादिभि १ ८७ १ व्यक्तीकरणादिधर्मै १ ६४ ४ व्यक्तैर्विज्ञानादिगुणनिमित्तै १ ८५ ३ प्रकटीकरणैर्गुणै १ ११३ १४ विद्याशुभगुणप्रकटकारकै (सूरिभि = विद्वद्भि) ५ ५२ १५ साधनानि प्रकटयद्भि (सज्जनै), प्र०—सर्वधातुभ्य इन् उ० ४ १२३ इति कर्त्तरीन् प्रत्यय १ ३६ १३ **अञ्जिम्**=प्रसिद्धन्यायम्, भा०—तीव्रदण्डम् २३ २१ **अञ्जिषु**=प्रकटेषु व्यवहारेषु ५ ५३ ४ कामयमानेषु (जनेषु) २ ३६ [रूमयो वाऽएतस्य (आदित्यस्य) अञ्जयो वाघत शत० ६ ४ ३ १० छन्दासि वा अञ्जयो वाघत० ऐ० २ २ समञ्जते भानुना० निरु० १२ ७]

अञ्जिमन्त: प्रकृष्टा अञ्जय कामना विद्यन्ते येषान्ते (विद्वज्जना) ५ ५७ ५ [अत्र अञ्जिप्रातिपदिकात् प्रशसार्थे मतुप्]

अञ्जिसक्थ: अञ्जीनि प्रसिद्धानि सक्थीनि यस्य स (पशु पक्षी वा) २४ ४ [अञ्जिसक्थिपदयोर्बहुव्रीहिसमासे 'बहुव्रीहौ सक्थ्यक्ष्णो० अ० ५ ४ १ ३३ इति सूत्रेण समासान्तषच् प्रत्यये टिलोपे च रूपम्]

अणव: सूक्ष्मतण्डुला १८ १२ [अत्र अण्-शब्दार्थे (भ्वादि०) ततो 'धान्ये नित्' उणादि १ ९ सूत्रेण उ प्रत्यय [अणुरनु स्थवीयासमुपसर्गो लुप्तनामकरणो यथा सम्प्रति निरु० ६.२२ 'प्रियङ्गवश्च मेऽणवश्च' मे तै० स० ४७ ४ ३]

अणीय: सूक्ष्मम् (द्रव्यम्) ऋ० भू० ११९ [अत्र 'अणु-प्रातिपदिकात् आतिशयिक ईयसुन्]

अण्वीभि कारणै, प्रकाशाऽवयवै, किरणैरङ्गुतिभिर्वा, सूर्यपक्षे—किरणकारणाऽवयवै, प्र०—अत्र 'वोतो गुणवचनात्, अ० ४ १ ४४. अनेन ङीपि प्राप्ते व्यत्ययेन ङीन् १ ३ ४ अङ्गुलिभि २० ८७ ['अण्व्य' इत्यङ्गुलिनामसु पठितम् निघ० २ ५]

अतक्षत् तनूकरोति १ ६२ १३ **अतक्षत**= अवस्तृणीत १ १६१ ७ अतिसूक्ष्मा धिय कुर्वन्ति १ ८६ ३ **अतक्षन्**=तनूकुर्वन्ति २ ३१ ७ कुर्वन्ति ७ ७ ६ **अतक्षम्**=तनूकुर्याम् १ १०९ १ निर्ममे ५ २ ११ प्राप्नुयाम् ५ २९ १५ **अतक्षिषु:**=सूक्ष्मधिय सम्पादयन्तु १ १३० ६ संवृणुयु, प्र०—तक्ष त्वचने, त्वचन सवरणमिति १ १३० ६ [तक्षू तनूकरणे, तक्ष त्वचने च भ्वादी]

अतया: इव प्रतिकूल इव, प्र०—अत्राऽऽचारे क्विप् तदन्ताच्च प्रत्यय १ ८२ १ [नञ्युपपदे तथा शब्दात् आचारेऽर्थे 'सर्वप्रातिपदिकेभ्य इत्येके' वा० ३ १ ११ वार्तिकेन क्विप् प्रत्यय]

अतन् व्याप्नुवन् (सूर्य) ६ ६१ ९ [अत्र 'अत सातत्यगमने' धातो शतृप्रत्यय । अतति गतिकर्मा निघ० २ १४]

अतन्द्र: अनलस (विद्वज्जन) १ ७२ ७ [नञ्तन्द्राशब्दयोर्बहुव्रीहि]

अतन्द्रास: नियतरूपत्वादनालस्यादियुक्ता (युवतय) १ ९५२ अनलसा (राजभृत्या) ४ ४ १२

अतन्वत विस्तृत कृतवन्त, कुर्वन्ति करिष्यन्ति च ऋ० भू० १२७ तन्वते, विस्तृणन्ति, भा०—विस्तारयेयु ३१ १४ विस्तृत कुरुत १९ १२ **अतनोत्**=विस्तृणाति २ १७ ४ [अत्र 'तनु विस्तारे' धातोर्लङ् सामान्यकाले]

अतपत् तपति ३ ३१ १० [तप् सतापे धातोर्लङ्]

अतप्ततनूः ब्रह्मचर्य, सत्यभाषण, शम दम, योगाऽभ्यास, जितेन्द्रियता, सत्सङ्ग आदि तपश्चर्या से रहित अपरिपक्व आत्माऽन्त करणयुक्त (मनुष्य) स० प्र० ४२३

अतप्यमाने सन्तापरहिते (द्यावापृथिवी) १ १३५ ४ [नञ्+तप सन्तापे धातो कर्मणि शानच्]

अतमानम् अतत सतत प्राप्तम् (दिनम्) प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् २ ३८ ३ **अतमानाः**=अतन्त (वीरजना) प्र०—अत्र व्यत्ययेनात्मनेपदम् ६ ६ २ [अत सातत्यगमने भ्वादि० । व्यत्ययेनात्मनेपदत्वेन शानच्]

अतमेरुः न ताम्यति येन यज्ञेन स (यज्ञसम्पादक मुसन्तान) प्र०—तमुधातोर्बाहुलकादेरु प्रत्यय १ २३ न ताम्यति य स यज्ञकर्त्ता मनुष्य १ २३ [तमु काङ्क्षायाम् दिवादि । बाहु० कर्त्तरि एरु प्रत्यय । नञ्समास]

अतरत् तरेत् ४ २७ २ तरति ७ १८ ६ **अतरन्**=तरन्ति ४ ४५ ११ प्लावयन्ति, प्र०—अत्र लडर्थे लङ् १ ३६ ८ **अतरः**=तरति १ ३२ १४ [तॄ प्लवनसन्तरणयो (भ्वादि०) धातोर्लङ्]

अतर्पयः तर्पय ४ १६ ५ [तृप तृप्तौ (चुरादि०) धातोर्लङ्]

अतव्यान् यतमान ५ ३३ २ [अतव्यान्=(अमहान्) तवस इति महतो नामधेयम्]

अतष्ट तनूकुरुत १ ५४ १२ निष्पादयत ४ ३५ ५ तक्षेरन् १ १६३ २ तक्ष्णोति तनूकरोति २६ १३ [तक्षू तनूकरणे भ्वादि०, ततो लुङ् सामान्ये]

अतसम् काष्ठम् १३ १२ कूपम् ४ ४ **अतसस्य**=व्याप्तस्य (मेघस्य) ३ ७ ३ **अतसानि**=नैरन्तर्येण गन्त्रीणि त्रसरेण्वादीनि २ ४ ७ **अतसेषु**=विस्तृतेष्वाकाशपवनादिषु पदार्थेषु १ ५८ २ वृक्षादिषु ४ ७ १० व्याप्तव्येषु तृणकाष्ठ-भूमिजलादिषु १ ५८ ४ **अतसे**=निरन्तर आकाशे १ १६६ ३ [अत सातत्यगमने धातोर् औणादिकोऽसच् प्रत्यय । अतसा अतसानि नि० ५ १२]

अतसि=निरन्तर गच्छति, प्रापयति, प्र०—अत्र व्यत्यय १ ३० ५ [अत सातत्यगमने ततो लट्]

अतसाय्यः परोपकारे निरन्तर वर्त्तमान (इन्द्र = दातृ-सज्जन) २ १६ ४ **अतसाय्या**=अतन्ति निरन्तर सुखानि गच्छन्ति यया सा (ऊति =रक्षणक्रिया । प्र० अत्र 'अतधातोर्बाहुलकादौणादिक' आय्य प्रत्ययोऽसुगागमश्च । [सायणाचार्येणेद पदमतधातोराय्यप्रत्यय वर्जयित्वा साय्यप्रत्ययान्तर कल्पितवाऽडागमेन व्याख्यात तदशुद्धम् १ ६३ ६]

अतंसयत् तसयत्यलङ्करोति, भा०—भूषयति २३ २४ [तसि अलङ्कारे (चुरादि०) धातोर्लङ् ।]

अतः हेत्वर्थे १ २३ १२ अस्मात् (शिक्षणात्) १ २६ बन्धनात् १ २५ बन्धनादुपदेशाद्वा १ २६ कारणात् १ १०१ ८ स्थानात् ४ २६ ५ अन्व०—अधर्मात् १२ ४५ अन्व०—पृथिवीस्थानात् १ ६ ६ [इदम सर्वनाम्न पञ्चम्यन्तात् तसिल्तद्धितप्रत्यय]

अतान् अतेयु प्रकाशयेयु ६ ६७ ६ [अत सातत्यगमने भ्वादि० । अतति गतिकर्मा निघ० २ १४]

अतारिषुः तरन्तु ३ ३३ १२ **अतारिष्म**=तरेम १ १८३ ६ सन्तरेम प्लवेमहि वा १ ६२ ६ **अतारीत्**=तारयति ७ ४ ५ तरत्युल्लङ्घयति वा, प्र०—अत्र वर्त्तमाने लुङ् १ ३२ ६ [तॄ प्लवनसन्तरणयोर् धातोर्लुङ् ।]

अति अन्तिके २ २७ १६ अतिक्रमणे २७ ६ अतिशये २७ ६ अत्यन्ते ५ ४२ पृथक् करके आर्याभि० १ ३३ उत्लङ्घने १ ६७ ७ व्याप्तिम् ६ ४ ५ [अति इत्यभिपूजितार्थे निरु० १ ३]

अतिकुल्वम् लोमरहितम् (पदार्थम्) ३० २२

अतिकृशम् बहुत पतली (वस्तु) ३० २२

अतिकृष्णम् बहुत काली (वस्तु) ३० २२

अतिक्रमिष्टम् अतिक्रमणम् १ ८२ ३ **अतिक्रमे**=अतिक्रमितुमुल्लङ्घितुम् १ १०५ १६ **अतिक्रामेम**=उल्लङ्घयेम १ १०५ ६ [क्रमु पादविक्षेपे (भ्वादि०) धातो रूपाणि]

अतिक्रुष्टाय अत्यन्त निन्दकाय (दुर्जनाय) ३० ५ [अति+क्रुश आह्वाने रोदने च, ततो वर्त्तमाने क्त प्रत्यय]

अतिक्षरति अतिवर्षन्ति ५ ६६ ५ [क्षर सचलने भ्वादि०]

अतिख्यः उपदेशोल्लङ्घन कुर्या १ ४ ३ [ख्या प्रकथने (अदादि०) अतिशब्दोऽतिक्रमणेऽर्थे]

अतिगाहेमहि उल्लङ्घ्य मित्रभाव प्राप्नुयाम २ ७ ३ [अतिशब्दोऽतिक्रमणे, गाहू विलोडने धातु । व्यत्ययेन परस्मैपदम्]

अतिचितयेम चिति सञ्ज्ञानमाचक्ष्महि ४ ३६ ८. [अति+चित सञ्चेतनने चुरादि , ततो विधिलिङ्]

अतिच्छन्दसम् अतिजगत्यादिप्रतिपादितम् २८ ३४

अतिछन्दसा=अतिजगत्यादिना २८ ४५ **अति-छन्दसे**=अतिजगत्यादिछन्दोऽर्थाय २४ १३ [एषा वै सर्वाणि छन्दांसि यदतिच्छन्दा श० ३ ३ २ ११]

अतिजुगुर्यात् अत्युद्यच्छेत् १ १७३ २ (अति+गुरी उद्यमने तुदादि, ततो लिङ्, व्यत्ययेन शप्रत्ययस्य स्थाने श्लु]

अतितरेम उल्लङ्घ्य पार गच्छेम ३ २७ ३ [अति+तॄ+विधिलिङ्]

अतितस्थौ अतिशयेन तिष्ठति १ ६४ १३ [अति+स्था गतिनिवृत्तौ+यङ् लुङन्ताल् लिट्]

अतितुतुर्याम अतिविनाशयेम ५ ४५ ११ [अति+तुरी गतित्वरणहिंसनयोर् धातोर्लिङ् । व्यत्ययेन श्लु]

अतितृण्णम् अतिहिंसित व्याकुलत्वम् ३६ २ मन्द-त्वादिविकार आर्याभि० २ ३६ [उतृदिर् हिंसाऽनादरयो रुधादि, ततो निष्ठा (क्त)]

अतितृषाम अतितृष्णायुक्तान् कुर्याम ४ ३४ ११ [ञितृष् पिपासायाम्, व्यत्ययेन शप्]

अतित्विषन्त अतिप्रदीपयत, अतिप्रकाशिता भवत ५ ५४ १२ [अति+त्विष् दीप्तौ भ्वादि०]

अतिथयः अतिथिरूप (सज्जन लोग) स० वि० २०६ [अत सातत्यगमने धातोर् औणादिक इथिन् प्रत्यय]

अतिथिग्वम् योऽतिथीन् गच्छति तम् (राजादिजनम्) ६ १८ १३ अतिथीन् प्राप्नुवन्तम् (सेनापतिम्) १ ११२ १४ योऽतिथीन् गच्छति गमयति वा तम् (विद्वज्जनम्) ४ २६ ३ **अतिथिग्वस्य**=अतिथीन् गच्छत (प्रजाजनस्य) २ १४ ७ योऽतिथीनागच्छति तस्य (प्रजाजनस्य) ६ ४७ २२ अतिथीन् गच्छति गमयति येन वा तस्य १ ५३ ८ **अतिथिग्वाय**=अतिथीन् गच्छते (विद्वज्जनाय) १ १३० ७ अतिथीना गमनाय ॥ प्र०—अत्राऽतिथ्युपपदाद् गम्धातोर्बाहुलकादौ-णादिको ड्व प्रत्यय १ ५१ ६ अतिथीन् गच्छते १ १३० ७ योऽतिथीन् गच्छति तस्मै ६ २६ ३ [अतिथि+गम्लृ गतौ+ड्व प्रत्यय) **अतिथिपतिः**=अतिथियों का पालन करने वाला (गृहस्थजन) स० वि० २०६ [अतिथि+पा रक्षणे+डति प्रत्यय] ।

अतिथिम् अविद्यमाना तिथिर्यस्य तम्, भा० उत्तम-गुणम् (सज्जनम्) ३ १ न विद्यते नियता तिथिर्यस्य तम् (सत्पुरुषम्) १ ५८ ६ नित्य भ्रमणशील सेवितुमर्हम् (अग्निवद् विद्याप्रकाशप्रद जनम्) १.४४ ४ सत्योपदेशकम् (सत्पुरुषम्) ४ २ ७ अतिथिमिव पूजनीयम् (पतिं=स्वर्गमनम्) १ १२७ ८ सर्वदोपदेशाय भ्रमन्तम् ५ ८ २ अविद्यमाना तिथिर्गमनाऽऽगमनयोर्यस्य तम् (सज्जनम्) ७ ८.४ पूजनीयमनित्यस्थितिं विद्वांसम् (जनम्) ३ २६ २ अतिथिमिव वर्त्तमानम् (विद्वास जनम्) ६ १५ १ पूजनीयम् (राजानम्) ६ ७ १ अतिथिवद् वर्त्तमानम् (अग्नि=विद्याप्रकाशित विद्वांसम्) १ ८६ ३ अनियत-तिथिमुपदेशकम् १० ३० अतिथिवत् सत्कर्त्तव्यम् (चेतन=परमात्मानम्) ३ ३ ८ [अत सातत्यगमने धातोर् औणा० इथिन् प्रत्यय । अथवा नञ्तिथ्योर्बहु-व्रीहि]

अतिथिः जिसकी कोई नियत तिथि नही वह (सन्यासी जन) स० वि० २०६ जो विद्वान्, धार्मिक, निष्कपटी, सबकी उन्नति चाहने वाला, जगत् मे भ्रमण करता हुआ सत्य उपदेश से सब को सुखी करता है वह चौथा (सन्यासी जन) स० प्र०—४३६ अनियततिथि (जीवात्मा) ४ ४० ५ अविद्यमान नियततिथि (सत्पुरुष) ५ १ ८ महाविद्वान् भ्रमणशील उपदेष्टा परोपकारी मनुष्य १ ७३ १ सतत गन्ता (अग्नि) ३ २ २ पूजनीय, भा०—मान्य (राजा) ३ १६ सर्वत्र भ्रमणकर्त्ता ५ १ ६ अभ्यागत इव वर्त्तमान (अग्नि=विद्वज्जन) ४ १ २० अकस्मादागत (विद्वज्जन) ५ ४ ५ पूजनीय आप्तो विद्वान् (जन) ५ १८ १ नित्य भ्रमणकर्त्ता विद्वान् (जन) १२ ३४ अविद्यमाना तिथिर्यस्य तद्वन्मान्य (परमेश्वर) १० २४ आप्तो विद्वानिव (सत्पुरुष) ७ ६ ३ सत्योपदेशक (विद्वान् जन) ७ ४२ ४ महाविद्वान् भ्रमणशील उपदेष्टा परोपकारी मनुष्य १ ७३ १ अविद्यमाना तिथिर्यस्य स राज्यरक्षणाय यथासमय भ्रमणकर्त्ता (महाविद्वान्) १२ १४ पूजनीय (राजा) ५ ३ ५ पूजनीयोऽविद्यमानतिथि (राजा, विद्वान् जनो वा) २ २ ८ **अतिथीन्**=अतिथियों के प्रति स० वि० २०६ अनियततिथीन् (विदुष) ५ ५० ३ **अतिथीनाम्**=अतिथि अर्थात् उत्तम सन्यासियो का स० वि० २१० **अतिथेः**=सन्यासी से स० वि० २१० अविद्यमानतिथेर्विदुष ५ १ [अत सातत्यगमने धातोर् इथिन् प्रत्यय । अतिथिरभ्यतितो गृहान् भवति । अभ्येति तिथिषु परकुलानीति वा, गृहाणीति वा नि० ४ ५ अतति गतिकर्मा निघ० २ १४ पूर्व हि अतिथिमाशयन्ति काठकस० १२ ब्राह्मणायातिथये सर्पिष्वन्त पचति काठ० १६ १२ यो वै भवति य श्रेष्ठतामश्नुते स वा अतिथि-भवति ऐ० आ० १ १ १ अतिथिर्दुर्भरणमत् काठ ३४ १४ अतिथय आगताय सर्पिष्वदातिथ्य क्रियते तै स० ५.२ २ ४.

अतिदीर्घम् अतिशयेन दीर्घम्, भा०—महत्पदार्थम् ३० २२ [दीर्घ द्राघते निरु० २ १६]

अतिद्रुतः अत्यन्त शीघ्रकारी (सोम =निष्पादितौषधिरस), योऽतिद्रवति स (सोम =सोमलताद्योषधिगण) १९ ३ [अति+द्रु गतौ भ्वादि०+क्त प्रत्यय]

अतिधक् अतिदहति २ ११ २१ अतिदहेत् २ १६ ६ अतिदह्यात् २ १५ १० अतिदहे २ १६ ६ **अतिधक्तम्**=अतिदहतम् १ १८३ ४ [अति+दह भस्मीकरणे भ्वादि० धातोर् लङ् प्रत्यय। हकारस्य घकार, भष्भावेन दकारस्य धकार, अवसाने च चर्भावेन ककार। अतिधक्=अतिहाय दा नि० १ ७]

अतिधन्वेव महेष्वासा इव (वीरजन इव) २० ५३ [अति+धनवान्ये+वन् प्रत्यय]

अतिनिष्टतन्युः अतिविस्तृणीयु १ १४१ १३ [अति निस्+तनु विस्तारे धातोर्लिटि रूपम्]

अतिनेनीयमानः भृश न्यायव्यवस्था प्रापयन् (इन्द्र =राजा) ६ ४७ १६ [अति+णीञ् प्रापणे+यङ्, तत कर्मणि शानच्]

अतिनेषि अतिनयसि। प्र०—अत्र विकरणाभाव ३१५ ३ [अति+णीञ् प्रापणे+लट्। 'बहुल छन्दसी' ति शपो लुक्]

अतिपर्षत् उल्लङ्घ्य पार प्रापयतु ३ २० ४ अतिपारयेत् ५ २५ ६ **अतिपर्षथः**=अतिसिञ्चथ ५ ७३ ८ **अतिपर्षन्**=उल्लङ्घयेयु ७ ४० ४ **अतिपर्षि**= अतिपारयसि ५ ४ ६ अत्यन्त पालयसि ५ ३ ११ अतिपूरयसि ७ २३ २ [अति+पृषु सेचने (भ्वादि०) पृ पूरणे (चुरादि०) धातोर्वा लेटि रूपम्]

अतिपारय उल्लङ्घ्य पार प्रापय १ ९७ ७ [अतिरतिक्रमणे+पार कर्मसमाप्तौ (चुरादि०) धातोर्लोट्]

अतिपारयः योऽत्यन्त पारयति स (इन्द्र =राजा) ६ ४७ ७ [अति+पार कर्मसमाप्तौ धातो कर्त्तरि 'अनुपसर्गाल् लिम्पविन्दधारिपारि' अ० ३ १ १३८ सूत्रेण श प्रत्यय]

अतिप्रसस्रे अतिप्राप्नोति ६ १८ ७ [अति+प्र+सृ गतौ (भ्वादि०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

अतिबद्बधे अतिशयेन वीभत्सने १ ८१ ५ [अति+बध बन्धने (भ्वादि०) बध सयमने धातोर्वा लिटि रूपम् बद्बधानान्=वाबध्यमानान् निरु० १० ६]

अतिमतिम् अतिशयिता चाऽसौ मतिश्च नाम् (प्रशस्तबुद्धिम्) १ १२९ ५ [अति+मनु अवबोधने (दिवादि०)+क्तिन् स्त्रियाम्]

अतिमन्ये अतिमान कुर्याम् १ १३८ ४ [अति+मन ज्ञाने (दिवादि० धातोर्लट्]

अतिमृत्युम् मृत्युमतिक्रान्त मृत्यो पृथग्भूत मोक्षाख्यमानन्दम् ऋ० भू० १३१ [अति+मृङ् प्राणत्यागे धातोर् औणादिक त्युक् प्रत्यय]

अतियाजस्य योऽतिशयेन यष्टु योग्यस्य यज्ञस्य ६ ५२ १ [अति+यज देवपूजासगतिकरणदानेषु धातो क्रियाया क्रियार्थायामुपपदे घञ् प्रत्यय]

अतियाथः अत्यन्त गच्छत ५ ७७ ३ [अति या प्रापणे (अदादि०) धातोर्लट्]

अतिरत् सन्तरति प्लावयति, प्र०—अत्र विकरणव्यत्ययेन श० १ ३३ १३ सन्तारयति २ १७ २ उल्लङ्घयतु ३ ३४ १ सन्तरेत् ३ ३४ ५ तरति ६ ६ १ **अतिरतम्**= तमो हिस्त, प्र०—अवतिरतिरिति वधकर्मा निघ० २ १९/१ ९३ ४ तरेतम् १ ११६ १० उल्लङ्घयतम् १ १५२ १ **अतिरन्त**=तरन्ति ७ ७ ६ **अतिरम्**= सन्तरेयमुल्लङ्घेयम् ११ ८२ **अतिर.**=शत्रुबल प्लावयति, प्र०—अत्र लडर्थे लुङ्, विकरणव्यत्ययेन शप स्थाने श्न १ ११ ७ हन्या ४ ३० ३ हसि ४ ३० ७ [तॄ प्लवनसन्तरणयोर् धातो रूपाणि। विकरणव्यत्ययेन शप स्थाने श, तस्य च ङित्वात् गुणाऽभावे 'ऋत इद्धातो' इतीत्वे च रपरत्वे च रूपाणि। निघण्टो च वधार्थे पाठाद् हिंसार्थेऽपि]

अतिरुग्भ्याम् अतिरुचीच्छाभ्याम् २५ ३ [अति+रुच् दीप्तावभिप्रीतौ च+क्विप्]

अतिरोहति अतिरिक्त है स० प्र० २८२ व्यतिरिक्त सन् जन्मादिरहितोऽस्ति ऋ० भू० १२० अत्यन्त वर्धते ३१ २ [अति रुह बीजजन्मनि प्रादुर्भावे च धातोर्लट्]

अतिलोमशम् अतिशयेन लोमयुक्तम् (पदार्थम्) ३० २२ [अति+लोमप्राति० 'लोमादिपामादि०' सूत्रेण मत्वर्थ श प्रत्यय]

अतिवक्षत् अतिवहेत् प्रापयेत् ६ २२ ७ [अति+वह प्रापणे धातोर्लेटि रूपम्। 'सिब्बहुल लेटी' ति सिप् प्रत्यय]

अतिविधे अतिवेद्धु योग्यौ (मित्रावरुणौ=राजाऽमात्यौ) ५ ६२ ६ [अति+विध विधाने (तुदादि०) तत 'इगुपधज्ञा०' अ० ३ १ १३५ सूत्रेण क प्रत्यय]

अतिविध्यति अतिशयेन ताडयति ४ ८ ८ [अति व्यध ताडने दिवादि, ततो लट्]

अतिवेति अतिप्राप्नोति ५ ४४ ७ [अति+वी गतिप्रजनकान्त्यसनखादनेषु अदादि, ततो लट्]

अतिव्याधी अतिशयेन व्यद्धु शत्रूँस्ताडयितु शील यस्य स (राजन्य=राजपुत्र) २२ २२ [अति+व्यध् ताडने धातोस्ताच्छील्ये णिनि प्रत्यय]

अतिव्रजद्भिः अतिशयेन गमयितृभिर्द्रव्यै (रथै) १ ११६ ४ अत्यन्त वेगवद्भि (रथै) ऋ० भू० १६० [अति+व्रज गतौ भ्वादि, ततश्शतृप्रत्यय]

अतिशुक्लम् अतिश्वेत (वस्तु) ३० २२

अतिष्कद्वरीम् अतिशयेन या स्कन्दति जानाति ताम् (स्त्रीम्) ३० १५ [अति+स्कन्दिर् गतिशोषणयोर्भ्वादि, तत क्वरप् प्रत्यय]

अत्यतिष्ठत् उल्लङ्घ्य तिष्ठति, भा०—यत्र जगन्नास्ति तत्रापि पूर्णोऽस्ति ३१ १ [अति+स्था गतिनिवृत्तौ धातोर्लङ्]

अतिष्ठत् उत्तिष्ठति ४ १८ ८ तिष्ठतु १ ११६ १७ तिष्ठेत् १ १६३ २ तिष्ठति १ १६४ ९ महातप को करता हुआ स० वि० ९३ **अतिष्ठन्**=तिष्ठन्ति प्र०—अत्र वर्त्तमाने लङ् १ ३२ ११ **अतिष्ठन्त**=स्थिरा भवेयु, प्र०—अत्र लिङर्थे लङ् १ ११६ १ ३२ १० **अध्यतिष्ठत**=अधिष्ठातृत्वेन वर्त्तते १७ २० उपरि तिष्ठति २९ १३ [स्था गतिनिवृत्तौ धातो रूपाणि]

अतिष्ठन्तीनाम् चलन्तीनाम् (नदीनाम्) १ ३२ १० [अति+स्था गतिनिवृत्तौ+शतृ प्रत्यये स्त्रिया रूपम्। अतिष्ठन्तीनाम्=अस्थावराणाम् नि० २ १६]

अतिस्थिपः सस्थापये १ ५६ ५ [अति+स्था-धातोर्णिजन्तस्य रूपम्]

अतिस्थूलम् बहुत मोटी (वस्तु) ३० २२

अतिसर्पति अतिशयेन गच्छति ११ ७४ [अति+सृप्लृ गतौ भ्वादि, ततो लट्। सर्पति गतिकर्मा निघ० २ १४]

अतिसश्चतः समवेता (प्रजा) ३ ९ ४ [सश्चति गतिकर्मा निघ० २ १४]

अतिसूदयन्तु अतिक्षरयन्तु दूरीकुर्वन्तु ४ ३९ १ [अति+पूद् क्षरणे चुरादि, ततो लोट्]

अतिसस्त्रेम अतिगच्छेम ६ ११ ६ [अति+सृ गतौ जुहोत्यादि, ततो लिङ्]

अतिस्निधः उल्लङ्घनत्वेन विद्यादिसद्व्यवहारविरोधिन (अविद्यादिकुसस्कारान्) ३ १० ७ अतिसहनशीला (प्रजा) ३ ९ ४

अतिस्रुतः अत्यन्तज्ञानवान् (राजप्रजाजन) १० ३१ [अति+स्रु गतौ+वर्त्तमाने क्त प्रत्यय]

अतिहाय अतिशयेन त्यक्त्वा १ १६२ २० अत्यन्त त्यक्त्वा २५ ४३ [अति+ओहाक् त्यागे+क्त्वा। समासे क्त्वो ल्यप्]

अतिह्रस्वम् अतिशयेन ह्रस्वम् (भा०—सूक्ष्मपदार्थम्) ३० २२

अतीत्वरीम् अतिगमनशीला (स्त्रीम्) ३० १५ [अति+इण् गतौ (अदादि०) धातोस्ताच्छील्ये 'इण्नश०' अ० ३ २ १६३ सूत्रेण क्वरप्, ङीप्]

अतीतृपन्त अतिशयेन तर्पयत १९ ३६ **अतीतृपाम**=तर्पयाम ७ २९ [अति+तृप प्रीणने (दिवादि०) धातोश्शतृप्रत्ययोऽन्यत्र च लोट् सहितायामति शब्दस्य दीर्घ]

अतीतृषाम अतितृष्णायुक्तान् कुर्याम ४ ३४ ११ [अति+ञितृषा पिपासायाम् (दिवादि०) धातोर्लोट्। विकरणव्यत्ययेन च श्यन् न भवति]

अतीयाम उल्लङ्घेम त्यजेम ५ ५३ १४ [अति+इण् गतौ (अदादि०) धातोर्लिङ्]

अतीरज्यसि अतिशयतया ऐश्वर्य प्राप्नोषि १ ५५ ३ [अति+रञ्ज रागे (दिवादि०) धातोर्लट्। 'अनिदिताम्' इति न लोप]

अतीहि अतिगच्छ ३ ४५ १ सर्वत प्राप्नुहि, प्र०—अभिपूजितार्थे निरु० १ ३ अतिक्रम्योल्लङ्घय, अन्व०—तस्मात्पार गमय ३ ६१ [अति+इण् गतौ (अदादि) धातोर्लोट्]

अतुष्टवम् प्रशसेयम् ३ ५३ १२ [ष्टुञ् स्तुतौ (अदादि०) धातोर्लङ्। 'बहुल छन्दसी' ति शप श्लु]

अतूतुजिम् भृशमहिंस्रम् (वीरपुरुषम्) ७ २८ ३ [नञ्+तुज हिसायाम् (भ्वादि०) धातोर्यङ्, तत औणादिक इक् प्रत्यय। 'तुजादीनाम्०' इत्यभ्यासस्य दीर्घश्च]

अतूर्त्तपन्थाः अतूर्त्तोऽहिसित पन्था यस्य स (मेघ) ५ ४२ १ [अतूर्त्तपन्था=अत्वरमाणपन्था नि० ११ २०]

अतूर्त्तम् अहिसितम् (पुत्रम्) ५ २५ ५ **अतूर्त्तः**=अहिसित (राजा) १ १२९ १ (अतूर्त्त=अतूर्ण इति वा ऽत्वरमाण इति वा नि० ९ १०. अतूर्त्तो होतेत्याह न ह्येत

(अग्निम्) कश्चन तरति तै० स० २ ५ ६ २ ३ अथ वा अग्निरतूर्त्तो होतेम ह न कश्चन तिर्यञ्च तरति ऐ० २ ३४ न ह्येत रक्षासि तरन्ति तम्मादाहातूर्त्तो होतेति श० १४ २ १२)

अतृणत् हिनस्ति ४ १ १६ सन्तारयति, प्र०—अत्र व्यत्ययेन श्ना २ १५ ३ [तृणेलिह वधकर्मा निघ० २ १६ उतृदिर् हिंसानादरयो (रुधादि०) धातोर्लङ्]

अतृन्दन् हिंस्यु ३ ३१ ५ [उतृदिर् हिंसानादरयो (रुधादि०) धातोर्लङ्]

अतृपास. अतृप्ता सन्त (श्रोतृजना) ४ ५ १४ [नञ्+तृप प्रीणने धातो 'इगुपधज्ञा०' सूत्रेण क प्रत्यय]

अतृष्णुवन्तम् भोगेष्वतृप्तम् (अधार्मिक जनम्) ४ १६ ३ [नञ्+तृप् प्रीणने धातोर् औणा० नु प्रत्यय, ततो मतुप्]

अतृष्यन्ती: तृष्णादिदोपरहिता (कुमार्य) १ ७१ ३ [नञ्+ञितृषा पिपासायाम् धातो शतृप्रत्यय । स्त्रिया रूपम्]

अत्कम् अतति व्याप्नोति त वायुम् ४ १६ १३ व्याप्तम् (वव्रि=रूपम्) ५ ७४ ५ व्याप्तिशील वस्त्रम् ६ २६ ३ निरन्तरम् १ ६५ ७ कूपमिव १ १२२ २ कूपम् ४ १८ ५ **अत्कान्**=व्यक्तान् (अश्वान्=अग्न्यादीन्) ५ ५५ ६. **अत्कैः**=अत्तुमर्हैं (गुणकर्मस्वभावै) २ ३५ १४ अश्वै ६ ३३ ३ [अत सातत्यगमने धातो 'इण्भी०' उणादि० ३ ४३ सूत्रेण कन् प्रत्यय । अतति गतिकर्मा निघ० २ १४ अत्क वज्रनाम निघ० २ २० अश्वनाम निघ० १ १४]

अत्त भक्षयत २३ ८ **अत्ति**=भक्षयति १ ६५ ४ भुङ्क्ते २ ३५ ७ **अत्तु**=भुङ्क्ताम्, प्राप्नोतु १६ ५१ [अद् भक्षणे (अदादि०) धातोर्लोट्]

अत्तवे आनन्दभोगाय ऋ० भू० २६५ अत्तु भोक्तुम् १६ ७० [अद् भक्षणे धातो 'तुमर्थे सेसेन०' अ० ३ ४ ६ सूत्रेण तवेनुप्रत्यय]

अत्ता हवींषि प्रयत्नयुक्तानि कर्माणि देययोग्यानि उत्तमानि अन्नानि वा ऋ० भू० २६२

अत्नत प्रयतध्वम् १ ८० १६ निरन्तर गच्छत ५ ४८ २ तन्वते, प्र०—अत्र लडर्थे लुङ् 'वहुल छन्दसि' इति विकरणाऽभाव 'तनिपत्योश्छन्दसि' अ० ६ ४ ६६ अने-नोपधालोप १ ३७ १० [तनु विस्तारे धातोर्लङ् । वहुल छन्द-सीति विकरणलुक् । अत्नत=अतननिपन निरु० १२ ३४]

अत्यक्रमुः उल्लङ्घ्य क्राम्यन्ति, भा०=उल्लङ्घ्य पलायन्ते १२ ८४ [अति+क्रमु पादविक्षेपे धातोर्लुङ्]

अत्यनयन् प्राप्नुवन्ति १० १ [अति+णीञ् प्रापणे धातोर्लङ्]

अत्यम् व्याप्तिशीलम् (अश्वम्) १ १२६ २ अतन्तमश्वम् १ १३५ ५. अनति व्याप्नोत्यध्वानमश्वम् ५ २५ ६ वेगवन्त वाजिनम् ७ ३ ५ अतितु व्याप्तु योग्यम् (अश्वम्) १२ ४७ व्यापक शीघ्रगामिन वायुम् ३ २२ १ अतति व्याप्नोति तत्रभवम् (हवि=होतव्य द्रव्यम्) ५ ४४ ३. व्याप्तिशीलम् (वाजिनम्=विज्ञानवन्त जनम्) १ १२६ २ **अत्यमिव**=यथाऽश्वम् १ १३० ६. **अत्यस्य**=अश्वस्य १ १८० २ **अत्यः**=अतति व्याप्नो-तीति (पदार्थविद्याविद्विद्वान्) १ १४६ ३ साधुरश्व १ ६५.३ सतत गन्ता (वाजी=सुशिक्षितस्तुरङ्ग) ३ ३८ १ अश्व १ ५८ २ व्याप्तिशीलोऽश्व (अग्नि=पावक) ३ २ ७ योऽनति व्याप्नोत्यध्वान सोऽश्व, भा०—यानादीना सद्यो गमयिता (अग्नि) ३३ ७५ योऽतति सतत गच्छति स (भौ० अग्नि=सूर्यरूप) २२ १६ अतति व्याप्नोति मार्ग स (अश्व) ५ ३० १४ **अत्या**=यावततो-ऽध्वान व्याप्नुतस्तौ (वाय्वग्नी) ४ २ ३ **अत्या इव**=अश्ववत् ५ ५६ ३ **अत्यान्**=येऽतन्ति मार्गान् व्याप्नुवन्ति तान् (अश्वान्) १ १२६ ४ सुशिक्षयाऽश्वान् ३ ३४ ६ **अत्यानिव**=यथाऽश्वा सतत सद्यो गच्छन्ति तथा २ ३४ ३ **अत्याय**=सर्वविद्याव्यापनशीलाय विद्वज्जनाय) ३ ७ ८ **अत्यासः**=येऽनन्ति अध्वान व्याप्नुवन्ति ते (मर्या=मनुष्या) ७ ५६ १६ **अत्या.**=अतन्ति सर्वत्र व्याप्नुवन्ति त आकाशादय ३ ५६ २ सतत गामिनोऽश्वा ५ ३१ ६ सकलशुभगुणकर्मव्यापिन (राज्यकर्माऽधिकारि-जना) ६ ४४.१६ सततगमना (विद्युदादय) १ १८१ २ अतितु शीला (अश्वा=अग्न्यादय) १ १६३ १० नितग गमनशीला अश्वा १ १७७ २ **अत्येन**=अश्वेनेव वेगेन २ ३४ १३ **अत्यैः**=अश्वैरिव वेगवद्भि (यानै) ६ ३२ ५ (अत्य अश्वनाम निघ० १ १४ अत्या अतना निघ० ४ १३ (हे ऽश्व त्वम्) अत्योऽसि ता० १ ७ १ तस्मादश्व पशूनत्येति तस्मादश्व पशूना श्रैष्ठ्य गच्छति श० १३ १ ६ १ अत्योऽसीत्याह तस्मादश्व सर्वान् पशूनत्येति तस्मादश्व सर्वेपा पशूना श्रेष्ठ्य गच्छति तै० ३ ८ ६ १]

अत्यंहाः अतिक्रान्तमहो दुष्कृत येन स (अग्न्व=ईश्वर) १७ ८० [अति+हन् धातोरसुन् प्रत्यय, हन्तेश्च

स्थानेऽह आदेश । अहश्चाहुश्च हन्तेर्निरुद्धोपधाद् विपरीतात् निरु० ४ २५]

अत्यरिच्यत अतिरिक्तो भवति, भा०—तस्माद् (जगत) पृथग्भूतस्तत्कारणरूपाऽविनाशी व्याप्तोऽपीश्वरो भवति ३१५ परमेश्वर सर्वेभ्यो भूतेभ्योऽतिरिक्तो पृथग्भूतोऽस्ति ऋ० भू० १२२ (अति+रिचिर् विरेचने (रुधादि०) धातोर्लङ् । विकरणव्यत्ययेन श्यन्]

अत्यायातम् देशान्तरं क्रमणाऽऽगच्छतम् ५ ७५ २

अत्यायाहि=अतिवेगेनागच्छोल्लङ्घ्य वा ३ ३५ ५ [अति+आ+या प्रापणे (अदादि) धातोर्लोट्]

अत्यावृणीत अत्यावृणुयात ७ ३३ २ [अति+आ+वृञ् वरणे (स्वादि०) धातोर्लिङ्]

अत्येतवे एतु प्राप्तुम् ५.८३ १० [अति+इण् गतौ धातो 'तुमर्थे सेसेन०' सूत्रेण तवे प्रत्यय]

अत्येति व्याप्ति गच्छति ६ ४ ५ उल्लङ्घ्य गच्छति, भा०—पृथग् भवितु शक्नोति ३ १ १८ उल्लङ्घन कर सकता है आर्याभि० २ ८ [अति+इण् गतौ धातोर्लट्]

अत्र अस्माक सत्कारमयुक्ते व्यवहारे स्थाने वा २ ३१ अस्या प्रजायाम् ४ ४१ ६ अस्मिन् समये १२ ४५ अस्मिन् ब्रह्मणि विज्ञानव्यवहारे वा ३ ५५ २ अस्मिन् राजव्यवहारे ३ ३८ ६ अस्मिन् ससारे समये वा ३५ १०. अस्मिन् जगति व्यवहारे वा ४ १ १३ इस गृहस्थाश्रम मे स० वि० १०५ अस्यामस्यु भूमौ वा १ ३३ १५ विद्वत्प्रचारिते रक्षिते व्यवहारे १ ४१ ४ अस्या विद्यायाम् १ ४८ ४ अस्मिन् १ ६७ २ अस्मिन् गृहाश्रमे १ १२३ ३ अस्मिन् विद्यायोगाभ्यामव्यवहारे १ १६३ ७ अस्मिन् जन्मनि १ १६४ ३३ आसु १ १७३ १२ राज्यप्रबन्धे २ १५ ६ अस्मिन् राज्ये ४ २२ ७ अस्मिञ्छिल्पविद्याकर्मणि ५ ३१ १० येषु ६ ३ अस्मिन् सैन्ये २९ १६ अस्मिन् राज्यपालनव्यवहारे ३३ ६४ [इदम् सर्वनाम्न सप्तम्यन्तात् त्रल् तद्धितप्रत्यय । 'तद्धितश्चासर्वविभक्तिरि' त्यव्ययसज्ञा]

अत्रम् योऽनति सर्वत्र व्याप्नोति तम् (मेघम्) ५ ३२ ८ **अत्रैः**=अनन्तीत्यातनायिनस्तान् गच्छन्तीत्यत्रा शत्रवस्तै १ १२९ ८ [अत्र 'अत सातत्यगमने' धातोरौणादिको रक् प्रत्यय कर्त्तरि]

अत्रयः अविद्यमानास्त्रिविधगुणाना दोषा येषु ते (गिर =वाण्य) ५ ३९ ५ अविद्यमानत्रिविधदुःखा (गिर =वाण्य) ५ ३९ ५ त्रिभि कामक्रोधलोभदोषै रहिता (उपदेशका) ५ २२ ४ विद्याविशाला (विद्वज्जना) ५ ४० ६ **अत्रये**=अविद्यमानत्रिविधदुःखाय (कण्वाय=मेधाविने जनाय) १ ११८ ७ अविद्यमानान्याध्यात्मिकादीनि त्रीणि दुःखानि यस्मिंस्तस्मै सुखाय १ ११६ ६ अविद्यमानानि त्रीण्याध्यात्मिकाधिभौतिकाधिदैविकानि दुःखानि यस्मिन् व्यवहारे तस्मै १ ११७ ३ न सन्ति त्रीणि भूतभविष्यद्वर्त्तमानकालजानि दुःखानि यस्य तस्मै सर्वदा सुखसम्पन्नाय (विद्रूपे जनाय) १ १८० ४ अविद्यमाना आत्मिक-वाचिक-शारीरिक दोषा यस्मिंस्तस्मै (मनवे=राज्ञे) १ ११२ १६ अविद्यमानानि त्रीणि दुःखान्याध्यात्मिकाधिभौतिकाधिदैविकानि यस्मिन् तस्मिन् सुखे १ ५१ ३ अविद्यमानानि त्रीणि दुःखानि यस्मिन् व्यवहारे तस्मै १ ११२ ७ **अत्रिभ्यः**=व्याप्तविद्येभ्य (विद्वज्जनेभ्य) ५ ६७ ५ **अत्रिम्**=अत्तारम् (सर्वगण=लोकम्), प्र०—'अदेस्त्रिनिश्च, उ० ४ ६९ अत्र चकारात् त्रिवनुवर्त्तते, तेनाऽद्धातोस्त्रिप् १ ११६ ८ अविद्यमानान्यात्म-मन-शरीरदुःखानि येन तम् (ऋषि=वेदपारगमव्यापकम्) १ ११७ ३ **अत्रिः**=सुखानामत्ता भोक्ता (कण्व =मेधावी जन), प्र०—अत्राऽद्धातोरौणादिकस्त्रिप् प्रत्यय १ ३९ ९ सतत पुरुषार्थी (राजा) ५.७ १० अविद्यमानत्रिविधदुःखम् (यज्ञ=अध्ययनाऽध्यापनम्) ५ ७३ ६ आप्तविद्य (विद्वज्जन) ५ ७४ १ सकलविद्याव्यापक (विद्वज्जन) ५ ४० ८ अविद्यमानत्रिविधदुःख (विद्वज्जन) ५ ७८ ४ सतत गामी (गोतम =नौकादियानयायी जन) १ १८३ ५ **अत्रिवारम्** (व्यवहारम्) ५ ७३ ७ **अत्रेः**=अविद्यमानत्रिविधदुःखस्य (विद्वज्जनस्य) ५ २ ६ **अत्रे**=अविद्यमानत्रिविधदुःख (राजन्) ५ ४० ७ ['अद् भक्षणे' धातो 'अदेस्त्रिनिश्च' उ० ४ ६८ सूत्रेण चकारात् त्रिप् प्रत्यय । 'अत सातत्यगमने' धातोर्वा । अत्रैव तृतीयमृच्छतेत्यूचुस्तस्मादत्रिर्नत्रय इति निरु० ३ १७ अत्रिम् अग्निरत्तरौपधिवनस्पतिष्वप्सु तम् निरु० ६ ३६ वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद् यदत्रिरिति शत० १४ ५ २ ६ तद्धैतद्देवा । रेत (वाच सकाशात् पतित गर्भम्) चर्मन्वा यस्मिन्वा बभ्रुस्तद्ध स्म पृच्छन्त्यत्रैव त्या३दिति ततोऽत्रि सम्बभूव शत० १ ४ ५ १३]

अत्रिणम्=परस्वाऽपहारकम् (दुर्जनम्) ६ ५१ १४ अत्तु भोक्तु योग्यम् भा०— शुष्कमशुष्क तृणादिकम् १७ १६ परसुखमत्तारम् (शत्रुम्) प्र०—अदेस्त्रिनिश्च उ० ४ ६९ अनेन सूत्रेणाऽद्धातोस्त्रिनि प्रत्यय १ ८६ १० शत्रुम् ६ १६ २८ काम, क्रोध आदि शत्रु को आर्याभि०

११६ अत्ति भक्षयत्यन्यायेन य स गत्नुम्तम् १ ३६ १४ परपदार्थाऽपहर्त्तार गत्नुम् १ ३६ २० **अत्रिण:**=शत्रव १२१५ ['अद भक्षणे' धातो 'अदेम्त्रिनिश्च' सूत्रेण त्रिनि प्रत्यय । 'रक्षासि वै पाप्मात्रिण' ऐ० २ २ अत्रिणो वै रक्षासि, प० ३ १ 'पाप्मानोऽत्रिण' प० ३ १]

अत्रिवत् न विद्यन्ते त्रय आध्यात्मिकाऽऽधिभौतिकाऽऽधिदैविकास्तापा यम्य तद्वत् (मुक्ताऽऽत्मवत्) १ ४५ ३ अविद्यमान त्रिविधदु खेन तुल्यम् (मित्रवत्) ५ ७२ १ व्यापकविद्यवत् (विद्वज्जनवत्) ५ २२ १ सतत गन्तारो विद्यन्ते यस्य तत्सम्बुद्धौ (अग्ने=राजन्) ५ ४ ९ व्यापकवत् विद्युदग्नि ५ ५१ ८ [अत्रि प्राति० तुल्यार्थे वति प्रत्यय]

अथ अनन्तरार्थे १ ९२ १५ इसके बाद स० वि० १३८ आनन्तर्ये १ ४७ ३ पुन २ ३ ९ पश्चात् १२ १२ अनन्तरम् १२ ५२

अथो अनन्तरम् १९ ८ आनन्तर्ये ११ ८२ इसके अनन्तर स० वि० १९९ और आर्याभि० २ ४९ तथा म० प्र० ३१९

अथर्य! सशय-रहित, थर्वति सगेते य स थर्यो, न थर्योऽथर्यरतत्सम्बुद्धौ (परमेश्वर !), प्र०—थर्वतिश्चरतिकर्मा निरु० ११ १८ अत्र वर्णव्यत्ययेन वकारस्थाने यकार: ३ ३७ हे व्यापक ईश्वर ! आर्या भि० २ ३७ हे अहिसक दयालो स्वामिन् स० वि० १४९ **अथर्य:**=अहिसिता स्त्रिय ४ ९ ८. [अथर्य इत्यङ्गुलिनाम निघ० २ ५ निरुक्ते थर्वतिश्चरत्यर्थे, चर धातुश्च सशये चुरा०]

अथर्युम् अहिसा कामयमानम् (गृहपति=गृहस्वामिनम्) ७ १ १ [अथर्युम्=अतनवन्तम् निरु० ५ ९ मतुबर्थे यु प्रत्ययश्छान्दस अथर्यति गतिकर्मा निघ० २ १४]

अथर्ववत् यथाऽथर्ववेदे मन्थन विहितम् ६ १५ १७ [अथर्वन् प्राति० वति प्रत्ययस्तुल्यार्थे]

अथर्वण: अहिसकस्य विदुष ११ ३३ अथर्वाणोऽथर्ववन्त । थर्वतिश्चरतिकर्मा तत्प्रतिषेध ॥ निरु० ११ १९ अथर्वा, अथर्वाण पदनामानौ निघ० ५ ६, ५ ५]

अथर्वभ्य. अहिसकेभ्य (जनेभ्य) ३० १५ **अथर्वाण:**=अथर्ववेदविदो धनुर्वेदविदश्च ऋ० २ ५ ८ अहिसका (जना) १९ ५० **अथर्वा**=अहिसक (वाघत = मेधावि विद्वान्) १५ २२ अहिसनीय (इन्द्र =विद्युत्) ८ ५९ अथर्ववेद म० प्र० २७३ हिंसादिदोषरहित (अध्यापक) १८० १९ [अथर्वाणोऽथर्वणवन्त थर्वतिश्चरतिकर्मा, तत्प्रतिषेध नि० ११ २७ प्राणो वा ऽअथर्वा श० ६ ४ २ १ प्राणोऽथर्वा श० ६ ४ २ २ अथर्वा वै प्रजापति गो० पू० १ ४ येऽथर्वाणस्तदभेषजम् गो० १ ३ ४ अथर्वाणो वै ब्रह्मण समान काठ ३० ४ तद्यदब्रवीदथर्वाङ्नमेताम्वेवाप्स्वन्विच्छेति तदथर्वाऽभवत् तदथर्वणोऽथर्वत्वम् गो० १ १.४]

अथर्व्यम् अहिसनीया स्वमेनाम् १ ११२ १०

आथर्वण: अथर्वणोऽहिंसकस्याऽपत्यम् (विद्वज्जन) १ ११६ १२ [अथर्वन् प्राति० अपत्यार्थे अण् प्रत्यय]

अथर्वाऽङ्गिरस: अथर्ववेद , ऋग्वेदा० भा० भू०,अथर्व० १० ७ २० [अथर्वणामेक पर्व व्याचक्षाण इवानुद्रवेत् श० १३ ४ ३ ७ अङ्गिरसामेक पर्व व्याचक्षाण इवानुद्रवेत् श० १३ ४ ३ ८ मेद आहुतयो ह वाऽएता देवानाम् । यदथर्वाङ्गिरस श० ११ ५ ६ ७]

अथो अनन्तरे १ २८ ६ आनन्तर्ये ३ ४३ [इदानीम् नि० ११ ४०]

अदते बिना दातो वाले दुष्ट के लिए १ १८९.५ [न विद्यन्ते दन्ता यस्येति बहुव्रीहौ 'छन्दसि च' अ० ५ ४.१४२ सूत्रेण दन्तस्य दतृ० आदेश]

अदत्त ददाति, प्र०—अत्र वर्त्तमाने लड् १ ३२ ३ गृह्णीयात् १ १४५ ३ आदद्यात् २० ७१ **अदत्तन**=दद्यात् १ ११३९ ७ **अदत्तम्**=दद्यातम् १ ११७ ७ **अददन्त**=दद्यु ७ ३३ ११ **अददात्**=ददाति ५ ३० ११ **अददाम्**=ददामि ४ २६ २ **अददा** =देहि १ ५१ १३ **अददु** = ददतु ६ ५८ ४ [डुदाञ् दाने (जुहो०) धातो रूपाणि । अददन्त=अधारयन्त नि० ५ १४]

अदत्रया अत्तु योग्यान्यन्नादीनि ५ ४९ ३

अदद्दहन्त वर्धेरन्, प्र०—अत्र दह धातोर्लेटि भ्रादेशे कृते शप श्लुस्ततो द्वित्वम् १७.२५ [दह दहि वृद्धौ (भ्वादि०) धातो रूपम्]

अदधात् दधाति प्र०—अत्र लडर्थे लड् ६ ४४ २३ धारण करता है स० वि० १८७ धृतवान्, दधाति वा ४ ३१ विधत्ते, विहितवान् ऋ० भू० ३२० सिद्ध करे म० वि० १४८ अथर्व० १४ १ ५३ **अदधात**=धर्त ७ ३३ ४ **अदधा:**=धेहि १ ८३ ३ दध्या ३ ३० ७ **अदधु:**=दधतु ६ ३९ ३ दधीरन् ३ २९ ७ धरन्ति २ ४ २ स्थापन करते है ३ २ ९ दध्यु. ३ ४७ ३ दधतु ६ ३९ ३ दधति ६ ६७ ५ अनेकविध तस्य परमात्मपुरुषस्य व्याख्यान

कृतवन्त, कुर्वन्ति, करिष्यन्ति च ऋ० भू० १२५/३१ १० [डुधाञ् धारणपोषणयो (जुहो०) धातोर्लङ्]

अदन्ति भुञ्जते १ ६४ ३ विच्छिद्य भक्षयन्ति १ १०५ ८. **अदन्तु**=भुञ्जताम् २६ ११ [अद भक्षणे (अदादि०) धातोर्लट्]

अदब्धधीतीन्=अहिंसिताऽध्ययनान् (सज्जनान्) ६ ५१ ३ [दभ्नोति वधकर्मा निघ० २ १९ तत क्त = दब्ध, तत्प्रतिषेध । धीतिम्=कर्माणि ॥ नि० १३ १४]

अदब्धम् अहिंसितम् (यानम्) ६ ५१ १ **अदब्धः**= अहिंसित (ईश्वर) १ ८९ ५ अहिंसक (अग्नि =विद्वान् राजा) ४ ४ ३ निरालस। (ईश्वर) आर्याभि० १ १० अस्माभिरहिंसितोऽतिरस्कृत (परमेश्वरो विद्वान् वा) १ ७६ २ हिंसारहित (परमेश्वर) आर्या भि० २ ५० अहिंसनीय (धर्म) ५ १९ ४ हिंसितुमनर्ह (अग्नि = अन्तस्थो विज्ञानस्वरूपो वा) ४ १५ अनलस सन् पालन-कर्त्ता (परमेश्वर) ऋ० भू० ८८ दम्भादिदोषरहित (सत्पुरुष) ऋ० भू० २१३. **अदब्धाः**=अहिंसितौ (सभासेनेशौ) ३ ५४ १६ **अदब्धान्**=अहिंसितानहिंसकान् (राज्ञ =नृपान्) ६ ५१ ४ **अदब्धानि**=अहिंसनीयानि १ २४ १० **अदब्धासः**=दम्भाऽहङ्काररहिता अनुपहिंसिता (जना), प्र०—अत्र 'आज्जसेरसुक्' इत्यसुगागम 'हिनस्ति दभ्नोतीति वधकर्मसु पठितम् निघ० २ १९ ३ १८ अहिंसनीया (देवा) १ ८९ १. अहिंसिता (ऋतव =यज्ञा प्रज्ञा वा) २५ १४ अहिंसिता अहिंसका वा (देवास =आप्ता विद्वास) ६ ६७ ५ **अदब्धाः**= अहिंसनीया (कवय =विपश्चित) ४ २ १२ अहिंसनीया सत्कर्त्तव्या (युवतय =प्राप्तयौवना स्त्रिय) ३ १ ६ हिंसितुमयोग्या (धेनव =गाव) १ १७३ १ अहिंसका (अदिते पुत्रा) ७ ६० ५ **अदब्धे**=अहिंसिते (अहनी= रात्रिदिने) ४ ५५ ३ **अदब्धेन**=सुखयुक्तेन (चक्षुपा= विज्ञानेन प्रत्यक्षप्रमाणेन) नेत्रेण १ ३० **अदब्धेभि.**= केनाऽपि हिंसितुमशक्यै (पायुभि =रक्षणै) १ ९५ ९ अहिंसनीयै (पायुभि =रक्षणोपायै) ३३ ८४ अहिंसकै (विद्वद्भि) १ १४३ ८ अहिंसितै (पायुभि =रक्षणै) ३३ ६९ **अदब्धैः**=अहिंसनै (शुभगुणै) ६ ४८ १० **अदभा**=अहिंसकौ (इन्द्राग्नी=नरेशसेनापती) ५ ८६ ५ (दभ्नोति वधकर्मा निघ० २ १९, तत क्तप्रत्यये दब्धम्, तत्प्रतिषेध । दम्भुदम्भने (स्वादि०) धातोर्वा क्त प्रत्यय]

अदब्धव्रतप्रमति अदब्धेन अहिंसितेन व्रतेन शीलेन प्रमति प्रज्ञान यस्य स (अग्नि =विद्युदादिकार्यकारणस्य स्वरूप) २ ९ १ अदब्धैरहिंसनीयैर्व्रतैर्धर्माचरणै प्रकृष्टा मतिर्मेधा यस्य स (सत्पुरुष) ११ ३६ [नञ्+ दभ्नोति वधकर्मा+क्त=अदब्ध । व्रतम्=शीलम् । प्र+ मनु अवबोधने धातो क्तिन्=प्रमति । एतेषा समास]

अदब्धायो ! अदब्धमहिंसितमायुर्यस्मात् तत्सम्बुद्धौ, अदब्धायुर्वा (अग्ने=जगदीश्वर भौतिकोऽग्निर्वा) २ २० [नञ्+दभ् (वधकर्मा)+क्त=अदब्ध । आयु =इण् गतौ धातो 'छन्दसीण' उणादि १ २ सूत्रेण उण् प्रत्यय । एनयो समासे सम्बुद्धौ रूपम्]

अदमयः दमय ६ १८ ३ [दमु उपशमने दिवादि, ततो णिचि लटि रूपम्]

अदम्भः दम्भादिदोषरहित परमेश्वर ऋ० भू० २०३ [दम्भु दम्भने (स्वादि०) ततोऽच् कर्त्तरि, तत्प्रतिषेध]

अदयः अविद्यमाना दया करुणा यस्य स, भा०— दुष्टेषु निर्दय (इन्द्र =सेनापति) १७ ३९ [दय दानगति-रक्षणहिंसादनेषु भ्वादि, 'षिद्भिदादिभ्योऽङ्' इत्यङ् प्रत्यये स्त्रिया दया रूपम् । ततो नञ्बहुव्रीहि]

अदर्दः विदृणाति ५ ३२ १ पुन पुनर्भृश विदारयति २ २४ २ **अदर्दृतम्**=भृश विदारयतम् ४ २८ ५ **अदर्धः**=भृश, विदारयति, प्र०—अत्र वर्णव्यत्ययेन दस्य स्थाने ध. २.३८ ४ **अदः**=विदृणीहि, प्र०—अत्र विकरणस्याऽलुक् लङ्प्रयोग १ १२१ १० [दृ विदारणे क्र्यादि, तत क्रियासमभिहारे यङन्ताल् लङ् । अदर्द अदृणा निरु० १० ९]

अदर्शि दृश्यते ५ १.२ दृश्यनाम् १ ४६ ११ [दृशिर् प्रेक्षणे भ्वादि, तत कर्मणि लुङ्]

अदहत् दहति भस्मीकरोति ४ २८ ३ **अदह.**=दह १ ३३ ७ दहति ७ १ ७ [दह भस्मीकरणे (भ्वादि०) धातोर्लङ]

अदात् दद्यात् ६ ४७ २४ दिया है स० वि० १२१ अथर्व० १४ १ ५२ दत्तवान्, ददाति दास्यति वा प्र०— अत्र 'छन्दसि लुङ्लङ्लिट, इति सामान्यकाले लुङ् १ ३० १६ दूरीकुर्यात् ६ २७ ७ **अदाः**=प्रदेहि १९ ६६ [डुदाञ् दाने (जुहो०) धातो सामान्ये लुङ् । दाति दानकर्मा निघ० ३ २० दैप् शोधने धातोर्वा रूपम्]

अदानम् दानस्याऽकर्त्तारम् (राजपुत्रम्) ४ १९ ९ [डुदाञ् धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट् । तत्प्रतिषेध]

अदाभ्यः अहिंसनीय (राजन्) ७ १५ १५ दभितु

हिंसितु योग्यानि दाभ्यानि तान्यविद्यमानानि यस्य तत्सम्बुद्धौ, (अग्ने=सभाध्यक्ष) प्र०—अत्र 'दभेश्चेति वक्तव्यम्' अ० ३ १ **अदाभ्यम्**=अहिंसनीय सत्कर्त्तव्यम् १ २४ इत्यनेन वार्तिकेन दभ इति सौत्राद्धातोर्ण्यत् १ ३१ १० (बृहस्पति=राजानम्) ३ ६२ ६ **अदाभ्यः**=निष्कपट (मेधाविजन) ५ ५ २ अविनाशित्वान्नैव केनापि हिंसितु शक्य (विष्णु=विश्वान्तर्यामीश्वर) १ २२ १८ हिंसितुमनर्ह (विद्वान्) ३ ११ ५ उपक्षयरहित (अधिपति=अधिष्ठातृजन) १८ १६ अहिंसकत्वाद् दयालु (ईश्वर) ३४ ४३ अहिंसनीय (देव=परमेश्वर) ४ ५३ ४ उपक्षयरहित (परमेश्वर) १८ १६ **अदाभ्या**=हिंसितुमयोग्यौ (अध्यापकोपदेशकौ १ १५५ १ अहिंसनीयौ (स्त्रीपुरुषौ) ५ ७५ ७ **अदाभ्याः**=अहिंसनीया २ ३४ १० हिंसितुमनर्हा ३ २६ ४ [दभ्नोति वधकर्मा निघ० २ १६, तत कर्मणि ण्यत्, 'कृत्यल्युटो बहुलमिति' वा कर्त्तरि ण्यत् प्रत्यय । तत्प्रतिषेध । ते (देवा) होचु । अदभाम वाऽएनान् (असुरान्) इति तस्माददाभ्यो न वै (असुरा) नोऽदभन्निति तस्माददाभ्यो वाग्वाऽअदाभ्य श० ११ ५ ६ ४ वागेवादाभ्य श० ११ ५ ६ १]

अदामानः निर्बन्धना (प्रजा) ६ २४ ४ अदातार (प्रजाजना) ६ ४४ १२. [डुदाञ् दाने धातो 'अन्येभ्योऽपि दृश्यन्ते' अ० ३.२ ७५ सूत्रेणानुपपदेऽपि मनिन् प्रत्यय, तत्प्रतिषेध]

अदाशत् ददाति ४ ४२ ६ **अदाशन्**=ददति ७ १६ ६ [दाशति दानकर्मा निघ० ३ २० दाशृ दाने भ्वादि०, ततो लङ्]

अदाशुषः अदातु (प्रजाजनस्य) ७ १६ १ **अदाशुषाम्**=अदातॄणाम् (दुर्जनानाम्) १ ८१ ६ [दाशृदाने (भ्वादि०) धातो क्वसु प्रत्यय । तत्प्रतिषेध । दाशुषे=दत्तवते नि० ११ ११]

अदाशून्=अदातॄन् (शत्रून्) १ १७४ ६ [दाशृ दाने धातो कर्त्तरि औणादि० उण् प्रत्ययो बाहुलकात्]

अदिक्षि आदिशामि ५ ४३ ६ [दिश अतिसर्जने (तुदादि०) धातोर्लुङ् । 'शल इगुपधात्०' इति च्ले स्थाने क्सादेश]

अदितयः अखण्डिता (मनुष्या) १ ५२ १ **अदितये**=मात्राद्याय ५ ८२ ६ पृथिवी मे न० प्र० ३३०/१ २४ २ अविनाशिने (आत्मने) २६ २६ अविनष्टायाऽन्तरिक्षाय ४ ३ ८ इस ससार मे न० प्र० ३३० १ २४ १ पृथिवीराज्याय प्र०—अदितिरिति पृथिवीनाम निघ० १ १ १२ १२ कारणरूपेण नाशरहिताया पृथिव्याम्, प्र०—अत्र सप्तम्यर्थे चतुर्थी १ २४ १ अखण्डितसुखाय १ २४ १५ **अदितिम्**=कारणरूपेण नित्याम् (मही=महती भूमिम्) १८ ३० अखण्डिता नीतिम् ६ ५१ ४ अमातरम् (देवी=विदुषीम्) ६ ५० १ अखिण्डता विद्या प्रकृति वा ६ ५१ ३ दिवम् १ १३६ ३ अखण्डिताम् (मही=भूमिम्) २१ ५ पृथिवीम् ४ ५५ ३ अविनाशिका विद्याम् १ १५२ ६ मातर पितर पुत्र, जात सकल जगत्, तत्कारण जनित्व वा १ १० ६ १ आकाश भूमि वा ५ ४२ १ अविनाशिका प्रज्ञाम् २५ २ अन्तरिक्षम् ३३ ४६ अखिण्डतप्रज्ञम् (अश्विना=अध्यापकमुपदेशक च) २५ १६ सर्वविद्याप्रकाशवन्तम् (विद्वज्जनम्) १ ८६ ३ अविनाशिकारणम् ५ ६२ ८. अविनाशिन पदार्थम् १० १६ जनित्व कामम् (स्त्र्यासक्तिम्) ७ १८ ८ अखण्डिता कालविद्याम् ७ १०.४ अखिण्डनीया गाम्, अन्व०—धेनुम् ३३ ४६ अखण्डितबोधाम् (विदुषी स्त्रीम्) ५ ६६ ३ अखण्डिता विद्या पृथिवी वा ६ ५१ ३ नाशरहिता क्रियाम् ४ २ ११ कारणरूपेण नित्याम् (प्रकृतिम्) १८ ३० **अदिति**=स्वस्वरूपेणाऽखण्डिता (देवी=विदुषी स्त्री) ७ ४० २ पृथिवी ३४ ३० अविनाशि (अन्तरिक्षम्) २५ २३ अध्यापिका ११ ६१ कारणरूपेण नाशरहिता (देवा=पृथिव्यादय) २५ २३ विनाशरहिता (माता=प्रकृति) २५ २३ अखण्डिता (द्यौ=कारणरूपेण प्रकाश) २५ २३ अखण्डिता (विद्या) ५ ५१ ११ उत्पत्ति-नाशरहिता (कारणरूपा प्रकृति) विदुषी माता, भा०—सती विदुषी माता १० ६ चेतन ब्रह्म, ईश्वर के रचे लोक और नाम भी अविनाशी आर्याभि० ११७ अविनाशिनी (प्रकृति) ४ १६ कारणरूपेणाविनाशिनी भूमि २५ ४५ स्वात्मरूपेण नित्यम्, भा०—स्वरूपेण नित्यम् (पञ्चजना=मनुष्या प्राणा वा) २५ २३ कारणरूपेण नित्यम्, भा०—अदृष्टकारणम् २५ २३ द्यौरिव विद्यागुण-प्रकाशक (अग्नि=अध्यापक) २ १ ११ मानेव (विद्वान्) ३ ५४ १८ माता २८ २५ जननी ११ ५८ माता पिता वा ४ ३६ ३ अखण्डितैश्वर्यमन्तरिक्षमिवाक्षुब्धा (राजमहिषी) १३ १८ मातेव पालिका भूमि १४ २६ अन्तरिक्षम् ३३ ४२ अखिण्डतबुद्धि, भा०—गम्भीरबुद्धि (राजा) ३३ १६ अविनश्वरविनाशरहित (ब्रह्म) आ० वि० ११७. अविकृत विकार को न प्राप्त

ईश्वर आर्याभि० १ १७ माता राजसभा च १ ४३ २ उत्पन्न वस्तुमात्र जनित्व कारण वा १ ६४ १६ प्रकाशमयी विद्या १ १०६ ७ विद्वत्पिता सूर्यदीप्तिर्वा १ १०७ २. अखण्डसुखप्रदा (माता) ५ ४२ २ अखण्डितमन्तरिक्षम् ४ १ २० अखण्डिता सभासदलङ्कृता सभा १७ ४८ अखण्डिता (धेनु =गौ) १ १५३ ३ नाशरहितो जगदीश्वर, प्र०—अदितिरिति पदनामसु पठितम् निघ० ५ ५ अनेन ज्ञानस्वरूपोऽर्थो गृह्यतेऽन्तरिक्ष वा १ १४ यज्ञस्याऽनुष्ठाता यजमान, अन्व०—नाशरहित, प्र०—पदनामसु पठितत्वादत्र यज्ञस्य ज्ञाता पालकोऽर्थो गृह्यते १ १६ अखण्डितज्ञाना (देवी=विदुषी माता) ४ ५५ ७ प्रकाशवन्नित्या (द्यौ), प्र०—अत्र 'अदितिर्द्यौरिति, प्रकाशकारकोऽर्थो गृह्यते ४ २१ पुत्र पुत्री वा, अन्व०—विद्या ११ ५६ अखण्डित (अग्नि =परमेश्वर) १ १६२ २२ अदीना देवमाता निरु० ४ २२/१ १६ ६ अविद्यमानखण्डन (विद्वज्जन) ५ ४६ ६ अखण्डिता नीति ७ ५१ २ नाशरहिता (विद्युत्) २६ ४ माता, प्र०—अत्रादितिर्द्यौरित्यादिना माता गृह्यते १ ४३ २ पितेव वर्त्तमान ७ ६ ३ नाशरहितो जगदीश्वर १ १४ अविद्यमाना दितिर्नाशो यस्या सा राजपत्नी ६ ३४ अध्यापिका ११ ६१ **अदिते !**=अखण्डितविद्य (विद्वज्जन) ५ ५१ १५ अखण्डितानन्ददे (मित्र) भा०—ब्रह्मचर्य ३८ २ अखण्डितज्ञानैश्वर्ये (मान) ६ ५१ ५ अखण्डिताऽऽनन्दे (सती मित्र) ११.५६ अविनाशिन् जगदीश्वर ४ ५५ १ भा०—सर्वसुखप्रापिके नाशरहिते राजनीति, प्र०—अदितिरिति पदनामसु पठितम् निघ० ४ १ अनेनाऽत्र प्राप्त्यर्थो गृह्यते ३ २७ अखण्डितस्वरूपविज्ञाने विदुषि मित्र) २ २७ १४ विनाशरहित (जगदीश्वर विद्वन्वा) १ ६४ १५ विदुषि मात २ २६ ३ आत्मस्वरूपेणाऽविनाशिनि (पत्नि) ८ ४३ **अदिते**=हे आत्मस्वरूपेणाऽविनाशिनि (पत्नि) ८ ४३ विदुषी मात २ २६ ३ विनाशरहित (जगदीश्वर) १.६४ १५ अखण्डितस्वरूपविज्ञाने (विदुषि मित्र) २ ७ १४ अखण्डितविद्य (विद्वन्) ५ ५१ १४ अखण्डितज्ञानैश्वर्ये (विदुषि मित्र) ६ ५१ ५ नाशरहिता राजनीति, प्र०—अदितिरिति पदनामसु पठितम् निघ० ४ १ अनेनाऽत्र प्राप्त्यर्थो गृह्यते ३ २७ अखण्डितानन्दे (विदुषि मित्र) ११ ५६ अखण्डितानन्ददे (विदुषि मित्र) ३८ २ **अदितेः**=ज्ञानस्याऽपत्यस्य, प्र०—अदितिर्जातमिति मन्त्रप्रमाणात् १ १३६ १६ अखण्डिताया कारणशक्ते ३ ३३ अन्तरिक्ष के स० वि० १५६/७ ४१ २ अखण्डितस्य विज्ञानस्य २ २८ ३ पृथिव्या सूर्यस्य वा १ १८५ ३ अखण्डितस्याऽन्तरिक्षस्य ४ ४२ ४ अविनाशिन कारणस्यैव मातु ३४ ३५. पृथिव्या ४ १२ ४ अन्तरिक्षस्थाया भूमे प्रकाशस्य वा ७ ४१ २ **अदित्या**=विज्ञानदीप्तेर्वेदवाच सकाशादन्तरिक्षे मेघमण्डलस्य मध्ये, भा०—पृथिव्या, अन्व०—अन्तरिक्षस्य, प्र०—अदितिर्द्यौरदितिरन्तरिक्षमिति मन्त्रप्रामाण्यात् 'अदितिरिति वाङ्नामसु पठितम् निघ० १ ११, पदनामसु च निघ० ४ १ १११ पृथिव्या, भा०—शुद्धाया सर्वतोऽवकाशयुक्ताया पृथिव्या, प्र०—अदितिरिति पृथिवीनामसु पठितम् निघ० १ १ पृथिव्यादे ४ ३० प्रकाशस्य भा०—सूर्यप्रकाशस्य, अन्व०—अन्तरिक्षस्य पृथिव्याश्च १ १६ **अदित्यै**=पृथिव्यै, प्र०—अदितिरिति पृथिवीना० निघ० १ १ २२ २० पृथिव्या अन्तरिक्षस्य वा, प्र०—अत्र षष्ठ्यर्थे चतुर्थी, अदितिरिति पृथिवीनामसु, पठितम् निघ० १ १ पदनामसु च निघ० ४ १ अनेन गमनाऽऽगमनव्यवहारप्राप्तिहेतुरवकाशोऽन्तरिक्ष गृह्यते १ ३० नाशरहितायै (मह्यै=वाचे) २२ २०. पृथिव्या, प्र०—अत्र 'चतुर्थ्यर्थे बहुल छन्दसि अ० २ ३ ६२ इति षष्ठ्यर्थे चतुर्थी २२ नित्यविज्ञानम् प्र०—अत्र कर्मणि चतुर्थी ३८ ३ नाशरहितायै नीत्यै ३८ १ अन्तरिक्षस्य २५ ४ दिवे प्रकाशाय, प्र०—अदितिर्द्यौरिति प्रमाणात् २५ ८ पृथिव्यादिसृष्टये ४ ३०

अखण्डितायाः अन्तरिक्षरूपायै (विष्णुपत्न्यै) २६ ६० जनन्यै २२ २० दिवे विद्याप्रकाशाय ११ ५६ अखण्डितायै जनित्वक्रियायै, प्र०—अदितिर्जनित्वमिति मन्त्रप्रामाण्यादत्रादितिशब्देन गृह्यते, भा०—प्रजननाय २४ ६ प्रकाशस्य १४ २५ पृथिव्यादिसृष्टये ४ ३० नाशरहितायै जनन्यै २२ २० [अदिति शब्दो निघण्टौ पृथिवी, वाक्, गो, पद, द्यावापृथिवीनामसु पठित । दो अवखण्डने धातो क्तिन् । 'द्यतिस्यति०' अ० ७ ४ ४० सूत्रेण इकारादेश । तत्प्रतिषेध । दातु=छेत्तुम् अयोग्या अदिति । अदीना देवमाता नि० ४ २२ अग्निरप्यदितिरुच्यते नि० ११ २१ इय (पृथिवी) वाऽअदितिर्मही श० ६ ५ १ १० इय (पृथिवी) वै देव्यदितिर्विश्वरूपी तै० १ ७ ६ ७ अदित्यै पुनर्वसू तै० १ ५ १ १ एका न देव्यदितिरनर्वा विश्वस्य भर्त्री जगत प्रतिष्ठा । पुनर्वसू हविषा वर्धयन्ती । प्रिय देवानामप्येतु पाथ तै० ३ १ १ ४ अदितिर्वै प्रजाकामौदनमपचत्तत उच्छिष्टमश्नात् सा गर्भमधत्त तत आदित्या अजायन्त गो० पू० २ १५

सर्व वा अत्तीति तददितेरदितित्वम् श० १० ६ ५.५ इय (पृथिवी) वाऽदितिरिय हीद सर्व ददते श० ७ ४ २ ७ इय (पृथिवी) वा अदिति कौ० ७ ६ इय वै पृथिव्यदिति श० ११४ ५. इय वै पृथिव्यदिति सेय देवाना पत्नी श० ५ ३ १ ४ अदितिर्हि गौ श० २ ३ ४ ३४ मा गामनागामदिति वधिष्ट म० २ ८ १५ वाग्वाऽदिति श० ६ ५ २ २० आदित्या (अदितेरुत्पन्ना) वा इमा प्रजा ता० १३ ९ ५ अथ यत् प्रायणीयेन यजन्ते 'अदितिमेव देवता यजन्ते श० १२ १ ३ २ सा (अदिति) ऊर्ध्वा दिश प्राजानात् कौ० ७ ६ अदितिरच्छिन्नपत्रा काठ० १ ११, क० १ ११ अदिति सोमस्य योनि मै० ३ ७ ८ ९ १ प्रतिष्ठा वा अदिति प्रतिष्ठा पूपा० तै० ५ ३ ४ ४ यत् तदादत्त तद् अदिति काठ० ८ २]

अदितित्वे अखण्डितत्वे (कार्ये) ७ ५१ १. [अदिति प्राति० भावे त्व प्रत्यय]

अदित्यवाहः दितौ खण्डने भवा दित्या, न दित्या अदित्यास्तान् ये वहन्ति प्रापयन्ति ते अदित्यवाह (पशुपालका) २४ १२ [अदित्योपपदात् वह प्रापणे धातो. 'वहश्च' सूत्रेण ण्वि प्रत्यये अदित्यवाट्, तस्य बहुवचने रूपम्]

अदित्सन्तम् राजकर दातुमनिच्छन्तम् (पुरुपम्) ६ २४ दातुमनिच्छन्तम् (अदातृजनम्) ६ ५३ ३ [डुदाञ् दाने धातोरिच्छायामर्थे सन् । 'सनि मीमा०' इति सूत्रेणाच स्थाने 'इस्' आदेशोऽभ्यासलोपश्च । दित्स धातो शतृप्रत्ययस्ततो नञ्समास]

अदिद्युतत् प्रकाशितवान् प्रकाशयति वा ४ २५ द्योतते ६ ११ ४ [द्युत् दीप्तौ (भ्वादि०) ततो णिचि लुडि 'णिश्रि०' अ० ३ १ ४८ सूत्रेण च्ले स्थाने चङ् । 'द्युतिस्वाप्यो सम्प्रसारणम्' अ० ७ ४ ६७ सूत्रेणाभ्यासस्य सम्प्रसारणम्]

अदिष्ट दिशेत् ५ ३६ ६ [दिश अतिसर्जने धातोर्लुङ् । छान्दसत्वात् च्ले स्थाने क्सादेशो न भवति]

अदीदेत् प्रदीप्येत्, प्र०—दीदयतीति ज्वलतिकर्मसु पठितम् निघ० १ १६, अत्र दीदिर्धातोर्लिङि प्रथमैकवचने शपो लुक् १ ११२ १७ **अदीदेः**= प्रकाशये ७ ५ ३ [ज्वलनार्थकदीदिधातोर्लिङ्]

अदीधयुः दृश्यन्ते, प्र०—अत्र व्यत्ययेन परस्मैपदम् ५ ४० ५ दीपयेयु ७ ३३ ५ [दीधीङ दीप्तिदेवनयो (अदादि०) धातो सामान्ये लुङ् । अदीधेत् =अन्वध्यायत् निरु० २ १२]

अदीनाः दीनतारहिता, भा०—अपराधीना, आत्मवशा (सज्जना) ३६ २४ स्वतन्त्रा (जना) प० वि० कभी पराधीन नही आर्याभि० २ ३७ ३६ २४ [दीङ् क्षये दिवादि, तत 'इणसिञ्' उणादि० ३ २. सूत्रेण नक् प्रत्यय । ततो नञ्समास]

अदीमहि क्षाययेम, नाशयेम, प्र०—अत्र दीङ् क्षय इत्यस्माल्लिङर्थे लङ् 'बहुल छन्दसि' इति श्यनो लुक् ३ ५८
अदीयम्=नि सरेयम् ४ २७ १ [अदीयम्—दीयति गतिकर्मा निघ० २ १४]

अदुग्धा इव दुग्धरहिता इव (धेनव =गाव इव) ७ ३२ २२ अविद्यमानपयस इव (धेनव =गाव इव प्रजा) २७ ३५ [दुह प्रपूरणे अदादि, तत क्त प्रत्यय । ततो नञ्समास]

अदुद्रोत् द्रवयति २ ३० ३ [द्रु गतौ भ्वादि, ततो णिजन्तात् सामान्ये लुङ्]

अदुवः अपरिचारका (कृतघ्ना जना) ७ ४ ६ [दुवस्यति परिचरणकर्मा निघ० ३ ५ ततो क्विप् कर्त्तरि, ततो नञ्समास]

अदुष्कृतौ अदुष्टाचारिणौ (स्त्रीपुरुषौ) ३ ३३ १३ [नञ्+दुस्+कृ+क्विप् । दुष्कृत =पापकृत नि० १० १२]

अदुहत् परिपूरयति, भा०=एधते १७ ७४ [दुह प्रपूरणे अदादि, ततो लङ्]

अदुः ददति २१ ६१ देवे स० वि० १३४, १०.८५ ४३ देते है स० वि० १२१, १० ८५ ३६ [डुदाञ् दाने (जुहो०) धातो सामान्ये लुङ्]

अदृक्षत दृश्यन्ते १ ४८ १३ [दृशिर् प्रेक्षणे धातोर्लुङ् कर्मणि]

अदृपिताय अमोहिताय (देवाय=नृपाय) ४ ३ ३
अदृपितेभिः=मोहादिदोषरहितै (विद्वज्जनै) १ १४३ ८

अदृप्तः मोहरहित (सज्जन) १ ६९ २

अदृप्यता हर्षमोहरहितेन (सज्जनेन) १ १५१ ८ [दृप हर्षणमोहनयो (दिवादि०) धातो क्त । ततो नञ्समास । 'रधादिभ्यश्च' तीड्विकल्प]

अदृप्तक्रतुम् अमोहितप्रज्ञम् (राजानमधिकारिण वा) ६ ४९ २ ['अदृप्तम्' अमोहितम् । क्रतुशब्द प्रज्ञानाम

निघ० ३ ६ कर्मनाम निघ० २ १ तयो समास]

अदृश्रन् पश्यन्ति ५ ३ ११ दृश्यन्ते १ १६१ ५. समीक्षेरन्, पश्येयु १ ६ ७ **अदृश्रम्**=प्रेक्षेयम् १ ५० ३ पश्येयम्, प्र०—अत्र लिङर्थे लुङ्, उत्तमैकवचनप्रयोगो 'बहुल छन्दसि' इति रुडागम 'ऋदृशोऽङि गुण' इति प्राप्तौ गुणाऽभावश्च ८४० [दृशिर् प्रेक्षणे (भ्वादि०) धातोर्लुङ् । 'इरितो वेति' अङ्प्रत्यय]

अदृष्टहा योऽदृष्टमन्धकार हन्ति स (सूर्य) १ १९१ ८ यो गुप्तान् विषान् हन्ति स (वैद्य) १ १९१ ९ [नञ्+दृष्ट+हन्+ड प्रत्यय 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ सूत्रेण]

अदृष्टाः ये न दृश्यन्ते ते (सर्पादय) १ १९१ ५ ये न दृश्यन्ते ते विषधारिणो जीवा १ १९१ १. दृष्टिपथमनागता विषधरा विषा वा (सर्पादय) १ १९१ ४ अदृश्यमाना (विषधरा प्राणिन) १ १९१ ७ **अदृष्टान्**=दृष्टिपथमनागतान् (रोगान्) १ १९१ २ [दृशिर् प्रेक्षणे धातो क्त प्रत्यये नञ्समास]

अदृंहत् धरति २ १२.२ **अदृंहीत्**=धरेत् २८ २०. **अदृंहीः**=प्राप्य वर्द्धस्व ६ २ [दृहि वृद्धौ (भ्वादि०) धातोर्लङ् । अदृंहीत्=दृहिधातोर् लुङ्]

अदेदिष्ट भृशमुपदिशत ३ ३१ २१ [दिश अतिसर्जने (तुदादि०) धातोर् यङ्लुक्, ततो लुङ्]

अदेवत्रात् देवान् त्रायते यस्मात्तद्विरुद्धात् (अराधस =अधनात्) ५ ६१ ६ [नञ्+देव+त्रैङ् पालने धातो क प्रत्यय]

अदेवम् अविद्यमानो देव प्रकाशो यस्मिँस्तम् (सर्वसामर्थ्यम्) प्र०—अत्राऽन्येषामपि दृश्यते, २ २२ ४ इत्यकारस्य दीर्घत्वम् प्रकाशरहितमविद्वास दुष्ट वा ३ ३२ ६ **अदेवयोः**=न देवौ अदेवौ तयोरदेवयो (अविदुषोरध्यापकोपदेशकयो) १ १५० २ **अदेवस्य**=असुरस्य शत्रुगणस्य १ १७४ ८ **अदेवः**=अविद्वान् (जन) ६ १८ ११ प्रकाशरहित (विद्याहीनो जन) ६ १७ ८ **अदेवान्**=अविदुष (जनान्) ३ १ १६ **अदेवानि**=अशुद्धानि (हेळासि=अनादराणि) ६ ४८ १० **अदेवेन**=अशुद्धेन (मनसा) २ २३ १२ [दिवु क्रीडा विजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु (दिवादि०) धातो पचादिषु देवडिति पाठाद् इगुपधलक्षण क बाधित्वा अच् प्रत्यय । 'देवा' इति पदनाम निघ० ५ ६ देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा नि० ७ १५]

अदेवीः असुरस्य दुष्टस्य नगरी १ १७४ ८ विद्यारहिता (विश =प्रजा) ६ ४९ १५ अशुद्धा (प्रज्ञा) ५ २.९ अप्रमदा क्रिया ५ २ १० अदिव्या (मिथती = हिसती शत्रुसेना) ६ २५ ९ अविदुषी स्त्रिय ३ ३१ १९ अदिव्या अशुद्धा (माया =कपटछलयुक्ता प्रज्ञा) ७ १ १० समन्ताद् देदीप्यमाना विदुषी ६ ४९ १५ [दिवु+अच्= देव, स्त्रिया देवी, ततो नञ्समास.]

अदेवयन्तम् आत्मानमदेवमिच्छन्तम् (विद्वज्जनम्) २ २६ १ [देवाद् आत्मन इच्छाया क्यच्, 'न छन्दस्यपुत्रस्ये' ति ईत्वप्रतिषेध, ततो नञ्समास । देवयन्त = देवान् कामयमाना नि० ८ १८]

अदेवृघ्नि ! हे देवरसेविके (पत्नि) ऋ० भू० २१४ हे देवर को दु ख न देने वाली स्त्रि स० प्र० १५३, अथर्व० १४ २ १८ [नञ्+देवृ+हन् हिंसागत्यो +टक्प्रत्ययश्छान्दस, स्त्रिया ङीप्, तत्सम्बुद्धौ रूपम्]

अद्धा साक्षात् ३ ५४ ५ प्रसिद्धम् ३३ ३६ [अद्धा इति सत्यनाम निघ० ३ १०)

अद्धि भुङ्क्ष्व १२ ६५ अशान १ १६४ ४० भक्ष ३ ५२ ७ [अद भक्षणे (अदादि०) धातोर्लोट्]

अद्भिः प्राणै १ ६५ ८ जलादिभि ६ ४९ १४ जलै १ १२२ ६ ससाधितैर्जलै १८ ३५ **अद्भ्यः**= जलाशयेभ्य १७ १ जलेभ्य ३१ १७ सुसस्कृतेभ्यो जलेभ्य १९ ७४ जलेभ्य प्रजाभ्यो वा १ ८० २ अप्सु गमनाय ३९ २ जलेभ्य प्राणेभ्यो वा ७ २१ [अप्+ भिस 'अपो भि' इति तकारादेश]

अद्भुत. ! आश्चर्योत्तमगुणकर्मस्वभाव (अध्यापकोपदेशक) ५ १० २ आश्चर्यकर्मन्, भा०—आश्चर्यगुण (वायो=विद्वज्जन) २७ ३४ महाशय (विद्वज्जन), प्र०—अद्भुतमिति महन्नाम निघ० ३ ३ **अद्भुतम्**=आश्चर्यगुणकर्मस्वभावम्, भा०—सर्वशक्तिमन्त परमात्मानम् ३२ १३ आश्चर्यगुणकर्मस्वभावस्वरूपम् (परमेश्वरम्), प्र०—'अदि भुवो डुतच्' उ० ५ १ अनेन भू धातोरद्युपपदे डुतच् प्रत्यय १ १८ ६ अद्भुत, आश्चर्य, शक्तिमय ईश्वर को आर्याभि० २ ५२,३२ १३ आश्चर्यभूतमिव वर्त्तमानम् (परमेश्वरम्) १ १७० १ आश्चर्यस्वरूपम् (धनम्) १ १४२ १० आश्चर्यभूत रायस्पोषम् २७ २० **अद्भुतस्य**=आश्चर्यगुणयुक्तस्य (विज्ञानस्य) १ १२० ४ आश्चर्यगुणकर्मयुक्तस्य सैन्यस्य १ ७७ ३ **अद्भुतः**=आश्चर्ययुक्त (हेळ = अनादर) १ ९४ १२ आश्चर्यगुणकर्मस्वभावक (ईश्वर

सभाध्यक्षो वा) १ ६४ १३. आश्चर्यगुणकर्मस्वभाव (राजा) ५ २३ २ अत्यन्त आश्चर्यरूप ईश्वर आर्याभि० १४८ भा०—पवित्रस्वभाव (पति) ११ ७० आश्चर्यस्वरूप (सवितादिलोक) ऋ० भू० १४१ आश्चर्ययुक्त (हेळ =अनादर) १ ६४ १२ **अद्भुता**=आश्चर्यरूपाणि (काव्या=कवीना कर्माणि) प्र०—अत्र 'शेश्छन्दसि०' इति लोप ५ ६६ ४, १ २५ ११ **अद्भुतान्**=आश्चर्यगुणकर्मस्वभावान् (कवीन्=अध्यापकोपदेशकान्) ४ २ १२ ['अदि' उपपदे भूवातोर्डुतच् प्रत्यय औणादिक । (अद्भुतम् इति महन्नाम निघ० ३ ३ अद्भुतम्=अभूतम् नि० १ ६ महत्सम्भृतम् नि० ६ २१]

अद्भुतक्रतू अद्भुता क्रतु प्रज्ञा कर्म्म वा ययोस्तौ (अध्यापकोपदेशकौ) ५ ७० ४ [अद्भुतम्=अभूतम्, क्रतुशब्दो निघण्टौ प्रज्ञावाची कर्मवाची च । तयो समास]

अद्भुतैनसाम् अद्भुतानि महान्त्येनासि पापानि येषान्तेषाम् (दुष्टाना जनानाम्) ५ ८७ ७ [अद्भुतो व्याख्यात । एनस्=इण् गतौ धातो 'इण आगसि नुट् च' उणादि० ४ १९८ सूत्रेण असुन्प्रत्ययान्त]

अद्म अत्तुमर्ह कर्मफलम् १ ५८ २. (अद भक्षणे धातो 'अन्येभ्योऽपि दृश्यते' अ० ३ २ ७५ सूत्रेण मनिन् । अद्म=अन्न भवति नि० ४ १६]

अद्मसत् योऽद्मानि सादयति परिपचति स (अग्नि) १ १२४ ४ [अत्र पर्णाशुपिवण् णिलुक् । अद्मोपपदात् पद्लृ विशरणगत्यवसादनेषु धातो क्विप् । अद्मसादिनीति वान्नासनिनीति वा नि० ४ १६)

अद्मसदः येऽद्मसु अत्तव्येषु सीदन्ति ते (पर्वता = मेघा) ६ ३० ३ **अद्मसद्वा**=योऽद्मसु भोक्तव्येषु सीदति (अग्नि) पावक ६ ४ ४ [अद्म+पद्लृ+क्विप्]

अद्य अस्मिन्नहनि ८ ४५ इदानीम् ५ ५८ ३ इसी वर्त्तमान समय मे स० प्र० २४६,३२ १४ अस्मिन् दिने, प्र०—अत्र 'सद्य परुत्परार्यैषम० ५ ३ २२, अनेनाऽय निपातित १ २३ २३ अस्मिन् वर्त्तमाने समये १५ ४४ भा०—सदैव ३३ ५१ अस्मिन् वर्त्तमाने दिने १ ४७ ३ अधुना ६ ३७ १ अस्मिन् दिवसे ३३ १७ इसी समय मे आर्याभि० २५३,३२ १४ [अस्मिन्नहनि अद्य । इदमो ऽशभावो द्यश्च प्रत्ययोऽह्नि । अद्य=अस्मिन् द्यवि नि० १ ६]

अद्यत अत्ति २८ २३ [अद् भक्षणे धातो रूपम्]

अद्यः अत्तु योग्य (पदार्थ) २ १३ ६ **अद्याय**=अत्तुमर्हाय (इष्टभोगाय) ७ ११ ५ [अद भक्षणे धातो क्यप् प्रत्ययश्छान्दस]

अद्युतः अप्रकाशकान् भूम्यादीन् ६ ३६ ३ **अद्युम्**=प्रकाशरहित व्यवहारम् ७ ३४ १२ [द्युत् दीप्तौ धातो क्विप् । ततो नञ्समास । द्युरित्यह्नो नामधेय द्योतत इति सत नि० १ ६]

अद्यूत्ये द्यूते भवो व्यवहारो द्यूत्यश्छलादिदूषितस्तद्भिन्ने (सद्व्यवहारे) १ ११२ २४. अविद्यमानानि द्यूतानि यस्मिँस्तस्मिन् भवे (अवसे=रक्षणाय) ३४ २९ [द्यूत प्राति० भवार्थे यत् प्रत्यय, ततो नञ् समास]

अद्यौत् द्योतयति १ १२३.७ प्रकाशयति १ १२२ १५ प्रकाशते ४ ५ १५ विद्योतयति प्रकाशते १ ११३ १४ द्योतते ३ ५ ९ [द्युत् दीप्तौ धातो रूपम्]

अद्रयः मेघा ४ १९ ५ मेघा पर्वता वा ३ ३२ १६. **अद्रिणा**=मेघेन सह १ १६८ ६ **अद्रिभिः**=शिलाखण्डादिभि १ १३० २ शैलाऽवयवैरुलूखलादिभि १ १३५ ५ प्रस्तरैर्मेघैर्वा १.१३७ ३ मेघै, प्र०—अद्रिरिति मेघना० १.१०,२०.३१ मेघै शैलैर्वा १ १२१ ८ **अद्रिम्**=मेघम्, प्र०—अद्रिरिति मेघना० १ १०, १ ७ ३ मेघमिव ४ २१ ६ पर्वताकारम् (मेघम्) १ ६१ ७ मेघमिव शत्रुम् ४ २ १५. पर्वतमिव १ ८८ ३ **अद्रिः**=मेघ, प्र०—अद्रिरिति मेघनामसु पठितम् निघ० १ १०, १ १४ **अद्री**=मेघविद्युतौ ७ ४२ १ आनन्दितौ पत्नीयजमानौ ७ ३९ १ यौ न द्रवतो विनश्यत कदाचित्तौ (इन्द्राग्नी=विद्युद्भौतिकाग्नी) १ १०९ ३ **अद्रेः**=मेघात् १ ९३ ६ **अद्रेः**=शैलस्य १ ११७ १६. मेघस्य ३ ३१ ६ **अद्रौ**=शैलादौ घने पदार्थे १ ७० २ मेघे ५ ८५ २ मेघे शैले वा ४ ३१ [अद भक्षणे (अदादि०) धातो 'अदिशदि०' उणादि० ३ ६५ सूत्रेण क्रिन् प्रत्यय । अद्रि मेघनाम निघ० १ १०. अद्रिरादृणात्येतेन अपि वाऽत्ते स्यात् नि० ४ ४ अद्रय आदरणीया नि० ६ ८ गिरिर्वाऽद्रि श० ७ ५ २ १८. ग्रावाणो वा अद्रय तै० स० ६ १ ११ ४ अद्रिरसि श्लोककृत् काठ० १ ५]

अद्रिजाः यो मेघपर्वत वृक्षादीन् जनयति स (परमेश्वर) १० २४ योऽद्रीन् मेघान् जनयति (ब्रह्म जीवश्च) १२ १४ योऽद्रेर्मेघाज्जात (जीवात्मा) ४ ४० ५. [अद्रि+जनी प्रादुर्भावे (दिवादि०) धातो 'जनसनखन०' अ० ३ २ ६७ सूत्रेण विट् प्रत्यय । 'विड्वनोरनुनासिकस्यात्, अ० ६ ४ ४१ सूत्रेणाकारादेश । अथवा अद्रि-

उपपदे जनी धातो । 'अन्येष्वपि दृश्यते' सूत्रेण ड प्रत्यय । एष (सूर्य) वा अद्रिजा नि० ४ २|

अद्रिजूत योऽद्रौ मेघे जवति गतो गच्छति (रथ) ३ ५८ ८ [अद्रि+जू वेगितायां गतौ (सौत्रो धातु) धात। क्त]

अद्रिदुग्धाः मेघेन पूर्णा (अवता=कूपा) ४ ५० ३ अद्रेर्मेघात् पर्वतेभ्यो वा प्रपूरिता (नद्य:) १ ५४ ६ [अद्रि+दुह प्रपूरणे (अदादि०) धातो क्त प्रत्यय]

अद्रिबुध्नम् मेघाऽऽकाशम्, भा०—मेघम् १२ ४८ [बुध्नम्=अन्तरिक्षम्, बद्धा अस्मिन् धृता आप इति वा नि० ४ ४४]

अद्रिभित् मेघच्छेत्ता (बृहस्पति=सूर्य इव राजा) ६ ७३ १ [अद्रि+भिदिर् विदारणे धातो क्विप् प्रत्यय]

अद्रिरस प्राणादिविद्याविद (सत्पुरुषा) १ ६२ ३ [अद्रय आदरणीया इति निरुक्तकर्त्ता निर्वचनेन प्राणादिविद्या अद्रय । रस आस्वादनस्नेहनयो (चुरादि०) धातो क्विप् । अद्रीन्=प्राणादिविद्या रसयन्ति आस्वादयन्ति ते अद्रिरस]

अद्रिव: अद्रिर्मेघ प्रशस्तो भूयान् वा विद्यते यस्मिन् तत्सम्बुद्धावीश्वर मेघवान् सूर्यो वा, प्र०—अद्रिरिति मेघनामसु पठितम् निघ० १ १०, अत्र भूम्न्यर्थे मतुप् १ १० ७ बह्वोऽद्रयो मेघा विद्यन्ते यस्मिन् तत्सम्बुद्धौ (इन्द्र=मेघवन् सूर्य), प्र०—अत्र भूम्न्यर्थे मतुप् 'छन्दसीर' इति मतुपो मकारस्य वत्वम् 'मतुवसो रु सम्बुद्धौ छन्दसि' ८ ३ १ इति नकारस्थाने रुरादेशश्च १ ११ ५ प्रशस्तमेघयुक्त सूर्य-वद्वर्त्तमान (इन्द्र=धार्मिक जन), प्रशस्ता अद्रिव शैला विद्यन्ते यस्य तत्सम्बुद्धौ (इन्द्र=सभेश) १ १३३ ६ अद्रिवन्मेघ इव वर्त्तमान (शूर=सभेश) १ १३३ २ मेघवत् सूर्य इव (राजन्) ५ ३६ ३ मेघयुक्त सूर्यवद् राजमान (इन्द्र=सेनेश) ५ ३५ ५ बहुशैलराज्ययुक्त (राजन्), अद्रयो बहवो मेघा विद्यन्ते यस्मिन् सूर्ये तदिव तेजस्विन् (राजन्) १ १२९ १० अद्रयो मेघा विद्यन्ते सम्बन्धे यस्य सूर्यस्य तद्वद्वर्त्तमान (राजन्) ४.३२ ५ प्रशस्ताऽश्ममय-वस्तुयुक्त (इन्द्र=शत्रुविनाशक विद्वन् सेनेश), भा०—मेघसम्बन्धि सूर्य २७ ३८ सूर्य इव विद्याप्रकाशक (राजन्) ५ ३६ १ सुशोभितशैलयुक्त (विद्वद्राजन्) ५ ३६ ३ बहुमेघयुक्तसूर्यवत् सेनायुक्त (इन्द्र =सभाद्यध्यक्ष) १ ८० १४ अद्रयो मेघा विद्यन्ते यस्य सूर्यस्य तद्वद्वर्त्तमान (राजन्) ७ २० ८ अद्रयो मेघा इव शैला वर्त्तन्ते यस्य राज्ये तत्सम्बुद्धौ (राजन्) ५ ३८ ३ प्रशस्ता अद्रयो विद्यन्ते यस्य सर्गे तत्सम्बुद्धौ (सभाध्यक्ष) १ ६२ १ १० मेघवत् पर्वतयुक्त राज्यादिन्युक्त (सभाध्यक्ष) ५.८०.३ मेघवान् सूर्य इव वर्त्तमान (इन्द्र=विद्वन्) ३ ४६.१. सुशोभितशैलयुक्त (विद्वन्) ७ ३८ ३, मेघवान् सूर्य-वद्वर्त्तमान (उत्तमराजन्) ६ ४५ ६ [अद्रि=मेघ । मतुपः मस्य वत्वम्, नकारस्य रुत्वम् । अद्रिव = अद्रिवन् नि० ४४]

अद्रिसानो यस्य मेघे सानूनि सम्भजनानि तत्सम्बुद्धौ (उप -ग्रहे निर) ६ ६५ ५ [अद्रि=मेघ । सानु=सम्भजनीय सम्भक्तौ धातो 'दृसनिजनि०' उणादि० १ ३ सूत्रेण ञुण् प्रत्यय । सर्वाः सम्भजनीयः गतीर्ददाति यास्कात् । एतत्सा प्रमाण]

अद्रिसुतासः अद्रिणा मेघेन सुता उत्पन्ना (उद्भिद=ओषधय) १ १३९ ६ [अद्रि+षुञ् अभिषवे (स्वादि०) षु प्रसवैश्वर्ययो (भ्वादि०) धातोर्वा क्त प्रत्यय]

अद्रुहम् द्रोहरहितम् (मित्रम्) ६ १५ ७ **अद्रुहः**= द्रोहरहिता, भा०—द्रोहादिदोषरहिता (अध्वय.= विद्वज्जना) १२.५० द्रोहरहिता (मनुष्या) ३ ३२ ८ द्रोहरहितस्य (जनस्य) १ १५९ ७ **अद्रुहा**=द्रोहादिदोष-रहिता (विद्वज्जना), प्र०—अत्र 'सुपाम्०' इत्याकारादेश २ ४१ २१ द्रोहरहितावन्योन्यापकारविरहितौ ३ ५६ १ अद्रोग्धारौ (द्यावापृथिव्यौ) ४ ५६ २ [नञ् उपपदे द्रुह जिघांसायाम् (दिवादि०) धातोर् इगुपधलक्षण क]

अद्रुहाणा द्रोहरहितौ (द्यावा=अध्यापकोपदेशकौ) ५ ७०.२ [नञ् उपपदे द्रुह जिघांसायाम् धातो 'ताच्छील्य-वयोवचन०' अ० ३ २.१२९ सूत्रेण ताच्छील्ये चानश्, विकरणालुक् च छान्दस]

अद्रोघ द्रोहरहित (इन्द्र=जगदीश्वर) ३ ३२ ६. **अद्रोघम्**=द्रोहरहितम् (श्रव = श्रवणम्) ५ ५२ १ **अद्रोघः**=द्रोहरहित. (सज्जनो राजा) ६.१२ ३ **अद्रोघेण**=अद्रोहेण निर्वैरेण (वचसा=वचनेन) प्र० अत्र वर्णव्यत्ययेन हस्य घ ३ १४ ६ [नञुपपदे द्रुह जिघांसायां धातोरच् प्रत्यय । हकारस्य च घकार]

अद्रोघवाचम् अद्रोघा द्रोहरहिता वाग् यस्य तम् (विद्वज्जनम्) ६ ५ १ द्रोहरहिता वाग्यस्य तम् (परमात्मानम्) ६.२२ २ [नञ्द्रोघपदयो समासे ततो वाचा सह समास]

अद्वयन्तम् अद्वयमिवाचरन्तम् (अग्नि=पावकम्) ३ २९ ५. [द्वाववयवावस्येति द्वयम् द्विप्राति० अवयवे तयप्, तस्यायजादेश । ततो नञ्समासे अद्वयम्, तत

आचारे क्विप्, तत गतृ प्रत्यय]

अद्वयाविनम् यो द्वयोर्न विद्यते त सरलगामिनम् (वह्निम्) २ २ १५ अद्वन्द्वभावरहितम् (विद्यार्थिनम्) ५ ७५ ५ **अद्वयाविनः**=न विद्यते द्वितीयो यस्मिँस्तस्य (पुत्रस्य) १ १५६ ३ **अद्वयावी**=छलकपटादिरहित (राजादिजन) ७ ५६ १८ [द्वयप्राति० मत्वर्थे 'छन्दसि विनिप्रकरणेऽष्ट्रामेखलाद्वयोभय०' अ० ५ २ १२२ वा० सूत्रेण विनि प्रत्ययो दीर्घत्वम् च नञ्समासे रूपम्]

अद्वयाः अविद्यमान द्वय यस्मिन् स (ईश्वर) १ १८७ ३ [नञ्+द्वि+तयप् । तयप्स्थाने अयजादेश]

अद्विषेण्यः अद्वेष्टा (ईश्वर) १ १८७ ३ [द्विष अप्रीतौ (अदादि०) धातो छान्दसत्वात् कर्त्तरि केन्य प्रत्यय । नञ्समासश्च]

अद्वेषः अविद्यमानो द्वेषो यस्मिन् स (ईश्वर) १ २४ ४ द्वेषभावरहिता (विद्वज्जना) १ १८६ १० द्वेषरहितान् (मनुष्यान्) ५ ८७ ८ **अद्वेषे**=द्वेष्टुमनर्हे प्रीतिविषये १२ २६ [द्विष अप्रीतौ धातोर्भावे घञ्]

अध अनन्तरे प्र०—अत्र पृषोदरादित्वात् थस्य ध ८ ५ अथ, प्र०—अत्र वर्णव्यत्ययेन थस्य ध १६ ६६ अथ, प्र०—अत्रापि वर्णव्यत्ययेन धकार. १ १०१ ६ अनन्तरम्, प्र०—अथेत्यस्यार्थे शब्दारम्भेऽधेत्यव्ययम् १ ७२ १० आनन्तर्ये ४ २ १६ निश्चयार्थे १ १५ १० मङ्गले, प्र०—अत्र वर्णव्यत्ययेन थस्य ध १५ ४५ [अधा=अथ इति नि० ३ २]

अधत्त दधाति २ २२ २ धरति ६ ८ ३ **अधत्तम्**=दध्यातम् १ १८० ३ पोषयेतम् १ ११६ ८ धत्त, धारयत १ ६३ ५ भरतम् १ ११६ १५ पुष्येतम् १ ११६ १६ **अधत्थाः**=दध्या ५ ३२ २ [डुधाञ् धारणपोषणयो (जु०) धातो सामान्ये लङ्]

अधमम् निकृष्टम् (पाश=बन्धनम्) १२ १२ नीच तमोऽन्धकारम् ६ १६ **अधमान्**=पापाचारान् (नीचजनान्) ४ २८ ४ **अधमानि**=निकृष्टानि (बन्धनानि) १ २५ २१]

अधमत् धमति निराकरोति ४ ५० ४ धमति ३३ ६५ **अधमः**=धम कम्पय १ ५१ ५ शब्दै शिक्षय १ ३३ ५ शिक्षय, अग्निना सयोजयति वा, प्र०—अत्र लोडर्थे लडर्थे वा लुट् १ ३३ ६ [ध्मा शब्दअग्निसयोगयो (भ्वा०) धातोर्लङ् सामान्ये । 'पाघ्रा०' इत्यादिना सूत्रेण धमादेश । धमन्तिर्गतिकर्मा नि० ६ २]

अधयत् पिबति ५ १ ३. धयति पिबति ३ १ १०. [धेट् पाने (भ्वा०) धातोर्लङ्]

अधरकण्ठेन अधरस्थेन कण्ठेन २५ २

अधरम् अधोगतिम् (तम=अन्धकार कारागृहम्) १८ ७० निम्नम् (देशम्) २ १२ ४ **अधरः**=नीच (दुष्टकर्मैव द्वेष्यो जन) ३ ५३ २१ **अधरा**=नीचानि (पापफलानि) १ ३३ १५ **अधरान्**=अध पतितान् (दुर्जनान् शत्रून्) १७.६३ नीचान् (जनान्) १.१०१ ५ **अधरात्**=नीचे से ६ १९ ९ **अधरः**=अधस्थ (मेघ) १ ३२ ६ नीच (दुर्जन) ३ ५३ २१ **अधरेण**=मुखादधस्थेन (ओष्ठेन) २५ ५ [अधर=अधोर नि० ३ ११]

अधराक् दक्षिणस्या (दिश) ६ ३६ अधस्तात् १० १६ [अधराची+अस्ताति प्रत्यय । 'अञ्चेर्लुक्' अ० ५ ३ ३० सूत्रेणास्तातेर्लुक् 'लुक्तद्धितलुकि' सूत्रेण स्त्रीप्रत्ययस्यापि लुक्]

अधराचीनम् योऽधोऽञ्चति तम् (मेघम्) २ १७ ५ **अधराचीः**=या अधरान् नीचानञ्चन्ति ता (औषधय (स्त्रियो वा) १६ ५ [अधराच् प्राति० 'विभाषाञ्चेरदिक् स्त्रियामि' ति सूत्रेण ख-प्रत्यय स्वार्थे]

अधर्माय=धर्माचरणरहिताय (दुर्जनाय) ३० १० [धृञ् धारणे धातो 'अर्त्तिस्तु०' उणादि० १ १४० सूत्रेण मन् प्रत्यय । ततो नञ्समास]

अधवन्त धुन्वन्ति ७ १८ १५ [धूञ् कम्पने (क्र्या०) धातो लङ् । विकरणव्यत्ययेन श्ना न भवति]

अधस्तात् अधो निपात्य ३ ३० १६. [अधर प्राति० अस्ताति प्रत्यय । 'अस्ताति च' अ० ५ ३ ४० सूत्रेण अधरस्थाने अध् आदेश]

अधस्पदम् नीचाऽधिकारम् (पृतन्युम्—शत्रुम्) १५ ५१ [अधस्+पदम् 'अध शिरसी पदे' अ० ८ ३ ४७ सूत्रेण सकारादेश]

अधः अनन्तरम् १ १८० ७ अधोगामिन (जना) १६ ५७ अर्वाक् ३३ ७४ हीनताम् ७ ३८ ६ [अध=न धावतीत्यूर्ध्वगति प्रतिषिद्धा नि० ३ ११]

अधाक् दहति २ १५ ४ [दह भस्मीकरणे (अदा०) धातोर्लुङ् । 'मन्त्रे घसह्वर०' अ० २ ४ ८० सूत्रेण लेर्लुक्]

अधात् दधाति ४ ३४ १ दध्यात् ५ ४० ८ समादधाति १६ ६३ **अधातम्**=धारण करो २० ६६ **अधाताम्**=दध्याताम् २० ५७ डुधाञ् धारणपोषणयो धातोर्लुङ् । 'गातिस्थाघु०' इति सूत्रेण सिचो लुक्]

अधायि ध्रियते १ १६२ ७ धृता १ ११६ २ धीय-

ताम् १ १०४ ७ धीयते १ ६०.४ ध्रियेत ७ ३४ १४. [डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि लुङ्। अधायि=अध्यायि नि० ६ २२]

अधारयत् धारयेत्, धारयतु १३ २४ धारयति २ १७ ५ **अधारयतम्**=धारयतम् ५ ६२ ३ **अधारयन्**=धारयन्तु ३ २ ७ धारयन्ति ३३ ७५ **अधारयन्त**=धारयन्ति प्र०—अत्र लडर्थे लङ् १ २० ८ धृतवन्त १ १०३ १ **अधारयः**=धारय १ ५२ ८ धरति २ १३ ७ धारयसि ६ १७ ७ धरितवानसि ऋ० भू० १४४, ८ १२ ३० [धृञ् धारणे (भ्वा०) धातोर्णिजन्तात् लुङ्]

अधारयः अधारयन् सन् (सूर्य) प्र०—अत्र नञुपपदात् 'धारिपारीति' श प्रत्यय १ ५१ ४ [नञ्+धारि+श । 'अनुसर्गाल् लिम्पविन्दधारि०' अ० ३.१ १३८ सूत्रेण कर्त्तरि श प्रत्यय]

अधि उपरिभावे, अधिष्ठातृभावे ३१ ५. उपरिभावे १६ ५४ उपरान्तसमये १ ४८ ७. उपरि विराजमाने १७ १४ उपरिभागे १ १६ ६ अधिकार्थे १ ६ १० अधीत्युपरिभावमैश्वर्यं वा प्राह निरु० १ ३, १ २२ अधिष्ठातृत्वेन सर्वोपरि विराजमाने १७ ३० उपरि ४ १८ १२ उपरित १ ६ ६ अध्यक्षतया १ ८४ १७. आधेयत्वे १ ८८ ३ आधाराऽर्थे १ १२६ १ अनन्तराऽर्थे २ ३० ३ उत्कृष्टे ३ १६ ५ मध्ये ४ ३० १२ अधिकार-योगे स० वि० १६५ १० ८५ ४६ [अधीत्युपरिभावम् ऐश्वर्य वा नि० १ ३]

अधिकल्पिनम् अधिगतसामर्थ्ययुक्तम् (जनम्) ३० १८ [अधि+कृपु सामर्थ्ये धातोर्भावे घञ्, ततो मत्वर्थे इनि]

अधिकिरते विकिरति ४ ३८ ७ [कॄ विक्षेपे (तुदादि०) धातोर्लट्]

अधिकृण्वन्ते आधेयत्व कुर्वन्ति तदाचरणायाधिकार ददति, प्र०—व्यत्ययेनाऽत्रात्मनेपदम् १ ८८ ३ [अधि+डुकृञ्करणे धातोर्लट् । विकरणव्यत्ययश्च । कृण्वन्ति=कुर्वन्ति नि० ६ ३२]

अधिक्षियन्ति निवसन्ति ५ २० आधाररूपेण निवसन्ति १ १५४ २ [अधि क्षि निवासगत्यो धातोर्लट्]

अधिगमेम उपरिभावेन गच्छेम, भा०—आप्नुयाम, प्र०—अत्र 'बहुल छन्दसि, इति शपो लुक् १८ ५१. [अधि+गम्लृ गतौ धातो लिङ् । शपो लुक् च ।]

अधिगर्त्यस्य अधिकसुन्दरे गर्त्ते गृहे भवस्य (मध्व=मधुरादिपदार्थस्य) ५ ६२ ७. [अधि+गर्त्त प्रानि० भवार्थे यत् प्रत्यय]

अधिचक्रिरे=उपरि कुर्वन्ति १.८५.२ [अधि+कृञ्+लिट्]

अधिजिगाति अधिगच्छति ५ ८७ ४ [अधि+जिगाति । जिगाति गतिकर्मा निघ० २ १४]

अधिजज्ञिरे अधिजायन्ते भा०—जाना ३२ २ अधिजज्ञे+प्रादुर्भवति १३ ३४ [अधि+जनी प्रादुर्भावे धातोर्लिट्]

अधिजातः उपरिजात (विद्वान्) ३५ २२. [अधि+जनीप्रादुर्भावे धातो क्त । नकारस्याकारादेश]

अधिजायसे उत्पन्न होता है म० प्र० १५६ [अधि+जनी प्रादुर्भावे धातोर्लट् । जनेर्जादेश]

अधित दधाति १ १४४ ५ दध्यात् २१ ४६. [डुधाञ् धारणपोषणयोर्धातोर्लुङ् । 'स्थाघ्वोरिच्च' सूत्रेणेकारादेश कित्त्वञ्च]

अधितस्थुः तिष्ठन्ति १ १६४ २ [अधि+ष्ठा गतिनिवृत्तौ धातोर्लिट् । अधितस्थु+अभिसन्तिष्ठन्ते नि० ४ २७]

अधितिष्ठति उपरि तिष्ठतु १ ८२ ४ ईश्वरत्वे नोपरिभावत्वेन प्रवर्त्तते १ ५१ ११ **अधितिष्ठन्**=उपरि स्थित सन् (इन्द्र+शिल्पविद्यैश्वर्ययुक्तो जन) ३ ३५ ४ **अधितिष्ठसि**=उपरि तिष्ठसि १८ ५५ [अधि+ष्ठा गतिनिवृत्तौ धातोर्लट्]

अधिथाः धारयेथा ४ १७.६. दध्या ६ ३१ १ [अधि+डुधाञ् धारणपोषणयो धातोर्लुङ । 'स्थाघ्वोरिच्च' सूत्रेणेकारादेश कित्त्वञ्च]

अधिधत्त अधिधरत १७ १ [अधि+डुधाञ्+लोट्]

अधिधायि उपरि ध्रियते ४ २८ २ **अधिधाः**=उपरि धेहि १ ५४ ११ **अधिधेहि**=उत्कृष्टतया स्थापय ३ १६ ५

अधिनिदधुः अधिकतया नितरा धरन्ति १ ७२ १० उपरि नितरा धरन्तु १ ७३ ४ [अधि+नि+डुधाञ्+लिट्]

अधिनिषेद उपरि निषीदन्ति, प्र०—अत्र वचनव्यत्ययेनैकवचनम् ४ ३५ ८. **अधिनिषेदुः**=स्थित है स० प्र०

२३६, १ १६४ ३६ स्थित हुए और होते है स० वि० २१५, १ १६४ ३६ अधिनिषीदन्ति १ १६४ ३६ [अधि+नि+ पद्लृ विशरणगत्यवसादनेषु धातोर्लिट्]

अधिपतयः अधिष्ठातार (वसव +अग्न्याद्या) १५ १० स्वामिन १५ १२ अधिष्ठातार पालका (मन्यासिनो ब्रह्मचारिण) १६ ५६ उपरिष्टात्पालका (रुद्रा =बलवन्ता वायव) १५ ११ **अधिपतये**=सर्वाधिष्ठात्रे, भा०+ प्रजाधिपतये (राज्ञे) २२ ३२ सर्वाधिष्ठातॄणामुपरिवर्त्त-मानाय (विद्वज्जनाय) ९ २० पतीना पालकानामधिष्ठात्रे, (राजपुरुपाय) १८ २८ सर्वस्वामिने राज्ञे २२ ३० **अधिपतिना**=अधिष्ठात्रा, भा०—अध्यक्षेण १५ ९ **अधिपतिः**=उपरिष्टात् पालक (पति) १५ १० स्वामी (पति) १३ २४ अधिष्ठाता (सोम =ओपधिराज) १४ ३१ द्योतकानामधिष्ठाता (सूर्य) १५ ११ अन्व०= सर्वस्य स्वामीश्वर, पत्यु पति (ईश्वर) १४ २८ [अधि + पति + जस् । प्रजापतिर्वाऽअधिपति श० ८ २ ३ १२]

अधिपत्नीम् अधिष्ठातृत्वेन पालयिकाम्, अन्व०— सूर्य्याम् (स्त्रीम्) १४ ५ **अधिपत्नी**=अधिष्ठात्र्यौ (अहोरात्रे) १४ ३० अधिपत्निना महिता (अदिति =भूमि) १४ २६ सर्वासा दिशामुपरि वर्त्तमाना (दिक्) १५ १४ गृहेऽधिकृता स्त्री १४ १३ [अधि+पति प्राति० 'पत्युर्नो यज्ञसयोगे' सूत्रेण ङीप् नकारादेशश्च]

अधिपतात् उपरि गच्छेत् १ १६ ३ (अधि+पत्लृ गतौ धातोर्लेट् । 'लेटोऽडाटौ' सूत्रेणाडागम]

अधिपाः अधिक पालक [अग्नि =उपदेशक आचार्य) १२ ५८ (अधि+पा रक्षणे धातोर् अच् प्रत्यय]

अधिपिपिशे उपरिभावेनाऽऽश्रीयते ५ ५७ ६ [अधि+पिश अवयवे (तुदा०) धातोर्लिट्]

अधिपूरुषः अधि उपरि, पश्चाद् ब्रह्माण्डतत्त्वावयवै पुरुप सर्वप्राणिना जीवाऽधिकरणो देह ऋ० भू० १२२ [अधि+पुरुप । 'अन्येपामपि दृश्यते' इति दीर्घत्वम्]

अधिप्रभरे स्वीयचित्ते धरे १ १२६ १ [अधि+प्र+ भृञ् भरणे (भ्वादि०) धातोर्लट्]

अधिप्रवोचत् अधिप्रवदेत् १ १६४ १८ [अधि+ प्र+वच परिभापणे (अदादि०) धातोर्लुङ् सामान्ये । 'बहुल छन्द०' इत्यड् अभाव. । 'अस्यति०' इत्यङ् 'वच उम्' इति उम्]

अधिबुध्यमानौ सन्तानोत्पत्ति आदि की क्रिया को अच्छी प्रकार से जानने हारे (स्त्री पुरुप) स० वि० १४०, १४ २ ४३ [अधि+बुध अवगमने धातो कर्मणि शानच्]

अधिब्रवत् अध्यक्षतया ब्रूयात् १ ८४ १७. **अधिब्रवीतु**=उपरिभावेनोपदिशतु ६ ७५ १२ **अधिब्रुवन्**=अधिक ब्रुवन्तु, भा०—सत्यमुपदिशेयु १७ ५२. **अधिब्रुवन्तु**=अधिक ब्रुवन्तु १९ ५७. अधिष्ठातृभावेनोपदिशन्त्वध्यापयन्तु वा १९ ५८ **अधिब्रूहि**=अधिकतयाऽऽज्ञापय १ ११४ १० अधिकमुपदिश १५ १ उपरिभावेनोपदिश ३४ २७ विजयविधिमुपदिश १५ २ [अधि+ब्रूञ् व्यक्ताया वाचि (अदादि०) धातोर् लेट्]

अधि भव उपरि भव ४४ ५ अधिकारयुक्त हो अर्थात् सब से अविरोधपूर्वक प्रीति से वर्त्ता कर स० वि० १३५, १० ८५ ४६ [अधि भू सत्तायाम् (भ्वादि०) धातोर्लोट्]

अधिभोजना अधिकानि भोजनानि ६ ४७ २३ [अधि+भुज पालनाभ्यवहारयो (रुधादि०) धातो 'ल्युट् च' अ० ३ ३.११५ सूत्रेण ल्युट् । योर् अनादेश]

अधिभ्रशत् अधिक नष्ट स्यात् १२ ११ [अधि+ भृशु अध पतने (दिवादि०) धातोर् लेट्]

अधिमन्थनम् उपरिस्थ मन्थनम् ३ २९ १. [अधि+ मन्थ विलोडने (भ्वादि०) धातोर्ल्युट् भावे]

अधियेतिरे उपरि प्रयतन्ते १ ६४ ४ (अधि+यती प्रयत्ने (भ्वादि०) धातोर्लिट् । 'अत एकहल्मध्ये०' इति सूत्रेणेत्वाभ्यासलोपौ]

अधिराजम् सर्वेपामुपरि राजमानम् ३४ ४६ **अधिराजः** सर्वोपरिविराजमान (सभापति राजा) स० वि० १८३ राजाऽधिराज ऋ० भू० १४५ ('राजनि अधि' इति विभक्त्यर्थेऽव्ययीभावसमासे 'अनश्च' अ० ५ ४ १०८ सूत्रेण टच् समासान्त प्रत्यय]

अधिरोचने उपरि प्रकाशे १ १५५ ३ [अधि+रुच दीप्तावभिप्रीतौ च (भ्वादि०) धातोर्भावे ल्युट्]

अधिरोहय सन्तानो से अधिकाधिक बढा स० वि० १३६ अथर्व० १४ २ ३७ **अधिरोह**=उपरिभावेन रोह १ ५६ २ [अधि+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्णिजन्ताल् लोट्]

अधिवक्ता अधिक वदतीति स (इन्द्र =विद्वान्) १ १०० १६ सर्वेषामुपर्य्यधिष्ठातृत्वेन वर्त्तमान सन् वैद्यकशास्त्रस्याऽध्यापक, भा०—सर्वेषामधिष्ठाता (भिषग् = वैद्य) १६ ५ यथावदनुशासिता १ १०२ ११ **अधिवक्तारम्**=सर्वेषामुपरि उपदेशकम् २ ३८ ८ [अधि+ब्रूञ् व्यक्ताया वाचि धातोस्तृच् कर्त्तरि। 'ब्रुवो वचि' इति वचिरादेश]

अधिवपते उपरि स्थापयति १ ६२ ४ [अधि+डुवप् बीजसन्ताने छेदने च (भ्वा०) धातोर्लट्। 'अनेकार्था अपि धातवो भवन्ति' इति महाभाष्यवचनात् स्थापनार्थेऽपि]

अधिवर्धत् उपरिभावेन वर्धयेत् ५ ६२ ५ **अधिवर्धताम्**=उपरिभाव वर्धताम् २७ ४ [अधि+वृधुवृद्धौ (भ्वा०) धातोर्लोट्]

अधिवासम् उपरि स्थापनीयम् (वस्त्रम्) २५.३६ [अधि+वस आच्छादने (अदादि०) धातोर्घञ् प्रत्यय]

अधिविक्षरन्ति अक्षराण्यधिवर्षन्ति १ १६४ ४२. [अधि+वि+क्षर सञ्चलने (भ्वा०) धातोर्लट्]

अधिविरप्शते उपरि विशेषेण राजते ४ ४५ १ विरप्शी महन्नाम निघ० ३ ३]

अधिविराजतः अधिक देदीप्येते १ १८८ ६ [अधि+वि+राजृ दीप्तौ (भ्वा०) धातोर्लट्]

अधिवोच उपरिभावेनोपदिश १ १३२ १ **अधिवोचत**=प्रवदत २ २७ ६ **अधिवोचः**=अधिकतया उच्या। प्र०—अत्र लिङर्थे लुङ्। 'छन्दस्यमाङ्योगेऽपि' अ० ६ ४ ७५ इत्यडभाव ६ ३३. [अधि+ब्रूञ् व्यक्ताया वाचि धातोर्लुङ् सामान्ये। 'ब्रुवो वचि' रिति वचि। 'अस्यतिवक्ति०' इत्यङ् 'वच उम्' इत्युमागम। अडभावश्च]

अधिश्रितम् उपरि स्थितम् (भुवन=जगत्) ४ ५८ ११ अधिश्रित =प्रकाशित होता है स० प्र० ३१४ आश्रित सन् प्रकाशित (चन्द्र) ऋ० भू० १४३ [अधि+श्रिञ् सेवायाम् (भ्वा०) धातो क्त]

अधिश्रियः अधिका लक्ष्म्य १ १३९ ३ [अधि+श्री]

अधिषन्ति उपरि सन्ति १८ ६७ [अधि+अस भुवि अदादि०) धातोर्लट्। 'उपसर्गप्रादुर्भ्याम्०' अ० ८ ३ ८७ सूत्रेण मूर्धन्यादेश]

अधिषवणे सोमलताद्योषधिसाधके (मुशलोलूखले) १८ ११ [अधि+षुञ् अभिषवे (स्वा०) धातो, करणे ल्युट्। जिह्वाधिषवणम् मै० ३ ८ ८, ४.५ ६ त्वगधिषवण चर्म काठ० २५ ६]

अधिषवण्ये अधिगत सुवन्ति याभ्यान्तेऽधिषवणी तयोर्भवे (भक्ष्यपदार्थे), प्र०—अत्र 'भवेच्छन्दसि' इति यत् १ २८ २.

अधिष्ठः उपरिस्थ (सभाध्यक्ष) १ ४७ ७. [अधि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'सुपि स्थ' अ० ३ २ ४ सूत्रेण क]

अधिष्ठानम् अधितिष्ठन्ति यस्मिंस्तत् १७ १८ इस ससार की रचना करने वाला (ब्रह्म) आर्याभि० २ ३२ आधार इव (ब्रह्म) ७ १८ [अधि+ष्ठा गतिनिवृत्तौ धातोरधिकरणे ल्युट्]

अधिष्ठाम अधितिष्ठेम १ १३६ ४ [अधि+ष्ठा गतिनिवृत्तौ धातोर्लट्। छान्दसत्वात् तिष्ठादेशो न भवति]

अधिसन्दधुः अधिसन्दध्यु ३ ३ ३ [अधि+सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट्]

अधिसमोताः अधिकता से निवास और मित्रता करने वाले (सब दिव्य गुण और विद्वान्) स० वि० ८० अथर्व० ११ ५ २४.

अधिसादयामि उपरि स्थापयामि १३ १३. [अधि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्णिजन्ताल्लट्]

अधिसीदत उपर्युपरिस्थिता भवत १५ ५४ उपरिभावेन सीदत १७ ७३ उपरिभावेन तिष्ठत १८ ६१ **अधिसीदन्**=उपरि गच्छन् (शिल्पविद्यावित्) १ ८५ ७ [अधि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट्। पाघ्रा०' इत्यादिसूत्रेण सीदादेश शिति]

अधीतम् पठन-पाठन आर्याभि० २ १ [अधि+इङ् अध्ययने (अदादि०) 'नपुसके भावे क्त' इति सूत्रेण क्त प्रत्यय]

अधीतौ अध्ययने २ ४ ८ [अधि+इङ् अध्ययने+क्तिन् स्त्रियाम्]

अधीत्य स्वर और पाठ मात्र को पढकर स० प्र० ६६ [अधि+इङ् अध्ययने+क्त्वा। क्त्वास्थाने ल्यप् च]

अधीथ स्मरण करो ७ ५६ १५ [अधि+इक् स्मरणे (अदादि०) धातोर्लट्]

अधीमसि सर्वोपरि विराजमान प्राप्नुम १ ८० १५ **अधीमहि**=प्राप्नुयाम ४ ३२ १६ **अधीयन्त**=

अधीयताम् १४ २८ [अधि+इण् गतौ (अदादि०) धातोर्लेट्। 'इदन्तो मसि' अ० ७ १.४६ सूत्रेण 'मसि' इकारान्तो भवति]

अधीरा धैर्यरहिता (स्त्री) १ १७६ ४ [धीर = धीमान् नि० ३ १२ धीरा प्रज्ञानवन्तो ध्यानवन्त नि० ४ ६]

अधीवासम् अधीवासमिव घासादिकम् १ १४० ६ अधि उपरि वास आच्छादन यस्य तम् (विद्युदग्निम्) १ १६२ १६ उपरि स्थापनीयम् २५ ३६ [अधि+वस आच्छादने (अदादि०) धातोर्घञ्। पूर्वपदस्य च दीर्घत्वम्]

अधीहि उपरि स्मर १ ७१ १० [अधि+इक् स्मरणे (अदादि०) धातोर्लोट्]

अधुक्षन् प्रपूरयन्तु २ ३६ १ **अधुक्षत्** प्रपिपूर्द्धि, प्र०—अत्र लोडर्थे लुङ् १ ३ [दुह प्रपूरणे (अदादि०) धातो सामान्ये लुङ्। 'शल इगुपधात्०' इति च्ले क्सादेश। 'हो ढ' 'षढो क सि' इति ढत्वकत्वे]

अधुक्षः दोग्धुमिच्छसि, भा०—प्रपूरयसि वा प्रपूरयितुमिच्छसि १ ३ प्र०—अत्र लडर्थे लुङ् [दुहप्रपूरणे (अदादि०) धातो सामान्ये लुङ्]

अधुः दध्यासु २ ६४ आच्छादयन्ति ४ १३ ४ [डुधाञ् धारणपोषणयो (जु०) धातोर्लुङ्। 'गातिस्थाघु०' सूत्रेण सिचो लुक्]

अधूनुतम् कम्पाती हैं ३ १२ ६ **अधूनोत्** कम्पयति १ ५६ ६ [धूञ् कम्पने (क्र्यादि०) धातो सामान्ये लङ्]

अधूर्षत् हिसन्तु ५ १२ ५ [धूरी हिसायाम् (दिवादि) धातोर्लुङ्]

अधूषत दुष्टान् दोषाश्च कम्पयन्ति, अन्व०—धुन्वन्ति प्र०—अत्र लडर्थे लुङ् ३ ५१ दूरीकुरुत १ ८२ २ [धू विधूनने (तुदादि०) धातोर्लुङ्]

अधृष्टम् अधर्षितम् (छर्दि = गृहम्) ६ ६७ २ **अधृष्टाः [अधृष्टासः]** अधर्षणीया (गिर = सुशिक्षिता वाच) ७ ३ ८ धृष्टतारहिता अप्रगल्भा (वसव = जिज्ञासवो विद्यार्थिन) ६ ५० १५ अप्रगल्भा (वसव = विद्वास) ६ ५० ४ शत्रुभिरधर्षणीया (मरुत = शूरवीरा जना) ६ ६६ १० [ञिधृषा प्रागल्भ्ये (स्वा०) धातो क्त]

अधेनुम् अदोहयित्रीम् (गा = पृथिवीम्) १ ११७ २० [धेनुर्धयनेर्वा धिनोतेर्वा नि० ११ ४२ तत्प्रतिषेध]

अधेन्वा अविद्वान् ऋ० भू० ३१७ सुशिक्षा शब्द, अर्थ और सम्बन्ध के बोध से रहित वाणी प० वि०॥ [अधेन्वा = नास्मै कामान् दुग्धे नि० १ २० धेनुरिति वाङ्नाम निघ० १ ११ धेना वाङ्नाम १ ११]

अधोअक्षाः अधोऽर्वाचीना अक्षा इन्द्रियाणि येषान्ते (विद्वज्जना), प्र०—अक्षा इति पदनाम० निघ० ५ ३, ३ ३३ ६

अधोक् प्रायात् ४ १६ ७

अधोरामः अध क्रीडी (पक्षी) २६ ५८ **अधोरामौ** अधोभागे श्वेतवर्णौ (पशू) २६ ५६ अधोरमण ययोस्तौ (अश्विनौ = पशू) २४ १ [अधोराम सावित्र इति पशु समाम्नाये विज्ञायते, कस्मात् सामान्याद् इत्यधस्तात् तद्वेलाया तमो भवति, एतस्मात् सामान्याद् अधस्ताद् राम = अधस्तात् कृष्ण। नि० १२ १४]

अध्यक्षः स्वामी (परमात्मा) स० प्र० २८१, १० १२६ ७ **अध्यक्षाय** अधिरुपरिभावेऽन्वेषणेऽक्षाण्यक्षिणी वा यस्य यस्माद्वा तस्मै (सभाध्यक्षाय) ४ १६. [अधि अक्षिपदयोर्बहुव्रीहिसमासे 'बहुव्रीहौ सक्थ्यक्ष्णो०' अ० ५ ४ ११३ सूत्रेण समासान्त षच्]

अध्यजायत अधिजायते १३ ४५ उत्पन्नम् प० वि०॥ [अधि+जनी प्रादुर्भावे (दिवा०) धातोर्लङ्। 'ज्ञाजनोर्जा' इति जादेश]

अध्यतिष्ठत् अधिष्ठातृभावेन वर्त्तते १७ २० अधिष्ठाता भवति १ १६३ ६ सब के ऊपर विराजमान हो रहा है आर्याभि० २ ३६ १७ २० उपरि तिष्ठेत् २६ २० [अधि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो सामान्ये लङ्]

अध्यधत्तम् उपरि धरतम् १ ११७ ८ [अधि+डुधाञ् धारणपोषणयोर्धातो सामान्ये लङ्]

अध्यधारयः उपरि धरति २ १३ ७ [अधि+धृञ् धारणे धातोर्णिजन्ताल् लङ्]

अध्यवधीः अधिहन्या ४ ३० १५ [अधि+हन हिसागत्यो (अदादि०) धातो सामान्ये लुङ्। 'लुङि च' इति सूत्रेण वधादेश]

अध्यवोचत् उपदिशेत् १६ ५ [अधि+ब्रूञ् व्यक्तायां वाचि धातो सामान्ये लुङ्। 'ब्रुवो वचि' रिति वचिरादेश। अङ् उमागमश्च]

अध्यस्थात् अधितिष्ठेत् १७ ५४ अधितिष्ठति ५ ३१ १ [अधि+ष्ठा गतिनिवृत्तौ+लुङ्। 'गातिस्था०' सूत्रेण सिचो लुक्]

अध्यस्थाः अध्युपरि तिष्ठन्तीत्यध्यस्था (प्राणिन) १ ४९ २

अध्यागहि उपरितो गमयत्यागमयति वा, प्र०—अत्र लडर्थे लोट्, पुरुषव्यत्ययेन गमेर्मध्यमपुरुषैकवचने 'बहुल छन्दसि' इति शपो लुक्, हेर्ङित्वादनुनासिकलोपश्च १ ६ ६ [अधि+आ+गम्लृ गतौ+लोट् । शपो लुक् । अनुनासिक-लोपश्च]

अध्याभरत् स्वात्मनि परमात्मानं धारितवान् ऋ० भू० १५६ [अधि+आ+भृञ् भरणे धातोर्लङ्]

अध्यारुहाम उपर्य्युत्कृष्टतया समन्तात् प्रादुर्भवेम, प्र०—अत्र विकरणव्यत्ययः ८ ५२ [अधि+आ+रुह बीजजन्मनि प्रादुर्भावे च धातोर्लङ् । विकरणव्यत्ययेन शप स्थाने श]

अध्यालोहकर्णाः अधिगतं च तल्लोहं च सुवर्णं तद्वद्वर्णौ यस्य स (पशुः पक्षी वा), प्र०—लोहमिति हिरण्यनाम निघ० १ २, २४ ४

अध्यावक्षत् अध्यावहेत् ३ ५ ९ [अधि+आ+वह प्रापणे (भ्वा०) धातोर्लेट् । 'सिब्बहुलं लेटि' सूत्रेण सिप्, हस्य ढत्वकत्वे]

अध्याशत उपरि व्याप्नुवन्ति १ ८५ २ [अधि+आ+अशू व्याप्तौ सघाते च (स्वा०) धातोर्लङ् । बहुलं छन्दसी' ति विकरणलुक्]

अध्यासते उपरिभागे सन्ति १ १९ ६ [अधि=आस् उपवेशने (अदादि०) धातोर्लट्]

अध्युत्तरस्मिन् परलोके द्वितीये जन्मनि च ऋ० भू० ३०५ [अधिउत्तरपदयो समासे सप्तमी विभक्ति]

अध्युदितः उपर्युदयं प्राप्त (सूर=सूर्य) ३२ ७ [अधि+उत्+इण् गतौ (अदादि०) धातो क्त प्रत्यय]

अध्येति स्मरण करता है स० वि० १४६, ३ ४२ स्मरति ४ १७ १२ **अध्येमि**=सर्वत स्मरामि ३ ४९ ९ [अधि+इक् स्मरणे धातोर्लट्]

अध्येधे प्रकाशयति ७ ३९ १ [अधि=एध वृद्धौ (भ्वा०) धातोर्लट्]

अध्यैरयन्त स्वेच्छापूर्वक विचरते है स० वि० ७, ३२ १० सर्वत्र स्वेच्छया विचरन्ति ३२ १० स्वच्छन्द स्वेच्छा से वर्त्तते है आर्याभि० २ ६ [अधि=ईर गतौ कम्पने च धातोर्णिजन्ताल् लङ् सामान्ये]

अध्रजन् धावन्ति १ १६६ ४. [ध्रज गतौ (भ्वा०) धातोर्लङ् । ध्रजत गतिकर्मा निघ० २ १४]

अध्रिगवे शत्रुभिरधृष्योऽसहमाना वीरास्तान् गच्छति प्राप्नोति तस्मै (इन्द्राय=) १ ६१ १ **अध्रिगुम्**=इन्द्र परमैश्वर्यवन्तम्, प्र०—इन्द्रोऽप्यध्रिगुरुच्यते निरु० ५ ११, १ ११२ २० **अध्रिगुः**=सत्यगति (राजा) ६ ४५ २० **अध्रिगू**=अधिकगन्तारौ (वायुविद्युतौ) ५ ७३ २ **अध्रिगो**=योऽधृन् धारकान् गच्छन्ति तत्सम्बुद्धौ (विद्वज्जन) ५ १० १ योऽधृन् मन्त्रान् गच्छति जानाति तत्सम्बुद्धौ (अग्ने=सत्पुरुष) ३ २१ ४ [धृङ् अनवस्थाने (भ्वा०) धातोर्बाहुलकाद् औणादिकक्रिन्प्रत्यये ध्रि । न ध्रि =अध्रि । गाङ् गतौ (भ्वा०) धातोर् औणादिके कु प्रत्यये गु । तयो समास । अधिगुर्मन्त्रो भवति गव्यधिकृतत्वात् । अपि वा प्रशासनमेवाभिप्रेत स्यात् तच्छब्द-वत्त्वात् । अग्निरप्यध्रिगुरुच्यते अधृतगमनकर्मवन् । इन्द्रो-ऽप्यध्रिगुरुच्यते निघ० ५ ११ शमीध्व सुशमि शमीध्व शमीध्वमध्रिगविति । अध्रिगुर्वै देवाना शमिता ऐत० ब्रा० २ १ ७ अध्रिगुश्चापापश्च । उभौ देवाना शमितारौ तै० ३ ६ ६ ४]

अध्रिगावः अधृता गावो रश्मयो यैस्ते (रुद्रा = वायव) १ ६४ ३ [अध्रिगोशब्दयो समास]

अध्रिजः अध्रिषु धारकेषु जात (राजा) ५ ७ १० [अध्रि+जनी प्रादुर्भावे धातोर्ड प्रत्यय]

अध्रुक् यो न द्रुह्यति (महाविद्वान्) ६ ५ १. द्रोह-रहित (भ्राता=बन्धु) ६ ५१ ५ य कदाचिन्न द्रोग्धि (अग्नि =परोपकारी विद्वज्जन) ६ ११ २ [द्रुह अभिकाक्षायाम् धातो कर्त्तरि क्विप् । नञ्समास]

अध्वन् अध्वनि ६ ५१ १५ **अध्वनः**=सन्मार्गान् १ १०४ २ शत्रोर्मार्गान् ६ १३ मार्गात् १ ७१ ९ मार्गान् १ ७२ ७ अन्व०—व्यवहारपरमार्थसिद्धिकरस्य मार्गस्य मध्ये ४ १९ मार्गस्य १ १४६ ३ **अध्वनाम्**=विद्याधर्म-शिल्पमार्गाणाम् ५ ३३ परमार्थ और व्यवहार मार्गो के आर्याभि० २ १८, ५ ३३ **अध्वनि**=मार्गे ६ ४६ १३ **अध्वभिः**=मार्गैः १ २३ १६ **अध्वसु**=मार्गेषु ३ ३२ **अध्वा**=मार्ग १ ११३ ३ सन्मार्गरूप १ १७३ ११ **अध्वानम्**=धर्म-मार्गम् १ ३१ १६ [अद भक्षणे (अदादि०) धातो 'अदेर्ध च' उणा० ४ ११६ सूत्रेण क्वनिप्-धकारादेशश्च अध्वन् अन्तरिक्षनाम निघ० १ ३ योजनशो हि मिमाना अध्वान धावन्ति श० ५ १ ५ १७]

अध्वपते धर्मव्यवहार-मार्गपालयित (विद्वज्जन)

५.३३ [अध्वा=मार्गस्तस्य पतिस्तत्सम्बुद्धौ]

अध्वनयत् धुनयति ६.१८ १० [ध्वन शब्दे (चुरा०) धातोर्लङ्]

अध्वरकृतम् अध्वरं करोति येन सामग्रीसमूहेन तम्, प्र०—अत्र 'कृतो बहुलम्' इति वार्त्तिकेन करणे क्विप् 'अध्वरो वै यज्ञो यज्ञकृतम्' शत० १ २ ४ ५ ,१ २४ [अध्वरोपपदे डुकृञ् करणे धातो क्विप्]

अध्वरम् हिंसाऽधर्मादिदोषरहितम् (यज्ञ=प्रथम-मन्त्रोक्त महिमान कर्म वा), प्र०—'ध्वरति हिंसाकर्मा तत्प्रतिषेधो निपात, निरु० १ ८, १ १४ क्रियाजन्य जगत् १ १८ ८ अहिंसनीय सुखरूप यज्ञम् १ २३ १७ अग्नि-होत्रादिकमिव विद्याविज्ञानवर्द्धक यज्ञम् १ ७४ ४ अहिंसादिलक्षण धर्मम्, यज्ञम् १ १३५ ७ राज्यपालनाख्य यज्ञम् १ १३५ ३ न्यायव्यवहारम् ४ ६ ७ पालनाख्य व्यवहारम् ५ ४ ८ अध्ययनाऽध्यापनाख्यमहिंसनीय यज्ञम् १ १०१ ८ अहिंसनीय यज्ञम् १ ४४ १३ अहिंसादि-व्यवहारयुक्त यज्ञम् ३ २४ २ अहिंसादिलक्षण धर्म्य व्यवहारम् ३.२८ ५ अहिंसनीयराज्यव्यवहारम्, भा०—यथार्थ न्यायम् ३३ १५ अहिंसनीय शिल्पसाध्य व्यवहारम् २ २ ५ अहिंसनीय (यज्ञ=सङ्गमनीय व्यवहारम्) भा०—अहिंसाऽऽख्य धर्मम् २६ २६ अहिंसनीय न्यायव्यवहारम् ६ ५२ १२ पालक व्यवहारम् ३ ५४ १२ अहिंसनीय सुखहेतुम् १ १४ ११ अहिंसामय यज्ञम्, भा०—विद्या-धर्मदानम् ३७ १९ क्रियामय यज्ञम्, भा०—यज्ञाऽनुष्ठानम् ३ ११ अहिंसाधर्मयुक्त व्यवहारम् १ १५१ ३ अहिंसादि-गुणयुक्त व्यवहारम् ३ १७ ५. सत्कर्तव्यं व्यवहारम् ४ १५ २ व्यवहारयज्ञम् १ ६३ १२ अहिंसक (विचारम्) १ ७४ १ उपदेशाख्य यज्ञम् ७ ४२ ५ अहिंसनीय सुखहेतुम् १ १४ ११ क्रियाजन्य जगत् १ १८ ८ त्रिविध यज्ञम् १ २६ १ अहिंसनीय गृहाश्रमादिव्यवहारम् ७ २ ७ गृहाश्रमक्रियासिद्धिकर यज्ञम् ६ २४ अविनश्वर यज्ञम् ६ २५ निष्कौटिल्यम् ६ ३० **अध्वरस्य**=अहिंसनीयस्य धर्म्यस्य व्यवहारस्य ४ ६ १ अहिंसनीयस्य वर्धितु योग्यस्य यज्ञस्य १२ ११० अहिंसामयस्य शिल्पव्यवहारस्य ३ २३.१ अहिंसामयस्य न्यायव्यवहारस्य ७ ७ १ अहिंसनीयस्य (शिल्पिनो जनस्य) ४ ७ ८ अहिंसनीयस्य राज्यस्य ४ ३ १ हिंसितुमनर्हस्य (यज्ञस्य) १ १२८ ४ अहिंसनी-यस्य धर्मस्य व्यवहारस्य ४ ६ १ अहिंसामयस्य यज्ञस्य ५ ४६ ४ सर्वव्यवहारस्य ७ ११ १ यज्ञस्य मध्ये ७ १४ २

अध्वरः=अहिंसनीयो व्यवहार १५ ३८ यज्ञ २ ८. **अध्वरा**=अहिंसनीयान् यज्ञान् २१ ४७ **अध्वराणाम्**= अग्निहोत्राद्यश्वमेधान्ताना शिल्पविद्यासाध्याना वा सर्वथा रक्षणीयानां यज्ञानाम् ३ २३ यज्ञो और युद्धो के मध्य मे आर्याभि० १ २६ यज्ञानाम् १ ४४ ६ अहिंसनीयाना यज्ञानाम् १ ४४ २ अहिंसनीय-व्यवहाराख्यकर्मणाम् १ ४५ ४ अग्निष्टोमादियज्ञाना तत्कर्तॄणा धर्मात्मना मानवानाञ्च ऋ० भा० नमू० ८ पूर्वोक्ताना यज्ञाना धार्मिकाणा मनुष्याणा वा १ १ ८ राज्यपालनाग्निहोत्रादि-शिल्पान्ताना यज्ञानाम् १ २७ १ **अध्वरान्**=अहिंसनी-यान् गृहाश्रमव्यवहारान् १ ४८ ११ अहिंसकान् (जनान्) १ १३५ ५ **अध्वराय**=हिंसारहिताय धर्म्याय व्यवहाराय ७.४१ ६ अहिंसाख्याय शिल्पमयाय यज्ञाय ३३ ७५. अहिंसारूपयज्ञाय ३ २ ७ अहिंसनीयाय व्यवहाराय ४ ७.७ **अध्वरे**=अहिंसनीये (दमे=दान्ते गृहे) ४ ६ ४ अहिंस-नीये धर्म्ये व्यवहारे ३ १० १ अविद्यमानो ध्वरो हिंसन यस्मिन् रक्षणे १ १२१.७ अहिंसनीये प्रजापालनाख्ये व्यवहारे १ १२१ १ अहिंसनीये शिल्पव्यवहारे ७ ३ १ अहिंसादिलक्षणे धर्माचरणे ७ १६ ५ सङ्गते संसारे ३ २७ १२ सत्ये व्यवहारे ४ ५५ १. अहिंसनीयेऽध्ययना-ऽध्यापनीये व्यवहारे ३ ५३ १० अनुष्ठानव्ये क्रियासाध्ये यज्ञे १ १५ ७ उपासनीये कर्त्तव्ये वा यज्ञे १ १२.७ उपासनाक्रियासाध्ये यज्ञे १ १६ ३ अध्ययनाऽध्यापनराज्य-पालनादिव्यवहारे ३ ८ १ ज्ञानादियज्ञ मे आर्याभि० १ ४८ शिल्पादिव्यवहारे ५ ५८ ६ अहिंसायुक्ते व्यवहारे ५ ४४ ५ अहिंसनीयेऽहातव्य उपासनाख्ये कर्त्तव्ये सङ्ग्रामे वा १ ६४ १३ अहिंसायज्ञे ५ २६ ३ सङ्गते शिल्प-क्रियासिद्धे याने १ ४७ २ सर्वथाऽनुष्ठानव्ये धर्म्ये व्यवहारे ६ १६ २ मित्रभावैरहिंसनीये यज्ञे वा २ ४ अहिंसनीये विद्याप्राप्तिव्यवहारे ६ ५० ६ व्यवहारे ४ १५ १ अहिंसादि-लक्षणे योगे ६ १६ ४६ अहिंसनीये कर्त्तव्ये वा यज्ञे १ १२ ७ अहिंसनीये धर्म्ये यज्ञे १ ५७ ३ दयामये व्यवहारे ३ २८ ३ सङ्गन्तव्ये व्यवहारे ३ ५७ ४ सत्ये व्यवहारे ४ ५५ १ **अध्वरेषु**=अहिंसनीयेषु विद्याप्राप्तिकर्मसु ३ ६२ ५ मित्रत्वादिगुणयुक्तव्यवहारेषु विधियज्ञेषु वा ३ २७.८ अग्निहोत्रादिक्रियामयव्यवहारेषु ७ १० ५ अहिंसनीयेषु यज्ञेषु २५ ४०. राज्यपालनादिषु व्यवहारेषु ५ २८ ४ उपासनाऽग्निहोत्राद्यश्वमेधान्तेषु शिल्पविद्या-ऽन्तर्गतेषु वा यज्ञेषु ३ १५ अनुष्ठानव्येषु क्रियामयेषु यज्ञेषु १ ५८ ७ सङ्गमिमयेषु व्यवहारेषु ३ २६ ७ गृहाश्रम-

व्यवहारानुष्ठानेषु ४ ५ १ २ अहिंसनीयेषु प्रजापालन-न्यायव्यवहारेषु ५ ४ १ अहिंसनीयेषु धर्म्येषु व्यवहारेषु ५ १४ २ अहिंसायुक्तेषु सङ्ग्रामादिव्यवहारेषु ७ १ १६ [ध्वरति वधकर्मा नि० २ १९ अध्वर इति यज्ञनाम ३ १७ अध्वरमिनिअन्तरिक्षनाम निघ० १ ३ अध्वरे यज्ञे नि० ६ १३ अध्वरेषु यज्ञेषु नि० १० १९ अध्वर इति यज्ञनाम, ध्वरति हिंसाकर्मा, तत्प्रतिषेध नि० १ ७ अध्वरम् यज्ञम् नि० ८ ६ अध्वरो वै यज्ञ श० १ २ ४ ५, ४ १ ३८ ३९, ५ ३ ४ १०, ३ ५ ३ १७, ६. २ ११ यज्ञो वा अध्वर काठ० ३१ ११ प्राणोऽध्वर श० ७.३ १ ५ रसोऽध्वर श० ७ ३ १ ६ ते ऽसुरा अपक्रामन्तोऽब्रुवन्न वा इमे ध्वर्तवा अभवन्निति । तदध्व-स्याध्वरत्वम् क० ३६ ४ देवान्ह वै यज्ञेन यज-मानान्त्सपत्ना असुरा दुधूर्षाञ्चक्रु । ते दुधूर्षन्त एव न शेकुर्धूर्वितु ते पराबभूवुस्तस्माद् यज्ञोऽध्वरो नाम श० १ ४ १ ४०]

अध्वरश्रियः या अध्वरस्याऽहिंसनीयस्य चक्रवर्त्ति-राज्यस्य लक्ष्मीस्ता १ ४७ ८ **अध्वरश्रियम्**= याऽध्वराणामहिंसनीयाना यज्ञाना श्री शोभा ताम् १ ४४ ३

अध्वरस्येव अहिंसामयस्य यज्ञस्येव ६ ६६ १० [अत्र 'इवेन सह समासो विभक्त्यलोपा०' अ० २ २ १८ वार्त्तिकेन समासो विभक्तेरलोपश्च]

अध्वराऽइव अहिंसनीयौ यज्ञाविव ३ ६ १०. [ध्वरति हिंसाकर्मा, तत्प्रतिषेधोऽध्वर नि० १ ७]

अध्वरीयताम् आत्मनोऽध्वरमिच्छतामस्माकम् (जना-नाम्) प्र०—अत्र 'न छन्दस्यपुत्रस्य, अ० ७ ४ ३५ इत्यस्य 'अपुत्रादीनामिति वक्तव्यम्, इति वचनादीकारनिषेधो न भवति 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति नियमात् 'कव्यध्वरपृतनस्यर्चि लोप ' अ० ७ ४ ३९ इत्यकारलोपोऽपि न भवति १ २३ १६ य आत्मनोऽध्वरमहिंसायज्ञ कर्त्तु मिच्छन्ति तेषा (जनाना=मनुष्याणाम्) ४ ९ ५ आत्मनो-ऽध्वरमिच्छताम् (विशा=प्रजानाम्) ६ २ १० [अध्वर सुबन्ताद् आत्मनेच्छाया क्यच् । 'क्यचि चे' तीत्वम् क्यजन्ताच्छतृप्रत्यय]

अध्वर्यन्तः आत्मनोऽध्वरमिच्छन्त (देवा= विद्वज्जना) १७ ५६. **अध्वर्यन्ता**=आत्मनो ऽध्वरमिच्छन्तौ (अध्यापकोपदेशकौ) १ १८१.१ [अध्वर+क्यच् आत्मने-च्छायाम् । तत शतृ प्रत्यय । 'न छन्दस्य०' इति सूत्रेणेत्व न भवति]

अध्वर्यवम् य आत्मनोऽध्वरमिच्छति तम् (पुरुषम्) प्र०—अत्र 'वाच्छन्दसि' इत्यस्याऽपि गुणावादेशौ, (पुरुषम्) २८ १९ **अध्वर्यवः**=आत्मनोऽध्वरमहिंसा कामयमाना (विद्वज्जना) ३ ४६ ५ युद्धयज्ञसिद्धिकरा (सज्जना) २ १४ ६ सर्वस्य प्रियाचरणा (विद्वास) २ १४ ४ राजसम्बन्धिन (विद्वज्जना) २ १४ ११ महौषधि-निष्पादका (महावैद्या जना) २ १४ १० पुरुषार्थिन (जना) २ १४ ९ यज्ञसम्पादका (सज्जना) २ १४ ३ आत्मनोऽध्वर कामयमाना (सज्जना) २ १४ १ आत्मनोऽहिंसाख्ययज्ञमिच्छन्त , (भा०—अध्यापकोपदेशका-ऽनिशय) २३ ४२ अध्वरमहिंसाधर्मकाममिच्छव (विद्वास) १ १५३ १ विद्यायज्ञसम्पादका (विद्वास) ५ ३१ १२ सर्वस्य प्रियाचरणा (सत्पुरुषा) २ १४ ४ **अध्वर्युभिः**=आत्मनो हिंसामनिच्छुभि (जनै) २ ३७ २ अध्वर यज्ञमिच्छद्भि (सत्पुरुषै) १ १३५ ६ हिंसाऽन्याय-वर्जितै सह (प्रजाजनै सह) ३ ३ ७० य आत्मानमध्वर-मिच्छन्ति तै (प्रजाजनै) १ १३५ ३ अध्वर निष्पादकै (होत्रध्वर्यूद्गातृब्रह्मसभ्यैर्ऋत्विग्भि) ३ ७ ७ **अध्वर्युः**= आत्मनोऽध्वरमहिंसाव्यवहार कामयमान (सज्जन) ६ ४१ २ अध्वर शिल्पविद्या कामयमान (विद्वान् शिल्पी) ५ ३७ २. अहिंसायज्ञमिच्छु (विद्वान्) २५ २८ अध्वरस्य योजको नेता कामयिता वा (परमेश्वर) प्र०—अत्राऽध्वरशब्दोपपदाद् युज्धातोर्बाहुलकात् क्यु प्रत्यय टिलोपश्च 'अध्वर्युरध्वरयु=अध्वर युनक्ति०' नि० १ ८, १ ९४ ६ आत्मनोऽध्वरमहिंसाधर्ममिच्छु (मित्र = सुहृज्जन) ३ ५ ४ य आत्मनोऽध्वरमहिंसनीय व्यवहार कर्त्तुमिच्छु (अग्नि =सूर्य) ४ ६ ४ यज्ञकर्त्ता (सज्जन) २ ५ ६ आत्मनोऽध्वरमहिंसनमिच्छु (सत्पुरुष) १ १६२ ५ **अध्वर्यू**=आत्मनोऽध्वरमहिंसामिच्छन्तौ (विद्वज्जनौ) ३३ ७३ आत्मनोऽध्वरमहिंसनीय गृहाश्रमादिक यज्ञमिच्छू (अश्विना=अध्यापकोपदेशकौ) १४ ७ **अध्वर्यो**= योऽध्वरमिवाचरति तत्सम्बुद्धौ (राजन्) २३ २३ अहिंसक (राजप्रजाजन) ३ ५३ ३ योऽध्वर यज्ञ युनक्ति तत्सम्बुद्धौ (वैद्यराज) २० ३१ [अध्वर्यु =अध्वरयु । अध्वर युनक्ति अध्वरस्य नेता अध्वर कामयते वा । अपि वा-ऽधीयाने युरुपबन्ध नि० १ ७ पूर्वार्धो वै यज्ञस्याध्वर्यु जघनार्ध पत्नी श० १ ९ २ ३ प्रतिष्ठा वा एषा यज्ञस्य यदध्वर्यु तै० ३ ३ ८ १० वायुर्वा अध्वर्युर् अधिदैव प्राणोऽध्यात्मम् गो० १ ४.५ वह्निरध्वर्यु तै० १ १ ६ १० राज्य वा अध्वर्यु तै० ३ ८ ५ १ मनो-

ऽध्वर्यु श० १ ५ १ २ १ प्राणो यज्ञस्याध्वर्यु जै० १ ८ ५ प्राणापानावेवाध्वर्यू गो० १ २ १ ० श० ५ ५ १ ११ द्यौरध्वर्यु मै० १ ६.१ चक्षुरध्वर्यु कौ० १७ ७ आश्विनौ वाऽध्वर्यू काठ० २८ ५ आदित्यो मे ऽध्वर्यु ष० २ ५ अपानो मेऽध्वर्यु ष० २ ७ अश्विनौ हि देवानामध्वर्यु तै० ३ २ २ १ अध्वर्युरेव मह गो० पू० ५ १५ तमेतमग्निरित्यध्वर्यव उपासते श० १० ५ २ २० प्रतीचन्नध्वर्यो श० १३ ५ ४ २४ पर्णमयेनाध्वर्युरभिषिञ्चति तै० १ ७ ८ ७]

अध्वरीयसि आत्मनोऽध्वरमहिसामिच्छसि २ १ २ [अध्वरसुवन्ताद् आत्मनेच्छाया क्यच् । 'क्यचि च' तीत्वम् । 'वा छन्दसि सर्वे विधयो विकल्प्यन्ते' इति वचनाद् 'न छन्दस्य०' इतीत्वप्रतिषेधो न भवति क्यजन्ताद्धातोर्लट्]

अध्वस्मभिः अपतनशीलैर्गुणकर्मस्वभावै २ ३५ १४ अध्वस्तै (पथिभि =मार्गै) २ ३४ ५ **अध्वस्मानः**= ये नाऽध पतन्ति ते (जना), प्र०—'ध्वसु अध पतने, १ १३६ ४ [नञ्+ध्वसु अवस्र सने (भ्वा०) धातोर्मनिन् प्रत्यय । छान्दसो नकारलोप]

अध्वानयत् धुनयति ६ १८ १० [ध्वन शब्दे धातोर्णिजन्ताल् लङ्]

अनक्ति कामयते ४ ६ ३ **अनक्तु**=सयुनक्तु ३७ ११. कामयताम् ७ ४३ ३ प्रकट करे २ ३ २ सिञ्चतु ६ २ [अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधादि०) धातोर्लट्]

अनग्नाः सर्वतो वस्त्रभूषणादिभिराच्छादिता (युवतय =प्राप्तयौवना स्त्रिय ३ १ ६ [नञ्+नग्नपदयो समास]

अनक् प्रकटीकरोति २ १५ ७ **अनक्ति**=कामयते १ १५३ २ **अनक्तु**=कामयताम् ७ ४३ ३ प्रकट करे २ ३ २ सिञ्चतु ६ २ सयुनक्तु ३७ ११ [अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातोर्लङि लोटि लटि च रूपाणि]

अनग्नित्राः अविद्यमानज्वरेण रक्षका (रोगा) १ १८६ ३ [नञ्+अग्नि+त्रैङ् पालने धातो क प्रत्यय]

अनग्निष्वात्ताः अविद्यमानाऽग्निविद्याग्रहणा ज्ञाननिष्ठा पितर १६ ६० वायुजलभूगर्भादिविद्यानिष्ठा (पितर) ऋ० भू० २६२, १६ ६० [नञ्+अग्निष्वात्ता । अग्निष्वात्ता=अग्नि+सु+आ+दाञ् दाने (जु०) धातो क्त]

अनज उच्चरतोपदिशत, प्र०—अत्र व्यत्ययेनैकवचनम् ५ ५४ १ **अनजन्**=कामयेरन् ३ १६ ५

अनकुत्सु गवादिषु ३ ५३ १८ **अनड्वान्**= वृषभ (पशु) २६ ५६ हलशकटादिवहनसमर्थ (वृषभ) १८ २७ **अनड्वाहः**=शकटवहनसमर्था (पशव = (वृषभा २४ १३ **अनड्वाहम्**=योऽनासि शकटानि वहति तद्वद्वर्त्तमानम् (वह्नि कृषीवल वा) ३५ १३ शकटवाहकम् (गाम्=वृषभम्) २८ ३० [अनडुह् प्रातिपदिकस्य रूपाणि । सप्तम्या 'वसुस्र सु०' अ० ८ २ ७२ सूत्रेण दकारादेश । प्रथमाया चामागमे नुमि सयोगान्तलोपे च रूपम् । अग्निरेष यदनड्वान् श० ७ ३ २ १ आग्नेयो वा ऽनड्वान् । श० ७ ३ २ १६, १३ ८ ४ ६ वह्निर्वा अनड्वान् तै० १ १ ६ १०, १ ८ २ ५ वोढा ऽनड्वान् तै० स० ७ ५ १८ १ अनड्वान् वै सर्वाणि वयासि पशूनाम् मै० ३ ७ ४ अनड्वान् वय पङ्क्तिश्छन्द तै० स० ४ ३ ५ १]

अनत् प्राणत् १ १६४ ३० [अन प्राणने धातोर्लट् । अनिति गतिकर्मा निघ० २ १४]

अनदतीः अविद्यमाना अतीव सूक्ष्मा दन्ता यासान्ता (युवतय =प्राप्तयौवना स्त्रिय) ३ १ ६ [नञ्+दन्तपदयोर्बहुव्रीहौ 'छन्दसि च' ति सूत्रेण दतृ-आदेशे ङीपि च रूपम् । अनजादावपि छान्दसत्वान्नुट्]

अननुदः योऽनुगत न ददाति तस्य १ ५३ ८. अप्रेरित (इन्द्र =विद्वान्) २ २१ ४. येऽनुददति तेऽनुदा, न विद्यन्तेऽनुदा यस्य स (विद्वज्जन) २ २३ ११ [अनु+दा+क, ततो नञ्समास । अथवा णुदप्रेरणे धातोर् इगुपधलक्षण क प्रत्यय, ततो नञ्समास]

अननुभूतीः अनुभवरहितान् (जनान्) ६ ४७ १७ [अनु+भू सत्तायाम्+क्तिन् भावे स्त्रियाम् । ततो नञ् बहुव्रीहि]

अनन्तम् देशकालवस्तुपरिच्छेदशून्यम् (ब्रह्म) १ ११५ ५ अविद्यमानोऽन्तो यस्य तत् (भा०—ब्रह्म) ३३ ३८ **अनन्तः**=अविद्यमानाऽन्त आकाश १ ११३ ३ नि सीम (त्वेष =प्रकाश) ६ ६१ ८ **अनन्ते**= देशकालवस्त्वपरिच्छिन्ने (अश्मनि=मेघे) १ १३० ३. परमात्मन्याकाशे वा ४ १ ७ **अनन्तैः**=अविद्यमानसीमभि (वधै) १ १२१ ६ [अनन्तमिति बहुव्रीहिसमास अनन्ते द्यावापृथिव्यो कौ० नि० ६०]

अनन्तासः अविद्यमानोऽन्तो येषान्ते (परमाणव)

५ ४७ २ (नञ्+अन्तयोर्बहुव्रीहि]

अनन्तशुष्मा: अनन्त शुष्म बल येषान्ते (नर) १ ६४ १० [शुष्मम् बलनाम निघ० २ ९ अनन्तशुष्मयोर्बहुव्रीहि]

अनपच्युतम् ह्रासरहितम् (सहा=बलम्) ५ ४४ ६. अपचयरहितम् (पुरुपम्) ४ १७ ४ **अनपच्युतः**= अपचयरहित (रथ =) विमानादियानविशेष) ४ ३१ १४ [अप+च्युङ् गतौ (भ्वा०) क्त । नञ्समास]

अनपत्यानि अविद्यमानान्यपत्यानि येषु तानि (अधर्म्यकर्माणि) ३ ५४ १८ [अपत्य कस्मात् । अपतत भवति । नानेन पततीति वा नि० ३ २ ततो नञ्बहुव्रीहि]

अनपवृज्यान् अपवर्जितुमनर्हान् (मार्गान्) १ १४६ ३ [अप+वृजी वर्जने (अदा०) धातोर् ण्यत् प्रत्यय । नञ्समास]

अनपवृत् यो नाऽपवृणोति ६ ३२ ५ [अप+वृञ् वरणे (स्वा०) धातो क्विप् । नञ्समास]

अनपव्ययन्तः अपव्ययमप्राप्नुवन्त (अश्वा = तुरङ्गा वल्लयादयो वा) ६ ७५ ७ अपव्ययमाप्रापयन्त (योद्धृजना) २९ ४४ [अप+व्यय गतौ (भ्वा०) धातो शतृप्रत्यय नञ्समासश्च]

अनपस्फुरन्तीम् दृढा निश्चला प्रज्ञा सम्पादयन्तीम् (धेनु=वाचम्) ४ ४२ १० विज्ञापयित्रीमिव योगविद्याजन्या वाचम् ७ १० [अप+स्फुर सचलने (तुदा०) धातो शतृङीप्प्रत्ययौ । नञ्समासश्च]

अनपस्फुराम् निश्चला दृढाम् (धेनु=वाचम्) ६ ४८ ११ [अप+स्फुर सचलने (तुदा०) धातोरिगुपधलक्षण क प्रत्यय । नञ्समासश्च]

अनपावृत् यो नाऽपवृणोति (इन्द्र =राजा) ६ ३२ ५ [अप+वृञ् वरणे (स्वा०) धातो क्विप् । तुगागम । 'नहिवृति०' अ० ६ ३ ११६ सूत्रेणोत्तरपदे दीर्घ । नञ्समासश्च]

अनपिनद्धम् अनाच्छादितम् (जलप्रवाहम्) ६ ७२ ४ [अपि+णह बन्धने (दिवा०) धातो क्त प्रत्यय । 'नहो ध' इति हकारस्य धकार । नञ्समासश्च]

अनपेताः नाऽपेता पृथग्भूता (धारा =प्रवाहा) १८ ६५ [अप+इण् गतौ (अदा०) धातो क्त प्रत्यय । नञ्समासश्च]

अनप्नस. अविद्यमानमप्न कर्म यासान्ता क्रिया २ २३ ९ [निघण्टौ अप्न कर्मनामसु, अपत्यनामसु, रूपनामसु, पदनामसु च पठित तेन नञ्बहुव्रीहि । अनप्नस अप्न इति रूप नाम आप्नोतीति सत नि० ३ ११]

अनभिद्रुहा द्रोहकर्मरहितौ (मित्रावरुणा=राजप्रधानपुरुषौ) २ ४१ ५ [अभि+द्रुह जिघासायाम् धातो कर्त्तरि इगुपधलक्षण क । नञ्समास]

अनभिम्लातवर्णः न विद्यतेऽभितो म्लातो हर्षक्षीणो वर्णो यस्य स) (नपात्=अपत्यम्) २ ३५ १३ [अभि+म्लै हर्षक्षये (भ्वा०) धातो क्त प्रत्यय । नञ्बहुव्रीहिश्च समास]

अनभिशस्ति यन्नाभिशस्यतेऽभिहिस्यते तत् (सत्य=यथार्थम्) ५ ५ [अनभिशस्ति प्रशस्यनाम निघ० ३ ८. [अभि+शसु हिसायाम् (भ्वा०) धातोस्स्त्रिया क्तिन् । नञ्समासश्च]

अनभिशस्तेन्यम् यदनभिशस्तेऽविद्यमानहिसने नयति तत् (सत्य=यथार्थम्) ५ ५

अनभीशुः अविद्यमानावभीशू बलयुक्तौ बाहू यस्य स (वीरजन), प्र०—अभीशू इति बाहुनाम निघ० २ ४, ६ ६६ ७ नियामकरश्मिरहित (सूर्य) १.१५२.५ अप्रतिग्रह (रथ =यानविशेष) ४ ३६ १ [अभि+अशूङ् व्याप्तौ+उ प्रत्यय, बाहु० अकारस्येकार । अभीशवोऽभ्यश्नुवते कर्माणि नि० ३ ९ ततो नञ्बहुव्रीहि]

अनमत् नमति ६ १७ ९ नमतु २ २४ २ **अनमम्**= नमामि १ १६५ ६ **अनमन्त**=नमन्ते, प्र०—अत्र लडर्थे लुङ् ८ ४६ नमन्तु १७ २४ [णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लङ् । अनमन्त प्रयोगे व्यत्ययेनात्मनेपदम्]

अनमयत् दुष्टान्नम्रान् कारयेत् ७ ६ ५ [णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्णिजन्ताल् लङ्]

अनमस्यन् प्रह्वीभूता भवन्ति ६ ९ ७ [नमस्करोतीति विग्रहे नमस् शब्दात् 'नमोवरिवश्चित्रङ क्यच्' अ० ३ १ १९ सूत्रेण क्यच् । तत शतृ । नञ्समास]

अनमित्रम् अविद्यमानशत्रु १८ ६ [डुमिञ् प्रक्षेपणे (स्वा०) अनेकार्थत्वादत्र मानार्थे, धातो 'अमिचिमि०' उणा० ४ १६४ सूत्रेण क्त्र । नञ्बहुव्रीहि]

अनमीवस्य रोगरहितस्य सुखकरस्य, भा०— आरोग्यकारकस्य (अन्नस्य) ११ ८३ **अनमीवः**=अरोग (जन) ३३ ८६ अविद्यमानरोग (जन) ७ ४६ २ **अनमीवाः**=अमीवो व्याधिर्न विद्यते यासु ता. (अघ्न्या =गाव) (११ अविद्यमानोऽमीवा ज्वरादिरोग-

समूहो याभ्यस्ता, भा०—रोगविच्छेदका (आप = जलानि) ४ १२ नीरोगा (इष=अन्नादीनोषधिगणान्) ३ ६२ १४ प्र०—अमरोगे, इत्यस्माद्वाहुलकादौणादिक ईवन् प्रत्यय [अमीवा पदनाम निघ० ४ ३ (अमीवा= अभ्यमनेन व्याख्यान नि० ६ १२. नञ्समास) अनमीवस्य शुष्मिण इत्याहायक्ष्मस्येति वावैतदाह तै० स० ५ २ २]

अनमीवासः शरीरात्मरोगरहिता (ब्रह्मचारिणो जना) ३ ५६ ३ [पूर्वपदे व्याख्यातम्]

अनम्नत नम्रता को धारण करे १ १३१ १

अनयत् नयति ६ ५७.४ प्राप्त करावे ६ ४५ १ **अनयन्**=नयन्ति ६ १५ १७ प्राप्नुवन्ति १० १ **अनयन्त**= नयन्ति ४ ३३ ७. प्राप्नुयु ३ ७ ६ **अनयम्**=प्रापयेयम् ४ २६ २ **अनयः**=उन्नेय २ १३ १२ नयसि ६ १.७ [णीञ् प्रापणे (भ्वा०) धातोर्लङ्]

अनर्वन् अनर्वणेऽविद्यमानज्ञानाय (अविदुषे), प्र०— अत्र 'सुपा सुलुग्०' इति विभक्ति-लुक् १ ११६ १६. **अनर्वम्**=प्राकृताऽश्वयोजनरहितम् (चक्रम्) १ १६४ २ अविद्यमानाऽश्वम् (दात्र=दानम्) १ १८५ ३ **अनर्वा**= अश्वहीन (विद्वज्जन) ६ १२ अविद्यमाना अश्वा यस्या सा (अदिति =माता) २ ४० ६ अविद्यमानाऽश्वगमनेव (मैत्री) ७ ४० ४ अविद्यमानाऽश्वो रथ इव (अग्नि + विद्वान्) १ ६४ ६ **अनर्वाणम्**=अविद्यमानाऽश्व पदातिम् (अतिथिम्) १ १६० १ अग्न्याद्यश्वसहित पश्वाद्यश्वरहितम् (रथम्) १ ५१ १२ द्वेषादिदोषरहितम् (मर्त्त=मनुष्यम्) १ १३६ ५ अविद्यमानोऽर्वाणोऽश्वा यस्मिँस्तम् ( ) प्र०—अर्वेत्यश्वनामसु पठितम् निघ० १ १४, १ ३७ **अनर्वाणः**=अविद्यमानाऽर्वधर्मादन्यत्र गमन येषान्ते (विद्वज्जना) १ १६० ६ अनर्वण =अनश्वस्य (रथस्य) [अर्व हिंसायाम् (भ्वा०) धातो बाहुलकात् कनिन् । अथवा ऋ गतिप्रापणयो (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' अ० ३ २ ७५ सूत्रेण वनिप् प्रत्यय । अर्वा हिंसको ज्ञानी वा । नञ्समासेऽनर्वा अनर्वा पदनाम निघ० ४ ३ अनर्वम्= अप्रत्यृतमन्यस्मिन् नि० ६.२३ अनर्वम्=अप्रत्यृतमन्यस्मिन् नि० ४ २७ अनर्वा प्रेहीति । असपत्नेन प्रेहीत्येवैतदाह ।। श० ३ ८ २ ३]

अनर्विशे अनस्सु शकटेषु विट् प्रवेशस्तस्मै (पश्विषे= पशूनामिषे वृद्धीच्छायै) प्र०—अत्र 'वाछन्दसि, इति षत्वाऽभाव १ १२१ ७. [अन शकटवाची निरुक्ते, विश प्रवेशे धातो क्विपि विश् । एनयो समास]

अनवद्य प्रशसित (विद्वज्जन), प्रशसितगुणयुक्त (विद्वन्) १ १२६ १ न विद्यतेऽवद्यं निन्द्यं कर्म यस्मिँस्त-त्सम्बुद्धौ (विद्वज्जन), प्र०—'अवद्यपण्यवर्या०, अ० ३ १ १०१ अनेन गर्ह्येऽवद्यशब्दो निपातित १.३१ ६ **अनवद्यम्**= अनिन्दितम् (युवानम्) १ ७१ ८ सर्वदोषरहितम् (रेत.) ३३ ११ **अनवद्या**=विद्यासौन्दर्यादिशुभगुणयुक्ता (नारी) १ ७३ ३ अत्यन्तउत्तमगुणयुक्त (नारी) आर्याभि० १ ४६ **अनवद्याभिः**=प्रशसनीयाभि (ऊतिभि =रक्षादिभि.) ४ ३२ ५ **अनवद्याः**=अनिन्द्या (गिर =विविधविद्या-युक्ता वाण्य) ३ ३१ १३ अनिन्दिता (जना) १ १२३.८ प्रशसनीया (आप्ता पुरुषा) ६ १६ ४ **अनवद्यै**=निर्दोषै (गणै =किरणैर्मरुद्भिर्वा) १ ६ ८ [नञ्+वद व्यक्ताया वाचि (भ्वा०) धातोर् 'अवद्यपण्य०' अ० ३ १ १०१ सूत्रेण गर्ह्यार्थे निपातनात् साधु । तद्विपरीतमनवद्यम् अनवद्य = प्रशस्यनाम निघ० ३ ८]

अनवद्यासः अनिन्द्या धर्माचारा (मरुत =मनुष्या) ७ ५७.५ [इष्ट० अनवद्य]

अनवन्त स्तुवन्तु ५ ३० १०. [णु स्तुतौ (अदा०) धातोर्लङ् । बहुल छन्दसीति शपो लुक् न । व्यत्ययेनात्मने-पदञ्च]

अनवपृग्णा सम्पर्करहितानि (तेजासि) १ १५२ ४ [अव+पृची सम्पर्चने (अदादि०) धातो क्त । नञ्समासश्च]

अनवभ्रराधसः न विद्यतेऽवभ्रो धननाशो येषान्ते (विद्वज्जना) ५ ५७ ५ अनवभ्रमविनाशि राधो येषान्ते (गन्तार =वायव) ३ २६ ६ अनवभ्रोऽपतित राधो येषान्ते (प्राज्ञा राजजना) २ ३४ ४. अविनष्टधना १ १६६ ७ [वभ्र गत्यर्थे (भ्वा०) धातोरच् । न वभ्रो-ऽवभ्र । राधो धननामसु निघ० २ १० ततो नञ्बहुव्रीहि]

अनवसः अविद्यमानमवोऽन्न यस्य स (वीरजन), प्र०—अव इत्यन्ननाम निघ० २ ७

अनवस्यन्तः अपरिचरन्त कुर्वन्त (जना) ४ १३ ३

अनवह्वरम् सरल (मार्गम्) २ ४१ ६ अव+ह्वृ कौटिल्ये (भ्वा०) धातो ['ऋदोरप्' सूत्रेणाप् प्रत्यय । तद्विपरीतम्]

अनवः मनुष्या , प्र०—अनव इति मनुष्यनाम निघ० २ ३,७ १८ १४

अनशनम् अविद्यमानमशन भोजन यस्मिँस्तत् पृथि-व्यादिक च यज्जड जीवसम्बन्धरहित जगत् ऋ० भू० १२२ [अश भोजने (क्र्या०) धातोर्ल्युट् भावे । नञ्बहुव्रीहिश्च ।

तपो नाऽनशनात् परम् तै० आ० १० ६२]

अनश्नन् उक्तभोगमकुर्वन् (परमेश्वर) १ १६४ २० कर्मों के फलों को न भोगता हुआ (परमात्मा) स० प्र० २८३, १ १६४ २० [नञ्+अश भोजने+शतृप्रत्यय]

अनश्रू अव्यापिनौ (धूर्षाहौ=सूर्यविद्वांसौ) ४ ३३ [अशू व्याप्तौ (स्वा०) धातोर् डुनुप्रत्ययो रुडागमो नञ्समासश्च]

अनश्वदाम् अविद्यमाना अश्वा यस्या ता गतिम् ५ ५४ ५ [अश्व+दा+क । स्त्रिया टाप् । नञ्बहुव्रीहि]

अनश्वम् अविद्यमाना अश्वास्तुरङ्गादयो यस्मिन् त (रथम्) १ ११२ १२ **अनश्वः**=अविद्यमानतुरङ्ग (सूर्य) १ १५२ ५ अविद्यमाना अश्वा यस्मिन् स (रथ=यानविशेष) ४ ३६ १ अविद्यमाना अश्वा यस्य स (जन) ६ ६६ ७ [अशू व्याप्तौ (स्वा०) धातो 'अशूप्रुषि०' इत्युणादिना क्वन् प्रत्यय । नञ्बहुव्रीहि]

अनश्वासः अविद्यमाना अश्वा येषु ते (पवय=चक्राणि) ५ ३१ ५ [नञ् अश्वपदयोर्बहुव्रीहि]

अनष्टवेदसम् अनष्टविज्ञानधनम् (परीक्षक जनम्) ६ ५४ ८ [वेद धननामसु निघ० २ १० नष्टवेदस्पदयोर्नञ्बहुव्रीहि]

अनष्टाम् प्रसिद्धाम् (वीर-भुजाम्) ७ ४५ २ [णश अदर्शने (दिवा०) धातो क्त । नञ्तत्पुरुष]

अनसः शकटस्य ४ ३० १० **अनसा**=शकटेन ३ ३३ ९ [अन प्राणने धातो ऽसुन् प्रत्ययो बाहुलकात् । अनो वा वायुरनिते, अपि वोपमार्थे स्याद्, अनस इव शकटादिव, अन शकटम् आनद्धमस्मिँश्चीवरम्, अनितेर्वा स्याज्जीवनकर्मण उपजीवन्त्येनन मेघोऽप्यन एतस्मादेव नि० ११ ४७ भूमा वा अन श० १ १ २ ६ यज्ञो वा अन श० १ १ २ ७ ३ ९ ३ ३ अन्तरिक्षरूपमिव वा एतद् यदन श० ४ ३ ४ १ यज्ञो वाऽअन श० १ १ २ ७]

अनस्था अस्थिरहित (देही) १ १६४ ४ [नञ्युपपदे अस्थिप्राति० सु प्रत्यय । 'सुपा सुलुगि०' ति सुस्थाने डादेशे टिलोपे रूपम्]

अनस्वन्तः बहून्यनासि शकटानि विद्यन्ते येषान्ते (वणिग्जना) १ १२६ ५ **अनस्वन्ता**=उत्तमशकटादियुक्त (विद्वान्) ५ २७ १ [अन शकटम् नि० ११ ४७ अनस् प्राति० अतिशायने मतुप् । 'मादुपधायाश्च०' अ० ८ २ ९० सूत्रेण मकारस्य वकारादेश]

अनः शकटम् २ १५ ६ शकटमिव ४ ३० ११.

अना प्राणाऽऽत्मकानि (अह्ना=दिनानि) ४ ३० ३ [अन प्राणने (अदा०) धातो 'घञर्थे कविधानम्' इति वार्ति० भावे क]

अनाकृतः न आकृतो न निवारित (विद्वान्) १ १४१ ७ [नञ्+आ+कृ+क्त । धातूनामनेकार्थत्वान् निवारणेऽपि कृ धातु]

अनागसम् अविद्यमानाऽपराधाम् (नावम्) २१ ५ निर्माणदोषरहिताम्, भा०—सुपरीक्षिताम् (सुनावम्) २१ ७ अनपराधम् (मनुष्यम्) ४ ३९ ३ **अनागसः**=न विद्यतेऽग पाप दोषो यासु ता निर्दोषा, भा०—सुपरीक्षिता शोधिता सस्कृता (आप=प्राणा जलानि वा) ४ १२ अनपराधिन (जनान्) १ १२३ ३ **अनागाः**=न विद्यते आगोऽपराधो यस्मिन् स (राजपुरुष) ५ ८३ २ अनपराधिन (जना), प्र०—अत्र 'सुपा सुलुग्०' इति जस स्थाने सु ३३ १७ अधर्माचरणरहित (सविता=राजा) ३३ २० अनपराध (सूर्य=जगदीश्वर) ७ ६० १ [इण् गतौ (अदादि०) धातो 'इण आगोऽपराधे च' उणादि ४ २१२ सूत्रेण असुन् प्रत्ययो धातो स्थाने चागादेश । नञ्समास । अनागा अनपराध नि० १० ११]

अनागान् अनपराधिन (प्रजाजनान्) ३ ५४ १९ अनपराधान् (प्रजाजनान्) ४ १२ ४ [आग पूर्वपदे व्याख्यातम् । सकारलोपश्छान्दस । नञ्समास]

अनागास्त्वम् अनपराधत्वम् २५ ४५ निष्पापस्य भावम् १ १६२ २२ निष्पापत्वम्, प्र०—इण आग अपराधे च उ० ४ २१९ अत्र नञ्पूर्वादाग शब्दात्त्वे प्रत्यये 'अन्येषामपि दृश्यते' इत्युपधाया दीर्घत्वम् १ ९४ १५ **अनागास्त्वे**=निष्पापभावे प्र०—अत्र वर्णव्यत्ययेनाऽकारस्य स्थाने आकार १ १०४ ६ अनपराधित्वे ६ ५० २ [आग पापम्, तस्माद्भावे त्वप्रत्यय । नञ्समास । अनागास्त्वनमपराधत्वम् नि० ११ २१]

अनातताय अविद्यमान आततो विस्तारो यस्य तस्मै (सभेशाय) १६ १४ [नञ्+आङ्+तनु विस्तारे (तना०) धातो क्त । अनुनासिकलोपश्च]

अनातुरम् दुःखवर्जितम् (विश्व=सम्पूर्ण जीवादिकम्) १ ११४ १ रोगेणाऽऽतुरतारहितम्, भा०—रोगकष्टमप्राप्तम् (सर्वप्राणिसमूहम्) १२ ९५ अदुःखितम्, भा०—रोगरहितम् (जगत्) १६ ४८ [अत सातत्यगमने (भ्वा०) धातोर्बाहुलकाद् उरच । धातोरादौ दीर्घ । नञ्समासश्च]

अनाधृष्टम् यन्न धृष्यते तेजस्तत् ५ ५. प्रौढम् (तेज) ५ ६ यन्न समन्ताद् धृष्यत इत्यनाधृष्टम् (ब्रह्मयज्ञो वा) १ ३१ धार्ष्टचम् (छन्द =वलम्) १४ ६. यत्समन्तान्न धृष्यते तत्तेज, प्रगल्भगुणसहित (भौतिकाग्निम्) ५ ६ **अनाधृष्टः** =केनाऽप्यार्धर्षितुमयोग्य (पति =राजा) ७ १५ १४ **अनाधृष्टा**=परैर्धर्षणरहिता (स्त्री) ३७ १२ अधर्षणीया निर्भया (प्रजा) ७ १७ समन्ताद् धर्षितुमनर्हा (योगिनो वीरता) ७ १२ **अनाधृष्टाभिः**=शत्रुभिर्धर्षितुमयोग्याभि (ऊतिभि =रक्षादिभि) ४ ३२ ५ **अनाधृष्टाः**=धर्षितु निवारयितुमनर्हा (वायव) १ १६ ४ शत्रुभिरधर्षिता (मधुमती =ओषध्य) १० ४ [आङ्युपपदे ञिधृषा प्रागल्भ्ये (स्वा०) धातो क्त। 'धृषिशसी वैयात्ये' अ० ७ २ १६ सूत्रेणेण्निषेध। नञ्समास। अय वा अग्निरनाधृष्ट कौ० २७ ५ विराड् वा ऽनाधृष्ट छन्द, श० ८ २ ४ ४]

अनाधृष्यम् प्रगल्भम् (वृषभम्) ४ १८.१० न केनाऽपि धर्षितु योग्यम् ५ ५ **अनाधृष्यः**=अन्यैर्धर्षितुमयोग्य, भा०—न्यायप्रिय (अग्नि =राजा) २७ ७ **अनाधृष्याय**=भयधर्षणराहित्याय (वाताय=औषधिस्थवायुविज्ञानाय ३७ ७ **अनाधृष्या**=शत्रुभिर्धर्षितुमयोग्या (नर + नायका सेनास्था जना) १७ ४६ [आङ्युपपदे ञिधृषा प्रागल्भ्ये (स्वा०) धातो 'ऋदुपधाच्च०' अ० ३ १ ११० सूत्रेण क्यप् प्रत्यय। नञ्समासश्च। अनाधृष्या तदग्नि ऐ० ५ २५ असावादित्योऽनाधृष्य। कौ० २७ ५]

अनानत! नम्रतारहित (शत्रूणा समीपे प्रजास्वामिन् राजन्) ६ ४५ ६ अनानतम्—नम्रीभूतम् (राजानम्) ७ ६ ४. **अनानताः**=शत्रूणामभिमुखे खल्वनम्रा (नृतमास =नायका जना) १ ८७ १ [नञ्युपपदे णम प्रह्वत्वे शब्दे (भ्वा०) धातो क्त।]

अनानुदः अप्रेरित (इन्द्र =विद्याप्रकाशको जन) २ २१ ४ येऽनुददति तेऽनुदा, न विद्यन्तेऽनुदा यस्य स (विद्वान्राजा) २ २३ ११ [आङ्+णुद प्रेरणे (तुदादि०) धातोर् इगुपधलक्षण क। नञ्समासश्च]

अनानुभूतीः अनुभवरहितान् (अनभिज्ञान् सखीन्), प्र०—अत्र 'अन्येषामपि दृश्यते' इति दीर्घ ६ ४७ १७ [अनु+भू+क्तिन् भावे। नञ्बहुव्रीहि]

अनाप्तः मूर्ख शत्रुभिरप्राप्त (परमेश्वर सभाध्यक्षो वा) १ १०० २ [नञ्+आप्लृ व्याप्तौ (स्वा०) धातो क्त। अनाप्ता तत्पृथिवी। ऐ० ५ २५]

अनाभुवः ये समन्ताद्धर्माचरणे भवन्ति त आभुव, नाऽऽभुवोऽनाभुवस्तान् (पापिजनान्) १ ५१ ६. [नञ्+आङ्+भू सत्तायाम् (भ्वा०) धातो क्विप् प्रत्यय]

अनामयत् रोगादिरहितम् (आयु) १८ ६ [आङ्+अम रोगे (चुरा०) धातोर्बाहुलकात् कयन् प्रत्यय। नञ्समास। नपुसकेऽदडादेशश्छान्दस]

अनामि नम्येत ६ ८ ६ नम्यते ३ ६२ ५. [णम प्रह्वत्वे शब्दे (भ्वा०) धातो कर्मणि लुङ् सामान्ये]

अनामृणः अविद्यमाना समन्तान्मृणा हिंसका यस्य स (परमेश्वर) १.३३ १ [आङ्+मृण हिंसायाम् (तुदा०) धातोर् इगुपधलक्षण क। नञ् बहुव्रीहि]

अनायतः इतस्ततोऽगच्छन्त्सन्निहित (सूर्य) ४ १३ ५ अदूरभव: (जीवात्मा) ४ १४ ५ [आङ्+इण् गतौ (अदा०) धातो शतृ। नञ्समासश्च]

अनायुधासः अविद्यमानाऽऽयुधा (योद्धृजना) ४ ५ १४ (आङ्+युध सम्प्रहारे (दिवा०) धातोर् इगुपधलक्षण क। नञ्बहुव्रीहि। जसोऽसुगागम]

अनारम्भणे आलम्बनरहिते (समुद्रे) ऋ० भू० १६३ अविद्यमानमारम्भण यस्य तस्मिन् (तमसि=अन्धकारे) १ १८२ ६ अविद्यमानमारम्भण यस्मिँस्तस्मिन् (अन्तरिक्षे सागरे वा) १ ११६ ५ [आङ्+रभ राभस्ये (भ्वा०) धातोर्भावे ल्युट्। 'रभेरशब्लिटोरि' ति नुमि परसवर्णे च रूपम्]

अनाविद्धया अप्राप्तक्षतया (तन्वा =शरीरेण) २६ ३८ शस्त्राऽस्त्ररहितया (तन्वा=शरीरेण) ६ ७५ १ [आङ्+व्यध ताडने (दिवा०) धातो क्त। सम्प्रसारणे पररूपे स्त्रिया टाप्। नञ्समासश्च]

अनाशवाः अव्याप्ता (वीरजना) १ १३५ ६ [अशू व्याप्तौ (स्वा०) धातो 'कृवापाजिमि०' उणा० १ १ सूत्रेण उण् प्रत्यय। नञ्समास]

अनाशस्ता इव अप्रशस्तगुणसामर्थ्या इव (मनुष्या) १ २६.१. [शसु हिंसायाम् (भ्वा०) धातो क्त. 'धृषिशसी वैयात्ये' इतीड्निषेध। न शस्तोऽशस्त =प्रशस्त। नञ्समास]

अनाशुना अनश्वेनाऽचिरेण गन्त्रा (अर्वता=अश्वेन) ६ ४५ २ [अशू व्याप्तौ (स्वा०) धातो 'कृवापाजि०' इत्युणादिना उण प्रत्यय। न आशुना=अनाशुना]

अनासः अविद्यमानाऽऽस्यान् (दस्यून्) ५ २९ १. [असु क्षेपणे (दिवा०) धातो 'अकर्त्तरि च कारके०' सूत्रेण करणे घञ । नञ्बहुव्रीहि]

अनास्थाने अविद्यमान स्थित्यधिकरण यस्मिन् [समुद्रे=अन्तरिक्षे सागरे वा) १ ११६ ५. स्थातुमशक्ये (समुद्रे) ऋ० भू० १९३, १ ११६ ५ [आङ्+ष्ठा गतिनिवृत्तौ धातोर्ल्युट् अधिकरणे । नञ्बहुव्रीहि]

अनिःशस्ताः निर्गत शस्त प्रशसन येभ्यस्तद्विरुद्धा (ऋभव =मेधाविन) ४ ३४ ११ [निर्+शसु स्तुतौ (भ्वा०) धातो क्त । 'यस्य विभाषा' सूत्रेणेण्निषेध । नञ्समास]

अनितभा अप्राप्तदीप्ति. (रसा=पृथिवी) ५.५३ ९ [अनित=नञ्+इण्गतौ धातो क्त । भा दीप्तौ (अदा०) धातो घञर्थे क प्रत्यय, स्त्रिया टाप् । तत समास]

अनिध्मः अदीप्यमान (विद्वज्जन) २ ३५ ४ बाहर अप्रकाशमान और भीतर सुप्रकाशित रहता हुआ स्त्री-पुरुष के हृदय मे प्रेम स० वि० १०४, २ ३५ ४ [ञिइन्धी दीप्तौ (रुधा०) धातो 'इषियुधीन्धि०' उणा० १ १४५ सूत्रेण मक् प्रत्यय । नञ्समास]

अनिनस्य यत् प्रशस्त प्राणनिमित्त तस्य (धनिनो जनस्य) १ १५० २ [अन प्राणने धातोर्भावे 'घञर्थे कविधानमि' ति क प्रत्यय) तत मत्वर्थे इनच् प्रत्यय]

अनिन्दिषुः निन्देयु १ १६१ ५ [णिदि कुत्सायाम् (भ्वा०) धातो सामान्ये लुङ्]

अनिन्द्या निन्दितुमनर्हौ (अश्विनौ=स्त्रीपुरुषौ) १ १८० ७ [नञ्+णिदि कुत्सायाम् (भ्वा०) धातोर्ण्यत् प्रत्यय]

अनिन्द्रम् अनैश्वर्यम् ७ १८ १६ **अनिन्द्राम्**= अनीश्वरी गतिम् ४ २३ ७ **अनिन्द्राः**=अविद्यमाना इन्द्रा राजानो यासु ता (मही =पृथिवी) १ १३३ १. अनैश्वर्या (दरिद्रा जना) ५ २ ३ [इदि परमैश्वर्ये (भ्वा०) धातो 'ऋज्रेन्द्राग्रवज्र०' उणा० २ २८ सूत्रेण 'इन्द्र' शब्दो रन् प्रत्ययान्तो निपातित । नञ्समास । य इन्द्र न विविदु, इन्द्रो ह्यहमस्मि, अनिन्द्रा इतर इति वा । नि० ३ १०]

अनिपद्यमानम् यो मन आदीनीन्द्रियाणि न निपद्यते प्राप्नोति तम् (परमेश्वरम्) १ १६४ ३ अपदनशीलमचलम् (गोपाम्=परमेश्वरम् ३७ १७ [नि+पद गतौ (दिवा०) धातो शानच् । नञ्समासश्च]

अनिबद्धः न कस्याऽप्यावरणेन निबद्ध (सूर्य) ४ १३ ५ परवदेकत्र न स्थितः (जीवात्मा) ४ १४ ५ [नि+बन्ध बन्धने (क्र्या०) धातो क्त । नञ्समास]

अनिबाधे निर्विघ्ने मनि (कार्ये) ५.४२ १७ व्यवहारे ५ ४३ १६ बाधारहिते (उरौ=बाहौ) ३ १ ११ [नि+बाधृ लोडने (भ्वा०) धातोर्भावे घञ् प्रत्यय । तत्प्रतिषेध]

अनिभृष्टम् नित्य भृष्ट पतिरहितमाचरितवान् (तत्प्रतिषेध) (सभेशो राजा) १० ६ [नि+भ्रस्ज पाके (तुदा०) धातो क्त । तत्प्रतिषेध]

अनिभृष्टतविषिः न निभृष्टा प्रदग्धा तविषी सेना यस्य स (मेधावी राजा) ५ ७ ७ न नितरा भृष्टा तविषी सेना यस्य स (ब्रह्मणस्पति =अन्नस्य पालको राजा) २ २५ ४ [नञ्+नि+भ्रस्ज पाके+क्त=अनिभृष्ट । [तव इति सौत्रो धातुस्तत 'तवेर्णिद्वा' उणा० १ ४८ सूत्रेण टिषच् प्रत्यये तविषी । तविषी बलनाम निघ० ३ ३ एनयो समास]

अनिमानः अपरिमाण (इन्द्र =परमैश्वर्यवान् जगदीश्वर) ६ २२ ७ अविद्यमान निमान परिमाण यस्य स (भौतिकाग्नि) १ २७ ११ [नि+माङ् माने (दिवा०) धातोर्ल्युट् । नञ्बहुव्रीहि]

अनिमिषम् अहर्निशम् ५ १९ २ निरन्तरम् १ २४ ६ **अनिमिषः**=अहर्निश प्रयतमान (इन्द्र =सेनेश) १७ ३३ **अनिमिषा**=अहर्निशजन्यया क्रियया ३ ५९ १ नैरन्तर्येण ७ ६० ७ **अनिमिषाः**=निमेषालस्यवर्जिता (जगत्कल्याणकरा जना) २ २७ ९ [अनिमिषा अनिमिषन् नि० ३ २२]

अनिमिषद्भिः नैरन्तर्येणालस्यरहितै (सज्जनै) १ १४३ ८ [नञ्+नि+मिष स्पर्द्धायाम्+शतृ]

अनिमिष्येण निरन्तर प्रयतमानेन (इन्द्रेण=सेनापतिना) १७ ३४ [निमिष प्राति० भवार्थे यत् । तत्प्रतिषेध]

अनिमेषम् निरन्तरम् ३४ १३ प्रतिक्षणम् १ ३१ १२ [अनिमेषम्=अनिमिषन्त नि० ३ १२ नञ्+नि+मिष स्पर्द्धायाम्+घञ्]

अनिराम् अविद्यमाना इराऽन्नभुक्तिर्यस्या ताम् (अमीवाम्=पीडाम्) १२ १०५ **अनिराः**=नितरा दातुमयोग्या (अमीवा =रोगपीडा) ११ ४७ [इरा अन्ननाम निघ० २ ७ ततो नञ्बहुव्रीहि । अथवा नि+रा दाने (अदा०) भावे घञ् । तत्प्रतिषेध]

अनिरेण रमणीयेन (वचसा=वचनेन) ४ ५ १४

अनिलम् कारणरूप वायुम् ४० १५ [अन प्राणने धातो 'सलिकल्यनि०' उणा० १ ५४ सूत्रेण इलच्]

अनिविशमानाः या कुत्रचिन्न निविशन्ते ता (आप =जलानि) ७ ४९ १ [नञ्+नि+विश प्रवेशे (तुदा०) धातो शानच् । 'नेर्विश' इत्यात्मनेपदम्]

अनिवृतः निरन्तर (अग्नि) ३ २९ ६ [नि+वृञ् वरणे (स्वा०)+क्त । तत्प्रतिषेध]

अनिवेशनानाम् अविद्यमान निवेशनमेकत्र स्थानं यासा तासाम् (काष्ठाना=जलानाम्) १ ३२.१० [नि+विश प्रवेशे (तुदा०) धातोरधिकरणे ल्युट् । नञ्बहुव्रीहि । अनिवेशनानाम्=अनिविशमानानाम् नि० २ २६]

अनिशितम् अतीक्ष्णम् (योनि =कारण वह्निम्) २ ३८ ८ **अनिशितः**=न विद्यते नितरा शिता तीव्रा क्रिया यस्मिन् स सङ्ग्रामो यज्ञपात्र वा १ २९ **अनिशिता**=अतिविरतीर्णा सेना कार्या वेदिर्वा १ २९. [नि+शिञ् निशाने (स्वा०) धातो क्त । तत्प्रतिषेध]

अनिषङ्गाय अविद्यमानो नितरा सङ्ग पक्षपातो यस्य तस्मै (यज्यवे=शिल्पविद्याविदे) १ ३१ १३ [नि+षञ्ज सङ्गे (भ्वा०) धातोर्घञ् । घित्वात् कुत्वम् । तत्प्रतिषेध]

अनिष्टृतः दु खात्पृथग्भूत (अग्नि =राजा) २७ ७ अनुपहिंसित, भा०—विघ्नविरह (अग्नि =विनय-प्रकाशितो राजा) २७ ४

अनिःशस्ताः निर्गत शस्त प्रशसन येभ्यस्तद्विरुद्धा (ऋभव =मेधाविनो जना) ४ ३४.११ [निर्+शसु स्तुतौ+क्त तत्प्रतिषेध]

अनीकम् बल सैन्यम् ५ २ १ सैन्यम् २९ ५४ सर्व-दु खनाशार्थं कामक्रोधादिशत्रुविनाशार्थं बलम् (ब्रह्म) प० वि० ॥ सैन्यमिव ४ ५ ९ सैन्यमिव ज्वालासमूहम् ८ २४ सैन्यमिव कार्यसिद्धिप्रापक (यानम्) ६ ५१ १ सैन्यमिव समूहम् १ १२४ ११ सेनेव किरणसमूहम् १३ ४६ सैन्यमिव तेज २ ३५ ११ चक्षुरादीन्द्रियैरप्राप्तम् (चक्षु = बलम्) १ ११५ १ सैन्यवद्रक्षयित्री (स्त्री) १ ११३ १९ विजयमान सैन्यम् ४ १२ २ बलवत्तर सैन्यमिव प्रसिद्धम् अनिति जीवयति सर्वान् प्राणिन स (सूर्य =परमेश्वर), प्र०—अनिहृपिभ्या किच्च उ० ४ १६. अनेन सूत्रेण ईकन् प्रत्यय ७ ४२ **अनीका**=शत्रुभि प्राप्तुमनर्हाणि सैन्यानि ४ २३ ७ **अनीके**=सैन्ये ४ ५८ ११ **अनीकेन**=सेना-समूहेन सह २.९.६ सैन्येन ५ ३४ **अनीकैः**=शत्रुभिर्दुष्टैर्दस्युभिर्नेतुमशक्यै सैन्यै ४ १० ३. भा०—सुशिक्षितैर्बलाढ्यै सैन्यैरिव १५ ४६ [अन प्राणने धातो 'अनिहृपिभ्या किच्च' उणा० ४ १७ सूत्रेण ईकन् प्रत्यय । सेनाया वै सेनानीरनीकम् श० ५ ३ १ १ णीञ् प्रापणे धातो 'अजियुधुनीभ्यो दीर्घश्च' उ० ३ ४७ सूत्रेण कन् प्रत्यये नीक । तत्प्रतिषेध]

अनीकवते प्रशस्तसेनायुक्ताय (अग्नये=सेनापतये) २९ ५९. प्रशसितसेनाय (अग्नये=सेनापतये) २४ १६ [अनीक प्राति० मतुप् प्रशसार्थे]

अनीताम् प्रापयेताम् १ १२१ ५ [णीञ् प्रापणे (भ्वा०) धातो सामान्ये लङ् । 'बहुल छन्दसी' ति शपो लुक्]

अनु पश्चाद् भावे ५ २९ सद्य ३ ५५ ४ पश्चादर्थे १ ६.५ आनुकूल्ये १ ५२ ११ क्रियाऽर्थे १ १० १२ वीप्सायाम् १ ६ ४ अनुगमाऽर्थे १ २५ १६ अवगिर्थे १ ८२ ३ अनुक्रमे १ ३७ ९ आनुपूर्व्ये १ ५२ ४ अनुयोगे १ ५२ १४ अनुलक्ष्ये १ १९१ १५ [अन्विति सादृश्यापरभावम् नि० १ ३]

अनुकामम् काम काममनु १ १७ ३ इच्छा के अनु-कूल स्वतन्त्र स० वि० १९७, ९ ११३ ९ **अनुकामः**= धर्माऽनुकूला कामना १८.८ [कमु कान्तौ धातोर्घञ् । ततो-ऽनुना सहाव्ययीभाव]

अनुक्थाः अविद्वास (जना) ५ २ ३ (वच परिभाषणे (अदा०) धातो । 'पातृतुदिवचि०' उ० २ ७ सूत्रेण थक्प्रत्यये सम्प्रसारणे चोक्थरूपम् । तत्प्रतिषेध]

अनुक्रामाम अनुक्रमेण गच्छेम ३८.१९ **अनुक्रा-मेम**=उल्लङ्घेम ५ ५३ ११ [अनु+क्रमु पादविक्षेपे (भ्वा०) धातोर्लोट् । 'क्रम परस्मैपदेषु' अ० ७ ३ ७६ सूत्रेण दीर्घत्वम्]

अनुक्रोशन्ति रुदन्ति ४ ३८ ५ [अनु+क्रुश आह्वाने रोदने च (भ्वा०) धातोर्लट्]

अनुक्षत्तारम् सारथ्यनुकूलम् ३० ११. धर्मात्मा के अनुकूलवर्त्ती (जन) को ३० १३ [क्षद सवृताविति सौत्रो धातु, तत 'तृन्तृचौ शसिक्षदादिभ्य०' उ० २ ९४ सूत्रेण तृचि क्षत्ता । ततोऽनुना समास]

अनुगमन्तु अनुगच्छन्तु ४ ३५ १ **अनुगमाणि**= अनुगच्छेयम् ४ १८ ३ [अनु गम्लृ गतौ (भ्वा०) धातो-र्लोट् । 'बहुल छन्दसीति शपो लुक् ।]

अनुगानि अनुगच्छेयम् ४ १८ ३ [अनु+गम्लृ गतौ

धातोर्लोट् । छान्दसो वर्णलोप इति मकारलोप [बहुल छन्दसी' ति शपो लुक्]

अनुगुः पश्चाद् गच्छन्ति १ ६५ २ अनुगच्छेयु ३ ७ ७ [अनु+गम्लृ गतौ धातोर्लिङ् । छान्दसत्वाद् रूपसिद्धि]

अनुग्मन् अनुगच्छन्ति ६ १ २ पश्चात्प्राप्नुवन्ति १ ६५ १ [अनु+गम्लृ गती धातोर् लङ्, शपो लुक् उपधालोप , अडभावश्च छान्दस]

अनुग्मन् अनुकूल गच्छन् (इन्द्र =विद्युत्) ३ ३९.५. [अनु+गम्लृ गतौ+शतृ । शपो लुग् उपधालोपश्च छान्दस]

अनुगृणाति पश्चात् स्तौति १ १४७ २ पश्चात् स्तुयात् १२ ४२ [अनु+गॄ शब्दे (क्र्या०) धातोर्लट्]

अनुगृभाय अनुगृह्णीया २ २८.६ [अनु+ग्रह उपादाने (क्र्या०) धातोर् लोट् । 'छन्दसि शायजपि' अ० ३ १ ८५ सूत्रेण श्न शायजादेश]

अनुग्रः अतेजस्वी (जन) ७ ३८ ६ [न उग्र इति नञ्समास । उग्रशब्द 'ऋज्रेन्द्र०' उणादिसूत्रे निपातित]

अनुघुष्य आनुकूल्येन घोषयित्वा २५ ४१. आनुकूल्येन शब्दयित्वा १ १६२ १८ [अनु+घुषिर् विशब्दने (चुरा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

अनुचरेम अनुगच्छेम ५ ५१ १५. [अनु+चर गतौ (भ्वा०) धातोर्लिङ्]

अनुचरम् सेवक को ३० १३. [अनु+चर गतौ+अच् कर्त्तरि]

अनुचस्कन्द प्राप्नोति १३ ५ [अनु+स्कन्दिर् गतिशोषणयो (भ्वा०) धातोर्लिट् सामान्ये]

अनुचेतथः ज्ञापयथ ४ ४५ ६ [अनु+चिती सञ्ज्ञाने (भ्वा०) धातोर्लट्]

अनुचेति विज्ञायते ४ ३७ ४ [अनु+चिती सञ्ज्ञाने (भ्वा०) धातोर्लट । छान्दसस्तकारलोप शप्लुक् च]

अनुजिहाताम् प्राप्नुत ७ ३४ २४ [अनु+ओहाङ् गतौ (जु०) धातोर्लोट्]

अनुजुहोमि अनुगृह्णामि १३ ५ [अनु+हुदानादानयो (जु०) धातोर्लट्]

अनुतस्थुः आनुपूर्व्येण वर्त्तन्ते १ ५२ ४

अनुतिष्ठाति=अनुतिष्ठेत् ४ २० २ [अनु+ष्ठा गतिनिवृत्तौ+लिट् । अपरत्र च लेट्]

अनुतृन्धि हिन्धि ५ १२ २ [अनु+उतृदिर् हिंसानादरयो (रुधा०) धातोर्लोट्]

अनुत्तम् अप्रेरितम् (वस्तु) १ १६५ ९ अप्रेरित स्वाभाविक (वीर्यम्) १ ८० ७ अप्रेरितम् (स्वरूपम्), प्र०—'नमत्तनिपत्तानुत्त०' अ० ८ २ ६१ इति निपातनम् ३३ ७९ अनुकूल शत्रुभिरबाधितम् (क्षत्र=धन राज्य वा) ७ ३४ ११. **अनुत्ताः**=आनुकूल्येन वृता (गिर = विविधविद्यायुक्ता वाण्य) ३ ३१ १३. [नञ्+णुद् प्रेरणे (तुदा०) धातो. क्त । अथवा अनु+दा+क्त । 'अच उपसर्गात्त ' इति दकारस्य तकार]

अनुत्तमन्युम् न नुत्त प्रेरितो मन्यु क्रोधो यस्य तम् जितेन्द्रिय राजानम्) ७ ३१ १२ [अनुत्त =नञ्+णुद प्रेरणे+क्त । [मन्यु =मन ज्ञाने (दिवा०) धातो 'यजिमनि०' उ० ३ २० सूत्रेण युच् प्रत्यय । एनयो समास]

अनुदकाः जलरहिता (नद्य) ७ ५० ४ [नञ्उदकपदयोर्बहुव्रीहि]

अनुदक्षि अनुदहसि, प्र०—अत्र 'बहुल छन्दसि, इति शपो लुक् २ १ १० [अनु+दह भस्मीकरणे (भ्वा०) धातोर्लट् शप्लुक् च]

अनुददन्ते भा०—अनुमोदन्ते २७ १६ [अनु+दद दाने (भ्वा०) धातोर्लट्]

अनुददाति अनुकूलता से देता है २ १२ १० [अनु+डुदाञ् दाने (जु०) धातोर्लट्]

अनुदधिरे अनुकूलतया धरन्ति १ ८५.३ [अनु+दध धारणे (भ्वा०) धातोर्लिट्]

अनुदायि अनुदीयते ६ २५ ८ अनुदीयते २ २० ८ [अनु+डुदाञ् दाने (जु०) धातो कर्मणि लुङ् । अडभावश्च छान्दस]

अनुदिताम् ईश्वरोक्ताम् (वेदवाणीम्) ऋ० भू० २०३ अथर्व० ५.१ १ २ [णुद प्रेरणे धातो क्त । छान्दस इडागम । नञ्समासे टापि च रूपम् । अप्रेरितामित्यर्थ , सा च वेदवाणी]

अनुदिशामि उपदिशामि १३ ४८ [अनु+दिश अतिसर्जने (तुदा०) धातोर्लट्]

अनुदिश्य प्राप्तु शोधयितुमनुलक्ष्य १ २८ [अनु+दिश अतिसर्जने (तुदा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

अनुदुदुह्रे पश्चात् प्रपूरयन्ति, प्र०—अत्र वर्त्तमाने लिट् 'इरयो रे' अ० ६ ४ ७६ अनेनेरेजित्यस्य स्थाने रे

आदेश ३ १६ [अनु+दुह प्रपूरणे (अदा०) धातोर्लिट्। इरेच् स्थाने रे आदेश]

अनुदुः अनुदद्यु, प्र०—अत्र लुड्यडभाव १ १२७ ४ [अनु+डुदाञ् दाने (जु०) धातोर्लुङ्। अडभावश्छान्दस 'गातिस्था०' सूत्रेण सिचो लुक्]

अनुदृश्य आनुकूल्येन दृष्ट्वा ३४ ४६ [अनु+दृशिर् प्रेक्षणे (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

अनुदेथाम् प्रेरयेथाम् १ ११६ ६ [णुद प्रेरणे (तुदा०) धातोर्लङ्]

अनुदेयम् अनुदातु योग्य (नववास्त्व=नवीन निवासम्) ६ २० ११ [अनु+डुदाञ् दाने (जु०) धातो 'अचो यत्' सूत्रेण यत्। 'ईद्यती' ति ईकारादेश]

अनुद्यून् दिनान्यनु ५ ८६ ५ दिवसान् १ १२१ ७ वीप्सया दिवसान् १ ७१ ६. प्रतिदिनम् २ १४ १२. अनुकूलान् दिवसान् ३.२३ २ [द्युरित्यहर्नाम निघ० १ ६ द्युरित्यह्नो नामधेय द्योतत इति सत। नि० १ ६ तस्यानुना अव्ययीभावसमास]

अनुद्यावापृथिवी सूर्यपृथिव्योर्मध्ये ऋ० भू० १३८ [पृथिव्यामुत्तरपदे दिव स्थाने 'दिवसश्च पृथिव्याम्' अ० ६ ३ ३० सूत्रेण द्यावादेश। ततो अनुना समास]

अनुधूपितासः अनुकूलै सुगन्धै सम्कृता (पदार्था) २ ३० १०

अनुनेषथ अनुनयथ ५ ५४ ६ **अनुनेषि**=प्रापयसि, प्र०—अत्र नी धातोर्लेटि 'बहुल छन्दसि' इति शपो लुक्, अत्राऽन्तर्गतो ण्यर्थ १ ६१ १. [अनु+णीञ् प्रापणे (भ्वा०)धातोर्लेट्। 'सिब् बहुल लेटीति' सिप्। अपरत्र शपो लुक्]

अनुपक्षितम् यद् व्ययेनाऽपि नोपक्षीयते तत् (वसु=विद्यासुवर्णादिधनम्) ३ १३ ७ [उप+क्षि क्षये (भ्वा०) धातो. क्त नञ्समासश्च]

अनुपत् अनु पश्चात् प्राप्यते या सा (शोभा) १५ ८ [अनु+पद गतौ (दिवा०) धातो स्त्रिया 'सपदादिभ्य क्विप्' इति क्विप्]

अनुपथाः अनुकूल पन्था येषान्ते (मनुष्या) ५ ५२ १० ['अनु+पथिन्' पदयो समासे 'ऋक्पूरब्धू पथाम्०' सूत्रेणाकारप्रत्यये टिलोपे च रूपम्]

अनुपदे पश्चात् प्राप्तव्याय (शोभायै) १५ ८ [अनु+पद गतौ (दिवा०) धातो क्विप्]

अनुपश्यतः अनुकूलेन योगाऽभ्यासेन साक्षाद् द्रष्टु (सन्यासिन), अनुकूल देखने वाले सन्यासी को स० वि० २१५, ४० ७. [अनु+दृशिर् प्रेक्षणे (भ्वा०) धातो. शतृ। शिति पश्यादेशश्च]

अनुपश्यति विद्याधर्मयोगाऽभ्यासाऽनन्तर समीक्षते, अनुकूलता से देखता है स० वि० २१४, ४० ६

अनुपश्यसि=पश्चात् सम्प्रेक्षसे १ ५० ६ [अनु+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लट्। शिति धातो पश्यादेश]

अनुपूर्वम् अनुकूला पूर्वे वेदोक्ता आप्तसिद्धान्ता यस्य तम् (ऋषि=वेदपारगाऽध्यापकम्) १ ११७ ३ आनुकूल्यमनतिक्रम्य २३ ३८ क्रमश १० ३२ अनुकूल प्रथमम् १६ ६

अनुप्रथन्ताम् अनुप्रख्यान्तु ८ ३० [अनु+प्रथ प्रख्याने (भ्वा० उ०) धातोर्लोट्]

अनुप्रमुचः अनुप्रमोचय ४ २२ ७ [अनु+प्र+मुच्लृ मोचने (तुदा०) धातोर्लोट्। छान्दसो नुमो नकारलोप]

अनुप्रयन्ति प्राप्नुवन्ति ५ ५३ १० [अनु+प्र+इण् गतौ (अदा०) धातोर्लट्। 'इणो यण्' इति यणादेश]

अनुप्राणन्तु आयुर्भुञ्जताम् ४ २५ **अनुप्राणिहि**=जीवितोऽनुजीवन धर धरति वा ४ २५ [अनु+प्र+अन प्राणने (अदा०) धातोर्लोट्]

अनुप्रेत आनुकूल्येन प्राप्नुत १८ ५८ **अनुप्रेहि**=प्राप्नुहि १७ ६६ [अनु+प्र+इण् गतौ (अदा०) धातोर्लोट्]

अनुब्रुवाणः पठित्वाऽनूपदिशन् (विद्वज्जन) ५ ४४.१३ [अनु+ब्रूञ् व्यक्तताया वाचि (अदा०) धातो शानच्]

अनुभक्षयामि पश्चात् पालयामि ८ ३७ [अनु+भक्ष अदने (चुरा०) धातोर्लट्। धातूनामनेकार्थत्वात् पालनेऽपि]

अनुभरामि पश्चाद् धारयामि, प्र०—अन्विति सादृश्यापरभाव प्राह निरु० १ ३, २ १७ [अनु+भृञ् भरणे (भ्वा०) धातोर्लट्]

अनुभर्त्री अनुगतसुखधारणस्वभावा (वाणी) १ ८८ ६ [अनु+भृञ् भरणे (भ्वा०) धातो कर्त्तरि तृच्। स्त्रिया ङीप्]

अनुभासि आनुकूल्येन प्रकाशयसि ३ ६ ७ [अनु+भा दीप्तौ (अदा०) धातोर्लट्]

अनुभुवन् अनुभवन्ति ७ ३१ ६ [अनु+भू+शतृ प्रत्यय। विकरणव्यत्ययेन शप स्थाने श उवङ्डादेशे च रूपम्]

अनुभ्राजन्तः पश्चात् प्रकाशमाना (रश्मय) १ ५० ३ [अनु+भ्राजृ दीप्तौ (भ्वा०) धातो शतृप्रत्यय । व्यत्ययेन परस्मैपदम्]

अनुमता अनुज्ञापिता (सीता=काष्ठपट्टिका) १२ ७० [अनु+मन ज्ञाने (दिवा०) धातो क्त । अनुनासिकलोपश्च]

अनुमतिः अनुकूल विज्ञानम् ३४ ९ **अनुमते**=हे अनुमन्त परमेश्वर ! ऋ० भू० २०२, १० ५९ ६ अनुकूला मतिर्यस्य तत्सम्बुद्धौ (अन्व०—सभापते विद्वन्वा) ३४.८ **अनुमत्यै**=याऽनुमन्यते तस्यै (विष्णुपत्न्यै=अन्तरिक्षरूपायै) २९ ६० अनुमति के लिए २४ ३२ [अनु+मन ज्ञाने (दिवा०) धातो 'मन्त्रे वृषेषपचमन०' अ० ३ ३ ९६ सूत्रेण भावे स्त्रिया क्तिन् उदात्तश्च अनुमती राकेति देवपत्न्याविति नैरुक्ता, पौर्णमास्याविति याज्ञिका, या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राकेति विज्ञायते । अनुमतिरनुमननात् नि० ११ ३०]

अनुमदन्ति आनुकूल्येनाऽऽनन्दयन्ति ३ ४७ ४ आनुकूल्येन हृष्यन्ति ३३ ८० अनुकूल हर्षन्ति १ ८४ १० **अनुमदन्तु**=पश्चादानन्दन्तु २७ ८ अनुहर्षन्तु ६ २० उत्साहयन्तु, भा०— प्रोत्साहयन्तु, अनुमोदयन्तु च १७ ४९ **अनुमदाम**=अनुहृष्येम, प्र०—अत्र विकरणव्यत्ययेन शप् १ १०२ ३ **अनुमदेम**=आनन्दिता भवेम, प्र०—अत्रापि विकरणव्यत्ययेन श्यन स्थाने शप् १ ९१ २१ [अनु+मदी हर्षे (दिवा०) धातोर्लेट् । विकरणव्यत्ययेन शप स्थाने श्यन् न भवति]

अनुमन्यत अनुमन्यसे ४ १७ १ **अनुमन्यताम्**=पश्चाद् विज्ञापयतु स्वीकुरुता वा ४ २० पश्चात् स्वीकरोतु स्वीकारयति वा ५ ६ **अनुमन्यासै**=अनुमन्यस्व ३४ ८ [अनु+मन ज्ञाने (दिवा०) धातो सामान्ये लङ् । अड् अभावश्च अन्यत्र लोट्]

अनुममिरे निर्मिमते १ १६३ ८ [अनु+मा माने (अदा०) धातोर्लिट्]

अनुमम्नाते अन्वभ्यासाते ७ ३१ ७ [अनु+म्ना अभ्यासे (भ्वा०) धातोर्लिट्]

अनुमंसते अनुमन्यताम् ५ ४६ ४ [अनु+मन ज्ञाने (दिवा०) धातोर्लेट् । 'सिब्बहुल लेटी' ति सिप्]

अनुमाद्यस्य अनुहर्षितुं योग्यस्य (पुस=पुरुषस्य) ७ ६ १ **अनुमाद्यः**=अनुहर्षितु योग्य (इन्द्र=परमैश्वर्यदाता राजा) ६ ३४ २ **अनुमाद्यासः**=अनुमोदकारकगुणैन प्रशसनीया (विद्वज्जना) १ ११५ ३ [अनु+मदी हर्षे (दिवा०) धातोर्ण्यत्]

अनुमार्ष्टु पुन पुन शुन्धतु, भा०—सम्पूरयन्तु ८ १४ [अनु+मृजूष् शुद्धौ (अदा०) धातोर्लोट् 'मृजेर्वृद्धिरिति वृद्धि]

अनुमृक्षीष्ट अनुशोधयतु १ १४७ ४ [अनु+मृजूष् शुद्धौ (अदा०) धातोर्लिङ् । व्यत्ययेनात्मनेपदम्]

अनुम्लोचन्ती अनुम्लोचयन्ती दीप्ति १५ १७ [अनु म्लुचु गत्यर्थे (भ्वा०) धातो शतृ, स्त्रिया ङीप् च]

अनुयच्छतु अनुगृह्णातु ४ ५७ ७ **अनुयच्छन्ति**=निगृह्णन्तु ६ ७५ ६. [अनु+यम उपरमे (भ्वा०) धातोर्लोट् । 'इषुगमियमाम्' सूत्रेण छकारादेश शिति]

अनुयच्छमाना अनुकूलतया प्राप्ता (पत्नी) १ १२३ १३. **अनुयच्छमानाः**=आनुकूल्येन नियन्तार (मनुष्या) प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ १०९ ३ [अनु+यम उपरमे (भ्वा०) धातो शानच्+टाप् । व्यत्ययेनात्मनेपदम्]

अनुयतम् आनुकूल्येन यतन्तम् (मर्त्त=मनुष्यम्) ५ ४१ १३ [अनु+यती प्रयत्ने (भ्वा०) धातो क्विप्]

अनुया याऽनुयाति तया (गव्या=रात्रिविद्यया) १ ५ ६ [अनु+या प्रापणे (अदा०) धातोरच् स्त्रिया टाप्]

अनुयाजान् अनुकूलान् यज्ञपदार्थान् १९ १९ [अनु+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्घञ् प्रत्यय । 'प्रयाजानुयाजौ यज्ञाङ्गे' अ० ७ ३ ६२ सूत्रेण निपातनात् कुत्व न भवति । अपाना अनुयाजा काठ० १२ २ ग० ११ २७ २७ कौ० ७ १ १० ३ अशनिरेव प्रथमोऽनुयाज श० ११ २ ७ २१ एकादश अनुयाजा । मै० १ १० ८ छन्दांसि वाऽनुयाजा श० १ ८ २ ८ तद्यत्तासु सर्वास्वष्टासु (देवतासु) अथैतत् पश्चेवानुयजति तस्मादनुयाजा नाम श० १ ८.२ ७ त्रयोऽनुयाजा । इमा ऽएवास्य ते ऽवाञ्चस्त्रय प्राणा श० ११ २ ६ ९ प्रजाऽनुयाजा तै० स० २ ६ १ ६. रेतोधेयम् अनुयाजा श० ३ ८ ४ ८ आत्मा वै प्राणानामेकादश ......अथ यदेकादशानुयाजा, प्राणानस्मिन् दधाति । मै० ३ ९ ८ पशवो वा ऽनुयाजा । श० ३ ८ ४ ८ अथ किन्देवता प्रयाजानुयाजा ? आग्नेया इत्येके । छन्दोदेवता इत्यपरम् । ऋतदेवता इत्यपरम् । पशुदेवता इत्यपरम् । प्राणदेवता इत्यपरम् । आत्मदेवता इत्यपरम् । आग्नेया इति स्थिति । भक्तिमात्रमितरत् नि० ८ २१]

अनुयाति अनुगच्छति ६ ६ २ **अनुयासि**=प्राप्नोषि ३ १ १७ [अनु+या प्रापणे (प्रापणमिह गति) अदा० धातोर्लट्]

अनुयेमाते नियमेन गच्छत ४ ४८ ३ **अनुयेमुः**=नियच्छन्ति ६ २१ ६. [अनु+यम उपरमे (भ्वा०) धातोर्लिट्]

अनुयोज अर्वाग् योजय १ ८२ ३. पश्चाद् योजय युङ्क्ते वा ३ ५२ [अनु+युजिर् योगे (रुधा०) धातोर्लोट्। विकरणव्यत्ययेन शप श्नम् न भवति]

अनुरुत् योऽनुरौति उपदिशति (परमात्मा) ३ ५५ ५. [अनु+रु शब्दे (अदा०) धातो क्विप्]

अनुरुधम् योऽनुरुणद्धि तम् ३० ६ [अनु+रुधिर् आवरणे (रुधा०) धातो क्विप्]

अनुरूपः अनुकूल (यज्ञ) १९ २४ [रूपम् रोचते नि० ३ १३ स योऽय (पुरुष) चक्षुष्येपो ऽनुरूपो नाम। अन्वङ् ह्येष सर्वाणि रूपाणि। जै० उ० १ २७ ४ पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्व रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूप एन पुत्रो जायते य एव वेद। ता० १२ १ ५, १२ ७ ७, १३ १ ६, १३ ७ ७ प्रजा अनुरूप। गो० उ० ३ २१ प्रजा वा अनुरूप। ऐ० ३ २४ अग्निरनुरूप जै० उ० ३ ४ २]

अनुरोहते अनुवर्द्धते २ ५ ४ [अनु+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लट्। व्यत्ययेनात्रात्मनेपदम्]

अनुवक्षः प्राप्नुहि ५ ३३ २ **अनुववक्ष**=अनुवहति, प्र०—अत्र वर्तमाने लिटि 'वाच्छन्दसि' इति सुडागम ३ ७ ६ [अनु+वह प्रापणे (भ्वा०) धातोर्लिट्। सुडागम पूर्वत्र द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्' (अ० ६ १ ८) वा० सूत्रेण द्वित्व न भवति]

अनुवनथ. पश्चात् सम्भजेथाम् १ ४६ १४ [अनु+वन सभक्तौ (भ्वा०) धातोर्लट्]

अनुवर्त्मानः अनुकूलाऽऽचरणा, अनुकूलो वर्त्मा मार्गो येषान्ते (विश, मरुत =प्रजा, ऋत्विजो विद्वास) १७ ८६

अनुवर्द्धसे शमादिषु स्वात्मानमुन्नयसि ७ १२ **अनुवावृधे**=अनुवर्द्धयन्ति २ ८ ५ [अनु+वृधु वृद्धौ (भ्वा०) धातोर्लट् लिट् च। तुजादीनामित्यभ्यासदीर्घ]

अनुवव्ने पश्चाद् याचते १ ६१ १५ [अनु+वनु याचने (तना०) धातोर्लिट्। अकारलोपश्छान्दस। 'न शसददवादिगुणानामि' ति एत्वाभ्यासलोपौ न भवत]

अनुवष्टि प्रकाशते १५ ४७ कामयेत १ १२७ १ [अनु+वश कान्तौ (अदा०) धातोर्लट्। वष्टि वश्मि- कान्तिकर्मा निघ० २ ६]

अनुवस्ताम् अनुच्छादयतु ६ ७५ १८ पश्चादाच्छादयताम् १७ ४९ [अनु+वस आच्छादने (अदा०) धातोर्लोट्]

अनुवाति अनुगच्छति ४ ४० ३ पीछे चलता हैं ४ ७ १०. [अनु+वा गतौ (अदा०) धातोर्लट्]

अनुवावृतुः अनुवर्त्तेरन्, प्र०—अत्र 'तुजादीनाम्०' इत्यभ्यासदैर्घ्यम् ४ ३० २ [अनु+वृत्तु वर्त्तने (भ्वा०) धातोर्लिट्। अभ्यासस्य दीर्घत्व तुजादित्वात्]

अनुविक्रमते अनुकूलता मे क्रिया करता है स० वि० २१० अथर्व० ९ ६ २ २ **अनुविक्रमस्व**=अनुव्यवहर, प्रयतस्व १२ ५ [अनु+वि+क्रमु पादविक्षेपे (भ्वा०) धातोर्लट् 'वे पादविहरणे' अ० १ ३ ४१ सूत्रेणात्मनेपदम्]

अनुवित्तः अनुलब्ध (पन्था =मार्ग) ४ १८ १ [अनु+विद्लृ लाभे (तुदा०) धातो क्त। 'वित्तो भोगप्रत्ययो' इति सूत्रेण निष्ठानत्वनिषेध]

अनुविदधौ अनुकूल विदधाति १ ९५ ३ [अनु+वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट्]

अनुविदे अनुवेद्मि, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् **अनुविदेत्**=अनुकूल प्राप्नुयात् ५ ९ **अनुवेद**=विद्यापठनाऽनन्तर जानाति १६४ १८ [अनु+विद ज्ञाने (अदा०) धातोर्लट्। व्यत्ययेनात्मनेपदम्। अन्यत्र 'विदो लटो वे' ति तिपो णलादेश]

अनुविध्य ताडय १३ ९ [अनु+व्यध ताडने (भ्वा०) धातोर्लोट्]

अनुविराजति प्रकाशते १२ ३ [अनु+वि+राजृ दीप्तौ (भ्वा० उ०) धातोर्लट्]

अनुवीक्षस्व आनुकूल्येन विशेषत सम्प्रेक्षस्व १३ ३० [अनु+वि+ईक्ष दर्शने (भ्वा०) धातोर्लोट्]

अनुवीरयध्वम् पश्चाद् विक्रमयध्वम् १७ ३८ [अनु+वीर विक्रान्तौ (चुरा०) धातोर्लोट्]

अनुवोचत् पुनरुपदिशेत् २ ५ ३ [अनु+वच परिभाषणे (अदा०) धातोर्लुङ्। अडभाव। 'अस्यतिवक्ति०' सूत्रेणाङ्। 'वच उम' इत्युम्]

अनुव्यचः अनुयोगेन व्याप्ते १ ५२ १४ [अनु+व्यच व्याजीकरणे (तुदा०) धातोर्लोट्। विकरणव्यत्ययेन शप्। हेरभावश्छान्दस]

अनुव्यस्थिरन् आनुकूल्येन विशेषेण तिष्ठन्ति १ ८० ८

[अनु+वि+ष्ठा गतिनिवृत्तौ धातोश्छान्दसं रूपम्। 'समवप्रविभ्य स्थ' इत्यात्मनेपदम्]

अनुव्यायन् अनुकूलतयोत्पादिता १४ ३० [अनु+वि+इण् गतौ (अदा०) धातोर्लङ्]

अनुव्रतः अनुकूल आचरणयुक्त (पुत्र) स० वि० १४१. अथ० ३ ३० २ **अनुव्रताय**=अनुगतानि धर्म्याणि व्रतानि यस्य तस्मै (सज्जनाय) १ ५१.६ [व्रतमिति कर्म नाम वृणोतीति सत । इदमपीतरद् व्रतमेतस्मादेव निवृत्तिकर्म वारयतीति सत । अन्नमपि व्रतमुच्यते यदावृणोति शरीरम्। नि० २ १३ व्रतस्यानुना समास.]

अनुशसे अनुशासनाय ५ ५० २ [अनु+शासु अनुशिष्टौ भावे क्विप्। आकारलोपश्च छान्दस]

अनुशासता अनुशासितारौ (अध्यापकोपदेशकौ) १ १३६ ४ [अनु+शासु अनुशिष्टौ (अदा०) धातो रूपम्]

अनुशासति अनुशासन करोति, प्र०—अत्र 'बहुलं छन्दसि' इति शपो लुङ् न ६ ५४ १ [अनु+शासु अनुशिष्टौ (अदा०) धातोर्लट् शपो लुङ् न]

अनुशिश्रथः अनुश्रथ्नाति, भा०—आलस्य करोति ४ ३२ २२

अनुशिष्टः प्राप्तशिक्ष. (जन) ५ २ २८. [अनु+शासु अनुशिष्टौ (अदा०) धातो क्त । 'शास इदङ्हलोरिति' इत्वम्। 'शासिवसि०' इति षत्वञ्च]

अनुषत्यम् सत्यस्याऽनुकूलम् ३ २६ १ [सत्य कस्मात्? सत्सु तायते सत्प्रभव भवतीति वा। नि० ३ १३ सत्यस्यानुना सह समास]

अनुषु प्राणप्रदेषु (पूरुषु=मनुष्येषु) १ १०८ ८ [अन प्राणने (अदा०) धातोर्बाहुलकाद् उ प्रत्यय]

अनुष्टवे अनुस्तौमि ५ ७३ ४ [अनु+ष्टु स्तुतौ (अदा०) धातोर्लट्। व्यत्ययेनात्मनेपदम्]

अनुष्टु अनुतिष्ठन्ति यस्मिँस्तत् १ ६५ ३

अनुष्टुप् ययानुष्टोभते सा (छन्दोऽर्थविज्ञानम्) २३.३३ यया पठित्वा पुन सर्वा विद्या अन्येभ्य स्तुवन्ति सा (छन्द) १० १३ अनुष्टोभते स्तभ्नात्यज्ञान य (अध्यापक) ८ ४७ सुखानामनुष्टम्भनम् १४ १८ अनुस्तौति यया सा (छन्द=सुखसाधकम्) १४ १० श्रुत्वा पश्चात् स्तुभ्नाति जानाति शास्त्राणि यया मननक्रियया सा १५ ५ अनुस्तौति यया सा (छन्द) १४ १० अनुष्टुप् छन्द २१ १४ **अनुष्टुभम्**=अनुस्तुम्भकम् छन्द=(स्वातन्त्र्यम्) २८ २६ **अनुष्टुभा**=भा०—प्रीत्या, व्यवस्थया, धर्मव्यवस्थया २८ ३७ अनुष्टुप् मन्त्र द्वारा सिद्ध हुई विद्या से १३ ३४ **अनुष्टुभे**=अनुस्तम्भाय २४ १२ **अनुष्टुभेन**=अनुष्टुब्विहितार्थयुक्तेन (छन्दसा) ११ ११ [अनुष्टुप् वाङ्नाम निघ० १ ११ अनुष्टुबनुष्टोभनात् नि० ७ १२ अन्वस्तौदिति हि ब्राह्मणम् दे० ३ ८ अनुष्टुबनुष्टोभनात् दे० ३ ७ यस्याष्टौ ता अनुष्टुभम् कौ० ६ २. गायत्री वै सा यानुष्टुप् कौ० १० ५ वागेवासौ प्रथमानुष्टुप् कौ० १५ ३ अनुष्टुप् सोमस्य छन्द कौ० १५ २ आपो वा अनुष्टुप् कौ० २४.४ आनुष्टभ वै चतुर्थमह कौ० २२ ७ द्वात्रिंदशक्षरानुष्टुप् कौ० २६.१. तै० १ ७ ५५ ता० १० ३ १३ वागनुष्टुप् सर्वाणि छन्दासि तै० १ ७ ५ ५ आनुष्टुभ प्रजापति तै० ३.३ २ १ आनुष्टुभो राजन्य तै० १ ८.८ ता० १८ ८ १४ वागनुष्टुप् ता० ५ ७ १ श० १० ३ १ १ ज्यैष्ठ्य वा अनुष्टुप् ता० ८ १० १० आनुष्टुभि छन्दसा योनि ता० ११ ५ १७ अन्तो वा अनुष्टुप् छन्दसाम् ता० १६ १२ ८. इय (पृथिवी) वा ऽनुष्टुप् ता० ८ ७ २ श० १ ३ २ १६ प्रजापतिर्वा अनुष्टुप् ता० ४ ८.६. आनुष्टुभो वै प्रजापति. ता० ४ ५ ७ आनुष्टभी वै वृष्टि ता० १२ ८ ८ पादावनुष्टुप् ष० २.३ अनुष्टुबेव सर्वम् गो पू० ५१ ५ अनुष्टुब् वै परमा परावत ऐ० ३ १५ या कुहू साऽनुष्टुप्) ऐ० ३ ४७ यस्य ते (प्रजापते) ऽह (अनुष्टुप्) स्व छन्दोऽस्मि ऐ० ३ १३ वाग्वा अनुष्टुप् ऐ० १ २८ वास्त्वनुष्टुप् श० १ ७ ३ १८ सक्थ्यावनुष्टुभ श० ८.६ २ ६ आनुष्टुभैषा (उत्तरा) दिक् श० १३.२ २ १६ अनुष्टुबुदीची (दिक्) श० ८.३ १ १२ आनुष्टुभो वाऽश्व श० १३ २ २ १६ परम वा ऽएतच्छन्दो यदनुष्टुप् १३ ३ ३ १. एषा वै प्रत्यक्षमनुष्टुब् यद् यज्ञायज्ञीयम् (साम) ता० १५.६ १५ सत्यानृते वा अनुष्टुप् तै० १ ७.१० ४ वृषा वै त्रिष्टुब् योषानुष्टुप् ऐ० आ० १ ३ ५ विश्वेदेवा अनुष्टुभ समभरन् जै उ० १ ४ ४ ७]

अनुष्ठाः या अनुतिष्ठन्ति (नद्य) १ ५४ १० [अनु+ष्ठा गतिनिवृत्तौ धातो क प्रत्यय । स्त्रियां टाप्]

अनुष्ठु अनुतिष्ठन्ति यस्मिँस्तत् (अहोरात्र) ६१५ ३

अनुष्ठया आनुकूल्येन ४ ४ १४

अनुष्यदे आनुकूल्येन किञ्चित् प्रस्रवणाय २ १३ २ [अनु+स्यन्दू प्रस्रवणे धातो क्विप्]

अनुष्याम अनुभवेम १ १८५ ४ (अनु+अस भुवि (अदा०) धातोर्लिङ्]

अनुष्वधम् अनुकूल स्वधा अन्न विद्यते यस्मिंस्तम् (सोम=महौषधिरसम्) ३ ४७ १ स्वधाऽन्नस्याऽनुकूलम् (अग्निम्) १७ ८८ अन्वन्नम् ३ ६ ६ स्वधाऽनुगत द्रव्यम् २ ३ ११ स्वधामन्नमनुकूलम् १ ८१.४ स्वधामन्नमनुवर्त्तमानम् (श्रव=श्रवणम्) ५ ५२ १ सर्वेषु पक्वाऽन्नेष्वनुकूलम्, प्र०—अत्र विभक्त्यर्थेऽव्ययीभाव समास ७ ३८ अनुकूल स्वधाऽन्न विद्यते यस्मिंस्तम् (सोमम्) ३ ४७ १ [अनुष्वधम् अन्वन्नम् नि० ४ ८ स्वधा अन्ननाम निघ० २ ७]

अनुसस्रुः प्राप्नुवन्ति ५ ५३ २ [अनु+सृ गतौ धातोर्लिट्]

अनुसंरमध्वम् युद्धाऽऽरम्भ कुरुत ऋ० भू० २२४ आनुकूल्येन सम्यग् युद्धारम्भ कुरुत १७ ३८ [अनु+सम्+रमु क्रीडायाम् (भ्वा०) धातोर्लोट्]

अनुसृष्टान् अनुपङ्क्तिण (पशून्) २४ १६ [अनु+सृज विसर्गे (तुदा०) धातो क्त प्रत्यय]

अनुसेषिधत् पुन पुनरनुकूलान् प्रापयेत्, अन्व—पुन पुनरनुगत प्रापयेत्, प्र०—अत्र यङ्लुगन्ताल्लेट् 'सेधते गतौ, अ० ८ ३ ११३ इत्यभ्यासस्य षत्वप्रतिषेध 'उपसर्गादिति वक्तव्य, किं प्रयोजनम् ? उपसर्गाद् या प्राप्तिस्तस्या प्रतिषेधो यथा स्याद्, अनभ्यासाद् या प्राप्तिस्तस्या प्रतिषेधो मा भूदिति 'स्तम्भुसिवु०' अ० ८ ३ ११६ इत्यत्र महाभाष्यकारेणोक्तम् । सायणाऽऽचार्येणेदमज्ञानान्न बुद्धमिति १ २३ १५ [अनु+षिधू गत्याम् (भ्वा०) धातोर्यङ्लुक् । ततो लेटि रूपम्]

अनुस्तवन्त अनुस्तुवन्ति ४ २२ ७ प्रशसन्ति ३३ ६७ [अनु+ष्टुञ् स्तुतौ (अदा०) धातो शतृ प्रत्यय]

अनुस्थाति अनुतिष्ठति २.३१ ३ [अनु+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुक्]

अनुस्पृश अनुगतो भव १३ १० [अनु+स्पृश सस्पर्शने (तुदा०) धातोर्लोट्]

अनुस्रयाम्णे योऽनुस्र शीत देश याति तस्मै (जनाय) ४ ३२ २४ [अनुस्र+या प्रापणे (अदा०) धातोर्मनिन् प्रत्यय]

अनुहर्षध्वम् अनुमोदध्वम् ऋ० भू० २२४ [अनु+हृष तुष्टौ (दिवा०) धातोर्लोट् व्यत्ययेन शप् आत्मनेपद च]

अनुहृषितम् जातहर्ष (सेनाऽध्यक्षम् १ १०३ ७ [अनु+हृष तुष्टौ (दिवा०) धातो. क्त]

अनुह्वय निमन्त्रय ५ ५३ १६ [अनु+ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०) धातोर्लोट्]

अनूकाशेन अनुप्रकाशेन (अङ्गेन) २५ २ [अनु+काशृ दीप्तौ (भ्वा०) धातोर्भावे घञ् । 'इक काशे' अ० ६ ३ १२३. सूत्रेण पूर्वपदस्य दीर्घत्वम्]

अनूक्यम् अनुकूलता से कहने के योग्य (वचन) स० वि० २०८ अथर्व० ६ ६ १ [अनु+वच् परिभाषणे (अदा०) धातो 'अघ्न्यादयश्च' उ० ४.११२ सूत्रेण यक् । किति सम्प्रसारणे पूर्वरूपे च 'न्यङ्क्वादीना चे' ति कुत्वम्]

अनूचः कपटेनाऽनुकूलान् (शत्रून्) ३ ३० ६ [अनु+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' अ० ३ २.५६ सूत्रेण क्विन् 'अनिदिताम्' इति नलोपे शसि भसञ्ज्ञायाम् 'अच.' इत्यकारलोपे 'चौ' इति दीर्घत्वे रूपम्]

अनूची अन्योऽन्यवर्त्तमाने (रात्र्युषसौ) १ ११३ २ [अनूच्वत् सिद्धि द्विवचने 'नपुसकाच्च' अ० ७ १ १६ सूत्रेण शीभावे रूपम् अनूची अनूच्यौ इतरेतरमभिप्रेत्य नि० २ २०]

अनूचीना यान्यनुचरन्ति तानि (जीविता=जीवनानि) ४ ५४ २. यैरन्वञ्चन्ति जानन्ति तानि (जीविता=कर्माणि) ३३ ५४ [अनूच् प्राति० 'विभाषाञ्चेर्०' अ० ५ ४ ८ सूत्रेण स्वार्थे ख । खस्येनादेश]

अनूज्जेषम् पश्चादुत्कृष्टतया जय कुर्याम्, प्र०—अत्र लिङर्थे लुङडभावो वृद्ध्यभावश्च, अनुगतमुत्कर्षं प्राप्नुयाम् २ १५ [अनु+उत्+जि जये (भ्वा०) धातोर्लुङ् अड्-वृद्ध्यभावौ छान्दसौ]

अनूती अरक्षया ६ २६ ६ [अव रक्षणादिषु (भ्वा०) धातो, 'ऊतियूति०' अ० ३ ३ ९७ सूत्रेण स्त्रियां क्तिन् 'ज्वरत्वर०' सूत्रेण ऊठ् वकारस्योपधायाश्च स्थाने नञ्समास ऊति पदनाम निघ० ४ २]

अनूनम् हीनतारहितम् (अग्नि=विद्वासम्) १ १४६ १. पुष्कलम् (सुश्चन्द्र=ब्रह्मचर्यम्) ४ २ १६ ऊनतारहितम् (सज्जनम्) ६ १७ ४ **अनूना**=पूर्णा (दक्षिणा) ७ २७ ४ **अनूनाः**=न विद्यते ऊनमूनता यासु ता (श्रिय.=शोभा धनानि वा) ३ १ ५ **अनूनेन**=न्यूनतारहितेन रोपेण ४ ५ १. [अव रक्षणादिषु (भ्वा०) धातो 'इणसिञ्जि०' उ० ३ २ सूत्रेण नक् प्रत्यय. । 'ज्वरत्वर०'

सूत्रेण वकारस्योपधायाश्च स्थाने ऊट् । नञ्समासश्च]

अनूनवर्चाः न विद्यते ऊन न्यून वर्चो यस्य स (पुत्र) १२ १०७ [ऊन-वर्चस् पदयोर्नञ्बहुव्रीहि]

अनूनोत् प्रेरयेत ५ ४५ ७ [णु स्तुतौ (अदा०) धातोर्णिचि लुङि रूपम् । [illegible] न छान्दस]

अनूरुत् [illegible] (ईश्वर) ५ ५५ ५ [अनु+रु शब्दे (अदा०) धातो क्विप् कर्त्तरि । पूर्वपदस्य च दीर्घत्वम्]

अनूर्ध्वभासः न ऊर्ध्वा भासो दीप्तिर्यस्य (निन्दितो जनस्य) ५ ७७ ४

अनूषत यथावत् स्तुवन्तु, प्र०—अत्र लोडर्थे लुङ् 'सञ्ज्ञापूर्वको विधिरनित्य', इति गुणाऽभावोऽस्ति १ ७ १ स्तुवत १ ५१ ६ स्तुवन्तु प्र०—अत्र लोडर्थे लुङ् ४ ३२.६ प्रशंसा कुर्वन्ति, अन्व०—प्रशंसन्ते गुरुंति प्र०—अत्र 'णु स्तवने' इत्यस्य लुङ् प्रयोग 'सञ्ज्ञापूर्वको विधिरनित्य' इति गुणाऽभाव, लडर्थे लुङ् च १ ६ ६ स्तुवन्ति, प्र०—अत्र 'अन्येषाम्०,' इति दैर्घ्य व्यत्ययेनाऽऽत्मनेपदञ्च १ १४४ २ प्रशंसन्ति ६ ६० ७ प्रशंसेयु ३ ५१ १ प्रशंसत २० ६६ प्रशंसा कीजिए ७ ५ ४ **अनूषि**=स्तौमि ६ ३८ ३. [णु स्तवने (तुदा०) धातोर्लुङ् । गुणाऽभावो व्यत्ययेनात्मनेपदञ्च । अनूषत=अस्तोषत निघ० ४ १६]

अनूहिरे अनुप्रापयन्ति ऋ० भू० २६०, १६.५१ अनुवहन्ति पुन पुन प्राप्नुवन्ति च १६.५१ [अनु+वह प्रापणे (भ्वा०) धातोर्लिट् 'असंयोगाल्लिट् कित्' इति कित्त्वे यजादित्वात्सम्प्रसारणम्]

अनृक्षरः निष्कण्टक (पन्था =वेदोक्तो मार्ग.) २ २७ ६ कण्टक-गर्तादिदोषरहित, सेतुमार्जनादिभि सह वर्त्तमान सरल, चोरदस्युकुशिक्षाऽविद्याऽधर्माचरणरहित. (पन्था) १ ४१.४ **अनृक्षरा**=अविद्यमाना ऋक्षरा दु ख-प्रदा कण्टकादयो यस्या सा (पृथिवि=भूमि) १ २२ १५ कण्टकगर्त्तादिरहिता (पृथिवी=भूमि) ३६ १३ निष्कण्टका, भा०—क्रूरतादिदोषरहिता (भूमिर्गृहिणी वा) ३५.२१ [न ऋक्षर इति नञ्समास अनृक्षर ऋक्षर कण्टक ऋच्छते । निघ० ६ ३० [ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु (तुदा०) धातो 'ऋच्छेररः' उ० ३ १३१ सूत्रेण अर प्रत्यय । छकारस्य क्षकारश्छान्दस]

अनृजोः कुटिलस्य (दुर्जनस्य) ४ ३ १३ [अर्ज प्रति-यत्ने (चु०) धातो 'अर्जिदृशि०' उ० १ २७ सूत्रेण उ प्रत्यय, 'ऋजि' आदेशश्च नञ्समास अथवा ऋज गतिस्थानार्जनोपार्जनेषु (भ्वा०) धातोरौणादिक [illegible] नञ्समास]

अनृणः [illegible] (जन.) १६ ५५ [illegible] (भ्वा०) [illegible] । [illegible] [illegible] [illegible] । [illegible]]

अनृतम् मिथ्याभाषणम् . १८ ४ [illegible] १ १३६ ८. मिथ्याभाषणादि [illegible] १.१५२ ३ [illegible] १ २३.२२ [illegible] १ २०७.५ [illegible] ६ १७ **अनृतस्य** [illegible] ७.६० ५ [illegible] ५ १२ ४ **अनृता** [illegible] २ २४ ७. मिथ्याभाषणादीनि [illegible] **अनृतान्** न विद्यते [illegible] [illegible] (पृ [illegible]) १ ५ [illegible] [illegible] ८३ १५. [illegible] ६६ **अनृतानि**= मिथ्याचरणानि ३.३५ ६ मिथ्याभाषणानि [illegible] १.१५२ १ मिथ्याभाषणादि [illegible] वि० १०४, २ ३५ ६ **अनृताः** [illegible] (पाखिनो जना) ४ ५ ५ **अनृते** [illegible] ऋ० भू० ६२ अविद्यमानमृत [illegible] १६ ७७ मिथ्या-भाषणादि [illegible] वि० १८,१६ ७७ [ऋ गतिप्रापणयो (भ्वा०) धातो क्त । ऋतमिति सत्य-नाम प्रत्यृत भवति । नि० ७ २४ [illegible] नि० ६ २२ [illegible] सत्यनामम् [illegible], ऊरुनामम् न निषण्णो पतिरिय [illegible] वै पुरुष यदनृत वदति तेन पूतिरन्तरत श० १ १ १ १. सत्यमेव देवा अनृत मनुष्या श० १ १ १ ४ एतद् वाचश्छिद्र यदनृतम् ता० ८ ६ १३ अनृत (वा [illegible]) यदासपति वदति तै० १.७ ५ ३ अनृतं स्त्री शूद्र श्वाकृष्ण शकुनिस्तानि न प्रेक्षेत श० १४ १ १ ३१ अनृतादात्मान जुगुप्सेत् तै० आ० १०.६ १ ओ३मिति सत्य, नेत्यनृतम् ऐ आ० २ ३ ६ ते देवा सत्यम-भवन् अनृतमसुरा मै० १.६ ३ भ्रातृव्यायानृत वदेत् काठ० २७.८ शमल वा एतद् वाचो यदनृतम् काठ० सक० १२ सुवति ह वा अनृत वदतो यशोऽयो ह पूयति जै० १ २५६ आमन्त्रणे नानृत वदेत् . काठ० ८७ अश्रद्धामनृते-ऽधाच्छ्रद्धा सत्ये प्रजापति मै० ३ ११ ६ अनृतेनैव भ्रातृव्यानभिभूय वाच सत्यमवदन्त्येव तै० १ ८ ३ ४.]

अनृतुपाः य ऋतून् पाति स ऋतुपा, न ऋतुपा अनृतुपा (तत्त्वस्वरूपविद् विद्वान्) ३ ५३ ८ [ऋ गतिप्रापणयो (भ्वा०) धातो 'अर्त्तेश्च तु' ३० १ ७२ सूत्रेण उ प्रत्यय किच्च ऋतूपपदे+पा रक्षणे धातोरच् नञ्समासश्च]

अनेजत् न एजते कम्पते तदचलत् स्वाऽवस्थायाश्च्युति कम्पन तद्रहितम् (ब्रह्म=परमेश्वर) ४० ४ [एजृ कम्पने (भ्वा०) धातोर्लेट्। तत्प्रतिषेध। एजति गतिकर्मा निघं० २ १४]

अनेद्यः अनिन्दनीय (मनुष्याणा गण) ५ ६१ १३ प्रशस्य (श्रव=शास्त्रम्, प्र०—अनेद्य इति प्रशस्यनाम निघ ३ ८, १ १६५ १२ प्रशस्य (सेनापति) १ ८७ ४ **अनेद्याः**=अनिन्दनीया (आप्ता पुरुषा) ६ १६ ४ [णिदि कुत्सायाम् (भ्वा०) धातोर्ण्यत् छान्दसो नकारलोप नञ्समासश्च अनेद्य प्रशस्यनाम निघ० ३ ८]

अनेनः अविद्यमानमेन पाप यस्मिंस्तत् (कर्म) ६ ६६ ७ **अनेनाः**=अविद्यमानमेन पाप यस्य स. (विद्वज्जन) १ १२९ ५ निष्पाप (इन्द्र=सज्जन) ७ २८ ४ [इण् गतौ (अदा०) धातो 'इण आगसि' उ० ४ १९८ सूत्रेण असुन् नुडागमश्च नञ्बहुव्रीहि एन एते नि० ११ २४]

अनेशन् नश्ययेयु, प्र०—अत्र 'णश' अदर्शने इत्यस्य धातोर्लुङि रूप 'नशिमन्योरलिट्येत्व वक्तव्यम्, अनेन वार्त्तिकेनाऽत्वम् १९ १० [णश् अदर्शने (दिवा०) धातोर्लुङ् पुषादित्वाद् अङ्। 'नशिमन्योरलिट्येत्व वक्तव्यम्' (वा० ६ ४ १२०) वा० सूत्रेणैकारादेशश्छन्दसि]

अनेषत् स्वीकार करो ३५ १८ [णीञ् प्रापणे (भ्वा०) धातोरात्मनेपदे लेट्]

अनेहसम् अविद्यमानानि एहांसि हननानि यस्मिँस्त (पन्था=मार्गम्) ४ २९ अहन्तव्याम् (नावम्), प्र०—अत्र 'नञि हन एह च, उ० ४ २२४ इति नञ्पूर्वस्य हन्धातो प्रयोग २१ ६ अहन्तव्यम् (पन्था=मार्गम्) ६ ५१ १६ निष्पाप निरुपद्रव स्थिर दृढ सुख रूप भद्र को आर्याभि० १ २९ अहन्तारम् (देव=विद्वासमुपदेशकम्) ३ ९ १ अहिंसनीय सर्वदा रक्षणीय निर्दोषम् (मन्त्रम्=श्रुतिसमूहम्) १ ४० ६ **अनेहसः**=अहिंसका सन्त (मनुष्या) ५ ६५ ५ अहन्तव्यस्य (वसो=धनस्य) ३ ५१ ३ **अनेहसा**=अहिंसामयेन धर्मेण १ १२९ ६ अहिंसके (द्यावापृथिवी=सूर्यभूमी) ६ ७५ १० अविनाशिनौ (द्यावापृथिवी=प्रकाशभूमी) २९ ४७ **अनेहः**=अहन्तव्य (दात्र=दानम्) १ १८५ ३ अहन्तव्य सतत रक्षणीय व्यवहारम् ६ ५० ३ [नञ्युपपदे हन् हिंसागत्यो (अदा०) धातो 'नञि हन एह च' उ० ४ २२४ सूत्रेण असुन् प्रत्यय धातोश्च स्थाने एहादेश]

अनोनवुः स्तुवत १ ८० ९ [णु स्तुतौ (अदा०) धातोर्यङ्लुक् तत सामान्ये लङ्]

सहदानुम् य सहैव ददाति तम् (वृत्र=मेघमिव) १८.६६ दानेन सह वर्त्तमानम् (वृत्रम्) ३ ३० ८ [सहदानुपदयो समास। दानु =डुदाञ् दाने (जु०) धातो 'दाभाभ्या नु' उ० ३ ३२ सूत्रेण नु]

सहदेवः देवै सह वर्त्ततेस (विद्वज्जन) १.१०० १७ [सह-देवपदयो समास]

सहध्यै सोढुम् ६ १ १ [षह मर्षणे (भ्वा०) धातोस्तुमर्थेऽध्यै प्रत्यय]

सहन्तमः अतिशयेन सहा इति सहन्तम (विद्वज्जन) १ १२७ ६ [सहस्प्राति० अतिशायने तमप्। सकारस्य नकारश्छान्दस]

सहन्तः सोढार (विद्वासो राजजना) ५ ८७ ५ [षह मर्षणे (भ्वा०) धातो शतृ]

सहन्ती सहन कुर्वती (विट्=उत्तमा प्रजा) ७ ५६ ५ [षह मर्षणे (भ्वा०) धातो शत्रन्तान् ङीप्]

सहन्त्य सहन्तेषु शान्तेषु भव (अग्ने=दात सद्गृहस्थ) ६ १६ ३३. सहनशील विद्वन् (जन) १ २७ ८ शत्रुओ के समूहो के घातक (ईश्वर) आर्याभि० १ २६, ऋ० ५ ८ ३५ २ [सहन्तप्राति० भवार्थे यत्। सहन्त=षह मर्षणे (भ्वा०) धातोर्बाहु० औणा० झच्]

सहपत्या स्वामिना सह ३७ २० [सह-पतिपदयो समास] 'वोपमर्जनस्ये' ति विकल्पेन न सादेश। छान्दसत्वात् 'पति समास एव' इति न घिसञा। तेन नादेशो न भवति]

सहप्रमाः सहैव प्रमा यथार्थं प्रज्ञान येषान्ते (ऋषय =सत्याऽसत्ये विविच्य सत्य लब्ध्वाऽसत्य हातवन्तो जना) ३४ ४६ [सह-प्रमापदयो समास। प्रमा=माङ् माने शब्दे च (जु०) धातो 'आतश्चोपसर्गे' इत्यङ्]

सहमानम् य सर्व सहते तम् (विद्वज्जनम्) ५ २५ ६ शत्रूणा वेगस्य सोढारम् (राजपुरुषम्) ६ १८ १ **सहमानः**=य सुखदु खादिक सहते (इन्द्र =सेनापति) १७ ३७. **सहमानाय**=वलयुक्ताय (जनाय) १६ २० शत्रून् सोढु शीलाय (इन्द्राय=सभासेनेशाय) २ २१ २ शत्रून् सोढु समर्थाय (रुद्राय=शूरवीराय) ७ ४६ १ [षह मर्षणे (भ्वा०) धातो शानच्। ताच्छील्ये चानश् वा]

सहमाना वलनिमित्ता, भा०—वलवर्द्धिका (ओषधि) १२ ६६ पत्यादीन् सोढुमर्हा (पत्नी) १३ २६. [षह मर्षणे (भ्वा०) धातो शानजन्तात् स्त्रिया टाप्]

सहमूलम् मूलेन सह वर्त्तमानम् (रक्ष =दुष्टाचारम्) ३ ३० १७ [सह-मूलपदयो समास]

सहवत्सा वत्सेन सह वर्त्तमाना (धेनु =दुग्धदात्री गौ) १ ३२ ६ [सह-वत्सपदयो समासे स्त्रिया टाप्]

सहवसुम् वसुभि सह वर्त्तमानम् (नार्मरम्=

सम्भाजक (जातविद्यो जन) ३ २२ १ ददत् (जातवेदा = उत्पन्नविज्ञानविद्वज्जन) १२ ४७ [ससम् अन्ननाम निघ० २ ७ पदनाम निघ० ४ २ ससप्राति० प्रशसायामर्थे मतुप् । ससम्=स्वपनमेतन्माध्यमिक ज्योति नि० ५ ३]

ससवांसम् पापपुण्ययोर्विभक्तारम् (इन्द्र=परीक्षक विद्वज्जनम्) ३ ३४ ८ **ससवांसः**=सुशयाना इव (देवा = विद्वज्जना) ४ ४२ १० सविभक्ता (देवा =विद्वास) ७ १० ये शेरते ते (जना) ४ ८ ६ [षण सभक्तौ (भ्वा०) धातोर्लिट क्वसौ रूपम् । षस स्वप्ने (अदा०) धातोर्वा लिट क्वसु]

ससस्य शयानस्य (मनुष्यस्य) ३ ५ ६ स्वप्नस्य ४ ७ ६ कार्यस्य ५.२१.४ स्वपत (पत्यु) ४ ५ ७ [षस स्वप्ने (अदा०) धातो शतृ । तलोपश्छान्दस]

ससान विभजेत् ३ ३४ ८ सनति विभजति ३ ३१ ७ [षण सम्भक्तौ (भ्वा०) धातोर्लिट्]

ससार समन्ताद् गच्छति ४ ३० ११ [सृ गतौ (भ्वा०) धातोर्लिट्]

ससूव जनयति ४ १८ १० [षूङ् प्राणिगर्भविमोचने (अदा०) धातोर्लिटि 'ससूवेति निगमे' अ० ७ ४.७४ सूत्रेण परस्मैपद वुगागमोऽभ्यासस्य चात्व निपात्यते]

ससृजान स्रष्टा सन् (पूज्यो राजा) ७ ८ २ [सृज विसर्गे (तुदा०) धातो शानच् । व्यत्ययेनात्मनेपद प्रत्ययस्य श्लुश्च सृजधातोर्लिट कानज्वा]

ससृमाणम् भृश गच्छन्तम् (एतशम्=अश्वम्) ४ १७ १४ [सृ गतौ (भ्वा०) धातोर्यङ्लुगताच्छानच् । व्यत्ययेनात्मनेपदम्]

ससृवांसम् सर्व ज्ञानवन्त शिल्पविद्यागुणप्राप्तिमन्त वा (ईश्वर भौतिकमग्निं वा) २ १४ **ससृवांसः**=प्राप्तवन्त (राजपुरुषा) ६ १६ [सृ गतौ (भ्वा०) धातोर्लिट क्वसु]

ससृवांसमिव प्राप्नुवन्तमिव (अग्नि=पावकम्) ३.६ ५ ससृवासम्=[सृ गतौ (भ्वा०) धातोर्लिट क्वसु । ससृवासम्-इवपदयो समास]

ससेन सेनासहित सेनाध्यक्ष (राजन्) १ ५१ ३ [सह-सेनापदयो समासे 'वोपसर्जनस्य' सूत्रेण सादेश']

सस्तः शयान इन्द्र =सुखधर्त्ता राजा) ६ २० १३ [पस स्वप्ने (अदा०) धातोर्बाहु० औणा० क्त]

सस्ताम् शयाताम् पुरुषार्थनाश- प्रापयत १ २९ ३ [षस स्वप्ने (अदा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

सस्तु शेताम् ७ ५५ ५ [षस स्वप्ने (अदा०) धातोर्लोट्]

सस्नितमम् अतिशयेन शुद्ध शुद्धिकारक च तथा शुद्धिहेतु भौतिक वा, अथवा स्वव्याप्त्या सर्वजगद्वेष्टयितारमीश्वर, शिल्पविद्याहेतु व्यापनशील भौतिक वा, प्र०—ष्णा शौचे, अथवा ष्णी वेष्टने इत्यस्य रूपम् १ ८ [सस्निप्राति० अतिशायने तमप् । सस्नि =ष्णा शौचे (अदा०) धातो आदृगमहनजन किकिनौ लिट् च' अ० ३ २ १७१. सूत्रेण किन् । लिड्वत्त्वाद् द्वित्वम् । सस्नि सस्नात मेघम् नि० ५ १]

सस्निना शुचिना (विद्वज्जनेन) २ २३ १० **सस्निम्**= ब्रह्मचर्यव्रतविद्याग्रहणाभ्या पवित्रम् (भा०—राज्यम्) ५ ३५ १ **सस्निः**=शुद्ध (अग्नि =विद्वज्जन) ३ १५ ५ शेते यस्मिन् स (रथ) २ १८ १ [सस्निरिति पूर्वपदे व्याख्यातम् । अथवा षस स्वप्ने (अदा०) धातोर्बाहु० औणा० नि]

सस्मिन् अन्तरिक्षे ७ ३६ ३ सर्वस्मिन्, प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति रेफवकारयोर्लोप १ ५२ १५ स्वस्मिन्, प्र०—अत्र वलोप १ १५२ ६. [सर्वप्राति० स्वप्राति० वा सप्तम्या पृषोदरादिना रूपसिद्धि]

सस्राणः सर्वगुणदोषान् प्राप्नुवन् (विद्वज्जन) १ १४९ २ [सृ गतौ (भ्वा०) धातो शानच् । शप श्लु । व्यत्ययेनात्मनेपदश्च]

सस्राथे प्रापयत १ १५८ १. **सस्रुः**=स्रवन्ति १ ७३ ६ गच्छन्ति १ ५२ ५ प्राप्नुवन्ति ५ ५३ २ **सस्रे**=सरति गच्छति ७ ३६ १ [सृ गतौ (अदा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

सस्रुतः या समान सत्य मार्गं स्रुवन्ति गच्छन्ति ता (वाच) १ १४१ १ गमनशीलान् (विद्वज्जनान्) ४ २८ १ [समानोपपदे स्रु गतौ (भ्वा०) धातो क्विप् । समानस्य सादेशश्छान्दस । सस्रुत नदीनाम निघ० २ २३]

सस्रुषीः प्राप्तव्या (भुव =भूमय) १ ८६ ५ [सृ गतौ (भ्वा०) धातोर्लिट क्वसु । तत स्त्रिया ङीप्]

सस्रोतसः समान मनोरूप स्रोत प्रवाहो यासा ता (वृत्तय) ३४ ११ [समान-स्रोतस्पदयो समास । स्रोतस्=स्रु गतौ (भ्वा०) धातो 'स्रुरिभ्या तुट् च' उ० ४ २०२ सूत्रेणासि । तुडागमश्च]

सस्वजाते स्वजेते, आश्रयत , प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ १६४ २० [ष्वञ्ज परिष्वङ्गे (भ्वा०)

२ २ ११ सहसा बलेन युक्त (राजन्) ७.१६ ८ सहसि भव (विद्वज्जन) १.१४७ ५ य आत्मन सहो बलमिच्छति तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ११ २६ **सहस्यः**= सहसि बले भव पौष १४ २७. [सहस् बलनाम । निघ० २ ९. ततो भवार्थे साध्वर्थे वा यत् । अथवा सहस् पदाद् इच्छायामर्थे क्यजन्ताद् अच् कर्त्तरि । सहस्प्राति० वा 'मत्वर्थे मासतन्वो' सूत्रेण यत् । सहस्य (मास.)—एतौ (सहश्च सहस्यश्च) एव हैमन्तिकौ (मासौ) स यद् हेमन्त इमा प्रजा सहसेव स्व वशमुपनयते तेनो हैतौ सहश्च सहस्यश्च श० ४ ३.१ १८]

सहस्रकेतुम् असङ्ख्यातध्वजम् (रथ=यानम्) १ ११९ १. [सहस्र-केतुपदयो समास । सहस्रम् बहुनाम निघ० ३ १ केतु प्रज्ञानाम निघ० ३ ९]

सहस्रचक्षाः सहस्र चक्षासि दर्शनानि यस्माद्यस्य वा (सूर्य) ७ ३४ १० [सहस्र-चक्षस्पदयो समास । सहस्रम्=बहुनाम निघ० ३ १ चक्षस्=चक्षिङ् व्यक्ताया वाचि, अय दर्शनेऽपि (अदा०) धातोरौणा० असुन्]

सहस्रचेताः असङ्ख्यातविज्ञानविज्ञापन (इन्द्र= सेनाद्यधिपति) १ १०० १२ सहस्रो विज्ञानादि गुणो वाला (ईश्वर) आर्याभि० १.३४, ऋ० १ ७ १०.१२. [सहस्र-चेतस्पदयो समास । चेतस्=चिती सज्ञाने (भ्वा०) धातोरौणा० असुन्]

सहस्रजित् य सहस्राणि शत्रून् जयति स (राजा) १ १८३ १ असङ्ख्यात-विजेता (पावक इव दूत) ५ २६ ६. असहाय सन् सहस्र योद्धॄन् जेतु शील (अग्नि=विद्वान् राजा) ९ २८ [सहस्रोपपदे जि जये (भ्वा०) धातो कर्त्तरि क्विप् । 'ह्रस्वस्य पिति कृति तुगि' ति तुगागम]

सहस्रणीथ सहस्रै रसङ्ख्यैर्धार्मिकैर्नीथः प्राप्त (इन्द्र=राजा) ३ ६० ७ [सहस्र-नीथपदयो समास.। नीथ=णीञ् प्रापणे (भ्वा०) धातो 'हनिकुषिनीरमि०' सूत्रेण क्थन्]

सहस्रदातमम् अतिशयेनाऽसङ्ख्यदातारम् (सूरिं= विद्वास शिल्पिनम्) ६ ४५ ३३ [सहस्रदाप्राति० अतिशायने तमप् । सहस्रदा=सहस्रोपपदे डुदाञ् दाने (जु०) धातो क्विप्]

सहस्रदानः असङ्ख्यप्रद (वसिष्ठ=पूर्णविद्वज्जन) ७ ३३ १२ [सहस्रोपपदे डुदाञ् दाने (जु०) धातो 'कृत्य-ल्युटो बहुलम्' इति कर्त्तरि ल्युट्]

सहस्रदाना असङ्ख्यप्रदाना (राति=दानक्रिया) ३ ३० ७ [सहस्रदानमिति व्याख्यातम् । ततष्टाप् स्त्रियाम्]

सहस्रदाव्नाम् य सहस्रस्याऽसङ्ख्यातस्य दातॄणा मध्ये, प्र०—अत्र 'आतो मनिन्०' अ० ३ २ ७४. अनेन वनिप्-प्रत्यय १ १७ ५. [सहस्र-दावन्पदयो समास । दावन्=डुदाञ् दाने (जु०) धातो 'आतो मनिन्०' इति वनिप्]

सहस्रदाः सहस्रमसङ्ख्य सुख ददातीति (विद्वज्जन) १३ ४० [सहस्रोपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप्]

सहस्रधारम् बहुविध ब्रह्माण्डं धरतीति त यज्ञम् १ ३. [सहस्रोपपदे धृञ् धारणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण्]

सहस्रधारा सहस्राण्यसङ्ख्या धारा प्रवाहा यस्या वाच सा ४ ४१.५ **सहस्रधाराम्**=सहस्रमसङ्ख्यानर्थान् धरति त सर्वज्ञानप्रदाम् (सुमतिं=प्रज्ञाम्) १७ ७४ सहस्र धारा हिरण्यादयो यस्यान्ता यद्वा या सहस्रमसङ्ख्यात प्राणि-जात धरति ता, भा०—सर्वधारिकाम् (मही=भूमिम्) ३३ २८ [सहस्र-धारापदयो समास । सहस्रोपपदे वा धृञ् धारणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण् । ततष्टाप् छान्दस.]

सहस्रपात् सहस्राण्यसख्याता पादा यस्मिन् स, भा०—यस्मिन् पूर्णे परमात्मन्यस्मदादीनामसङ्ख्यातानि पादादीन्यङ्गानि सन्ति स (पुरुष=परमात्मा) ३१ १ [सहस्र-पादपदयो समास । 'सख्यासुपूर्वस्य' इति पादस्य लोप समासान्त]

सहस्रपाथाः सहस्राण्यमितानि पाथास्यन्नादीनि यस्य स (अग्नि=पावक) ७ १ १४ [सहस्र-पाथस्पदयो समास । पाथस्=पा रक्षणे (अदा०)धातो 'उदके थुट् च' उ० ४ २०४ सूत्रेणासुन्]

सहस्रपोषम् असख्यातपुष्टिम्, भा० – असङ्ख्याता-मतुला पुष्टिम् ४.२६. [सहस्र-पोषपदयो समास । पोष= पुष पुष्टौ (दिवा०) धातोर्घञ्]

सहस्रपोष्यम् असङ्ख्यै पोषणीयम् (ब्रह्म=धनम्) ६ ३५ १ [सहस्र-पोष्यपदयो समास । पोष्यम्=पुष पुष्टौ (दिवा०) धातोर्ण्यत्]

सहस्रप्रधनेषु सहस्राण्यसङ्ख्यातानि प्रकृष्टानि धनानि प्राप्नुवन्ति येषु तेषु चक्रवर्त्तिराज्यसाधकेषु महायुद्धेषु १ ७ ४ [सहस्र-प्रधनपदयो समास । सहस्रम् बहुनाम निघ०

अग्निम्) २ १३ ८ [सह-वसुपदयो समास]

सहवीरम् वीरै सह वर्त्तमानम् (रयिं=धनम्) ३ ५४ १३ [सह-वीरपदयो समास]

सहवीराम् वीरैस्सह वर्त्तमाना सेनाम् २७ ६ [सह-वीरपदयो समासे स्त्रिया टाप्]

सहस: ब्रह्मचर्यवलयुक्तस्य (जनकस्य) ५ ३ ६ वलादिगुणै सह वर्त्तमानस्य (ईश्वरस्य विद्युदग्नेर्वा) १ ६८ २ विद्यावलवत (विदुप) १ १४१ १ प्रगस्तवल-युक्तस्य (जनस्य) १ ७४ ५ वलस्य वलवतो वायोर्वा ३ २८ ३ सहनशीलस्य (सज्जनस्य) ६ १२ १ वलिष्ठस्य (पुरुपस्य) १५ ४७ शरीरात्मवलवतो विदुप ६ ५० ६ सहत इति सहो वायुस्तस्य वलरूपस्य १ २६ १० **सहसा**=वलेनोत्साहेन वा ६ ६६ ६ सामर्थ्येनाऽऽकर्पणेन वा १ ५१ १० **सहसे**=वलप्रदाय मार्गशीर्पाय २२ ३१ **सह:**=उत्तम वलम् ३.३८ उदक वल वा ३ ३६ अनन्तसहनस्वरूप अनन्तसहनशक्ति वाला (ईश्वर) आर्याभि० २ ६, १६ ६ वलकारी मार्गशीर्प १४ २७ वलवान् (परमात्मा) १० १५ यस्सहते स (विद्वज्जन) ६ १ १ सहनम् २८ ५ पराभावुक (अग्नि =सभाध्यक्ष) १ ३६ १८ निन्दा-स्तुति और स्वाऽपराधियो को सहन करने वाला (ईश्वर) स० प्र० २४६, १६ ६ सहनस्वभावम् (ब्रह्म) ऋ० भू० १६२, अथर्व० १३ ४ ५० यत सर्व सहते तस्मात् स एवैप सह (ईश्वर) ऋ० भू० ६१, अथर्व० १३ ४ १८ शारीर वलम् १८.३ [षह मर्पणे (भ्वा०) धातोरौणा० असुन् । सह उदकनाम निघ० १ १२ वलनाम निघ० २ ६ सहस वलस्य नि० ५ २५ सहस्प्राति०मत्वर्थे 'लुगकारेकाराश्च वक्तव्या' अ० ४४ १२८ वा०सूत्रेण यत् प्रत्ययस्य लुक् । सह =वल वै सह श० ६ ३ २ १४ एतौ (सहश्च सहस्यश्च) एव हैमन्तिकौ (मासौ) श० ४ ३.१.१८]

सहसस्पुत्र वलस्य पालक (अग्ने=राजन्) ५ ३ ६ वलस्योत्पादक (अग्ने=वैद्यराज विद्वन्) ३ १८ ४ **सहसस्पुत्र:**=वलिष्ठस्य वायो पुत्र इव वर्त्तमान (अग्नि) २.७ ६ [सहस्-पुत्रपदयो समासे पष्ठ्या अलुक् । अयम-प्यग्निरोजसा वलेन मथ्यमानो जायते तस्मादेनमाह सहस-स्पुत्रम् सहस सूनु सहसो यहुम् नि० ८ २]

सहसस्सूनो वलवता पुत्रदुष्टाना हिंसक (अग्ने=राजन्) ३ २४ ३ [सहस्-सूनुपदयो समासात् सम्बुद्धौ रूपम् । पष्ठ्या अलुक्]

सहसानम् य सर्व सहते तम् (राजानम्) ५ २५ ६ **सहसान:**=सहमान (इन्द्र =राजा), प्र०—अत्र वर्ण-व्यत्ययेन मस्य स ४ १७ ३ [षह मर्पणे (भ्वा०) धातो शानच् । वर्णव्यत्ययेन मकारस्य सकार । षह मर्पणे (भ्वा०) धातोर्वा 'ऋञ्जिवृधि०' उ० २ ८७ सूत्रेण असानच्]

सहसावन् सहोऽधिक वल विद्यते यस्य तत्सम्बुद्धौ (राजन्) प्र०—अत्र प्रथमाऽर्थे तृतीयाया अलुक् ३४ २३ वलेन तुल्य (विद्वज्जन) ५ २० ४ अत्यन्तवलवन् (सेना-ध्यक्ष), प्र०—सहसा इत्यव्ययम्, भूमार्थे मतुप् च १ ६१ २३ प्रशस्तवलयुक्त (अग्ने=विद्वज्जन) ३ १ २२ वहु सहो वल सहन वा विद्यते यस्य तत्सम्बुद्धौ (विद्वज्जन) १ १८६ ५ [सहस्प्राति० प्रगसार्थे भूम्न्यर्थे वा मतुप् । समासे प्रथमार्थे तृतीयाया अलुक्]

सहस्विन् वहुवलयुक्त (अग्ने=राजन्) ४ ११ १. [सहस्प्राति० भूम्न्यर्थे छान्दस इनि]

सहसूक्तवाक: ऋग्यजुरादिलक्षणै सूक्तैर्वाकै सह वर्त्तमान (यज्ञ =गृहाश्रम) ८ २२ [सूक्त-वाकपदयो समासे तत सह-पदेन समास]

सहसोमा: सोमेन श्रेष्ठगुणसमूहेन सह वर्त्तमाना इव (गृहपतय =गृहाश्रमिण) ८ ११ [सह-सोमपदयो समास]

सहस्कृत य सहसा करोति तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ६ १६ ३७ सहो वल कृत येन तत्सम्बुद्धौ (अग्ने) १ ४५ ६ **सहस्कृतम्**=य सह सहन करोति कारयति वा तम् (जगदीश्वर भौतिकमग्नि वा) ३ १८ **सहस्कृत:**=सहसा वलेन निष्पन्न (राजा प्रजाजनो वा) ३३ ८३ [सहस्-कृतपदयो समास । सहस् वलनाम निघ० २ ६ वल वै सह श० ६ ३ २ १४]

सहस्तमा अतिशयेन सोढारौ (इन्द्राग्नी=वायु-विद्युतौ) ६ ६० १ [सहस्प्राति० अतिशायने तमप् । ततो द्विवचनस्याकारादेश । सहस् =षह मर्पणे (भ्वा०) धातो-रसुन् औणादिक]

सहस्तोमा: स्तोमै श्लाघाभिस्सह वर्त्तमाना यद्वा सहस्तोमा शास्त्रस्तुतयो येषान्ते (ऋपय =रागद्वेपदोपान् त्यक्तवन्त परस्परस्मिन् प्रीतिमन्तो जना) ३४ ४६ [सह-स्तोमपदयो समास । स्तोम स्तवनात् नि० ७ १२]

सहस्त्रियम् सहप्राप्ता भार्याम् १२ ४७ [सह-स्त्री-पदयो समास]

सहस्य सहसि वले साधो (अग्ने=विद्वज्जन)

वा प्र०—अत्र 'भुज पालनाऽभ्यवहारयो, इत्यस्मात् लडि सिपि 'वहुल छन्दसि' इति शप स्थाने आदिष्टस्य श्नम स्थाने श्लु 'श्लौ' इत्यद्वित्व 'वहुल छन्दसि' इतीडागमश्च १.३३ ६]

अबूबुधत् बोधयेत् १ १६१ १३ [बुध अवगमने (भ्वा०) धातोर्णिचि लुङि च रूपम् 'दीर्घो लघो' रिति दीर्घत्वम् अभ्यासस्य]

अबोधयः बोधयसि १ १०३ ७ बोधय ५ ७६ १. **अबोधि**=बोधयति १ ६२ ११ बुध्यते विज्ञायते १ १५७ १ प्रबुध्यते १५ २४ बुध्यताम् ३ ५६ ४ [बुध अवगमने (भ्वा०) धातोर्णिजन्ताल्लङ्]

अब्जाम् अप्सु जातम् (अहिं=मेघम्) ७ ३४ १६. **अब्जाः**=योऽप प्राणान् जनयति (ब्रह्म जीवो वा) १२ १४ योऽपो जनयति (ईश्वर) १० २४ योऽद्भ्यो जात (जीवात्मा) ४ ४० ५ [अप् उपपदे 'जनी प्रादुर्भावे' धातोर्विट्। नकारस्याकारश्च। अब्जाम् अप्सुजाम् नि० १० ४२ एप (सूर्य) वा अब्जा अद्भ्यो वा एप प्रातरुदेत्यप साय प्रविशति। ऐ० ४ २०]

अब्जिते योऽप्सु जयति तस्मै (इन्द्राय=विद्वत्सभासेनेशाय) २ २१ १ [अप कर्मनाम (निघ० २ १) तदुपपदे जि जये धातो क्विप् तुगागमश्च]

अब्दया येऽपो जलानि ददति ते (मरुत =मानवा) ५ ५४ ३ [अप उदक नाम (निघ० १ १२) तदुपपदे डुदाञ् दाने (जु०) धातो क प्रत्यय। 'सुपा सुलुगि' ति जस स्थाने यादेश]

अब्दः सवत्सर १२ ७४ [अप् उपपदे दा धातो क]

अब्दिमान् जलदवान् (मेघ) ५ ४२ १४ [अब्दप्राति० मतुप् अब्दशब्दस्य अब्दिभाव]

अब्रवम् उक्तवानस्मि १ १०८ ६ ब्रूयाम् ६ ५५ ५ **अब्रवीत्**=ज्ञापयति, प्र०—अत्र लडर्थे लडन्तर्गतो ण्यर्थ, प्रसिद्धीकरण धात्वर्थश्च १ २३ २० ब्रूयादुपदिशेत् १ १६१ १२ ब्रूते १ १६१ १६ **अब्रवीत**=उपदिशत ४ ३५ ३ **अब्रवन्**=ब्रूयुरुपदिशेयु १ १६१ २ ब्रुवन्तु उपदिशन्तु ऋ० भू० १३४, ३१ २१ [ब्रूञ् व्यक्तायां वाचि (अदा० उभ०) धातोर्लङ् 'ब्रुव ईट्' इति हलादौ पितीडागम]

अब्रवीतन उपदिशेत १ १६१ १२ ब्रूयु १ १६१ ८ ब्रूयात् १ १६१ ३ [ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लङि मध्यमवहुवचने तस्य स्थाने 'तप्तनप्तनथनाश्चे' ति तनप्। हलादौ पितीडागम]

अब्रह्मता अधनता ५ ३३ ३ वेदेश्वरनिष्ठारहितता १० २२. [ब्रह्म धननाम। निघ० २ १० ततो भावे तल् प्रत्यय नञ्समास ब्रह्म च वृहि वृद्धौ धातो 'वृहेर्नोऽच्च' उ० ४ १४६ सूत्रेण मनिन् नकारस्याकार. यणादेशश्च]

अब्रह्मा अवेदवित् (दस्यु =दुष्टस्वभावो जन) ४ १६ ६ **अब्रह्माणः**=अचतुर्वेदविद (जना) ७ २६ १ [सिद्धि पूर्वपदे द्रष्टव्या तस्य पुसि 'ब्रह्मा' रूपम् नञ्समास]

अब्राह्मणाः न ब्राह्मणा, अब्राह्मणा, (प्राजापत्याजना), अविद्यमानो ब्राह्मणो येपा ते (प्राजापत्याजना) ३० २२ [ब्रह्मन्प्राति० 'तदधीते तद्वेद' इत्यण्। ब्रह्म वेदस्तधीते वेद वेति ब्राह्मण ब्रह्मणोऽपत्यमिति विग्रहे ब्रह्मन् अण् 'अन' प्रकृतिभावाट्टिलोपो न भवति। नञ्समासश्च समानार्थौ ब्रह्मन्शब्दो ब्राह्मणश्च महाभा० ५ १ १]

अभक्तम् असेवितम् (आयु =जीवनम्) १ १२७ ५ विभागरहितम् (धनादिकम्) ३ ३० ७ [भज सेवायाम् (भ्वा०) धातो क्त। नञ्समास]

अभक्त भजेत ३ ३० १२ **अभक्षि**=सेवे ४ ३१ ५ **अभजत्**=सेवते २ ३८ १ सेवेत १ १४६ ५ भजेत् २ २४ १४ **अभजन्त**=भजन्ति १ ६१ १ भजन्तु १६ ५२ नित्यमानन्द सेवन्ते, प्र०—अत्र लडर्थे लङ् १ २० ८ **अभजः**=सेवेथा ३ ३५ ६ सेवस्व ३ ४७ ३ [भज सेवायाम् (भ्वा० उभ०) धातोर्लुङ् 'झलो झली' ति सिचो लोप 'अभजत्.' 'अभज' इत्येतयो परस्मैपदे, 'अभजन्त' प्रयोगे आत्मनेपदे च लङ्]

अभयन्त डरते है ५ ३० ५ [ञिभी भये (जु०) धातोर् लङ् 'वहुल छन्दसी' ति शप श्लुर्न भवति]

अभयम् भयरहितम् (धार्मिक जनसमूहम्) ४ २६ ३ भयराहित्यम् १८ ६ निर्भयम् (प्राणिसमूहम्) ३६ २२ अविद्यमान भय यस्य यस्माद्वा (सज्जनम्) ६ २८ ४ भयवर्जितम् (ज्योति =प्रकाशम्) २ २७ ११ **अभयानि**=अविद्यमान भय येपु तानि (राज्यप्राणिन) ११ १५ **अभये**=भयरहिते व्यवहारे ३ ३० ५ [ञिभी भये (जु०) धातो 'एरच्' भावे इत्यच् प्रत्यय नञ्समास। 'अज्विधौ भयादीनामुपसख्यानम्' इत्युपसख्यानात् नपुसके ऽप्यच् भवति स्वर्गो वै लोकोऽभयम् श० १२ ८ १ २२]

अभयसनि अभय सनति सम्भजति येन (अपत्यम्)

३ १. प्रधने सग्रामनाम निघ० २.१७]

सहस्रभरम् य सहस्रमसङ्ख्य व्रिभर्त्ति तम् (श्रेष्ठ विजयम्) ६ २० १ [सहस्रोपपदे डुभृञ् धारणपोपणयो (जु०) धातो पचाद्यच्]

सहस्रभृष्टिम् भृष्टयो भर्ज्जनानि दहनानि यस्मात्तम् (वध=दुर्भिक्षम्) ५ ३४ २ सहस्राणा भृज्जक छेदकम् (वज्र =शस्त्रविशेपम्) ६ १७ १० सहस्रमसख्याता भृष्टय पाका यस्मात्तम् (वज्रम्) १ ८५ ६ **सहस्र-भृष्टि:**=सहस्रमसङ्ख्याता भृष्टय पीडा दाहा वा यस्मात् स (वज्र) १ ८० १२. सहस्राणि वहूनि भृष्टय पाका यस्मात् स सूर्यस्य प्रकाश १ २४ [सहस्र-भृष्टिपदयो समास । भृष्टि =भ्रस्ज पाके(तुदा०) धातो स्त्रिया क्तिन् । 'ग्रहिज्या०' इति सम्प्रसारणम्]

सहस्रम् असङ्ख्यातगुणसम्पन्नम् (इन्द्र =सभाध्यक्षम्) १.८० ९ असङ्ख्यम् (जगत्) १ १८८ ८ असङ्ख्याता (स्तोमा =स्तुतय) १ ११ ८ असख्या (रुह.=नाड्य-ड्कुरा) १२ ७६ असख्यमतुल वोधम् १८ ६२ सर्वमिद जगत्सहस्रनामकम् ऋ० भू० ११६, अथर्व० ६ ५ १७ सव ससार को स० वि० २०८, अथर्व० ६ ५.१७ असङ्ख्यगृहाश्रमव्यवहारम् १५ ५५ **सहस्रस्य**=असङ्ख्य-पदार्थयुक्तस्य जगत, असङ्ख्यपदार्थविशेपस्य, असङ्ख्यात-स्थूलवस्तुन १५ ६५. **सहस्राय**=अतुलविज्ञानाय, भा०—पुष्कलविद्यायै १३ ४० [सहस्रम् वहुनाम निघ० ३ १ सहस्रम्=सहस्वत् नि० ३ १० सहस्र—सर्व वै सहस्रम् । श० ४ ६ १ १५ भूमा वै सहस्रम् श० ३ ३ ३ ८. परम सहस्रम् ता० १६ ९ २ तदाहु किं सहस्रमितीमे लोका इमे वेदा अथो वागिति ब्रूयात् ऐ० ६ १५. आयुर्वै सहस्रम् तै० ३ ८ १५ ३ पशव सहस्रम् ता० १६ १० १२]

सहस्रमीळ्हे सहस्राणि मीळ्हानि धनानि यस्मात् तस्मिन् (आजौ=सङ्ग्रामे) १.११२ १० [सहस्र-मीळ्ह-पदयो समास । मीळ्हे सग्रामनाम निघ० २ १७]

सहस्रमुष्क असङ्ख्यवीर्य (इन्द्र=सेनापते) ६ ४६ ३ [सहस्र-मुष्कपदयो. समास । मुष्क =मुप स्तेये (क्र्या०) धातो 'सृवृभूशुषि०' उ० ३ ४१. सूत्रेण कक्]

सहस्रमूति: सहस्रमूतयो रक्षणादीनि यस्मात् स (राजप्रजाजन) १ ५२ २ [सहस्र-ऊतिपदयो समास । ऊति =अव रक्षणगत्यादिपु (भ्वा०) धातो स्त्रिया क्तिन्]

सहस्रम्भर: सहस्रस्य जगतो धर्त्ता पोपको वा (अग्नि =विद्युदादिकार्यकारणस्य स्वरूप) २.९.१. य सहस्रमस्य शुभगुणसमूह विभर्त्ति स (प्राप्तमनुष्यजन्मनर) ११ ३६ [सहस्रोपपदे डुभृञ् धारणपोपणयो (जु०) धातो 'सज्ञाया भृतृवृजि०' अ० ३ २ ४६ सूत्रेण खच् । सहस्र-म्भर=एपा ह वाऽअस्य (अग्ने) सहस्रम्भरता यदेनमेक सन्त वहुधा विहरन्ति ऐ० १ २८]

सहस्रयोजने सहस्राण्यसख्यानि चतुःक्रोशपरिमितानि यस्मिन् देशे तस्मिन् १६ ५४ एतत्सख्यापरिमिते देशे १६ ६३. [सहस्र-योजनपदयो समास । सहस्रम् वहुनाम निघ० ३ १ योजनानि अङ्गुलिनाम निघ० २.५ सहस्र-योजन—(यजु० १६ ५४) अयमग्नि सहस्रयोजनम् श० ९ १ १ २९ एतद्ध परम दूर यत्सहस्रयोजनम् श० ९ १.१ २८]

सहस्ररेता: अतुलवीर्य (विविद्वान्=श्रेष्ठो विद्वज्जन) ४ ५ ३ [सहस्र-रेतस्पदयो समास]

सहस्रवत् सहस्रमसङ्ख्यपरिमाण विद्यते यस्मिँस्तत् (सुवीर्यम्) ३ १३ ७ [सहस्रप्राति० मतुप्]

सहस्रवल्शम् सहस्राण्यसख्या वल्शा अङ्कुरा इव शास्त्रवोधा यस्मिँस्त विज्ञानमय व्यवहारम् ७ ३३ ९. **सहस्रवल्शा:**=यथा वहुमूला वृक्षा रोहन्ति तथा ५ ४३ सहस्राऽङ्कुरा वनस्पतय इवाऽङ्गोपाङ्गै सह वर्त्तमाना (दूर्वादय) ३ ८ ११ [सहस्र-वल्शपदयो समास]

सहस्रवीरम् सहस्राणि वीरा यस्मिँस्तम् (वर्हि = विज्ञानम्) १ १८८ ४ [सहस्र-वीरपदयो समास]

सहस्रवीर्या असङ्ख्यातपराक्रमा, भा०—जितेन्द्रिया (स्त्री) १३ २६ [सहस्रवीर्यपदयो समासे स्त्रिया टाप्]

सहस्रश: असख्याता वहव (रुद्रा =शूरवीरा जना) १६ ६ [सहस्रप्राति० वीप्साया शस्]

सहस्रशीर्षा सहस्राण्यसख्यातानि शिरासि यस्मिन् स (पुरुष =परमात्मा) ३१ १ [सहस्र-शिरस्पदयो समासे शिरस शीर्षन्भाव. 'शीर्षंश्छन्दसि' सूत्रेण]

सहस्रशृङ्ग: सहस्राणि शृङ्गाणि तेजासि किरणा यस्य सूर्यस्य स ७.५५ ७ [सहस्र-शृङ्गपदयो समास । शृङ्गाणि ज्वलतो नाम निघ० १ १७]

सहस्रसातमम् सहस्रमसङ्ख्यात सुख सनुते ददाति येन तदतिशयितम् (द्युम्न=ज्ञानम्), प्र०—'जनसनखन-क्रमगमो विट्' अ० ३ २ ६७ अनेन सहस्रोपपदात् सनोतेर्विट् 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१ अनेन नकारस्या-कारादेश, ततस्तमप् १ ९ ८ असख्याना पदार्थानामतिशयेन विभक्तारम् (सूरि=विद्वास शिल्पिनम्) ६ ४५ ३३.

सहस्रसातमः=य सहस्रमसङ्ख्य सनोति ददाति सोऽतिशयित (अग्नि=महाविद्वज्जन) ३ ३ ६ अतिशयेन सहस्रस्य विभाजक (वाजी=अश्व) १ १७५ १ [सहस्रोपपदपण सम्भक्तौ (भ्वा०) धातो 'जनसनखनक्रमगमो विट्' इति विट्। 'विड्वनोरनुनासिकस्यात्' इत्यात्त्वम्। सहस्रसाप्राति० अतिशायने तमप्]

सहस्रसातमाम् सहस्राणि बहूनि धनानि सुखानि वा सनोति ददाति यया साऽतिशयिता ताम् (ऊर्ति=रक्षा प्राप्तिमवगमञ्च), प्र०—अत्र सहस्रोपपदात् पणु दाने इत्यस्माद्धातो 'जनसन०' इत्यनेन विट् 'विड्वनोरनुनासिकस्यात्' इति नकारस्याकारादेश, ततस्तमप्, ततष्टाप् १ १० १० [सहस्रोपपदे पणु दाने (तना०) धातोर्विट्। ततोऽतिशायने तमप्। ततष्टाप् स्त्रियाम्]

सहस्रसाम् सहस्राणि कार्याणि सनति सम्भजति (यस्तम् अश्व=विद्युतम्) १ ११८ ६ सहस्र वह्वीर्विद्या सनोति तम् (ऋषि=वेदमन्त्रार्थद्रष्टार, शुभगुणोपदेष्टार, सकलविद्याप्रत्यक्षकारिण जनम्) १ १० ११ या सहस्राणि असख्यातानि कार्याणि सनोति ताम् (द्युत=कारणस्था दीप्तिम्) ३ १६ **सहस्रसाः**=य सहस्राणि सनति विभजति स (राजा) ४ ३८ १० य सहस्राणि पदार्थान् सनोति विभजति स (अग्नि) १ १८८ ३ ये सहस्र विद्याविषयान् सनन्ति ते (राजपुरुषा) ६ १७ [सहस्रोपपदे पण सम्भक्तौ (भ्वा०) पणु दाने (तना०) धातोर्वा 'जनसनखनक्रमगमो विट्' अ० ३ २ ६७ सूत्रेण विट्। 'विड्वनोरनुनासिकस्यात्' इत्यात्त्वमनुनासिकस्य]

सहस्रसावे सहस्रस्याऽसख्यस्य धनस्य साव प्रसवो यस्मिन् सङ्ग्रामे ३ ५३ ७ [सहस्र-सावपदयो समास। साव=पु प्रसवैश्वर्ययो (भ्वा०) धातोर्घञ्]

सहस्रस्थूणम् सहस्रमसख्या वा स्थूणा यस्मिँस्तज्जगत्, राज्य, यान वा ५ ६२ ६ **सहस्रस्थूणे**=सहस्राणि स्थूणा स्तम्भा यस्मिँस्तस्मिन् (सदसि=सभास्थाने) २ ४१ ५. [सहस्र-स्थूणापदयो समास। स्थूणा=तिष्ठति छादनादिकमनया सा स्थूणेति विग्रहे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'रास्नासास्नास्थूणावीणा' उ० ३ १५ सूत्रेण न-प्रत्यय आकारस्य ऊकारादेशो निपात्यते। तत स्त्रिया टाप्]

सहस्रा सहस्राण्यसख्यातानि (अवद्विप=शत्रून्) १ १३३ ७ बहुविधा (ऊतय=रक्षा) ४.३१ १०. [सहस्रम् बहुनाम निघ० ३ १ ततश्शेर्लोपश्छन्दसि]

सहस्राक्ष सहस्रेष्वसख्यातेषु व्यवहारेष्वक्षि विज्ञान यस्य तत्सम्बुद्धौ, भा०—असख्यप्राणिशरीराणि प्रविश्यानेकनेत्रादिभिरङ्गै दर्शनादीनि कार्याणि कर्तुं समर्थ (अग्ने=योगिराज) १७ ७१. सहस्रेष्वसख्यातेषु युद्धकार्येष्वक्षिणी यस्य तत्सम्बुद्धौ, भा०—सर्वतो विदितसाम-दाम-दण्ड-भेदादिराजनीत्यवयवकृत्य (सेनाध्यक्ष) १६ १३ **सहस्राक्षः**=सहस्राण्यसख्यातान्यक्षीणि यस्मिन् स (पुरुष=परमात्मा) ३१ १. असख्यदर्शन (अग्नि=मनुष्य) १३ ४७ **सहस्राक्षाय**=सहस्रेष्वसख्यातेषु शास्त्रविषयादिष्वक्षिणी यस्य तस्मै विदुषे ब्राह्मणाय १६ २६ सहस्रेषु भृत्येषु अक्षिणी यस्य तस्मै (सेनापतये) १६ ८. [सहस्र-अक्षिपदयो समास। 'अक्ष्णोऽदर्शनात्' अ० ५ ४ ७६ सूत्रेण 'वा छन्दसि' नियमेन छन्दसि दर्शनार्थेऽपि समासान्तोऽच्]

सहस्राक्षा सहस्राण्यसख्यातानि अक्षीणि साधनानि याभ्यान्तौ (इन्द्रवायू=विद्युत्पवनौ) १ २३.३ [सहस्राक्ष इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

सहस्राक्षरा सहस्राणि असख्यातान्यक्षराणि यस्या सा (विदुषी स्त्री) १ १६४ ४१ [सहस्र-अक्षरपदयो समासे स्त्रिया टाप्। सहस्राक्षरा बहूदका नि० ११ ४०]

सहस्रिणम् सहस्रमसख्यात प्रशस्त सुख विद्यते यस्मिँस्तम् (रयि=धनसमूहम्) १ ६४ १५ सहस्रमसख्याता गुणा विद्यन्ते यस्मिँस्तम् (वाज=बोधम्) १ १२४ १३ सहस्रमसख्या पदार्था विद्यन्ते यस्मिँस्तम् (रयि=धनम्) ४ ४९ ४ सहस्रैर्योद्धृभि सयुक्तम् (वाज=सङ्ग्रामम्) ६ ८ ६ असङ्ख्य वल विद्यते यस्मिँस्तम् (वाज=वेगम्) ३ २२ १ सहस्राण्यसख्यातानि सुखानि यस्मिन् सन्ति तम् (वाज=पदार्थविज्ञानम्), प्र०—'तप सहस्राभ्या विनीनी' अ० ५ २ १०२ इति सहस्रशब्दादिनि प्रत्यय १ ५ ६ **सहस्रिणः**=असख्यातसुखाङ्गयुक्तान् (पदार्थान्) २ २ ७ असख्यपुरुषधनयुक्तस्य (वायो=राज्ञ) ४ ४८ ५ सहस्रमसङ्ख्याता वेगादयो गुणा सन्ति येषान्ते (वायुवेगा) २ ४१ १ **सहस्री**=असङ्ख्य (रयि=धनम्) ७ ४ ६ सहस्राण्यसख्याता उत्तमा मनुष्या पदार्था वा विद्यन्ते यस्य स (सम्राट्=चक्रवर्ती राजा) ७ ५८ ४ सहस्र सर्व सुखमस्मिन्निति स (रयि=श्री) ६ १५ १२ [सहस्रमिति बहुनाम निघ० ३ १ तत 'तप सहस्राभ्या विनीनी' अ० ५ २ १०२ सूत्रेण इनि]

सहस्रिणी सहस्राण्यसख्याता विद्याविषया विद्यन्ते

यस्या सा (वेदचतुष्टयी) ७ १५ ६ असस्या पदार्था दीयन्ते यस्या सा (राति =दानक्रिया) ६ ४५ ३२ **सहस्रिणीभिः**=सहस्राण्यसस्या वेगा विद्यन्ते यासु गतिषु ताभि २८ २८ सहस्राणि वहूनि शूरवीरसङ्घा यासु ताभि (सेनाभि) १ १३५ ३ सहस्राणि प्रशस्तानि पदार्थप्रापणानि विद्यन्ते यासु ताभि (ऊतिभि =रक्षणादिभि) प्र०—अत्र प्रशसार्थ इनि १ ३० ८ **सहस्रिणीः**=असङ्ख्याता (इप =अन्नानि) २ ६ ५ वह्वी (इप) ११८८ २. [सहस्रप्राति० मत्वर्थे 'तप सहस्राभ्या विनीनी' सूत्रेण इनि । तत स्त्रियाम् 'ऋन्नेभ्यो ङीप्' अ० ४१.५ सूत्रेण ङीप्]

सहस्रियम् सहस्रेषु भवम् (प्रजाजनम्) ७ ५६ १४ **सहस्रियः**=सहस्रेणाऽसख्यातेन योद्धृसमूहेन सम्मितस्तुल्य (अग्नि =पावक इव सेनापति) १५ ५२ [सहस्रप्राति० भवार्थे 'समुद्राभ्राद् घ' अ० ४४११८ सूत्रेण घ]

सहस्रियासः सहस्राणि (ऊर्म्मय =तरङ्गा) १ १६८ ८ [सहस्रियमिति व्याख्यातम् । ततो जसो ऽसुगागम]

सहस्व अभिभव, तिरस्कुरु, प्र०—सह अभिभवे इत्यस्य प्रयोग ३ २४ १ वली भव, भा०—वशे नय १२ ६६ क्षमस्व ६ ३७ **सहः**=सहसे, प्र०—लडि मध्यमैकवचनेऽडभाव १ १७४ ८ [पह मर्पणे (भ्वा०) धातोर्लोट् । अन्यत्र लड् । अटोऽभाव । व्यत्ययेन परस्मैपदश्च]

सहस्वत् सहोऽतिशयित सहन विद्यते यस्मिन् तद्यथा स्यात्तथा, (मख =पालनशिल्पाख्यो यज्ञ) प्र०—अत्राऽतिशये मतुप् १ ६ ८ [सहस्प्राति० अतिशायने तमप् । सहस् इति व्याख्यातम्]

सहस्वतः प्रशस्त सहो वल विद्यते यस्मिँस्तस्य (अग्ने) १ ६७ ५ वलवत (सेनेशस्य) २ १३ ११ **सहस्वन्तः**=सह सहन विद्यते येपा ते (जना) प्र०—अत्र भूम्न्यर्थे मतुप् ३ १८ **सहस्वान्**=सहनकर्त्ता (विद्वज्जन) ६ ५ ६ अत्यन्तवलयुक्त (परमेश्वर) ६ २२.१ सहो वहुवल विद्यते यस्य स (इन्द्र =सेनापति) १७ ३७ **सहस्वः**=वहुवलयुक्त, मकलविद्याविद्वा (विद्वज्जन) ३ १४ २ प्रशस्त वलयुक्त (वीरपुरुप) ७ ४४ सोढु शील (वैद्यजन) १.१८६ ४ वहुसहनादिगुणयुक्त (विद्वन्) ५ ६ ७ [सहस्प्राति० प्रशसार्थे भूम्न्यर्थे वा मतुप् । सह वलनाम निघ० २ ६]

सहावा सहन कर्त्ता (राजकर्मचारी) ६ १८ २ य सहैव वनति सम्भजति (देव =विद्वज्जन) ७ ४५ ३ सोढा (भूपति) ३ ४६ ३ [सह =पह मर्पणे (भ्वा०) धातोर् घञर्थे क । सहप्राति० मत्वर्थे, वनिप् । पूर्वस्य महिताया दीर्घ । अन्यत्र सहोपपदे वन सम्भक्तौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' विच् । पूर्वस्य सहिताया दीर्घ, धातोर्नकारस्यात्त्वम्]

सहावान् वलवान् (सेनेश) प्र०—अत्राऽन्येपामपि० दीर्घ १ १७५ ३ सहो वहु सहन विद्यते यस्मिन् स (ओपधिसार) १ १७५ २ [सहप्राति० भूम्न्यर्थे मतुप् । सह.=पह मर्पणे (भ्वा०) धातोरच् । सहम्प्राति० वा मतुप् । वर्णव्यत्ययेन सकारस्याकार । सह वलनाम निघ० २ ६]

सहासः सहनशीला वलवन्त (मरुत =मनुष्या) ७ ३४ २४ [सहप्राति० जसोऽसुक् । सह =पह मर्पणे (भ्वा०) धातोरच्]

सहिष्ठ अतिशयेन सोढा (राजन्) ६ १८ ४ [पह मर्पणे (भ्वा०) धातो कर्त्तरि तृजन्तात् 'तुश्छन्दसि' इष्ठन् । तृचो लोप]

सहीयस अतिशयेन वलयुक्तान् सोढॄन् (नॄन्=मनुष्यान्) १ १७१ ६ अतिशयेन सहनशीलान् वलिष्ठान् (सज्जनान्) ४ ५५ १ **सहीयान्**=अतिशयेन सोढा (वीरजन) १ ६१ ७ [पह मर्पणे (भ्वा०) धातो कर्त्तरि तृजन्तात् 'तुश्छन्दसि' अ० ५ ३ ५६ सूत्रेणातिशायन ईयसुन् । 'तुरिष्ठेमेयस्सु' सूत्रेण तृचो लोप]

सहीयसि याऽतिशयेन सोढ्रि (साध्वि स्त्रि) ५ ७६ २ [सहीयस् इति व्याख्यातम् । तत स्त्रिया ङीवन्तात् सम्बुद्धौ रूपम्]

सहुरिः सहनशील (जन) ७ ५८ ४ सहनस्वभाव (शमादिशुभकर्माचारिजन) २ २१ ३ **सहुरी**=सोढारौ (इन्द्राग्नी=वायुविद्युतौ) ६ ६० १ **सहुरे**=सहनशीलेन्द्र (राजन्) ४ २२ ६ [पह मर्पणे (भ्वा०) धातो 'जसिसहोरुरिन्' उ० २ ७३ सूत्रेण-उरिन्]

सहूतिभिः समाना हूतय आह्वानानि च सहूतयस्ताभि. १ ४५ १० **सहूती**—समाना हूतिराह्वान ययोस्तौ (अग्नीपोमौ=वाय्वग्नी) १ ६३ ६ [समाना-हूतिपदयो समासे समानस्य सादेश । हूति =ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो स्त्रिया क्तिन्]

सहूती समानप्रशसया ७ २७ ४ समानया स्पर्द्धया २ ३३ ४ [समाना-हूतिपदयो समासे समानस्य सादेश ।

हूति =ह्वेञ् स्पर्धायां शब्दे (भ्वा०) धातो स्त्रियां क्तिन्। तत 'सुपां सुलुक्' सूत्रेण टास्थाने पूर्वसवर्णदीर्घश्छान्दस]

सहृदयम् सब के समान हृदय (गृहस्थजन) स० वि० १४१, अथर्व० ३ ३० १ [समान-हृदयपदयो समासे समानस्य सादेशश्छान्दस]

सहोजाः य सहसा बलेन प्रसिद्ध (दूत =जीव) १ ५८ १ य सहसा बलेन जात (इन्द्र =सेनापति) १७ ३७ [सहस् उपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड । वचनव्यत्ययेन सो स्थाने जस् । सह बलनाम निघ० २ ९.]

सहोदाम् बलप्रदम् (इन्द्र=राजानम्) ६ १७ १३ य सहो बल ददाति तम् (इन्द्र=सम्राजम्) ७ ३६ **सहोदाः**=बलप्रदा (राजक्रिया) १.१७४.१० बलप्रद (सभेश) १ १७१ ५ [सहसुपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप् । सह बलनाम निघ० २ ९]

सहोभरिः य सहो बल बिभर्त्ति स (राजा) ५ ४४ ३ [सहसुपपदे डुभृञ् धारणपोषणयो (जु०) धातो 'फलेग्रहिरात्मम्भरिश्च' अ० ३ २ २६ सूत्रे चकारस्यानुक्तसमुच्चयार्थकत्वाद् इन्]

सहोवृधम् य सहसा बलेन वर्धते त, बलस्य वर्धक वा (आप्त विद्वज्जनम्) ३ १० ९ सहो बल वर्धयतीति सहो वृधम् (अग्नि=सर्वाभिरक्षकमीश्वरम्) १.३६ २ [सहस् उपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

सहौजसः ओजसा बलेन सह वर्त्तमाना (स्त्रिय) १० ४ [सह-ओजस्पदयो समास]

सह्यसः सहीयसोऽतिशयेन बलवत (विद्वज्जनस्य) १.१२० ४ [प्र०—अत्र सहधातोरसुन् ततो मतुप् । तत ईयसुनि विन्मतोर्लुगिति मतुब्लोप । टेरिति टिलोप । छान्दसो वर्णलोपो वेतीकारलोप]

सह्याः सहन कुर्या १ १५२ ७ [षह मर्षणे (भ्वा०) धातोर्लिङि मध्यमैकवचने रूपम्]

सह्याः सोढु योग्या (दीक्षय) २ ११४ [षह मर्षणे (भ्वा०) धातो शकिसहोश्च' अ० ३ १ ९९ सूत्रेण यत्]

सह्योः सहनशीलस्य (सज्जनस्य) ६ १८ १२ [षह मर्षणे (भ्वा०) धातोर्बाहु० औणा० युच् युन् वा]

संयक्षतः सङ्गच्छत २ ३ ७ [सम्+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्लेटि सिपि प्रथमद्विवचने रूपम्]

संयत् सङ्गति १५ १८ सयम १५ ५ **संयतः**= सयमयुक्ता (प्रजा) ५ ३४ ९ **संयता**=सयमयुक्तेन (विज्ञानेन) १ १५१ ८ सयच्छन्ति येन तेन (द्युम्नेन= धनेन यशसा वा) ६ १६ २१ [सम्+यमु उपरमे (भ्वा०) धातो सम्पदादित्वात् 'अन्येभ्योऽपि दृश्यते' इति वा क्विप् । 'गम क्वौ' अ० ६ ४ ४० इत्यत्र 'गमादीनामिति वक्तव्यम्' इत्यनुनासिकलोपे तुगागम । सयत् सग्रामनाम निघ० २ १७]

संयतम् कृतसयमम् (स्वस्ति=सुखम्) ६ २२ १० **संयतः**=सम्यङ् नियमित (अग्नि =विद्वज्जन) २ २ २ [सम्+यमु उपरमे (भ्वा०) धातो क्त । 'अनुदात्तोपदेश०' अ० ६ ४ ३७ सूत्रेणानुनासिकलोप]

संयती सम्मिलिते (योगक्षेमसाधने) ५ ३७ ५ सयमेन गच्छन्त्यौ द्यावापृथिव्यौ २ १२ ८ [सम्+इण् गतौ (अदा०) धातो शत्रन्तान् ङीप्]

संयद्वसुः यज्ञस्य सङ्गतिकरण १५ १८ [सयत्-वसुपदयो समास]

संयद्वीरम् सयता सयमयुक्ता वीरा यस्मिँस्तम् (अग्न्यादिपदार्थबोधम्) २ ४ ८ [सयत-वीरपदयो समास । पूर्वपदस्यान्त्यलोपश्छान्दस]

संयन्ति प्राप्नुवन्ति २ ३५ ३ सम्यग् गच्छन्ति १ १९० ७ **संयन्तु**=सम्यक् प्राप्नुवन्तु १ १२५ ७ [सम्+इण् गतौ (अदा०) धातोर्लट् । अन्यत्र लोट्]

संयासाय सम्यग् गमनाय ३९ ११ [सम्+यसु प्रयत्ने (दिवा०) धातोर्घञ्]

संयेमुः सम्यक्तया यच्छेयु ३ ३८ ३ [सम्+यमु उपरमे (भ्वा०) धातोर्लिट्]

संयौमि सम्यङ् मिश्रयामि, अग्नौ प्रक्षिप्य वियोजयामि वा १ २२ [सम्+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लट्]

संरभध्वम् सम्यक् प्रारम्भ कुरुत, भा०—मङ्गलान्याचरत ३५ १० **संरभस्व**=सम्यगारम्भ कुरु २७ ५. **संरभेमहि**=सम्यक्तया शत्रुभि सह युध्येमहि १ ५३ ५ [सम्+रभ राभस्ये (भ्वा०) धातोर्लोट । अन्यत्र लिङ्]

सँरराणः सम्यग् दातृशील (प्रजापति =परमेश्वर), प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् 'बहुल छन्दसि' अ० २ ४ ७६ इति शप स्थाने श्लु ८ ३६ सम्यक् सुखानि राति ददाति स (यम =न्यायी सयमी सन्तान) १९ ५१ सम्यग् रममाण, भा०—व्याप्त (प्रजापति =ईश्वर) ३२ ५ सर्वप्राणिभ्योऽत्यन्त सुख दत्तवान् सन् (ईश्वर) ऋ० भू० ४४, ८ ३६ सत्यविद्याया सम्यग् दानकर्त्ता (परमेश्वर) ऋ० भू० २६०, १९ ५१ [सम्+रा दाने

(अदा०) धातो शानच्। व्यत्ययेनात्मनेपदम्। शप श्लुश्च छान्दस]

संरराणे ये सम्यक् सुख रातो दत्तस्ते (द्यावापृथिव्यौ) ६ ७० ६ [सरराण इति व्याख्यातम्। तत स्त्रिया टावन्तात् प्रथमाद्विवचनम्]

संराधयन्तः परस्पर मिल के धन-धान्य राज्य-समृद्धि को प्राप्त होते हुए (गृहस्थादि मनुष्यो) स० वि० १४२, अथर्व० ३ ३० ५ [सम्+राध ससिद्धौ (स्वा०) धातोर्णिजन्ताच्छतृ]

संरायस्पोषेण प्रशस्ताना रायो धनाना भोगपुष्ट्या ३ १६ [सम् रैपदयो समासे तत पोषपदेन सह समास। समासे विभक्तेरलुक्]

संरिणीथः सम्यक्तया हिस्तम् १ ११७ १६ **संरिणाति**=सम्यग्गच्छति ५ ३१ ११ [सम्+रि हिंसायाम् (स्वा०) धातोर्लट्। विकरणव्यत्ययेन श्ना। रिणाति गतिकर्मा निघ० २ १४]

सरिहाणे सम्यगास्वादकर्त्र्यौ (मातरा=मातृ-वद्वर्त्तमानेऽध्यापिकोपदेशिके) ३ ३३ ३ [सम्+लिह आस्वादने (अदा०) धातो शानजन्तात् स्त्रिया टाप्। ततो द्विवचने रूपम्। धातोर्लस्य रेफश्छान्दस]

संरोचते एकीभावेन प्रकाशते ३७ १४ [सम्+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लट्]

संवतः ससेवमान (मनुष्य) ५ १५ ३ सविभक्तान् (अवरान्=नीचाननुत्कृष्टगुणकर्मस्वभावान् नरान्) ११ ७१ विभागवत्य (विषयजन्या व्याधय) १ १६१ १५ **संवतम्**= सम्यग् विभक्ताम् (यानगतिम्) ११ १२ [सम्+वन सम्भक्तौ (भ्वा०) धातो क्त। 'अनुदात्तोपदेश०' अ० ६ ४ ३७ सूत्रेणानुनासिकलोप। सवत सग्रामनाम निघ० २ १७]

संवत्सम् सङ्गत वत्समिव, एकीभूत वात्सल्येन पालित सन्तानम् ४ ३३ ४ [सम्-वत्सपदयो समास]

संवत्सरः क्षणादिलक्षण काल, प० वि०। ऋ० ८ ८.४८ २ सवत्सर इव नियमेन वर्त्तमान (विद्वज्जनो जिज्ञासुर्वा) २७ ४५ द्वादशभिर्मासैरलङ्कृत (वर्ष) १८ २३ **संवत्सराय**=वर्षाय २४ २५ चतुर्थयाऽनुवत्स-राय, प्र०—अत्राऽनो पूर्वपदस्य लोप ३० १५ [सम्+वस निवासे (भ्वा०) धातो 'सपूर्वाच्चित्' उ० ३ ७२ सूत्रेण सरन्। 'स स्यार्धधातुके' अ० ७ ४ ४९ सूत्रेण सकारादावार्धधातुके परतस्तकारादेश। सवत्सर = सवसन्तेऽस्मिन् भूतानि नि० ४ २७ षट्त्रिंश ह वै त्रीणि च शतानि सवत्सरस्याहोरात्रा इति च ब्राह्मण समासेन नि० ४ २७ स ऐक्षत प्रजापति। सर्वं वाऽअत्सारिष य इमा देवता असृक्षीति स सर्वत्सरो ऽभवत् सर्वत्सरो ह वै नामैतद् यत् सवत्सर इति श० ११ १ ६ १२ य स भूताना पति सवत्सर स श० ६ १ ३ ८ सवत्सरो वै प्रजापति श० २ ३ ३ १८ सवत्सरो वै प्रजापतिरेकशतविध. श० १० २ ६ १ सवत्सर प्रजापति ऐ० १ १ ता० १६ ४ १२ गो० उ० ३ ८ तै० १ ४ १० १० स (सवत्सर) एव प्रजापतिस्तस्य मासा एव सह दीक्षिण ता० १० ३ ६ स वै सवत्सर एव प्रजापति श० १ ६ ३ ३५ प्रजापति सवत्सर ऐ० ४ २५ स एष प्रजापतिरेव सवत्सर कौ० ६ १५ सवत्सरो यज्ञ प्रजापति श० १ २ ५ १२ सवत्सरो वै यज्ञ प्रजापति तस्यैत द् द्वार यदमावास्या चन्द्रमा एव द्वारपिधान श० ११ १ १ १ सवत्सरो यज्ञ श० ११ २ ७ १ सवत्सरसमितो वै यज्ञ पञ्च वा ऽऋतव सवत्सरस्य त पञ्चभिराप्नोति तस्मात्पञ्च जुहोति श० ३ १ ४ ५ सवत्सरो वै पञ्चहोता तै० २ २.३ ६ सवत्सरो वाव होता गो उ० ६ ६ सवत्सरो वै होता कौ० २९ ८ सवत्सरो वै धाता तै० १ ७ २ १ पुरुषो वै सवत्सर श० १२ २ ४ १ पुरुषो वाव सवत्सर गो० पू० ५ ३. प्राणो वै सवत्सर ता० ५ १० ३ वाक् सवत्सर ता० १२ १२ ७ वृहती हि सवत्सर श० ६ ४ २ १० तदाहुस्सवत्सर एव मामेति जै० उ० १ ३५ १ सवत्सर स्वर्गाकार तै० २ १ ५ २ अग्नि सवत्सर ता० १७ १३ १७ अग्निर्वाव सवत्सर तै० १ ४ १० १ सवत्सरोऽग्नि श० ६ ३ १ २५ ता० १० १२ ७ सवत्सर एवाग्नि श० १० ४ ५ २ सवत्सर एषोऽग्नि श० ६ ७ १ १८ सवत्सरो वा अग्नि-र्वैश्वानर तै० १ ७ २ ५ श० ६ ६ १ २० सवत्सरोऽग्नि-र्वैश्वानर ऐ० ३ ४१ सवत्सरो वैश्वानर श० ५.२ ५ १५ सवत्सरो वै वैश्वानर श० ४ २ ४ ४ सवत्सरो वै पिता वैश्वानर प्रजापति श० १ ५ १ १६ सवत्सरो वै सोमो राजा (ऋ० ४ ५३ ७) कौ० ७ १० सवत्सरो वै सोम पितृमान् तै० १ ६ ८ २ सवत्सरो वा इन्द्राशुनासीर तै० १ ७ १ १ इन्द्राय शुनासीराय=(सवत्सराय पुरोडाश द्वादशकपाल निर्वपति तै० १ ७ १ १ सवत्सरो वै शुनासीर गो० उ० १ २६ स य स सवत्सरो ऽसौ स आदित्य श० १० २ ४ ३ एष वै सवत्सरो य एष (आदित्य) तपति श० १४ १ १ २७ एष वै मृत्युर्यत्सवत्सर एष हि मर्त्याना-महोरात्राभ्यामायु क्षिणोत्यथ म्रियन्ते श० १० ४ ३ १ सवत्सरो विश्वकर्मा ऐ० ४ २२ सवत्सरो वरुण श०

४ ४ ५.१८ सवत्सरो हि वरुण श० ४ १ ४ १० व्योमा (यजु० १४ १३) हि सवत्सर श० ८ ४ १ ११ सुमेक सवत्सर स्वेको ह वै नामैतद् यत् सुमेक इति श० १ ७ २ २६ सवत्सरो वै समस्त सहस्रवास्तोकवान् पुष्टिमान् ऐ० २ ४१ सवत्सरो वै परिक्षित्। सवत्सरो हीमा प्रजा परिक्षेति सवत्सर हीमा प्रजा परिक्षियन्ति ऐ० ६ ३२ सवत्सरो वै परिक्षि। सवत्सरो हीद सर्व परिक्षियतीति गो० उ० ६ १२ सवत्सरो वै प्रवत शश्वीतीरप ता० ४ ७ ६ सवत्सरो वज्र श० ३ ६ ४ १६ सवत्सरो हि वज्र श० ३ ४ ४ १५ सवत्सरो यजमान श० ११ २ ७ ३२ अभ्रातृव्या तत्सवत्सर ऐ० ५ २५ कौ० २७ ५ अग्निष्टोम उक्थ्योऽग्निर्ऋतु प्रजापति सवत्सर इति। एतेऽनुवाका यज्ञक्रतूनामृतूनाञ्च सवत्सरस्य च नामधेयानि तै० ३ १० ४ सवत्सरो वै देवाना जन्म श० ८ ७ ३ २१ सवत्सर खलु वै देवाना पू तै० १ ७ ७ ५ तस्य (सवत्सरस्य) वसन्त एव द्वार हेमन्तो द्वार त वा एत सवत्सर स्वर्ग लोक प्रपद्यते श० १ ६ १ १६ सवत्सर सुवर्गो लोक तै० २ २ ३ ६ श० ८ ४ १ २४ ता० १८ २ ४ मध्ये ह सवत्सरस्य स्वर्गो लोक श० ६ ७ ४ ११ सवत्सरो वाव नाक षट्त्रिंशस्तस्य चतुर्विंशतिरर्धमासा द्वादशमासास्तद्यत्तमाह नाक इति न हि तत्र गताय कस्मै च नाक भवति श० ८ ४ १ २४ सवत्सरो वै देवाना गृहपति ता० १० ३ ६ एक वा एतद् देवानामह। यत् सवत्सर तै० ३ ९ २२ १. सद्यो वै देवाना सवत्सर ता० १६ ६ ११ इमऽउ लोका सवत्सर श० ८ २ १७ १७ सर्व वै सवत्सर श० १ ६ १ १६ सवत्सर इद सर्वम् श० ८ ७ १ १ सवत्सरो वा ऽऋतव्या (इष्टका) श० ८ ६ १.४ ऋतव सवत्सर तै० ३ ९ ९ १ ऋषभो वा एष ऋतूनाम्। यत् सवत्सर। तस्य त्रयोदशो मासो विष्टपम् तै० ३ ८ ३ ३ त्रयो वा ऽऋतव सवत्सरस्य श० ३ ४ ४ १७ त्रेधा विहितो वै सवत्सर कौ० १९ ३ पञ्चर्तव सवत्सरस्य श० १ ५ २ १६ षड् वा ऽऋतव सवत्सरस्य श० १.२ ५ १२. सप्तार्तव सवत्सर श० ६ ६ १ १४ द्वादश वा वै त्रयोदश वा सवत्सरस्य मासा श० २ ९ ३ २७ सवत्सरस्य प्रतिमा वै द्वादश रात्रय तै० १ १ ६ ७ त्रयोदश वै मासा सवत्सरस्य श० ३ ६ ४ २४ एतावान् वै सवत्सरो यदेष त्रयोदशो मासस्तदत्रैव सर्व सवत्सर आप्तो भवति कौ० १९ २ एतावान् वै सवत्सरो यदेष त्रयोदशो मासस्तदत्रैव सर्व सवत्सर आप्तो भवति कौ० ५ ८ स एष सवत्सर प्रजापति षोडशकल श० १४.४ ३.२२ सवत्सर सप्तदश ता० ६ २ २ सप्तदशो वै सवत्सरो द्वादशमासा पञ्चर्तव श० ६ २ २ ८ सवत्सर एव सप्तदशस्यायतन द्वादशमासा पञ्चर्त्तव एतदेव सप्तदशस्यायतनम् ता० १० १ ७ द्वादश वै मासा सवत्सरस्य पञ्चर्तव एष एव प्रजापति सप्तदश श० १.३ ५ १० सप्तदशो वै प्रजापतिर्द्वादशमासा पञ्चर्तवो हेमन्तशिशिरयो समासेन तावान्त्सवत्सर। सवत्सर प्रजापति ऐ० १ १ सवत्सरो वाव प्रतूर्तिरष्टादश (यजु० १४ २३) तस्य द्वादशमासा पञ्चर्तव सवत्सर एव प्रतूर्त्तिरष्टादशस्तद्यत्तमाह प्रतूर्त्तिरिति सवत्सरो हि सर्वाणि भूतानि प्रतिरति श० ८ ४ १ १३ सवत्सरो वाव तपो नवदश (यजु० १४ २३) तस्य द्वादश मासा षड् ऋतव सवत्सर एव तपो नवदशस्तद्यत्तमाह तप इति सवत्सरो हि सर्वाणि भूतानि तपति श० ८ ४ १ १४ सवत्सरो वाव वर्चो द्वाविंश (यजु० १४ २३) तस्य द्वादशमासा सप्तर्तवो द्वेऽअहोरात्रे सवत्सर एव वर्चो द्वाविंशस्तद् यत्तमाह वर्च इति सवत्सरो हि सर्वेषा भूताना वर्चस्वितम श० ८ ४ १ १६ सवत्सरो वाव सम्भरणस्त्रयोविंश (यजु० १४ २३) तस्य त्रयोदश मासा सप्तर्तवो द्वेऽअहोरात्रे सवत्सर एव सम्भरणस्त्रयोविंशस्तद् यत्तमाह सम्भरण इति सवत्सरो हि सर्वाणि भूतानि सम्भृत श० ८ ४ १ १७ चतुर्विंशो वै सवत्सर ता० ४ १० ५ चतुर्विंशत्यर्धमासो वै सवत्सर ऐ० ८ ४ सवत्सरो वाव गर्भा पञ्चविंशस्तस्य चतुर्विंशतिरर्धमासा सवत्सर एव गर्भा पञ्चविंश श० ८ ४ १ १९ सवत्सरो वाव प्रतिष्ठा त्रयस्त्रिंश (यजु० १४ २३) तस्य चतुर्विंशतिरर्धमासा षड् ऋतवो द्वे ऽहोरात्रे सवत्सर एव प्रतिष्ठा त्रयस्त्रिंशस्तद्यत्तमाह प्रतिष्ठेति सवत्सरो हि सर्वेषा भूताना प्रतिष्ठा श० ८ ४ १ २२ सवत्सरो वाव ब्रध्नस्य विष्टप चतुस्त्रिंशस्तस्य चतुर्विंशतिरर्धमासा सप्तर्त्तवो द्वे अहोरात्रे सवत्सर एव ब्रध्नस्य विष्टप चतुस्त्रिंश (यजु० १४ २३) श० ८ ४ १ २३ सवत्सरो वाव विवर्त्तोऽष्टाचत्वारिंश (यजु० १४ २३) षड्विंशतिरर्धमासास्त्रयोदशमासा सप्तर्तवो द्वे अहोरात्रे तद्यत्तमाह विवर्त्त इति सवत्सराद् हि सर्वाणि भूतानि विवर्त्तन्ते श० ८ ४ १ २५ त्रीणि वै षष्टि शतानि सवत्सरस्याह्नाम् कौ० ११ ७ त्रीणि च ह वै शतानि षष्टिश्च सवत्सरस्याहोरात्राणि गो० पू० ५ ५ एतावान् वै संवत्सरो यदहोरात्रे कौ० १७ ५ विरूप (नानारूप) सवत्सर ता० १४ ९ ८ यस्मादेषा समाना सती षडह विभक्तिर्नानारूपा तस्माद् विरूप सवत्सर

ता० १० ६ ७ पडहो वा उ सर्व सवत्सर कौ० १९ १० नवाहो वै गवत्सरम्य प्रतिमा प० ३ १२ सवत्सरस्य प्रतिमा या (एकाष्टकारूपा) त्वा रात्रि यजामहे म० २२ १८ सवत्सरस्य या पत्नी (एकाष्टकारूपा) सा नो अस्तु सुमङ्गली (अथर्व० ३ १० २) म० २२ १६ एपा वै सवत्सरस्य पत्नी यदेकाष्टका ता० ५ ९ २ मुख वा एतत् सवत्सरस्य यत्फाल्गुनी पौर्णमासी कौ० ४ ४ ता० ५ ९ ८ गो० उ० ११९ मुख (सवत्सरस्य) उत्तरे फल्गुन्यौ पुच्छ पूर्वे गो० उ० ११९ एपा ह सवत्सरस्य-प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी श० ६ २ २ १८ एषा वै प्रथमा रात्रि सवत्सरस्य यदुत्तरे फाल्गुनी तै० १ १ २ ९ एपा वै जघन्या रात्रि सवत्सरस्य यत्पूर्वे फाल्गुनी तै० १ १ २ ९ किं नु ते मयि (सवत्सरे) इति । अयम्म आत्मा स (आत्मा) मे त्वयि (सवत्सरे) जै० उ० ३ २४ ८ आत्मा वा एप सवत्सरस्य यद् विपुवान् ता० ४ ७ १ आत्मा वै सवत्सरस्य विपुवानङ्गानि पक्षौ=(दक्षिण पक्ष उत्तर पक्षश्च) गो० पू० ४ १८ आत्मा वै सवत्सरस्य विपुवानङ्गानि मासा श० १२ २ ३ ६ अथ ह वा ऽएप महासुपर्ण एव यत् सवत्सर । तस्य यान् पुरस्ताद्विपुवत पण्मासानुपयन्ति सोऽन्यतर पक्षोऽथ यान् पडुपरिष्टात्सो-ऽन्यतर आत्मा विपुवान् श० १२ २ ३ ७ सवत्सरो वै व्रत तस्य वसन्त ऋतुर्मुख ग्रीष्मश्च वर्पाश्च पक्षौ शरन्मध्य हेमन्त पुच्छम् ता० २१ १५ २ तस्य (सवत्सरस्य) वसन्त शिर तै० ३ ११ १० २ वर्पा उत्तर (पक्ष सवत्सरस्य) तै० ३.११ १० ३ वर्पा पुच्छम् (सवत्सरस्य) तै० ३ ११ १० ४. सवत्सरे सवत्सरे वै रेत सिक्त जायते ऐ० ४ १४. सवत्सरे सवत्सरे वै रेत सिक्तिर्जायते कौ० १९ ९. सवत्सरो वै प्रजननम् गो० पू० २ १५ सवत्सर हि प्रजा पशवोऽनुप्रजायन्ते ता० १० १ ९ तस्माद् सवत्सर ऽएव स्त्री वा गौर्वावडवा वा विजायते श० ११ १ ६ २ सवत्सर ऽएव कुमारो व्याजिहीर्पति श० ११ १ ६ ३ तस्मात्सवत्सर-वेलाया प्रजा (शिशव) वाच प्रवदन्ति श० ७ ४ २ ३८ चक्षुर्वा एतत् सवत्सरस्य यच्चित्रापूर्णमास ता० ५.९ ११ प्रजापतेर्ह वै प्रजा ससृजानस्य पर्वाणि विसस्रसु । स वै सवत्सर एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयो सन्धी पौर्णमासी चामावास्या चर्त्तुमुखानि श० १ ६ ३ ३५ सवत्सरोऽसि नक्षत्रेपु श्रित । ऋतूना प्रतिष्ठा तै० ३ ११ १ १४ (नक्षत्राणि) सवत्सरस्य प्रतिष्ठा तै० ३ ११ १ १३ तस्मादाहु सवत्सर सर्वे कामा इति श० १० २ ४ १ सवत्सरो वै सर्वस्य शान्ति ता० ९ ८ १३]

संवत्सरीणम् य सवत्सर भृतस्तम् (परमात्मानम्), प्र०='सम्परिपूर्वात् ख च' अ० ५ १ ९२ इति भृतार्थे ख १७ १३ [सवत्सरप्राति० 'सपरिपूर्वात् ख च' अ० ५ १ ९२ सूत्रेण निर्वृत्त अधीष्ट-भृत-भूत-भाव्यादिपु ख । खस्येनादेश]

संवदध्वम् सम्यक् सवाद प्रश्नोत्तर प्रीति ने करो स वि० १८७, १० १९१ २ सङ्गता भूत्वा परस्पर जल्पवितण्डादिविरुद्धवाद विहाय सम्प्रीत्या प्रश्नोत्तरविधानेन सवाद कुरुत ऋ० भू० ९२, १० १९१ २ [सम्+वद व्यक्ताया वाचि (भ्वा०) धातोर्लोट्]

संवननेन सम्यक्तया धर्मकृत्य के सेवन के साथ स० वि० १४३, अथर्व० ३ ३० ७, [सम्+वन सम्भक्तौ (भ्वा०) धातोर्ल्युट् । सवननप्राति० टा]

सवपामि सम्यग् विस्तारयामि १ २१ [सम्+डुवप बीजसन्ताने (भ्वा०) धातोर्लट्]

संवयन्ती प्रापयन्त्यौ (उपासानक्ता) २० ४१ [सम्+वय गतौ (भ्वा०) धातो शत्रन्तात् ङीप्]

संवयन्ती निर्मिमाना (उपासानक्ता=रात्रिदिने) २ ३ ६ [सम्+वेञ् तन्तु सन्ताने (भ्वा०) धातो शत्रन्तात् ङीप्]

संवरणस्य स्वीकृतस्य (राय=धनस्य) ५ ३३ १० **संवरणात्**=सम्यक् स्वीकरणात् ७ ३ २ सम्यक्तया-ऽऽच्छादनात् १५ ६२ **संवरणेषु**=आच्छादकेपु व्यवहारेपु ४ २१ ६ [सम्+वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्ल्युट्]

संवर्च्चसा सङ्गत्या विद्याध्ययनप्रकाशनेन ३ १९ [सम्-वर्चसपदयो समास । वर्चस्=वर्च दीप्तौ (भ्वा०)+असुन्]

संवर्तयन्तः सम्यग् वर्त्तमाना (किरणा) ५ ४८ ३ [सम्+वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताच्छतृ]

संवव्रत्वत् सवरणशीलम् (तम) ५ ३१ ३ [सम्+वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्वा छान्दस रूपम्]

सवसाना. सम्यगाच्छादका (स्वसार=अङ्गुलय.) ४ ६ ८ **संवसानौ**=सम्यक् सुवस्त्रालङ्कारेणाच्छादितौ (विवाहितौ स्त्रीपुरुपौ) १२ ५७ [सम्+वस आच्छादने (अदा०) धातो शानच्]

संवाक् विनयपुरुषार्थयो सम्यक प्रकाशिनी वाणी, राजनीतिनिष्ठा सम्यग् वाणी, भा०—यस्य वाणी सर्वदा

सत्याऽस्ति स सम्राट् ६ १२ [सम्-वाच्पदयो समासः। वाच्=वच परिभाषणे (अदा०) धातो 'क्विब्वचिप्रच्छ्यायतस्तु०' अ० ३ २ १७८ वा०सूत्रेण क्विप् दीर्घोऽसम्प्रसारणञ्च]

संवाजेभिः श्रेष्ठतया विज्ञानादिगुणै सङ्ग्रामैर्वा १ ५३ ५ [सम्-वाजपदयो समासे भिस ऐस् न भवति छन्दसि। वाजे सङ्ग्रामनाम निघ० २.१७]

संवाजैः सम्यग् युद्धैरन्नैर्विज्ञानैर्वा १ ४८ १६ [सम्-वाजपदयो समास । वाज अन्ननाम निघ० २ ७ बलनाम निघ० २ ९ वाजे सङ्ग्रामनाम निघ० २ १७]

संवावशन्त सम्यक्तया पुन पुन प्रकाशयन्त (नर =मनुष्या) १ ६२ ३ [सम्+वाशृ शब्दे धातोर्यङ्लुगन्ताच्छतृ । 'बहुल छन्दसीति वक्तव्यम्' अ० ७ ३ ८७ वा०सूत्रेणोपधाया ह्रस्वत्वम् । धातूनामनेकार्थकत्वादत्र प्रकाशनेऽर्थे]

संविक्थाः एकीभावेन चल, अ०—विचल, प्र०—ओविजी भयचलनयो इत्यस्माल्लोटर्थे लट्, लटि मध्यमैकवचने 'बहुल छन्दसि' इति विकरणाभावश्च १ २३ भय कम्पन च कुर्य्या ६ ३५ [सम्+ओविजी भयचलनयो (तुदा०) धातोर्लङ् । अटोऽभावो विकरणस्य लुक् च छन्दसि]

संवित् प्रतिज्ञा १८ ७ [सम्+विद ज्ञाने (अदा०) धातो सम्पदादित्वात् क्विप्]

संविदधातु समाधन विधान करोतु २ २४ [सम्+वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्]

संविदानः प्रतिजानन् (सुमन्तान) १९ ५४. सम्यग् विज्ञान कुर्वन् (विद्वज्जन) ७ ४४ ४ सम्यग् ज्ञाता सन् (सोम =चन्द्रलोक) ऋ० भू० १३८, ऋ० ६ ४ १३ ३ सम्यग् ज्ञापयन् (प्रजापति =परमेश्वर) १२ ६१. **संविदानाः**=सम्यक् कृतप्रतिज्ञा (अ०—विद्वासो जना) १५ १३ सम्यग् विचारशीला (विद्वज्जना) १५ ११. समाननिश्चयाः (विद्वासो जना) १५ १० सम्यग् लब्धज्ञान (विद्वज्जना) १५ १२ [सम्+विद ज्ञाने (अदा०) धातो शानच् । 'समो गमादिषु विदिप्रच्छिस्वरतीनामुपसङ्ख्यानम्' अ० १ ३ २९ वा०सूत्रेणात्मनेपदम्]

संविदाना सम्यक् कृतप्रतिज्ञा (निर्ऋति=स्त्री) १२ ६३. **संविदाने**=सम्यग् विज्ञाननिमित्ते, भा०—सविदितक्रिये (धनुर्ज्ये) २९ ४१ प्रतिज्ञापालिके (योषा=पत्न्यौ) ६ ७५ ४ सम्यग् विज्ञापिके (उषासा=प्रात. सायवेले) २९ ६ [सविदान इति व्याख्यानम् । तत स्त्रिया टाप]

संविदुः सम्यक्तया जानन्ति ५ ४४.११. **संविद्युः**=एकीभावेन विदन्ति, अ०—अत्र लडर्थे लिङ् १ ७३.२४ **संविदाम्**=सम्यक्तया विदताम्, अ०—विद ज्ञाने इत्यस्माल्लोटि प्रथमबहुवचने 'लोपस्त आत्मनेपदेषु' अ० ७ १.४१. अनेन तकारलोपे सवर्णदीर्घे विसर्गेति रूपम् ६.३६ **संविदेय**=एकीभावेन विन्देय ४ २३ [सम्+विद ज्ञाने (अदा०) धातोर्लटि 'विदो लटो वा' इति सूत्रेण निपादीन णलादय आदेशा । अन्यत्र लिट् । 'सविदाम्' प्रयोगे विद ज्ञाने (अदा०) धातो सम्पूर्वकात् लोटि 'समो गमादिषु विदिप्रच्छिस्वरतीनामुपसङ्ख्यानम्' इत्यात्मनेपदे 'लोपस्त आत्मनेपदेषु' इति तलोपे रूपम् । सविदेय=सम्+विदॢ लाभे (तुदा०) धातोर्लिङ् । सुपभावश्छान्दस]

संविविक्तः सम्यक् पृथक् कुर्वन (परमेश्वरस्य) ३ ५४ ८ [सम्+वि+विजिर् पृथग्भावे (जु०) धातो क्त.]

संविव्यानः सम्यग् व्याप्नुवन् (राजा) ५ २९ ४. सम्यक् प्राप्नुवन् (इन्द्र =विद्वज्जन) १.१३० ४ [सम्+व्येञ् संवरणे (भ्वा०) धातो शानच् । सप. लुश्च छान्दस·]

संविव्ये सवृणोति १.१७३ ६ **संविव्ययुः**=सम्यग्वेष्टयतम् ६ ७२ ५ [सम्+व्येञ् संवरणे (भ्वा०) धातोर्लिट्]

संविशस्व एकीभावेन विशस्व १४ ३ [सम्+विश प्रवेशने (तुदा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

संविश्वतुरा सम्यक्तया यद् विश्व सर्व तुरति त्वरयति तेन (गवा) १ ४८ १६. [विश्वोपपदे तुर त्वरणे (जु०) धातो कर्त्तरि क्विप् । तत सुप्पदेन समास । ततष्टा प्रत्यय]

संवृक् य संवृक्ते स (विद्वज्जन) ३८ २८ य सम्यग् वर्जयति स (इन्द्र =सूर्यलोक) २ १२ ३ [सम्+वृजी वर्जने (अदा०) धातो कर्त्तरि क्विप्]

संवेशपतये सम्यग् विशन्ति ये ते पृथिव्यादय पदार्थास्तेषा पति पालकस्तस्मै (अग्नये=परमेश्वायर भौतिकाय वा) २.२०. [सवेश-पतिपदयो समास. । सवेश =सम् विश प्रवेशने (तुदा०) धातो कर्त्तरि 'कर्मण्यण्' इत्यण्]

संव्रता सत्यभाषणादीनि १२ ५८ [सम्+व्रतपदयो समासे शेर्लोपश्छन्दसि]

संशराय सम्यग्घिसनाय ३० १७ [सम्+शॄ हिंसायाम् (क्र्या०) धातो 'ऋदोरवि' ल्यप्]

संशाय सम्यक् सूक्ष्मबलान् कृत्वा १८ ७१ [सम्+शो तनूकरणे (दिवा०) धातो क्त्वा]

संशितम् सम्यक् तीक्ष्णवुद्धिस्वभावम् (राजानम्) २७ ८ प्रशंसनीयम् (ब्रह्म=वेदविज्ञानम्) ११ ८१ **संशितः**=सम्यक् सूक्ष्मीकृत (रथ) २३ १४ स्तुत (हय=अश्व) २३ १४ [सम्+शो तनूकरणे (दिवा०) धातो क्त । 'शाच्छोरन्यतरस्याम्' अ० ७ ४ ४१ सूत्रेणेकारान्तादेश]

संशिशातु सम्यक्तया क्षयतु, प्र०—अत्र शो तनूकरणे इत्यस्मात् श्यन 'बहुल छन्दसि' श्लु, तत 'श्लौ' इति द्वित्वम् १ १११ ५ **संशिशीतम्**=सम्यक् तीक्ष्णीकुर्याताम् २ ३९ ७ **संशिशीमहि**=शत्रून् सूक्ष्मान् जीर्णान् कुर्म, प्र०—अत्र शो तनूकरणे इत्यस्माल्लटि श्यन स्थाने व्यत्ययेन श्लु 'छन्दस्युभयथा' इति श्लोरार्धधातुकत्वादाकारादेश ११०२ १० **संश्यतु**=सम्यक् तनूकरोति ११३० ४ [सम्+शो तनूकरणे (दिवा०) धातोर्लोट् । 'बहुल छन्दसीति' श्लु । 'बहुल छन्दसि' अ० ७ ४ ७८ सूत्रेणाभ्यासस्येत्वम् । सशिशीतम् प्रयोगे 'छन्दस्युभयथे' त्यार्धधातुकसञ्ज्ञाया धातोराकारादेशे 'ई हल्यघो' अ० ६ ४ ११३ सूत्रेण हलादौ सार्वधातुके क्ङिति आत ईकारादेश । सशिशीमहि प्रयोगे लटि शप श्लौ व्यत्ययेनात्मनेपदम् । 'छन्दस्युभयथा' इत्यार्धधातुकत्वादात्त्वम् । सार्वधातुकत्वाच्चेत्वम् । सश्यत् प्रयोगे लङ् । 'ओत श्यनि' इत्याकारलोप । अडभावश्छान्दस]

संशिशाधि सम्यक् शिक्षस्व, भा०—एतान् दुर्व्यसनेभ्यो निवर्तयेत् सुशीलान् सम्पादयेत् २७ ८ सम्यक्तया शिक्षय ६ १५ ९ [सम्+शासु अनुशिष्टौ (अदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु । अभ्यासस्येत्वम् 'बहुल छन्दसि' अ० ७ ४ ७८ सूत्रेण]

संसत् सम्राट्-सभा ४ १ ८ **संसदः**=सम्यक् सीदन्ति यासु ता (सभा) २९ १ **संसदि**=ससीदन्ति विद्वासो यस्या तस्या सभायाम् १ ९४ १ [सम्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोरधिकरणे क्विप् सम्पदादित्वात्]

संसनिष्यदत् सम्यक्तयाऽतिशयेन प्रस्रवन् (दधिक्रा=अश्व), प्र०—अत्र स्यन्दू-धातोर्यङ्लुक् शतृप्रत्यये ऽभ्यासस्य निक् निपात्यते ९ १४ [सम्+स्यन्दू प्रस्रवणे (भ्वा०) धातोर्यङ्लुगन्तान्छतरि 'दाधर्त्तिदर्धर्त्ति०' अ० ७ ४ ६५ सूत्रेणाभ्यासस्य निगागमो धातो सकारस्य षत्वञ्च निपात्यते]

संसन्नः सम्यक् गच्छन् प्राप्नुवन् (प्रजापति=जीव) ३९ ५. [सम्+षद्लृ विशरण गत्यवसादनेषु (भ्वा०) धातो क्त]

संसमायुवसे सम्यक्तया मिश्रय, प्र०—अत्र विकरणाऽऽत्मनेपदव्यत्यय १५ ३० [सम्+आङ्+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लट् । व्यत्ययेनात्मनेपद शप्रत्ययश्च । समित्यस्य द्वित्वम् 'प्रसमुपोद पादपूरणे' अ० ८ १ ६ सूत्रेण]

संसमेतु एकीभावेन प्राप्नोतु, प्र०—अत्र 'प्रसमुपोद पादपूरणे' अ० ८ १ ६ इत्यनेन समित्यस्य द्वित्वम् ६ २० [सम्+इण् गतौ (अदा०) धातोर्लोट् । समित्यस्य द्वित्वम्]

संसर्पाय य सम्यक् सर्पति गच्छति तस्मै (गुप्तचराय) २२ ३० **संसर्पेण**=सम्यक् प्रापणेन १५ ७ [सम्+सृप्लृ गतौ (भ्वा०) धातो पचाद्यच् कर्त्तरि अन्यत्र घञ्]

संसहस्रम् सम्यक् सहस्रम् (वच=वचनम्) ७ ८.६ [सम्+सहस्रपदयो समास]

संसादि सम्पाद्यते २ ११ ८ [सम्+साध संसिद्धौ (स्वा०) धातो कर्मणि लुङ् । अडभावश्छान्दस । धस्य दकारश्छान्दस]

संसिसिचे ससिञ्चति ३ ३२ १५ [सम्+षिच क्षरणे (तुदा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

संसीदस्व सम्यगास्व ३८ १७ [सम्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट् । शित्प्रत्यये धातो सीदादेश]

संसृक्षाथाम् ससर्गं कुरुतम् १९ ७ **संसृज**=सम्यग् योजय १७ ५० सम्यग् युङ्धि १७ ५१ अ०—सयुनक्ति, प्र०—अत्र व्यत्ययो लडर्थे लोट् ऋ १ २३ २४ एकीभावेन सम्यक् सृजति १ २३ २३ **संसृजामि**=एकीभावेन सम्बध्नामि १८ ३५ सम्यक् निष्पादयामि १९ १ **संसृजेथाम्**=सम्यङ् निष्पादयेतम् १५ ५४ अच्छे प्रकार उत्पन्न करो स० वि० १३९, अथर्व० १४ २ ३७ [सम्+सृज विसर्गे (तुदा०) धातोर्लोट् । विकरणव्यत्ययेन वस । आत्मनेपद च व्यत्ययेन । अन्यत्र लोट् लेट् च]

संसृज्य ससर्गीभूत्वा १२ ३८ समुत्पाद्य ११ ५४ [सम्+सृज विसर्गे (तुदा०) धातो. क्त्वा । समासे क्त्वो ल्यप्]

संसृष्टजित् य समृष्टान् मिलितान्छत्रून जयति स (इन्द्र =सर्वसेनाधिपति) १७ ३५ [समृष्टोपपदे जि जये (भ्वा०) धातो क्विप् । समृष्ट =सम्+सृज विसर्गे (तुदा०) धातो क्त]

संसृष्टान् सम्यग्गुणयुक्तान् (पदार्थान्) २४ १६ [सम्+सृज विसर्गे (तुदा०) धातो क्त]

संसृष्टाम् सम्यग् सुशिक्षया निष्पादिताम् (कन्याम्) ११ ५५ [सम्+सृज विसर्गे (तुदा०) धातो क्तान्ताट् टाप्]

संस्कृतत्रम् य संस्कृत त्रायते रक्षति तम् (विद्वज्जनम्) ६ २८ ४ [संस्कृतोपपदे त्रैङ् पालने (दिवा०) धातोर्ड]

संस्कृतम् कृतसंस्कारम् (पदार्थम्) ५ ७६.२ शिल्पविद्यासंस्कारयुक्त) सर्वर्त्तुकम् (उत्तमयानम्) ४ ३४. [सम्+डुकृञ् करणे (तना०) धातो क्त । 'सपर्युपेभ्य करोतौ भूषणे' इति कात्पूर्व सुट्]

संस्कृतिः विद्यासुशिक्षाजनिता नीति ७ १४ [सम्+डुकृञ् करणे (तना०) धातो स्त्रिया क्तिन् । कात् पूर्व सुडागम]

संस्तिरः सम्यगाच्छादक (विद्वज्जन) १ १४० ७. [सम्+स्तृञ् आच्छादने (क्र्या०) धातोर्मूलविभुजादित्वात् कर्त्तरि क]

संस्तुतेन सङ्गत्या प्रशंसितेन (वर्चसा=विद्याध्ययनप्रकाशनेन) ३ १६ [सम्+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

संस्तुप् सम्यक् स्तुभ्नाति शब्दार्थसम्बन्धान् यया सा वाक् १५ ५ [सम्+स्तुभ्भु (सौत्रो धातु) धातो क्विप्]

संस्थाम् सम्यक् तिष्ठन्ति यस्या ताम् (सभाम्) १६ २६ [सम्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्घञर्थे क । तत स्त्रिया टाप् । यास्सप्त संस्था या एवैतास्सप्त होत्रा प्राचीर्वषट् कुर्वन्ति ता एव ता जै० उ० १ २१४]

संस्थे सम्यक् तिष्ठन्ति यस्मिँस्तस्मिन् राज्ये ५ ३ ८ जगति, प्र०—अत्र 'घञर्थे कविधानम्०' अ० ३ ३ ५८ इति वार्तिकेनाधिकरणे क प्रत्यय. १ ५४ [सम्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्घञर्थे क]

संस्पृशः य संस्पृशति तस्मात् (दिव =प्रकाशाद्विद्युत) ३७ १३ सम्यक् स्पर्शात् ३७ ११ [सम्+स्पृश सम्पर्शने (तुदा०) धातो क्विप्]

संस्मयमाना सम्यङ् मन्दहासयुक्ता (उषा इव युवति.) १.१२३ १० [सम्+ष्मिङ् ईषद्हसने (भ्वा०) धातोर्णिजन्ताच्छानच् । तत स्त्रिया टाप्]

संस्रवभागाः सम्यक् स्रूयन्ते ये ते संस्रवा , भज्यन्ते ये ते भागा , संस्रवा भागा येषान्ते (देवा =विद्वांसो दिव्या पदार्था वा) २ १८ [संस्रव-भागपदयो समास । संस्रव =सम्+स्रु गतौ (भ्वा०) धातो 'ऋदोरप्' त्यप् । भाग =भज सेवायाम् (भ्वा०) धातोर्घञ् । संस्रवभागा वसवो वै रुद्रा आदित्या संस्रावभागा तै० ३ ३.६ ७]

संस्रष्टा श्रेष्ठाना मनुष्याणा शस्त्रास्त्राणा वा संसर्गस्य कर्त्ता (इन्द्र =सेनापति) १७ ३५. [सम्+सृज विसर्गे (तुदा०) धातो कर्त्तरि तृन् । 'सृजिदृशोर्झल्यमकिती' ति सूत्रेणामागमे यणादेश]

संहतः एकीभूता (धेनव.=गाव) ३ १ ७. [सम्+हन हिंसागत्यो (अदा०) धातो क्त]

संहन्मः संहितानि निमीलितान्यादर्शकानि कुर्म ७ ५५ ६ [सम्+हन हिंसागत्यो (अदा०) धातोर्लट्]

संहंसि एकीभावेन नाशयसि १.५३.७. [सम्+हन हिंसागत्यो (अदा०) धातोर्लट्]

संहानाय संहन्यते यस्मिँस्तस्मै (सङ्गामाय) २२ ७ [सम्+हन हिंसागत्यो (अदा०) धातोर्घञ्]

संहाय सम्यक् त्यक्त्वा २ ३८ ४. [सम्+ओहाक् त्यागे (जु०) धातो क्त्वा । तत समासे क्त्वो ल्यप्]

संहितम् कृतसाधनम् (अ०—जगत्) १.१६८ ६ [सम्+डुधाञ् धारणपोषणयो (जु०) धातो क्त । 'दधातेर्हिरि' ति हिरादेश]

संहितः दृढाङ्ग (पशु) २६ ५८ सर्वैर्भूतैर्द्रव्यै सत्पुरुषैर्वा सह मिलित (सूर्य.=सविता) १८.३६. [सम्+हि गतौ वृद्धौ च (स्वा०) धातो क्त । (यजु० १८ ३६) असौ वा आदित्य सहित एष अहोरात्रे सदधाति श० ७ ४ १.८ संहिनाम् (साम) तद्देवा संहितेन समदधुर्यत् समदधुस्तस्मात् संहितम् ता० ८ ४ ६. संहित भवति ह्यक्षरनिधन प्रतिष्ठायै प्रतिष्ठायै व सत्रमासते ता० ११.५ ४. संहित भवति ह्यक्षरणिधन प्रतिष्ठायै ता० १५.११ ३]

संहिता सर्वपदार्थै सह वर्त्तमाना विद्युत्, सर्वव्यापक ईश्वरो वा ३ २२ [संहितमिति व्याख्यातम् । ततष्टाप् स्त्रियाम् । पर सन्निकर्ष संहिता । पदप्रकृति संहिता नि० १ १७]

संहिनोमि सम्यक्तया वर्धयामि १ ६१ ४ [सम्+हि गतौ वृद्धौ च (स्वा०) धातोर्लट्]

१६ ४८ [अभयोपपदे षरग सभक्तौ (भ्वा०) धातोर्बाहुलकात् करणे 'इ' प्रत्यय]

अभरत् धारयति ऋ० भू० २३८, ११ ५ १६ धरेत् ४ २६ ७ भरति १ १६१ १० बिभर्ति २० ५६ **अभरन्**=धरन्ति पुष्णन्ति वा ४ ३३ ४ **अभरिष्यत्**=भरति २ ३० २ [भृञ् भरणे (भ्वा०) धातोर्लङि लृङि च रूपाणि । अभरत् अहरत् निघ० ७ २६]

स्तौलाभिः स्थूले भवाभि (मेनाभि), प्र०—अत्र वर्णव्यत्ययेन थस्य स्थाने त ६ ४४ ७ [स्थूलप्राति० भवार्थेऽण् । वर्णव्यत्ययेन थस्य तकार]

स्त्यायताम् सर्वतो वर्धताम्, सहता भवन्तु वा, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् ३८ १८ [स्त्यै ष्ट्यै शब्दसघातयो (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

स्त्री भा०—याऽन्यायाचरणादपूज्यपूजनाद्विरहा पत्या माननीया सा (पत्नी) ५ ६१ ६ [स्त्यै ष्ट्यै शब्दसघातयो (भ्वा०) धातो 'स्त्यायतेर्ड्रट्' उ० ४ १६६ सूत्रेण ड्रट् । तत स्त्रिया ङीप् । स्त्रिय स्त्यायतेरपत्रपणकर्मण नि० ३ २१ स्त्री सावित्री जै० उ० ४ २७ १७]

स्त्रीषखम् स्त्रिया मित्र पतिम् ३० ६ [स्त्री-सखिपदयो समासे समासान्त टच् 'राजाहस्सखिभ्य०' सूत्रेण]

स्थ सन्ति, प्र०—अत्र पुरुषव्यत्ययेन लडर्थे लोट् १ १५ २ भवथ ५ ५७ २ भवत १२ ४६ सन्तु ४ ३४ ६ तिष्ठत ५ ६१ १ सन्ति, प्र०—अत्र पुरुषव्यत्ययेन प्रथमपुरुषस्थाने मध्यमपुरुष ११ **स्थः**=भवथ १ १५७ ६ स्त, प्र०—अत्र व्यत्यय १ १७ २ वर्त्तेते १ १०८ ११ भवत स्यात वा ६ ४ भवथ, भवतो वा १ १०८ ६ तिष्ठथ ५ ७३ १ तिष्ठत ५ २१ स्याताम् १० ६ **स्थात्**=तिष्ठति २ १५ ७ तिष्ठेत् ३ १५ ६ उपतिष्ठते २ ३ १० **स्थात**=तिष्ठत ५ ५३ ८ **स्थाः**=तिष्ठे ६ २४ ६ तिष्ठति ४ ३० १२ **स्थाति**=तिष्ठति २ ३१ ३ **स्थाथः**=भवथ ४ ४६ ४ **स्थाम्**=अवतिष्ठस्व २ २८ ११ तिष्ठेयम् २ २७ १७ **स्थाम**=तिष्ठेम १ १३६ ४ **स्थाः**=तिष्ठे ६ २४ ६ तिष्ठति ४ ३० १२ भवे १ १७४ १० **स्थुः**=तिष्ठेयु १ १६७ १ तिष्ठन्ति, प्र०—अत्र लडर्थे लुङभावश्च १ २४ ७ उपतिष्ठन्तु ७ १८ ३ **स्थेयाम**=तिष्ठेम ६ ४७ ८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट् । छान्दसत्वात् शिति तिष्ठादेशो न भवति । अन्यत्र लुङ, लेट्, लिङ् चापि]

स्थन तिष्ठत ५ ८७ ६ भवत १२ ८३. गन्ति १ १०५ १५ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोटि छन्दसि तिष्ठादेशाऽभावे छान्दस रूपम्]

स्थपतये तिष्ठन्ति यस्मिन्निति स्थम्, तस्य पतये पालकाय (सेनापतये) १६ १९ [स्थ-पतिपदयो समास । स्थ —ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्घञर्थे क]

स्थविरम् स्थूलम् (वज्र =विद्युद्रूपम्) ४ २० ६. स्थूल वृद्ध वा (वृषभम्) ४ १८ १० प्रवृद्धम् (क्षत्रम्) १ ५४ ८ **स्थविरस्य**=विद्याविनयाभ्या वृद्धस्य (राज्ञ.) ६ ४७ ८ विद्यया वयसा वा वृद्धस्य (राज्जनस्य) ६ १८ १२ **स्थविरः**=कृतज्ञो वृद्ध (सभेशो राजा) १ १७१ ५. वृद्धो विज्ञातराजधर्मव्यवहार (इन्द्र=सेनापति) १७ ३७ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'अजिरशिशिरशिथिल०' उ० १ ५३ सूत्रेण किरच्प्रत्यये धातोर्वुक् ह्रस्वत्वञ्च निपात्यते]

स्थविरा स्थूला विस्तीर्णा (गी =वाणी) १ १८१ ७ [स्थविरमिति व्याख्यातम् । तत स्त्रिया टाप्]

स्थविरेभिः स्थूलै (वाजै =सङ्ग्रामै) ६ १ ११ विद्यावयोवृद्धै (जनै) ७ २४ ४ [स्थविरमिति व्याख्यातम् । ततो भिस ऐस् न भवति 'वहुल छन्दसि' सूत्रेण]

स्थशः तिष्ठन्तीति स्थास्तानि वहूनि इति स्थश (जन्मानि) प्र०—अत्र 'वह्वल्पार्था०' इति शस् २ ३८ ८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्विप् । तत शस्]

स्थाणु वृक्ष, म० प्र० ६६, नि० ११८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थो णु' उ० ३.३७ सूत्रेण णु । स्थाणुस् तिष्ठते नि० ११८]

स्थातः यस्तिष्ठति तत्सम्बुद्धौ (इन्द्र=नृप) ६ ४१ ३ **स्थातारः**=ये तिष्ठन्ति ते (विद्वज्जना) ५ ८७ ६ **स्थातु**=स्थिरस्य स्थावरस्य (जगत) ४ ५३ ६ कृत-स्थिते (तिष्ठतो वृक्षाऽऽदे) १ ५८ ५ तिष्ठतो जगत १ ७० ४ अचरस्य (जगत) १ १५९ ३ **स्थातॄन्**=भूम्यादिस्थावरान् (लोकान्) १ ७२ ६ **स्थात्रे**=स्थिरस्य कारणस्य मध्ये, प्र०—अत्र षष्ठ्यर्थे चतुर्थी १.१६४.१५ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो कर्त्तरि तृच्]

स्थाताम् स्थावराणाम् (वनाना=पदार्थाना रश्मीना वा), प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति तुक् १ ७० २ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो कर्त्तरि क्विप् । 'वा छन्दसी' ति तुक्]

स्थातारा स्थातारौ (अध्यापकोपदेशकौ) १ १८१ ३ ष्ठा गतिनिवृत्तौ (भ्वा०) धातोस्तृजन्ताद् द्विवचनस्या-कारादेश.]

स्थातुः स्थावरसमूहम्, प्र०—अत्र ष्ठा-धातोस्तु प्रत्यय. 'सुपा सुलुक्०' इत्यम स्थाने सुश्च १ ६८ १ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्गेणा० तुर्बाहुलकात्]

स्थानम् तिष्ठन्ति यस्मिंस्तत् ५.३६ ४ स्थित्यर्थम् (स्थलम्) २ ८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोरधिकरणे ल्युट्]

स्थारश्मानः स्थिरा रश्मान किरणा इव व्यवहारा येषा ते (विद्वासो राजजना) ५ ८७ ५ [स्था-रश्मानृपदयो समास । स्था=ष्ठा गतिनिवृत्तौ (भ्वा०)+क्विप् । रश्मन् रश्मिपर्यायश्छान्दस]

स्थालीभिः यासु पदार्थान् स्थापयन्ति पाचयन्ति वा ताभि. (पात्रविशेषाभि) १९ २७ **स्थालीः**=यासु पच्यन्ते-ऽन्नानि ता (पात्रविशेषा.) १९ ८६ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थाचतिमृजेरालच्०' उ० १ ११६ सूत्रेण आलच् । तत स्त्रिया गौरादित्वात् ङीष् । पत्नी स्थाली तै० २ १ ६ १]

स्थाः स्थावरम् (जगत्) २ २० ४ [स्था-स्थावर नि० ५ ३]

स्थिरधन्वने स्थिर दृढ धनुर्यस्य तस्मै (रुद्राय=शूरवीराय) ७ ४६ १ [स्थिर-धन्वन्पदयो समास । स्थिरधन्वने—दृढधन्वने नि० १० ६]

स्थिरपीतम् धर्माऽनुष्ठानेश्वरप्राप्तिरूप मोक्षफल पीत प्राप्त येन त विद्वासम् ऋ० भू० २१७, १० ७१ ५ दृढविद्यायुक्तम् (विद्वज्जनम्) प० वि० । [स्थिर-पीतपदयो समास । पीतम्=पा पाने (भ्वा०) धातो क्त]

स्थिरम् ध्रुवम् (रथ=यानम्) ३ ३५ ४ निश्चलम् (बलम्) १ १२७ ३ गमनरहितम् (यानम्), दृढ बलम् १ ३९.३. [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'अजिर-शिशिरशिथिल०' उ० १ ५३ सूत्रेण किरच्प्रत्यये धातो-राकारलोप]

स्थिरः निश्चलप्रवृत्ति (इन्द्र =सभाद्यध्यक्ष) १ १० १ ४ स्वपरिधिस्थ (इन्द्र =सूर्य) २ ४१ १० निश्चल (अर्वा=विज्ञानयुक्त सुसन्तान) १ १ ४४ **स्थिरैः**=दृढै (अङ्गै) २५ २१ [स्थिरमिति व्याख्यातम्]

स्थिरा निश्चला (जनी =मातर) प्र०—अत्रा-ऽऽकारादेश १ १६७ ७ निश्चलानि (दैव्यानि वस्तूनि) १३ १३ स्थिराणि दृढानि (शवासि=बलानि) ७ ५६ ७

चिर स्थातुमर्हाणि (आयुधा=आग्नेयादि—शतघ्न्यादीनि अस्त्र-शस्त्राणि), प्र०—अत्र 'शेश्छन्दसि०' इति लोप १ ३९ २ [स्थिरमिति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

स्थिरा निश्चला (मति) १९ ५० **स्थिराः**= दृढा (नेमय =कलाचक्राणि) १ ३८ १२ [स्थिरमिति व्याख्यातम् । तत स्त्रिया टाप्]

स्थिरेभिः दृढै (अङ्गै =अवयवै) २ ३३ ९ [स्थिरप्राति० 'बहुल छन्दसी' ति भिस ऐस् न भवति]

स्थूणा स्तम्भ इव दृढा नीति ५.६२ ७ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'रास्नासास्नास्थूणावीणा' उ० ३ १५ सूत्रेण न । आकारस्य ऊ आदेशो निपातनात् । तत स्त्रिया टाप्]

स्थूणेव [स्थूणावत् ५ ४५ २ यथा धारक स्तम्भ १ ५९ १ स्थूणा-इवपदयो समास]

स्थूरम् स्थिरम् (रत्न=रमणीय धनम्) ६ १९ १० **स्थूरयोः**=स्थूलयो (गभस्त्यो =बाह्वो) प्र०—अत्र वर्णव्यत्ययेन लस्य स्थाने र ६ २९ २ **स्थूराभ्याम्**= स्थूलाभ्याम् (पदार्थाभ्याम्), प्र०—अत्र कपिलकादित्वाल्लत्वविकल्प २५ ६ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थ किच्च' उ० ५ ४ सूत्रेण ऊरन् । स्थूर समाश्रितमात्रो महान् भवति नि० ६ २२]

स्थूलगुदया स्थूलया गुदया सह २५ ७ [स्थूला-गुदापदयो समास । स्थूल स्थूरेण व्याख्यातम्]

स्थूलपृषती स्थूलानि पृषन्ति यस्या सा (भा०—चन्द्रादिगुणयुक्ता पशू) २४ २ [स्थूल-पृषत्पदयो समास । स्त्रिया ङीप् । स्थूल स्थूरेण व्याख्यातम् । पृषत्—पृषु सेचने (भ्वा०) धातो 'वर्त्तमाने पृषद्बृहत्०' २ ८४ सूत्रेणाति शतृवच्च]

स्थूलम् महत् कर्म्म २३ २८ [स्थूलमिति स्थूरेण व्याख्यातम्]

स्नातः कृतस्नान (मनुष्य) २० २० स्नानविधि को किया हुआ (ब्रह्मचारी) स० वि० ७९, अथर्व० ११ ५ २६ [ष्णा शौचे (अदा०) धातो क्त]

स्नातः स्नान कुरुत १ १०४ ३ [ष्णा शौचे (अदा०) धातोर्लट् । स्नाते शुद्धचर्यस्य नि० १२ २६]

स्नाती शुद्धा (उषा) ५ ८० ५ [ष्णा शौचे (अदा०) धातो शत्रन्तात् ङीप्]

स्नावभ्यः स्थूलनाडीभ्य, सूक्ष्माभ्य सिराभ्यो वा ३९ १० [ष्णा शौचे (अदा०) धातो 'स्नामदिपद्यर्त्ति०' उ० ४.११३ सूत्रेण वनिप्]

स्नीहितीषु स्नेहकारिणीषु (कृष्टिषु=मनुष्यादि-प्रजासु) १ ७४ १ [ष्णिह प्रीतौ (दिवा०) धातो क्तिन् । धातोर्दीर्घश्छान्दस]

स्नुना व्याप्तेन (सहसा=बलेन) ४ २८ २ **स्नुभिः**=इच्छावद्भि (मनुष्यै) ५ ६० ७ पवित्रैर्गुणै ५ ८७ ४ **स्नुषु**=प्रान्तेषु १७ १४ **स्नोः**=प्रकाशमानात् पुरुषार्थात् ४ २७ ४. [ष्णा शौचे (अदा०) धातोर्बाहु० औणा० कु]

स्पट् स्पष्टा (राजा) ५ ५९ १ [स्पश बाधनस्पर्शनयो (भ्वा०) धातो क्विप् कर्त्तरि]

स्पन्दने किञ्चिच्चलने ३ ५३ १९ [स्पदि किञ्चिच्चलने (भ्वा०) धातोर्ल्युट्]

स्पन्द्रा प्रचलितौ (अश्विनौ=स्त्रीपुरुषौ) १ १८० ९ [स्पदि किञ्चिच्चलने (भ्वा०) धातोरौणा० रक् । ततो द्विवचनस्याकारादेश]

स्परत् प्रीणयेत्, प्र०—अत्र लड्यडभाव १ १६१ ५ [स्पृ प्रीतिपालनयो (स्वा०) धातोर्लङ् । व्यत्ययेन शप् । अडभावश्च]

स्पर्द्धन्ते परोत्कर्ष न सहन्ते ६ १४ ३ [स्पर्द्ध सघर्षे (भ्वा०) धातोर्लट्]

स्पर्द्धमाना ईर्ष्यन्ती (सेना) १७ ४७ [स्पर्द्ध सघर्षे (भ्वा०) धातो शानजन्तात् स्त्रिया टाप्]

स्पर्द्धमानाः ईर्ष्यका (अयज्वानो जना) १ ३३ ५ [स्पर्द्ध सघर्षे (भ्वा०) धातो शानच्]

स्पशम् बन्धकम् (सूर्यम्) ४ १३ ३ दूतम् ३३ ६० **स्पशः**=स्पर्शकान् (शुभगुणान्) ४ ४ ३ अविद्यान्धकार बाधमाना विद्याप्रकाश स्पर्शन्त (देवास =आप्ता विद्वज्जना) ६ ६७ ५ स्पर्शवन्त पदार्था १ २५ १३ बाधनानि १३ ११ [स्पश बाधनस्पर्शनयो (भ्वा०) धातो रच् । औणा० वा अन्]

स्पार्हम् स्पृहा वाञ्छा तस्या इदम् १ ३१ १४ [स्पृहाप्राति० 'तस्येदम्' इत्यर्थेऽण् । स्पृहा=स्पृह ईप्सायाम् (चुरा०) धातो स्त्रियामङ् । ततष्टाप्]

स्पार्हराधाः स्पार्हं स्पृहणीय राधो धन यस्य स (राजा) ४ १६ १६ [स्पार्ह-राधस्पदयो समास । स्पार्हमिति व्याख्यातम् । राधम् धननाम निघ० २ १०]

स्पार्हवीरम् स्पार्हा अभिकाङ्क्षिता वीरा यस्मिन् तम् (रयि=श्रियम्) ५ ५४ १४ [स्पार्ह-वीरपदयो

समास । स्पार्ह इति व्याख्यातम्]

स्पार्हः स्पर्हणीय (विद्वज्जन) ४ ४ ७ १ स्पृहणीय (अग्नि =विद्वज्जन) ४ १ १२. य स्पृहयन्ति तस्याज्यम् (देव =दिव्यगुणसम्पन्नो मनुष्य) २७ ३० **स्पार्हे**= अभीप्सनीये (वर्णे =शुक्लादिगुणे) २ १.१२ [स्पृहा-प्राति० 'तस्येदम्' इत्यर्थेऽण् । स्पृहा—स्पृह ईप्सायाम् (चुरा०) धातो स्त्रियामङ् । ततष्टाप् । स्पार्हा—स्पृहणीयानि नि० ३ ११]

स्पार्हा ईप्सितव्यानि (वस्त्रादीनि) १ १३५.२ अभिकाङ्क्षितु योग्यानि (जनिमानि =जन्मानि) ४ १ ७ स्पर्हणीयानि (कर्माणि) ४ १ ६ स्पृहणीयानि (वस्तूनि) १ १२३ ६ स्पृहणीया (श्रिय) ७ १५ ५ अभिकाङ्क्षितु-मर्हेण (शिक्षकेण) २ २३ ६ [स्पार्हप्राति० शेर्लोपश्छन्दसि । स्पार्हमिति व्याख्यातम् । स्पार्हा स्पृहणीयानि नि० ३ ११]

स्पूर्धन् स्पर्द्धमाना (शत्रुवद् दुर्जना) ६.६७ ६. [स्पर्द्ध सघर्षे (भ्वा०) धातो शतृ । वर्णव्यत्ययेनाकारस्योकारादेश]

स्पूर्धसे स्पर्धायै ५ ६४ ४ [स्पर्द्ध सघर्षे (भ्वा०) धातोरौणा० असुन् । वर्णव्यत्ययेनाकारस्योकारादेश]

स्पृणवाम अभीच्छेम ५ ४४ १० [स्पृ प्रीतिसेवनयो (स्वा०) धातोर्लेट्]

स्पृतम् सेवितम् (चतुष्पात् =गवादिकम्) १४ २५. प्रीतम् (क्षत्र =राज्यकुलम्) १४ २४ **स्पृताः**=प्रीतिमन्त (सज्जना) १४ २५ प्रीता. (प्रजा) १४ २६ [स्पृ प्रीतिसेवनयो (स्वा०) धातो. क्त]

स्पृत्वा अभिव्याप्य ३ १ १ [स्पृ प्रीतिसेवनयो (स्वा०) धातो क्त्वा]

स्पृधः स्पर्द्धमाना ईर्ष्यायुक्ता शत्रुसेना ३३ ६६ स्पर्द्धन्ते येषु तान् (सङ्ग्रामान्) ६.२० ६ स्पर्द्धन्ते यासु ता सङ्ग्रामसेना ६ ५ ६ अरिसेना. ३३ ६७ या स्पर्द्धन्ते ता शत्रुसेना १६ ७१ या स्पर्धयन्ते ता (सेना) सङ्ग्रामा वा ५ ५५ ६ स्पर्हणीयान् सङ्ग्रामान् ६ ४५ १८. स्पर्धमानान् शत्रून् १ ८ ३ [स्पृध सङ्ग्रामनाम निघ० २ १७. स्पर्द्ध सघर्षे (भ्वा०) धातो क्विप् । 'बहुल छन्दसि' अ० ६ १ ३४ इति सम्प्रसारणमल्लोपश्च]

स्पृधानम् स्पर्द्धमानम् (ज्योति =प्रकाशम्) ३ ३१ ४ [स्पर्द्ध सघर्षे (भ्वा०) धातो शानच् । 'बहुल छन्दसी' ति शपो लुक् । धातो सम्प्रसारणमपि 'बहुल छन्दसि' अ० ६.१.३४ इति सूत्रेण । अल्लोपश्च छान्दस]

स्पृधि अभिकाङ्क्ष ५ ३ ६. [स्पृ प्रीतिपालनयो (स्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति विकरणस्य लुक्]

स्पृश अनुगतो भव १ ३ १० गृहाण ४ ३.१५ **स्पृशन्ति**=आलिङ्गयन्ति १ ६० ११ सम्बध्नन्ति १ ३६ ३ [स्पृश संस्पर्शने (तुदा०) धातोर्लोट् । अन्यत्र लट्]

स्पृहयद्वर्णः स्पृहयन् वर्णो यस्य स (अग्नि = पावक) २.१० ५ य स्पृहयद्भिर्वर्ण्यते स्वीक्रियते स (अग्नि =शरीरस्था) विद्युत् ११ २४ [स्पृहयत्= वर्णपदयो. समास । स्पृहयत्=स्पृह ईप्सायाम् (चुरा०) धातो शतृ]

स्पृहयाय्यः स्पृहणीय (रयि =धनम्) ७ ४ ६ [स्पृह ईप्सायाम् (चुरा०) धातो 'स्पृहिगृहि०' अ० ३ २ १५८ सूत्रेणालुच्]

स्पृहयाय्याणि स्पृहणीयानि (वसूनि) ६ ७ ३. [स्पृह ईप्सायाम् (चुरा०) धातो 'श्रुदक्षिस्पृहिगृहिभ्य आय्य' उ० ३ ६६ सूत्रेण आय्य]

स्पृहयेत् ईप्सेत आप्तुमिच्छेत् १ ४१.६. [स्पृह ईप्सायाम् (चुरा०) धातोर्लिङ् । कथादिष्वदन्तत्वादल्लोपस्य स्थानिवद्भावेन वृद्धिगुणयोरभाव]

स्फरीः अवृद्ध मा कुर्या ६ ६१ १४ [स्फर स्फुरणे (अदा०) धातोर्लुङ् । अटोऽभाव]

स्फातिम् वृद्धिम् १ १८८ ६ [स्फायी वृद्धौ (भ्वा०) धातो स्त्रिया क्तिन्]

स्फिग्या मध्यस्थाऽवयवरूपया (पृथिव्या) ३ ३२ ११

स्फुर पुरुषार्थय ४ ३.१४ **स्फुरत्**=सञ्चालयेत् १ ८४ ८ [स्फुर सचलने (तुदा०) धातोर्लोट् । अन्यत्र लेट् । स्फुरत्—अवस्फुरिष्यति नि० ५ १७]

स्फुरान् स्फूर्तिमत (केतू किरणान्वा) ६ ६७ ११ [स्फुर सचलने (तुदा०) धातोर्घञर्थे क । ततो मत्वर्थीयस्य लुक्]

स्म एव ४ १० ७. आश्चर्यगुणप्रकाशे १ १०२ ३ हर्षे १ १०२ ५ आनन्दे १ १०४ ५ अतीतार्थे क्रियायोगे १ २८ ६ प्रकारार्थे १ १२ ५ स्पष्टार्थे १ १२ ८ प्रसिद्धौ, प्र०—अत्र 'निपातस्य च' इति दीर्घ षत्वञ्च छान्दस दृश्यते ३३ ६४ वर्त्तमाने ३ ४६ सुखार्थे १.१५ १० खलु, प्र०—अत्रा'ऽविहितलक्षणो मूर्धन्य सुषामादिषु द्रष्टव्य' अ० ८ ३ ५३ इति वार्तिकेन मूर्धन्यादेश १ ३७.१५

स्मत् एव ५ ८७ ८ श्रेष्ठार्थे १ ५१ १५ प्रशंसायाम् १ १८६ ६ तत्कर्मानुष्ठानोक्तम् १ १०० १३

स्मदूध्नी बहुदुग्धप्रापिका (गाव) प्र०—अत्र स्मदुपपदाद् ऊधसोऽनङ् १ ७३ ६ [स्मद्-ऊधस्पदयो समासे समासान्तोऽनङ् 'ऊधसोऽनङ्' सूत्रेण । तत स्त्रिया ङीप्]

स्मद्दिष्टयः निश्चिता दिष्टयो दर्शनानि येषान्ते (विद्वासो जना) ७ १८ २३ **स्मद्दिष्टिः**=कल्याणोपदेष्टा (इन्द्र =सम्राट्) ३ ४५ ५ **स्मद्दिष्टीन्**=प्रशसितदर्शनान् (जनान्) ६ ६३ ६ [स्मद्-दिष्टिपदयो समास । दिष्टि = दिश अतिसर्जने (तुदा०) धातो स्त्रिया क्तिन् । धातूनामनेकार्थकत्वादत्र दिश दर्शनेऽर्थे]

स्मयते आनन्दयति, प्र०—अत्राऽन्तर्गतो ण्यर्थ १ ६२ ६ **स्मयन्त**=ईषद्धसन्ति १ १६८ ८ **स्मयेते**= ईषद्धसत ३ ४ ६ [स्मिङ् ईषद्धसने (भ्वा०) धातोर्लट् । अन्यत्र लङ् । अडभावश्छान्दस]

स्मयमानः किञ्चिद्धसन्निव (प्रवक्तृजन) २ ४ ६ [स्मिङ् ईषद्हसने (भ्वा०) धातो शानच्]

स्मयमानाभिः किञ्चिद्धासकारिकाभि (कन्याभि) १ ७६ २ [स्मिङ् ईषद्हसने (भ्वा०)+शानच्+टाप्+भिस्]

स्मयमानासः किञ्चिद् हासेन प्रसन्नताकारिण्य (योषा =स्त्रिय) १७ ६६ किञ्चिद्धसन्त्यो मितहासा (योषा) ४ ५८.८ [स्मयमानेति व्याख्यातम् । ततो जसो ऽसुक्]

स्मर पर्यालोचय, भा०—परमेश्वरस्याऽऽज्ञापालनमुपासनञ्च कुरु ४० १५ [स्मृ चिन्तायाम् (भ्वा०) धातोर्लोट्]

स्मरकारीम् या स्मर काम करोति ता दूतिकाम् ३० ६ [स्मरोपपदे डुकृञ् करणे (तना०) धातो 'कर्मण्यण्' इत्यण् । तत स्त्रिया ङीप् । स्मर =स्मृ आध्याने (भ्वा०)+भावेऽप्]

स्मसि स्म १ ५७ ५ भवेम १ ३७ १५ भवाम १ २६ १ [अस भुवि (अदा०) धातोर्लटि उत्तमे बहुवचनम् । 'इदन्तो मसि' इति मस इदन्तत्वम्]

स्य अन्त प्रापय ४ १६ २ **स्यतम्**=तनूकुरुतम् ६ ७४ ३ **स्यनाम्**=अन्ते भवताम् २ ४० ४ **स्यतु**= प्राप्नोतु १ १४२ १० विमुञ्चत २७ २० **स्यन्ति**=कार्याणि समापयति १ ८५ ५ **स्यस्व**=विद्या पारङ्गमय ७ २ ६ अन्त कुरु ३ ४ ६ प्राप्नुहि १ १० १ १० [षोऽन्त कर्मणि (दिवा०) धातोर्लोट् । अन्यत्र लङपि । स्यस्व-प्रयोगे व्यत्ययेनात्मनेपदम्]

स्यन्दताम् प्रस्रवन्तु ५ ८३ ८. [स्यन्दू प्रस्रवणे (भ्वा०) धातोर्लोट् स्यन्दते गतिकर्मा निघ० २ १४]

स्यन्दमानाभ्यः पस्रुताभ्य: (अद्भ्य =जलेभ्य) २२ २५ **स्यन्दमानाः**=प्रस्रवन्त्य (आप =जलानि) १ ३२ २ [स्यन्दू प्रस्रवणे (भ्वा०) धातो शानच् । तत स्त्रिया टाप्]

स्यन्दयध्यै स्यन्दयितु प्रस्रावयितुम् ४ २२ ७ [स्यन्दू प्रस्रवणे (भ्वा०) धातोर्णिजन्तात् तुमर्थेऽध्यै]

स्यन्द्रः प्रस्रावक (तायु =स्तेन) ६ १२ ५ **स्यन्द्राः**=धैर्यगतय (नर =नायका जना) ५ ५२ ८ [स्यन्दू प्रस्रवणे (भ्वा०) धातोर्बाहु० औणा० रक्]

स्यन्द्रासः किञ्चिच्चेष्टमाना (पुरुषार्थिजना) ५ ५२ ३ प्रस्रवन्त प्रस्रावयन्तो वा (अग्नय =पावका) ५ ८७ ३ [स्यन्द्र इति व्याख्यातम् । ततो जसोऽसुक् । स्यन्द्रास बलनाम निघ० २ ६]

स्यन्नाः आशुगमना (एन्य =नद्य) ५ ५३ ७ [स्यन्दू प्रस्रवणे (भ्वा०) धातो क्त । तत स्त्रिया टाप्]

स्य असौ, प्र०—अत्र 'स्यश्छन्दसि बहुलम्' इति सोर्लोप ६ १४ [त्यद् सर्वनाम्न. सौ रूपम् । सोर्लोपश्छन्दसि]

स्यात् भवेत् ७ ३४ २१ **स्यात**=भवेयु १ १ **स्याम्**=भवेयम् ६.५० ६ **स्याम**=भवेम १ ४ ६ होवे, स० वि० १५६, ७ ४१ ५ प्रवृत्ता भवेम ५ ६५ ५ **स्याः**= भवेत् ४ १६ १८ भवे ७ १ ८ भूया ६ ३३ ५ [अस भुवि (अदा०) धातोर्लिङ्]

स्यातन भवेत १ ३८ ४ [अस भुवि (अदा०) धातोर्लिङ् । तस्य तनबादेशश्छान्दस]

स्यामि प्रविशामि १२ ६५ [षोऽन्त कर्मणि (दिवा०) धातोर्लट् । धातूनामनेकार्थकत्वादत्र प्रवेशनेऽपि]

स्यालात् स्वस्त्रीभ्रातु १ १०६ २. [स्याल आमन्न सयोगेनेति नैदाना । स्याल्लाजानावपतीति वा नि० ६ ६]

स्यूतम् विविधसाधनै कारुभिर्निष्पादितम् (नर= विनयाभियुक्त मनुष्यम्) १ ३१ १५ [षिवु तन्तुसन्ताने (दिवा०) धातो क्त । 'च्छ्वो शूडनुनासिके च' ति वकारस्य ऊठ्]

स्यूमगभस्तिः समूहकिरण (सूर =सूर्य) १ १२२ १५ [स्यूम-गभस्तिपदयो समास]

२ ३२ ७. [सु-अङ्गुरिपदयो समास]

स्वजन्मना स्वस्य जन्मना ७ १ १२ [स्व-जन्मन्-पदयो समास']

स्वजाम् स्वात्मजनिताम् (मेना=वाचम्) १ १२१.२ **स्वजा:**=स्वस्मत्कारणाज्जाता (धूतय =मनुष्या) १ १६८ २ [स्वोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड.। तत स्त्रिया टाप्]

स्वजेन्यम् स्वेन जेतु योग्यम् (व्यवहारम्) ५ ७ ५ [स्व-जेन्यपदयो समास । जेन्यम्—जि जये (भ्वा०) धातोर्यत् । नुगागमश्छान्दस]

स्वञ्चम् य सुष्ठ्वञ्चति जानाति प्रापयति वा तम् (परमात्मानम्) ६.१५ १०. सुष्ठ्वञ्चन्त प्राप्तशरीरात्मबलेन युक्तम् (युवान जनम्) ६ ५८.४ **स्वञ्च:**=ये सुष्ठ्वञ्चन्ति गच्छन्ति ते (मरुत =बलिष्ठा मनुष्या) ७ ५६ १६ याभि सुष्ठ्वञ्चन्ति गच्छन्ति प्राप्नुवन्ति वा ते (हरित =अङ्गुलय) ४ ६ ६ [सु+अञ्चु गतिपूजनयो (भ्वा०) धातो कर्त्तरि क्विप् । 'ऋत्विग्दधृक्०' इत्यादिना वा क्विन्]

स्वञ्चा: य सुष्ठ्वञ्चति स (शिल्पिजन) ५ ३७.१. [सूपपदे अञ्चु गतिपूजनयो (भ्वा०)धातोरसुन् । स्वञ्चा — स्वञ्चा सु अञ्चन । नि० ५.७]

स्वतवद्भ्य: स्वतो वासो येषान्तेभ्य (मरुद्भ्य = मनुष्येभ्य) २४ १६ **स्वतवान्**=स्वैर्गुणैर्वृद्ध. (इन्द्र = राजा) ४ २० ६ य स्वान् तौति वर्धयति स (गृहस्थो जन), प्र०—अत्र तु-धातोरौणादिक आनि प्रत्यय १७ ८५ स्वेन प्रवृद्ध (पायु =रक्षको राजा) ४ २ ६ [स्वोपपदे तु गति वृद्धिहिसासु (अदा०) धातोर्बाहु० औणा० आनि]

स्वतवस: स्वकीयबलयुक्ता (धूतय =मनुष्या) १ १६८ २ स्व स्वकीय तवो बल येषा ते (विद्वज्जना) १ १६६ २ स्वकीयबला (मरुत =विद्वज्जना) ७ ५६ ११ **स्वतव** =स्वकीय तवो बल यस्य तत्सम्बुद्धौ (इन्द्र= गृहस्थिजन) ६ २२ ६ [स्व-तवस्पदयो समास । तव बलनाम निघ० २ ६]

स्वतव: स्व स्वकीय तवो बल यस्मिँस्तत् (मन) १ १५६ २ [स्व-तवस्पदयो समास । तव बलनाम निघ० २ ६]

स्वद आस्वादय ३ १४ ७ **स्वदतु**=आभुनक्तु ६ १ आस्वादयतु ३० १ स्वदता स्वादिष्ठा करोतु प्र०—अत्र व्यत्ययेन परस्मैपदम् ११.७. **स्वदन्ताम्**=भुञ्जताम् ६ ७ **स्वदन्ति**=सुस्वादमदन्ति ७ २ २ **स्वदन्तु**=प्राप्नुवन्तु २६ ३५ सुष्ठु सेवन्ताम्, अ०—सुसेवन्ताम् ४ १२. स्वदस्व भुङ्क्ष्व ३.५४ २२ **स्वदाति**=आस्वदेत्, प्र०—अत्र लेटि व्यत्ययेन परस्मैपदम् २० ४५ [ष्वद आस्वादने (भ्वा०) धातोर्लोट् । व्यत्ययेन परस्मैपदम् । अन्यत्र लट् लेट् लोट् चापि । स्वदति अर्चतिकर्मा । निघ० ३ १४]

स्वदन्त: सुष्ठु भुञ्जाना (मर्त्तास =मनुष्या) २.१ १४ [ष्वद आस्वादने (भ्वा०) धातो शतृ । व्यत्ययेन परस्मैपदम्]

स्वदय आस्वादय २६ २६ [ष्वद आस्वादने (चुरा०) धातोर्लोट्]

स्वदितानि आस्वादितानि (हव्या=अत्तुमर्हाणि वस्तूनि २६ १० [ष्वद आस्वादने (भ्वा०) धातो क्त]

स्वधया स्वकीयया धृतया प्रज्ञया ४ ५८ ४ अन्नादिना ८ ६१. स्वस्वरूपधारणया क्रियया १ १५४ ४ अन्नादिपदार्थयुक्तया पृथिव्या सह ४ १३ ५ स्वकीयया गत्या ४ १४ ५ अन्नविद्यया, शरीरबुद्धिबलधारणेन ऋ० भू० २६२, १६.६० अमृतरूपया सेवया ऋ० भू० २५४, २ ३४. स्वकीयपदार्थधारणक्रियया १६ ६० जलेनान्नेन वा ३ ४ ७ उदकेनाऽन्नेन वा १ १०८ १२ अपने ही अन्नादि पदार्थ के धारण से स० वि० १४३, अथर्व० १२ ५ ३ **स्वधा**=या स्व दधाति सा (स्त्री) ५.३४ १ अमृतात्मकमन्नम् २ ७ स्वान् दधाति यया सा क्रिया, स्वेन धारिता सेवा वा १६ ३६ ये स्व दधति ते (मनुष्या), प्र०—अत्र विभक्तिलोप ३३ ७४. अपना ही धारण स० वि० १६७ ६ ११३ १० **स्वधाभि:**=स्वय धारितै पदार्थै १.११३ १३ द्यावापृथिवीभि १ ६५ ४ **स्वधाम्**= स्वकीया धारणशक्तिम् १ ८८ ६ सूदकम् २ ३५ ७ **स्वधायै**=स्ववस्तुधारणलक्षणायै राजनीत्यै १० २१ मोक्षविद्याप्राप्तये ऋ० भू० २५८, १६ ४५ अन्नाय, पृथिवीराज्याय, न्यायप्रकाशाय वा २ ३२ **स्वधा:**=उदकानि १ १४४ २ ये स्वयमेव दधते ते (पुत्रादय) २ ३४ [स्वोपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप् सम्पदादित्वात् । अथवा ष्वद आस्वादने (भ्वा०) धातोर्बाहु० औणा० आ प्रत्यय । धातोर्दस्य ध । स्वधा अन्ननाम निघ० २ ७ । उदकनाम निघ० १ १२ द्यावापृथिव्योर्नाम निघ० ३ ३० स्वधा—स्वधा वै पितॄणामन्नम् श० १३ ८ १ ४ स्वधा वै शरद् । श० १३ ८ १ ४]

स्वधर्मन् स्वस्य वैदिके धर्मणि ३ २१ २ [स्व-धर्मन्

अभिमृशे अभिमृशे=अभिसहे २ १० ५ [अभि+मृप तितिक्षायाम् (दिवा०) धातोर्लट् व्यत्ययेन शप्। पकारस्य शकारश्छान्दस]

अभिमित्रम् अभिमुख सखायमिव ७ १८ १० [अभि-मित्रयो समास]

अभियन्तु प्राप्नुवन्तु १२ ६६ [अभि+या प्रापणे (अदा०) धातोर्लोट्]

अभियासिषत् सम्मुख यातुमिच्छतु १ १७४ ५ [अभि+या प्रापणे (अदा०) धातोरिच्छायामर्थे सन्। ततो द्वित्वाऽभावो लेट् च]

अभियुग्वना योऽभियुज्यते वन्यते विभज्यते तेन (रथेन) ६ ४५ १५ [अभि+युजिर् योगे (रुधा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्]

अभियुग्वा योऽभियुङ्क्ते स, भा०—सयुक्त (मरण प्राप्तो जीव) ३६ ७ [अभि+युजिर् योगे (रुधा०) धातो क्वनिप्]

अभियुजः या आभिमुख्येन युज्यन्ते ता प्रजा ३ ११ ६ योऽभियुङ्क्ते तस्य (तन्यतो =विद्युत) ४ ३८ ८ या आभिमुख्येन युञ्जते ता शत्रुसेना ५ ४ ५ या अभियुञ्जते ता (विश =प्रजा) ६ २५ २ [अभि+युजिर् योगे (रुधा०) धातो 'सत्सूद्विष०' अ० ३ २ ६१ सूत्रेण क्विप्]

अभियुध्य अभिमुख युध्यस्व, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ६१ २३ आभिमुख्येन योधय गमय, प्र०—अत्र अन्तर्भावितण्यर्थ युध्यतिर्गतिकर्मा निघ० २ १४, ३४ २३ [अभि+युध सम्प्रहारे (दिवा०) धातोर्लोट् व्यत्ययेन परस्मैपदम्]

अभियोधिष्टम् अभिमुख युध्येयाताम् ६ ६० २ [अभि+युध सम्प्रहारे (दिवा०) धातोर्लुङ् अडभावश्च]

अभिरक्षति सब ओर से रक्षा करता है ३३ ३०

अभिरक्षन्ति=सर्वत पालयन्ति १ १६३ ५ [अभि+रक्ष पालने (भ्वा०) धातोर्लट्]

अभिरुरुहुः अभिवर्धन्ते ५ ७ ५ [अभि+रुह वीजजन्मनि प्रादुर्भावे च धातोर्लिट्]

अभिवक्षसि आभिमुख्येन वदसि ३ १५ ५ [अभि+वच परिभाषणे (अदा०) धातोर्लेट् 'सिब्बहुल लेटि' इति सिप्]

अभिवक्षि प्रापय ६ २१ १२ [अभि+वह प्रापणे (भ्वा०) धातोर्लुङि उत्तमैकवचने रूपम् अडभावो पुरुषव्यत्ययश्च]

अभिवदति दूसरे के साथ सवाद या दूसरे को अभिवादन करता है स० वि० २०६ अथ० ६ ६ १.४ [अभि+-वद व्यक्तायां वाचि (भ्वा०) धातोर्लट्। वदति गतिकर्मा निघ० २ १४]

अभिवर्षतु अभिमुख वर्षतु ३६ १० सब ओर से बरसे आर्याभि० २ २२, ३६ १० [अभि+वृपु सेचने (भ्वा०) धातोर्लट्]

अभिववक्षे अभिसहन्ति, प्र०—अत्र 'वक्ष सङ्घाते' इत्यस्य प्रयोग १ १४६ २ [अभि+वक्ष रोषे सङ्घात इत्येके (भ्वा०) धातोर्लिट्। व्यत्ययेन परस्मैपदम्]

अभिववे अभिमुख वृणोति ४ १ १३ [अभि+वृञ् वरणे (स्वा०) धातोर्लिट्]

अभिवष्टि अभित कामयते ४ १ ८ [अभि+वश कान्तौ (अदा०) धातोर्लट्। वष्टि कान्तिकर्मा निघ० २ ६]

अभिवहन्ति प्रापयन्ति १ ११८ ४ [अभि+वह प्रापणे (भ्वा०) धातोर्लट्]

अभिवावशाना अभिमुख भृश कामयमाना (गौ =पृथिवी) १ १६४ २८ [अभि+वश कान्तौ (अदा०) धातो 'लिट कानज्वा' अ० ३ २ १०६ सूत्रेण कानच् वावशान पदनाम निघ० ४ २]

अभिवावशे अभिमुख भृश कामयते २ १४ ६ [अभि+वश कान्तौ (अदा०) धातोर्यङ्लुक् व्यत्ययेनात्मनेपदम्]

अभिवाहि आभिमुख्येन प्राप्नुहि १८ ४५ [अभि+वा गतिगन्धनयो (अदा०) धातोर्लोट्]

अभिविक्त सर्वतो विजानीत २५ ३७ सर्वतो विञ्ज्यात् पृथक् कुर्यात् १ १६२ १५ [अभि+विजिर् पृथक् भावे (रुधा०) धातोर्लुङ् अडभावश्च]

अभिविख्येषम् अभित सर्वतो विविध पश्येयम्, प्र०—अत्राऽभिव्योरुपपदे चक्षिङ् इत्यस्याऽऽशीर्लिङ्यार्धधातुकसज्ञामाश्रित्य ख्याञ्-आदेश, 'लिङ्याशिष्यङ्' इत्यङ्, सार्वधातुकसज्ञामाश्रित्य च या इत्यस्य इय्-आदेश, सकारलोपाऽभाव इति १ ११]

अभिविद्यौत् अभिविद्योतयेत् ४ ४ ६ [अभि+वि+द्युत दीप्तौ (भ्वा०) धातोर्लुङ्। अडभाव। 'द्युद्भ्यो लुङि' ति परस्मैपदम्। च्लेर्लुक् च]

अभिविनश्यति सर्वतोऽदृष्ट भवति १ १७० १ [अभि+वि+णश अदर्शने (दिवा०) धातोर्लट्]

सुलुक्०' सूत्रेण शस. स्थान आकारादेश । अन्यत्र प्रथमा-द्विवचनस्याकार]

स्वधरासः सुष्ठ्वध्वरा क्रियायोगसिद्धयो येभ्यस्ते (अग्नय =पावका) ४ ४५ ५ [सु-अध्वरपदयो समासे जसोऽसुक्]

स्वनः शब्द १ १४३ ५ [स्वन शब्दे (भ्वा०) धातो 'स्वनहसोर्वा' इत्यप् । स्वनः वाङ्नाम निघ० १ ११.]

स्वनयेन स्वस्य नयन यस्य दातुस्तेन (दातृजनेन) १.१२६.३. [स्व-नयपदयो समास । नय.—णीञ् प्रापणे (भ्वा०) धातो 'एरच्' इत्यच्]

स्वनीक शोभनमनीक सेना यस्य तत्सम्बुद्धौ (सेनापते) २ १ ८. उत्तमसैन्य (अग्ने=राजन्) ४ ६.६. शोभनान्यनीकानि सैन्यानि यस्य तत्सम्बुद्धौ (अग्ने=विद्वन्राजन्) ६ १५ १६ [सु-अनीकपदयो' समास । अनीकम्=अन प्राणने (अदा०) धातो 'अनिहृपिभ्या किच्च' उ० ४ १७ सूत्रेण ईकन्]

स्वप शेष्व ७.५५ २ [ञिष्वप् शये (अदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुङ् न]

स्वपतः शयन प्राप्तस्य (लोकस्य=जीवस्य) ३४ ५५. **स्वपते**=प्राप्तसुषुप्तये (जनाय) २२ ७ **स्वपन्**=शयान. सन् (भा०—उत्तमपुरुष) ५.४४.१३ [ञिष्वप् शये (अदा०) धातो' शतृ]

स्वपत्यम् सुष्ठ्वपत्ययुक्तम् (रयिं=श्रियम्) २ ४ ८ शोभनान्यपत्यानि सन्ताना यस्मात्तम् (रयिम्) ७ १ ५. शोभन सन्तानम् १ ११६ १६ **स्वपत्यस्य**=शोभनान्यपत्यानि विद्यार्थिनो वा यस्य तस्य (शिक्षो =शिक्षकजनस्य) ३.१६.३ शोभनापत्यसहितस्य (राय =धनस्य) २ २ १२. **स्वपत्यानि**=शोभनानि च तान्यपत्यानि २७.२३ शोभनशिक्षायुक्तान् पुत्रादीन् १ ७२ ६. सुष्ठु शिक्षयोत्तमानि चाऽपत्यानि च तानि ४ ३४ ६ **स्वपत्ये**=स्वकीये सन्ताने ३ ३.७ [सु-अपत्यपदयो. समास । अपत्यम् अपत्यनाम निघ० २ २. अपत्य कस्मात् ? अपतत भवति । नानेन पततीति वा नि० ३.१]

स्वपत्यै शोभनान्यपत्यानि यस्या तस्यै (इषे=अन्नरूपायै राज्यलक्ष्म्यै) १ ५४ ११. [सु-अपत्यपदयो समासे स्त्रिया टापि चतुर्थ्येकवचने छान्दस रूपम्]

स्वपनम् निद्राम् ३० १७ [ञिष्वप् शये (अदा०) धातोर्ल्युट्]

स्वपसः शोभनानि धर्म्याणि कर्माणि येषान्ते (विद्वज्जना) १ १६१ ६ सुष्ठ्वपो धर्म्यं कर्म कुर्वाणाः (विद्वज्जना) ४ २ १६ सुष्ठ्वपासि कर्माणि येभ्यस्ते (पितर.) १.१५६ ३ **स्वपसा**=सुष्ठु कर्मणा २५ ३ **स्वपाः**=शोभनानि धर्म्याण्यपासि कर्माणि यस्य स (विद्वज्जन) १.१३०.६. सत्यभाषणादिकर्मा (योगिजन.) ५ २६ १५. शोभनान्यपासि कर्माणि यस्य तद्वन् (अग्ने=सभापते राजन्) ८ ३८. सुष्ठुकर्मा (विद्वज्जन) ५ २ १० श्रेष्ठकर्मानुष्ठान' (पिता) ५ ६० ५ [सु-अपस्पदयो. समास । अप कर्मनाम निघ० २ १ स्वपस. सुकर्माणः नि० ८.१३]

स्वपस्तमम् अतिशयेन शोभनान्यपासि कर्माणि यस्मात्तम् (वज्र =किरणसमूहम्) १ ६१ ६ **स्वपस्तमः**=शोभनान्यपासि कर्माणि यस्य सोऽतिशयित. (राजसन्तानः) ४.१७४. [स्वपम् इति व्याख्यातम् । ततोऽतिशायने तमप्]

स्वपस्यमानः शोभनानि चाऽपासि कर्माणि च स्वपासि, तान्याचरतीव स (सूनु) १ ६२ ६ [स्वपस् इति व्याख्यातम् । तत आचारेऽर्थे क्यङन्ताच्छानच्]

स्वपस्यया आत्मन. सुष्ठ्वपस. कर्मण इच्छया १ १६१ ११ सुष्ठ्वपासि कर्माणि तान्यात्मन इच्छया ४ ३५.२. शोभनान्यपासि कर्माणि यस्या तया क्रियया १ ११० ८ **स्वपस्या**=सुष्ठु धर्म्यकर्मेच्छया ४.३५ ६. [स्वपम् इति व्याख्यातम् । तत आत्मन इच्छायामर्थे क्यजन्तात् स्त्रियाम् 'अ प्रत्ययात्' इत्यकार ततष्टाप्]

स्वपस्याय शोभनान्यपासि कर्माणि यस्य तस्मै (इन्द्राय=ऐश्वर्ययुक्ताय जनाय) २४ १ [सु-अपस्पदयो समासे कृते मत्वर्थे यत् छान्दस]

स्वपाक सुष्ठ्वपरिपक्वज्ञान (अग्ने=राजन्) ४ ३ २. [सु-अपाकपदयो समास । अपाक —नञ्-पाकयो समास । पाक =डुपचष् पाके (भ्वा०) धातोर्घञ्]

स्वपिवात वायुरिव वर्त्तमान (राजन्) ७ ४६.३ [स्वपिवात स्वाप्तवचन नि० १० ६]

स्वपूभिः शयानै., स्वकीयै पवित्राचरणै सह ७ ५६ ३ [ञिष्वप् शये (अदा०) धातोर्बाहु० औणा० ऊ । अथवा स्वोपपदे पूञ् पवने (क्र्या०) धातो क्विप्]

स्वप्नस्य निद्राया १ १२० १२ **स्वप्नेन**=शयनेन २.१५ ६ [ञिष्वप् शये (अदा०) धातो 'स्वपो नन्' इति नन्]

स्वभानवः स्वकीया भानुर्दीप्ति प्रकाशो येषान्ते (विप्रा =मेधाविजना) ३ ५१ वायुवत् स्वभानवो ज्ञान-

पदयो समासे 'सुपा सुलुक्०' इति सप्तम्या लुक्]

स्वधापते अन्नादीना स्वामिन् (इन्द्र=महैश्वर्ययुक्त प्रजाजन) ६ ४४ २ स्वकीयपदार्थाना धर्त्त (इन्द्र=राजन्) ६ ४४ ३ अन्नस्वामिन् (इन्द्र=राजादिजन) ६ ४४ १ [स्वधा-पतिपदयो समास । स्वधेति व्याख्यातम्]

स्वधायिभ्यः ये स्वधामुदकमन्न वैतु प्राप्तु शीलास्तेभ्य (पितृभ्य =पालकेभ्यो जनकाध्यापकेभ्य) १९ ३६ [स्वधोपपदे इण् गतौ (अदा०) धातोस्ताच्छील्ये णिनि । स्वधेति व्याख्यातम्]

स्वधावन् प्रशस्ताऽन्नयुक्त (राजन्) ५ ३ २ **स्वधावान्**=प्रशस्तस्वधा अमृतरूपा गुणा विद्यन्ते यस्मिन् स (भा०–हृद्यो महागुणी बाल, अमृतवर्षकश्चन्द्रमा) ३३ ५ बहुधनधान्ययुक्त (इन्द्र =सूर्य इव राजा) ७ २० १ स्वेन स्वकीयेन गुणेन धार्यत इति स्वधाऽमृतरूप ओषध्यादिरसस्तद्वान् (हरि =चन्द्र) १ ९५ १ स्वधा स्वकीया अवयवा प्रशस्ता विद्यन्तेऽस्मिन् स (कवि =काल) १ ९५ ४ प्रभूताऽन्नवान् (इन्द्र =पुरुषार्थिसभेश) २ २० ६ बह्वन्नाद्यैश्वर्य ४ ५ २ [स्वधाप्राति० प्रशसाया भूम्न्यर्थे वा मतुप् । स्वधेति व्याख्यातम् । स्वधावत्—अन्नवते नि० १० ६ स्वधाव अन्नवन् नि० १२ १७]

स्वधावरी बह्वन्नादिप्रदे (रोदसी=द्यावापृथिव्यौ) ७ ३१ ७ [स्वधावन् इति व्याख्यातम् । तत स्त्रिया 'वनो र च' इति ङीप्-रेफौ]

स्वधावः प्रशस्त स्वधाऽन्न विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=जगदीश्वर सभाध्यक्ष वा) १ ६३ ६ बह्वन्नयुक्त (जगदीश्वर) १७ २१ प्रशस्तानि स्वधा अमृतरूपाण्यन्नानि विद्यन्ते यस्य तत्सम्बुद्धौ (अग्ने=प्रकाशात्मन् विद्वज्जन) ३ २० ३ बहुधनधान्ययुक्त (राजन्) ५ ३ ५ हे स्वसामर्थ्यादि धारण करने वाले (ईश्वर) आर्याभि० २ ३८, १७ २१

स्वधाव्ने=य स्व दधाति तस्मै (पत्ये) ५ ३२ १० य स्व वस्त्वेव दधाति, य स्वा धार्मिका क्रिया दधाति तस्मै (देवाय=विद्वज्जनाय) ७ ४६ १ [स्वधावन् इति व्याख्यातम् । तत सम्बुद्धौ 'मतुवसो रु सम्बुद्धौ०' अ० ८ ३ १ सूत्रेण रुत्वम्]

स्वधास्थाः सत्यविद्याभक्ति-स्वपदार्थधारिण (सर्वमनुष्या) ऋ० भू० २५४, [स्वधोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क । स्वधेति व्याख्यातम्]

स्वधितिम् वज्रम् २ ३९ ७ **स्वधितिः**=विद्युत् १ १६२ १८ वज्र इव वर्त्तमान (वैद्य) २५ ४१ अविनाशित्वाद् वज्रमय (रुद्र =उपदेशक) ३ ६३ **स्वधिते**=स्वेष्वात्मीयेषु धिति पोषण यस्यास्तत्सम्बुद्धौ (अध्यापिके स्त्रि) ६ १५ रोगनाशने स्वधितिर्वज्रवत् प्रवर्त्तमान (विद्वज्जन) ४ १ दु खविच्छेदक (विद्वज्जन) ५ ४२

स्वधितौ=वज्रवद्वर्त्तमानौ (स्वरौ) २५ ३७ स्वेन धृतौ (स्वरौ=शब्दोपतापौ) १ १६२ ६ [स्व-धितिपदयो समास । धिति—डुधाञ् धारणपोषणयो (जु०) धातो स्त्रिया क्तिन् । स्वधिति वज्रनाम निघ० २ २०]

स्वधितिवान् स्वधिति प्रशस्तो वज्रो विद्यते यस्य स (विद्वान् शिल्पिजन) १ ८८ २ [स्वधितिरिति व्याख्यातम् । तत प्रशसाया मतुप्]

स्वधितीव वज्रधर इव (राजेव) ५ ७ ८ [स्वधिति-इवपदयो समास । स्वधिति वज्रनाम निघ० २ २०]

स्वधृतिः स्वेषा धारणम् २२ १९ स्वेषा पदार्थाना धारणम् ८ ५१ [स्व-धृतिपदयो समास । धृति =धृञ् धारणे (भ्वा०) धातो स्त्रिया क्तिन्]

स्वध्वर शोभना अध्वरा यस्य तत्सम्बुद्धौ (विद्वज्जन) १ ४४ ८ सुष्ठ्वहिंसायुक्त (राजन्) ५ २८ ५ **स्वध्वरम्**=सुष्ठ्वहिंसनीयम् (विद्युदाख्य वह्निम्) ३ ९ ८ शोभना अध्वरा यस्मात्तम् (अग्नि=प्रकाशमानामग्निविद्याम्) ६ १६ ४०. सुष्ठ्वध्वरा अहिंसिता क्रिया यस्मात्तम् (रथ=रमणीय यानम्) ४ ४६ ४ सुष्ठ्वहिंसाधर्मप्राप्तम् (अग्निम्) ५ ९ ३ शोभना पालनीया अध्वरा यस्य तम् (जनम्) १ ४५ १ सुष्ठ्वध्वरा अहिंसनीया व्यवहारा यस्मात्तम् (अग्नि=अग्निविद्याम्) १५ ३२ शोभना अध्वरा अहिंसादयो व्यवहारा यस्य तम् (अग्नि=सत्योपदेशकम्) ७ १६ १ **स्वध्वरः**=शोभनकारित्वादहिंसनीय (पुरुष) १५ ४७ सुष्ठु यज्ञस्याऽनुष्ठाता (पति) १ १२७ १ हिंसितुमनर्ह (राजा) २ २८ **स्वध्वरे**=सुशोभमाने (यज्ञे) १ १४२ ५ शोभनेऽहिंसामये (यज्ञे) ५ १७ १ [सु-अध्वरपदयो समास । अध्वर यज्ञनाम निघ० ३ १७ अध्वर इति यज्ञनाम । ध्वरति हिंसाकर्मा तत्प्रतिषेध नि० १ ८]

स्वध्वरा सुष्ठ्वहिंस्रस्वभावयुक्तान् (विद्यार्थिजनान्) ७ १७ ४ सुष्ठ्वहिंसाधर्मयुक्तान् (सज्जनान्) ६ १० १ शोभनान्यहिंसादीनि कर्माणि येषु व्यवहारेषु तान् ३ २९ १२ शोभनोऽध्वरोऽहिंसामयो व्यवहारो येषान्तान् (देवान्=विदुषोऽध्यापकान्) ७ १७ ३ सुष्ठ्वध्वरो यज्ञो याभ्यान्तौ (सूर्यविद्युतौ) ३ ६ ६. [सु-अध्वरपदयो समासे सुपा

ततो लोट्। अन्यत्र लट्। अथवा स्वृ शब्दोपतापयो. (भ्वा०) धातोर्लोट्। अन्यत्र लट् च]

स्वरङ्कृतेन सुष्ठु पूर्णेन कृतेन (यज्ञेन) १ १६२ ५. सुष्ठ्वलङ्कृतेन (यज्ञेन), प्र०—अत्र कपिलकादित्वाद्रेफः २५.२८ [सु-अलम्-कृतपदाना समास.। कपिलकादित्वात् लस्य रेफ]

स्वरणम् य स्वरति शब्दार्थसम्बन्धानुपदिशति तम् (सोमान=यजमानम्) १ १८.१ सर्वविद्याप्रवक्तारम् (विद्वज्जनम्) ३.२८. [स्वृ शब्दोपतापयो (भ्वा०) धातो इति 'कृत्यल्युटो वहुलम्' कर्त्तरि ल्युट्। स्वरणम्=प्रकाशनवन्तम् नि० ६.१०]

स्वरवः सुस्वरान् सेवमाना (हसा पक्षिविशेषा) ३.८ ६. स्वकीयो रवो विद्याप्रज्ञापक शब्दो येषान्ते (देवास =विद्वज्जना) ३ ८ ६ प्रशसका विद्वज्जना.) ३.८ १०. प्रतापयुक्ता (उपस इव कन्या) ४ ५१ २ **स्वरुम्**=तापकमादित्यम् १.६२ ५ **स्वरुः**=उपदेष्टा (विद्वज्जन) ४ ६ ३ भा० प्रतापयुक्त (इन्द्र =ईश्वर) ३३ २४. **स्वरूणाम्**=यज्ञशालास्तम्भ-शब्दानाम् ७ ३५ ७. [स्वृ शब्दोपतापयो (भ्वा०) धातो 'शृस्वृस्निहि०' उ० १.१०. सूत्रेण उ । स्वरु—एतस्माद् (यूपात्) वाऽएपो (शकल) ऽपछिद्यते तस्मै तत्स्वमेवारुर्भवति तस्मात् स्वरुर्नाम श० ३.७ १ २४]

स्वरः स्वय राजमान स्वातन्त्र्यम् १८.१ **स्वरेण**= महाशब्देन १.६२ ४ **स्वरौ**=शब्दोपतापी १ १६२ ६ [स्वोपपदे राजृ दीप्तौ (भ्वा०) धातोर्ड। अन्यच्च—स्वृ शब्दोपतापयो (भ्वा०) धातोरच्। स्वर वाङ्नाम। निघ० १.११. स्वर —स यदाह स्वरोऽसीति सोम वा एतदाहैप ह वै सूर्यो भूत्वाऽमुष्मिल्लोके स्वरति तद् यत् स्वरति तस्मात्स्वरस्तत् स्वरस्य स्वरत्वम्। गो० पू० ५ १४ य आदित्यस्स्वर एव स. जै० उ० ३ ३३ १ प्राण स्वर ता० ७ १ १०. पशव स्वर गो० उ० ३ २२. श्रीर्वै स्वर श० ११ ४ २ १० प्रजापति स्वर.। ष० ३ ७ यथा स्वरेण सर्वाणि व्यञ्जनानि व्याप्तान्येव सर्वान् कामानाप्नोति यश्चैव वेद। सहितो० ख० २ तस्माद् यज्ञे स्वरवन्त दिदृक्षन्तऽएव। श० १४ ४ १ २७ अनन्तो वै स्वर। ता० १७ १२ ३]

स्वराजम् य स्वेन सूर्य इव राजते तम् (सर्वाधीश राजानम्) ३ ४६ २ स्वेपा राजा स्वराजस्तम् (अग्नि= सभाव्यक्षम्) १ ३६ ७ **स्वराजः**=य स्वेन राजते तस्य (राज्ञ) ३ ४६ १ स्व' राजत इति स्वराट्, तस्य (जगत) ५.५२.१. स्वय राजमाना. (विद्युदादयोऽश्वा) १ १८१.२. ये स्व राजन्ते ते, भा० स्वाधीना. (राजपुरुषा) १० ४ **स्वराजे**=य. स्वय राजते तस्मै सर्वाधिपतये परमेश्वराय १.५१ १५ **स्वराट्**=यः सर्वेषु धर्माचरणेषु स्वय राजते स (पति) १३.२४. य स्वेनैव राजते स (इन्द्र'=सम्राट्) ३ ४५ ५ य स्वय राजतेऽसौ परमात्मा १९ ६० वृद्धि. २० ६ य. सम्यग् राजते स (कृतविवाह पुरुष) १३.३५ या स्वय राजते सा (स्त्री) १४ १३. यः स्वयं राजते प्रकाशते स्वान् राजयति प्रकाशयति वा स स्वराट् परमेश्वर ऋ० भू० २६२, १९ ६० [स्वोपपदे राजृ दीप्तौ (भ्वा०) धातो 'सत्सूद्विपद्रुह०' अ० ३ २ ६१ सूत्रेण क्विप्। स्वराट्—(यजु० १३ २४) असौ वै (द्यु-) लोक स्वराट्। श० ७ ४.२ २२ स्वराट् वै तच्छन्दो यत् किञ्च चतुस्त्रिंशदक्षरम्। कौ० १७ १ सोऽश्वमेवेनेष्ट्वा स्वराडिति नामाधत्त गो० पू० ५ ८]

स्वराज्यम् स्वस्य राज्यम् १ ८०.४. स्वकीय राज्यम् १ ८० २ स्वप्रकाशवन्तम् (अग्नि=विद्युतम्) २ ८ ५ **स्वराज्ये**=स्वकीये राष्ट्रे ५ ६६ ६ [स्व-राज्यपदयो समास'। राज्यम्—राजन्प्राति० भावकर्मणोर्य्यो 'पत्यन्तपुराहितादिभ्यो यक्' इति यक्]

स्वरितारः अध्यापका उपदेष्टारो वा १.१६६.११ [स्वृ-शब्दोपतापयो: (भ्वा०) धातो कर्त्तरि तृच्]

स्वरित्राम् शोभनान्यरित्राणि यस्या ताम् (नावम्) २१ ६ [सु-अरित्रपदयो समासे स्त्रिया टाप्। अरित्रम्— ऋ गतौ (भ्वा०) धातो अर्त्तिलूधूसू०' अ० ३.२.१८४ सूत्रेण करण इत्र]

स्वरिः य शोभनश्चासावरिश्च (इन्द्र =सूर्य सभाध्यक्षो वा) १ ६१ ६ [सु-अरिपदयो समास]

स्वरोचिषः स्वय रोची रोचनमेषान्ते (विद्वासो राजजना.) ५.८७ ५ **स्वरोचिः**=स्वकीय रोचिर्दीपन यस्य स (सूर्य) ३ ३८ ४ स्वकीया रोचिर्दीप्तिर्यस्य स (विद्युदग्नि) ३३ २२ [स्व-रोचिष्पदयो. समास। रोचिष्=रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्बाहु० औणा० इसि]

स्वर्काः शोभना अर्का अन्नादय पदार्था येषान्ते (यजमाना) १९ ३२ शोभना अर्का मन्त्रा विचारा येषा ते (मरुत =मनुष्या) ७ ३५ ६ शोभनोऽर्कोऽन्नादिकमैश्वर्यं येषान्ते (अश्वा योद्धारो वा) ७ ३८. ७ सुष्ठ्वर्का अन्नानि वज्रा वा येषान्ते (विद्वज्जना) २१.१०. शोभनोऽर्कोऽन्न

दीप्तयो येषान्ते (विद्वासो जना) १ ३७ २ **स्वभानवे**=स्वकीयप्रज्ञाप्रदीप्तये ६ ४८ १२ **स्वभानो**=स्वकीयदीप्ते (विवाहितजन) ६ ६४ ४ [स्व-भानुपदयो समास । भानु अहर्नाम निघ० १ ६ भा दीप्तौ (अदा०) धातो 'दाभाभ्या नु' रिति नु]

स्वभिष्टय: शोभना अभिष्टयोऽभिप्राया येषान्ते (नर =नायका जना) १ १७३ ६ **स्वभिष्टिम्**=शोभना अभिष्टय इष्टयो यस्मात्तम् (इन्द्र =सेनेशम्), प्र० – अत्र व्यत्ययेन ह्रस्व १ ५१ २ **स्वभिष्टि:**=सुष्ठ्वभिगता सङ्गतिर्यस्य स (इन्द्र =नृप) ६ ३३ १ [सु-अभीष्टि-पदयो समासे छान्दस ह्रस्वत्वम् । अभीष्टि =अभि+इषु इच्छायाम् (तुदा०)+क्तिन्]

स्वभिष्टिसुम्न: सुष्ठ्वभिष्टि सुम्न सुख यस्य यस्माद् वा (इन्द्र =परमैश्वर्यो राजा) ६ २० ८ [स्वभिष्टिरिति व्याख्यातम् । तस्य सुम्नपदेन सह समास । सुम्नम् सुखनाम निघ० ३ ६]

स्वभूति: अपना ऐश्वर्य आर्याभि० १ १३, ऋ० १ ४ १४ २ **स्वभूते**=स्वकीयैश्वर्ये (वायुवद्विद्वज्जन) २७ ३३ [स्व-भूतिपदयो समास]

स्वभूत्योजा: स्वकीया भूतिरैश्वर्यमोज पराक्रमो वा यस्य स (परमेश्वर) १ ५२ १२ [स्व-भूति-ओजस् पदाना समास]

स्वम् स्वकीयम् १ ४६ ६ **स्व:**=स्वयम् (ऋत्विग्) २ ५ ७

स्वमहिम्ना स्वप्रभावेण १.५६ ७. [स्व-महिमन्-पदयो समास]

स्वमीढेषु स्व सुख मिह्यते सिच्यते येषु तेषु (सङ्-ग्रामेषु) १ १३० ८ [स्वर्-मीढपदयो समासे पूर्वपदस्य रेफस्य लोपश्छान्दस । मीढ =मिह सेचने (भ्वा०)+क्त]

स्वयञ्जा: स्वय जाता (आप =जलानि) ७ ४६ २ [स्वयमुपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड । तत स्त्रिया टाप्]

स्वयतास: स्वेन बलेन नियम प्राप्ता नत्वन्येनाश्वा-दिनेति १ १६६ ४ [स्व-यतपदयो समासे जसोऽसुक् । यत =यमु उपरमे (भ्वा०)+क्त]

स्वयम्भू. य. स्वय भवति स, उत्पत्तिनाशरहित. (प्रथम =ईश्वर) २३ ६३ स्वयभवत्यनादिस्वरूप. (सूर्य =जगदीश्वरो विद्वान् जीवो वा) २२६ यो निमित्तोपादानसाधारणकारणरहित (परमात्मा) ऋ० भू० ३६, ४० ८ सदा स्वसामर्थ्ययोगैकरसत्वाभ्या वर्त्त-मान (ईश्वर) प० वि० । सनातन स्वय सिद्ध परमेश्वर स० प्र० २४४, ४० ८ जिसका आदि-कारण माता, पिता, उत्पादक कोई नही, किन्तु सब का आदि कारण वह (ईश्वर) आर्याभि० २ २, ४० ८ अनादिस्वरूपो अस्य सयोगेनोत्पत्तिर्वियोगेन विनाशो, मातापितरौ, गर्भवासो, जन्म, वृद्धिक्षयौ च न विद्येते स (परमात्मा) ४० ८. [स्वयमुपपदे भू सत्तायाम् (भ्वा०) धातो क्विप् । स्वयम्भू अन्तरिक्षनाम निघ० १ ३]

स्वयशसम् स्वकीयगुणकर्मस्वभावकीर्त्तियुक्तम् (सीम्= अहोरात्रव्यवहारम्) १ ६५ २ **स्वयशस:**=स्वकीय यशो येषान्ते (जना) १ १३६ ७ **स्वयशा:**=स्वकीय यश कीर्त्तिर्यस्य स (सत्पुरुष) ७ ३७ ४. स्वकीयकीर्त्ति (अग्नि =सूर्य) १ ६५ ५ [स्व-यशस्पदयो समास । स्वयशस्—आत्मयशा नि० ८ १५]

स्वयशस्तरम् स्वकीय यश कीर्त्तिर्यस्य तदतिशयि-तम् (स्वराज्यम्) ५.८२ २ [स्व-यशस्पदयो समासे-ऽतिशायने तरप्]

स्वयशस्तर: स्वकीय यशो धन प्रशसन वा यस्य सोऽतिशयित (इन्द्र =सम्राट्) ३ ४५ ५ अतिशयेन स्वकीय यशो यस्य स (धर्मात्मजन) ५ १७ २ [स्व-यशस्पदयो समासेऽतिशायने तरप् । यश अन्ननाम निघ० २ ७ धन-नाम निघ० २.१०]

स्वयशोभि: स्वकीयाभि प्रशसाभि १ १२६.८ स्वगुणस्वभावकीर्त्तिभि १ ६५ ६ [स्व-यशस्पदयो समास]

स्वयुक्ता: स्वेनैव गच्छन्त (मरुत =वायव) १ १६८ ४ [स्व-युक्तपदयो समास । युक्त =युजिर् योगे (रुधा०) धातो क्त]

स्वयुक्तिभि: स्वा युक्तयो योजनानि यासु ताभि (नीतिभि) १ ५० ६ आत्मीय-प्रकारै १.११६ ४. [स्व-युक्तिपदयो समास । युक्ति =युजिर् योगे (रुधा०) धातो स्त्रिया क्तिन्]

स्वयु: य स्वय याति स (अग्नि =वह्नि) २ ४ ७ य स्व धन याति स (इन्द्र =सम्राट्) ३ ४५ ५ [स्वोप-पदे या प्रापणे (अदा०) धातो 'मृगय्वादयश्च' उ० १ ३७. इति कु]

स्वर जानीहि, प्राप्नुहि, प्र०—स्वरतीति गतिकर्मसु, निघ० २ १४, १ १० ४ **स्वरन्ति**=शब्दयन्ति ५ ५४ २ उच्चरन्ति ५ ५४ १२ [स्वरति गतिकर्मा निघ० २ १४

मोक्षसुखाय ऋ०भू० १५६, ११.३ [स्वर्ग-प्राति० भवार्थे यत्]

स्वर्चिः प्रशसितदीप्ति (अग्नि) २ ३ २ [सु-अर्चिप्-पदयो समास । अर्चि ज्वलतोनाम निघ० १ १७]

स्वर्जितम् स्व सुख जयत्युत्कर्पति येन तम् (यज्ञम्) ११ ८ **स्वर्जिते**=य सुखेन जयति तस्मै (इन्द्राय=सेनेशाय) २ २१ १ [स्वर् इत्युपपदे जि जये (भ्वा०) धातो क्विप्]

स्वर्जेषे सुखेन जयशीलाय (विदे=ज्ञानवते विदुषे) १ १३२ २. [स्वर् इत्युपपदे जि जये (भ्वा०) धातोस्तुमर्थे से-प्रत्यय]

स्वर्ज्योतिः यथा स्वरन्तरिक्षलोकसमूह द्योतते तथा (भगवान्) ५ ३२ [स्वर्-ज्योतिप्पदयो समास]

स्वर्णरम् य स्व सुख नयति तम् (अग्नि=पावकम्) ६.१५ ४ सुखस्य नेतारम् (अग्नि=विद्युदादिस्वरूपम्) २ २ १ स्वर्णर=ये स्व सुख नयन्ति ते (मरुत=मनुष्या) ५ ५४ १० **स्वर्णरात्**=स्वरादित्य इव नरान्नायकात् (राज्ञ) ४ २१ ३ **स्वर्णरे**=स्व सुखेन युक्ते नरे ५ १८ ४ [स्वर्-नरपदयो समास]

स्वर्थम् सुष्ठ्वर्थ प्रयोजन यस्माद्यद्वाऽनर्थसाधनरहितम् (रयि=धनम्) १ १४१ ११ **स्वर्थे**=शोभनाऽर्थे (रात्रिदिने) १.६५ १ सुष्ठ्वर्थ प्रयोजन ययोरते (स्त्रियौ) ३३.५ [सु-अर्थपदयो समास]

स्वर्दृक् य स्व सुख पश्यति स (जन) ७ ५८ २ **स्वर्दृशम्**=स्व सुख दृश्यते यस्मात्तम् (अग्नि=वह्निम्) ३ २ १४ सुख द्रष्टुम् ७ ३२ २२ य स्वरादित्येन दृश्यते तम् (विद्वज्जनम्) ५ २६ २ सुखेन द्रष्टु योग्यम् (इन्द्र=सभेश राजानम्) २७ ३५. **स्वर्दृशः**=ये सुखेन विद्याऽऽनन्द पश्यन्ति तान् (देवान्=विद्वज्जनान्) १ ४४ ६ य सुख पश्यति तस्य (ब्रह्मचारिण) १ १५५ ५ स्व सुख पश्यन्ति येभ्यस्ते (सज्जना) २ २४ ४ ये स्व सुख यन्ति ते (ऋभुक्षण=मेधाविजना) ७ ३७ २ **स्वर्दृशौ**=यौ स्व सुख दर्शयतस्तौ (राजामात्यौ) ५ ६३ २ [स्वर् इत्युपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो क्विप् । स्वर्दृश—सूर्यदृश नि० १ २३ असौ (सूर्य) वाव स्वर्दृक् ऐ० ४ १०]

स्वर्देवाः सुखे प्रकाशिता (विद्वज्जना) ऋ० भू० १५४, १८ २१ [स्वर्-देवपदयो समास । स्वर् इति व्याख्यास्यते]

स्वर्भानुः य स्वरादित्य भाति स विद्युद्रूप (सूर्य) ५ ४० ५. आदित्येन प्रकाशित. (मेघ) ५.४० ६ **स्वर्भानोः**=आदित्यप्रकाशगम्य ५ ४० ६. स्वरादित्यस्य भानुर्दीप्तिर्यस्य तस्य (मेघस्य) ५ ४० ८ [स्वर्-भानुपदयो. समास]

स्वर्मीढस्य सुखं. सेचकस्य (प्रवनस्य=प्रकृष्टस्य धनस्य) १.१६९ २ **स्वर्मीढे**=स्व सुखस्य मीढ सेचन यस्मिँस्तस्मिन् (आजौ) १ ६३ ६. स्व किरणान् जलानि वा मेहयति यस्मादन्तरिक्षात्तस्मिन् १ ५६ ५ स्व सुखेन युक्ते सङ्ग्रामे ४ १६ १५ [स्वर्-मीढपदयो समास । मीढ=मिह सेचने (भ्वा०)+क्त । मीढ सग्रामनाम निघ० २ १७]

स्वर्यतः शुद्ध-भाव-प्रेम्णा ऋ० भू० १५६, ११४ [स्वर्यन्त स्वर्गच्छन्त नि० १३ ६]

स्वर्यम् स्वरेषु शब्देषु साधुम् (अश्मान=मेघम्) ५ ५६ ४ स्वरेषु विद्यासु सुशिक्षितासु वाक्षु साधु (अनीक=सैन्यम्) १ २१ ४ स्व सुखे साधुस्तम् (वृत्र=किरणसमूहम्) १ ६१ ६ स्वर्हितम् (पुरुषम्) ४ १७ ४ प्रकाशमयम् (वज्रम्) ऋ० भू० २८३, १ ३२ २ स्वरे गर्जने वाचि वा साधुस्तम् (अहि=मेघमिव शत्रुम्) प्र०—स्वरिति वाङ्नामसु पठितम् निघ० १ ११ समी०—इद पदं सायणाचार्येण मिथ्यैव व्याख्यातम् १ ३२ २ **स्वर्यः**=स्वरेषु साधु (इन्द्र.=सभाद्यध्यक्ष) १.६२ ४ [स्वर वाङ्नाम निघ० १ ११. तत साध्वर्थे यत् । स्वर्प्राति० साध्वर्थे यत्]

स्वर्यवः य आत्मन स्व सुख कामयन्ते ते (विप्रा=मेधाविजना) ३ ३० २० ये सुख यावयन्ति मिश्रयन्ति ते (विप्रा) ३ ५० ४ [स्वर्प्राति० आत्मन इच्छायामर्थे क्यजन्ताद् उ । अथवा स्वर् इत्युपपदे यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्विप्]

स्वर्वत् बहुसुखयुक्तम् (ज्योति=ज्ञानप्रकाशम्) ६ ४७ ८ स्व सुख सम्बद्ध यस्मिन् तत् (साम), प्र०—अत्र सम्बन्धे मतुप् १ १७३ १ स्व बहुविध सुख विद्यते यस्मिँस्तत् (द्युम्न=यशो धन वा) ६ १९ ६ सुखवत् (दात्र=दानम्) १ १८५ ३ [स्वर्प्राति० सम्बन्धे मतुप् भूम्न्यर्थे वा]

स्वर्वती विद्यमानसुखा (त्वेपा=प्रदीप्ति) १.१६८ ७ सुखवती (स्त्री) ५ ३४ १ **स्वर्वतीम्**=बहुसुखकारिकाम् (अदिति=दिवम्) १ १३६ ३ **स्वर्वतीः**=स्व सुख विद्यते यासु ता (अप=कर्माणि)

सत्कारो वा येषान्ते (वीरराजजना) ६ १६ **स्वर्कैः**= शोभना अर्का मन्त्रा विचारा वा देवा विद्वांसो येषु तैः (रथैः) १ ८८ १ [सु-अर्कपदयो समास । अर्क अन्ननाम । निघ० २ ७ वज्रनाम निघं० २ २०. पदनाम निघ० ४ २ स्वर्कैः स्वञ्चनैरिति वा स्वर्चनैरिति वा, स्वर्चिभिरिति वा । नि० ११ १४ स्वर्का—स्वञ्चना इति वा, स्वर्चना इति वा, स्वर्चिष इति वा नि० १२.४४ अर्क—अर्को देवो भवति यदेनमर्चति । अर्को मन्त्रो भवति यदनेनार्चन्ति । अर्कमन्न भवत्यर्चति भूतानि नि० ५ ४]

स्वर्गम् अत्यन्त सुख को स० वि० २०६, अथर्व० ६.६ ६ **स्वर्गान्**=स्व सुख गच्छन्ति प्राप्नुवन्ति येभ्य स्तान् (समुद्रान्=लोकान्) १३ ३१ **स्वर्गाय**=विशेष-सुखभोगाय, भा०—मुक्तिसुखाय ३५.२२ सुखविशेषाय ३० १३ सुखगमकाय पुरुषार्थाय, भा० आभ्युदय नैश्रेयसिकसुखप्राप्तये २२ ३४ **स्वर्गे**=सुखकारके (लोके) १५ ११ सुखमये (लोके) २३ २०. सुखप्रापके (लोके) १५ १० [स्वर् इत्युपपदे गम्लृ गतौ (भ्वा०) धातो 'डप्रकरणेऽन्येष्वपि दृश्यते' अ० ३ २ ४८ वा०सूत्रेण ड । स्वर्गो लोक परो वा अस्माल्लोकात्स्वर्गो लोक ऐ० ६ ३० प्रतिकूलमिव हीत स्वर्गो लोक ता० ६.७ १० एकविंशो वा इत स्वर्गो लोक तै० ३ १२ ५ ७ सहस्रसमितो वै स्वर्गो लोक श० १३ १ ३ १ सहस्राश्वीने वा इत स्वर्गो लोक ऐ० २ १७ चतुश्चत्वारिंशदाश्वीनानि सरस्वत्या विनशनात् प्लक्ष प्रास्रवणस्तावदित स्वर्गो लोक सरस्वती सम्मितेनाध्वना स्वर्ग लोक यन्ति ता० २५ १० १६ अपरिमितो वै स्वर्गो लोक ऐ० ६.२३ अनन्तोऽसौ (स्वर्ग) लोक ता० १७ १२ ३ साम्राज्य वै स्वर्गो लोक ता० ४ ६ २४ स्वर्गो लोक सरस्वान् ता० १६ ५ १५ स्तोमा वै त्रय स्वर्गा लोका ऐ० ४ १८ स्वर्गो वै लोक सूर्यो ज्योतिरुत्तमम् (यजु० २० २१) श० १२ ६ २ ८. अहर्वै स्वर्गो लोक । ऐ० ५ २४ स्वर्गो वै लोको व्रध्नस्य विष्टपम् ऐ० ४ ४ स्वर्गो वै लोको नाक (यजु० १२ २) श० ६ ३ ३ १४ दिशो वै स नाक स्वर्गो लोक श० ८ ६ १ ४ स्वर्गो वै लोक सधस्थ (यजु० १८ ५६) श० ६ ५.१ ४६ अथ यत्पर भा (सूर्यस्य) प्रजापतिर्वा स स्वर्गो लोक श० १ ६ ३ १० असौ वै (स्वर्गो) लोको महासि तस्यादित्या अधिपतय तै० ३.८ १८ २ अग्निर्वै स्वर्गस्य लोकस्याधिपति ऐ० ३ ४२ एष वै स्वर्गो लोको यत्र पशु सज्ञपयन्ति श० १३ ५ २ २ ओमिति वै स्वर्गो लोक ऐ० ५ ३२ स्वरिति सामभ्योऽक्षरत् स्व स्वर्गलोको ऽभवत् ष० १ ५ इद वा वामदेव्य यजमानलोकोऽमृतलोक स्वर्गो लोक ऐ० ३ ४६ स्वर्गो वै लोको यज्ञायज्ञिय (साम) श० ६ ४ ४ १०. बृहद् वै स्वर्गो लोक तै० १ २ २ ४ बृहता (साम्ना) वै देवा स्वर्ग लोकमायन् । ता० १८ २ ८. स्वर्गा वै लोका स्वरसाम् कौ० १२ ५ स्वर्गा वै लोका षष्ठमह ऐ० ६ २६ स्वर्ग एव लोक षष्ठी चिति श० ८ ७ ४ १७ एकवृद् वै स्वर्गो लोक श० १३ २ १ ५ वाजो वै स्वर्गो लोक ता० १८ ७ १२ तस्मात् (भूर्लोकात्) असावेव (स्वर्गो) लोक श्रेयान् (अथर्व० ७ ६ १) ऐ० १ १३ स्वर्गो वै लोकोऽभयम् श० १२ ८ १ २२ स्वर्गो लोको देवो देवता भवति गो० पू० ४ ८ स्वर्गो वै लोको दुरोहणम् ऐ० ४.२० स्वर्गस्य हैष लोकस्य रोहो यन्निविद् ऐ० ३ १६ स्वर्गो वै लोको रोह (यजु०१३ ५१) श० ७ ५ २ ३६ मध्ये ह सवत्सरस्य स्वर्गो लोक श० ६ ७ ४ ११ तस्य (सवत्सरस्य) वसन्त एव द्वार हेमन्तो द्वार त वाऽएत सवत्सर स्वर्ग लोक प्रपद्यते श० १ ६ १६ ता वा एता पञ्च (इष्टय) स्वर्गस्य लोकस्य द्वार । अपाद्या अनुवित्तयो नाम । तप प्रथमा रक्षति । श्रद्धा द्वितीयाम् । सत्य तृतीयाम् । मनश्चतुर्थीम् । चरण पञ्चमीम् तै० ३ १२ ४.७ ता वा एता सप्त (इष्टय) स्वर्गस्य लोकस्य द्वार । दिव श्येनयोऽनुवित्तयो नाम । आशा प्रथमा रक्षति । कामो द्वितीयाम् । ब्रह्म तृतीयाम् । यज्ञश्चतुर्थीम् । आप पञ्चमीम् । अग्निर्बलिमान् षष्ठीम् । अनुवित्ति सप्तमीम् । तै० ३ १२ २ ६ एतस्या ह (उदीच्या प्राच्या) दिशि स्वर्गस्य लोकस्य द्वारम् श० ६ ६ २ ४ स्वर्गो वै लोको यज्ञ कौ० १४ १ तया ह यजमान सर्वमायुरस्मिँ-ल्लोके एत्याप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके । कौ० १३ ५ ऋतेनैवैन स्वर्ग लोक गमयन्ति ता० १८ २ ६ छन्दोभिर्हि स्वर्ग लोक गच्छन्ति श० ६ ५ ४ ७ सर्वैर्वै छन्दोभिरिष्ट्वा देवा स्वर्ग लोकमजयन् । ऐ० १ ६ छन्दोभिर्वै देवा आदित्य स्वर्ग लोकमहरन् ता० १२ १० ६ स्वर्गो वै लोको माध्यन्दिन सवनम् । गो० उ० ३ १७ अवस्तात्प्रपदनो ह स्वर्गो लोक श० ८ ६ १ २३ नव स्वर्गा लोका ऐ० ४ १६ दश स्वर्गा लोका गो० उ० ६ २ दश पुरुषे स्वर्गनरकाणि तान्येन स्वर्ग गतानि स्वर्ग गमयन्ति नरक गतानि नरक गमयन्ति जै० उ० ४ २५ ६ न वै मनुष्य स्वर्ग लोकमञ्जसा वेदाश्वो वै स्वर्ग लोकमञ्जसा वेद श० १३ २ ३ १ असमायी वै स्वर्गो लोक कश्चिद्वै स्वर्गे लोके समेतीति ऐ० ६ २६]

स्वर्ग्याय स्व सुख गच्छति येन तद्भावाय ११ २.

अ० ६ १ १५१. सूत्रेण सुडागम]

स्वश्नम् सुष्ठु मेघम् २ १४ ५. [सु-अश्नपदयो समास । अश्न मेघनाम निघ० १ १०]

स्वश्वः शोभना अश्वा वेगवन्तो विद्युदादयस्तुरङ्गा वा यस्मिन् स (रथ) १ ११७ २. शोभना अश्वा यस्य स (इन्द्र =नृप) ६ ३३ १. शोभनाऽश्व (मनुष्य.) ४ ४५ ७ सुष्ठ्वश्वा यस्य स. (अग्नि =विद्वज्जन) ४ २.४ **स्वश्वान्**=शोभनाश्व तेऽश्वाश्च तान् १० २२ **स्वश्वाः**= शोभना अश्वास्तुरङ्गा अग्न्यादय पदार्था वा येषान्ते (नर =नायका जना) ४ ४२ ५. शोभना अश्वास्तुरङ्गा महान्तो जना वा येषान्ते (नर =श्रेष्ठा मनुष्या.) ७ ५६ १ [सु-अश्वपदयो समास]

स्वश्वासः शोभना अश्वा येषा ते (मनुष्या) ५ ६५ ३ [सु-अश्वपदयो समासे जसोऽसुगागम]

स्वश्व्यम् शोभनेष्वश्वेषु साधुम् (रत्न =धनम्) ३ २६ ३. शोभनेष्वश्वेषु भवम् (कार्यम्) २५ ४५ शोभना अश्वा यस्मिँस्तम् (रथम्) १ ११८० ६. शोभनेष्वश्वेषु विद्याव्याप्तिविषयेषु साधुम् (वीर्यम्) १ ४० २० शोभनेष्वश्वेषु अग्न्यादिषु भवम् (बलम्) २ १ ५ [सु-अश्वपदयो समासे भवार्थे साध्वर्थे वा यत्]

स्वसरम् दिनम् ६ ६८ १० **स्वसराणि**=अहानि, प्र०—स्वसराणीत्यहर्नामसु पठितम् निघ० १ ९, १ ३ ८ **स्वसरेषु**=गोष्ठेषु २ २ २ [स्वसराणि अहर्नाम निघ० १.९. गृहनाम निघ० ३ ४ पदनाम निघ० ४ २ स्वसराणि—स्वसराण्यहानि भवन्ति स्वय सारिण्यपि वा । स्वरादित्यो भवति स एनानि सारयति नि० ५ ४]

स्वसा भगिनी १ ८० २ बहिन स० वि० १४१, अथर्व० ३ ३० ३ **स्वसारम्**=भगिनीस्वरूपां रात्रिम् १ ९२ ११ **स्वसारः**=अङ्गुलय ४ ६ ८ भगिन्य कन्या २ ५ ५. भगिन्य इव सर्पादिनाशेन सुखप्रदा (मयूर्य) १ १९१ १४ भगिन्य इव वर्त्तमाना कला १ १६४ ३ अङ्गुल्य इव मैत्री भगिनित्वमाचरन्त्य (विदुष्य स्त्रिय) ४ २२.७ युवतयो भगिन्य १.७१ १ **स्वस्रा**=सुष्ठ्वस्यति प्रक्षिपति यया विद्यया क्रियया वा तया, भा०—वेदादिशब्दविद्यया, प्र०—'सावसेर्ऋन्' उ० २ ९६ अनेन स्वसृशब्द' सिध्यति ३ ५७ **स्वसुः**=भगिन्या इव वर्त्तमानाया उषस ६ ५५ ४ **स्वसृः**=स्वसेव वर्त्तमाना (सर्वमूर्त्तद्रव्या) ६ ६१ ९ **स्वस्रॄणाम्**=स्वसॄणा भगिनीनाम् १ ६५ ४ **स्वस्रोः**=भगिनीवद्वर्त्तमानयो (रात्र्युषसो) १ ११३ ३ [सु+असु क्षेपणे (दिवा०) धातो 'सावसेर्ऋन्' उ० २.९६. सूत्रेण ऋन् । स्वसार अगुलिनाम निघ० २ ५. स्वसा=सु असा स्वेषु सीदतीति वा नि० ११ ३२]

स्वसिचः या स्वैर्जनैर्जलेन सिच्यन्ते ता (नाव = विमानानि) १० १९. [स्वोपपदे षिच क्षरणे (तुदा०) धातो कर्मणि क्विप्]

स्वसृत् य स्वान् सरति प्राप्नोति स (सेनापति) १ ८७ ४ **स्वसृतः**=ये स्वान् गुणान् सरन्ति प्राप्नुवन्ति ते (मरुत =मनुष्या.) १ ६४ ११ [स्वोपपदे सृ गतौ (भ्वा०) धातो कर्त्तरि क्विप् । 'ह्रस्वस्य पिति०' इति तुगागम]

स्वस्तकौ उत्तम घर वाले (स्त्री पुरुषो) स० वि० १३७, अथर्व० १४.१.२२ सुखयुक्त (स्त्रीपुरुषो) स० वि० १४०, अथर्व० १४ २.६४

स्वस्तये सुखाय कल्याणाय च १ १ ९ निरुपद्रवाय (सुखाय), परमसुखाय ५ ५१ १२ सुखलब्धये ६ १५ १८ आनन्दाय ५ ५१ १३ अविनष्टायाऽभिपूजिताय सुखाय १ २२ १२ सर्वसुखाय ऋ० भू० ८८, ऋ० १ ६ १५ ५ निरुपद्रवता के लिए आर्याभि० २.५०, २५ १८ सब दु खो के नाश के लिए आर्याभि० २ १५, ३ २४ स्वस्थता के लिए आर्याभि० १ १०, ऋ० १ ६ १५ ५ ऐहिक-पारमार्थिक-सुखाय, वे० भा० न० । **स्वस्तिभिः**=कल्याणकरै कर्म्मभि २० ५४ स्वास्थ्यकारिकाभि सुखै कर्मभिर्वा ७ ३ १० स्वास्थ्यप्रदै सुखै, भा०—विद्याशिक्षासौभाग्यं ३४ ४०. विद्यादिदानै ७ ३५ १५ सुखै सह २७ २८ सब प्रकार के रक्षणो से आर्याभि० १ २७, ऋ० ५ ३ २७.२५ **स्वस्तिम्**=सुख शान्ति वा ६ २ ११ **स्वस्तिः**=स्वास्थ्यम् ३ ३८ ९ **स्वस्त्या**=प्रापकसुखक्रियया १३ १९ सत्क्रियया १५ ६४. [स्वस्तीत्यविनाशिनाम । अस्तिरभिपूजित सु-अस्तीति नि० ३ २२ स्वस्तये-स्वस्त्ययनाय नि० ५ २७]

स्वस्ति स्वास्थ्यम् ३ ३८ ९ शरीरसुख धातुसाम्यसुख, इन्द्रियशान्तिसुख, विद्ययाऽऽत्मसुख वा १ ८९ ६ प्राप्तव्य सुखम्, प्र०—स्वस्तीति पदनामसु पठितम् निघ० ५ ५ अनेन प्राप्तव्य सुख गृह्यते ३ १८ सुखमयम् (धनम्) ५ ४ ११ सुख सुखेन वा ४ ३३ कल्याणम् १७ ३९ शोभनमस्ति यस्मिन् प्राप्तव्ये तत्सुखम् ४ २० [सु-अस्ति-पदयो समास । स्वस्ति पदनाम निघ० ५ ५ स्वस्ति स्वपितिकर्मा निघ० ३ २२]

स्वस्तिगव्यूतिः स्वस्ति सुखेन सह गव्यूतिर्मार्गो

१.१०८ स्व प्रशस्तानि सुखानि विद्यन्ते यासु ता (ऊती =रक्षणाद्या) ११११९८ प्रशस्तसुखयुक्ता (अप =प्राणान्) ५ २ ११ [स्वर्प्राति० भूम्न्यर्थे मतुबन्तात् स्त्रिया ङीप्]

स्वर्वन्तः बहुसुखयुक्ता (विद्वज्जना) ६ ५० २ **स्वर्वान्**=बहु सुख विद्यते यस्मिन्त्स (परमात्मा) ६ २२ ३ स्वर्बहुसुख विद्यते यस्य स (कीरि =स्तोता विद्वज्जन) ६ ३७ १ [स्वर्प्राति० मतुप् भूम्न्यर्थे। स्वर् इति व्याख्यास्यते]

स्वर्वित् प्राप्तसुख (वैश्वानर =प्रधानपुरुष) ३ ३ १० सुखप्रापक. (मातरिश्वा=वायु) १ ९६ ४ **स्वर्विदम्**=स्व सुख वेदयति तम् (वृजन=योगबलम्) ७ १२ स्व सुख विन्दन्ति येन तम् (राजानम्) ५ ४४ १ स्वोऽन्तरिक्ष विन्दति येन तम् (रथम्) १ ५२ १ स्व सुख विन्दति यस्मात्तम् (अग्निम्) ३ ३ ५ स्वरुदक विन्दन्ति येन तम् (विद्वज्जनम्) २ २३ ३ **स्वर्विदः**=सुख को प्राप्त होने वाले (विद्वान् लोग) स० वि० १८९, अथर्व० १९ ४१.१. **स्वर्विदा**=स्व सुख विन्दति येन तेन (नाभिना=बन्धनेन) ६ ३९ ४ **स्वर्विदे**=य सुख वेत्ति तस्मै, भा०—सुखप्रापकाय (विद्वज्जनाय) १७ १२ [स्वर् इत्युपपदे विद्लृ लाभे (तुदा०) धातो क्विप्। स्वर्विदि सूर्यविदि नि० ७ २५]

स्वर्विदा यौ सुख विन्दतस्तौ (स्त्रीपुरुषौ) ११ ३१ [स्वर्विदिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

स्वर्षाता सुखस्य दाता (राजा) ६ ३३ ४ सुखाना विभाजक (अविद्यो जन) ६.१७ ८ सुखस्याऽन्त प्राप्त (राजा) ४ १६ ६. सुखाना विभागे, प्र०—अत्र 'सुपा सुलुक्०' इति डेर्डा १ १३१ ६ [स्वर् इत्युपपदे षणु दाने (तना०) धातो क्त। षण सम्भक्तौ (भ्वा०) धातोर्वा क्त। स्वर्षातप्राति० सोर्विभक्तेर्डादेश। अथवा स्वर् इत्युपपदे षोऽन्त कर्मणि (दिवा०) धातो क्त। तत सोर्डादेश]

स्वर्षाम् य स्व सुख सनोति तम् (सेनाद्यध्यक्षम्), प्र०—अत्र 'सनोतेरन' अ० ८ ३ १०८ अनेन षत्वम् १ ९१ २१ स्व सुख सनति विभजति यया ताम् (धिय= प्रज्ञा कर्म वा) ५ ४५ १० सुखप्रापकम् (सूरि=विद्वज्जनम्) १.६१.३. य स्व सुख सनति सम्भजति तम् (राजान सेनापति वा) ३४ २० स्व सुखानि सनन्ति भजन्ति यया ताम् (जिह्वा=वाचम्) १३ १५ स्व सुख सनोति ददाति यया ताम् (जिह्वाम्) १५ २३ **स्वर्षाः**=स्व सुखेन सनोति स (वज्र =शस्त्रास्त्रसमूह), प्र०—अत्र स्वपूर्वात् सन-धातो 'कृतो बहुलम् वा' इति करणे विच् १ १०० १३. स्व सुख सनोति येन स (मनुष्य) २ १८ १ [स्वर् इत्युपपदे षण सम्भक्तौ (भ्वा०) षणु दाने (तना०) धातोर्वा 'जनसनखन०' इति विट्। 'विड्वनोरनुनासिकस्यात्' इत्याकारादेश। 'सनोतेरन' अ० ८ ३ १०८ सूत्रेण षत्वम्]

स्ववर्त्तयः शोभन वर्त्तये ५ ३० ७ [सु+वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लङ्]

स्ववसम् शोभनमवो रक्षणादिक यस्य तम् (गृहपतिम्) ५.८ २ सुष्ठ्ववो रक्षण यस्मात्तम् (अग्नि= विद्युतम्) ५ ६० १ **स्ववसः**=शोभनमवो रक्षणादिक कर्म येषा ते (ऋभव =मेधाविजना) ४.३३.८ [सु-अवस्पदयो समास। अवस्=अव रक्षणादिषु (भ्वा०) धातोरसुन्]

स्ववसा सुष्ठु रक्षकौ (वाय्वग्नी) १ ९३ ७ [सु-अवस्पदयो समासे द्विवचनस्याकारादेश। अवस्= अव रक्षणगत्यादिषु (भ्वा०) धातोरसुन्]

स्ववान् प्रशस्त स्व विद्यते यस्य स (इन्द्र =सभेश) २० ५२ स्वे प्रशस्ता स्पर्शादयो गुणा विद्यन्ते यस्य स (वायु) प्र०—अत्र प्रशसार्थे मतुप् १ ३५ १०. बहव स्वे स्वकीया उत्तमा जना विद्यन्ते यस्य स (इन्द्र =राजा) २० ५१ स्वे आत्मीया बहवो विद्यन्ते यस्य स (सर्वोत्तमो राजा) ६ ६८ ५ प्रशस्ता स्वे भृत्या पदार्था वा विद्यन्ते यस्मिन् स (रथ) १ ११८ १ स्वकीयसामर्थ्ययुक्त इन्द्र =राजा) ६ ४७ १८ स्वे स्वकीया प्रकाशादयो गुणा विद्यन्ते यस्मिन् स (देव =सूर्य) ३४ २६ [स्वप्राति० प्रशसाया भूम्न्यर्थे वा मतुप्]

स्वविद्युतः स्वेन रूपेण व्याप्ता (अग्नय =पावका) ५ ८७ ३ [स्व-विद्युत्पदयो समास]

स्ववृष्टिम् स्वकीयाना घनानामिव प्रेरिताना पदार्थाना जलाना वा वर्षण प्रति १ ५२ १४ स्वस्य शस्त्राणा वा वृष्टिर्यस्य तम् (सूर्य सभाद्यध्यक्ष वा) १ ५२ ५ [स्व-वृष्टिपदयो समास]

स्वशोचिः स्व शोचिस्तेजो यस्य स (तेजस्विजन) ६ ६६ ६ [स्व-शोचिष्पदयो समास। शोचि ज्वलतो नाम निघ० १ १७]

स्वश्चन्द्रम् स्वेन प्रकाशेनाऽऽह्लादकारकेण युक्त सुवर्णम् १ ५२ ६ [स्व-चन्द्रपदयो समास। चन्द्रमिति हिरण्यनाम निघ० १ २ 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे'

स्वादुषसदः ये स्वादून्यन्नानि भोक्तु ससीदन्ति न्याय कर्त्तु सभाया वा ते (राजपुरुषा) ६ ७५ ९ ये स्वादुषु भोज्याद्यन्नेषु सम्यक् सीदन्ति ते (पितर=पालनक्षमा राजपुरुषा) २९ ४६ [स्वादूपपदे सम्पूर्वकात् षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्। सस्य मूर्धन्यश्छान्दस]

स्वादुः सुस्वादयुक्त (ओषधिसार) ६ ४७ १. [स्वादुरिति व्याख्यातम्। ततो मत्वर्थीयस्य लुक्]

स्वादो स्वादु (अन्नम्) १ १८७ २ [स्वादुरिति व्याख्यातम्। तत सम्बुद्धौ रूपम्]

हवीमभिः स्तोतुमर्हैराह्वातुमर्हैर्वा कर्म्मभि १ १३१ ६ सुष्ठ्वौषधदानै २ ३३ ५ ग्रहीतु योग्यैरुपासनादिभि शिल्पसाधनैर्वा, प्र०—हु दानादानयो इत्यस्माद् 'अन्येभ्यो-ऽपि दृश्यन्ते' अ० ३ २ ७५ इति मनिन्प्रत्यय 'बहुल छन्दसि' इतीडागमश्च १ १२ २ स्तोतुमर्हैर्गुणै १ ५९ २ [हवीमन् इति हुधातो पूर्वपदे व्याख्यातम्। अथवा ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्मनिन्। धातो सम्प्रसारणमीडागमश्च छान्दस]

हवेभिः हवनै ७ १९ ९ [हवमिति व्याख्यातम्। ततो 'बहुल छन्दसि' सूत्रेण भिस ऐसादेशो न भवति]

हवे हवे सङ्ग्रामे सङ्ग्रामे ६ ४७ ११ युद्धे युद्धे २० ५० [हवे पदस्य वीप्साया द्वित्वम्। हव =ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो 'आङि युद्धे' इति वा छन्दसीति नियमेन निरुपपदादपि अप्]

हव्यम् आदातुमर्हम् (अध्वरम्=अहिंसनीय व्यव-हारम्) ४ ९ ६ ग्रहीतुमर्हम् (अन्नम्) ४ २६ ४ दातुमर्ह सुखम् ५ ४ ८ अत्तुमर्हम् (भागम्) ५ २९.३ होतुमादातु-मर्हं विज्ञानम् १३ ३४ अत्तव्यम् (भा०—हुत द्रव्यम्) २९ ३५ आह्वानयोग्यम् (सर्वप्रिय राजानम्) ७ ३० २ **हव्यानि**= आदातु योग्यानि युद्धकार्याणि १ १० १ १० अत्तव्यानि (वस्तूनि) १ १८८ १० दातु योग्यानि (वस्तूनि) ४ १५ ३

हव्यः होतुमादातु स्वीकर्त्तुमर्ह (शिष्य) १ १४४ ३ आहवनीय (सेनाध्यक्ष) १ १०१ ६ आह्वयितु योग्य (इन्द्र.=राजा) ६ ४५ ११ ग्राह्य (अग्नि) ऋ० भू० १९४, ऋ० १ ८.९ १ आह्वातु योग्य (इन्द्र =राजा) ४ २४ २ **हव्याय**=होतुमर्हाय यज्ञाय १ ४५ ६ हातु दातुमर्हम् (विद्वास राजान वा), प्र०—अत्र विभक्ति-व्यत्यय ३४ १५ प्रशसनीयाय (वोढवे=वाहनाय) ३ २९ ४ स्वीकर्त्तव्यमन्नादिपदार्थम्, प्र०—अत्र सुब्व्यत्य-येन द्वितीयैकवचनस्य चतुर्थ्येकवचनम् १५ ३१ **हव्येन**=ग्रहीतव्येन (राया=धनेन) ७ १० आदातु दातुमर्हेण प्रशसितेनाध्ययनेन श्रवणेन वा ६ ५२ ८ **हव्यैः**=पूजितुमर्हैं (गुणैं) ५ ३ ८ होतु दातुमर्हैं (पदार्थैं) ४ २ १ अत्तुमर्हैं (पदार्थैं) २० ४५ [हु दाना-दानयो (जु०) धातोर्यत्। ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्वा यत्प्रत्यये सम्प्रसारणादिकार्येषु छान्दस रूपम्। हव्यानि=हवींषि नि० ८ ७ हव्य =हवनार्ह नि० १०.४२]

हव्यजुष्टिम् आदातव्यसेवाम् १ १५२ ७ [हव्य-जुष्टिपदयो समास। हव्य व्याख्यातम्। जुष्टि —जुषी प्रीतिसेवनयो (तुदा०)+क्तिन्]

हव्यदातये दातव्यदानाय ५ २६ ४ हव्यानामादातु-मर्हाणामादानाय ३३ ८७ दातव्याना दानाय, भा०—विद्यादानाय २७ ४४ **हव्यदातिम्**=हव्याना दातिर्दान येन तम् (विद्वज्जनम्) ३ २ ८ यो हव्यानि ददाति तम् (अग्निम्) ६ १ ९ होतु दातु ग्रहीतु वा योग्याना खण्डनम् ७ १६ ९ दातव्यदानक्रियाम् ६ ४७ २८ [हव्य-दातिपदयो समास। दाति —डुदाञ् दाने (जु०) धातो स्त्रिया क्तिन्। दो अवखण्डने (दिवा०) धातोर्वा क्तिन्। अथवा हव्योपपदे डुदाञ् दाने (जु०) धातोर्वाहु० औणा० ति। हव्यदाति (ऋ० ६ १६ १०) यजमानो वै हव्यदाति श० १ ४ १ २४]

हव्यवाट् यो हव्यान् दातुमर्हाणि वस्तूनि वहति प्राप्नोति स (अग्नि =विद्वज्जन) ३ ११ २ यो ग्राह्यदात-व्यान् पदार्थान् वहति प्रापयति स (विद्वज्जन) १ ६७ १ पृथिव्यादिवोढा (अग्निरिव राजा) ५ २८ ५ यो हुत द्रव्य देशान्तर वहति प्रापयति स (अग्नि) १ १२ ६ यो

६ ५२ १७ दातुमादातुमर्हे व्यवहारे १७ २१ दान और ग्रहण व्यवहार मे आर्याभि० २ ३८, १७ २१ **हविषे**= हविर्दातुमर्हम् (वस्तु), प्र०—अत्र व्यत्ययेन द्वितीयास्थाने चतुर्थी १९ ७० सद्विद्याग्रहणाय धनाद्युत्तमपदार्थदानाय वा ऋ० भू० २६५, १९ ७० **हविः**=अन्त करणम् ६ १६ ४७ आदीयत इति (सेनाध्यक्ष) ६ १६ ग्रहीतु योग्य करम् १११४ ३ सस्कृत सुगन्ध्यादियुक्त द्रव्यम् १ १५ हुत द्रव्यम् १७ ९, होमम् १७ ५२ होतव्य शुद्ध सुखकरद्रव्यम् १७ ७८ दुग्धादिकम् १९ ९५ दातव्य-मादातव्यम् (वय =कमनीय सुखम्) २१ २६ ग्राह्य वस्तु २७ २२ ग्रहीतु दातुमत्तु योग्य पदार्थम् १ ४५ ८ रोग-नाशक वस्तु २१ ४५ सङ्गन्तव्य वस्तु २१ ४७ सस्कृत-मन्नादिकम् २१ ४६ क्रियाकौशलयुक्त कर्म्म १ १० १ ९ आदेय विज्ञानम् १ १० १ ८ अत्तव्य वस्तु ५ २८ २ अत्तु-मर्हमन्नम् १ ९४ ३ भा०—शोभन भोजनाऽऽच्छादनम् २१ ४३ आदातव्याऽग्नीन्धनजलकाष्ठवात्वादि २९ ४५ अत्तव्यमन्नादिकम् २९ ३६ हवनीयम् (भूमिमौषधी वा) १ २३ १८ हविषा सस्कृतद्रव्येण, प्र०—अत्र विभक्ति-व्यत्यय १८ ५७ प्रक्षेप्तव्य सुसस्कृतमन्नादिकम् २१ ४१ **हवींषि**=यज्ञार्थानि द्रव्याणि १ ९४ ४ दातुमादातु योग्यानि वस्तूनि २ ३७ ५ विज्ञानादीनि ऋ० भू० २६०, १९ ५१ [हु दानादानयो (जु०) धातो 'अर्चिशुचिहु०' उ० २ १०८ सूत्रेण इसि । हविष् उदकनाम निघ० १ १२ हवि —अक्त हि हवि श० २ ६ २ ६ हवीषि ह वाऽआत्मा यज्ञस्य श० १ ६ ३ ३९ जीव वै देवाना हविरमृतममृ-तानाम् श० १ २ १ २० मासा हवीषि श० ११ २.७ ३]

हविर्वाट् विज्ञानादिप्रापक (विद्वज्जन) १ ७२ ७. [हविष् इत्युपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' इति ण्वि]

हविष्कृत् हवि करोति अनया वेदवाण्या सा हवि-ष्कृद् वाक्, समीक्षा—अत्र यज्ञसम्पादनाय ब्राह्मणक्षत्रिय-वैश्यशूद्राणा वेदाध्ययनसस्कृता सुशिक्षिता वाग् गृह्यते १ १५ [हविष् इत्युपपदे डुकृञ्करणे (तना०) धातो क्विप् । तुगागम ।

हविष्कृतम् हविर्भि क्रियते तम् (अग्नि =भौतिकम्), प्र०—अत्र वर्त्तमानकाले कर्मण्यौणादिक. क्त प्रत्यय १.१३ ३. [हविष्-कृतपदयो समास । हविष् इति व्याख्यातम्]

हविष्कृतिम् हविषा कृति करण यस्य तम् (अध्वर= जगत्), प्र०—अत्र 'सह सुपा' इति समास १ १८ ८ हविषो होतव्यस्य पदार्थस्य कृति करणत्पाम (आहुतिम्) १ ९३ ३ [हविष्-कृतिपदयो समास । कृति =डुकृञ् करणे (तना०) धातो स्त्रिया क्तिन्]

हविष्पतिः हविषा दातु ग्रहीतु योग्याना द्रव्याणा गुणाना वा पति पालक कर्मानुष्ठाता (मनुष्य) १ १२ ८ हविषा पालक (भा०—पुरोहितो जन) २० ७० [हविष्-पतिपदयो समास]

हविष्मतः प्रशस्तानि हवींषि विद्यन्ते यस्य तस्य (इन्द्रस्य =विद्युत) १ ५७ २ प्रशस्तानि हवींषि विद्यन्ते येषु तान् (मरुत =ऋत्विज) ३ ४६ बहुविद्यादान-सम्बन्धिन (मरुत =विद्वज्जना) १ १७३ १२ **हविष्मता**=प्रशस्तविद्यादानग्रहणयुक्तेन व्यवहारेण १ १५९ १ **हविष्मते**=प्रशस्तानि हवींषि दातव्यानि यस्य तस्मै (अग्नये=पावकाय) ३ १० ४ बहूनि हवींषि विद्यन्ते यस्य तस्मै विदुषे, प्र०—अत्र भूम्न्यर्थे मतुप् १ १३ १ **हविष्मद्भिः**=बहूनि हवींष्यादत्तानि साधनानि यैस्तै (मनुष्यै) ३ २९ २ **हविष्मन्तम्**=बहुसामग्रीयुक्तम् (भोज =भोगम्) ४ ४५ ७ **हविष्मन्तः**=बहूनि हवींषि दातुमादातु योग्यानि वस्तूनि विद्यन्ते येषान्ते (जना) १९ १९ प्रशस्तसामग्रीयुक्ता (मानुषाम =मनुष्या) ७ ११ २ हवींषि दातुमादातुमत्तु योग्यानि अतिशयितानि वस्तूनि विद्यन्ते येषान्ते (ऋत्विज), प्र०—अत्राऽतिशायने मतुप् १ १४ ५ हवींषि प्रशस्तानि जगदुपकरणानि कर्माणि विद्यन्ते येषा ते (पुरुषा) १ ११४ ८ बहूनि हवींषि देयानि वस्तूनि विद्यन्ते येषु ते (प्रजाजना) १९ १९ **हविष्मान्**= प्रशस्तानि हवींषि विद्यन्ते यस्य वायो स ६ २३ बहूनि हवींषि दानानि विद्यन्ते यस्य स (मर्त्त =मनुष्य) ६.१६ ४६ शुद्धसामग्रीयुक्त (विद्वज्जन) १ १८० ३ सम्बद्धानि हवींषि यस्मिन् स (अश्व =अग्नि) १ १६२ २२. प्रशस्तानि हवींषि गृहीतानि विद्यन्ते यस्य स (स्तोम = स्तुति) १ १२७ १० बहूनि हवींषि दातव्यानि भोक्तव्यानि विद्यन्ते येषु स (अग्नि =पुरुषार्थिजन) ६ १० ६ प्रशस्तानि हवींषि सुखदानानि यस्मिन् स (अश्व) २५ ४५ हवींषि उत्तमानि द्रव्याणि कर्माणि वा विद्यन्ते यस्य स (जन) प्र०—अत्र प्रशसार्थे मतुप् १ १२ ९ हवींषि हुतानि द्रव्याणि विद्यन्ते यस्मिन् स (सूर्य इव राजा) ६ ७३ १ बहुपदार्थहेतु (होतृजन) ४ ४१ १ प्रशसिता-देययुक्त (गोतम =नौकादियानयायी जन) १ १८३ ५

हसाय हसनाय ३० ६ [हसे हसने (भ्वा०) धातो- र्घञर्थे क]

हस्कर्त्तारम् प्रकाशकर्त्तारम् (अग्निम्=ईश्वरम्) ४७.३. [हस्-कर्तृ पदयो समास । हस्=हसे हसने (भ्वा०)+क्विप्]

हस्कारात् हसन हस्तत्करोति येन तस्मात् (वायो) १ २३ १२ [हस् इत्युपपदे डुकृञ् करणे (तना०) धातो 'कृतो बहुलम् वा' इति करणेऽण् । हस्=हसे हसने (भ्वा०) +क्विप्]

हस्त हसन्ति प्रसन्ना भवन्ति यस्मात्तत्सम्बुद्धौ (मित्र= विद्वन् सभाध्यक्ष) ४ २७ **हस्तम्**=हाथ को स० वि० १२१, अथर्व० १४ १ ५१ **हस्तयोः**=करयो १ ५५ ८ भुजयो १ १३५ ६ **हस्तः**=यो हसति स (अध्यापको वैद्य) २ ३३ ७ **हस्ताभ्याम्**=ग्रहणविसर्जनाभ्याम् १ १० प्राणाऽपानाभ्याम्, १ २१ ग्रहणत्यागहेतुभ्यामुदानाऽपाना- भ्याम् १ २४ रोगनाशकधातुसाम्यकारकाभ्या गुणाभ्याम् ६ ३० हस्त इव वर्त्तमानाभ्या धारणाकर्षणाभ्याम् ६ ६ ग्रहणदानाभ्याम् ऋ० भू० २१८, २० ३ कराभ्याम् १८.३७. शोधन-सर्वाङ्गप्रापणाभ्याम् २ ११ गतिधारणा- भ्यामिव कराभ्याम् ३८ १ यथा प्रवलभुजदण्डाभ्या तथा ५ २६ उत्साहपुरुषार्थाभ्याम् २० ३ **हस्तेषु**=हस्ताद्यङ्गेषु, समी०—बहुवचनादङ्गानीति ग्राह्यम् १ ३७.३ [हसे हसने (भ्वा०) धातो 'हसिमृग्रिण्वामिदमि०' उ० ३.८६ सूत्रेण तन् । हस्तो हन्ते प्राशुर्हनने नि० १ ७ हस्त हस्तो वितस्ति श० १० २ २ ८ (नक्षत्रम्) देवस्य सवितुर्हस्त तै० १ ५ १.३ हस्त एवास्य (नक्षत्रियस्य प्रजापते) हस्त । तै० १ ५ २ २]

हस्तग्राभस्य विवाहे सगृहीतहस्तस्य (पत्यु) ऋ० भू० २११, १० १८८ पाणिग्रहण करने वाले नियुक्त पति के स० प्र० १५२, १० १८८ [हस्तोपपदे ग्रह उपादाने (क्र्या०) धातो 'कर्मण्यण्' इत्यण् । 'हृग्रहोर्भश्छन्दसि' इति हस्य भकार]

हस्तघ्नः यो हस्ताभ्या हन्ति स, भा०—बाहुबल, शस्त्रास्त्रप्रक्षेपणवित् (पुमान्=पुरुपार्थी सेनापति) २६ ५१ [हस्तोपपदे हन हिसागत्यो (अदा०) धातो 'कृतो बहुल वे' ति टक् । मूलविभुजादित्वाद्वा क । हस्तघ्न हस्ते हन्यते । नि० ६ १४]

हस्तच्युती हस्तयो प्रच्युत्या भ्रामणक्रियया ७ १ १ [हस्त-च्युतिपदयो समासे 'सुपा सुलुक्०' सूत्रेण पूर्वसवर्ण- दीर्घ । च्युति=च्युङ् गती (भ्वा०) धातो. स्त्रियां क्तिन्]

हस्तयतः हस्ता यता निगृहीता वशीभूता यस्य स (विद्वज्जन) ५ ४५ ७. [हस्त-यतपदयो समास । यत= यमु उपरमे (भ्वा०) धातो क्त]

हस्ता बलवीर्यौ बाहू वा ५ १६ [हस्त इति व्या- ख्यातम् । ततो द्विवचनस्याकारादेश]

हस्तासः हस्तवद्वर्त्तमाना (गायत्र्यादीनि सप्त छन्दासि विभक्तय प्राणा वा) ४.५८ ३ हस्तेन्द्रियमिव (विभक्तय) १७ ६१ [हस्त इति व्याख्यातम् । ततो जसोऽसुक्]

हस्तिनः कुञ्जरान् २४ २६ प्रशस्ता हस्ता विद्यन्ते येषान्ते (सिद्धिमन्तो राजप्रजाजना) ३ ३६ ७ किरणा १ ६४ ७ **हस्तिभिः**=इभै ५ ६४ ७ [हस्त इति व्याख्यातम् । तत प्रशसायामर्थे इनि]

हस्तिपम् हस्तिना पालकम्' भा०—हस्तिरक्षकम् (प्रजाजनम् ३० ११ [हस्तिन् इत्युपपदे पा रक्षणे (अदा०) धातो क]

हस्त्यम् हस्तेषु साधुम् (पदार्थम्) २ १४.६ [हस्त इति व्याख्यातम् । ततो भवार्थे यत्]

हस्रेव हसन्ति (उषा) इव १ १२४ ७ [हस्रा-इव- पदयो समास । हस्रेव=हसनेव । नि० ३ ५ । हस्रा— हसे हसने (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । ततष्टाप् स्त्रियाम्]

हंसः पक्षिविशेष १ ६५ ५ य सहन्ति सर्वान् पदार्थान् स जगदीश्वर १० २४ दुष्टकर्महन्ता (ब्रह्म जीवो वा) १२ १४ यो हन्ति पापानि स (जीवात्मा) ४ ४० ५. यो हन्ति दुखानि स (अ०—विवेकी जन) १६ ७४ [हन हिसागत्यो (अदा०) धातो 'वृतॄवदिवचि०' उ० ३ ६२. सूत्रेण स । हसास अश्वनाम निघ० १ १४ हसा —हन्ते- र्घ्नन्त्यध्वानम् नि० ४ १३ हसा सूर्यरश्मय नि० १३ ३०]

हंसा इव हसपक्षिवत् १ १६३ १० हसवद् गन्तार, भा०—हसवद् गतय (अश्वा) २६ २१ यथा पक्षिविशेषा ३.८ ६ [हसा -इवपदयो समास]

हंसासः हसा इव गमनकर्त्तार (प्राणा) ७ ५६ ७ हस इव सद्यो गन्तारोऽश्वा ४ ४५ ४ [हस इति व्याख्यातम् । ततो जसोऽसुक् । हसास अश्वनाम निघ० १ १४]

हारिद्रवेषु ये हरन्ति द्रवन्ति द्रावयन्ति च तेषामेतेषु (रोगेषु) १ ५० १२ [हरिद्रुप्राति० 'तस्येदम्' इत्यर्थेऽण् । हरिद्रु=हरि इत्युपपदे द्रु गतौ (भ्वा०) धातो 'हरिमितयो-

हव्यानि प्राप्तव्यानि वस्तूनि वहति प्रापयति स (अग्नि) ३ २७ ५ **हव्यवाहम्**=होतु दातुमत्तुमादातुञ्च योग्यानि ददाति, वा यानादीनि वस्तूनीतस्ततो वहति प्रापयति तम् (अग्निं=परमेश्वर विद्युद्रूप वा) १ १२ २. दातव्यविज्ञान-प्रापकम् (आप्त विद्वज्जनम्) ३ १० ६ धर्त्तव्यवाहकम् (विप्र=मेधाविजनम्) ६ १५ ४ यो हव्यान् दातुमादातु च योग्यान् रसान् वहति तम् (अग्निम्) २ २ १७ यो हव्यानि हुतानि द्रव्याणि वहति तद्वद्वर्त्तमानम् (अध्यापकम्) ७ १७ ६. हव्याना पदार्थाना प्रापकम् (अग्निं=विद्वज्जनम्) ३ १७.४ यो हव्य हविर्वहति तम् (अग्नि=पावकम्) ३ ५.१० **हव्यवाहः**=ये हव्य वहन्ति ते (प्रियाचारा सखाय) ३ ४३ १ [हव्योपपदे वह प्रापणे (भ्वा०) धातो कर्त्तरि 'वहश्चे' ति ण्वि । हव्यवाट्—वायुर्वै तूर्णि-र्हव्यवाड् वायुर्देवेभ्यो हव्य वहति ऐ० २ ३४ एष हि हव्यवाड् यदग्नि । श० १.४ १ ३६]

हव्यवाहन यो हव्यानि होतु दातुमर्हाणि द्रव्याणि सुखसाधकानि वहति प्रापयति तत्सम्बुद्धौ (परमेश्वर) १ ४४ ५ यो हव्यानि ग्रहीतव्यानि प्रापयति तत्सम्बुद्धौ (विद्वन्नुपदेशक) ३ ९ ६ **हव्यवाहनम्**=उत्तमपदार्थ-प्रापकम् (अग्निम्) ५ ५८ ६ यो हव्य वहति तम् (अग्निं=पावकम्) २ ४१ १९ **हव्यवाहनः**=यो हव्यानि हुतानि द्रव्याणि वहति स (अग्नि) ६ १६ २३ यो हव्यानि ग्राह्यदातव्यानि हुतानि द्रव्याणि यानानि वा वहति प्राप्नोति स (अग्नि) १ ४४ २ यो हव्यानि ग्रहीतु योग्यानि वस्तूनि वहति प्रापयति स (विद्वज्जन) ३४ ६. आदातव्यपदार्थान् देशान्तरे प्रापक (अग्नि) ५ ११.४ यथाऽग्निर्हव्यानि वहति तथा (जगदीश्वरो विद्वज्जनो वा) ५ ३१ सब हव्य उत्कृष्ट रसो के भेदक आकर्षक तथा यथावत् स्थापक (ईश्वर) आर्याभि० २ १६, ५ ३१ [हव्योपपदे वह प्रापणे (भ्वा०) धातोर्णिजन्तात् 'कृत्यल्युटो वहुलम्' इति कर्त्तरि ल्युट् । हव्यवाहन एष हि हव्यवाहनो यद् अग्नि श० १ ४ १ ३६]

हव्यवाहम् हव्यानि होतु दातुमर्हाणि प्रज्ञानानि यया ताम् (जिह्वा=वाचम्) १३ १५ [हव्योपपदे वह प्रापणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण् । वहश्चेति वा ण्वि]

हव्यसूक्तीनाम् वहूनि हव्याना सूक्तानि यासु तासाम् (भा०—विधानाम्) २८ ११ [हव्य-सूक्तिपदयो समास । सूक्ति =सु+वच परिभाषणे (अदा०)+क्तिन्]

हव्यसूदनः यथा हव्यानि सूदने तथा (भगवान् विद्वज्जनो वा) ५ ३२ मिष्ट, सुगन्ध, रोगनाशक, पुष्टि-कारक द्रव्यों से वायु वृष्टि की शुद्धि करने कराने वाला (परमेश्वर) आर्याभि० २ १७ ५ ३२. [हव्योपपदे षूद क्षरणे (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यते' अ० ३ ३ १३०. सूत्रेण युच्]

हव्यसूदः यो हव्यानि सूदयति क्षरयति स (वृहस्पति.=सूर्य) ४ ५०.५ [हव्योपपदे षूद क्षरणे (भ्वा०) धातोरच् कर्त्तरि]

हव्यसूदः या हव्यानि दुग्धादीनि क्षरन्ति ता (गाव) १ ९३ १२ [हव्योपपदे षूद क्षरणे (भ्वा०) धातो. कर्त्तरि क्विप्]

हव्या उच्चारणीया (वाक्) ६ ६१ १२ **हव्ये**= स्वीकर्त्तुमर्हे (पत्नि) ८ ४३. [हु दानादानयो (जु०) धातोर्यत् । ततष्टाप् स्त्रियाम् । ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्वा वाहु० औणा० क्यप् । ततष्टाप् स्त्रियाम्]

हव्या दातुमादातु योग्यानि वस्तूनि १ ९३ ११. [हु दानादानयो (जु०) धातोर्यत् । ततश्शेर्लोपश्छन्दसि]

हव्या अत्तुमर्हाणि (वस्तूनि) २९ १० आदातुमर्हाणि (शस्त्रास्त्राणि) १ १७१ ४ होतुमत्तुमर्हाणि (वसु= धनानि) ६ ७ होतु धर्माऽर्थकाममोक्षान् साधयितुमर्हाणि साधनानि ३ २१ १ ग्रहीतु योग्यान् (देवान्=विदुषो दिव्य-गुणान्वा) १ ७४ ६ आदातुमर्हाणि होमद्रव्याणि १ १३९.३ दातुमादातुमर्हा (इष =अन्नाद्या) ५ ७ ३ दातुमत्तुमादातु-मर्हाणि वस्तूनि, अ०—होतव्यानि द्रव्याणि, प्र०—अत्र 'शेश्छन्दसि वहुलम्' इति लोप ३ १ [हव्यप्राति० शेर्लोप-श्छन्दसि । हव्यम्—हु दानादानयो (जु०) धातोर्यत्]

हव्यात् यो हव्यान्यत्ति स (अग्नि =पावक) ७ ३४ १४ [हव्योपपदे अद भक्षणे (अदा०) धातो 'अदोऽनन्ने' अ० ३ २ ६८ सूत्रेण विट्]

हव्येभि दातुमर्है (नमोभि.=अन्नादिभि) १ १५३ १ आदातुमर्है (नमोभि) ४ ४२ ९ [हव्यमिति व्याख्यातम् । ततो भिस ऐस् न भवति 'वहुल 'छन्दसि' सूत्रेण]

हसामुदौ सदा हास्य और आनन्दयुक्त (स्त्री-पुरुष) सं० वि० १४०, अथर्व० १४ २ ४३ [हस-मुदपदयो समास । पूर्वस्य सहिताया दीर्घ । हस =हसे हसने (भ्वा०) धातोरच् । मुद =मुद हर्षे (भ्वा०) धातो कर्त्तरि इगुपधलक्षण क]

हित ऋ० ६.१२.१४]

हितमित्रः हिता धृता मित्रा. सुहृदो येन स (सभाव्यक्ष) १ ७३ ३ प्रियमित्रवान् (राजा) आर्याभि० १४६. ऋ० १ ५.१६.३ हितानि धृतानि मित्राणि येन स राजा ३ ५५.२१ [हित-मित्रपदयो समास]

हितवान् हित विद्यते यस्य स (जन) १ १८० ७. [हित व्याख्यातम् । ततो मतुप्]

हिता हितकारिणी (त्विषी=बलयुक्ता सेना) १ ५१ ७. **हिताः**=हिन्वन्ति गच्छन्ति यान्ता (नद्य) १ ५४ १०. [हित व्याख्यातम् । तत स्त्रिया टाप्]

हिता इव यथा हितसम्पादकास्तथा १.१६६ ३ [हिता -इवपदयो समास]

हितानि हितकराणि (वसूनि=द्रव्याणि) ५ ४२ ३ **हिते**=सुखवर्धके (धने) १ ११६ १५ [हितमिति व्याख्यानम्]

हितेनेव हितसाधकेन मित्रेणेव ४ ५७ १ [हितेन-इव पदयो समास]

हित्वा त्यक्त्वा ५ ७३ १४ [ओहाक् त्यागे (जु०) धातो क्त्वा । 'जहातेश्च क्त्वि' इति हिभाव]

हित्वी हित्वा २ ३८ ६ [ओहाक् त्यागे (जु०) धातो क्त्वा । धातोर्हिभाव 'जहातेश्च क्त्वि' सूत्रेण । 'स्नात्व्यादयश्च' सूत्रेणेत्त्वम्]

हिन जलु ६ ४८ २

हिन हिनु वर्धय, प्र०—अत्र हि गतौ वृद्धौ च इत्यस्माल्लोण्मध्यमैकवचने वर्णव्यत्ययेनोकारस्याऽकार २७ ४४. **हिनु**=वर्धयतु ६ ४५ ३०. वर्द्धय ३४८. **हिनुहि**=जानीहि १ १४३ ४ वर्धय ६ ४५ १४ **हिनोत**=वर्धयत ७ ३४ ५ प्रेरयत २ १४४ **हिनोतम्**=प्राप्नुतम् १ १८४ ४ **हिनोति**=वर्धयति १ १८ ४ **हिनोमि**=प्राप्नोमि २ ३२ ३ वर्धयामि १ ६१४ गमयामि ३५.१६ **हिनोषि**=वर्धयसि ६ १३ ३ **हिन्वति**=वर्धयन्ति वर्धन्ते वा, प्र०—अत्र पक्षेऽन्तर्भावितो ण्यर्थ ३ ३१ १६ **हिन्वतु**=प्रीणयतु, प्र०—अत्र लडर्थे लोडन्तर्गतो ण्यर्थ १ २७ ११ **हिन्वन्ति**=प्रेरयन्ति १ ८४ ११ प्राप्नुवन्ति वर्धयन्ति वा ७ ६ २. हित कुर्वन्ति प्रीणयन्ति १ १४४ ५ हिंसन्ति ऋ० भू० ३१७, १० ७१ ५ बढाते हैं पं० वि०, **हिन्वन्तु**=प्रीणन्तु प्रीणयन्ति सेधयन्ति, प्र०—अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च १ २३ १७ विज्ञापयन्तु वर्धयन्तु वा १ १११ ४ **हिन्विरे**=वर्धयन्ति ५ ६ ६ **हिन्वे**=गमयेय ४.७.११. [हि गतौ वृद्धौ च (स्वा०) धातोर्लोट् । वर्णव्यत्ययेनोकारस्याकार । अन्यत्र लट् लिट् च । 'हिनु वेहि' नि० ११ ३० हिनोत प्रहिणुत नि० ६ २२ हिन्वन्ति आप्नुवन्ति नि० १ २०]

हिन्वन् गमयन् (सोमलतेव व्यवहार) ५ ३६ २. [हि गतौ वृद्धौ च (भ्वा०) धातो शतृ]

हिन्वानः वर्धयन् (अग्नि=विद्युदादिपदार्थ) ७ १० १ **हिन्वानाः**=वर्धयमाना (मनीषिणो जना) २ २१ ५ [हि गतौ वृद्धौ च (स्वा०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

हिन्वानासः सुख सम्पादयन्त (सत्रवो दुष्टमनुष्या) १ ३३ ८. [हिन्वान इति व्याख्यातम् । ततो जसोऽसुक्]

हिन्वानाः प्रीतिकारिका नद्य १ १०४ ४ [हिन्वान इति व्याख्यानम् । तत स्त्रिया टावन्ताज्जस्]

हिमवते बहूनि हिमानि विद्यन्ते यस्य तस्मै (पर्वताय) २४ ३०. **हिमवन्तः**=हिमालयादय. पर्वता २५ १२ [हिमप्राति० भूम्न्यर्थे मतुप् । हिमम्=हन हिंसागत्यो (अदा०) धातो 'हन्तेर्हि च' उ० १ १४८ इति मक् । धातोर्हिरादेशश्च]

हिमस्य शीतस्य २३ ६ **हिमाः**=वर्षाणि ५ ५४ १५ सवत्सरान् २ ३३ २ हेमन्तर्त्तुयुक्तानि वर्षाणि ३ १८ वृद्धीर्हेमन्तानृतून् वा ६ ४८ ८ हेमन्तर्त्तव २ २७ [हिममिति पूर्वपदे व्याख्यातम् । अथवा हि गतौ वृद्धौ च (स्वा०) धातोर्बाहु० औणा० मक् । हिमम्—हिम पुनर् हन्तेर्वा हिनोतेर्वा नि० ४ २७ हिमस्य जरायु (यजु० १७ ५) यद्वै शीतस्य प्रशीन तद्धिमस्य जरायु श० ९ १.२ २६. हिमा —(यजु० २.२७) शत हिमा इति शत वर्षाणि जीव्यासमित्येवैतदाह श० १ ९ ३ १९ हिमा रात्रिनाम निघ० १ ७ हिमेन=उदकेन नि० ६ ३६]

हिम्येव हेमन्तर्त्तौ भवा महाशीतयुक्ता रात्रय इव, प्र०—'भवे च छन्दसि' इति यत् हिम्येति रात्रिनाम निघ० १ ७ 'हन्तेर्हि च' उ० १ १ १४ इति हन्धातोर्मक् ह्यादेशश्च १ ३४ १ [हिम्या-इवपदयो समास । हिम्या—हिमप्राति० भवार्थे यत् । ततष्टाप् स्त्रियाम्]

हियानस्य वर्धमानस्य (दाहकस्याऽग्ने), प्र०—अत्र व्यत्ययेनात्मनेपदम् २ ४ ४. [हि गतौ वृद्धौ च (स्वा०) धातो शानच् । विकरणस्य लुक्]

हिरणिनः हिरणा सन्ति येषान्तान (जनान्) ६.६३ ९ हिरण्यादिधनयुक्तस्य (सूरे=मेधाविजनस्य)

द्रुव ' उ० १ ३४ सूत्रेण कुंडिच्च]

हारियोजन यो हरीन् तुरङ्गान् अग्न्यादीन्वा युनक्ति स एव तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) १ ६१ १६ **हारियोजनः**=हरीन् योजयति य सारथि स हरियोजन, हरियोजन एव हारियोजनस्तद्वत् (गृहपति) ८ ११ हरीणामश्वाना योजयिता तस्याऽयमनुक्रम १८ २० [हरियोजनप्राति० स्वार्थे प्रज्ञादित्वादण्। हरियोजन — हरि इत्युपपदे युजिर् योगे (रुधा०) धातो 'कृत्यल्युटो बहुलमि' ति कर्त्तरि ल्युट्। हारियोजन —(ग्रह) छन्दासि वै हरियोजन श० ४ ४ ३ २]

हारियोजनम् हरयोऽश्वा युज्यन्ते यस्मिँस्तत् (रथ= ज्ञानम्) १ ८२ ४, [हरियोजनम्—हर्युपपदे युजिर् योगे (रुधा०) धातोरधिकरणे ल्युट्। तत स्वार्थेऽण्]

हार्दि हृदयस्याऽतिशयेन प्रियम् (मन =चित्तम्) ६ २१. हृदि भव मन ३३ ५१ हृदयस्येदम् (सवनम्= ऐश्वर्यम्) ५ ४४ ६ हार्दमस्मिन्नस्ति तत् (ज्ञानम्) २ २६ ६ [हार्दप्राति० मत्वर्थ इनि। हार्दम्—हृदयप्राति० प्रियार्थे 'तस्येदम्' इत्यर्थे वाऽण्। 'हृदयस्य 'हृल्लेखयदण्लासेषु' अ० ६ ३ ५० सूत्रेण हृदयस्य हृदादेश]

हार्द्वानम् हृद वनति सम्भजति येन तदेव (घर्मम्) ३८ १२ हृदोपपदे वन सम्भक्तौ (भ्वा०) धातो 'कर्मण्यण्' इत्यण्। तत स्वार्थेऽण्]

हासमाना आनन्दमयी (पृत्सुति =वीरसेना) १ १६६ २ [हसे हसने (भ्वा०) धातो शानजन्तात् स्त्रिया टाप्। व्यत्ययेनात्मनेपदम्। हासमाने—हासति स्पर्द्धाया हर्षमाणे वा नि० ९ ३६]

हाः त्यजे ३ ५३ २० [ओहाक् त्यागे (जु०) धातोर्लङ्। अडभाव। 'बहुल छन्दसी' ति शपो लुक्]

हि सादृश्ये ७८ निश्चये ३ ३३ प्रसिद्धौ १२ २१ एवार्थे १ १० १० हेत्वपदेशे १ ८ १० हेत्वर्थे १ ८ ९ किल २१ ४६. खलु १८ ७५ यत ८ २० विस्मये १ १८० ७ कदाचिदर्थे १ २५ १ चाऽर्थे १ २४ ८ [हि-हीत्येषोऽनेककर्मेद हि करिष्यतीति हेत्वपदेशे, कथ हि करिष्यतीत्यनुपृष्टे कथ हि करिष्यतीत्यसूयायाम् नि० १ ५]

हिङ् हिङ्कारम् १ १६४ २८

हिङ्काराय यो हिङ्करोति तस्मै (जनाय) २२ ७ [हिङ् इत्युपपदे डुकृञ् करणे (तना०) धातोरण्। हिङ्कार — तस्य (एकविंशसाम्न) त्रय्येव विद्या हिङ्कार जै० उ० १.१९ २ एप वै साम्ना रसो यद्धिङ्कार ता० ६ ८ ७ हिङ्कृत्य तदैतद् यज्ञस्याग्रे गेय यद्धिङ्कार। गो० उ० ३ ९. न वाऽअहिङ्कृत्य साम गीयते श० १ ४ १ १ हिङ्कारो वै गायत्रस्य प्रतिहार ता० ७.१ ४ श्रीर्वा एषा प्रजापतिस्साम्नो यद्धिङ्कार जै० उ० ३ १२ ३ एप वै स्तोमस्य योगो यद्धिङ्कार ता० ६ ८ ६ वज्रो वै हिङ्कार कौ० ३.२ शुक्लमेव हिङ्कार जै० उ० १ ३४ वायुरेव हिङ्कार जै० उ० १ ३६ ९ स (प्रजापति) पुरोवातमेव हिङ्कारमकरोत् जै० उ० १ १२ ९ प्राणो हि वै हिङ्कारस्तस्मादपिगृह्य नासिके न हिङ्कर्त्तु शक्नोति श० १ ४ १ २ प्रजापतिर्वै हिङ्कार ता० ६ ८ ५ लोमैव हिङ्कार जै० उ० १ ३६ ६ स (प्रजापति) मन एव हिङ्कारमकरोत् जै० उ० १ ११ ५ चन्द्रमा एव हिङ्कार जै० उ० १ ३३ ५ तस्य साम्न इयमेव प्राची दिग्घिङ्कार जै० उ० १ ३१ २ यदनुदित (आदित्य:) स हिङ्कार जै० उ० १ १२ ४ रश्मय एव हिङ्कार जै० उ० १ ३३ ९ अहोरात्राणि हिङ्कार प० ३ १ स (प्रजापति) वसन्तमेव हिङ्कारमकरोत् जै० उ० १ १२ ७ वसन्तो हिकार प० ३ १ वृषा हिंकार गो० पू० ३ २३ स (प्रजापति) यजूंष्येव हिङ्कारमकरोत् जै० उ० १ १३ ३]

हिङ्कृण्वती हिडिति शब्दयन्ती (अघ्न्या=गौ) १ १६४ २७ [हिङ्पूर्वाद् डुकृञ् करणे (तना०) धातो शत्रन्तान्ङीप्। व्यत्ययेन श्नु]

हिङ्कृताय हिङ्कृत येन तस्मै (जनाय) २२ ७ [हिङ्-कृतपदयो समास]

हितम् हितकारिणम् (अग्निम्) १५ २८ स्थितम् (बलम्) ५ ५७ ६ धृत प्रसन्न वा (मन) १ १८७ ६. प्रवृद्धम् (धनम्) ६ ४५ १५ सुखकारकम् (धनम्) ६ ४५ १२ सुखकारि (धन=द्रव्यम्) ६ ४५ २ स्थापित स्थित वा (राजान=प्राण जीव वा) १ २३ १४ स्थित परमात्मानम् ५ ११ ६ सर्वाऽविरुद्धम् (सुप्रवाचनम्= अध्यापनमुपदेशन वा) १ १०५ १२ सुखसाधकम् (अविरोधनम्) ३ १२ ८ **हितः**=धृत सन् हितकारी, अ०— स्थापित (अग्नि) १ १३ ४ सर्वस्य हित दधन् (जातवेदा =तनय) १२ १०८ हितसम्पादक (विद्वज्जन) १ १२८ ७ **हितेषु**=सुखनिमित्तेषु (कार्येषु) ५ १ ५ **हिते**=हितसाधके (तनये) ४ ४१ ६ [डुधाञ् धारणपोषणयो (जु०) धातो क्त। 'दधातेर्हि' अ० ७ ४ ४२ सूत्रेण हिरादेश अथवा हि गतौ वृद्धौ च (स्वा०) धातो क्त। हितम्—प्राणो वै हित प्राणो हि सर्वेभ्यो भूतेभ्यो

ऋतपर्णापि वोपमार्थे स्याद्धिरण्यवर्णपर्णेति । नि० ८.१९]

हिरण्यपाणिम् हिरण्यानि सूर्यादीनि तेजांसि पाणौ स्तवने यस्य तम् (सवितारम्=ईश्वरम्) २२१०. हिरण्यानि सुवर्णादीनि रत्नानि पाणौ व्यवहारे लभन्ते यस्मात्तम् (सवितार=परमात्मानम्) १२२५ **हिरण्यपाणिः**=हिरण्य ज्योति पाणिरिव यस्य स (सूर्य) ३४२५ हिरण्यादिक सुवर्ण पाणौ यस्य स (सविता=विद्वान्राजा) ६७१४ हिरण्यानि ज्योतीपि सूर्यादीनि सुवर्णादीनि वा पाणौ व्यवहारे यस्य स (सुक्रतु=ईश्वर, सभास्वामी प्रजाजनो वा), प्र०—ज्योतिर्हि हिरण्यम् श० ४३४२१ इति प्रमाणेन हिरण्यशब्देन ज्योतिषो ग्रहणम् ४२५ हिरण्य ज्योति, पाणिर्हस्त किरणव्यवहारो वा यस्य स (वायु) ११६ हिरण्यानि ज्योतीषि पाणयो हस्तवद् ग्रहणसाधनानि यस्य स (सविता=सूर्यलोक) १३५९ हिरण्य सुवर्णादिक पाणौ हस्ते यस्य स (दातृजन) ६५०८ हिरण्यस्याऽमृतस्य मोक्षस्य दानाय पाणिर्व्यवहारो यस्य स (सविता=जगदीश्वर), प्र०—अमृत हिरण्यम् श० ७३११५ यद्वा हिरण्य प्रकाशार्थ ज्योति पाणिर्व्यवहारो यस्य स (सविता=सूर्यलोक) १२० पाणिरिव हिरण्य तेजो यस्य स (सविता=सूर्य) ३५४११ **हिरण्यपाणे**=हिरण्य हितरमण पाणिर्व्यवहारो यस्य तत्सम्बुद्धौ (सविता=जगदीश्वर) ७३८२ [हिरण्य-पाणिपदयो समास । हिरण्यमिति व्याख्यातम् । पाणि =पण व्यवहारे स्तुतौ च (भ्वा०) धातो 'अशिपणाय्यो रुडायलुकौ च' उ० ४१३३ सूत्रेण इण् । हिरण्यपाणि —तस्मात् (सविता) हिरण्यपाणिरिति स्तुत । कौ० ६१३ गो० उ० १२]

हिरण्यपिण्डान् सुवर्णादिसमूहान् ६४७२३ [हिरण्य-पिण्डपदयो समास]

हिरण्यप्रउगम् हिरण्यस्य ज्योतिपोऽग्ने प्रउग सुखवत्-स्थान यस्मिँस्त प्रयोगाऽर्हम् (रथ=विमानादियानम्) प्र०—पृषोदरादिनाऽभीष्टरूपसिद्धि १३५५ [हिरण्य-प्रउगपदयो समास । प्रउगमिति पृषोदरादिना साधनीयम्]

हिरण्यबाहवे हिरण्य ज्योतिरिव तीव्रतेजस्कौ बाहू यस्य तस्मै (सेनाधीशाय) १६१७ **हिरण्यबाहुः**=हिरण्य बाह्वोर्दानाय यस्य स (इन्द्र=सूर्य इव राजा) ७३४४ [हिरण्य-बाहुपदयो समास]

हिरण्यम् सुवर्णम् १४१९ ज्योति सुवर्णादिकम् १४६१० तेजोमय सुवर्णादिकम्, भा०—समग्रमैश्वर्यम् ३४५० ज्योतिर्मयम् (ब्रह्मचर्यम्) ३४५१. सत्यासत्यप्रकाश विज्ञानम् ३४५२ **हिरण्यानि**=हिरण्यैर्निर्मितान्याभूषणादीनि २५३९ **हिरण्येन**=न्यायप्रकाशेन सुवर्णादिधातुमयेन (सूर्येण) वा १३३८ **हिरण्यैः**=किरणैरिव तेजोभि २३३९ सुवर्णैस्तेजआदिभि. ५६०४ [हर्य गतिकान्त्यो (भ्वा०) धातो 'हर्यते कन्यन् हिरच्' उ० ५४४ सूत्रेण कन्यन् हिरजादेशश्च । हिरण्य कस्माद् ध्रियते आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमण भवतीति वा हृदयरमण भवतीति वा हर्यतेर्वा स्यात् प्रेप्साकर्मण नि० २१० ज्योतिर्हि हिरण्यम् श० ४३१२१ हिरण्यम्—तद् यदस्य (प्रजापते) एतस्या रम्याया तन्वा देवा अरमन्त तस्माद्धिरण्य ह वै तद् हिरण्यमित्याचक्षते परोऽक्षम् श० ७४११६ (अथर्व० ५२८६ त्रेधा जात जन्मनेद हिरण्यमग्निरेक प्रियतम बभूव सोमस्यैक हिंसितस्य परापतत् अपामेक वेधसा रेत आहुस्तत् ते हिरण्य त्रिवृदस्त्वायुषे) अग्निर्ह वाऽपोऽभिदध्यौ मिथुनमाभि स्यामिति ता सम्बभूव तासु रेत प्रासिञ्चत्तद्धिरण्यमभवत् तस्मादेतदग्निसकाशामग्नेर्हि रेतस्तस्मादप्सु विन्दन्त्यप्सु हि प्रासिञ्चत् श० २११५ तस्य (अग्ने) रेत परापतत् । तद्धिरण्यमभवत् तै० ११३८, अग्नेर्वाऽएतद् रेतो यद्धिरण्य नाष्ट्राणा रक्षसामपहत्यै श० १४-१३२९ समानजन्म वै अयश्च हिरण्यञ्चोभय ह्यग्निरेतसम् श० ३२४८ अश्वस्य वा आलब्धस्य रेत उदक्रामत् । तत्सुवर्ण हिरण्यमभवत् तै० ३८२४ श० १३११३ रेतो हिरण्यम् तै० ३८२४ (प्रजापति) अयसो हिरण्य (असृजत) तस्मादयो बहुध्मात हिरण्यसकाशमिवैव भवति श० ६१३४ क्षत्रस्यैतद्रूप यद्धिरण्यम् श० १३२२१७ आयुर्हि हिरण्यम् श० ४३४२४ (आयुष्य वर्चस्य रायस्पोषमौद्भिदम् । इद हिरण्य वर्चस्वज्जैत्रायाविशतादु माम् यजु० ३४५० नैन रक्षासि न पिशाचा सहन्ते देवानामोज प्रथमज ह्येतत् । यो बिभर्त्ति दाक्षायण हिरण्य स जीवेषु कृणुते दीर्घमायु २ अपा तेजो ज्योतिरोजो बल च वनस्पतीनामुत वीर्याणि । इन्द्र इवेन्द्रियाण्यधिधारयामो अस्मिन् तद् दाक्षायणो बिभ्रद् हिरण्यम् ३ अथर्व० १३५२-३ यद्धिरण्य ददाति आयुस्तेन वर्षीय कुरुते गो० उ० ३१९ अमृतमायुर्हिरण्यम् श० ३८२२७ (यजु० १८५२) अमृत वै हिरण्यम् श० ९४४५ प्राणो वै हिरण्यम् श० ७५२८ सोमस्य वा अभिषूयमाणस्य प्रिया तनूरुदक्रामत् तत्सुवर्ण हिरण्यमभवत् तै० १४७४-५ वरुणस्य वा अभिषिच्यमानस्याप इन्द्रिय वीर्य निरघ्नन् ।

५ ३३ ८ [हिरणप्राति० मत्वर्थ इनि । हिरण्यप्राति० मत्वर्थ इनिप्रत्यये छान्दस रूपम्]

हिरण्मयेन ज्योतिर्मयेन (पात्रेण=रक्षकेणेश्वरेण) ४० १७ [हिरण्यप्राति० अवयवे विकारे वार्थे मयट्प्रत्यये 'दाण्डिनायनहास्तिनायन०' अ० ६ ४ १७४ सूत्रेण यादिलोपो निपात्यते । हिरण्यम्=हर्य गतिकान्त्यो (भ्वा०) धातो 'हर्यते कन्यन् हिरच्' उ० ५ ४४ सूत्रेण कन्यन् । हिरच् चादेश । हिरण्य कस्माद् ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमण भवतीति वा हृदयरमण भवतीति हर्यतेर्वा स्यात् प्रेप्साकर्मण नि० २ १० हिरण्यम् हिरण्यनाम निघ० १ २ ज्योतिर्हि हिरण्यम् श० ४ ३ ४ २१]

हिरण्यकर्णम् हिरण्य कर्णे यस्य तम् (अर्य=वैश्यम्) १ १२२ १४ [हिरण्य-कर्णपदयो समास.]

हिरण्यकारम् सुवर्णकार सूर्य वा ३० १७. [हिरण्योपपदे डुकृञ् करणे (तना०) धातो 'कर्मण्यण्' इत्यण्]

हिरण्यकेशः हिरण्यवत्तेजोवत्केशा न्यायप्रकाशा यस्य स (अहि =मेघ इव) १ ७९ १ [हिरण्य-केशपदयो समास । केशा रश्मय, काशनाद्वा प्रकाशनाद्वा नि० १२ २६]

हिरण्यगर्भः हिरण्यानि सूर्यादितेजासि गर्भे यस्य स परमात्मा २५ १० हिरण्यानि सूर्यादीनि ज्योतीषि गर्भे यस्य कारणरूपस्य स (परमेश्वर) २३ १ सूर्यविद्युदादिपदार्थाऽधिकरण (ईश्वर) ३२ ३ हिरण्याना सूर्यादीना तेजस्विना गर्भ उत्पत्तिस्थानम् (परमेश्वर) ऋ० भू० ३००, ३२ ३ हिरण्य ज्योतिर्विज्ञान गर्भ स्वरूप यस्य स (परमेश्वर) एवञ्च ज्योति प्रकाशोऽमृत मोक्ष, आदित्यादय केशा प्रकाशलोका, यश सत्कीर्त्तिर्धन्यवाद, आत्मा, जीव, इन्द्र, सूर्योऽग्निश्चैतत् सर्वं हिरण्याख्य गर्भे सामर्थ्ये यस्य स हिरण्यगर्भ परमेश्वर ऋ० भू० ७५, ३२ ३ हिरण्यानि सूर्यादीनि तेजासि गर्भे मध्ये यस्य स (प्रजापति = परमात्मा) १३ ४ सूर्यादि तेजस्वी पदार्थों का गर्भ नाम उत्पत्तिस्थान उत्पादक (ईश्वर) आर्याभि० २ २०, १३ ४ जिसने प्रकाश करने वाले सूर्यचन्द्रमादि पदार्थ उत्पन्न किए है वह प्रकाश स्वरूप (ईश्वर) स० वि० ४, १३ ४ सब सूर्यादि तेजस्वी लोको का आधार (देव =परमात्मा) स० प्र० २८२, १० १२१ १ [हिरण्य-गर्भपदयो समास । हिरण्यमिति व्याख्यात हिरण्मयेन पदे । प्रजापतिर्वै हिरण्यगर्भ श० ६ २ २ ५ हिरण्यगर्भ —हिरण्यगर्भो हिरण्यमयो गर्भो, हिरण्यमयो गर्भोऽस्येति वा । गर्भो गृभेर्गृणात्यर्थे गिरत्यनर्थानिति वा नि० १० २३]

हिरण्यचक्रान् हिरण्यानि सूर्यादीनि तेजासि चक्रेषु येषा विमानादीना तान् (रथान्) १ ८८ ५ [हिरण्यचक्रपदयो समास]

हिरण्यजिह्वः=हिरण्यमिव सत्येन सुप्रकाशिता वाणी यस्य स (सविता=राजा) ६ ७१ ३ हिरण्य हितरमणीया जिह्वा वाग् यस्य स (राजा राजपुरुषो वा), प्र०—हितरमण भवतीति वा हृदयरमण भवतीति वा नि० २ १० जिह्वेति वाङ्नाम निघ० १ ११, ३३ ६६ [हिरण्य-जिह्वापदयो समास । हिरण्यमिति व्याख्यातम् जिह्वा वाङ्नाम निघ० १ ११]

हिरण्यत्वक् हिरण्य तेज सुवर्ण चैव त्वगुपरिवर्ण यस्य स (रथ =विमानादियानम्) ५ ७७ ३ [हिरण्य-त्वच्पदयो समास]

हिरण्यदन्तम् हिरण्येन सुवर्णेन तेजसा वा तुल्या दन्ता यस्य तम् (कुमारम्) ५ २ ३ [हिरण्य-दन्तपदयो समास]

हिरण्यदाः ये वायवो हिरण्य तेजो ददति ते २ ३५ १० [हिरण्योपपदे डुदाञ् दाने (जु०) धातो क]

हिरण्यनिर्णिक् य पृथिव्या हिरण्यमग्नेस्तेजश्च नितरा नेनेक्ति स (विद्वज्जन) ५ ६२ ७ या हिरण्येन निर्णेनेक्ति पुष्णाति सा (वाक्) १ १६७ ३ [हिरण्योपपदे निरुपपदे णिजिर् शौचपोषणयो (जु०) धातो कर्त्तरि क्विप्]

हिरण्यनेमयः हिरण्यस्वरूपा नेमि सीमा यासा ता (विद्युत) १ १०५ १ [हिरण्य-नेमिपदयो समास । नेमि वज्रनाम निघ० २ २० नेमि —णीञ् प्रापणे (भ्वा०) धातो 'नियो मि' उ० ४ ४३ सूत्रेण मि]

हिरण्यपक्षः हिरण्यस्य सुवर्णस्य पक्ष परिग्रहो यस्य स (विद्वान् सभेश) १८ ५३ [हिरण्य-पक्षपदयो समास]

हिरण्यपर्णम् हिरण्यानि तेजासि पर्णानि पालकानि यस्य तम् (वनस्पतिं=किरणपालक सूर्यम्) २८ ३३
हिरण्यपर्णः=हिरण्यानि तेजासि पर्णानि यस्य स (वनस्पति =सूर्य) २८ २० हिरण्यवर्ण तेजस्वरूप (वनस्पति) २१ ५६ **हिरण्यपर्णाः**=हिरण्यानि पर्णानि पक्षा येषा ते (हसास =अश्वा) ४ ४५ ४ [हिरण्य-पर्णपदयो समास । पर्ण —पृ पालनपूरणयो (जु०) धातो 'धापॄवस्यज्यतिभ्यो न' उ० ३ ६ सूत्रेण न । हिरण्यपर्ण

प्र०—अत्र भूम्न्यर्थे मतुप् १ ३० १७ [हिरण्य व्याख्यानम् । ततो भूम्न्यर्थे मतुप्]

हिरण्यवन्धुरम् हिरण्यानि सुवर्णादीनि वन्धुराणि वन्धनानि यस्मिँस्तम् (रथ=रमणीय यानम्) ४ ४६.४ [हिरण्य-वन्धुरपदयो समास । वस्य वकारश्छान्दस । वन्धुर =वन्ध वन्धने (क्र्या०) धातो 'मद्गुरादयश्च' उ० १ ४१ सूत्रेण उरच्]

हिरण्यवर्ण यो हिरण्य वृणोति तत्सम्बुद्धौ (राजन्) ५ ३८ २ **हिरण्यवर्णम्**=तेजोमय शोभनस्वरूपम् (घृतम्=उदकमाज्य वा) २ ३५ ११ तेजस्विनम् (विद्वज्जनम्) ५ ४३ १२ **हिरण्यवर्ण:**=तेज स्वरूप (वनस्पति =सूर्य) २१ ५६ हिरण्य सुवर्णमिव वर्णो यस्य स (अग्नि) २ ३५ १० [हिरण्य-वर्णपदयो समास]

हिरण्यवर्णाम् तेजोमयीम् (विदुषी स्त्रीम्) ३ ६१ २ **हिरण्यवर्णा:**=हिरण्यवद् वर्णो यासा ता नद्य २ ३५ ६. [हिरण्य-वर्णपदयो समासे स्त्रिया टाप् । हिरण्यवर्णा नदीनाम निघ० १ १३]

हिरण्यवर्त्तनि. हिरण्यस्य विद्याव्यवहारस्य वर्त्तनि-मार्गो यस्या सा (सरस्वती—वाणी) ६ ६१ ७ [हिरण्य-वर्त्तनिपदयो समास. । वर्त्तनि —वृतु वर्त्तने (भ्वा०) धातो 'वृतेश्च' उ० २ १०६ सूत्रेणानि]

हिरण्यवर्त्तनी यौ हिरण्य ज्योति सुवर्ण वा वर्त्त-यतस्तौ (अश्विना=शिल्पिजनौ) ५ ७५ २ हिरण्य प्रकाश वर्त्तयन्तौ (अश्विनौ=वाय्वग्नी) १ ९२ १८ [हिरण्यवर्त्तनि-रिति व्याख्यातम् । ततो द्विवचने रूपम्]

हिरण्यवाशीमत्तम हिरण्येन सत्यप्रकाशेन परम-यशसा सह प्रशस्ता वाशी वाग् विद्यते यस्य सोऽतिशयित-स्तत्सम्बुद्धौ (पृथिवीराज्ययुक्त सभेश) प्र०—वाशीति वाङ्नाम निघ० १ ११, १ ४२ ६ [हिरण्य-वाशीपदयो समासे प्रशसायामर्थे मतुप् । ततोऽतिशायने तमप् । वाशी वाङ्नाम निघ० १ ११]

हिरण्यशम्यम् हिरण्यानि सुवर्णान्यन्यानि वा ज्योतीषि शम्यानि शमितु योग्यानि यस्मिँस्तम् (रथम्) १ ३५ ४ [हिरण्य-शम्यपदयो समास । शम्यम्=शमु उपशमे (दिवा०) धातोर्यत् 'पोरदुपधात्' सूत्रेण]

हिरण्यशिप्रा. हिरण्यमिव शिप्राणि मुखानि येषा ते (राजपुरुषा) २ ३४ ३ [हिरण्य-शिप्रपदयो समास । शिप्रे हनूनासिके वा नि० ६ १७]

हिरण्यशृङ्ग. हिरण्यानि तेजासि शृङ्गाणीव यस्य स (विद्युदग्नि) १ १६३ ९ [हिरण्य-शृङ्गपदयो समास । शृङ्गम्—शृङ्ग श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्-गतमिति वा शिरसो निर्गतमिति वा नि० २ ८]

हिरण्यसन्दृक् यो हिरण्य तेज सम्यग् दर्शयति स (अग्नि) २ ३५ १० **हिरण्यसन्दृश:**=हिरण्य तेज इव सन्दृक् समान दर्शन येषान्ते (सज्जना) ६ १६ ३८ [हिरण्योपपदे सम्पूर्वाद् दृशिर् प्रेक्षणे (भ्वा०) धातो क्विन् छान्दस]

हिरण्यस्येव यथा सुवर्णस्य १ ११७ १२ [हिरण्यस्य-इवपदयो समास]

हिरण्यहस्तम् हिरण्यानि सुवर्णादीनि हस्ते यस्य यद्वा विद्यातेजासि हस्ताविव यस्य तम् (विद्यात्रातृपुत्रम्) १ ११७ २४. हिरण्य हस्ते यस्मात् तम् (श्रुत=पठितम्) १ ११६ १३ **हिरण्यहस्त:**=हिरण्यानि ज्योतीषि हस्तवद् यस्य स (देव =सूर्य) ३४.२६ हिरण्यानि सर्वतो गमनानि हस्ता इव यस्य स (वायु), प्र०—अत्र गत्यर्थाद् हर्यगतो-रौणादिक कन्यन् प्रत्यय १ ३५ १०. [हिरण्य हस्तपदयो समास]

हिरण्या सुवर्णादीनि धनानि ४ १७ ११ [हिरण्य-प्राति० शेर्लोपश्छन्दसि]

हिरण्याऽक्ष: हिरण्यानि ज्योतीषि अक्षीणि व्याप्ति-शीलानि यस्य स (देव =सूर्यलोक) १ ३५ ८. हिरण्यानि ज्योतीष्यक्षीणी इव यस्य स (सूर्य्य) ३४ २४ [हिरण्य-अक्षिपदयो समासे समासान्तोऽच् छान्दस]

हिराभि: वृद्धिभि २५.८ [हि गतिवृद्ध्यो (स्वा०) धातोर्बाहु० औणा० रक् । तत स्त्रिया टाप्]

हिरिशिप्र: हिरी हरिते शिप्रे हनुनासिके यस्य स (इन्द्र =ईश्वरोपासको राजा) ६ २९ ६ हरणशील-हनु (विद्वज्जन) २ २ ५ [हिरि-शिप्रपदयो समास । हिरि =हृञ् हरणे (भ्वा०) धातोरौणा० इन्प्रत्यये हरि । अकारस्येकारश्छान्दस । शिप्रे हनूनासिके वा नि० ६ १७]

हिरिश्मश्रु: हिरण्यमिव श्मश्रूणि यस्य स (मेधावी राजा) ५ ७ ७ [हिरि-श्मश्रुपदयो समास । श्मश्रुलोम, श्मनि श्रित भवति नि० ३ ५]

हिरुक् पृथक् १ १६४ ३२ [हिरुक् निर्णीतान्तर्हित-नाम निघ० ३ २५]

हिषे प्रहिणोमि ७ ७ १ [हि गतिवृद्ध्यो (स्वा०) धातोर्लट् । विकरणस्य लुक् 'बहुल छन्दसि' सूत्रेण । व्यत्ययेनात्मनेपदम्]

तत्सुवर्णं हिरण्यमभवत् तै० ८ १ ६ १ वर्चो वै हिरण्यम् तै० १ ८ ६.१ तेजो वै हिरण्यम् तै० १ ८ ६ १ चन्द्र हिरण्यम् तै० १ ७ ६ ३ चन्द्र, ह्येतच्चन्द्रेण क्रीणाति यत्सोम हिरण्येन (चन्द्र =सोम, चन्द्र= हिरण्यम्) श० ३ ३ ३.६ शुक्र हिरण्यम् तै० १ ७ ६ ४ शुक्र ह्येतच्छुक्रेण क्रीणाति यत्सोम हिरण्येन श० ३ ३ ३ ६ ज्योतिर्वै शुक्र हिरण्यम् ऐ० ७ १२ ज्योतिर्वै हिरण्यम् ता० ६ ६ १० यशो वै हिरण्यम् ऐ० ७ १८ सत्य वै हिरण्यम् गो० उ० ३.१७ देवाना वा ऽएतद्रूप यद्धिरण्यम् श० १२ ८ १ १५ पवित्र वै हिरण्यम् तै० १ ७ २ ६ तस्माद्धिरण्य कनिष्ठ धनानाम् तै० ३ ११ ८ ७]

हिरण्यमिव यथा सुवर्णं प्रीतिकरम् १ ४३.५ [हिरण्य-इवपदयो समास]

हिरण्ययम् तेज सुवर्ण वा प्रचुर यस्मिँस्तम् (रथम्) १ ५६ १ हिरण्यप्रभूत धनम् १ १३६ २ सुवर्णादि-प्रचुरं धनम् ३ ३४ ६. सुवर्णादियुक्त तेजोमय वा (चक्रम्) ६ ५६ ३. ज्योतिर्मयम् (वज्रम्) १ ८५ ६. **हिरण्ययः**= तेजस्स्वरूप (वेतस =कमनीयो मनुष्य) १७ ६३ ज्योतिर्मय (इन्द्र =सूर्यलोक), प्र०—'ऋत्व्यवास्त्व्य०' अ० ६ ४ १७५ अनेन हिरण्मयशब्दस्य मलोपो निपात्यते। 'ज्योतिर्हि हिरण्यम्' श० ४ ३ १ २१, १ ७ २ तेजोमय सुवर्णमयो वा (विद्वज्जन) ४ ५८ ५. यशस्वी (ईश्वर) १३ ३८ **हिरण्ययाः**=सुवर्णप्रचुरा (पवय =चक्राणि) १ १८० १ **हिरण्यये**=प्रभूतसुवर्णमये (रथे) १ १३६ ४ **हिरण्ययेन**=सुवर्णादिनाऽलङ्कृतेन (रथेन =विमानादि यानेन) ४.४४ ५ ज्योतिर्मयेन सुवर्णाद्यलङ्कृतेन (रथेन) ४ ४४ ४ तेजोमय वरूप के साथ स० प्र० ३१३, ३३ ४३ **हिरण्ययौ**=प्रभूतहिरण्यमय्यौ (द्यावापृथिव्यौ) १ १४४ ६ [हिरण्यमिति व्याख्यातम्। ततोऽवयवे विकारे वार्थे मयट्-प्रत्यये 'ऋत्व्यवास्त्व्य०' अ० ६ ४ १७५ सूत्रेण निपातनान् मलोप]

हिरण्यया हिरण्याद्याभूषणयुक्तौ (बाहू= भुजौ) ६ ७१ १ ज्योतिष्प्रचुरे (पृथिवीसूर्यौ) ३३ ७१ हिरण्य-वत्सुदृढौ सुशोभितौ (बाहू) ६ ७१ ५ [हिरण्ययमिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

हिरण्ययासः हिरण्येन विद्युत्तेजसा प्रचुरा (मरुत = वायव) ६ ६६ २ [हिरण्यप्राति० 'तत्प्रकृतवचने मयट्' इति मयट्प्रत्यये 'ऋत्व्यवास्त्व्य०' अ० ६ ४ १७५ सूत्रेण मलोप। ततो जसोऽसुक्]

हिरण्ययी रोगरहिता शुद्धा (योनि =जन्मस्थानम्) ८ २६ **हिरण्ययीम्**=हिरण्यादिबहुधनयुक्ताम् (अमतिं= सुरूपा लक्ष्मीम्) ३ ३८ ८ तेजोमयीम् (अभ्रि=खनन-साधिका शस्त्री) ११ ११ हिरण्यादिप्रचुराम् (श्रियम्) ७ ३८ १ **हिरण्ययीः**=सुवर्णप्रचुरा (शिप्रा =उष्णिष) ५ ५४ ११ तेजोमय्य सुवर्णादिसुभूषिता (नाव) ६ ५८ ३ सुवर्णादिभिरनुलिप्ता (द्वार =द्वाराणि) २८ २८ हिरण्यप्रकारा (देवी =वाच) २८ ३१ [हिरण्य-प्राति० अवयवे विकारे वार्थे मयट्प्रत्ययान्तात् स्त्रिया ङीप्]

हिरण्ययी प्रभूतहिरण्यमय्यौ (द्यावापृथिव्यौ) १ १४४ ६ [हिरण्ययीति व्याख्यातम्। ततो द्विवचनस्य पूर्वसवर्णदीर्घ]

हिरण्ययुः हिरण्य सुवर्णं कामयमान (विद्वान्राजा-ऽध्यापक परीक्षको वा) ७ ३१ ३ [हिरण्यप्राति० आत्मन इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसी' ति उ। 'न छन्दस्यपुत्रस्य' इतीत्वप्रतिषेध]

हिरण्ययेभिः तेजोमयै. (पविभि =चक्रै) १.६४.११. [हिरण्यय इति व्याख्यातम्। ततो भिस ऐस् 'बहुल छन्दसि' इति न भवति]

हिरण्यरथम् हिरण्याना ज्योतिर्मयाना सूर्यादीना लोकाना सुवर्णादीना वा रथो देशान्तरप्रापणो यानसमूह, प्र०—अत्र रथ इति रमु क्रीडायाम् इत्यस्य रूप रम-धातो-र्वा रूपम् १.३० १६ **हिरण्यरथाः**=हिरण्य सुवर्ण रथेषु येषा ते यद्वा हिरण्य तेज इव रथा येषा ते रुद्रास = विद्वासो जना) ५ ५७ १ **हिरण्यरथः**=तेजोमय रमणीय-स्वरूप सूर्य इव रथो व्यवहारो यस्य स (अग्नि =राजा) ४ १.८ [हिरण्य-रथपदयो समास]

हिरण्यरूपम् हिरण्यस्य तेजसो रूपमिव रूप यस्य तम् (अग्नि=सूर्यमिव राजानम्) ४ ३ १ तेज स्वरूपम् अय स्थूण=सुवर्णस्तम्भम्) ५ ६२ ८ **हिरण्यरूपौ**= ज्योति स्वरूपौ (मित्रावरुणौ=उपदेशकसेनापती) १० १६ [हिरण्य-रूपपदयो समास। हिरण्यरूप —हिरण्यवर्ण-स्येवास्य रूपम् नि० ३ १६]

हिरण्यवत् हिरण्यादिना तुल्यम् (यशम्) ८ ६३ [हिरण्यप्राति० तुल्यार्थे वति]

हिरण्यवत् प्रशस्तानि हिरण्यादीनि विद्यादीनि तेजासि वा विद्यन्ते यस्मिँस्तत् (रथ=रमणयानम्) १ ६२ १६ हिरण्य सुवर्णादिक बहुविध साधन यस्य तत् (यानम्)

अभिसङ्कल्पेथाम् सर्वत समानाभिप्राये समर्थयताम् १२ ५७ [अभि+सम्+कृपु सामर्थ्ये धातोर्लङ् अडभावश्च]

अभिसचन्ताम् अभिमुख संयुञ्जन्तु, अन्व०—अभि-सयुक्ता भवन्तु १२२११ **अभिसचन्ते**=अभिमुख सम्बध्नन्ति ४४४२ अभित समवयन्ति १७१७ [अभि+षच् समवाये (भ्वा०) धातोर्लोट् लट् च । व्यत्ययेनात्मने-पदम् । सचन्ता=समेव्यन्ताम् नि० ६ ३३]

अभिसञ्चरन्ति आभिमुख्येन सम्यगाचरन्ति । [अभि+सम्+चर गतौ (भ्वा०) धातोर्लट्]

अभिसञ्चरन्ती अभित सम्यक् गच्छन्ती (द्यावा-पृथिव्यौ) [अभि+सम्+चर गतौ (भ्वा०) धातो शतृ ततो ङीप्]

अभिसञ्चरेण्यम् अभित सम्यक् चरितु ज्ञातु योग्यम् (चित्तम्) ११७०१ [अभि+सम्+चर गतौ भक्षणे च (भ्वा०) धातो 'कृत्यार्थे तवैकेनकेन्यत्वन' सूत्रेण केन्य प्रत्यय । अभि सञ्चरेण्यम्=अभिसञ्चारि नि० १६]

अभिसत्वा अभित सर्वत सत्वानो युद्धविद्वासो रक्षका भृत्या वा यस्य स (इन्द्र=सेनापति) १७ ३७]

अभिसन्दधुः अभिमुख सन्दधति ११०१६ [अभि+सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट् सामान्ये]

अभिसर्त्तारम् अभिमुख गन्तारम् (पुरुषम्) ३०१४ [अभि+सृ गतौ (भ्वा०) धातो कर्त्तरि तृच्]

अभिसन्नवन्ते अभिमुख गच्छन्ति, प्र०—नवत इति गतिकर्मा निघ० २१४, १.१६४.३ [अभि+सम्+नवत इति गतिकर्मा निघण्टौ, ततो लट्]

अभिसम्बभूव सर्वथा ऐसे निश्चय युक्त हो स० प्र० १५२, १०१८.८ [अभि+सम्+भू सत्तायाम् (भ्वा०) धातोर्लिट्]

अभिसश्चत सर्वत प्राप्नुत ३१६२ [अभि+सश्चति गतिकर्मा निघ० २१४ धातोर्लोट्]

अभिसंयन्ति सम्मुख जाकर बडा मान्य करते है स० वि० ८०, अथ० ११५.३ सम्मुखे प्रसन्नतया मान्य कुर्वन्ति ऋ० भू० २३५, अथर्व० ११५ ३ [अभि+सम्+इण् गतौ (अदा०) धातोर्लट्]

अभिसंरभन्ते अभिमुख सम्यक् प्रवर्त्तयन्ति ३ २६.१३. [अभि+सम्+रभ राभस्ये (भ्वा०) धातोर्लट्]

अभिसविवेश आभिमुख्येन सम्यक् प्रविशति ३२११ अभिमुख सम्यक् प्राप्य स एव मोक्षाख्य सुखमनुभवति ऋ० भू० ८६ समाधियोग मे सर्वथा प्रवेश किया करे स० वि० २१५, ३२११ परमानन्द मे सर्वथा रहना है आर्याभि० २१० **अभिसंविशन्तु**=अभित सम्यक् प्रविशन्तु १४६ भा०—आभिमुख्येन विजानन्तु १५ ५७ [अभि+सम्+विश प्रवेशे (तुदा०) धातोर्लिट् लोट् च]

अभिसिञ्चामि आभिमुख्येन सुगन्धेन रसेन मार्ज्मि ६ ३० अभिमुखमविकरोमि १० १७ [अभि+षिच क्षरणे (तुदा०) धातोर्लट्]

अभिसृजामि आभिमुख्येन रचयामि ११६६ [अभि+सृज विसर्गे (तुदा०) धातोर्लट्]

अभिसृष्टः अभिमुख प्रेरित (अन्य=सुसस्कृतमन्नम्) ३ ३५ १ [अभि+सृज विसर्गे (तुदा०) धातो क्त]

अभिस्तुते आभिमुख्येनाध्यापयन्त्यावुपदेशयन्त्यावध्याप-कोपदेशिके ७ ४० ७ [अभि+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

अभिस्तुहि आभिमुख्यतया प्रशस १ ५४.२ [अभि+ष्टुञ् स्तुतौ (अदा०) धातोर्लोट्]

अभिस्याम् अभिमुख भवेम ११०५१७ [अभि+अस भुवि (अदा०) धातोर्लिङ्]

अभिस्रवन्तु अभित सर्वत वृष्टि करोतु प० वि० । सर्वतो वर्षन्तु ३६ १२ [अभि+स्रु गतौ (भ्वा०) धातो-र्लिट्]

अभिस्वर आभिमुख्येन जानीहि प्राप्नुहि, प्र०—स्वरतीति गतिकर्मसु, पठितम् निघ० २१४, ११०४ **अभिस्वरन्ति**=आभिमुख्येनोच्चरन्ति १.१६४२१ [अभि+स्वृ शब्दोपतापयो (भ्वा०) धातोर्लोट् । अत्र गत्यर्थे अभिस्वरन्ति अभिप्रयन्ति नि० ३ १२.]

अभिस्वरा अभित सर्वत स्वरा वाणी तया, प्र०—अत्र 'सुपा सुलुग्०' इति डादेश 'स्वर' इति वाङ्नाम निघ० १११, २२१५ **अभिस्वरे**=योऽभित स्वरति शब्दयति तस्मिन् (अश्वे) ३ ४५ २ [अभि+स्वृ शब्दोपतापयो (भ्वा०) धातोरच् प्रत्यय 'स्वर' इति वाङ्नाम निघण्टौ]

अभिहर्यत सर्वथा प्रेमपूर्वक कामना से वर्त्ता करो सं० वि० १४१, अथर्व० ३ ३० १ [अभि+हर्यति कान्ति-कर्मा, निघ० २६ ततो लोट् । हर्यति गतिकर्मा निघ० २१४]

अभिहितः कथितो धृतो वा (वह्नि=अग्नि.) ५ ५० ४ [अभि+डुधाञ् धारणपोषणयो. (जु०) धातो. क्त. । 'दधातेर्हिरि' ति धातोर्हिरादेश]

अभिह्रुताम् सर्वत. कुटिलाचरणानाम् (दुर्जनानाम्)

हिंसिषम् उच्छिन्द्याम्, प्र०—अत्र लिङर्थे लुङ् १ २५ **हिंसिष्ट**=नष्ट करे स० वि० १६०, अथर्व० १६ ४ ३ **हिंसिष्टम्**=हिंस्यातम् ५ ३ **हिंसीत्**=हिनस्तु, प्र०—अत्र लोडर्थे लुङ् १ २२ रोगैर्हिंस्यात् १२ १० २ हन्यात्, ताडयेद्, विमुख कुर्यात् ३२ ३ **हिंसीः**=हिंस्यात् अ०—हनन कुर्या, प्र०—अत्र लिङर्थे लुङ् ४ १ हिंस्या १३ ४७ हिन्धि, अ०—विचालन वा कुर्या, प्र०—अत्र लोडर्थे लुङ् ४ ६ कुशिक्षया लालनेन वा विनाशये. ६ १५ हिंसया युक्त कुर्या ३७ २० हन्या ५.४३ ताडये १८ ५३ पीडित कर म० वि० १६७, अथर्व० ६ २ ३ १६ [हिंसि हिंसायाम् (रुधा०) धातोर्लुङ्। अटोऽभाव]

हीडितस्य अनादृतस्य (राज्ञ) ७ ४६ ४ **हीडितः**=अनादृत (विद्वज्जन) १ ८० ५ [हेडृ अनादरे (भ्वा०) धातो क्त । एकारस्येकारश्छान्दस]

हीयताम् त्यज्यताम् ६ ५२ १ [ओहाक् त्यागे (जु०) धातो कर्मणि लोट्]

हुतम् वह्नौ प्रक्षिप्तम् (मधु=घृतादि) ३८ १६ शब्दित (प्रजापति =जीव)३६ ५ [हु दानादानयो (जु०) धातो क्त । अथवा ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो क्त । दीर्घाऽभावश्छान्दस]

हुतास. सत्कारेण हुता (देवा =विद्वासो जना) ६ ५० १५. [हुतमिति व्याख्यातम् । ततो जसोऽसुक्]

हुरश्चितम् उत्कोचक हस्तात्परपदार्थाऽपहर्त्तारम् (स्तेनम्) १ ४२ ३ [हुरश्चित् स्तेननाम निघ० ३ २४]

हुरः कुटिलस्य (दुर्जनस्य) ४ ३ १३ [ह्वृ कौटिल्ये (भ्वा०) धातो कर्त्तरि क्विप्। 'बहुल छन्दसि' सूत्रेणोकारादेश]

हुवतः स्तुवत (सज्जनान्), ६ २१ १० [हु दानादानयो (जु०) ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्वा शतरि छान्दस रूपम्]

हुवध्यै ग्रहीतुम् ५ ४५ ४ होतुमादातुम् १ १२२ ५ आह्वातुम् ५ ४३ ८ ग्रहणाय ५ ४१ ३ [हु दानादानयो (जु०) धातो ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्वा तुमर्थ कध्यै]

हुवन्यति आत्मनो हुवन दानमादानञ्चेच्छति, प्र०—अत्र हुवनशब्दात् क्यचि 'वाच्छन्दसि' इतीत्वाभावेऽल्लोप १ ११६ ६ [हुवनप्राति० इच्छायामर्थे क्यजन्तात्लट्। हुवनम्=हु दानादानयो (जु०) धातोर्बाहु० औणा० क्यु]

हुवानः स्पर्धमान (तेजस्वी राजा) ७ ३० ३ आददान (विद्वज्जन) ५ ४३ १३ आहूत (इन्द्र =ऐश्वर्यकारको जन) ३ ४१ ४ स्तुवन् (प्रशस्तो जन) ७ ७ ३ ददत् (विद्वज्जन) ५ ४३ १०. **हुवानाः**=आह्वातार (देवा =विद्वज्जना) ६ ५० १४ कृताऽऽह्वाना (उस्रा =किरणा) ४ १ १३ [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो शानच् । शपो लुक् । औणा० वा आनच् किच्च । अथवा हु दानादानयो (जु०) धातो शानच् । शपो लुक्। व्यत्ययेनात्मनेपदम् । हुवाना —हूयमाना नि० १२ ३३]

हुवामहे स्पर्द्धामहे ५ ५६ ८ **हुवे**=गृह्णामि, प्र०—अत्र हु दानादानयो इत्यस्माद् धातोर् 'बहुल छन्दसि' इति शपो लुक् व्यत्ययेनाऽऽत्मनेपद च ३ १३ स्पर्द्धे १ १२८ २ आह्वये १५ ३२ प्रशंसेयम् ७ ४२ २ आदधि ५ ४६ ३ आददे, प्र०—लट्टुत्तमस्यैकवचने रूपम् १ १७ ७ स्तुवे १ ११६ १ स्वीकरोमि १.१८१ १ आदद्याम्, प्र०—अत्र विकरणाऽभावो लिङर्थे लट् च १ २७ स्तुयाम् ३३ ४६ स्वीकुर्वे १ १८५ ३ प्रशमामि १ १८५ ६ स्तौमि ६ ४५ १६ आह्वयामि ६ ४५ ७ आददे ६ ५०.१. आदधि ६ ५ १ **हुवेम**=आदद्याम ४ ४४ १ प्रशंसेम ७ ४१ १ स्वीकुर्वीमहि ६ ३६ आह्वयेम ८ ४५ शब्दयेम ७ ४१ २ स्वीकुर्याम १७ २३ गृह्णीयाम ३४ ३४ स्तूयामहि ६ ४६ १० आह्वयाम ३३ ६१ हम स्तुति, प्रार्थना करते है स० वि० १५५, ७ ४१ १ **हूमहे**=स्पर्धामहे, प्र०—अत्र ह्वेञ् इत्यस्माल्लटि 'बहुल छन्दसि' इति शपो लुक् 'बहुल छन्दसि' अ० ६ १ ३४ इति सम्प्रसारण 'सम्प्रसारणाच्च' इति पूर्वरूपञ्च 'हल' अ० ६ ४ २ इति दीर्घत्वम् १ १० १० स्पर्द्धमहि २५ १६ स्तुम २५ १८ स्वीकुर्महे ५ ३५ ३ आह्वयाम ६ ४६ ६ प्रशमाम ६ ४६ ३ प्रशमेम १ ८६ ३ हम अत्यन्त स्पर्द्धा करते हैं, स्पर्द्धा से आह्वान करते हैं आर्याभि० २ ५०, २५ १८ [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्लट् । छान्दसे सम्प्रसारणे गुणेऽवादेशे चाकारस्योकारश्छान्दस । अथवा हु दानादानयो (जु०) धातोर्लटि छान्दस रूपम् । अन्यत्र लिङ् चापि । हुवे आह्वये नि० ११ ३१ हुवेम ह्वयेम नि० १० २८]

हूनः प्रशंसित (कुमार =ब्रह्मचारी) ४ १५ ७ [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो क्त]

हूतास. कृताऽऽह्वाना सन्त (वसव =विद्वासो जना) ६ ५० ४ [हूत इति व्याख्यातम् । ततो जसोऽसुक्]

हूयते स्पर्द्धयते १ १० १ ६ स्तूयते १ १३५ २ दीयते

१.३६ ६. क्षिप्यते दीप्यते १ ३४.१० प्रक्षिप्यते १.२६ ६. **हूयसे**=स्तूयसे ३.४०.६. अध्वरसिद्धयर्थं शब्द्यते, प्र०—अत्र व्यत्यय. १ १६ १. [ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) हु दानादानयो (जु०) धातोर्वा कर्मणि लट्]

हूयमानम् स्पर्द्धमानम् (विद्यार्थिन राजजन वा) ४ २३ ३. **हूयमानः**=कृताऽऽह्वान (सभाध्यक्ष) १ १०४ ६ शब्द्यमान. (प्रजापतिः=जीव) ३६ ५ स्वीकृत' (रुद्र =जीव) ८.५८ स्तूयमान (राजा) ४.२६ २. [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो कर्मणि शानच्]

हूयमाना कृताऽऽह्वानौ प्रशसितौ (अश्विना=अध्यापकोपदेशकौ) ४ ४३.४ आहूयमानौ (मित्रावरुणा=अध्यापकोपदेशकौ) ६.६७ ३. [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो कर्मणि शानजन्ताद् द्विवचनस्याकार]

हूयमानाः जुह्वाना (पतिव्रता. स्त्रिय) २ ३ ५ [हु दानादानयो (जु०) धातो कर्मणि शानच्]

हृणानस्य लज्जितस्य (कस्यचिज्जनस्य) १ २५ २ [ह्री लज्जायाम् (जु०) धातो शानच् । विकरणव्यत्ययेन श्नाधातो सम्प्रसारण छान्दसम्]

हृणायन्तम् हरतीति हृणो हरिणस्तद्वदाचरन्तम् (दुर्जनम्) १ १३२ ४ [हृणपदादाचारे क्यजन्ताच्छतृ । हृण'=हृञ् हरणे (भ्वा०) धातोर्वाहु० औणा० नक्]

हृणीयमानः क्रोध कुर्वन् (विद्वज्जन) ५.२ ८ [हृणीङ् रोषणे लज्जाया च (कण्ड्वा०) धातो शानच् । हृणीयते क्रुध्यतिकर्मा निघ० २ १२]

हृणीषे हरसि, प्र०—अत्र विकरणव्यत्ययेन श्ना २.३३ १५ [हृञ् हरणे (भ्वा०)धातोर्लट् । व्यत्ययेन श्ना]

हृत्प्रतिष्ठम् हृदि प्रतिष्ठा स्थितिर्यस्य तत् (मन) ३४.६. हृदय मे प्रतिष्ठित (मन) स० प्र० २४७, ३४ ६. [हृद्-प्रतिष्ठापदयो समास । प्रतिष्ठा=प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो स्त्रियामङ् । ततष्टाप्]

हृत्सु हृदयेषु ४.३१ **हृदः**=हृदयात् ३ ३६ १ हृद इव प्रियान् (मघोन =धनाढ्यान् जनान्) ५.३१ ६. सुहृद (मानुषासः=मनुष्या) १ ६०.३. हृदयस्य (समीपे स्थित मन्त्र=विचारम्) २ ३५ २ आत्मन १८.५८ **हृदा**=अन्त करणेन २० ७८ हृदयेन १ १०५.१५' विषयहारकेण (मनसा=शुद्धाऽन्त करणेन) १७ ६४. हृदयस्थेन विज्ञानेन १ ६७ २. **हृदि**=हृदय मे आर्याभि० १ ३७, ऋ० १ ६ २१ १३ **हृदे**=हृदयस्य चेतनत्वाय, भा०—आत्मशुद्धये ३७.१६ हृत्सुखाय ६ २५. **हृद्भिः**=चित्तै. १ ११६ १७. [हृदयप्राति० शस्प्रभृतिषु विभक्तिषु 'पद्दन्नोमासहृद्०' अ० ६.१ ६३ सूत्रेण हृदादेश. । हृत्सु हृदयानि नि० ६ ३३ हृदे—हृदयाय नि० १० ३५.]

हृत्स्वसः ये हृत्स्वस्यन्ति बाणान् तान् (मयोभून्=सुवीरान् जनान्) १ ८४ १६ [हृदुपपदे असु क्षेपणे (दिवा०) धातो क्विप् । विभक्तेर्लुक्]

हृदयम् अन्त करणम् ११ ३६. आत्मबलं जीवनहेतुस्थानम् २०.६ **हृदयस्य**=आत्मनो मध्ये ७ ३३.६ प्राणात्मा का आर्याभि० २ ३६, ३६ २ **हृदयानि**=मानसानि (प्रेमप्रचुराणि कर्माणि) ऋ० भू० ६५, ऋ० ८ ८ ४६.४ **हृदये**=भा०—स्वाऽन्ते २१ ५३ मध्ये १५ ६३. **हृदयेन**=स्वाऽऽत्मना १६ ८५ हृदयाऽवयवेन ३६ ८ **हृदयेभ्यः**=हृद्वद्वर्त्तमानेभ्य (किरिकेभ्य =विक्षेपकेभ्यो जनेभ्य.) १६ ४६. [हृञ् हरणे (भ्वा०) धातो 'वृहो षुग्दुकौ च' उ० ४ १०० सूत्रेण कयन् दुगागमश्च । हृदयम्-तदेतत् त्र्यक्षर हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एव वेद, द इत्येकमक्षर ददत्यस्मै स्वाश्चान्ये च य एव वेद, यमित्येकमक्षरमेति स्वर्ग लोक य एव वेद श० १४ ८ ४ १ तस्मादिद गुहेव हृदयम् श० ११ २ ६ ५. मूर्द्धा हृदये (श्रित) तै० ३ १० ८.६ आत्मा वै मनो हृदयम् श० ३ ८ ३ ८ एष प्रजापतिर्यद्धृदयम् श० १४ ८ ४.१ हृदय वै सम्राट् । परम ब्रह्म श० १४ ६ १० १८. पुत्रो हि हृदयम् तै० २ २.७ ४ असौ वाऽआदित्यो हृदयम् श० ६ १ २ ४०. प्राणो वै हृदयमतो ह्ययमूर्ध्व प्राण सञ्चरति श० ३ ८ ३ १५ परिमण्डल हृदयम् श० ६ १ २ ४० श्लक्ष्ण हृदयम् श० ६.१ २ ४० हृदय वै स्तोमभागा श० ८ ६ २ १५]

हृदयाग्रेण हृदयस्य पुरोभागेन ३६ ८ [हृदय-अग्रपदयो समास]

हृदयाविधः यो हृदयमाविध्यति स (प्रजापुरुष) ८ २३. हृदय विध्यति तस्याऽधर्मस्याऽधार्मिकस्य शत्रोर्वा, प्र०—अत्र 'नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ' अ० ६.३ ११६ [हृदयोपपदे आङ्पूर्वाद् व्यध ताडने (दिवा०) धातोः कर्त्तरि क्विपि 'नहिवृतिवृषि०' अ० ६ ३ ११६ सूत्रेण पूर्वस्य दीर्घ । ग्रहिज्यादिसूत्रेण सम्प्रसारणम् । वचनव्यत्यय]

हृदयौपशेन यो हृदये आ समन्तादुपशेते स हृदयौपशो जीवस्तेन २५ ८. [हृदयोपपदे आङ्पूर्वाद् उपपूर्वाच्च शीङ् स्वप्ने (अदा०) धातोर्ड]

हृदय्याय हृदये साधवे (पुरुषाय) १६ ४४ [हृदय-प्राति० 'तत्र साधु' इत्यर्थे यत्। 'हृदयस्य हृल्लेख०' इति प्राप्तो हृदादेशो 'वा छन्दसि' नियमेन न भवति]

हृदिस्पृक् यो हृद्यन्तःकरणे सुखं स्पृशति स (स्तोम =गुणप्रकाशसमूहक्रिय) १ १६ ७. **हृदिस्पृशम्**= यो हृद्यात्मनि स्पृशति तम् (विद्याबोधम्) १५ ४४ हृदयस्य प्रियम् (मोक्षमार्गम्) ४ १० १ [हृदोपपदे स्पृश संस्पर्शने (तुदा०) धातो क्विप्। सप्तम्या अलुक्। 'हृद्द्युभ्यां ङे' अ० ६ ३ ६ वा०सूत्रेण]

हृद्यम् हृदयस्य प्रियम् (सूनुम्=अपत्यम्) ५ ४२ २ **हृद्यात्**=हृदये भवात् (समुद्रात्=अन्तरिक्षात्) १७.६३ [हृदयप्राति० प्रियार्थे 'हृदयस्य प्रिय' इति यत्। भवार्थे वा यत्। 'हृदयस्य हृल्लेख०' इति हृदादेश]

हृद्रोगम् यो हृदयस्याऽज्ञानादि-ज्वरादिरोगस्तम् १.५० ११ [हृदय-रोगपदयो समासे 'वा शोकष्यञ् रोगेषु' अ० ६ ३ ५१ सूत्रेण हृदादेश]

हृषितम् जातहर्षम् (आनन्दम्) १ १०३ ७ [हृष तुष्टौ (दिवा०) धातो क्त]

हृषीवतः बह्वानन्दयुक्तस्य (यज्ञस्य=व्यवहारस्य) १ १२७ ६ **हृषीवन्तः**=बहुहर्षयुक्ता. (वय =पक्षिण) २ ३११. [हृषिप्राति० भूम्न्यर्थे मतुप्। 'छन्दसीर' इति मतोर्वत्वम्। हृषि.—हृष तुष्टौ (दिवा०) धातोरौणा० इन् किच्च]

हेडः हिड्यते विज्ञायते प्राप्यते य स (व्यवहार) १ २४ १४. हेडन्तेऽनादृता भवन्ति यस्मिन् स (अनादर-व्यवहार) ४.१ ४ अनादरम् १ १७१ १. भा०—असत्कार २१ ३ अनादरकर्त्ता (राजा) १६ ६. [हेडृ अनादरे (भ्वा) धातोर्घञ्। हेड क्रोधनाम निघ० २ १३]

हेडः धार्मिकाणामनादरकर्त्तृ॒न धार्मिकाऽजनान् १ ११४ ४ [हेडृ अनादरे (भ्वा०) धातो कर्त्तरि क्विप्]

हेडांसि अनादर-रूपाणि (कर्माणि) ६ ४८.१०. [हेडस्=हेडृ अनादरे (भ्वा०) धातोरौणा० असुन्]

हेतयः वज्रा वृद्धयो वा १७ ७ गतय १.१६०.४. वज्रवद्वर्त्तमाना शस्त्राऽस्त्रोन्नतय १७ १५ प्रबला वज्र-गतय १६ ५३. वज्रादिशस्त्रास्त्रयुक्ता सेना १७ ११. वज्र इव व्यवस्था, भा०—शासना ३६.२० **हेतिम्**= बाणम् २६ ५१ सुखवर्द्धक वज्रम् १ १०३ ३ वज्रवद् बाणम् ६ ७५.१४ **हेतिः**=वज्रघोष १५ १६. वृद्धि १५ १८. वज्रादिव पीडा २ ३३.१४. वज्रम् १६.११. वज्र इव घातुक (पौरुषेय =पुरुषाणा समूह) १५ १५ **हेतीनाम्**=विद्युताम् १५ १२ वज्राम्न्रादीनाम् १५ १० वज्रवद्वर्त्तमानाना किरणानाम् १५ १३ वृद्धानाम् (लोका-नाम्) १५ १४ **हेत्यै**=वज्रादिशस्त्रनिर्माणाय ३० ७. वृद्धयै १६ १८ [हेति वज्रनाम निघ० २ २०. हि गतौ वृद्धौ च (स्वा०) धातो, हन हिंसागत्यो (अदा०) धातोर्वा स्त्रिया क्तिन्प्रत्यये 'ऊतियूतिजूति०' अ० ३ ३ ९७ सूत्रेण निपात्यते। हेतिर्हन्ते नि० ६ ३ हेतिम्=वधात् नि० ९ १५]

हेत्वः प्रवृद्धो वेगवान् (सप्ति =अश्व) ७ ४३ १२ [हि गतौ वृद्धौ च (स्वा०) धातोर्बाहु० औणा० त्वन्]

हेमन्तः हन्त्युष्णता येन स (ऋतु) १३ ५८ **हेमन्ताय**=हेमन्तर्त्तौ कार्यसाधनाय २४ ११ **हेमन्तेन**= वर्द्धन्ते देहा यस्मिँस्तेन, भा० — सर्वरसपरिपाचकेन (ऋतुना) २१ २७ [हन हिंसागत्यो (अदा०) धातो 'हन्तेर्मुट् हि च' उ० ३ १२९ सूत्रेण झच् धातोश्च हिरादेश । हेमन्त — हिमवान्। हिम पुनर्हन्तेर्वा हिनोतेर्वा नि० ४ २७ हेमन्त —(ऋतु) एतौ (सहश्च सहस्यश्च) एव हैमन्तिकौ (मासौ) स यद्धेमन्त इमा प्रजा सहसेव स्व वशमुपनयते तेनो हैतौ सहश्च सहस्यश्च श० ४ ३ १ १८. तस्य (पर्जन्यस्य) सेनजिच्च सुषेणश्च सेनानीग्रामण्याविति हैमन्तिकौ तावृतू श० ८ ६ १ २० हेमन्तो होता तस्माद्धेमन-वषट्कृता पशव सीदन्ति श० ११ २ ७ ३२ हेमन्तो मध्यम् (संवत्सरस्य) तै० ३ ११ १० ४ तस्य (संवत्सरस्य) वसन्त एव द्वार हेमन्तो द्वार त वा एत संवत्सर स्वर्गं लोक प्रपद्यते श० १ ६ १ १९ यद् वृष्टयोद्गृह्णाति तद्धेमन्तस्य (रूपम्) श० २ २ ३ ८ हेमन्तो निधनम् ष० ३ १. अन्त ऋतूना हेमन्त श० १ ५ ३ १३. हेमन्तो वा ऽऋतूना स्वाहाकारो हेमन्तो हीमा प्रजा स्व वशमुपनयते श० १ ५ ४ ५ स्वाहाकृतिमन्त यजति हेमन्तमेव हेमन्ते वा इद सर्व स्वाहाकृतम् कौ० ३ ४]

हेम्यावान् हेमन्युदके भवा रात्रिर्विद्यते यस्य स (अग्नि =विद्वज्जन) ४.२ ८ [हेमा उदकनाम निघ० १ १२ ततो भवार्थे यति स्त्रिया टापि च हेम्या। ततो मतुप्]

हेषक्रतवः हेषा शब्दा क्रतव प्रज्ञा क्रिया वा येषान्ते (मनुष्या) ३ २६ ५ [हेष-क्रतुपदयो समास । हेष—हेषृ अव्यक्ते शब्दे (भ्वा०) धातोर्घञ्। क्रतु कर्मनाम। निघ० २ १. प्रज्ञानाम निघ० ३.९.]

हेषन्तम् शब्द कुर्वन्तम् (रतुत्य जनम्) ५ ८४ २ [हेषृ अव्यक्ते शब्दे (भ्वा०) धातो शतृ]

हेषस्वतः हेषा प्रसिद्धा शब्दा विद्यन्ते यस्य तस्य (विद्वज्जनस्य) ६ ३ ३ [हेषस्प्राति० मतुप्। हेषस्—हेषृ अव्यक्ते शब्दे (भ्वा०) धातोरौणा० असुन्]

हैमन्तिकौ हेमन्ते भवौ मार्गशीर्ष पौषञ्च मासौ १४ २७ [हेमन्तप्राति० भवार्थे 'हेमन्ताच्च' अ० ४ ३ २१ इति ठञ्]

हैमन्ती हेम्नो व्याख्यात्री (पङ्क्ति =छन्द) १३ ५८ [हेमन्तप्राति० व्याख्यानार्थे 'सधिवेलाद्यृतु०' इत्यण्। तत स्त्रिया ङीप्]

आभूभिः समन्ताद् भवन्ति वीरा यासु प्रशासन-

आयताम् =आगच्छताम्, आगच्छन्तीना वा (मनुनाम् = जनानाम्) १ १६६ ७ [आङ्+इण् गतौ (अदा०) धातोः शतृप्रत्यय]

आयन् समन्तात् प्राप्नुयात् २ ३० ७ **आयथुः** = सर्व राज्य रक्षेथाम् १० ३४ **आयन्** =प्राप्नुवन्ति ६.७ ४ मर्यादायामायान्तु ७ ५ ३ आगच्छन्ति प्राप्नुवन्ति ७ ५६ १२ आप्नुवन्ति १ १६३ ६ प्राप्नुयु ३ ३३ ७ प्राप्नुवन्तु १७ ५६ आगच्छन्ति २७ २५ **आयन्ति** — समन्तात्प्राप्नुवन्ति ३ ३१ १४ **आयन्तु** =समन्तात्प्राप्नुवन्तु १ ८९ १ आगच्छन्तु १६ ५८ **आयम्** =आगच्छेय प्राप्नुयाम् १ १२५ ३ [आङ्+इण् गतौ (अदा०) धातोर्लङि लटि लोटि च रूपाणि]

आयय आयाय ५ ६१ १ आगच्छत १ १६८ ९ **आययुः** =समन्ताज्जानीयु प्राप्नुयुर्वा ५ ५३ ३ समन्तात् प्राप्नुयु २ ५ ५ **आयात** =अभितो गच्छत १ ८८ १ समन्तात्प्राप्नुत १ १७१ २ **आयातम्** =समन्तात्प्राप्नुतम् ३४ ४७ अभित प्राप्नुतम् ३३ ८८ समन्ताद् गच्छतो गमयतो वा प्र०—अत्र व्यत्यय, अन्तर्गतो ण्यर्थश्च १ ३ ३ समन्तात्प्राप्नुतम् ३३ ५८ समन्तात्प्राप्नुत २ ३६ ५ अभितो गच्छतम् १ ४७ २ आगच्छतम् १ १८४ ६ **आयाताम्** =आगच्छताम् ७ ४८ १ **आयाति** =समन्तात् प्राप्नोति ३४ ३१ समन्ताद् गच्छति ३३ ४३ **आयातु** =आगच्छतु २० ४७ समन्ताद् गच्छतु ७ ४५ ६ समन्तात् प्राप्नोतु ४ ४८ ५ **आयासत्** = समन्ताद् यायात् २० ४८ समन्तात्प्राप्नुयात् ४ २० १ **आयासि** =समन्ताद् याति, प्र०—अत्र पुरुषव्यत्यय १ १२ ४ **आयासिष्टम्** =आयातम् १ ११६ ४ **आयासीष्ट** =समन्तात् प्राप्नुयात्, प्र०—अत्र व्यत्ययेनात्मनेपदम् १ १६५ १५ **आयाहि** =समन्तात्प्राप्नुया १ १० १८ समन्तात्प्राप्नो भव भवति वा, अ०—कृपया प्राप्नुहि प्राप्नोति वा १ ३ ४ तू प्राप्न हो आर्याभि० १७ आगच्छ ५ ४० १ समन्तात्प्राप्नुहि ४ १६ १० आभिमुख्यतयाऽऽगच्छ १ १७७ २ समन्ताद् गच्छ १ १३४ १ समन्ताद् याति समन्तात्प्रापयति, अ०— समन्तात्प्राप्नोति १ ३ ६ आगच्छ आगच्छति वा, प्र०— अत्र पक्षे व्यत्यय १ २ १ समन्ताद् यजामि सङ्गमयामि वा, प्र०—अत्र लडर्थे लुङडभावश्च १ १४ १ [या प्रापणे (अदा०) धातोर्लङि लटि लेटि लुङि च रूपाणि]

आयत समन्ताद्धन्ति, प्र०—अत्र 'यमो गन्धने' अ० १ २ १५ इत्यनेन सिच किस्वम् १ ८०.१२ [आङ्+यमु उपरमे (भ्वा०) धातोर्लिट्। 'आतो लोप' पा० ६.३ इत्याकारलोपः। 'यमो गन्धने' [illegible] [illegible]लोप]

आयतने प्राप्तानि आगच्छन्ति प्राणिना यस्मिन्न- ज्जगत्तस्मिन् जगति स्थान गृहे वा ५ ७८. [यतो वा आयतनम् उ० १८६ २ ५]

आयता विस्तृतानि (धनानि) ५ ८५ ६ [आङ्+ यमु उपरमे (भ्वा०) धातो क्त प्रत्यय]

आयतिः समन्तात् नियति १ १३८ ६ [आङ्+ यमु उपरमे (भ्वा०) धातो क्तिन्। यतो वा आयति उ० ३० २ ३]

आयती समन्तात् प्राप्यमाणा (गौरी) १ १६१ २ **आयतीनाम्** आगामिनीनामुषसाम् १ ११३ ८ आगच्छन्तीनाम् (उषसाम्) १ १२४ २ **आयतीम्** =प्राप्नुवतीम् (उषाम - प्रभाताम्) १५ २४ आगच्छन्तीम (उषस —पार्वतीनाम्) ३ ६१ ६ [आङ्+इण् गतौ (अदा०) धातो समन्तात् स्त्रिया ङीपि रूपम् । (आयती) [illegible]नाम निघ० ३.४]

आयने गतौ प्राप्नुवने (जिज्ञासो जनाय) २ १३ ४ [आङ्+इण् गतौ (अदा०) धातो शतृ प्रत्यय]

आयत्या: पश्चाद्रूपा (उषस —प्रभाता) ५ ४५ १ [आङ्+इण् गतौ (अदा०) धातो शतरि ङीपि रूपम्]

आयनाय समन्ताद् विज्ञानाय २२ ७ [आङ्+अय गतौ (भ्वा०) धातोर्ल्युट्]

आयन्तम् प्राप्नुवन्तम् (अग्नि =विद्युतम्) ११ ४७ आगच्छन्तम् (शिष्यम्) १ १२५ २ [आङ्+इण् गतौ (अदा०) धातो शतृप्रत्यय । 'इणो यण्' इति यणादेश]

आयमत् समन्तादुपरमेत १२ ११५ **आयमति** = अभितो यच्छेत्, प्र०—अत्र लेटि 'बहुल छन्दसि' इति शब- भाव १ १४१ ११ [आङ्+यमु उपरमे (भ्वा०) धातोर्लङ् लट् च]

आयव ये स्वकर्मफलानि यान्ति ते मनुष्या , प्र०— आयव इति मनुष्यनाम निघ० २ ३, ३३ ६७ विद्वांस १ १३० ६ प्राप्नुवन्त (जना) १ १३६ ३ ये सूर्यमभितो यन्ति ते लोका १ १३१ २ ये पुरुषार्थं यन्ति ते मनुष्या १ १३१ २ विद्वज्जना १ १३० ६ ज्ञानवन्तो मनुष्या ४ ७ ४ ये सत्य यन्ति ते मनुष्या प्रजा ३३ २८ प्राप्त- सत्यासत्यविवेचना. (मानुषास = मनुष्या) १ ६० ३

१९ २१ मधुराम्लादिमयोगयुक्ता (हवि =वस्तु) १९ २३ [समन्तान्मेपति हिनस्तीत्यामिक्षा=क्षीरविकार इति विग्रहे, (आङ्पूर्वाद् मिश गेपकृते (भ्वा०) धातो-र्बाहुलकात् स' प्रत्यय किच्च । आण्डस्य वा ऽएतद्रूप यदामिक्षा तै० १ ६ २.४]

आऽमित्रः समन्तादशत्रु (जन) ६ २८ ३ [आङ्-अमित्रपदयो समास । मित्रम्=मिनोति मान्य करोतीति विग्रहे, डुमिञ् प्रक्षेपणे (स्वा०) धातो 'अमिचिशसिभ्य क्त्र' उ० ४ १६४ सूत्रेण क्त्र प्रत्यय]

आमिनत् आहिंस्यात् ४ ३० २३ **आमिनन्ति**=समन्ताद्धिंसन्ति ५ ६४.४ [आङ्+मीञ् हिंसायाम् (क्र्या०) धातोर्लेटि रूपम् । ह्रस्वत्व छान्दसम्]

आमिनन्त समन्तात् प्रक्षिपन्ति १ ७९ २ [आङ्+डुमिञ् प्रक्षेपणे (स्वा०) धातोर्लङ् । विकरणव्यत्ययेन श्ना]

आमिनाना समन्ताद् हिंसन्ती (उषा), प्र०—मीञ् हिंसायाम्, इत्यस्य रूपम् १ ९२ १० [आङ्+मीञ् हिंसायाम् (क्र्या०) धातो. शानचि स्त्रिया टापि च रूपम् । ह्रस्वत्व छान्दसम्]

आमिनाने परस्पर प्रक्षिपन्ती पदार्थाविव (राज्युषसौ) प्र०—आमिनाने आमिन्वाने अन्योऽन्य याऽध्यारम कुर्वाणे इति नि० २ २०, १ ११३ २ [आङ्+डुमिञ् प्रक्षेपणे (स्वा०) धातो शानचि स्त्रिया टापि रूपम् । विकरणव्यत्ययेन च श्ना]

आमिमिक्षुः समन्तात् सिञ्चन्ति सम्बध्नन्ति ६ २९ २ अभित सिञ्चत ६ २९ ३ [आङ्+मिह सेचने (भ्वा०) धातोर्लुङ् । 'शल इगुपधात्०' इति च्ले क्स । छान्दस द्वित्वम् । 'भिजभ्यस्तविदिभ्यश्चे' ति भेर्जुस्]

आमिश्लतमः समन्तादतिशयेन मिश्रित (सोम = ऐश्वर्ययोग ओषधिरसो) वा ६ २९ ४ [आङ्+मिश्रपदयो समासेऽतिशायने तमप् प्रत्यय । कपिलादित्वाद् रेफ य लकार । मिश्र =मेशति शब्दयतीति विग्रहे, मिश शब्दे (भ्वा०) धातोर्बाहुलकाद् रक् प्रत्यय]

आमिषि मासे ६ ४६ १४ [अमन्ति=रोगिणो भवन्ति येनेति विग्रहे, अम' रोगे (चुरा०) धातो 'अमेर्दीर्घश्च' उ० १ ४६ सूत्रेण टिषच् प्रत्ययो धातोरकारस्य च दीर्घ]

आमुरः समन्ताद् रोगकारिण (जना) ४ ३१ ९ [आङ्+अम रोगे (चुरा०) धातोर्बाहुलकाद् उरच् प्रत्यय]

आमुष्य चोरयित्वा ३ ४८ ४ [आङ्+मुष स्तेये (क्र्या०) धातो क्त्वा । समासे क्त्वो ल्यप्]

आमेन्यस्य समन्तान्मेयस्य (रजस =लोकस्य) ५ ४८ १ [आङ्+मा माने (अदा०) धातो कृत्यार्थे केन्य प्रत्यय]

आमेस्याने पुन पुनर्हिंसन्त्यौ (द्यावाक्षामा=प्रकाश-भूमी) १ ९६ ५ [आङ्+मीञ् हिंसायां (क्र्या०) धातोर्यङि शानचि टापि च रूपम्]

आयच्छ अभिता ददाति, प्र०—अत्र व्यत्ययो लडर्थे लोट् च ४ ६ **आयच्छत**=समन्ताद् गृह्णीत ८ ५ १ १० **आयच्छतस्** समन्ताद् विस्तारयत, प्र०—अत्र पुरुषव्यत्ययो लडर्थे लोट् च १ १७ ८ **आयच्छतु**=निगृह्णातु ४ ३२ १५ **आयच्छन्तु** अभितो निगृह्णन्तु १ १३० २ [आङ्+यमु उपरमे (भ्वा०) धातोर्लोट् । 'इषुगमियमा छ' इति छकारादेश]

आयच्छद्भ्यः समन्ताद् निगृहीतृभ्य (राजपुरुषेभ्य) १६ २२ [आङ्+यमु उपरमे (भ्वा०) धातो शतृ । 'इषुगमियमा छ' इति छकारादेश]

आयक्षत् समन्तात् सङ्गच्छेत्पूजयेद्वा ५ १३ ३ **आयक्षि**=अभित सङ्गमयेत् १ १०५ १३ **आयज** = समन्ताद् गमय १ १८८ ९ **आयजताम्**=समन्ताद् गृह्णातु २१ ४७ **आऽयजन्त**=समन्तात् सङ्गच्छन्ते ४ ४२ ८ आभिमुख्येन ददतु १ १२१ ५ **आयजन्ते**= समन्तात् सङ्गच्छन्ते ३ ४ २ **आयजसे**=समन्तात् सुख ददते १ ९८ २ **आयजस्व**=समन्ताद् यजस्व ७ ४ अभितो देहि ३ १ १२ [आङ्+यज देवपूजासङ्गतिकरण-दानेषु (भ्वा०) धातोर्लेट् । सिब्बहुल लेटि' इति सिब्-विकरण । अन्यत्र लोटि लटि च रूपाणि]

आयजाते समन्ताद् यजेत सङ्गच्छेत ६ ७० ११ आयजेत ३ ५३ ११ [आङ्+यज देवपूजासङ्गतिकरण-दानेषु (भ्वा०) धातोर्लेट् आडागम]

आयजिष्ठः समन्तादतिशयितो यष्टा (गोपा =गवा पाता जन) २ ९ ६ [आङ्+यज देवपूजासङ्गतिकरण-दानेषु (भ्वा०) धातो तृच् कर्त्तरि । ततोऽतिशायन इष्ठन्-प्रत्यये 'तुरिष्ठेमेयस्सु' इति तृचो लोप]

आयजी समन्ताद् यज्यन्ते सङ्गम्यन्ते पदार्था याभ्या तौ स्त्रीपुरुषौ, प्र०—अत्र बाहुलकादौणादिक करणकारके इ प्रत्यय १ २८ ७ [आङ् पूर्वाद् यजदेवपूजासङ्गतिकरण-दानेषु (भ्वा०) धातोर्बाहुलकाद् इ प्रत्यय]

आयत् प्राप्नुवन् (विश्व=सर्व जगत्) ३ ५५ ८

१५.६३ विट्प १ १४७१ प्रापकस्य (सज्जनस्य) ११७४६ जीवनस्य ५४६१ सनातनात् कारणात् १६६२ प्राप्तव्यस्य (वस्व=धनस्य) २२०४ प्राप्तु योग्यस्य (मेघस्य) प्र०—'छन्दसीण' उ० १२, ११०४४ प्राप्तस्य (अग्ने) २४२ आयुण ४३८४ **आयौ**= जीवनविषये ११११४८ [इण् गतौ (अदा०) धातो 'छन्दसीण' उ० १२ सूत्रेण उण् प्रत्यय । एति प्राप्नोति सर्वानित्यायुर्जीवनकाल । अथवा इण् धातो 'एतेर्णिच्च' उ० २११८ सूत्रेण उसि प्रत्यय । णिद्वद्भावाद् वृद्धिश्च। आयुस् अन्ननाम निघ० २७ आयुश्च वायुरयन नि० ६३ आयोरयनस्य मनुष्यस्य ज्योतिषो वोदकस्य वा नि० १०४०, ११४६ आयु (एकाह)—आयुषा वै देवा असुराणामायुवतायुते भ्रातृव्य य एव वेद ता० १६३२ आयु उर्वशी वा ऽप्सरा पुरूरवापतिरथ यत्तस्मान्मिथुनाद-जायत तदायु श० ३४१२२ वरुण एवायु श० ४१ ४१० अग्निर्वा ऽआयु श० ६७३७ अग्निर्वा ऽआयुष्मानायुष ईष्टे श० १३८४८ संवत्सर आयु श० ४१४१० यज्ञो वा आयु ता० ६४४ असौ लोक (द्युलोक) आयु ऐ० ४१५ असावुत्तम (लोक= स्वर्लोक) आयु (सोम) ता० ४१७ अन्नमु वा ऽआयु श० ६२३१६ आयुर्वा उद्गाता । आयु क्षत्रसग्रहीतार तै० ३८५४ प्राणो वा आयु ऐ० २३८ यो वै प्राण स आयु श० ५२४१० आयुर्वा उष्णिक् ऐ० १५ स यो हैव विद्वान्त्सायम्प्रातराशी भवति सर्व७ हैवायुरेति श० २४२६ य एव विद्वान्त्स्यान्न मृण्मये भुञ्जीत । तथा हास्यायुर्न रिष्येत तेजश्च आ० ११ आयुर्वै विकर्णी (इष्टका) श० ८७३११ आयुर्वै सहस्रम् तै० ३८१५३ विदेदग्निर्नभो नामाग्ने ऽअङ्गिर आयुना नाम्नेत्याह (यजु० ५६) श० ३५१३२ अमृतमायुर्हिरण्यम् श० ३८२२७ आयुर्हि हिरण्यम् श० ४३४२४ आयुर्वै हिरण्यम् तै० १८६१ यद्धिरण्य ददाति आयुस्तेन वर्षीय कुरुते गो० उ० ३१६]

आयुनि प्राप्ते (स्वापत्ये=स्वकीये सन्ताने) ३३७ [आयु-व्याख्यातम् । तस्य सप्तम्येकवचने रूपम्]

आयुयुञ्जे समन्ताद् युञ्जते ५५८७ [आङ्+ युजिर् योगे (रुधा०) धातोर्लिट्]

आयुयुवे समन्ताद् बध्नाति ११८८१ **आयुवते**= समन्ताद्युवते बध्नाति प्र०—अत्र विकरणव्यत्ययेन श ११०५२ [आङ्+युञ् बन्धने (क्र्या०) धातोर्लिट् । अपस्त्र-लाट् । विकरणव्यत्ययेन श]

आयुर्दा. आयु प्रद (परमेश्वर), अन्व०—आयुर्निमित्तम् ३१७ आयु उमर बढाने वाले (परमेश्वर) आर्याभि० २३३ [आयुरुपपदे डुदाञ् दाने (जु०) धातो क प्रत्यय]

आयुर्युधः ये आयुषा सह युध्यन्ते (अ०—भृत्या, भा०—जीवनादिरक्षका वायव) १६६० [आयुरुपपदे युध सम्प्रहारे (दिवा०) धातो क प्रत्यय]

आयुवः प्राप्ता (धेनव=गाव) २५५ समन्तात् सयोजका वियोजकाश्च (मरीचय=किरणा) १८३६ [आङ्+यु मिश्रणेऽमिश्रणे च (अदा०) धातोरच् प्रत्यय । 'तन्वादीना छन्दसि बहुलम्' अ० ६४७७ वार्त्तिकेन उवङ्]

आयुष्पाः य आयु पाति स (आप्तो विद्वज्जन) २२१ [आयुषि-उपपदे पा रक्षणे (अदा०) धातो क प्रत्यय । छान्दसत्वादाकारलोपो न भवति]

आयुष्मान् बह्वायुर्विद्यते यस्य स (राजा) ३५१७ [आयुष्प्राति० मतुप् प्रत्ययो भूम्नि । 'तसौ मत्वर्थे' अ० १४१६ सूत्रेण भत्वात् पदकार्य न भवति]

आयुष्यम् आयुषे जीवनाय हितम् (हिरण्य=तेजो सुवर्णादिकम्) ३४५० [आयुर्व्याख्यातम् । ततो हितार्थे यत्]

आयूय सम्मेत्य २३७३ [आङ्+यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

आये यत्समन्तादाप्यते तस्मिन् (सङ्कथे=सङ्ग्रामे) २३८१० [आङ्पूर्वाद् इण् गतौ (अदा०) धातो 'एरच्' इत्यच् प्रत्यय]

आयेजे समन्ताद् याजयति १११४२ स्वप्रजा को सङ्गत और अनेक विध ताडन करता है आर्याभि० १४५ [आङ्=यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्लिट्]

आयेमिरे समन्ताद् वि-तृणन्ति ३६८ [आङ्+ यम उपरमे (भ्वा०) धातोर्लिट् । 'आङो यमहन' इत्यात्मनेपदम्]

आयेषम् समन्तात् प्रयतेयम् २२७१६

आयै एतु गन्तुम् २१८३ [आङ्+या प्रापणे (भ्वा०) धातोश्छन्दसि कै प्रत्ययस्तुमर्थे]

आयोत्सि अभिमुख युध्यसे, प्र०—अत्र 'बहुल छन्दसि' इति श्यनभाव ११३२४ [आङ्+युध सम्प्र-

[आङ्+या प्रापणे (अदा०) धातो 'डुप्रकरणे मितद्र्वादिभ्य उपसङ्ख्यानम्' इति डु प्रत्यय]

आयवसस्य पूर्णसामग्रीकरय (राज्ञ) १ १२२ १५ [आङ्-यवस-पदयोर्बहुव्रीहि]

आयवे गमनाय २ २ ८ प्रायणाय १ १४० ८ विज्ञानाय १ ३१ ११ [इण् गतौ (अदा०) धातो 'छन्दसीण' उ० १ २ सूत्रेण उ प्रत्यय]

आयसम् अयोनिर्मितम् (वज्रम्) १ ५२ ८ अयोमयम् (वज्रम्) १ ८१ ४ अयोनिर्मित शस्त्राऽस्त्रादिकम् १ १२१ ६ **आयसः**=विज्ञानात् १ ५६ ३ अयसा निष्पन्नस्तेजोमयो वा (वज्र) १ ८० १२ [अय =हिरण्यनाम निघ० १ २ अयस्प्राति० विकारार्थेऽण् प्रत्यय]

आयसी अयोमयी दृढा (पू =नगरी) ७ १५ १४ **आयसीभिः**=अयस सुवर्णनिर्मितान्याभूपणानीवेश्वरेण रचिताभि (पूर्भि =अन्नादिक्रियाभि) १ ५८ ८ अयसा निर्मिताभि (पूर्भि =नगरीभि) ७ ३ ७ **आयसीम्**=अयोविकाराम् (शस्त्राऽस्त्ररूपाम्) १ ११६ १५ **आयसीः**=सुवर्णमयीर्लोहमयीर्वा (पुर =नगर्य्य) ४ २७ १ सुवर्णलोहनिर्मिता (पुर =नगर्य्य) २ २० ८ [अय +हिरण्यनाम निघ० १ २ ततोऽवयवविकारयोऽर्थयोरण् प्रत्यय । स्त्रिया 'टिड्ढाण्०' इति ङीप्]

आयामयन्ति समन्तात् नियमयन्ति २५ ३६ [आङ्+यमु उपरमे (भ्वा०) धातोर्णिचि लटि च रूपम्]

आयासाय समन्तात् प्रापणाय, भा०—पुरुपार्थसिद्धये ३६ ११ [आङ्+यसु प्रयत्ने (दिवा०) धातोर्घञ् प्रत्यय]

आयुक्त समन्ताद् युक्तो भवति ५ १७ ३ [आङ्+युजिर् योगे (रुधा०) धातो क्त प्रत्यय]

आयुञ्जाथाम् समन्ताद् युज्येते ऋ० भू० १६७ [आङ्+युजिर् योगे (रुधा०) धातोर्लङि मध्यमद्विवचनम्]

आयुधम् समन्ताद् युध्यन्ति येन तत् (शस्त्रम्) ३ ४४ ४ असिभुशुण्डीशतघ्न्यादिकम् १६ ५१ भुशुण्डिशतघ्न्यसिधनुर्बाणशक्तिपट्टपाशादि २६ ४५ आयुध्यन्ति येन तत् (किरणवत्तीव्रस्वभाव शस्त्रम्) ५ ६३ ४ **आयुधा**=आयुधानि ५ २ ३ शस्त्राऽस्त्राणि ५ ५७ ८ आग्नेयाऽस्त्रादीनि ऋ० भू० १५१ आग्नेयादि अस्त्र और शतघ्नी (तोप), भुशुण्डी (बन्दूक), वाण, करवाल (तलवार) आदि शस्त्र स० प्र० १८४, १ ३६ २ **आयुधानि**=समन्ताद्युध्यन्ते यैस्तानि १७ ४२ शतघ्नीभुशुण्ड्यादीनि शस्त्राणि आग्नेयादीन्यस्त्राणि वा १ ६१ १३ **आयुधेभिः**=युद्धसाधनै (शस्त्राऽस्त्रै) ७ २१ ४ [आङ्+युध सम्प्रहारे (दिवा०) धातो 'घञर्थे कविधान स्थास्नापाव्याधिहनियुध्यर्थम्' अ० ३ ३ ५८ वार्त्तिकेन क । आयुधमायोधनात् नि० १० ६ आयुधा=आयुधानि नि० १० ३०]

आयुधानीव यथा वीरैर्युद्धविद्यया प्रक्षिप्तानि शस्त्राणि गच्छन्त्यागच्छन्ति तथा १ ६२ १ [व्युत्पत्ति पूर्वपदे द्रष्टव्या । आयुधानि=उदकनाम निघ० १ १२]

आयुधाय य समन्ताद् युध्यते तस्मै (सभेशाय), प्र०—अत्र 'इगुपध०' इति क प्रत्यय १६ १४ [युध सम्प्रहारे (दिवा०)+क । आङ्-युधपदयो समास]

आयुधिने ये शतघ्न्यादिभि समन्ताद् युध्यन्ते ते प्रशस्ता विद्यन्ते यस्य तस्मै (राजपुरुपाय) १६ ३६ [आयुधो व्याख्यात । ततो मत्वर्थे इनि प्रत्यय]

आयुनक् शिल्पकार्ये नियुञ्जीत १ १६३ २ [आङ्+युजिर् योगे (रुधा०) धातोर्लङ्]

आयुना जीवनेन प्रापकत्वेन वा ५ ६ **आयुभिः**=जीवनै ५ ६० ८ **आयुम्**=यन्त गच्छन्त (सभेशम्) १ ३१ ११ य एति प्राप्नोति तम् (जीवनम्) १ ५३ १० **आयुषः**=जीवनस्य १२ ६५ नियतवर्पाज्जीवनात् ११ ४६ **आयुषा**=चिरञ्जीवनेन १२ ७ अन्नेन १२ ६ जीवनेन ७ १ २४ **आयुषि**=प्राणधारणे २२ २ वयसि १६ १६ जीवनहेतौ भा०—युक्ताहारविहारेण शरीरारोग्यसन्ताने १७ ६६ जीवननिमित्ते प्राणे ,४ ५८ ११ **आयुषु**=वात्याद्यवस्थासु १ ५८ ३ **आयुषे**=पूर्णायुवर्धनेन सुखभोगाय १ २० आयुर्भोगाय ३ ६३ जीवनाय १४ २१ वृद्धये, उन्नत्यै ७ २३ वर्द्धनाय ७ २२ जीवन के लिए स० वि० १६०, अथर्व० १६ ४० ३ **आयुः**=जीवन ज्ञान वा १ ६४ १६ विद्याधर्मोपयोजक जीवनम् १ ६६ ८ चिरञ्जीवनम् १ ११६ १६ जीवनहेत्वन्नम् प्र०—आयुरित्यन्ननामसु पठितम् निघ० २ ७, १ ११३ १७ जीवनप्रदमन्नम् ३७ १२ जीवन तन्निमित्त वा ५ १७ एति जीवन येन तत् ५ २ उणर आर्याभि० २ १३, १८ २६ ज्ञाता (इन्द्र =मेधावी जन) १ १६२ १ आयु को स० वि० १४०, अथर्व० १४ २ ६४ प्राणधारणम् १ १२५ ६ जीवन प्राप्तव्य वस्तु वा १ ७३ ५ जीवन विज्ञान वा २१ २ वय १ २४ ११ **आयूंषि**=अन्नादीनि जीवनानि वा ३५ १६ **आयोः**=न्यायाऽनुगामिनो दीर्घजीवितस्य

हिंसार्थे (भ्वा०)धातोर्यङ्लुगन्ताल् लोटि छान्दस रूपम्]

आरीः ज्ञानवत्य (प्रजा), प्र०—अत्र ऋधातो 'सर्वधातुभ्य इन्' इतीन् प्रत्यय 'कृदिकारादक्तिन इति ङीप्, पूर्वसवर्णादेशश्च १ ७७ ३ समन्तादाप्तु योग्या (विश =प्रजा) १ ६६ ३]

आरीः प्राप्त होवो आर्याभि० १ ८०, ऋ १ ७ ३ ३ [ऋ गतिप्रापणयो (भ्वा०) धातोर्लुङ्]

आरुचयन्त रुचिमाचक्षते ३ ६ ७ [आङ्-रुचि-पदयो समासे 'तत्करोति तदाचष्टे' इति णिजन्नाल् लङ्, शतरि वा रूपम्]

आरुजत्नुभिः समन्ताद् भञ्जद्भि (वह्निभि = मरुद्भि) प्र०—अत्राऽऽङ्पूर्वाद् 'रुजो भङ्गे' इत्यस्माद्धातो-रौणादिक क्त्नु प्रत्यय १ ६ ५

आरुजः य समन्ताद् रुजति भनक्ति (इन्द्र =सूर्य) ३ ४५ २ समन्ताद् रोगयुक्ता (पुर =नगरी) ४ ३२ १० **आरुजे**=समन्ताद् रोगाय ४ ३१ २ दु खभञ्जकाय जीवाय ३६ ५ [आङ्+रुजो भङ्गे (तुदा०) धातो कर्त्तरि क्विप्]

आरुणीषु गच्छन्ति प्राप्नुवन्ति सुखानि यैस्तान्य-रुणानि यानानि तेषामिमा क्रियास्तासु १ ६४ ७ [ऋ गतिप्रापणयो (भ्वा०) धातो 'अर्त्तेश्च' उ० ३ ६० सूत्रेण उनन् प्रत्ययेऽरुण । तत 'तस्येदमि' त्यण्प्रत्यये स्त्रिया ङीपि च रूपम्]

आरुन्धानः समन्ताच्छत्रून् निरुन्धान (राज्याधिकारी जन) ४ ३८ ४ [आङ्+रुधिर् आवरणे (रुधा०) धातो शानच्]

आरुपितम् आरूढम् (नक्षत्रम्) ४ ५ ७ [आङ्+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०)धातोर्णिजन्तात् क्त । 'रुह पोऽन्यतरस्याम् इति हकारस्य पकार]

आरुरुचे समन्ताद्रोचते १७ १० **आरुरोच**= समन्ताद् रोचते ४ ५ १५ [आङ्+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लिट् । अन्यत्र व्यत्ययेन परस्मैपदम्]

आरुव समन्तात् शब्दविद्या प्रकाशय १ १० ४ [आङ्+रु शब्दे (अदा०)धातोर्लोट् । विकरणव्यत्ययेन श]

आऽरुहत् आरोहति, प्र०—अत्र लडर्थे लङ्, विकरण-व्यत्ययेन शप स्थाने श १ १० २ समन्ताद्रोहेत् १ ५१ २ **आरुहन्ति**=समन्ताद् रोहन्ति १७ ६८ **आऽरुहम्**= समन्ताद् रोहेयम् १७ ६७ **आरुहेम** - अधितिष्ठेम २१ ६ [आङ्+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लङ् । व्यत्ययेन श]

आरे समीपे दूरे वा ७ ३२ १ दूरे समीपे च १ ११४ १० दूरे ७ ५६ १७ [आरे दूरनाम निघ० ३ २६]

आरे अघाम् आरे दूरेऽघ पाप यस्याम् (स्वस्ति= सुख) ६ ५६ ६ **आरे अघाः**=आरे दूरेऽघानि पापानि यासान्ता (इष =अन्नादिसामग्री) ६ १ १२ [आरे-अघपदयो समास । आरे=दूर नाम निघ० ३ २६ अघम्=आङ्+हन हिंसागत्यो धातोर्ड प्रत्यय । अघ हन्तेर्निर्ह्रसितोपसर्ग आहन्तीति नि० ६ ११]

आरैक् समन्ताद् व्यतिरिणक्ति १ ११३ १ अभि-मुखमृणक्ति ३ ३१ २ [आङ्+रिचिर् विरेचने (रुधा०) धातोर्लुङ् । छान्दसत्वाल्लेर्लुक् । आरैक् अरिचन् नि० २ १६ आरैक्=प्रारिचत् नि० ३ ६]

आरोचते समन्तात् प्रकाशते ४ ११ १ **आरो-चथाः**=समन्तात् प्रदीपयति, प्र०—अत्र व्यत्ययो लडर्थे लङ् ३ १४ [आङ्+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लट् । अन्यत्र लङ् रोचते ज्वलतिकर्मा निघ० १ १६]

आरोधनम् सर्वतो निरोधनम् ४ ८ २ समन्तान्नि-रोधकम् (अग्नि=विद्युदग्निम्) ४ ८ ४ **आरोधनानि**= समन्तान्निग्रहणानि ४ ७ ८. [आङ्+रुधिर् आवरणे (रुधा०) धातोर्ल्युट्]

आरोह सर्वत प्रसिद्धो भव १० १० अ०—शत्रून् विजयस्व १० ११ समन्तादुन्नति गमय गमयति वा, अ०— समन्ताद् रोहति ३ १४ समन्ताद् दर्शयसि दर्शयति वा ४ ३२ सब ओर से तू चढ स० वि० १३८, अथर्व० १४ २ ३१ **आरोहसे**=समन्ताद् रोहसे १५ ११२ [आङ्+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लोट् । अन्यत्र लट्]

आरोहणम् आरोहन्ति येन तत् १ ५२ ६ [आङ्+ रुह बीजन्मनि प्रादुर्भावे च (भ्वा०) धातो करणे ल्युट्]

आरोहन् समारूढ सन् जगत्यारोहण कुर्वन् वा १ ५० ११ **आरोहन्तम्**=आरोहण कुर्वन्तम् (मेघम्) २ १२ १२ [आङ्+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो शतृप्रत्यय]

आऽरोहयत् उपरि स्थापितवान् १ ७ ३ **आरो-हयः**=समन्ताद्रोहयसि १ ५१ ४ [आङ्+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्णिजन्ताल्लट्]

आऽर्चत् समन्तात् सत्कुर्यात् ५ ३३ ६ **आऽर्चत**= समन्तात् सत्कुरुत ५ ५४ १ **आऽर्चति**=समन्तात्

हारे (दिवा०) धातोर्लट् । 'बहुल छन्दसि' इति श्यनो लुक् । व्यत्ययेन परस्मैपदम्]

आयोयुवानः समन्ताद् भृश मिश्रयिता विभाजको वा (अग्नि =परमात्मा) ४ १ ११ [आङ्+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्यङि शानचि च रूपम्]

आर अभितो गच्छति ३ ३० १० **आरत्**=समन्तात् प्राप्नोति १७ ८६ **आरत**=समन्ताद् गच्छन्तु १ ४ ५ प्राप्नुत, प्र०—अत्र लोडर्थे लङ् १ ३६ ५ **आरन्**=समन्तात्प्राप्नुयु ५ ३१ १३ आचरन्तु १ १२५ ७ प्रापयति १ ४६ ३ **आरुः**=समन्ताद् गच्छेयु ३ ७ १ सर्वत प्राप्नुवन्तु ३ १४ [आङ्+ऋ गतौ (जु०) धातोर्लिटि, लुङि च रूपाणि । लुङि 'सर्तिशास्त्यर्तिभ्यश्च' च्लेरङ् । 'ऋदृशोऽङि' इति गुण]

आरजः लोक-लोकान्तरम् ४ ४५ २. [रजसी द्यावापृथिवीनाम निघ० ३ ३० रञ्ज रागे (भ्वा०) धातो 'भूरञ्जिभ्या कित्' उ० ४ २१७ सूत्रेण असुन् प्रत्यय]

आर्जीकात् सरलता से स० वि० १६५, ६ ११३ २ [ऋजीक सरलम्, तत प्रभवत्यर्थेऽण् प्रत्यय]

आरणे सर्वतो युद्धभावे १ ११२ ६ [आङ्-रण-पदयो समास । रण सग्रामनाम निघ० २ १७]

आरण्यम् जङ्गलोत्पन्नम् (गरभ =शल्यकम्) १३ ५१ **आरण्यः**=अरण्ये भव (पशु =सिंहादि) ६ ६ **आरण्यानाम्**=वनानाम् १६ २० **आरण्याः**=अरण्ये भवा, भा०—वनस्था (सिंहादय पशव) ३१ ६ [अरण्यशब्दात् भवार्थेऽण् प्रत्यय । ऋच्छन्ति गृहाद् गच्छन्ति यत्रेति विग्रहे 'ऋ गतिप्रापणयो ' (भ्वा०) धातो 'अर्त्तेर्निच्च' उ० ३ १०२ सूत्रेणान्य प्रत्यय]

आरपन्ती व्यक्तशब्द वदन्ती (सा =बुद्धि) २२ २ [आङ्+रप व्यक्ताया वाचि (भ्वा०) धातो शत्रन्तात् ङीप्]

आरभम् आरब्धुम् ५ ३४.५ [आङ्+रभ राभस्ये (भ्वा०) धातोर्णमुल् । 'रभेरशब्लिटो ' अ० ७ १ ६३ सूत्रेण प्राप्तो नुमपि न भवति, आगमशासनस्यानित्यत्वात्]

आरभस्व आरम्भ कर स० वि० १८६, अथर्व० ६ ५ १ **आरभे**=समन्तात् कुर्वे, अ०—नित्य कुर्वे ४ ६ समन्तादारम्भ कुर्वे ४ ६ [आङ्+रभ राभस्ये (भ्वा०) धातोर्लोट्]

आरभे आरब्धुम् १ १८२ ७ आरब्धव्ये व्यवहारे प्र०—अत्र 'कृत्यार्थे तवैकेन्केन्यत्वन ' अ० ३ ४ १४ अनन रभधातो केन्प्रत्यय १ २४ ५ आरब्धव्ये गमनागमने १ ४ २ [आङ्+रभ राभस्ये (भ्वा०) धातो कृत्यार्थे केन्प्रत्यय]

आरभ्य त्वत्सामर्थ्यमाश्रित्य १ ५७ ४ [आङ्+रभ राभस्ये (भ्वा०) धातो क्त्वा । क्त्वो ल्यप् समासे]

आरम्भणम् आरभते यस्मात्तत् १७ १८ [आङ्+रभ राभस्ये (भ्वा०) धातोर् अपादाने ल्युट् । 'रभेरशब्लिटो ' अ० ७ १ ६३ सूत्रेण नुम्]

आरया प्रतोदेन ६ ५३ ५ [ऋ गतिप्रापणयो (भ्वा०) धातो आरा शस्त्रिकायामिति भिदादिपाठाद् अङ् वृद्धिश्च]

आरात् निकटात् १६ ८४ दूरात् समीपाद्वा १ १६३. ६ निकटे २६ १७ [आरादिति दूरसमीपयोरिति कोश]

आरात्तात् दूरे ८ ३२ १. दूरात् १ १६७ ६]

आराम् काष्ठविभाजिकाम् (राजनीतिम्) ६ ५३ ८ [ऋ गतिप्रापणयो (भ्वा०) धातो 'आरा शस्त्रिकायामि' ति भिदादिपाठात् स्त्रियाम् अङ्वृद्धिश्च]

आरारन्धि समन्ताद्रमस्व रमते वा, प्र०—अत्र रमधातोर्लोटि मध्यमैकवचने 'बहुल छन्दसि' इति शप स्थाने श्लु, व्यत्ययेन परस्मैपदम् 'वाच्छन्दसि' इति हे पित्वाद् 'अङितश्च' इति धि १ ६१ १३ यथावत् रमण करो आर्याभि० १ ३७ [आङ्+रमु क्रीडायाम् (भ्वा०) धातोर्लोट्]

आरास्व अभितो देहि ददाति वा ४ १६ [आङ्+रा दाने (अदा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

आरितः सभया विज्ञापित (इन्द्र =सभाध्यक्ष) १ १०१ ४ समन्तात्प्राप्त (शमादिगुणकर्मयुक्तो जन) २ २१ ३ [आङ्+ऋ गतिप्रापणयो (भ्वा०) धातोर्यङ्लुगन्तात् क्त । 'सूचिसूत्रि' अ० ३ १ २२ वा० इति यङ् । 'बहुल छन्दसी' ति यङो लुक् । इडागमश्छान्दस । प्रत्ययलक्षणेन द्वित्वे, अभ्यासस्य 'उरत्' इत्यत्वे रपरत्वे च, 'रुग्रिकौ च लुकि' इति रुगागमे' 'रो रि' इति पूर्वरेफस्य लोपे 'ढ्लोपे पूर्वस्य दीर्घोऽण ' अ० ६ ३ १०६ इति दीर्घे रूपम् । आरित प्रत्यून नि० ५ १६]

आरिशामहे समन्तात् प्राप्नुयाम, प्र०—अत्र 'लिश गतौ' इत्यस्य वर्णव्यत्ययेन लस्य स्थाने रेफादेश १ १८७ ८ [आङ्+लिश गतौ (तुदा०)धातोर्लट् । व्यत्ययेनात्मनेपदम् । वर्णव्यत्ययेन लस्य रेफादेश]

आरीरिषः समन्ताद् हिंस्या १ १०४ ६ [आङ्+रिष

धातो 'अर्य स्वामीवैश्ययो' अ० ३ १ १०३ सूत्रेण यत् । अर्य =ईश्वरनाम निघ० २ २२ आर्य =ईश्वरपुत्र नि० ६ २६]

आर्षेय ऋषिषु साधुस्तत्सम्बुद्धौ (पुरुष) प्र०—अत्र छान्दसो ढक् २१ ६१ [ऋषिप्राति० 'तत्र साधु' अर्थे छान्दसो ढक् । ढस्यैयादेश]

आलाऽक्ता आलेन विषेण दिग्धा युक्ता (शूरवीरा राज्ञी) ६ ७५ १५

आव सर्वतो रक्ष २ ११ ११ **आवत्**=समन्ताद्रक्षेत् ३ ३२ २ रक्षणादिक कुर्यात् १ ८५ ७ समन्ताद्रक्षति प्रीणाति १ ३६ १७ **आवत**=समन्तात्पालयत २० ७६ विजानीत १ ६४ १३ **आवतम्**=अभिमुख पालयतम् १ ११२ २१ समन्तात्कामयतम् १ ११२ १५ सर्वतो रक्षतम् १० ३३ रक्षणीयवेद्यादिगर्त्त कुरुतम् ३३ १६ समन्ताद्विजानीतम् १ ११२ १३ **आवतुः**=कामयेताम् १ १६१ १० **आवथु.**=समन्ताद्रक्षताम्, प्र०—अत्र पुरुषव्यत्यय २० ७७ सर्वतो रक्षेथाम् १० ३४ **आवन्**=प्रकर्षेण रक्षन्ति ३ ३ १० प्राप्नुयाम ४४४ ६ **आवम्**=रक्षयेयम् ४ २६ ३ **आवः**=समन्तादवति अवेत् १३ ३ समन्ताद्रक्षे ७ १६ ७ सर्वतो रक्ष ६ २६ ४ समन्तात्प्रापय १ ३३ १५ समन्ताद्रक्षति ५ ७७ २ अभिमुख रक्षेत्, प्र०—अत्र लिडर्थे लड् १ ३३ १४ समन्ताद्रक्ष प्राप्नुहि वा १ ३३ ७ प्राणिन सुखेन प्रवेशयेत् १ ३३ १४ समन्तात् कामयस्व ७ १६ ३ **आविथ**=समन्तादवति २ १३ ६ सर्वतो रक्षसि १ ५३ १० अभिमुख रक्ष १ ५१ ६ समन्ताद्रक्षे १ १३१ ५ अभित पालय १ १३१ ५ रक्षणादिक करोषि १ ५४ ६ [आङ्+अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु (भ्वा०) धातो लोटि लङि लिटि च रूपाणि]

आवक्षत् समन्ताद् वहेत् १ १५७ ३ सर्वत प्रापयेत् १७ ६२ **आवक्षति**=समन्ताद् वहतु प्रापयतु वे० भा० न० ११२ कृपा से प्राप्त करो आर्याभि० १४ **आवक्षन्**=समन्ताद् वहन्तु प्रापयन्तु १ १०४ २ **आवक्षि**=समन्तादावह ५ ४३ १० समन्तात्प्राप्नोषि प्रापयसि वा ५ २६ १ आवह ६ ४७ ६ समन्तात् प्रापय ३ ७ ६ समन्तादुपदिशसि १७ ८ समन्ताद् वदसि ३ १४ २ सर्वथा उपदेश करो आर्याभि० १ ५२ [आङ्+वह प्रापणे (भ्वा०) धातोर्लेट् । 'सिब् बहुल लेटी' ति सिप् । आवक्षत्=आवहति नि० ८ ४२]

आवदत समन्तादुपदिशत १ ६४ ६ **आवदत**=समन्तादुपदिशत ५ १७ **आवदानि**=समन्तादुपदिशेयम् २६ २ मैं उपदेश करता हूँ स० प्र० ६७, २६ २ **आवदेम**=समन्तादुपदिशेम १ ११७ २ [आङ्+वद व्यक्ताया वाचि (भ्वा०) धातोर् लोटि लटि लिटि च रूपाणि]

आवदन् समन्तादुपदिशन् (उपदेशको जन) २ ४३ ३ समन्ताद् ब्रुवन् सन् (मनुष्य) १.११ ६ निरन्तर उपदेश करता हुआ (परमेश्वर) आर्याभि० १ ५३ [आङ्+वद व्यक्ताया वाचि (भ्वा०) धातो शतृप्रत्यय]

आवनसे सर्वत सम्भजसि १ १४० ११ **आवनिषीष्ट**=समन्ताद् याचेत् १ १२७ ७ **आवनेम**=आभिमुख्यतया सविभागेनानिष्टेम १ ७० १ [आङ्+वन सभक्तौ (भ्वा०) धातोर्लटि लिङि च रूपाणि । व्यत्ययेनात्मनेपदम् । अथवा वनु याचने (तना०) धातो रूपाणि लटि व्यत्ययेन शप्]

आवनुथः समन्तात् कामयेथे, प्र०—वनोतीति कान्तिकर्मसु पठितम् निघ० २ ६, ७ १७ [आङ् पूर्वात् वनोति कान्तिकर्मा (निघ० २ ६) धातोर्लट्]

आवपतु समन्तात् स्थापयतु ३५ ५ [आङ्+टुवप बीजसन्ताने (भ्वा०) धातोर्लोट्]

आवपनम् समन्ताद् वपति यस्मिंस्तत् (क्षेत्रम्) २३ ६ समन्ताद्वपन्ति यस्मिंस्तत् (भा०—सर्वबीजवपनार्थ क्षेत्रम्) २३ ४६ समन्तात् सर्वाऽऽधारम् (उत्पत्तिस्थानम्) २३ ४५ बीजारोपणादेरधिकरणम् क्षेत्रम् ऋ० भू० १४४ [आङ्+टुवप बीजसन्ताने (भ्वा०) धातो 'करणाधिकरणयोश्च' अ० ३ ३ ११७ सूत्रेणाधिकरणे ल्युट् । अय वै (भू) लोक आवपन महत् तै० ३ ६ ५ ५]

आवयत् समन्ताद् व्यापनुयात् २१ ४५ [आङ्+वय गतौ (भ्वा०) धातोर्लिडर्थे लेट्]

आऽवयन्ति समन्तादवगच्छन्ति ५ ४१ १३ [आङ्+अव+इण् गतौ (अदा०) धातोर्लट् । 'इणो यण्' इति यणादेश]

आवय अभितो विद्या कामयमाना (विद्वज्जना) १ १२७ ८ समन्तात्प्राप्तविद्या (विद्वज्जना) २५ २८ [आङ्पूर्वाद् वय गतौ (भ्वा०) धातोरच् प्रत्यय]

आवयाः येनाऽवयजन्ति स (अध्वर्यु =अहिंसायज्ञ-

समर्पयति १ ६ १० **आऽर्चन्**=सर्वत सत्कुर्युः ५ २६ २ अभितोऽर्चन्तु १ ५२ १५ [आङ्+अर्च पूजायाम् (भ्वा०) धातोर्लङ् । अन्यत्र लङपि]

आर्चत्कस्य समन्तादर्चत सत्कुर्वत शिष्टस्याऽनुकम्पकस्य (शत्रुनाशकस्य जनस्य) प्र०—अत्रार्चधातोर्बाहुलकादौणादिकोऽति प्रत्ययस्ततोऽनुकम्पायां क प्रत्यय १ ११६ २२ [आङ्+अर्च पूजायाम् (भ्वा०) धातोरौणादिकोऽति प्रत्यय । ततोऽनुकम्पायां क प्रत्यय]

आऽर्चन् समन्तात् सत्कुर्वन् (विद्वज्जन) ५ ४५ ७ [आङ्+अर्च पूजायाम् (भ्वा०) धातो शतृप्रत्यय]

आर्जुनेयम् अर्जुनेन रूपेण निर्वृत्तम् (कुत्स=वज्रम्) प्र०—अत्र चातुरर्थिको ढक् १ ११२ २३ अर्जुनेन ऋजुना विदुषा निष्पादितमिव (कुत्स=वज्रम्) ४ २६ १ **आर्जुनेयाय**=अर्जुन्या सुरूपवत्या विदुष्य पुत्राय ७ १६ २ [अर्जुन=अर्जने (भ्वा०) धातोर्णिजन्ताद् 'अर्जेर्णिलुक् च' उ० ३ ५८ सूत्रेण उनन् णेर्लुक् च । ततो निर्वृत्तार्थे ढक्, ढस्यैयादेशश्च । अन्यत्र अर्जुनीप्राति० अपत्यार्थे ढक्]

आर्त्त समन्तात् प्राप्नोति ७ ३४ ७ समन्तात्प्राप्य ४ १ १७ अभिमुख प्राप्नुत ५ ५२ ६ सर्वत प्राप्नुया ४ १ १२ [आङ्+ऋत गतौ सौत्रो धातु, ततो लङ् । छान्दसत्वादीयङ् प्रत्ययो न]

आर्त्तनासु या आर्त्तयन्ति सत्ययन्ति तासु (वाणीषु) १ १२० ६ [ऋतुप्राति० 'तत्करोति०' इति णिचि 'ण्यासश्रन्थो युच्' इति युचि रूपम्]

आर्त्तवाः ऋतुषु भवा गुणा १४ २६ **आर्त्तवेभ्यः**=ऋतुजातेभ्य (पदार्थेभ्य) २२ २८ [ऋतुप्राति० भवार्थे जातार्थे वा अण्प्रत्यय । अथवा तदस्य प्राप्तमित्यस्मिन्नर्थे ऋतुप्राति० 'ऋतोरण्' अ० ५ १ १०५ सूत्रेणाण्]

आर्त्नी प्राप्यमाणे (धनुर्ज्ये) २९ ४१ गच्छन्त्यौ (योषा=पत्न्यौ) ६ ७५.४१ आर्त्न्यौ=पूर्वापरयो (कोट्यो) १६ ६ ['आर्त्नी' इति देवतापद साङ्ग्रामिकोपकरणस्य द्विवचनम् । आर्त्नी अर्त्तन्यौ वाण्यौ वारिपण्यौ वा नि० ९ ३९ 'ऋत' गतौ सौत्रो धातु, 'ऋतेरीयङ्' इति, ततो ल्युट् कर्त्तरि अर्त्तनम् । स्त्रियां ङीपि अर्त्तनी । अर्त्तनी शब्दस्यैव द्विवचने 'आर्त्नी' ति छान्दस रूपम्]

आर्त्यै कामपीडायै ३० ६ पीडानिवृत्तये ३० १७ [ऋ गतिप्रापणयो (भ्वा०) धातो क्तिन् प्रत्यय स्त्रियाम् । वृद्धिश्च मित्रादिगणे पाठाद् भवति । अनार्त्यै स्तेत्येवैतदाह यदाह व्यथायै त्वेति (व्यथा आर्ति) श० ५ ४ ३ ७]

आर्त्विज्या ऋत्विजां गुणप्रकाशकानि कर्माणि १ ६४ ६ [ऋत्विज्प्राति० भावकर्मणो ष्यञ् प्रत्यय । ऋत्विज्=ऋतूपपदे यजते क्विन्]

आऽर्दन् समन्ताद् हिंसन्ति ४ १७ २ [आङ्+अर्द हिंसायाम् (चुरा०) धातोर्लङ् । व्यत्ययेन शप् । अर्दतिवधकर्मा निघ० २ १९]

आऽर्दयः आर्दयति नयति ६ १७ १२ [अर्द गतौ (भ्वा०) धातोर् णिजन्ताल् लुङ्]

आर्द्रदानुः य आर्द्राणां गुणानां दानुर्दाता स (समुद्र) १८ ४५ [आर्द्र=अर्द गतौ याचने च (भ्वा०) धातो 'अर्देर्दीर्घश्च' उ० २ १८ सूत्रेण रक्, दानु=डुदाञ् दाने (जु०) धातो 'दाभाभ्यां नु' उ० ३ ३२ सूत्रेण नु । तयो समास । आर्द्रदानु एष (वायु) ह्यार्द्रं ददाति श० ९ ६ १ २९]

आर्द्रस्य सपङ्कस्य सागरस्य १ ११६ ४ जलेन पूर्णस्य समुद्रस्य ऋ० भू० १९० [अर्दति गच्छति याचते वा तद् आर्द्रमिति विग्रहे 'अर्द गतौ' धातोरौणादिको रक् प्रत्यय]

आर्पिता स्थापितानि (भुवनानि) १ १६४ १४ [ऋ गतिप्रापणयो (भ्वा०) धातोर्णिजन्तात् क्त । 'अर्तिह्रि०' इति पुक् 'पुगन्तलघूपधस्ये' ति च गुण]

आर्य्यम् आर्याणामर्याणां वा इदम् (सह=बलम्) १ १०३ ३ सकलशुभगुणकर्मस्वभावेषु वर्त्तमानम् (विद्यादातार जनम्) १ १५६ ५ उत्तमगुणकर्मस्वभाव धार्मिक (सज्जनम्) ३ ३४ ९ **आर्य्यस्य**=उत्तमजनस्य ७ १८ ७ **आर्य्यः**=धर्म्यगुणकर्मस्वभाव (दास=सेवक) ३३ ८२ ब्राह्मणक्षत्रियवैश्यवर्ण (राजा) ५ ३४ ६ **आर्य्या**=धर्मिष्ठानुत्तमान् जनान् ६ ३३ ३ **आर्यान्**=धार्मिकानाप्तान् विदुष सर्वोपकारकान् मनुष्यान् १ ५१ ८ धार्मिक विद्वान् आप्त पुरुषों को स० प्र० ३०७, १ ५१ ८ विद्या, धर्मादि उत्कृष्टस्वभावाऽऽचरणयुक्त जनों को आर्याभि० १ १४ **आर्य्याय**=अर्य्यस्येश्वरस्य पुत्रवद्वर्त्तमानाय (सज्जनाय) १ ११७ २१ सज्जनाय मनुष्याय ७ ५ ६ उत्तमगुणकर्मस्वभावाय (जनाय) १ ५९ २ **आर्ये**=ब्राह्मण, क्षत्रिय, वैश्य, द्विज मे स० प्र० ३०८ **आर्य्येण**=उत्तमविद्या-धर्मसामर्थ्येन २ ११ १९ **आर्य्याणि**=द्विजकुलानि ६ २२ १० [ऋ गतिप्रापणयो (भ्वा०) धातोर्ण्यत् प्रत्यय । अर्य-आर्यप्रातिपदिकयोर्वा 'तस्येदम्' इत्यण् । ऋ गतौ

वि० १०५, ५४१७ **आवहन्ति**=समन्तात् प्रापयन्ति, प्र०—अत्राऽन्तर्गतो ण्यर्थः ११४६ **आवहन्तु**=समन्तात् प्रापयन्तु ११६१ समन्तात् प्राप्नुवन्तु ११३४१ समन्ताद गमयन्तु ३४३६ **आऽवहः**=समन्तात् प्राप्नुया ८१६ [आङ्पूर्वाद् वह प्रापणे (भ्वा०) धातोर्लोटि लटि लङि च रूपाणि]

आवहतम् प्रापयन्तम् (रयि=धनम्) ५७६५ आङ्+वह प्रापणे (भ्वा०) [धातो शतृ। आगमशासनस्यानित्यत्वात् नुमागमो न भवति]

आवहात् समन्तात् प्राप्नुयात् १८५६ **आवहातः**= अभित प्राप्नुत ३४३४ आवहेताम् ३३५२ **आवहान्**=समन्तात् प्राप्नुयु १८४१८ [आङ्पूर्वाद् वह प्रापणे (भ्वा०) धातोर्लेटि रूपम्। 'लेटोऽडाटौ' इत्याडागम]

आवहन्ती सर्वत सुख प्रापयन्ती (उषा=कन्या) १४८६ **आवहन्तीम्**=प्रापयन्तीम् (उषस=प्रातर्वेलाम्) ५८०१ [आङ्पूर्वाद् वह प्रापणे (भ्वा०) धातो शत्रन्तात् ङीप्]

आव. आवृण्वन्ति रवव्याप्त्याऽऽच्छादयन्ति ता (वुध्न्या=सूर्यादयो लोका) १३३ [आङ्पूर्वाद् वृञ् आवरणे (चुरा०) धातोर्लुङ्। 'मन्त्रे घसह्वर०' इत्यादिना लेर्लुक्]

आवावृधु. समन्ताद् वर्धयन्तु ५५५३ [आङ्+वृधु वृद्धौ (भ्वा०) धातोर्लिट्। परस्मैपदमभ्यासस्य च दीर्घत्व छान्दसत्वात्]

आवास्यम् समन्तादाच्छादयितु योग्य, सर्वतोऽभिव्याप्यम् (जगत्=प्रकृत्यादिपृथिव्यन्त जगत्), भा०—सर्वतो व्याप्तम् (जगत्) ४०१ सब ओर से व्याप्त (जगत्) को स० प्र० २३८, ४०१ [आङ्पूर्वाद् वस आच्छादने (अदा०) धातोर्ण्यत्]

आवित्त प्राप्तपूर्णभोगो लब्धप्रतीतो वा (अग्नि=पावक इव विद्वज्जन) प्र०—'वित्तो भोगप्रत्यययो' अ० ८२५८ अनेनाऽय निपातित १०६ [आङ्+विद्लृ लाभे (तुदा०) धातो क्त 'वित्तो भोगप्रत्यययो' रिति निपातनात् नकारादेशो न भवति]

आऽवित्सि समन्ताद् जानीयाम् १२८१ [आङ्+विद् ज्ञाने (अदा०) धातोर्लट्। गुणाऽभावश्छान्दस]

आविदम् समन्तात् प्राप्नुयाम् २२८११ [आङ्पूर्वाद् विद्लृ लाभे (तुदा०) धातोर्लुङ्। लृदित्त्वादङ्]

आविद्वान् य समन्तात् सर्व वेत्ति (आप्तो विद्वज्जन) ४१६१० [आङ्+विद ज्ञाने (अदा०) धातो शतृ। 'विदे शतुर्वसु' इति शतुर्वसुरादेश । सर्वनामस्थाने नुमि हल्ङ्यादिलोपे दीर्घे च रूपम्]

आविभाति अभित प्रकाशते १७१६ समन्तात् प्रकाशते २८४ [आङ्+विपूर्वाद् भा दीप्तौ (अदा०) धातोर्लट्]

आविमोचनात् विमोचनमारभ्य ३५३२० [आङ्-विमोचनपदयो समास । विमोचनम्=वि+मुच्लृ मोचने (तुदा०) धातोर्ल्युट्]

आविरकृणोत् प्रादुर्भूत कुर्यात्, भा०—आविष्करोति ३३२६ [आवि=प्रकटीभावे, तदुपपदे डुकृञ् करणे (तना०) धातोर्लङ्। विकरणव्यत्ययेन श्नु]

आविरकृत प्रकट करोति ११२४४ [आविरुपपदे डुकृञ् करणे (तना०) धातोर्लुङ्]

आविरभवत् प्रकट भवति ४.३११ **आविर्भुवत्**=प्रकट भवेत् ४११६ [आविरुपपदे भू सत्तायाम् (भ्वा०) धातोर्लङ्। अन्यत्र व्यत्ययेन श]

आविराविवासे प्रकट समन्ताद्वासयामि ७५८५ [आविरुपपदे आङ्+वस आच्छादने (अदा०) धातोश्छान्दस रूपम्]

आविर्ऋजीक. प्रसिद्ध सरलस्वभाव (राज्याधिकारिजन) ४३८४ [आविरुपपदे ऋज गतिस्थानार्जनोपार्जनेषु (भ्वा०) धातो 'ऋजेश्च' उ० ४२२ सूत्रेण ईकन् प्रत्यय किच्च]

आविर्बभूव प्रकट भवति ५१६ [आविरुपपदे भू सत्तायाम् (भ्वा०) धातोर्लिट्]

आविर्भवन् प्रकृष्टतया भवन् (इन्द्र=सूर्य) २१५७. [आविरुपपदे भू सत्तायाम् (भ्वा०) धातो शतृप्रत्यय]

आविवाय समन्तात् सवृणोति १७१४ आभिमुख्येन गच्छेत् ११५६५ [आङ्+अज गतिक्षेपणयो (भ्वा०) धातोर्लिटि 'अजेर्व्यघञपो' अ० २४५६ सूत्रेण 'वीरादेश'। वी गतिप्रजनकान्त्यसनखादनेषु (अदा०) धातोर्वा लिटि रूपम्]

आविवास आविवसति ५८३१ **आविवासतः**=समन्तात् परिचरत ३३७६ **आविवासति**=समन्तात् सेवते, प्र०—आविवासतीति परिचरणकर्मसु पठितम् निघ० ३५, ११२६ समन्तात् परिचरति सेवते २.२६३

मिच्छुर्जन) २५ २८ य समन्तायजति सङ्गच्छते स (होतृगन) १ १६२ ५ [आङ्+अव+यज देवपूजासगति-करणदानेपु (भ्वा०) धातो 'अवे यज' अ० ३ २ ७२ सूत्रेण मन्त्रे ण्विन् प्रत्यय । 'श्वेतवाहादीना डस् पदस्य' अ० ३ २ ७१ वा० सूत्रेण पदान्ते डसादेशे 'अत्वसन्तस्य चाधातो' अ० ६ ४ १४ सूत्रेण उपधाया दीर्घादेशे सस्य रुत्वे विसर्गादेशे च रूपम् । आवया =उदकनाम निघ० १ १२]

आवरत् आवृणुयात् १ १४३ ६ आवृणोति ३ ५ १ निवारयति १ ११३ १४ विवृणोतीव १ ११३ ४ **आवरते**=समन्तात् स्वीकरोति ६ २२ ११ **आऽवः**= समन्ताद् वृणोति १ ६२ ४ [आङ्+वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्वा लङ् । विकरणव्यत्ययेन शप् । 'आव' प्रयोगे लु॰ । 'मन्त्रे घसह्वर॰' सूत्रेण लेर्लुक्]

आवरीवर्त्ति समन्ताद् भृशमावर्त्तते १ १६४ ३१ समन्ताद् भृशमावृणोति समन्ताद्वर्त्तते वा ३७ १७ [आङ्+ वृतु वर्त्तने (भ्वा०) वृञ् वरणे (स्वा०) धातोर्वा यङ्लुगन्ताल् लट् । अभ्यासस्य रीगागम]

आवर्त्तयतु समन्तात् प्रवृत्त कारयतु ४ २० [आङ्+ वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल् लोट्]

आवर्जते समन्ताद् वर्जयति त्याजयति, प्र०—अत्रा-ऽऽङ्पूर्वाद् वृजीधातोर्लट् 'वहुल छन्दसि' इति शपो लुङ् न, अन्तर्गतो ण्यर्थश्च १ ३३ १ [आङ्+वृजी वर्जने (अदा०) धातोर्लट् । 'वहुल छन्दसी' ति सूत्रेणादादित्वेऽपि शपो लुक् न भवति]

आवर्त्तयामसि समन्तात् प्रवर्त्तयाम १८ ६८ आवर्त्त-याम ३ ३७ १ [आङ्+वृतु वर्त्तने (भ्वा०) धातोर्णिज-न्ताल् लट् । 'इदन्तो मसि' रिति मस इकारान्तत्वम्]

आवर्त्तयासि आवर्त्तये २३ ७ [आङ्+वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लट्]

आवर्द्धयन् समन्ताद्वर्द्धयन्ति २८ १३ **आऽवर्द्धय** = आ=समन्ताद्वर्धयति २ ११ १५ [आङ्+वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताल्लङ्]

आववक्षे आभिमुख्येन वक्षति रोप सङ्घात करोति १ ६१ ६ [आङ्पूर्वाद् वक्ष रोपे (भ्वा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

आववर्त समन्ताद् वर्त्तते, प्र०—अत्र शप स्थाने श्लुस्तस्य स्थाने तप् च १ १६५ २ **आववर्त्तत्**=समन्ता-द्वर्त्तते ६ ६ ६८.१ **आववर्त्तति**=भृश वर्त्तते ५ ७३ ७. [आङ्पूर्वाद् वृतु वर्त्तने (भ्वा०) धातो रूपाणि । 'वहुल छन्दसी' ति साभ्यासत्वम्]

आऽववर्त्तत् आवर्त्तयेत् ४ २४ १ समन्ताद्वर्त्तयते २ ३४ १४ **आववृतीय**=समन्ताद्वर्त्तयामि, प्र०—अत्र 'वहुल छन्दसि' इति साऽभ्यासत्वम् १ १८० ५ [आङ्पूर्वाद् वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लङ् । 'वहुल छन्दसी' ति साभ्यासत्वम्]

आववृतन् आवर्त्तन्ते ५ ६१ १६ **आववृत्यात्**= आवर्त्तनाम् प्र०—अत्र वृतु धातोर्लिङि विकरणात्मनेपद व्यत्ययेन श्लुर्द्वित्व च ३३ ६८ **आववृत्याम्**=आवर्त्तयेयम् प्र०—अत्र व्यत्ययेन परस्मैपद, 'वहुल छन्दसि' इति शप श्लु ३ ३२ १३ **आववृत्याम**=आवर्त्तयेम ७ २७ ५ आववृत्या =समन्ताद्वर्त्तेथा १ १७३ १३ समन्तात् प्रवर्त्तये ६ ५० ६ आभिमुख्येन प्रवर्त्तय ७ ४२ ३ **आववृत्स्व**= समन्ताद्वर्त्तस्व ४ १ २ [आङ्पूर्वाद् वृतु वर्त्तने (भ्वा०) धातो रूपाणि । 'वहुल छन्दसी' ति शप श्लु]

आवन्ने सर्वत सम्भजति ५ ७४ ७ [आङ्पूर्वाद् वन सम्भक्तौ (भ्वा०) धातोर्लिट् । अकारलोपश्छान्दस । व्यत्ययेनात्मनेपदम्]

आवश्मि समन्तात् कामये ३ ~१ १४ **आवष्टि** = आभिमुख्येन कामयते ४ २२ १ [आङ्+वश कान्तौ (अदा०) धातोर्लट् । 'वश्मि', 'वष्टि' कान्तिकर्मा निघ० २ ६]

आऽवसत् समन्ताद् वसेत् १ १४४ २ [आङ्+वस निवासे (भ्वा०) धातोर्लङ्]

आवसथान् निवासस्थानो को स० वि० २०६, अथर्व० ९ ६ ७ [आङ्पूर्वाद् वस निवासे (भ्वा०) धातो 'उपसर्गे वसे' उ० ३ ११६ सूत्रेण अथ प्रत्यय । समन्ताद् वसति यत्रेति विग्रह]

आवह समन्ताद् वहति प्रापयति, अ०—समन्ताद् देशान्तर प्रापयति, प्र०—अत्र व्यत्यय १ १३ ४ समन्ताद् वहसि प्रापयसि, वहति प्रापयति वा, प्र०—अत्र पक्षान्तरे पुरुषव्यत्यय १ १३ १ अभितो वह वहति वा, अ०— समन्तात् प्रापय प्रापयति वा १ १२ ३ समन्तात् प्राप्नुहि, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २२ १० आभिमुख्येन प्राप्नुहि प्रापय वा ७ १६ ४ **आवहतम्**=सर्वत प्रापयतम् १ ६२ १७ अभिमुख प्रापयेतम् ५ ४३ १७ **आवहत**.= समन्ताद् धरत ५ ४१ ७ सब ओर से प्राप्त होते हु स०

आविवासते=समन्तात् परिचरति १ ११७ १ **आविवासथ**=समन्तात् सेवेथाम् १ ११६ ६ **आविवासन्ति**=समन्तात्परिचरन्ति ४.११ ५ [आविवासतीति परिचरणकर्मा निघ० ३ ५ तस्य रूपाणि]

आविवासन् समन्तात् परिचरन् (विद्वज्जन) १ १५२ ६ **आविवासन्त**=सर्वत परिचरन्त (विद्यार्थिजना) ५ ४५ ३ [विवासति परिचरणकर्मा (निघ० ३ ५) धातोराङ्पूर्वात् शतृप्रत्यय]

आविवसन्ती समन्तात् सेवमाना (माता) ५ ४७ १ [परिचरणार्थकाद् आविवासतेर्धातो शत्रन्तात् ङीप्]

आविवासयन्तः सत्य समन्तात् सेवमाना (कवय = विद्वज्जना) ५ ४५ ४ [आविवासते परिचरणार्थकाद् धातोर्णिजन्तात् शतृप्रत्यय]

आविवासात् समन्तात् सेवते ७ २० ६. **आविवासान्**=समन्तात् सेवन्ते २ ११ १६ [आविवासतेर्लेट्। 'लेटोऽडाटौ' सूत्रेणाट्]

आविवासे समन्तात् सेवेय ६ ५२ १७ समन्तात् सेवे ६ ५१ ८ **आविवासेत्**=समन्तात् सेवेत् ६ १६ ४६ [विवासति परिचरणकर्मा (निघ० ३ ५) धातो रूपाणि। आविवासेम परिचरेम नि० २ २४]

आविविद्रे समन्ताल्लभन्ते ३ ५४ ४ [आङ्+विद्लृ लाभे (तु०) धातोर्लिट्। 'इरयो रे' अ० ६ ४ ७६ सूत्रेण 'रे' आदेश]

आविविशुः समन्तात् प्रविशेयु ३ ७ १ आविशन्ति ५ १८ २ **आविवेश**=समन्ताद् विष्टोऽस्ति १७ १७ समन्ताद् विष्टमस्ति २३ ५० समन्तात्प्रविष्टोऽस्ति २३ ५१ समन्तात् प्रविष्टवान् ३ ३ ४ व्याप्तवानस्ति ऋ० भू० ४४ आविश ३ ३१ ५ सर्वत प्रविशति १७ ६० समन्ताद् व्याप्नोति ४ ५८ ३ समन्तादाविष्टो व्याप्तोऽस्ति २३ ४६ स्वव्याप्त्याऽऽविष्टोऽस्ति २३ ५२ सर्वत प्रविशति ५ ४७ ३ आविशति १.१६४ ३२ प्रविष्ट होके पूर्ण हो रहा है आर्याभि० २ १४ **आविवेशीः**=समन्तात् पुन पुनराविश ३ ३२ १० **आविवेशुः**=आविशन्ति ४ २३ ६ [आङ्पूर्वाद् विश प्रवेशने (तुदा०) धातोर्लिट्]

आविश समन्तात्प्राप्नुहि १ १७६ १ समन्ताद्विश ४ २७ सब ओर से प्रविष्ट वा प्राप्त हो स० वि० १३४, १० ८५ ४३ **आविशत्**=समन्ताद्विशति २ १३ १ **आविशत**=अ०—विज्ञानेन समन्तात् प्रवेश कुरुत ४ १३ समन्ताद्विशत ७ ४६ **आविशतु**=समन्तात्प्रविशतु १२ १०५ **आविशन्**=आविशन्ति ७ ५५.१ **आविशन्ति**=समन्तात् प्राप्नुवन्ति ६ ३६ ३ **आविशन्तु**=समन्तादाविष्टा भवन्तु १ ५ ७. समन्ताद्विशन्ति, प्र०—अत्र लडर्थे लोट् १ १५ १ **आविशस्व**=समन्तात्प्रविश, प्र०—अत्र व्यत्ययेनात्मनेपदम् १७ ८७. [आङ्पूर्वाद् विश प्रवेशने (तुदा०) धातोर्लोट्, लङ् च। अन्यत्र लोटि व्यत्ययेनात्मनेपदञ्च]

आविशतात् समन्ताद् विशतु ३४ ५० [आङ्+विश प्रवेशने (तुदा०) धातोर्लोट्। 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति हे स्थाने तातङ्]

आविशन् आविष्ट सन् (अग्नि) ५ २५ ४ [आङ्+विश प्रवेशने (तुदा०) धातो शतृप्रत्यय]

आविशन्ती समन्तात् प्रविशन्ती (सुरा=सोमवल्ल्यादिलता) १६ ७ [आङ्+विश प्रवेशने (तुदा०) धातो शत्रन्तात् ङीप्]

आविशम् आविशन्ति यस्मिँस्तम् ४ २४ ६ [आङ्+विश प्रवेशने (तु०) धातोरविकरणे 'घञर्थे क विधानम्' इति क प्रत्यय]

आविषुः अभित स्वस्वकक्षा व्याप्नुवन्ति प्र०—अत्र लडर्थे लुङ्, अय व्याप्त्यर्थस्याऽवधातो प्रयोग १ ११ ५ प्राप्तविद्य कुर्वन्तु ४ ३६ ६ सर्वता व्याप्नुयु २३ २६ [आङ्पूर्वाद् अव रक्षणादिषु (भ्वा०) धातोर्लुङ्]

आविष्करिक्रत् प्रकृष्टतया भृश कुर्वन् (इन्द्र = ईश्वर) १ १३१ ३ [आविरुपपदे डुकृञ् करणे (तना०) धातोर्यङ्लुगन्तस्य शतरि 'दाधर्त्तिदर्धर्त्ति०' अ० ७ ४ ६५ सूत्रेणाभ्यासस्य चुत्वाऽभावोऽभ्यासककारस्य च रिगागमा निपात्यते]

आविष्कर्त्त प्रकट कुरुत, प्र०—विकरणस्यात्र लुक् १ ८६ ६ [आविरुपपदे डुकृञ् करणे (तना०) धातोर्लोट्। विकरणस्य च लुक्]

आविष्कृणवाथ प्रकट कुरुथ १८ ६० [आविरुपपदे करोतेर्लेट्। विकरणव्यत्ययेन श्नु। आविरकृत=आविष्कुरुत नि० ४ १६]

आविष्कृणुषे आविष्करोषि १ १२३ ११ **आविष्कृणुष्व**=प्रकट कुणुष्व १३ १३ प्रकट कुरु ४४.५ **आविष्कृणोति**=प्रकट करोति ५ ८३ ३ **आविष्कृणोमि**=प्रादुर्भाव करोमि १ ११६ १२ **आविष्कृण्वन्ति**=प्रकट कुर्वन्ति १ १२३ ६ [आविष्+कृ+लट् विकरणव्यत्ययेन श्नु। आवि कृणुते=आविष्कुरुते

आशाः =दिश १७६६ प्राप्तीच्छा १ १६२ ७ [आशा दिङ्नाम निघ० १ ६ आशा दिशो भवन्त्यासदनात्। आशा उपदिशो भवन्त्यभ्यशनात् नि० ६ १ 'आङ् शासु इच्छायाम्' (अदा०) धातोर्वा साधनीयम्]

आशासते आशा कुर्वन्ति, भा०—समन्तात्कामयन्ते ३३ ७८ समन्तादिच्छन्ति १ १६५ ४ **आशास्ते** =समन्तादिच्छति १ १६३ १३ **आशास्स्व**=आभिमुख्येन शिक्ष २१ ६१ [आङ् शासु इच्छायाम् (अदा०) धातोर्लट्। अन्यत्र लोट्]

आशिक्षायै समन्ताद्विद्योपादानाय, भा०—सर्वतो विद्याग्रहणायाऽध्यापनाय च ३० १० [आङ्-शिक्षापदयो समास। शिक्षा=शिक्ष विद्योपादाने (भ्वा०) धातो 'गुरोश्च हल' अ० ३ ३ १०३ इत्यङ्। शिक्षति दानकर्मा निघ० ३ २० शिक्षा=देहि नि० १ ७]

आशिनेभ्यः सकलविद्याव्यापकेभ्योऽध्यापकेभ्य १ २७ १३ [आङ्+अशूङ् व्याप्तौ (स्वा०) धातोर्बाहुलकाद् इनन् प्रत्यय]

आशिरम् यदश्यते तत क्षीरादिकम्, ३ ५३ १४ समन्ताद् भोग्यम् (घृतम्) १ १३४ ६ समन्ताद् भोगम् १ १३४ ६ [आङ्+'अश भोजने' (क्रया०) धातो 'श्रा पाके' धातोर्वा क्विप्। धातोश्च शीर्भावश्छान्दस। आशीर्=आश्रयणाद्वा ऽऽश्रपणाद्वा नि० ६ ८]

आशिशीत समन्तात्तीक्ष्णीकुरुत ६.१६ १२ [आङ्+शिञ् निशाने (तीक्ष्णीकरणे) धातोर्लिङ्। 'बहुल छन्दसी' ति शप श्लु]

आशिश्रेत् समन्तादाश्रयेत् ३ ३८ ८ [आङ्+श्रिञ् सेवायाम् (भ्वा०) धातोर्लिट्। 'बहुल छन्दसी' ति शप श्लु]

अशिश्वीः बाल्याऽवस्था से रहित '(युवतय = पूर्णयुवाऽवस्थास्थ स्त्रियां) स० प्र० ११०, ३ ५५ १६ [नञ्-शिश्वीपदयो समास। अशिश्वी=शिशुप्राति० नञ्पूर्वात 'सख्यशिश्वीति भाषायाम्' अ० ४ १ ६२ सूत्रेण ङीप्]

आशिष स्वाभेच्छाविशिष्टा क्रिया, प्र०—शास इत्वे आशास क्वावुपसङ्ख्यानम्, अ० ६ ४ ३४ अनेन वार्त्तिकेनाऽऽशीरिति सिद्ध २ १० चक्रवर्त्तिराज्याऽनुशासनादय इच्छा ऋ० भू० १४९ सिद्धा इच्छा १ १७९ ६ आशीर्वादान् ३ ४३ २ आशाए आर्याभि० २ ५१, २.१० इच्छासिद्धय. (इष्टफलिता सिद्धय) १७ ५७ कामना २ १० **आशिषा**= आशीर्वादेन १७ ५७ उस आशय, सहजस्वभाव स आर्याभि० २ ३०, १७.१७ [आङ् शासु इच्छायाम् (अदा०) धातो क्विप्। धातोरुपधाया इकारादेश। 'शासिवसिघसीनामुपसङ्ख्यानम्' इति षत्वम् सकार । आशिष.= अध्येषणाकर्म निघ० ३ २. आशीराशास्ते. नि० ६ ८.]

आशिष्ठाः अतिशयेनाऽनुगामिन (वलय =अश्वा) २ २४ १३ [आङ्पूर्वाद् 'अशूङ् व्याप्तौ' धातोस्तृजन्ताद् अतिशायने इष्ठन्। 'तुरिष्ठेमेयस्सु' सूत्रेण तृचो लोप]

आशीर्दाः य इच्छासिद्धि ददाति स (यज्ञ) १८ ५६ [आशिष्युपपदे डुदाञ् दाने (जु०) धातो क प्रत्यय]

आशीर्वन्त. आशिष प्रशस्ता कामना भवन्ति येषान्ते (सोमास =उत्पन्ना पदार्था), प्र०—अत्र 'शास इत्वे 'आशास क्वावुपसङ्ख्यानम्' अ० ६ ४ ३४ अनेन वार्त्तिकेनाशीरिति सिद्धम्, तत प्रशसार्थे मतुप् 'छन्दसीर' इति वत्व च। सायणाचार्येण 'श्रीञ् पाके' इत्यस्मादिद पद साधितम्, तदिद भाष्यविरोधादशुद्धमस्तीति बोध्यम् १ २३ १ [आशिष्प्राति० प्रशसार्थे मतुप्। 'छन्दसीर' इति मतुपो मकारस्य वकार]

आशु सद्य. १ ८४ १८ शीघ्रम् १७.३३ शीघ्रकारिणम् (सद्आसम्) ५ ८४.१ **आशुभिः**=अश्वैरिव क्षिप्रकारिभि (किरणै) २ ३८ ३ शीघ्रगन्तृभिरश्वै २ ३४ ३ शीघ्रगमयितृभिर्विद्युदादिपदार्थै २ १६ ३ आशुकारिभिर्गुणै ५ ६१ ११ सर्वाऽभिगामिभि (जनै) ५ ५५ १ शीघ्र गमनागमनकारकैर्विमानादियानै. १ ३७ १४ **आशुम्**=वेगादिगुणवन्तमग्निवाय्वादिपदार्थसमूहम्। प्र०—आश्वित्यश्वनामसु पठितम्, निघ० १ १४ 'कृवापा०' उ० १ १ अनेनाऽशूङ् धातोरुण् प्रत्यय १ ४ ७ पूर्णमध्वान प्राप्नुवन्तम् (राजजनम्) ४ ३८ २ मार्गान् सद्योऽनुवन्तम् (अर्वन्तम्=अश्वम्) ३४ २१. शीघ्र सिद्धिप्रदम् (वृजन =योगबलम्) ७ १२ शीघ्रगमकम् (अश्व=विद्युदग्निम्) १ ११७ ६ शीघ्रकारिण (अश्वम्) १ १३४ ५ शीघ्रगमनहेतुम् (अश्वम्) १ ६० ५ **आशुः**=शीघ्र गन्ता (विद्युदादिस्वरूपोऽग्नि) ४ ११ ४ सद्य ७ १८ ६ तीव्रवेग (अश्व =तुरङ्ग) २६ ९ शीघ्रगाम्यश्व ४ २२ ८ [अशूङ् व्याप्तौ (स्वा०) धातो 'कृवापा०' उ० १ १ सूत्रेण उण् प्रत्यय। आशु क्षिप्रनाम निघ० २ १५ आशु इति शु इति च क्षिप्रनामनी भवत निघ० ६ १ आशव क्षिप्रकारिण नि० ९ ६ आशु =अश्वनाम निघ० १ १४]

आशुः प्राप्नुवन्ति ४ ३३.४ समन्तादश्नीयु १९ ६१

आवेः समन्ताद् विद्धि १ ६३ २ [आङ्+अव रक्षणादिषु (भ्वा०) धातोर्लिङ्]

आवोढम् आवहत २ ४१ ६ समन्ताद्वहतम् २० ८३ [आङ्+वह प्रापणे (भ्वा०) धातोर्लुङि मध्यमबहुवचनम्]

आऽव्य सर्वतो रक्षित्वा १ १६६ १३ [आङ्+अव रक्षणादिषु (भ्वा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

आऽव्यन् समन्तात् कामयन्ताम् ३ ४६ १८ [आङ्+अवरक्षणादिषु (भ्वा०) धातो कर्मणि शतृव्यत्ययेन]

आऽव्ययेयम् समन्तात् प्राप्नुयाम् ३३ ५१ [आङ्+व्यय गतौ (भ्वा०) धातोर्लिङ्]

आव्याधिनीनाम् समन्तात् शत्रुसेना व्यद्धु शील यासा तासा स्वसेनानाम् १६ २० **आव्याधिनीभ्यः**=शत्रुसेनाताडनशीलाभ्य स्वसेनाभ्य १६ २४ **आव्याधिनीः**=समन्ताद् बहुरोगयुक्तास्ताडितु शीला वा (सेना) ११ ७७ [आङ्पूर्वाद् व्यध ताडने (दिवा०) धातोस्ताच्छील्ये णिनि प्रत्यय । स्त्रिया ङीप् 'ऋन्नेभ्यो ङीप्' अ० ४ १ ५ सूत्रेण]

आऽवृ आवृणोमि ४ ५५ ५ [आङ्+वृञ् वरणे (स्वा०) धातोर्लङ् । 'बहुल छन्दसी' ति विकरणलुक्]

आश अश्नाति, भा०—रुधिरादिक पिवति २५ ३२. [अश भोजने (क्र्या०) धातोर्लिट्]

आशकः समन्ताच्छक्नुहि ७ २० ६ [आङ्+शक्लृ शक्तौ (स्वा०) धातोर्लोट् । व्यत्ययेन शप्]

आशत सर्वतो व्याप्तवन्तो भवेयु', प्र०—अत्र 'अशूङ् व्याप्तौ' इत्यस्माल्लिङर्थे लुङ्प्रयोग 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति च्लेरभाव १ ८ ६ अभिमुख प्राप्नुवन्ति २ २१ ५ सर्वतो व्याप्नुत २० ७२ समन्ताद् व्याप्नुवन्ति, प्र०—अत्र 'बहुल छन्दसि' इति श्नो लुक् १ ८५ २ समन्तात्प्राप्नुवन्ति, प्र०—अत्र व्यत्ययो लङर्थे लट् 'बहुल छन्दसि' इति शपो लुकि श्नोऽभावश्च १ २० २ [आङ्+अशूङ् व्याप्तौ सघाते च (स्वा०) धातोर्लुङ् लङ् च । लुङि च्ले, लङि श्नोश्चाभावश्छान्दस]

आशयत् समन्ताच्छेते १ ५२ ६ [आङ्+शीङ् शये (अदा०) धातोर्लङ् । 'बहुल छन्दसी' ति शपो लङ् न भवति । आशयदाशेते नि० २ १६]

आशयानम् आस्थितम् (वृत्र=मेघम्) २ ११ ६ य. समन्ताच्छेते तम् (मेघम्) ५ ३० ६ समन्तात्प्राप्तनिद्रमिव (शत्रुम्) १ १२१ ११ समन्ताच्छयानमिव वर्त्तमानम् (अहिं=मेघम्) ४ १७.७ [आङ्+शीङ् शये (अदा०) धातो शानच्]

आशये गर्भाशय मे सर्वथा ठहरता है स० वि० १६८, अथ० २ ३ २१ [आङ् पूर्वात् 'शीङ् शये' (अदा०) धातोरधिकरणे घ प्रत्यय']

आशाते समन्तात् प्राप्नुत १ १३६ ३ **आशाथे**=सर्वतो व्याप्नुत, प्र०—'छन्दसि लुङ्लङ्लिट' अ० ३ ४ ६ इति वर्त्तमाने लिट् 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति नुडभाव १ २ ८ समन्तात्प्राप्नुथ १ १५१ ८ सर्वतोव्याप्नवन्तौ स्त १ १५ ६ [आङ्+अशूङ् व्याप्तौ सघाते च (स्वा०) धातोर्लिट् । 'अश्नोतेश्च' अ० ७ ४ ७२ सूत्रेण प्राप्तोऽपि नुडागमो न छान्दसत्वात्]

आशवः वेगादिगुणसहिता सर्वक्रियाव्याप्ता (सोमास=सर्वपदार्था) १ ५ ७ शीघ्रगामिनोऽश्वा इवाऽग्न्यादय, प्र०—आशुरित्यश्वनाम निघ० १ १४, १ ११८ ४ शीघ्रगामिनोऽश्वा २ ३१ २ शुभगुणव्यापिन (कृपीवला) १ १४० ४ येऽश्नुवन्ति ते (सोमा) १ १३५ ६ आशुगामिन पदार्था ५ ६ १ **आशवे**=वायुरिवाऽध्वान व्याप्तायाऽश्वाय १६ ३१ यानेषु सर्वानिन्दन्य वेगादिगुणानाञ्च व्याप्तये १ ४ ७ [अशूङ् व्याप्तौ सघाले च (स्वा०) धातो 'कृवापाजि०' उ० १ १ सूत्रेण उण्प्रत्यये आशु । अश्नुते व्याप्नोति तदाशु शीघ्रम् । अश्नुते सद्याऽध्वानमित्याशुरश्व । आशु क्षिप्रनाम, निघ० २ १५ अश्वनाम निघ० १ १४ आशु इति शु इति च क्षिप्रनामनी भवत । नि० ६ १ आशु भार्गव भवति ता० १४ ६ ६ अहर्वा एतदव्लीयत तद्देवा आशुनाभ्यधिन्व॑ꣳस्तदाशोराशुत्वम् ता० १४ ६ १० आशव क्षिप्रकारिण नि० ६ ५]

आशसः आशसन्ति ते (सज्जना) ५ ५६ २ काममिच्छन्त (ब्रह्मचारिणो जना) ५ ३२ ११ **आशसा**=समन्तात् प्रशसितेन (नमसा=सत्कारेण) ४५ ११ [आङ् पूर्वात् 'शसु स्तुतौ (भ्वा०) धातो कर्त्तरि क्विप् । शसनत् कान्तिकर्मा (निघ० २ ६) धातोर्वा क्विप्]

आशापालाः य आशा दिश पालयन्ति (देवा=विद्वज्जना) २२ १६ (आशा दिङ् नाम । निघ० १ ६ तदुपपदे पालयतेर्धातोरण् प्रत्यय । शत वै तस्या राजपुत्रा आशापाला श० १३ १ ६ २ अथैते देवा (आशापाला) आप्या साध्या अन्वाध्या मरुत श० १३ ४ २ २६]

आशाभ्यः दिग्भ्य, प्र०—आशा इति दिङ्नाम, निघ० १ ६, २४ १ १२. व्यापिकाभ्य (दिग्भ्य) २२ २७

आश्रीणन्ति समन्तात् पचन्ति १५ ६० [आङ्+श्रीञ् पाके (क्र्या०) धातोर्लट्। इकारस्य च ह्रस्वश्छान्दस]

आश्रिषत् समन्तादाश्रयति २५ ३४ [आङ्+श्रिञ् सेवायाम् (भ्वा०) धातोर्लङ्। सिबुत्सर्गश्छन्दसि' अ० ३ १ ३४ वा० इति सिप्]

आश्रिषत् आभिमुख्येन श्लिष्येत् १ १६२ ११ अत्राडभावो वर्णव्यत्ययेन लस्य स्थाने रेफादेशश्च [आङ्+श्लिष आलिङ्गने (दिवा०) धातोर्लङ्। विकरणव्यत्ययेन श]

आश्रुतिः समन्ताच्छ्रवण यस्या सा (पत्नी) ३७ १२ [आङ्+श्रु श्रवणे (भ्वा०) धातो स्त्रिया क्तिन्]

आश्रुत्कर्ण समन्ताच्छ्रुतौ विज्ञानमयौ श्रवणहेतू कर्णौ यस्य तत्सम्बुद्धौ (इन्द्र=जगदीश्वर) प्र०—अत्र सम्पदादित्वात् करणे क्विप् १ १० ९ [आश्रुत्-कर्ण-पदयोर्वहुव्रीहि। आश्रुत्=आङ्+श्रु श्रवणे (भ्वा०) धातो +सम्पदादित्वात् क्विप् करणे]

आश्वश्वतमाः आशव सद्योगामिनोऽश्वा विद्यन्ते येषान्ते (योद्धारो जना) ५ ४१ ४ [आशु-अश्वपदयो-र्बहुव्रीहौ, अतिशायने तमप्]

आश्वश्वाः आशुगामिनोऽग्न्यादयो अश्वा येषान्ते (वीरजना) ५ ५८ १ [आशु-अश्वपदयोर्वहुव्रीहि]

आश्वश्व्यम् आशवो वेगादयो गुणा अश्वा इव यस्मिँस्तम् (सुवीर्य=सुष्ठु पराक्रमम्) ५ ६ १० (अश्वप्राति० 'भवे छन्दसि' अ० ४ ४ ११० सूत्रेण यत्। आशु-अश्व्य-पदयो समास]

आश्विनम् प्रशस्ताऽश्वादियुक्तम् (रयि=धनम्) ५ ४ ११ **अश्विनोः**=सूर्याचन्द्रमसोरिदम् (तेज = प्रकाश) १९ ८ **आश्विनः**=अश्विनो सूर्याचन्द्रमसोरय मध्यवर्त्ती (प्रकाश) १८ १९ अश्विनो प्राणाऽपानगत्योरय सम्बन्धी (प्रजापति=जीव) ३९ ५ अश्विदेवताक (लोपाश=वनचरपशुविशेषोऽश्विगुण) २४ ३६ **आश्विनाः**=सूर्यचन्द्रदेवताका (पशव) २४ ३ [अश्व-प्राति० प्रशसार्थे मत्वर्थे इनि। ततस्तस्येदमिति अण्-प्रत्यये प्रकृतिभावे च रूपम्। अश्वा=अश्वसदृशा शक्तय पशुरूपा अश्वा वा सन्त्यनयोस्तस्मादश्विनौ। अश्विनौ यद् व्यश्नुवाते सर्व रसेनान्यो ज्योतिषान्य। अश्वैरश्विनावित्यौर्णवाभ। तत्कावश्विनो? द्यावापृथिव्यावित्येके। अहोरात्रावित्येके। सूर्याचन्द्रमसावित्येके। राजानौ पुण्यकृतावित्यैतिहासिका नि० १२ १ अश्विनो देवते एषामिति विग्रहे वा 'साऽस्य देवता' सूत्रेणाण्। आश्विन (ग्रह) श्रौत्रमाश्विन कौ० १३ ५ श्रौत्र वात्मा चाश्विन ऐ० २ २६ (शस्त्रम्) यदश्विना उदजयतामश्विनावाश्नुवाता तस्मादेतदाश्विनमित्याचक्षते। ऐ० ४ ८. तेषा (देवाना) अश्विनौ प्रथमावधातान्तावन्ववदन् सह नोऽस्त्विति तावब्रूताड् किन्नो तत स्यादिति यत्कामयेथे इत्यब्रुवꣳस्तावब्रूतामस्मद्देवत्यमिदमुक्थमुच्याता इति तस्मादाश्विन-मुच्यते ता० ९ १ ३६ द्वाभ्या ह्याश्विनमित्याख्यायते कौ० १८ ५]

आष्ट समन्ताद्व्यनुवीत, प्र०—अत्र लिङि लुङ् विकरणस्य लुक् १ १२१ ६ [अशूङ् व्याप्तौ (स्वा०) धातोर्लुङ्। विकरणस्य लुक् छान्दसत्वात् आष्ट। व्याप्ति-कर्मा निघ० २ १८]

आस अस्ति, प्र०—अत्र 'छन्दस्युभयथा' इति लिट् आर्द्धधातुकसज्ञाऽभाव ३३ ८० भवेयम् ४ २७ २ भवति ५ २ ५ वर्त्तते ५ ४४ २ **आसते**=सन्ति १ १९ ६ [अस भुवि (अदा०) धातोर्लिट्। 'छन्दस्युभयथा' इति लिट आर्द्धधातुक सज्ञाऽभावेऽस्तेर्भूर्भावो न भवति]

आस आस्ते ५ ५६ ३ **आसते**=उपविशन्ति २३ १६ स्थित है स० वि० १९७, ९ ११३ ११ उप-विष्टा सन्ति २ १३ ४ आस्ते, प्र०—अत्र 'बहुल छन्दसि' इत्येकवचनस्य वहुवचनम् ६ ४७ १९ [आस उपवेशने (अदा०) धातोर्लिट् 'दयायासश्चे' ति आम् न भवति छान्दसत्वात्।]

आसङ्कारिषत् समन्तात् सम्यक् कुर्यात् ६ ४८ १५ [आङ्+सन्पूर्वात् करोतेर्लेट्। 'सिब्बहुल णिद्वक्तव्य' इति णित्वे वृद्धि]

आसचन्त समन्तात् सेवन्ताम् १ ७३ ४ **आसचसे**=सर्वत सम्बध्नासि ४ ११ ६ **आसचस्व**=समन्तात् समवेहि १ १२९ ९ **आसचेते**=समन्तात् समवेत १ १३६ ३ [आङ्+षच समवाये (भ्वा०) षच सेचने (भ्वा०) (अय सेवनार्थेऽपि) धातोर्वा लङ्। व्यत्ययेनात्मने-पदम्]

आसजामि समन्तात् सयुनज्मि १ १९१ १० [आङ्+षञ्ज सङ्गे (भ्वा०) धातोर्लट्। 'दससञ्जस्वञ्जाम्०' इति शपि अनुनासिकलोप]

आऽसत् समन्ताद् भवतु १ १०७ १ [आङ्+अस भुवि (अदा०) धातोर्लेटि रूपम्]

आसतः निन्द्यात् (वचस) ५ १२ ४ (नञ्-सत्

[अशूङ् व्याप्तौ (स्वा०) अश भोजने (क्र्या०) धातोर्वा-लिट्। आगमशासनस्यानित्यत्वान् नुडागमो न भवति]

आशुपत्वा सद्य पतित्वा ४ २६ ४ [आशूपपदे पत्लृ गतौ (भ्वा०) धातो क्त्वा। पृषोदरादित्वाद्रूपसिद्धि.]

आशुया शीघ्रगमना (उल्का विद्युत्पाता) प्र०—अत्र जस स्थाने याऽऽदेश. १३ १० क्षिप्राणि (भ्रमास = भ्रमणानि) ४.४ २ आशुगैरुर्वै ६ ४६ १४ [आशु व्याख्यातम्। तस्य प्रथमा बहुवचने जसो यादेश। 'आशु' इति क्षिप्रनाम निघ० २.१५]

आशुरथाय आशु शीघ्रगामिनो रथा यानानि यस्य तस्मै, (भा०—तूर्णगामियानस्थवीराय) १६ ३४ [आशु-रथपदयोर्बहुव्रीहि]

आशुशुक्षणिः शीघ्रकारी (अग्नि =राजमानो विद्वान् राजा वा) २ ११ शीघ्र शीघ्रं दुष्टान् क्षिणोति हिनस्ति य (अग्नि =न्यायाधीशो राजा) ११ २७ [आशुशुक्षणि = आशु इति च शु इति च क्षिप्रनामनी भवत, क्षणिरुत्तर क्षणोते। आशु शुचा क्षणोतीति वा सनोतीति वा। आ इत्याकार उपसर्ग पुरस्ताच्चिकीर्षित ज उत्तर, आशु-शोचयिषुरिति नि० ६ १ आशु शुचा क्षणिता सनिता वार्थ]

आशुशुग्धि समन्तात् शोधय, प्रकाशय, प्र०—अत्र विकरणव्यत्ययेन श्लु १ ९७ १ [आङ्+ईशुचिर् पूतीभावे (दिवा०) धातोर्लोट्। व्यत्ययेन शप श्लु]

आशुश्राव समन्ताच्छ्रावयति ५ ५२ २ [आङ् पूर्वात् श्रुश्रवणे (भ्वा०) धातोर्लिट्]

आशुषाणः सर्वतो व्याप्नुवन् सन् (विद्वज्जन) ५ ३६ ४ आशुषाणा समन्ताद् विभजन्त (पितर = जनका) ४ २ १६ सद्यो विभाजका (प्रजाजना) ४ २ १४ समन्तात् प्राप्नुवन्तो ब्रह्मचर्येण शुष्कशरीरा वा (आप्ता जना) ४ १ १३ सद्य कुर्वाणा (आप्ता जना) २ १९ ७ [आशूपपदे षण् सम्भक्तौ (भ्वा०) धातो कर्त्तरि अण्। अथवा आङ्पूर्वाद् अशूङ् व्याप्तौ (स्वा०) धातोर्वा छान्दस रूपम्]

आशुषाणास: शीघ्रकारिण (क्षितय =मनुष्या) ४ २४ ४ [आशु=क्षिप्र नाम। तदुपपदे षणसम्भक्तौ (भ्वा०) धातोरण्। जसोऽसुगागम]

आशुषेणाय आशु शीघ्रगामिनी सेना यस्य तस्मै, भा०—वनिष्ठसेनाय (सेनापतये) १६.३४ [आशु-सेना-पदयोर्बहुव्रीहि। 'एति संज्ञायामगात्' अ० ८ ३ ९९ सूत्रेण षकारादेश]

आशुहेमभिः शीघ्र गमयद्भि (द्युतिभि =युद्ध-क्रियाभि) १.११६ २. [आशूपपदे हि गतौ वृद्धौ च (स्वा०) धातोर्मनिन् प्रत्यय.]

आशुहेमा आशून् शीघ्रकारिणो जनान् हिनोति वर्धयति स (राजा) २ १ ५ शीघ्रं वर्द्धको गन्ता वा (इन्द्र =विद्युदिव राजा) ७ ४७ २ शीघ्रं वर्द्धमान (अहि =मेघ) २ ३१ ६ [आशूपपदे हि गतौ वृद्धौ च (स्वा०) धातोर्मनिन्]

आशू शीघ्र गमयितारौ (हरी=जलाऽग्नी) २ ३५ ४
आशून्=आशुगामिन (अर्वत =अश्वान्) ६ ६० १२ [आशुरित्यश्वनाम निघ० १ १४ तस्य द्विवचने रूपम्]

आश्रृण्वती: या समन्ताच्छ्रृयन्ते ता. (आप = प्राणा) ५ ४५ १० [आङ्+'श्रु श्रवणे' (भ्वा०) धातो शत्रन्तान् ङीप्]

आश्रृण्वते समन्ताच्छ्रवण कुर्वते (देवाय=नृपाय) ४ ३ ३ [आङ्+श्रु श्रवणे (भ्वा०) धातो शतृप्रत्यये रूपम्]

आश्रृण्वन्ति समन्तात् प्रशंसा कुर्वन्ति १ १९० ? [आङ्+श्रुश्रवणे (भ्वा०) धातोर्लट्। 'श्रुव शृ च' इति श्नु शृ आदेशश्च]

आशो: सकलविद्याव्यापकस्य (राज) ४ ३ ६ [आशुर्व्याख्यातम्। तस्य षष्ठ्या रूपम्]

आश्या: समन्ताद् भोग कुर्या १.६० ३ समन्ताद् व्याप्नुहि १ ७० १ [आङ्+अश भोजने (क्र्या०) अशूङ् व्याप्तौ (स्वा०) धातोर्लिङ्। 'बहुल छन्दसी' ति विक-रणस्य लुक्]

आश्रावयन्त इव समन्तात् श्रवण कारयन्त इव (जना) १ १३९ ३ [आङ्पूर्वात् श्रवणप्राति० 'तत्करोति तदाचष्टे' इति णिचि 'णाविष्ठवत्प्रातिपदिकस्ये' ति टेर्लोपे शतरि रूपम्]

आश्रवस्यात् अत्यन्त विद्या, धन-धान्य युक्त सद और से होवे स० वि० १०५, य आत्मन श्रव इच्छति तस्मात् (जनात्) ५ ३७.३ [आङ्+श्रवस् पदादिच्छा-यामर्थे क्यच्। ततो लिङ्]

आश्रावय समन्ताद् विद्यापदेशान् कुरु १९.२४
आश्रवयेतम्=समन्ताच्छ्रावयताम्, प्र०—वृद्ध्यभाव-श्छान्दस २१ ९. [आङ्पूर्वात् 'श्रु श्रवणे' (भ्वा०) धातो-र्णिचि लोटि च रूपम्]

वा ४ १६ परमोत्तमव्यवहाराय २० ३३ परमैश्वर्यप्रदाय राज्याय ८ ३६ परमविद्याप्रकाशेनाऽविद्याविदारकाय (सभापतये) ६ ३२ परमैश्वर्ययोगाय, अ०—परमैश्वर्य-प्राप्ताय ११ ऐश्वर्यप्रदाय गृहाय ८ ३३ पुरुषार्थे द्रवणाय ६४ विद्यावृष्टिकारकाय (आप्ताय जनाय) १ ६१४ सुखप्रदात्रे द्रव्येश्वर्याय ४ २४ ७ इन्द्रियाऽधिष्ठातुर्जीवस्य वोधाय १० ५ दुष्टशत्रुविदारणाय, विद्यायोगमोक्षैश्वर्याय ६ २ जीवाय विद्युते परमैश्वर्याय वा २२ २७ अत्यन्तो-त्कृष्टाय (शूरवीराय जनाय) १ ८४ ५ सर्वमित्रायैश्वर्य-मिच्छुकाय जीवाय ११० ५ परमैश्वर्य प्राप्ति के लिए स० वि० १६६, ६ ११३ ७ परमैश्वर्य युक्त मोक्ष का आनन्द देने के लिए स० वि० १६६, ६ ११३ ६ सब दुख विदारण के लिए स० वि १६७, ६ ११३ १० सर्वशुभ-लक्षणाऽन्विताय (सत्पुरुषाय) २ २१ २ परमैश्वर्यवते परमात्मने १ ८ १० परमैश्वर्यप्रापकाय रणाय ७ ३८ ऐश्वर्यमुखप्रदाय पत्ये १६ १८ परमानन्दप्राप्तये ८ ४४ परमैश्वर्यकारणाय ११ ३ १२ परमैश्वर्ययुक्ताय जगदीश्वराय ६ २ **इन्द्रे**=परमैश्वर्यवति प्राणिनि २१ ३५ विद्या-विनयाऽन्विते (राजनि) २८ ४५ स्वाऽऽत्मनि २८ ४० परमैश्वर्ये २० ६६ विद्युति २१ ३७ सूर्यप्रकाशे २१ २३ **इन्द्रेण**=परमेश्वरेणाऽऽप्तेन विदुषा वा २ १८ ८ विद्युदाख्यस्त्रेण ७ ४८ २ विद्युता तद्रचितेन विदारकेण शस्त्रेण वा १ ५३ ४ वायुना विद्युता वा ३ ४ ११ परमेश्वरेण सूर्येण सह वा १ ६ ७ **इन्द्रौ**=परमैश्वर्यकारकौ (मित्रावरुणौ=उपदेशक-सेनापती) १० १६ [इदि परमै-श्वर्ये (भ्वा०) धातो 'ऋज्रेन्द्राग्रवज्र०' उ० २ २८ सूत्रेण रन् प्रत्यय । इन्दति परमैश्वर्यवान् भवतीति विग्रह । इन्द्र पदनाम निघ० ५ ४ इन्द्र =इरा दृणातीति वा इरा ददातीति वा, इरा दधातीति वा । इरा दारयत इति वा । इरा धारयत इति वा । इन्दवे द्रवतीति वा । इन्दौ रमत इति वा । इन्धे भूतानीति वा । 'तद्यदेन प्राणै समैन्धस्त-दिन्द्रस्येन्द्रत्वमिति विज्ञायते ।' इद करणादित्याग्रायण । इद दर्शनादित्यौपमन्यव । इन्दतेर्वैश्वर्यकर्मण । इन्दञ्छत्रूणा दारयिता वा द्रावयिता वा । आदरयिता च यज्वनाम् नि० १० ८ इन्द्र =इन्धो वै नामैष योऽय दक्षिणेऽक्षन्पुरुष-स्त वाऽएतमिन्ध सन्तमिन्द्र इत्याचक्षते परोऽक्षेणेव श० १४ ६ ११ २ अग्निमन्वा इदमिन्द्रिय प्रत्यस्थादिति । तदिन्द्रस्येन्द्रत्वम् तै० २ २ १० ४ तस्य (क्षत्रियस्य) हदीक्षमाणस्येन्द्र एवेन्द्रियमादत्ते ऐ० ७ २३ इन्द्रस्येन्द्रिये-णाभिषिञ्चामि ऐ० ८ ७ इन्द्रस्येन्द्रियेण (त्वाभिषिञ्चामि) श० ५ ४ २ २ (देवस्य त्वा सवितु प्रसवे) इन्द्रस्येन्द्रियेण ता० १ ३ ५ इन्द्रियम् (आत्मन् धत्ते) ऐन्द्रेण (पशुना) तै० १ ३ ४ ३ इन्द्रमच्छसुता इ । इतीन्द्रियस्य वीर्यस्यावरुध्यै ता० ११ १० ४ (यजु० ३८ १६) मधुहुतमिन्द्रतमेऽअग्ना-विति मधु हुतमिन्द्रियतमेऽग्नावित्येवैतदाह श० १४ २ २ ४२ (इन्द्रियवान्) सखाय इन्द्रमूतयऽइतीन्द्रियवन्तमूतयऽइत्येतत् श० ६ ३ २ ४ इन्द्र (एवैनम्) इन्द्रियेण (अवति) तै० १ ७ ६ ६ इन्द्रस्य त्वेन्द्रियेण व्रतपते व्रतमादधामि तै० ११ ४ ८ दधात्विन्द्र इन्द्रियम् ता० १ ३ ५ मयीदमिन्द्र इन्द्रिय दधातु श० १ ८ १ ४२ 'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्ट-मिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' अ० ५ २ ९३ इति सूत्रे इन्द्र =आत्मा । युक्ता ह्यस्य (इन्द्रस्य) हरय शता दशेति । सहस्र हैत आदित्यस्य रश्मय (इन्द्र =आदित्य) जै० उ० १ ४४ ५ इन्द्र इति ह्येतमाचक्षते य एष (सूर्य) तपति श० ४ ६ ७ ११ एष वै शुक्रो य एष (सूर्य) तपत्येष (सूर्य) उ एवेन्द्र श० ४ ५ ५ ७, ४ ५ ९ ४ स यस्स इन्द्र एष एव स य एष (सूर्य) एव तपति जै० उ० १ २८ २ १ ३२ ५ अथ य स इन्द्रोऽसौ स आदित्य श० ८ ५ ३ २ एष वाऽइन्द्रो य एष (सूर्य) तपति श० २ ३ ४ १२ ३ ४ २ १५ स यस्स आकाश इन्द्र एव स । जै० उ० १ २८ २ अथ यत्रैतत् प्रदीप्तो भवति । उच्चैर्धूम परमया जूत्या बल्बलीति तर्हि हैष (अग्नि) भवतीन्द्र श० २ ३ २ ११ इन्द्रो वागित्यु वाऽआहु श० १ ४ ५ ४ तस्मादाहुरिन्द्रो वागिति श० ११ १ ६ १८ अथ य इन्द्रस्सा वाक् जै० उ० १ ३३ २ वाग्वा इन्द्र कौ० २ ७ १३ ५ वागिन्द्र श० ८ ७ २ ६ अय वाऽइन्द्रो योऽय (वात) पवते श० १४ २ २ ६ यो वै वायु स इन्द्रो य इन्द्र स वायु श० ४ १ ३ १९ सर्व वा ऽइदमिन्द्राय तत्स्थानमास यदिद किं चापि योऽय (वायु) पवते श० ३ ९ ४ १४ योऽय चक्षुषि पुरुष एष इन्द्र जै० उ० १ ४३ १० तत प्राणोऽजायत स (प्राण) इन्द्र श० १४ ४ ३ १६ प्राण एवेन्द्र श० १२ ९ १ १४ स योऽय मध्ये प्राण । एष एवेन्द्रस्तानेष प्राणान्मध्यत इन्द्रियैणैन्द्ध यदैन्द्ध तस्मादिन्ध इन्धो ह वै तमिन्द्र इत्याचक्षते परोऽक्षम् श० ६ १ १ २ हृदयमेवेन्द्र श० १२ ९ १ १५ यन्मन स इन्द्र गो० उ० ४ ११ मन एवेन्द्र श० १२ ९ १ १३ रुक्म एवेन्द्र श० १०.४ १ ६ एष वा एतर्हीन्द्रो यो यजते तै० १ ३ ६ ३ इन्द्रो वै यजमान श० २ १ २ ११ एष वा ऽअत्रेन्द्रो भवति यद् यजमान श० ३ ३ ३ १० यजमानो वै स्वे यज्ञ ऽइन्द्र श० ८ ५ ३ ८ द्वयेन वाऽएष इन्द्रो भवति यच्च

१ २३ इन्द्रो ज्येष्ठामनुनक्षत्रमेति तै० ३ १ २ १ इन्द्रस्य रोहिणी तै० १ ५ १ ४ एता वा ऽ इन्द्रनक्षत्र यत्फल्गुन्य श० २ १ २ ११ ऐन्द्रꣳ सान्नाय्यम् (हवि) श० २ ४ ४ १२ ऐन्द्र वै दधि श० ७ ४ १ ४२ ऐन्द्रो ब्राह्मणाच्छंसी श० ६ ४ ३ ७ तै० १ ७ ६ १ ऐन्द्रावार्हस्पत्य ब्राह्मणाच्छंसिन उक्थ भवति गो० उ० ४ १४, १६ ऐन्द्रो वाऽएष यज्ञो यत्सौत्रामणी श० १२ ८ २ २४ ऐन्द्रो वा एष यज्ञक्रतुर्यत् सौत्रामणी कौ० १६ १० गो० उ० ५ ७ ऋषभमिन्द्राय सुत्रामणऽआलभते श० ५ ५ ४ १ तस्मात्सदस्यृक्सामाभ्या कुर्वन्त्यैन्द्रꣳ हि मद श० ४ ६ ७ ३ ऐन्द्रं हि सद श० ३ ६ १ २२]

इन्द्रघोषः इन्द्रस्य परमेश्वरस्य वेदाख्याया विद्युतो वा घोषो विविधशब्दार्थसम्बन्धो यस्य यस्या वा स सा वा वाक् (विश्वकर्मा विद्वान् वाग्वा) प्र०—घोष इति वाङ्नामसु पठितम् निघ० १ ११, ५ ११ [इन्द्रो व्याख्यातम् घोष इति वाङ्नाम निघ० १.११ तयो समास]

इन्द्रजूतम् सभाध्यक्षेण प्रेरितम् (शिल्पिनम्) १ ११८ ६ **इन्द्रजूतः**=इन्द्रो विद्युदिव प्रतापयुक्त (सज्जन) ३ ३३ ११ [इन्द्र-जूतपदयो समास । जूत = 'जू' इति सौत्रो धातुर् वेगिताया गतावर्थे, तत क्त प्रत्यय]

इन्द्रज्येष्ठा इन्द्र सभापतिर्ज्येष्ठो येषु ते (देवा = विद्वज्जना) ३३ ५० **इन्द्रज्येष्ठान्**=इन्द्रो विद्युत् सूर्यो वा ज्येष्ठो येषान्तान् (क्षयान्=निवासान्) ४ ५४ ५ **इन्द्रज्येष्ठाः**=इन्द्र =सूर्यो ज्येष्ठ प्रशस्यो येषान्ते (मरुद्गणा =मरुता समूहा) १ १३ ८. सूर्यो ज्येष्ठो महान् येषा लोकाना तद्वद्वर्त्तमाना (विद्वज्जना) ६.५१ १५ इन्द्र. परमविद्यैश्वर्य प्रधान येषान्ते (सर्वविद्वास) २ ४१ १५ इन्द्र सभापतिर्ज्येष्ठो येषु ते (भा०-राजजना) ३३ ५० [इन्द्रज्येष्ठपदयो समास । ज्येष्ठ = प्रशस्यप्राति० अतिशायन इष्ठन् 'ज्य च' ति सूत्रेण ज्यादेश]

इन्द्रज्येष्ठासः इन्द्रो राजा ज्येष्ठो येषान्ते (राजप्रजाजना) ७ ११ ५ [इन्द्रज्येष्ठस्य जस्य सुगागमे रूपम्]

इन्द्रतमा अतिशयेनैश्वर्ययुक्तौ (अश्विनौ=अध्यापकोपदेशकौ) १ १८२ २ **इन्द्रतमे**=अतिशयेनैश्वर्यकारके विद्युद्रूपे (अग्नौ=पावके) ३८ १६. [इन्द्रप्राति० अतिशायने तमप् । 'सुपा सुलुगि' त्याकारादेश]

इन्द्रत्वोताः इन्द्रेण त्वया पालिता (प्रजा.) १ १३२.१

इन्द्रपत्नी इन्द्रस्य जीवस्य पत्नी स्त्रीवद्वर्त्तमाना इडा-सरस्वती-भारतीवाण्य २८ ८ [इन्द्र-पत्नीपदयो समास । पत्नी=पति प्राति० स्त्रिया 'पत्युर्नो यज्ञसयोगे' अ० ४ १ ३३ सूत्रेण नकारादेशो ङीप् च]

इन्द्रपानम् इन्द्रस्य जीवस्य पातुमर्हम् (मधुमन्तम्=बहुमधुरादिगुणयुक्त वस्तु) ७ ४७ १ इन्द्रस्यौषधिरिसस्यैश्वर्यस्य वा पान रक्षण वा ६ ४४ १६. **इन्द्रपाना.**=य इन्द्र परमैश्वर्यहेतु सविनाश पान्ति ते (चमूषद), प्र०—अत्र नन्द्यादित्वात् ल्यु प्रत्यय १ ५४ ६ [इन्द्रोपपदे 'पा पाने' 'पा रक्षणे' वा (अदा०) धातोर्भावे ल्युट् । अन्यत्र नन्द्यादित्वात्कर्त्तरि ल्यु]

इन्द्रपीतस्य सूर्येण जीवेन वा पीतस्य (पयस = उदकस्य दुग्धस्य वा) ३८ २८ [इन्द्र-पीतपदयो समास । पीतम्=पा पाने (भ्वा०) धातो क्त । 'घुमास्थागापा०' अ० ६ ४ ६६ सूत्रेणेत्वादेश]

इन्द्रमिव ऐश्वर्यमिव ११ ५७ यथाविद्युतम् १४ १५ सूर्यप्रकाशमिव सद्यो गन्तारम् (विद्युद्यानम्) १ ११६ १० सूर्यवत् दूरस्थमपि व्यवहारप्रकाशनसमर्थम् (तास्म्) ऋ० भू० २०० [इन्द्र-इवपदयो समास । 'इवेन सह समासो विभक्त्यलोप पूर्वपदप्रकृतिस्वरत्व च वक्तव्यम्' अ० २ २ १८ वा० इति समासे विभक्तेर्न लोप]

इन्द्रयन्ते इन्द्र स्वामिन कुर्वते ४ २४ ४ [इन्द्रप्राति० 'तत्करोति तदाचष्टे' वार्तिकसूत्रेण णिजन्ताल् लट्]

इन्द्रवत् विद्युद्वत् (ऐश्वर्यम्) ३८ ४ [इन्द्रप्राति० 'तत्र तस्येव' अ० ५ १ ११६ सूत्रेण वति । स्वरादिपाठाद् वतेरव्ययत्वम्]

इन्द्रवत् इन्द्र परमैश्वर्य विद्यते यस्मिंस्तत् (वस्तु) ३८ ४. चेतनाऽऽत्मसयुक्त शरीरम् ३८ ४. [इन्द्रप्राति० समर्गेऽर्थे मतुप् । 'मादुपधायाश्च०' इति मतोर्मकारस्य वकार]

इन्द्रवत्या इन्द्रो वह्नी विद्युद् विद्यते यस्या तया (रात्र्या=तमोरूपया) प्र०—अत्र भूम्न्यर्थे मतुप् 'स्तनयित्नुरेवेन्द्र, शत० १४ ५ ७ ७, ३ १०. सूर्यप्रकाशमहितया (उषसा) ३ १० सूर्यप्रकाशवत्योपमाऽथवा जीववत्या मानसवृत्या, वायुचन्द्रवत्या रात्र्या सह ऋ० भू० २४६ [इन्द्रप्राति० भूम्नि मतुप् । 'उगितश्चे' ति स्त्रिया ङीप्]

इन्द्रवन्त. परमैश्वर्ययुक्त इन्द्रस्तद्वन्त (सर्ववीरा) १ १०५ १६ वह्निन्द्र ऐश्वर्य विद्यते येषान्ते (रुद्रास =

भवति······इन्द्रो वैकुण्ठो मध्यन्दिने जै० उ० ४१०.१० इन्द्रो वै मघवान् श० ४१२१५ स उ एव मख स विष्णु । तत इन्द्रो मखवानभवन्मखवान्ह वै त मघवानमित्याचक्षते परोऽक्षम् श० १४११११३ इन्द्रो वसुधेय श० १८२१६ इन्द्र उ वै वेन कौ० ८५ इन्द्रो वै वेधा ऐ० ६१० गो० उ० २२० इन्द्रो हि षोडशी श० ४२५१४ इन्द्रो ह वै षोडशी श० ४५३१ कौ० १७१४ एतद्ध वा इन्द्राग्न्यो प्रिय धाम यद् वागिति ऐ० ६७. गो० उ० ६१३ वाग् वै ऐन्द्री ऐ० २२६ वाक् च प्राणश्चेन्द्रवायव ऐ० २१६ अथैतद्वामेऽक्षिणि पुरुषरूपम् । एषास्य (दक्षिणेऽक्षणि वर्त्तमानस्य पुरुषस्येन्द्राख्यस्य) पत्नी विराट् श० १४६११३ इन्द्रो वृषा श० १४१३३ इन्द्रो वै वृषा ता० ९४३ इन्द्रो वै वाजी ऐ० ३१८ इन्द्रो वै गोपा ऐ० ६१० गो० उ० २२० इन्द्रो उ वै परुच्छेप कौ० २३४ एतेन (पारुच्छेपेन रोहिताख्येन छन्दसा) वा इन्द्र सप्त स्वर्गाल्लोकानारोहत् ऐ० ५१० इन्द्रो वै चतुर्होता तै० २३११३ इन्द्र सप्तहोता तै० २३११ २२८५. यन्मन स इन्द्र गो० उ० ४११ इन्द्रो वै प्रदाता स एत्रास्मै यज्ञ प्रयच्छति कौ० ४२ यो ह खलु वाव प्रजापति स उ वावेन्द्र तै० १२२५ इन्द्रो वै त्वष्टा ऐ० ६१० इन्द्र उ वै वातापि स हि वातमाप्त्वा शरीराण्यर्हन् प्रतिप्रैति कौ० २७४ कतमत्तदक्षरमिति । यत्क्षरन्नाऽक्षीयतेति इन्द्र इति जै० उ० १४३ इन्द्र उ वै वरुण स उ वै पयोभाजन कौ० ५४ गो० उ० १२२ इन्द्रस्य शतभिषक् (नक्षत्रम्) तै० १५१५ इन्द्रो लोकम्पृणा श० ८७२६ यत् पुरस्ताद् वासीन्द्रो राजा भूतो वासि जै० उ० ३२१२ दक्षिणा दिक् । इन्द्रो देवता तै० ३११५१ अथ यद् विश्वजितमुपयन्ति । इन्द्रमेव देवता यजन्ते श० १२१३१५ इन्द्रो विश्वजिद् इन्द्रो हीद सर्व विश्वमजयत् कौ० २४१ ततो वा इदमिन्द्रो विश्वमजयद् यद् विश्वमजयत्तस्माद् विश्वजित् ता० १६४५ इन्द्रो वै युधाजित् ता० ७५१४ इन्द्रो वै प्रासहस्पतिस्तुविष्मान् ऐ० ३२२ सेना वा इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम ऐ० ३२२. सेना ह नाम पृथिवी धनञ्जया विश्वव्यचा अदिति । सूर्यत्वक् । इन्द्राणी देवी प्रासहा ददाना तै० २४२७ वैखानसा वा ऋषय इन्द्रस्य प्रिया आसन् ता० १४४७ यत्रेन्द्र देवता (यज्ञेषु) पर्यवृञ्जन् (यत स इन्द्र) विश्वरूप त्वाष्ट्रमभ्यमस्त वृत्रमस्तृत यतीन्त्सालावृकेभ्य प्रादादरुर्मघानवधीद् बृहस्पते प्रत्यवधीदिति तत्रेन्द्र सोमपीथेन व्यार्द्धत ऐ० ७२८

कालकञ्जा वै नामासुरा आसन् । ते सुवर्गाय लोकायाग्निमचिन्वत पुरुष इष्टकामुपादधत् पुरुष इष्टकाम् । स इन्द्रो ब्राह्मणो ब्रुवाण इष्टकामुपाधत्त । एषा मे चित्रा नामेति । ते सुवर्गलोकमाप्रारोहन् । स इन्द्र इष्टकामवृहत् । तेऽवाकीर्यन्त येऽवाकीर्यन्त त ऊर्णनाभयोऽभवन् । द्वावुदपतताम् । तौ दिव्यौ श्वानावभवताम् तै० ११२४-६ इन्द्रो यतीन् सालावृके येभ्य प्रायच्छत्तमश्लीला वागभ्यवदत् स प्रजापतिमुपाधावत् तस्मा एतमुपहव्य प्रायच्छत् ता० १८१६ नमुचिर्ह वै नामासुर आस तमिन्द्रो निविव्याध तस्य पदा शिरोऽभितष्ठौ स यदभिष्ठित उदवाधत स उच्छ्वङ्कुरतस्य पदा शिर प्रचिच्छेद ततो रक्ष समभवत् श० ५४१६ त (त्रिशीर्षाण त्वाष्ट्र विश्वरूप) इन्द्रो दिद्वेषतस्य तानि शीर्षाणि प्रचिच्छेद श० १६३२ स (इन्द्र) यत्र त्रिशीर्षाण त्वाष्ट्र विश्वरूप जघान श० १२३२ इन्द्रो वै वृत्रहा कौ० ४३ महानाम्नीभिर्वा इन्द्रो वृत्रमहन् कौ० २३२ इन्द्रो वा एष पुरा वृत्रस्य वधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यान एव महेन्द्रोऽभवन् श० १६.४२१, ४३६१७ इन्द्रो वै वृत्र हत्वा विश्वकर्माऽभवत् ऐ० ४२२ तस्य (इन्द्रस्य) असौ (द्यु०) लोकोनाभिजित आसीत्तम् (इन्द्र) विश्वकर्मा भूत्वाभ्यजयत् तै० १२३३ मरुतो ह वै क्रीडिनो वृत्रꣳ हनिष्यन्तमिन्द्रमागत तमभित परिचिक्रीडुर्महयन्त श० २५३२० ते (मरुत) एनम् (इन्द्रम्) अध्यक्रीडन् तै० १६७५ इन्द्रो वै मरुत क्रीडिन गो० उ० १२३ इन्द्रो वै मरुतसान्तपन गो० उ० १२३ इन्द्रस्य वै मरुत कौ० ५४, ५ धर्म इन्द्रो राजेत्याह तस्य देवा विश श० १३४३१४ एतद्वाऽइन्द्रस्य निष्केवल्यꣳ सवन यन्माध्यन्दिनꣳ सवन तेन वृत्रमजिघासत्तेन व्यजिगीषत श० ४३३६ ऐन्द्र वै माध्यन्दिन सवनम् । जै० उ० १३७३ इन्द्रस्य माध्यन्दिन सवनम् कौ० १४५ ऐन्द्र हि त्रैष्टुभ माध्यन्दिन सवनम् कौ० २९२ गो० उ० ४४ त्रैष्टुभ इन्द्र कौ० ३२२२७ इन्द्र (श्रिय) बलम् (आदत्त) श० ११४३३ तान् (पशून्) इन्द्र पञ्चदशेन स्तोमेन नाप्नोत् तै० २७१४२ ऐन्द्रो राजन्य ता० १५४८ (राजन्यस्य) इन्द्रो देवता ता० ६१८ हरिव आगच्छेति पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्याꣳ हीदꣳ सर्व हरति प० ११ ऐन्द्री द्यौ ता० १५४८ द्यौरिन्द्रेण गर्भिणी श० १४९४२१ ऐन्द्र हि पुरीषम् श० ८७३७ अथ यत्पुरीषꣳ स इन्द्र श० १०४१७ ऐन्द्र्यो वालखिल्या (ऋच) ऐ० ६२६. ऐन्द्रो वा एष यज्ञक्रतुर्यत्साकमेधा कौ० ५५ गो० उ०

सयुक्तौ वायुविद्युदग्नी ३३ ४६ सभासेनाधीशौ ३३ ६१ अध्यापकोपदेशकौ ३३ ६३ अध्येत्रध्यापकौ १ १०६ ७ उपदेश्योपदेष्टारौ १ १०६ ८ न्यायसेनाध्यक्षौ वायुविद्युतौ वा १ १०८ ६ परमधनाढ्यो युद्धविद्याप्रवीणश्च १ १०८ १३ स्वामिभृत्यौ १ १०८ ५ ऐश्वर्यविद्यायुक्तौ (अध्यापकोपदेशकौ) ३ १२ २ विद्युद्भौतिकावग्नी १ १०६ १ इन्द्र प्रसिद्धो विद्युदग्नि पावकश्च १८ ४७ इन्द्रो विद्युच्चाग्नि सूर्यश्च १४ ११ सूर्य तथा अग्नि आर्याभि० २ २३, ३६ ११ बिजली और प्रसिद्ध अग्नि स० वि० १२२, अथर्व० १४ १ ५४ वायुवह्नी इव वर्त्तमानौ राजप्रजाजनौ ६ ५६ २ **इन्द्राऽग्निभ्याम्**=जीवाऽग्निभ्याम् २२ ५ वायुविद्युदस्त्राभ्याम् ३४ ४६ सूर्याग्निभ्याम् ५ ८६ ६ विद्युत्प्रसिद्धाभ्या वह्निभ्याम् ७ २३ **इन्द्राग्न्योः**=वायुपावकयो २५ ५ इन्द्रो वायुरग्निविद्युत्तयो २ १५ सूर्यविद्युतो ६ २४ [इन्द्र-अग्नि-पदयोर्द्वन्द्वे 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेण पूर्वस्याऽऽनङ् । इन्द्राग्नी प्राणोदानौ वा ऽ इन्द्राग्नी श० २ ५ २ ८ इन्द्राग्नी हि प्राणोदानौ श० ४ ३ १ २२ प्राणापानौ वा इन्द्राग्नी गो० २ १ प्राणापानौ वा एतौ देवाना यदिन्द्राग्नी तै० १ ६ ४ ३ वल वै तेज इन्द्राग्नी गो० उ० १ २२ ब्रह्मक्षत्रे वा इन्द्राग्नी कौ० १२ ८ अमृतꣳ इन्द्राग्नी श० १० ४ १ ६ इन्द्राग्नी वै देवानामयातयामानौ तै० १ १ ६ ५, १ २ ५ १ इन्द्राग्नी वै देवाना मुखम् कौ० ४ १४ तस्मादाहुरिन्द्राग्नी ऽ एव देवानाꣳ श्रेष्ठाविति श० ८ ३ १ ३ इन्द्राग्नी वै देवानामोजिष्ठतमौ श० १३ १ २ ६ इन्द्राग्नी वै देवानामोजिष्ठौ ता० २४ १७ ३ प० ३ ७. इन्द्राग्नी इव वलेन (भूयास) म० २ ४ १४ ओजो वल वा एतौ देवाना यदिन्द्राग्नी तै० १ ६ ४ ४ इन्द्राग्नी वै देवानामोजिष्ठौ वलिष्ठौ सहिष्ठौ सत्तमौ पारयिष्णुतमौ ऐ० २ ३६ इन्द्राग्नी वै देवानामोजिष्ठौ वलिष्ठौ तै० ३ ८ ७ १ एताभिर्वा इन्द्राग्नी अत्यन्या देवता अभवताम् ता० २४ १७ २ इन्द्राग्नी वै विश्वेदेवा श० १० ४ १ ६ इन्द्राग्नी वै सर्वे देवा कौ० १२ ६ श० ६ १ २ २८ इन्द्राग्नी वा इद सर्वम् श० ४ २ २ १४ अस्ति वै छन्दसा देवतेन्द्राग्नी श० १ ८ २ १ ६ प्रतिष्ठे वा इन्द्राग्नी कौ० ३ ६, ५ ४ क्षत्र वा इन्द्राग्नी श० २ ४ २ ६ ज्योतिरिन्द्राग्नी श० १० ४ १ ६ ऐन्द्राग्न वै सामतस्तृतीय सवनम् कौ० ४ ४ तस्मादैन्द्राग्नौ द्वादशकपाल पुरोडाशो भवति श० १ ६ ४ ३ ऐन्द्राग्नो द्वादशकपाल पुरोडाशो भवति श० २ ५ २ ८ ऐन्द्राग्नानि ह्यवथानि श० ४ २ ५ १४ दर्शपूर्णमासयोर्वै देवते स्त इन्द्राग्नी ऽ एव श० २ ४ ४ १७ इन्द्राग्नी वै विश्वेदेवा श० २ ८ ४ १३ इन्द्राग्नी हि विश्वेदेवा श० २ ६ २ १४ नक्षत्राणामधिपत्नी विशाखे । श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ तै० ३ १ १ ११ इन्द्राग्न्योविशाखे (नक्षत्रविशेष) तै० १ ५ १ ३ एतद्व वा इन्द्राग्न्यो प्रिय धाम यद् वागिति ऐ० ६ ७ गो० उ० ५ १३]

इन्द्राणी इन्द्रस्य परमैश्वर्ययुक्तस्य स्त्री ५ ४६ ८ सूर्य की कान्ति स० वि० १३८ **इन्द्राणीम्**=परमैश्वर्ययुक्ताम् (विदुषी स्त्रीम्) २ ३२ ८ इन्द्रस्य सूर्यस्य वायोर्वा शक्ति सामर्थ्यमिव वर्त्तमानाम् (स्त्रियम्) १ २२ १२ **इन्द्राण्यै**=इन्द्रस्य विद्युद्रूपस्य स्त्रीव वर्त्तमानायै दीप्त्यै २५ ४ परमैश्वर्यकारिण्यै राजनीत्यै ३८ ३ [इन्द्रशब्दात् स्त्रियाम् 'इन्द्रवरुण०' अ० ४ १ ४६ सूत्रेण ङीप् आनुक् च । इन्द्राणी इन्द्रस्य पत्नी नि० ११ ३७ इन्द्राणी ह वा ऽइन्द्रस्य प्रिया पत्नी, तस्या उष्णीषो विश्वरूपतम श० १४ २ १ ८ स एप एवेन्द्र योऽय दक्षिणे ऽक्षन्पुरुषोऽथेयमिन्द्राणी श० १० ५ २ ६.]

इन्द्रापर्वता सूर्यमेघाविव वर्त्तमानौ सभासेनेशौ १ १३२ ६ सूर्यमेघसदृशौ सेनापतिसेनाजनौ, प्र०—अत्र 'सुपा सुलुग्०' अ० ७ १ ३६ इत्याकारादेश ८ ५३ विद्युन्मेघाविव राज्यसेनाधीशौ ३ ५३ १ [इन्द्र-पर्वतपदयोर्द्वन्द्व । 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेण पूर्वपदस्यानङ् । इन्द्रो व्याख्यात । पर्वत =मेघनाम निघ० १ १०]

इन्द्रापूषणा विद्युत्पृथिव्यौ ३६ ११ विद्युद्वायू ७ ३५ १ **इन्द्रापूष्णोः**=ऐश्वर्यवत्पुष्टिमतो (विद्युत्-सूर्ययो) १ १६२ २ विद्युद्वाय्वो २५ २५ [इन्द्र-पूषन् पदयोर्द्वन्द्वे पूर्वपदस्यानङ् । पूषन्=पृथिवीनाम निघ० १ १. पदनाम निघ० ५ ६ पूषेत्यपर सोऽदन्तक । 'अदन्तक पूषा' (श० १ ७ ४ ७ गो० उ० १ २) इति च ब्राह्मणम् नि० ६ ३१]

इन्द्राबृहस्पती वायुसूर्यौ २५ ६ अध्यापकोपदेशकौ ४ ४६ ५ राजोपदेशकविद्वासौ ४ ४६ २ विद्युत्सूर्याविव प्रधानराजानौ ४ ४६ १ राजाऽमात्यौ ४ ४६ ६ **इन्द्राबृहस्पतिभ्याम्**=राजाऽनूचानाभ्या विद्वद्भ्याम् ७ २३ [इन्द्र-बृहस्पतिपदयोर्द्वन्द्वे पूर्वपदस्य आनङ्ादेश । बृहस्पति पदनाम निघ० ५ ४ 'तद्बृहतो करपत्योश्चोरदेवतयो सुट् तलोपश्च' अ० ६ १ १५७ इति सुट् तलोपौ । बृहत पाता वा पालयिता वा नि० १० ११]

इन्द्राब्रह्मणस्पती राजधनपालकौ (प्रजा-राजपुरुषौ)

विद्वज्जना) ५.५७ १ परमैश्वर्ययुक्ता (पितर) ४ ३३ ३ **इन्द्रवन्ता**=वह्वैश्वर्ययुक्तौ (अश्विनौ=सभामेनेशौ) १ ११६ २१ [इन्द्र+मतुप् । मकारस्य वकार । प्रथमा-बहुवचनम्]

इन्द्रवायुभ्याम् विद्युत्प्राणाभ्यामिव योगाकर्पण-निष्कर्पणाभ्याम् ७ ८ **इन्द्रवायू**=प्राणसूर्यसदृशौ योगम्यो-पदेष्ट्रभ्यासिनौ (योगिसिद्धजनौ) ७ ८ सूर्यवायू इवा-ऽध्यापकोपदेशकौ ४ ४६ ६ इमौ प्रत्यक्षौ सूर्य्यपवनौ । 'इन्द्रेण सेचना दिवो दृळहानि दृहितानि च । स्थिराणि न पराणुदे, ऋ० ८ १४ ९ यथेन्द्रेण=सूर्य्यलोकेन प्रकाशमाना किरणा धृता, एव च स्वाऽऽकर्पणशक्त्या पृथिव्यादीनि भूतानि दृढानि पुष्टानि स्थिराणि कृत्वा दृहितानि धारितानि सन्ति, न पराणुदे=अतो नैव स्वस्व-कक्षा विहायेतस्ततो भ्रमणाय समर्थानि भवन्ति । 'इमे चिदिन्द्र रोधसी अपारे ······परिस्रवणन मेघम् निरु० ६ १ यतोऽय सूर्य्यलोको भूमिप्रकाशौ धारितवानस्ति, अत एव पृथिव्यादीना निरोध कुर्वन् पृथिव्या मेघस्य च कूल स्रोतश्चाकर्पणेन निरुणद्धि । यथा बाहुवेगेनाकाशे प्रतिक्षिप्तो लोष्ठो मृत्तिकाखण्ड पुनर्विपर्य्ययेणाकर्पणाद् भूमिमे-वागच्छति, एव दूरे स्थितानपि पृथिव्यादिलोकान् सूर्य्य एव धारयति । सोऽय सूर्य्यस्य महानाकर्प. प्रकाशश्चाऽस्ति । तथा वृष्टिनिमित्तोऽप्ययमेवाऽस्ति । "इन्द्रो वै त्वष्टा" ऐ० ब्रा० ६ १० सूर्य्यो भूम्यादिस्थस्य रसस्य मेघस्य च छेत्ताऽस्ति । एतानि भौतिकवायुविषयाणि 'वायवा याहि०' इति मन्त्रप्रोक्तानि प्रमाणान्यत्रापि ग्राह्याणि १ २ ४ धनिविद्वासौ राजाऽमात्यौ ४ ४७ ४ विद्युत्प्राणौ १ १३९ १ इन्द्रश्च वायुश्च तौ विद्युत्पवनौ १ १४ ३ विद्युत्पवन-विद्याविदौ (विद्वज्जनौ) ३३ ५६ सूर्यपवनाविव (अध्या-पकोपदेशकौ) १ १३५ ५ राजप्रजाजनौ ३३ ८६ वायुविद्युद्वच्छीघ्रकारिणौ शिल्पविद्याऽध्यापकोपदेशकौ ४ ४६ ४ वायुरविद्युदग्नी इव प्रतापिनौ राजसेनेशौ ४ ४६ ५ अग्निपवनौ १ २३ २ [इन्द्र-वायुपदयो समास । इन्द्रो व्याख्यात । वायु=अजगतिक्षेपणयो (भ्वा०) धातोरौणादिको युच् । 'वा यौ' अ० २ ४.५७ सूत्रेण धातोर्वादेश । 'वा गतौ' (अदा०) धातोर्वौणादिक उण्]

इन्द्रवाहा याविन्द्र विद्युत परमैश्वर्य वहतस्तौ (हरी=जलाग्न्याख्यौ), प्र०—अत्राऽऽकारादेश १ ११११ **इन्द्र-वाहौ**=ऐश्वर्यप्रापकौ (हरी=वायुविद्युतौ) ४ ३५ ५ [इन्द्रोपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' अ० ३ २ ६४ सूत्रेण ण्वि प्रत्यय । अथवा—'कर्मण्यण्' इत्यण् प्रत्यय]

इन्द्रशत्रुः इन्द्र शत्रुर्यस्य वृत्रस्य स (मेघ) १ ३२ ६ इन्द्र शत्रुर्यस्य स मेघ. १ ३२ १० [इन्द्र-शत्रुपदयो समास । इन्द्रशत्रु=इन्द्रोऽस्य शमयिता वा शातयिता वा नि० २ १६]

इन्द्रसखा इन्द्रः परमैश्वर्यो राजा सखा यस्य स (विद्वज्जन) ७ ३४ २४ [इन्द्र-सखिपदयो समास । 'राजाहस्सखिभ्यष्टच्' अ० ५ ४ ९१ सूत्रेण तत्पुरुषे विहितष्टच् समासान्तो बहुव्रीहावपि भवति छान्दसत्वात्]

इन्द्रसारथिः इन्द्रो विद्युत् सारथिर्यस्य स (वायु) ४ ४६ २. इन्द्रस्य विद्युत सूर्यस्याऽग्नेर्वा नियमेन गमयिता (नियुत्वान्=नियतगतिर्वायु) ४ ४८ २ [इन्द्र-सारथि-पदयो समास । सारथि=सारयति नियमेन चालयतीनि विग्रहे 'सृ' गतौ (भ्वा०) धातोर्णिजन्तात् 'सर्त्तेर्णिच्च' उ० ४ ८९ सूत्रेण थथिन् प्रत्यय । णेर्लोपो णित्वाच्च वृद्धि]

इन्द्रस्येव यथा परमैश्वर्ययुक्तस्य राज्ञ ६ ८ सूर्यस्येव ७ ६ १ [इन्द्र-इवपदयो 'इवेन सह समासो विभक्त्य-लोप०' अ० २ २ १८ वा० इति समासो विभक्तेश्च न लोप]

इन्द्रस्वन्तम् परमैश्वर्ययुक्तस्वामिसहितम् (रयिं=धनम्) ४ ३७.५ [इन्द्रस्वप्राति० मतुप्]

इन्द्रहूतिम् परमैश्वर्यप्रकाशिकाम् (धीतिं=वियम्) ६ ३८ १ [इन्द्रोपपदे ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो क्तिन् बाहुलकात् यजादित्वात् किति सम्प्रसारणम्]

इन्द्रा परमैश्वर्ययुक्तम् (सज्जनम्) ६ ५७ १

इन्द्राकुत्सा इन्द्रश्च कुत्सश्चेन्द्राकुत्सौ विद्युदाघातौ ५ ३१ ९ [इन्द्र-कुत्सयो समासे 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेण पूर्वपदस्यानङ् । कुत्स इत्येतत् कृन्ततेर्ऋषि कुत्सो भवति । कर्त्तास्तोमानाम् इत्यौपमन्यवोऽत्राप्यस्य वधकर्मैव भवति । 'तत्सख इन्द्र शुष्ण जघान' इति नि० ३ ११ कुत्स=वज्रनाम निघ० २ २०]

इन्द्राऽग्नी इन्द्रो वायुर्विद्युदादिरूपोऽग्निश्च तौ ३ १३ वायुवह्नी प्र०—"या वै वायु स इन्द्रो य इन्द्र स वायु" शत० ४ १ ३ १९, १ २१ १ प्राणविद्युताविव (आप्ताव-ध्यापकोपदेशकौ) १ १३९.९ वायुसवितारौ १ १०८.२ वायुपावकौ १ १०८ १ सूर्यविद्युतौ ५ ४६ ३ सूर्याऽग्नी इव प्रकाशमानौ सभापतिसभासदौ ७ ३१ मातापितरौ १२ ५४ इन्द्र परमैश्वर्यश्चाऽग्निर्विज्ञाता च तौ १५ ५९.

च क्रोध च श्लाघा च रूप च पुण्यमेव गन्ध सप्तमम् गो० पू० २ २]

इन्द्रियावत् प्रशस्तानि इन्द्रियाणि भवन्ति यस्मिन् तत् (दुग्धम्) १६ ६५ **इन्द्रियावतः**=वहुधनयुक्तस्य (बृहस्पतिसुतस्य) ८ ६ **इन्द्रियावान्**=प्रशस्तानीन्द्रियाणि यस्मिन् स (भाग =कर) ६.२७ [इन्द्रियमिति धननाम निघ० २ १० ततो भूम्नि प्रशसार्थे वा मतुप्। 'मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ' अ० ६ ३ १३१ सूत्रेण मतौ परतो दीर्घत्वम्]

इन्द्रेषिताम् इन्द्रेण परमेश्वरेण प्रेषिताम् (धमनिं=वेदवाणीम्) २ ११ ८ **इन्द्रेषिताः**=इन्द्रेण स्वामिना प्रेरिता (पवय =चक्राणि) ५ ३१ ५ **इन्द्रेषिते**=इन्द्रेण सूर्येण वर्षाद्वारा प्रेरिते (अध्यापिकोपदेशिके) ३ ३३ २ [इन्द्र-इषितपदयो समास । इषित =इषु गतौ (दिवा०) धातो क्त]

इन्धताम् दीप्यन्तु १ १७० ४ प्रदीपयन्तु ११ ६१ प्रकाशयन्तु १२ ४४ **इन्धते**=प्रदीपयन्ति ७ ३२ प्रकाशयन्ति ३४ ४४ प्रदीप्यन्ते १ ४४ ७ **इन्धे**=प्रकाशयामि २० २४ प्रकाशयते ७ १ १६ प्रदीपयामि ७ ८ १ [ञिइन्धी दीप्तौ (रुधा०) धातोर्लोटि लटि च रूपाणि]

इन्धन्वभिः प्रदीपिकाभि (धेनुभि =वाग्भि) प्र०—अत्र वनिपि 'छान्दसो वर्णलोपो वा' इत्यलोप २ ३४ ५ [ञिइन्धी दीप्तौ (रुधा०) धातोर्वनिप्]

इन्धान प्रदीपयन्, अ०—विद्वान् (सभेशो राजा) १२ १८ प्रदीप्त सन् (विद्वज्जन) १ १४३ ७ **इन्धानाः**=प्रकाशमाना (ऋषय =वेदार्थवेत्तारो जना) १५ ५६ प्रकाशयन्त, अ०—प्रदीपयन्त (जना) ३ १८ प्रकाशयितार प० वि०, अथर्व० १६ ५ ३ [ञिइन्धी दीप्तौ (रुधा०) धातो शानच् । ताच्छील्ये चानश् वा कर्त्तरि]

इन्व व्याप्नुहि ५ ४ ७ **इन्वतम्**=वर्धयतम् १ १६० ५ **इन्वतः**=व्याप्नुत, प्र०—इन्वतीति व्याप्तिकर्मसु पठितम् निघ० २ १८, १ १० ८ **इन्वताम्**=व्याप्नुताम् ६ ७० ६ **इन्वति**=व्याप्नोति जानाति वा, प्र०—इन्वतीति गतिकर्मसु पठितम् २ १४, १ १८ ७ प्राप्नोति १ १२८ ५ **इन्वतु**=व्याप्नोतु प्राप्नोतु १ १६२ १२ ददातु ४ ५३ ७ **इन्वथः**=प्राप्नुतम् १ १११६ ७ **इन्वसि**=व्याप्नोति, प्र०—अत्र 'व्यत्ययो बहुलम्' इति लकार व्यत्यय ५ २८ २ व्याप्नोषि १ १७६ १ व्याप्नोषि व्याप्नोति वा १ ६४ १० **इन्विरे**=व्याप्नुवन्ति ५ ६ ६ [इवि व्याप्तौ (भ्वा०) धातोर्लोटि लटि लिटि च रूपाणि । लोटि व्यत्ययेनात्मनेपदम् । इन्वति गतिकर्मा निघ० २ १४ व्याप्तिकर्मा निघ० २ १८]

इन्वतः प्रियस्य (यजमानस्य) १ १४१ ४ [इवि गतौ (भ्वा०) धातो शतरि रूपम्]

इन्वन् प्राप्नुवन् (राजा) ५ ३० ७ **इन्वन्तः**=व्याप्नुवन्त (मनुष्या) ३ ४ ५ [इवि गतौ (भ्वा०) धातो शतृ० । इन्वतीति व्याप्तिकर्मणो वा (निघ० २ १८) शतृ]

इभम् हस्तिनमिव ६ २० ८ **इभाय**=हस्तिने १ ८४ १७ **इभेन**=हस्तिना ४ ४ १ [इण् गतौ (अदा०) धातो 'इण किन्' उ० ३ १५३ सूत्रेण भन् प्रत्यय किच्च । इभाय=महते नि० १३ ३६ इभेन=इराभृतागणेन गतभयेन हस्तिना वा नि० ६ १२]

इभ्यान् य इभान् हस्तिनो नियन्तुमर्हन्ति तान् (हस्तिचालकान्) १ ६५ ४ [इभप्रातिपदिकादर्हत्यर्थे यत् । इभश्च व्याख्यातम्]

इमथा इदानीन्तनानामिव (योगिनाम्) ७ १२ इममिव ५ ४४ १ [इमप्राति० 'प्रत्नपूर्वविश्वेमात्थाल छन्दसि' अ० ५ ३ १११ सूत्रेणेवार्थे थाल् प्रत्यय । इमथा=अमुथा नि० ३ १६]

इमसि प्राप्नुम १ १ ७ [इण् गतौ (अदा०) धातोर्लटि, उत्तमबहुवचने मसि 'इदन्तो मसि' रिति मस इदन्तत्वम्]

इमः प्राप्नुम ११ १६ [इण् गतौ (अदा०) धातोर्लट्]

इयक्षते यष्टु सत्कर्त्तुमिच्छते (इन्दवे=विद्यार्थिने) प्र०—अत्र छान्दसो वर्णलोप इत्यभ्याम-यकारलोप ३३ ६२ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोरिच्छायामर्थे सनि शतरि रूपम्। अभ्यासयकारस्य च 'छान्दसो वर्णलोप' इति लोप]

इयक्षन् प्राप्तुमिच्छन् (सूरि =विद्वान्) १ १५३ २ **इयक्षन्तः**=सत्कुर्वन्त (सत्पुरुषा) २ २० १ यष्टु सङ्गमयितुमिच्छन्त (अहिंसका जना) ६ २१ ३ [इयक्षति गतिकर्म, निघ० २ १४, तत शतृ । अथवा=यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो सन्नन्ताच्छतृ । अभ्यासयकारस्य लोपश्छान्दस]

इयक्षमाणाः यज्ञ चिकीर्षमाणा (यजमाना)

२ २४ १२ [इन्द्र-ब्रह्मणस्पतिपदयोर्द्वन्द्वे पूर्वपदस्यानङ् । ब्रह्मण·पति=ब्रह्मण पाता वा पालयिता वा नि० १० १२ ब्रह्मणस्पति=पदनाम निघ० ५ ४]

इन्द्रामरुतः इन्द्रश्च विद्युन्मरुतश्च वायवस्तान् २ २९ ३ [इन्द्र-मरुत्पदयोर्द्वन्द्वे पूर्वपदस्यानङ् । मरुत = ऋत्विङ्नाम निघ० ३ १८ पदनाम निघ० ५ ५. मरुत्= हिरण्यनाम निघ० १ २ रूपनाम निघ० ३ ७]

इन्द्रावतः ऐश्वर्ययुक्तान् (पुरुषार्थिनो जनान्) ४ २७ ४ [इन्द्रप्राति० भूम्नि मतुप् । 'अन्येषामपि दृश्यते' अ० ६ ३ १३७ सूत्रेण दीर्घ]

इन्द्रावरुणयोः इन्द्रश्च वरुणश्च तयो सूर्याचन्द्रमसो, प्र०—इन्द्र इति पदनामसु पठितम् निघ० ५ ४ 'वरुण इति च निघ० ५ ४ अनेन व्यवहारप्रापकौ गृह्यते १ १७ १ **इन्द्रावरुणा**=अग्निजले, प्र०—अत्र 'सुपा सुलुग्० इत्याकारादेशो वर्णव्यत्ययेन ह्रस्वत्वञ्च १ १७ ३ विद्युज्जले ७ ३५ १ वायुजले सम्यक् प्रत्युक्ते १ १७ ८ वायुविद्युताविव (अध्यापकोपदेशकौ) ४ ४२ ९ शुभगुणयुक्तप्रधानौ (राजाऽमात्यौ) ४ ४१ ३ परमैश्वर्य-श्रेष्ठाचारयुक्तौ (अध्यापकोपदेशकौ) ४ ४१ १ विद्यैश्वर्यप्रशसितगुणयुक्तौ (अध्यापकोपदेशकौ) ४ ४१ ५ प्राणोदानवत् प्रियवलिनौ (अध्यापकोपदेशकौ) ४ ४१ १ शत्रुविदारकश्रेष्ठौ (राजाऽमात्यौ) ४ ४१ ४ वायु और चन्द्र आर्याभि० २ २३, ३९ ११ सूर्यचन्द्रवद्वर्त्तमानौ राजप्रजाजनौ ६ ६८ ८ **इन्द्रावरुणाभ्याम्**=विद्युज्जलाभ्याम् ७ २३ [इन्द्र-वरुणपदयोर्द्वन्द्वे पूर्वपदस्यानङ् । इन्द्र इति पदनाम निघ० ५ ४ वरुण इति पदनाम निघ० ५ ४]

इन्द्राविष्णू सूर्यविद्युतौ ६ ६९ १ विद्युत्सूर्याविव (अध्यापकोपदेशकौ) १ १५५ २ विद्युद्वायू ४ ५५ ४ विद्युत्सूत्रात्मानौ ४ २ ४ वायुसूर्यौ ६ ६९ ४ वायुविद्युताविव सभासेनेशौ ६ ६९ ३ **इन्द्राविष्णुभ्याम्**= ईश्वरवेदज्ञानाभ्याम् ७ २३ [इन्द्र-विष्णुपदयोर्द्वन्द्वे 'देवताद्वन्द्वे च' इति पूर्वपदस्यानङ् । विष्णु=यज्ञनाम निघ० ३ १७ पदनाम निघ० ५ ६ विष्णु=अथ यद् विपितो भवति तद् विष्णुर्भवति । विष्णुर्विशतेर्वा व्यश्नोतेर्वा नि० १२ १८ विष्लृ व्याप्तौ (जु०) धातो 'विषे किच्च' उ० ३ ३९ सूत्रेण णु प्रत्यय किच्च]

इन्द्रासोमा विद्युदोपधिगणौ ३९ ११. सेनापत्यैश्वर्यवन्तौ २ ३० ६ विद्युच्चन्द्रमसौ ६ ७२ १ वायुविद्युतौ ६ ७२ ४ राजा और प्रजा आर्याभि० २ २३, ३९ ११ वायुविद्युद्वद् वर्तमानौ (अध्यापकोपदेशकौ) ६ ७२ ५ [इन्द्र-सोमपदयोर्द्वन्द्वे पूर्वपदस्यानङ् । 'सुपा सुलुग०' त्याकारादेश]

इन्द्रियम् इन्द्रस्यैश्वर्यप्राप्तेर्लिङ्ग चिह्नमिन्द्रेण परमेश्वरेण दृष्टमिन्द्रेण सृष्ट प्रकाशितमिन्द्रेण विद्यावता जीवेन जुष्ट सप्रीत्या सेवितमिन्द्रेण परमेश्वरेण यद्दत्त सर्वसुखज्ञानसाधकम् प्र०—'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' अ० ५ २ ९३ अनेनोक्तेष्वर्थेषु इन्द्रियशब्दो निपातित २ १० सुशिक्षित मन २० ७१ प्रशस्त बुद्ध्यादिक चक्षुरादिक वा १ ५७ ३ विज्ञानयुक्त मन १ ५५ ४ मन आदीनि वाग्भिन्नानि षड् ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च ऋ० भू० १०२ दिव्या वाचम् १९ ७३ दिव्य श्रोत्रम् १९ ७३ चित्तम् १९ ७७ जिह्वादिकम् १९ ७६ मन आदिकम् १९ ५ अन्त करणम् २१ ५४ श्रोत्रादिकम् २१ २० मन प्रभृतीन्द्रियमात्रम् २१ ४० मन-आदिकार्यसाधकम् ८ ३ धनम् २० ५५ इन्द्रै राजभिर्जुष्ट न्यायाचरणम् १९ ७५ इन्द्रेण जीवेन जुष्टम् (भा०—आरोग्यम्) २८.३६ इन्द्रैर्जीवैर्जुष्ट सुखम् २८ ३१ विज्ञानसाधक (मन) १९ ७७ उपस्थ पुरुषलिङ्गम् १९ ७६. ऐश्वर्यम् २१ २२ विज्ञान धन वा १ १११ २ इन्द्रस्य परमैश्वर्यवतस्तव ईश्वरस्य जीवस्य च लिङ्गम् (प्रत्यक्षाऽप्रत्यक्षसामर्थ्यम्) १ १०३ १ प्रज्ञानम् १९ ७४ ज्ञानादिव्यवहारसाधकम् (मन) २१ १४ शान्त धर्मयुक्त अन्त करण स० वि० १४४, अथर्व० १२ ५ ७ **इन्द्रियाणि**=चक्षुरादीनि धनानि वा १९ १२ ऐश्वर्यजनकानि सुवर्णादीनि २० ५८ **इन्द्रियाय**=धनायेन्द्रियवलाय वा १९ ३४ धनाय, प्र०—इन्द्रियमिति धननामसु पठितम् निघ० २ १०, १ १०४ ६ धनवर्धनाय १० १८ नेत्राद्यायाऽन्त करणाय वा १० २३ न्यायव्यवहारप्रकाशनायाऽन्यायाऽन्धकारनाशाय ऋ० भू० २२२ **इन्द्रिये**= मनसि श्रोत्रादौ वा ३ ४५ **इन्द्रियेण**=परमैश्वर्येण विज्ञानेन वा ऋ० भू० २१८ इन्द्रेण जीवेन जुष्टेन प्रीतेन वा १० २१ मनसा धनेन वा ७ २० **इन्द्रियेभ्यः**=कार्यसाधकतमेभ्य (श्रोत्रादिभ्य) ७ ६ **इन्द्रियैः**=इन्द्रस्य जीवस्य लिङ्गै २० ६१ [इन्द्रियमिति धन नाम निघ० २ १० इन्द्रप्राति० षष्ठीसमर्थात् 'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' अ ५ २ ९३ सूत्रेण लिङ्गादिष्वर्थेषु घच् प्रत्ययान्तो निपात्यते । प्राणा इन्द्रियाणि । ता० २ १४ २ जायमानो ह वै ब्राह्मण सप्तेन्द्रियाण्यभिजायते ब्रह्मवर्चसञ्च यशश्च स्वप्न

ईकारस्थाने इ १ १३४ २ [ईर गतौ कम्पने च (अदा०) धातोस्तुमर्थे कध्यै प्रत्यय । धातोरीकारस्य ह्रस्वश्छान्दस]

इरम्मदम् य इरयाऽन्नेन माद्यति हृष्यति तम् (सेनापतिम्) प्र०—'उग्रपश्येरम्मदपाणिन्धमाश्च' अ० ३ २ ३७ इति खश्प्रत्ययान्तो निपातित । [इरा अन्ननाम निघ० २ ७ तदुपपदे 'मदी हर्षे' (दिवा०) धातो 'उग्र पश्येरम्मद०' अ० ३ २ ३७ सूत्रेण खश्प्रत्ययान्तो निपात्यते]

इरस्य. प्राप्तु योग्य (विद्वज्जन) ७ ४० ६

इरस्या अन्नेच्छया ५ ४० ७ ['इरा' अन्ननाम निघ० २ ७ तत आत्मन इच्छाया क्यचि 'सर्वप्रातिपदिकेभ्यो लालसायामसुक्०' अ० ७ १ ५१ वा० सूत्रेणासुक् । 'अ प्रत्ययाद्' इत्यकारे प्रत्यये स्त्रिया टाप्]

इरा अन्नादिकम्, प्र०—इरेत्यन्ननामसु पठितम् निघ० २ ७, ५ ८३ ४ **इरायै**=अन्नादिवृद्धये ३० ११ [इण् गतौ (अदा०) धातो 'ऋज्रेन्द्राग्रवज्र०' उ० २ २८ सूत्रेण रन् प्रत्ययान्तो निपात्येत । एति गच्छति ययेति विग्रह । 'इरा' इत्यन्ननाम निघ० २ ७]

इरावत् अन्नाद्यैश्वर्ययुक्तम् (वर्त्ति =मार्गम्) ७ ४० ५ ['इरा' इत्यन्ननाम (निघ० २ ७), ततो भूम्नि मतुप्]

इरावती इरा प्रशस्तान्यन्नानि विद्यन्ते यस्या सा (पृथिवी=भूमिरन्तरिक्ष वा), प्र०—अत्र प्रशसार्थे मतुप् 'इरेत्यन्ननामसु पठितम् निघ० २ ७, ५ १६ **इरावतीम्**= इरा जलानि विद्यन्ते यस्यास्ताम् (वाचम्) ५ ६३ ६ **इरावतीः**=बह्वन्नादिसामग्रीस्ता (धेनव =वाण्य) ५ ६९ २ [इरावती नदीनाम निघ० १ १३ इरावती परुष्णीत्याहु नि० ९ २५ 'इरा' इत्यन्ननाम निघ० २ ७, ततो भूम्नि मतुप् । स्त्रिया ङीप्]

इरिणम् कम्पित जगत् १ १८६ ९ [इरित निर्ऋणम् । ऋणातेरपार्णं भवति, अपरता अस्मादोषधय इति वा नि० ९ ६ ऋ गतौ (भ्वा०) धातो 'अर्त्ते किदिच्च' उ० २ ५१ सूत्रेण 'इनन्' प्रत्यय किच्च । धातोरिचेकारादेश । ऋच्छन्ति गच्छन्ति यत्र यस्माद्वेति विग्रह]

इरिण्याय इरिणे ऊपरभूमौ साधवे (पुरुषाय) १६ ४३ [इरिण व्याख्यातम् । तत साध्वर्थे यत् प्रत्यय]

इरी प्रेरक (एवयामरुत्=विज्ञानवान् मनुष्य) ५ ८७ ३

इर्यम् प्रेरकम् (राजानम्), प्र०—अत्र वर्णव्यत्ययेन दीर्घेकारस्य ह्रस्व ५ ४८ ४ प्रेरणीयम् (परीक्षक जनम्) ६ ५४ ८ **इर्य.**=सन्मार्गे प्रेरक (अग्नि =यतमानो सन्यासी) ७ १३ ३ [ईर गतौ कम्पने च (अदा०) धातो कर्त्तरि बाहुलकादौणादिको यक् । धातोश्च छान्दस ह्रस्वत्वम् । इल प्रेरणे (चु०) धातोर्वा साधनीयम् । अन्यत्र कर्मणि ण्यत्]

इलयत गच्छत १ १९१ ६ [इल प्रेरणे (चुरा०) धातोर्लोट् । गुणाऽभावश्छान्दस]

इलीविशस्य इलाया पृथिव्या बिले गर्त्ते शेते तस्य वृकस्य प्र०—इलेति पृथिवीनामसु पठितम् निघ० १ १, इदमभीष्ट पद पृषोदरादिना सिध्यति 'इलीविशस्य इलाबिलशयस्य निरु० ६ १९, १ ३३ १२ [इला अन्ननाम (निघ० २ ७), तस्य बिलमुदकम् । उदकेऽन्न गुप्त विद्यते । तस्योदकस्य शय =शयनस्थान मेघ अथवा—इला पृथिवीनाम (निघ० १ १) तस्या बिलानि गुहास्थानानि, तेषु य शेते स इलाबिलशयो दस्यु । पृषोदरादित्वाद्रूपसिद्धि । इलीविश =इलाबिलशयस्य नि० ६ १९ इलीविश पदनाम निघ० ४ ३]

इलावान् बह्वन्नयुक्त (सभाध्यक्ष) ४ २ ५ [इला अन्ननाम निघ० २.७ ततो भूम्नि मतुप्]

इव यथा १२ ६ तद्वत् ७ ४० जैसे स० प्र० १५१, १० ४० २ समान स० प्र० २४७, ३४६ [इवेत्युपमार्थे नि० १ ४ इव इति पदपूरण नि० १ १० इव परिभयार्थे वा नि० ६.२८]

इषणत् इष्णाति प्राप्नोति ४ १७ १४ **इषणन्त**= इच्छन्तु १ १३४ ५ प्राप्नुवन्ति ४ २३ ६ **इषण:**=प्रेरय ४ २२ १०. प्रेरये ४ १६ ६ [इष आभीक्ष्ण्ये (क्र्या०) इष गतौ (दिवा०) धातोर्वा लेटि रूपम् । व्यत्ययेन शप् श्ना च]

इषणि एषणायाम् २ २ ६ [इषु इच्छायाम् (तुदा०) धातोर्बाहुलकाद् औणादिक क्युन् । अतलोपश्छान्दस]

इषण्य प्रेरय ३ ५० ३ **इषण्यत**=प्राप्नुवन्ति ५ ५२ १४ **इषण्यन्ति**=अन्नादिकमिच्छन्ति ५ ६ ६ [इषणप्राति० इच्छायामर्थे क्यच् । छान्दसत्वादल्लोप]

इषण्यन् आत्मन इषण प्रेरणमिच्छन्निव (विद्युद्रूपोऽग्नि) ३ ६१ ७ [इषणप्राति० आत्मन इच्छायामर्थे क्यच् । तत शतृ । अल्लोपश्छान्दस]

इषध्यै एष्टु ज्ञातुम् ७ ४३ १ [इष गतौ (दिवा०) धातोस्तुमर्थे कध्यै प्रत्यय:]

इषन्त प्राप्नुवन्तु १ १३४ ५ [इष गतौ (दिवा०)

१०६६ **इयक्षमाणम्**=अतिशयेन सङ्गच्छमानम् (पतिम्) १ १२३ १० [यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो सन्नन्ताच्छानच् । अभ्यासयकारस्य च लोपश्छान्दस]

इयक्षसि यष्टु सङ्गन्तुमिच्छसि ३ ३ ५५ सगच्छसे प्राप्नोषि वा ६ ४६ ४ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो सन्नन्ताल् लट् । अभ्यासयकारस्य लोपश्छान्दस]

इयत् प्राप्नुवन् (अग्ने=ई०, अग्निर्वा) ४ १६ एतावत् परिमाणम् (आयु) १० २५ [इण् गतौ (अदा०) धातो शतृप्रत्यय । 'इणो यण्' इति यणादेशो न भवति छान्दसत्वात् । यणभाव इयङ्]

इयत् एतावत् परिमाणम् (आयु) १० २५ **इयति**=एतावति (देवयजने=विदुषा पूजने) ३७ ५ [इदम् सर्वनाम्नो वतुप् । 'किमिदभ्या वो घ' अ० ५ २ ४० सूत्रेण घादेशे घस्येयादेशे 'इदकिमोरीश्की' इतीशादेशे 'यस्येति चे' ति लोप]

इयत्तिकः कुत्सित (कुपुम्भक =नकुल) प्र०—अत्र कन् प्रत्यय १ १६१ १५ [इयदिति व्याख्यातम् । तत स्त्रिया ङीपि कुत्सितार्थे कन् । 'केऽण' इति ह्रस्व]

इयत्तिका इयति प्रदेशे भवा बाला (शकुन्तिका=कपिञ्जली) १ १६१ ११ [इयदिति व्याख्यातम्, तत स्त्रिया ङीपि भवार्थे कन् । 'केऽण' इति ह्रस्वत्वम्]

इयत्यै सुखप्राप्तीच्छायै (विशे=प्रजायै) ७ ४२ ४ [इण् गतौ (अदा०) धातो शतृ+ङीप्]

इयध्यै एतु प्राप्तुम् ६ २० ८ [इण् गतौ (अदा०) धातोस्तुमर्थे कध्यै प्रत्यय । छान्दसत्वादियङ्]

इयन्ति एतावन्ति (सवना=कर्माणि) ६ २३ ४ [इयद् व्याख्यातम् । ततो नपुसके प्रथमाबहुवचने रूपम्]

इयर्त्ति प्राप्नोति ४ २१ ५ गच्छति ४ १७ १२ अर्पयति प्र०—अत्रान्तर्गतो णिच् ३३ ७८ उन्नयति ६ ४७ ३ जानाति १ ११३ १७ **इयर्मि**=गच्छामि १ ११६ १ प्राप्नोमि ४ ४२ ५ **इयर्षि**=प्राप्नोषि १२ १०७ [इयर्त्ति गतिकर्म निघ० २ १४ ऋ गतौ (जु०) धातोर्लट् । 'अर्त्तिपिपर्त्योश्च' इति श्लावभ्यासस्येत्वे 'अभ्यासस्यासवर्णे' इतीयङि पिनि गुणे च रूपम् । इयर्त्ति=इरयति नि० ९ ३]

इयात् प्राप्नुयात् १२ ६८ [इण् गतौ (अदा०) धातोर्लिङ्]

इयाते गच्छत ३३ ४४ [इण् गतौ (अदा०) धातोर्लट् । व्यत्ययेनात्मनेपदम् । इङ् गतौ (दिवा०) धातोर्वा-लट्]

इयानः प्राप्नुवन् (कर्मोपासनाज्ञानविज्जन) २ ३४ १४. सर्वाऽभीष्टाऽभिज्ञाना (राजा) प्र०—अत्रेड् गतौ, इत्यस्माच्छन्दसि लिट् अ० ३ २ १०५ इति लिट् 'लिट कानज्वा' अ० ३ २ १०६ इति कानच्, १.३० १४ **इयानाः**=प्राप्नुवन्त (विद्वज्जना) ७ २५ ५. गन्त्र्य (नाव) १० १६ अधीयमाना (जना) ७ ५२ ३ **इयानम्**=गच्छन्तम् (रथम्) ११८० १० [इङ् गतौ (दिवा०) धातोश्छन्दसि लिट कानच् । इङ् गतौ (दिवा०) धातोश्शानच् वा]

इयाम उल्लङ्घयेम त्यजेम ५ ५३ १४ **इयाय**=प्राप्नोतु ४ ४ ११ एति ७ ३३ १३

इयानासः प्राप्नुवन्त (मर्त्तास =मनुष्या) ५ २२ ३ [इङ् गतौ (दिवा०) धातो शानचि प्रथमाबहुवचने जसो ऽसुगागम]

इये प्राप्नुयाम्, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपद, लडर्थे लिट् च २ १७ ७ **इयेथ**=एषि ४ ६ १ [इण् गतौ (अदा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

इरज्यति ऐश्वर्य दातु सेवितु च योग्योऽस्ति, प्र०—इरज्यतीत्यैश्वर्यकर्मसु पठितम् निघ० २ २१, परिचरणकर्मसु च, निघ० ३ ५, १ ७ ६ **इरज्यथः**=ऐश्वर्ययुक्ता कुरुथ १ १५१ ६ [इरज्यति ऐश्वर्यकर्म निघ० २ २१ परिचरणकर्म निघ० ३ ५.]

इरज्यन् ऐश्वर्य कुर्वन् (अग्नि =अग्निवत्प्राप्तपुरुषार्थ जन) १२ १०६ [इरज्यति ऐश्वर्यकर्म (निघ० २ २१) धातो शतृ । इरज्यन्नग्ने प्रथयस्व जन्तुभिरिति । मनुष्या वै जन्तवो दीप्यमानो अग्ने प्रथयस्व मनुष्यैरित्येतत् श० ७ ३. १ ३२]

इरज्यन्त प्राप्नुवन्तु ७ २३ २ **इरज्यसि**=ऐश्वर्य प्राप्नोषि १ ५५ ३ [इरज्यति ऐश्वर्यकर्म (निघ० २ २१) धातोर्लङ् आडभावश्च । अन्यत्र लट्]

इरज्यन्ता ऐश्वर्य सम्पादयन्तौ (इन्द्राग्नी=वायु-विद्युतौ) ६ ६० १ [इरज्यति ऐश्वर्यकर्म (निघ० २ २१) धातो शतृ]

इरधन्त य इरान् इलान् प्रेरकान् दधति त इरधास्त इवाऽऽचरन्तु १ १२६ २ [इल प्रेरणे (चुरा०) धातोरिगुपधलक्षणे कप्रत्यये=इल । तदुपपदे दधाते क प्रत्यय । इरधप्राति० आचारे क्विपि धातोर्लङ्]

इरध्यै ईर्त्तु प्राप्तुम्, प्र०—अत्र वर्णव्यत्ययेन

शल्यस्तेजन पर्णानि ऐ० १ २५ इषवो वै दिद्यव श० ५ ४ २ २ इषु =पदनाम निघ० ५ ३]

इषवान् ज्ञानवान् (विद्वज्जन) १ १२६ ६. [इषति गतिकर्मा निघ० २ १४, ततो 'घनर्थे कविधानमि' ति कप्रत्यय । इष्यते यत् तद् इष ज्ञानम् । तन्तो मतुप् । इषवान्=अन्नवान् कामवान् वा नि० १०.४२]

इषव्यः इषुषु साधु (राजन्य'=राजपुत्र) २२ २२ [इषुप्राति० 'तत्र साधुरि' त्यर्थे यत्प्रत्यय]

इषः इच्छ ३ ३ ७ [इषु इच्छायाम् (तुदा०) धातोर्लोट् । 'इषुगमियमा छ' इति छत्व न भवति छान्दसत्वात्]

इष.स्तुतः अन्नादे स्तावक (रथस्पति =शिल्पी जन) ५ ५० ५ [इष-स्तुतपदयो समासे विभक्तेरलुक् । इष् इत्यन्ननाम । स्तुत ष्टुञ् स्तुती (अदा०) धातो कर्त्तरि वाहुलकाद् औणादिक क्त]

इषाण प्रापय कामय वा ३१ २२ स्वेच्छया निष्पादय तथा सर्वलोक, सर्वलोकसुख सर्वलोकराज्य वा मदर्थ कृपया सिद्ध कुरु ऋ० भू० १३४ [इष आभीक्ष्ण्ये (क्रया०) धातोर्लोटि मध्यमैकवचने 'हल श्न शानज्झौ' अ० ३ १ ८३ सूत्रेण हौ परत शानच्]

इषाय अन्नोत्पादकायाऽश्विनाय २२ ३१. [इषमित्यन्ननाम निघ० २ ७ इषु इच्छायाम् (तुदा०) धातो 'घनर्थे कविधानम्' इति कर्मणि क]

इषिलम् इष्टम् (केत =विज्ञानम्) २ ३८ ५. **इषितः**=प्रेरित (इन्द्र =विद्वज्जन) २० ८८ अन्वेषित (अग्नि =पावक) ३ ३ २ इच्छाप्रयुक्त (यजमान) ३ ४ ३ प्रापयितव्य (इन्द्र =परमेश्वर) १ ३ ५ इष्ट (होता=दातृजन) ७ ३९ १ **इषिता**=इषितावध्यापकोपदेशकौ ७ ३३ १३ प्रज्ञापकौ सन्तौ (इन्द्राग्नी=अध्यापकोपदेशकौ) ३ १२ १ प्रेषितौ प्रार्थितौ (इन्द्राग्नी=राजप्रजाजनौ) ७ ३१ **इषिताः** प्रेरिता (नाव) १ १८२ ६ [इष गतौ (दिवा०) धातो क्त प्रत्यय । इषु इच्छायाम् (तुदा०) धातोर्वा क्त । इडागमश्छान्दस । उभयत्र गुणाभावोऽपि छान्दसम् । इषित प्रेषित इति वा अधीष्ट इति वा नि० ८ ८]

इषितासः प्रेरिता सन्त (जना) ६ ४६ १०. [इषितशब्दस्य प्र० बहुवचने जसोऽसुकि रूपम्]

इषिधः इच्छाप्रकाशिका (इष =अन्नाद्या) ६ ६३ ७ [इषु इच्छायाम् (तुदा०) धातो 'इक् कृष्यादिभ्य' इति इक् । 'इषि' उपपदे दधाते. क्विप्]

इषिर ! इच्छो (इन्द्र =सभेश) १ १२९.१. **इषिरम्**=एष्टव्यम् (अग्नि=वह्निम्) ३ २.१४. गमनम् ५.३७.२ प्राप्तव्यम् (दक्ष =बलम्) ५ ६८ ४. **इषिरः**=येनेच्छन्ति स (वात =वायु) १८.४१ ज्ञानवान् (राजा) ६ २९ ३ सद्यो गन्ता (वात =वायु) ७ ३५ ४ गन्तव्य (विद्वान्) ५ ४१ १२ इच्छु (मित्र =सुहृज्जन) ३ ५ ८ **इषिरा**=गन्तारौ (अश्विना =विद्याध्यापकोपदेशकौ) ५ ७५ ५ **इषिराम्**=बहुपदार्थप्रापिकाम् (भूमिम्) ३ ३० ९ प्राप्नुवन्तीम् (पत्नीम्) ५ ३७ ३ वर की इच्छा करने वाली हृदय को प्रिय स्त्री को स० वि० १०५. ५ ३७ ३ प्राप्तव्याम् (स्वधाम्=अन्नम्) १ १६८.९. **इषिराः**=ज्ञानवन्त (देवा =विद्वास) २ २६ १ गन्तार (देवा =विद्वास सैनिका) ३ ५६ ८ **इषिरैः**=प्राप्तै (वेगादिगुणै) ६ ६२ ३ [इषिर, इषिरेणेत्येतौ पदनाम्नौ, निघ० ४ १ इषु इच्छायाम् (तुदा०) 'इषिमदिमुदि०' उ० १ ५१. सूत्रेण किरच् प्रत्यय । इषिरेण=ईषणेन वेषणेन कर्षणेन वा नि० ४ ७ इषिर इति क्षिप्र उत्तेतत् श० ६ ४ १ १०]

इषिरेभिः इष्टै (केतैभि =प्रज्ञाभि) ३ ६० ७ [इषिर इति व्याख्यानम् । ततो भिस् । 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

इषुकारम् य इषून् बाणान् करोति तम् (शिल्पिजनम्) ३० ७. [इषूपपदे डुकृञ्करणे धातोरण् प्रत्यय]

इषुकृतेव बाणीकृताविव (अध्यापकोपदेशकौ) १ १८४ ३]

इषुकृद्भ्यः बाणनिर्मापकेभ्य. (जनेभ्य) १६ ४६ [इषूपपदे डुकृञ् करणे (तना०) धातो क्विप् कर्त्तरि]

इषुधिमते प्रशस्तेषुधिवर्त्ते (राजजनाय) १६ २१ प्रशस्तशस्त्राऽस्त्रकोशाय १६ ३६ [इषूपपदे दधाते 'कर्मण्यधिकरणे च' अ० ३ ३ ६३ सूत्रेण कि । ततो मतुप् प्रत्यय]

इषुधिः इषवो धीयन्ते यस्मिन् स (तूणीर) १६ १२ [इषूपपदे दधाते 'कर्मण्यधिकरणे च' इति किरधिकरणे । इषुधि =इषूणा निधानम् नि० ९ १३ इषुधि =पदनाम निघ० ५ ३]

इषुध्यति इषून् धरति ५ ५० १ याचते शरान् धरति वा २२ २१ शरादीनि शस्त्राणि धरेत्, प्र०—लेट् प्रयोगोऽयम् ११ ६७ शरान् धारयेत् ४ ८ [इषुध

धातोर्लङ् । विकरणव्यत्ययेन श आत्मनेपदञ्च । आड-भावोऽपि छान्दस]

इषम् इष्यते या सत्क्रिया ताम्, प्र०—अत्र 'कृतो बहुलम्' इति कर्मणि क्विप् १ १२ ११ अन्न विज्ञान वा ७ ४८ ४ अन्नाद्यैश्वर्यम् ४ १६ २१ अन्नादिपदार्थसमूहम्, प्र०—इषमित्यन्ननामसु पठितम् निघ० १ ७, १ १६ अभीष्टमन्नम् ३ ४६ इच्छामन्न वा ७ ३६ २ उत्तमगुण-सम्पादकमन्नाद्यौषधसमूहम् १ ४६ ६ विज्ञानम् ३५ १६ विज्ञान धन वा ७ ८ ७ इष्टामिच्छा वा २ ३४ ८ विद्या-योगज बोधम् १ १७१ ६ प्राप्तिम् १.१७७ ५ इच्छासिद्धिम् १६ ३८ इष्ट सुखम् १ १८४ ६ प्राप्तव्य सुख १ १८० १० प्रेरणम् १ १७८ ५ शास्त्रविज्ञानम् १ १७४ १० **इषः**=इष्यन्ते यास्ता सेना, प्र०—अत्र 'कृतो बहुलम्' इति वार्त्तिकेन कर्मणि क्विप् १ ९ ८ विद्यासिद्धयो या इष्यन्ते ता क्रिया १ ३ १ अन्नादीनीच्छा वा ६ ६६ १ विज्ञानानि ३ ५४ २२ अन्नादिसामग्री ६ १ १२ इच्छा ३ ३० ११ अन्नाद्यान्योषधिगणान् ३ ६२ १४ ज्ञातव्या प्रजा १ १८१ ६ एष्टव्या रथ्या १ १३० ३ प्राप्तव्यान् रसान् ६ ३५ ४ इष्टसाधका किरणा १ ८६ ५ इष्यतेऽसावा-श्विनो मास १४ १६ **इषा**=इष्यते ज्ञायते येन तदिट् ज्ञान तेन, प्र०—'इष गतौ' इत्यस्य क्विबन्तस्य रूपम् 'कृतो बहुलम्' इति करणे क्विप् २ १८ इष्टविद्यया-ऽन्नादिना वा ४ १ इच्छयाऽन्नेन वा निमित्तेन ३४ ४८ स्वेच्छया १ ११७ १ उत्तमाऽन्नादिसमूहेन १ ८८ १ **इषाम्**=सर्वैर्जनैर्यानीष्यन्ते तेषाम् (रयीणाम्) ३ १३ **इषे**=अन्नविज्ञानयो प्राप्तये, प्र०—इषतीति गतिकर्मसु पठितम्, निघ० २ १४ अस्माद्धातो क्विपि कृते पदमिद सिध्यति, अन्व०—अन्नायोत्तमेच्छायै १ १ वृष्ट्यै ३३ ११ इच्छापूर्त्तये १ ७१ ८ अन्नरूपायै राज्यलक्ष्म्यै १ ५० ११ आश्विनाय ७ ३० इच्छासिद्धयेऽन्नप्राप्तये वा ७ २१ १० उत्तम अन्न के लिए आर्याभि० २ ३१, ३८ १४ [इषु इच्छायाम् (तुदा०) इष गतौ (दिवा०) धातोर्वा कर्मणि 'कृतो बहुलमि' ति क्विप् । इषम् अन्ननाम निघ० २ ७ इषा अद्भि सह नि० १० २६ प्रजा वाऽ इष । श० १.७ ३ १४ अन्न वाऽ इषम् कौ० २८ ५ अय वै लोक इषमिति । ऐ० ६ ७]

इषयते इषमन्न विज्ञान वा कामयमानाय (मर्त्याय=मनुष्याय) ६ १६ २५ [इषमित्यन्ननाम (निघ० २ ७), तत 'तत्करोति तदाचष्टे' इति णिजन्ताच्छतृ]

इषयध्यै इषयितु गमयितुम् १ १८३ ३ गन्तुम् ६ ६४ ४ [इष गतौ (दिवा०) धातोर्णिजन्तात् तुमर्थे कध्यै प्रत्यय । गुणाभावश्छादस]

इषयन् प्रापयन् (विद्वज्जन) ६ १ २ **इषयन्तम्**=प्राप्नुवन्त गच्छन्त वा (सज्जनम्) ६ १८ ५ प्रापयन्तम् (पावकमग्निम्) ६ १ ८ **इषयन्तः**=प्राप्नुवन्तो प्रापयन्तो वा (सिन्धव=नद्य) ४ ४६ ४ इषमन्न कामयमाना (सज्जना) ६ १६ २७ [इष गतौ (दिवा०) धातोर्णि-जन्ताच्छतृ । गुणभावश्छान्दस । अन्यत्र—इषमित्यन्ननाम, ततो 'तत्करोति तदाचष्टे' इति णिचि शतरि च रूपम्]

इषयन्त प्राप्नुयु २ २ ११ एषयन्ति प्राप्नुवन्ति, प्र०—अत्र लडि 'वा छन्दसि सर्वे विधयो भवन्ति' इति गुणाऽभावोऽडभावश्च १ ७७ ४ [इष गतौ (दिवा०) धातोर्णिजन्ताल् लङ् । गुणाभाव आडभावश्च छान्दसौ]

इषयन्ती सुख प्रापयन्त्यौ (रोदसी=द्यावापृथिव्यौ) ४ ५६ ४ **इषयन्तीः**=इषमन्न कुर्वन्त्य (विदुष्य) ३ ३३ १२ [इषमित्यन्ननाम (निघ० २ ७) तत 'तत्करोति-तदाचष्टे' इति णिचि शतरि स्त्रिया ङीपि च रूपम्]

इषयुः इष्यते सर्वैर्जनैर्विज्ञायते यत्तद्याति प्राप्नोतीति (विद्वज्जन) प्र०—अत्र इषधातो 'घञर्थे कविधानमि'ति क तस्मिन्नुपपदे या धातोरौणादिक कु १ १२० ५ [इष गतौ (दिवा०) धातोर् 'घञर्थे क विधानमि' ति क । इषोपपदे या प्रापणे (अदा०) धातोर् औणादिक कुप्रत्यय]

इषये विज्ञानायाऽन्नाय वा ६ ५२ १५ [इष गतौ (दिवा०) धातो 'इक् कृष्यादिभ्य ' अ० ३ ३ १०८ वा सूत्रेण इक् प्रत्यय]

इषयेम प्राप्नुयाम १ १८५ ९ [इष गतौ (दिवा०) धातोर्णिचि लिङि च रूपम् । गुणाऽभावश्छान्दस]

इषवः बाणा १६ ६४ बाणाद्या शस्त्रविशेषा २९ ४८ शस्त्राऽस्त्राणि १६ ६६ प्राप्ता सेना १७ ४३ गतय १३ ७ **इषवे**=इष्णात्यभीक्ष्ण हिनस्ति शत्रून् येन तस्मै (भा०—शस्त्राऽस्त्राय) १६ १ **इषुम्**=प्राप्ति-साधनमिच्छाविशेष वा १ ६४ १० [ईष गतिहिंसादर्शनेषु (भ्वा०) धातो 'ईषे किच्च' उ० १ १३ सूत्रेण उ प्रत्यय । स च किन्, धातोरिकारादेशश्च । ईषति गच्छति हिनस्ति वा शत्रूनिति विग्रह । इषु इच्छायाम् (तुदा०) इष गतौ (दिवा०) इष आभीक्ष्ण्ये (क्र्या०) धातुभ्यो वा साधनीयम् । इषु =ईषतेर्गतिकर्मणो वधकर्मणो वा निरु० ९ १८ वीर्य वाऽइषु श० ६ ५ २ १० चतु सन्धिर्हीषुरनीक

इष्टयजुषः इष्टानि यजूंषि यस्य तस्य (वीरगृहपते) ८.१२ [इष्ट-यजुष्पदयोर्बहुव्रीहि । विभक्तिव्यत्ययश्च]

इष्टयः इष्टप्राप्तय ६ ७४ १ सत्सङ्गतय १ १४५ १ **इष्टये**=विद्यासङ्गतये २७ ३३ अभीष्टसिद्धये १ ५७ २ यजन्ति सङ्गच्छन्ते यस्मिन् यज्ञे तस्मै, प्र०—अत्र वाहुलकादौणादिकस्ति प्रत्यय किच्च १ ११३ ५ इष्टरूपायै (महीयै=नीतये) १ ११३ ६ इष्टसुखप्राप्तये ५ ७८ ३ इष्टसुखाय १ ११२ १ अभीष्टसुखाय २७ २७ **इष्टिभिः**=होमैरिव सत्कारै २ १ ६ **इष्टिः**=यजनक्रिया ४ ४ ७ **इष्टे !**=पूजितु योग्य (विद्वज्जन), प्र०—अत्र सज्ञाया क्तिच् १ १४३ ८ **इष्टे.**=इष्टस्य गृहाश्रमस्य स्थानात् १ १२५ ३ **इष्टैः**=सगन्तु प्राप्तुमर्हैं (मेघजलै) ४ ५५ ६ **इष्टौ**=यजने सङ्गतिकरणे २ २८ ७ विज्ञान-वर्द्धके यज्ञे ६ ११ ३ इष्टसाधिकाया नीतौ १ ६२ ३ गन्तव्यायाम् (सदने=आकाशे) १ १४८ ३ [इष्टि =यज्ञ-नाम, निघ० ३ १७ यज देवपूजासगतिकरणदानेपु (भ्वा०) धातो क्तिन् स्त्रियां, सज्ञाया क्तिच् वा । इषु इच्छाया वा धातो 'मन्त्रेवृषेष०' अ० ३ ३ ९६ सूत्रेण क्तिन्]

इष्टरश्मिः इष्टा सयोजिता रश्मयो येन (प्राप्त-विज्ञानो जन) १ १२२ १३ [इष्ट-रश्मिपदयोर्बहुव्रीहि । इष्ट =यज सगतिकरणे (भ्वा०)+क्त । रश्मि =अशूङ् व्याप्तौ (स्वा०) धातो 'अश्नोते रश्च उ० ४ ४६ सूत्रेण मि, धातोश्च रशादेश]

इष्टव्रताः इष्टकर्माण (विद्वज्जना) ३ ५९ ९ [इष्ट-व्रतपदयो समास । इष्ट व्याख्यातम् । व्रतमिति कर्मनाम निघ० २ १]

इष्टापूर्त्ते इष्ट च पूर्त्त च ते १८ ६१ इष्ट श्रौत कर्म च पूर्त्त स्मार्त्त कर्म च ते १८.६० इष्ट सुख विद्वत्सत्करणमीश्वराराधन सत्सङ्गतिकरण सद्विद्यादिदानञ्च, पूर्त्तं पूर्णं वल ब्रह्मचर्य विद्याऽलङ्करण पूर्णं यौवन पूर्णं साधनोपसाधनञ्च ते १५ ५४ [इष्ट-पूर्त्तपदयोर्द्वन्द्वसमासे पूर्वपदस्य दीर्घ । इष्टम्=यजदेवपूजासगतिकरणदानेषु (भ्वा०) धातो क्त. । पूर्त्तम्=पॄ पालनपूरणयो (जु०)+धातो क्त]

इष्टाऽश्वः इष्टा सङ्गता अश्वा यस्य स (प्राप्तविद्यो जन) १ १२२.१३ [इष्ट-अश्वपदयोर्बहुव्रीहि । इष्टाश्वपदे व्याख्याते]

इष्णन् अभीक्ष्णमिच्छन् (इन्द्र =पुरुषार्थी सभेश) २ २० ५ प्राप्नुवन् (इन्द्र =राजा) ४ १७ ३ [इष आभीक्ष्ण्ये (क्र्या०) धातो. शतृ]

इष्णानः अभीक्ष्ण निष्पादयन् शोधयन् (सभाध्यक्ष.) १ ६१.१३. [इष आभीक्ष्ण्ये (क्र्या०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

इष्णासि अभीक्ष्ण प्राप्नोपि गच्छसि वा १ ६३ २ [इष आभीक्ष्ण्ये (क्र्या०) धातोर्लट्]

इष्मिणम् इष्मो वहुविधो विद्यते यस्य तम् (पितर=जनकम्) ५ ५२ ६ **इष्मिणः**=प्रशस्तविज्ञानगतिमन्तः (मनुष्या) १ ८७ ६ वहुविधमिष्म इच्छा येषान्ते (विद्वद्राजजना) ५ ८७ ५ इच्छाऽन्नादियुक्ता (युद्धविद्या-कुशला जना) ७ ५६ ११. [इषु इच्छायाम् (तु०) धातो. 'इषि युधीन्धि०' उ० १.१४५ सूत्रेण मक् प्रत्यये–'इष्म'। ततो मत्वर्थे इनि. । इष्मिण =ईषणिन इति वा, एषणिन इति वा, अर्षणिन इति वा नि० ४ १६ इष्मिण. पदनाम निघ० ४ १]

इष्यत प्राप्नुत २६ २२. विजानीत १ १५ ९ **इष्यति**=गच्छति १ ३४ १० **इष्ये**=प्राप्नोमि ४ ३३ १ [इष गतौ (दिवा०) धातोर्लोट् । अन्यत्र लट् । 'इष्ये' प्रयोगे व्यत्ययेनात्मनेपदम्]

इष्यन् जानन् (सभाध्यक्ष) १ ६१ १२ [इष गतौ (दिवा०) धातो शतृ]

इष्वै गन्त्र्यै (शूरवीरायै राज्ञ्यै) ६ ७५ १५ [इष गतौ (दिवा०) धातो 'इषे किच्च उ' उ० १ १३ सूत्रेण उ । स्त्रियां चतुर्थ्या एकवचने रूपम् । 'ङिति ह्रस्वश्च' अ० १ ४.६ सूत्रेण पक्षे नदीसज्ञकत्वेन न गुण]

इह अस्मिन् वर्त्तमाने काले १९ ५९ अस्मिन् ससारेऽस्मत्कुले वा २ ३३ अस्मिन् ससारे वर्त्तमानसमये वा २५ २० अस्मिन् स्थाने १ १२ ३ अस्या प्रजायाम् ७ ३६ अस्मिन् राज्यकर्मणि १७ ६६ एतेषु (जनेषु) ३ २१ अस्या शिल्पविद्यायामस्मिन् गृहे वा १ १३ १० एतस्मिन् व्यवहारे १ २२ १२ इस स्थान मे स० वि० १३८, अथर्व० १४ २ २९ इसी जन्म मे आर्याभि० २ ४५, ३४ ३८ [इदम्सर्वनाम्न सप्तम्यन्ताद् 'इदमो ह' अ० ५ ३ ११ सूत्रेण ह. प्रत्यय । 'इदम इश्' अ० ५ ३ ३ सूत्रेण इदम इशादेश । 'तद्धितश्चासर्वविभक्तिरि' त्यव्ययसज्ञा]

इहि एति २२ १९ प्राप्नुहि ६ ५४ ६ जानीहि प्राप्नुहि वा ४ २० गच्छ १.१० ४. गच्छति, प्र०—अत्र व्यत्यय ५ ८३ ६ प्राप्नुहि प्रापयति वा १ ९ अ. प्राप्नुयात्

शरधारणे (कण्ड्वादि०) धातोर्लट् । इषुध्यति=याच्ञा-कर्मा नि० ३ १९ इषुधिप्राति० 'सर्वप्रातिपदिकेभ्य इत्येके' इति क्विपि लटि रूपम्]

इषुध्यते इषुध इवाऽऽचरति तस्मै (जनसमूहाय) १ १२८ ६ [इषूपपदे दधाते कप्रत्यये=इषुध । तदिवाचरतीति क्यङ् आचारेऽर्थे]

इषुध्यवः य इषुभिर्युध्यन्ते (शिल्पिनो विद्वज्जना) ५ ४१ ६ [इषूपपदे युध सम्प्रहारे (दिवा०) धातोर्बाहुलकादौणादिको युक् प्रत्यय । पृषोदरादिना रूपसिद्धि]

इषुध्येव इषवो धीयन्ते यस्या तयेव १ १२२ १ [इषुधिपद व्याख्यातम्]

इषुबलाः इषुभि शस्त्राऽस्त्रै बल सैन्य वा येषान्ते (राजजना) ६ ७५ ९ [इषु-बलपदयो समास]

इषुम् बाणम्, प्राप्तिसाधनम्, इच्छाविशेष वा १ ६४ १० बाणाऽऽवलिम्, भा०—शस्त्रम् १६ ३ [इषुरीषतेर्गतिकर्मणो वधकर्मणो वा नि० ९ १८ इष गतौ (दिवा०) धातो 'इषे किच्च उ' उ० १ १३. सूत्रेण उ प्रत्यय किच्च । इष्यति गच्छति सग्रामे शत्रु प्रतीति विग्रह]

इषुमते प्रशस्ता इषवो बाणा विद्यन्ते यस्य तस्मै वीराय (जनाय) १६ २९ **इषुमन्तः**=बाणवन्त (शिल्पिनो वीरजना वा) ५ ५७ २ **इषुमद्भ्यः**=बहव इषवो विद्यन्ते येषान्तेभ्य (सैनिकेभ्य) १६ २२ **इषुमान्**=बाणवान् (वीर =शुभगुणेषु व्यापनशीलो जन) २ ४२ २ [इषु व्याख्यातम् । ततोऽतिशायने भूम्नि वा मतुप्]

इषुयते इषुरिवाऽऽचरति १ १२८ ४ [इषु व्याख्यातम् । तदिवाचरतीत्याचारे क्यङ्]

इषुहस्तेन इषव शस्त्राणि हस्तयोर्यस्य तेन (इन्द्रेण=पराक्रमाऽऽढ्येन सेनापतिना) १७ ३४. **इषुहस्तैः**=शस्त्रपाणिभि सुशिक्षितैर्बलिष्ठैर्भृत्यै १७ ३५ [इषु-हस्तपदयो समास]

इषे इच्छापूर्त्तये १ ७१ ८ अन्नाय १ १८० २ [इष् इत्यन्ननाम । इषु इच्छायाम् (तुदा०) धातो क्विप् सम्पदादित्वाद् भावे]

इषे प्राप्तुम् ६ १३ २ [इष गतौ (दिवा०) धातोस्तुमर्थे के प्रत्यय]

इष्कर्त्तारम् निष्कर्त्तार ससाधकम् (प्रचेतस=प्रकृष्टप्रज्ञ पुरुषम्) प्र०—अत्र छान्दसो वर्णलोप इति नलोप १२ ११० [निस् उपपदे डुकृञ् करणे (तना०) धातोस्तृच् कर्त्तरि । 'छान्दसो वर्णलोप' इति नकारलोप । इष्कर्त्तारमध्वरस्य प्रचेतसमिति । अध्वरो वै यज्ञ । प्रकल्पयितार यज्ञस्य प्रचेतसमित्येतत् । श० ७ ३ १ ३३]

इष्कृतिः निष्कर्त्री (ओपधि) १२ ८३ [निसुपपदे करोतेर्धातो स्त्रिया क्तिन् । 'छान्दसो वर्णलोप' इति नलोप]

इष्टकानाम् इज्यन्ते सगम्यन्ते कामा यै पदार्थैस्तेषाम् १३ ३१ **इष्टकाम्**=इष्ट कर्म यस्यास्ताम् १४ ११ **इष्टकाः**=इष्टसुख साधिका (धेनव) १७ २ वेद्या चिता ३५ ८ **इष्टके**=इष्टकेव शुभैर्गुणै सुशोभिते, अ०—इष्टकावद् दृढागे (देवि=देदीप्यमाने स्त्रि) १३ २१ [यज देवपूजादिषु (भ्वा०) धातोर्बाहुलकादौणादिक क्त । तत 'सज्ञाया कन्' अ० ५ ३ ८७ इति सूत्रेण कन् । इषु इच्छाया धातोर्वा क्तप्रत्यये कन् । तद् यदिष्टात्समभवस्तस्मादिष्टका श० ६ १ २ २२ तद् यदस्माऽइष्टे कमभवत्तस्माद्वेवेष्टका श० ६ १ २ २३ अस्थीनि वा ऽ इष्टका श० ८ ७ २ १० अहोरात्राणि वा ऽ इष्टका श० ९ १ २ १८]

इष्टनिः इच्छाविशिष्ट (विद्वज्जन) प्र०—अत्रेषधातोर्बाहुलकादौणादिकोऽनि प्रत्ययस्तुगागमश्च १ १२७ ६ यष्टु योग्य (विद्वज्जन) १ १२७ ६ [इषु इच्छायाम् (तुदा०) धातोर्बाहु० औणा० अनि प्रत्ययस्तुगागमश्च]

इष्टम् येन इज्यते तम् (अग्निम्) १ १६२ १५ ब्रह्मोपासन सर्वोपकारक यज्ञाऽनुष्ठान च ऋ० भू० १०५, अथर्व० १२ ५ १० सुख तत्साधन वा १८ ५७ अभीप्सितम् (अश्वम्) २५ ३७ **इष्टः**=सत्कृत आहुतिभिर्वर्धितो वा (अग्नि =सभाध्यक्षो विद्वान् पावको वा) १८ ५७ कृत (यज्ञ) १८ ५६ सङ्गन्तुमर्ह (वनस्पति =पिप्पलादि) २१ ५८ **इष्टानि**=सुखसाधनानि कर्माणि १७ २६ सङ्गतानि (तत्त्वानि) १ १६४ १५ **इष्टे**=सङ्गन्तव्ये (व्यवहारे) ६ ८ ७ **इष्टौ**=पूजनीयौ (मातापितरा=जनकजनन्यौ) ४ ६ ७ इष्टम्=यज्ञ करना और कराना । स० वि० १४५, अथर्व० १२ ५ १० [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो क्त । इषु इच्छाया (तुदा०) धातोर्वा 'मतिबुद्धिपूजार्थेभ्यश्च' अ० ३ २ १८८ सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद् वर्तमानेऽपि क्त । इष्टानि कान्तानि वा, क्रान्तानि वा, गतानि वा, मतानि वा नतानि वा नि० १० २६]

१ ४ ३ ५ मनुष्यो वाऽईडेन्या श० १ ५ २.३. ईडेन्यो ह्येष श० १ ४ १ २९]

ईड्यम् उत्तमैर्गुणैः प्रशसनीयम् (अग्निम्) ६.१५ २ अध्यन्वेषणीयम् (विद्युदाख्य वह्निम्) ३.६ ८ प्रशसितु-मर्हम् (सोम=सोमाद्योपधिगणम्) २८ २६ **ईड्यः**= अध्येष्टव्य (अग्नि=ईश्वरो भौतिकोऽग्निर्वा) १ १२ ३ नित्य स्तोतव्योऽन्वेष्टव्यश्च (अग्नि=परमेश्वरो भौतिको वा) १ १ २ उपासितुमध्येपितु वाऽर्हं (अग्नि) ३ १५. स्तोतुमन्वेष्टु वा योग्य (अग्नि=राजा सेनेशो वा) ७ १५ १० भा०—पूजाऽर्हं (अग्नि=ईश्वरो भौतिको वा) ४ १६ स्तोतव्य उपास्य (ईश्वर) ऋ० भू० ७८ स्तुति के योग्य (ईश्वर) आर्याभि० १ ४ प्रशसनीय गुण-कर्म-स्वभावयुक्त (सभापति राजा) स० प्र० १८३, अथर्व० ६ १० ८९ १ प्रशसनीय (विद्वान्) ५ २२ १ ईडितु स्तोतुमध्येपितु योग्य (घर्म=अग्निहोत्रादिको यज्ञ) १७ ५५ **ईड्या.**=अध्येपितु योग्या (विद्युदादय) १ १४ ८ [ईड स्तुतौ (अदा०) धातोर्ण्यत् । ईड्य=ईडि-तव्य नि० ८ ८ वन्दितव्य नि० ७ १६ ईड्य इति यज्ञिय इत्येतत् श० ९ २ ३ ९]

ईदृक्षासः एतल्लक्षणसहिता (मनुष्या.) १७ ८४ [इदमुपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो 'दृशे क्सश्च वक्तव्य' अ० ३ २ ६० वा० क्स प्रत्यय ।'दृक्षे चेति वक्त-व्यम्' अ० ६ ३ ९० वा० सूत्रेणेदम ईशादेश]

ईदृङ् अन्येन तुल्य (अ०—पुरुष) १७ ८१ [इदमुपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो 'त्यदादिपु०' इति क्विन् । 'इदकिमोरीश्की' अ० ६ ३ ९० सूत्रेण इदम ईशादेश । 'क्विन् प्रत्ययस्य कु' इति कुत्वम्]

ईदृशे ईदृग्लक्षणे (सङ्ग्रामादिव्यवहारे) ३३ ६१ ईदृग्व्यवहारे ६ ४५ ५ [इदमुपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो त्यदादिपु दृशो०' अ० ३ २ ६० इति कञ् । 'इद-किमोरीश्की' अ० ६ ३ ९० सूत्रेण ईशादेश]

ईधिरे प्रदीपयन्ति ५ २५ २ प्रदीपयेयु ३ २९ १५ [ञिइन्धी दीप्तौ (रुधा०) धातो सामान्ये लिट् । 'इन्धि-भवतीभ्याञ्च' अ० १ २ ६ सूत्रेण कित्वे 'अनिदिताम्' नलोपो गुणाऽभावश्च । 'लिटस्तझयोरेश्इरेच्' इति झस्येरेच्]

ईधे प्रदीपये १२ २० प्रदीपयति ६ १६ १४ प्रापयति ६ १६ १५ प्रदीप्यताम् ११.३४ प्रदीपयेत्, प्र०—अत्र 'लोपस्त आत्मनेपदेपु' इति तकारलोप ११.३३ दीपयति प्र०—अत्र लडर्थे लिट् 'इजादेश्च गुरुमतो०' अ० ३ १.३६ इति प्रतिपेधादाङ्निपेध 'इन्धिभवतीभ्याञ्च, अ० १ २.६ इति लिट कित्वाद् 'अनिदिताम्०' इति नलोपो गुणा-ऽभावश्च १ ३६.११ [ञिइन्धी दीप्तौ (रुधा०) धातो सामान्ये लिट्]

ईन्धे प्रकाशित करता हूँ स० वि० १८६, २० २४ [ञिइन्धी दीप्तौ (रुधा०) धातोर्लट् । छान्दस धातोर्दीर्घ-त्वम्]

ईम् जलम् ५ ५४ ४ जलमग्नि वा, प्र०—ईमित्युदक-नामसु पठितम् निघ० १ १२, पदनामसु च निघ० ४ २ अनेन शिल्पविद्यासाधकतमावेतौ गृह्येते १.९ २ जल पृथिवी च १.४ ७ ज्ञातव्य प्राप्तव्य परमेश्वर विद्युद्रूपमग्नि वा १ ६५ ३ विज्ञानमुदक वा १ ६७ ४. एव १ ३८ ११ जलमन्न पृथिवी वा १ ५.१ २ दुग्धम् २ ३५ १३ प्रदातारम् (अग्निम्=सभाध्यक्षम्) १.३६ ७ प्राप्तम् (पेयपदार्थम्) ५ १ ३ प्राप्तव्यम् (इन्द्र=अग्निम्) १ ८७ ५ प्राप्तव्यया (इपा=इच्छया) १ १२९ ७ प्रत्यक्ष, सर्वत १ १६७ ८ शास्त्रबोधम् १.११६ १२ महान्तम् (पुरुपम्) ४ १७.४ विद्याम् ५ २ ५ प्राप्त वस्तु ६ १७ २ प्राप्तव्यो विजय १.८१ १ समुच्चये २३ ५५ जलेन २ २२ १ उदक सर्वान् पदार्थान्वा ५ ३७ ३ सर्वा क्रियाम् १ १६४ ३२ विजय-प्रापिका सेवा १.७१ ४ प्राप्तव्यान् बोधान् १ ६७ २ सततम् ३ ३० १६ अभिगताम् (विद्याम्) १ १२७ ७. सर्वम् ४ १७ १७ शब्द को प० वि०, सब प्रकार की स० वि० १०५, ५ ३७ ३ सर्वत ६ ३ ६ [ईम् उदकनाम निघ० १ १२ पदपूरण नि० १ ९ ईम् पदनाम निघ० ४ २.]

ईमहे याचामहे, प्र०—इमह इति याच्ञाकर्मसु पठितम् निघ० ३ १९, १ १० ६ व्याप्नुयाम् ६ १७ प्राप्नुयाम ७ ५४ १ विजानीम., प्र०—अत्र 'ईङ् गतौ' इत्यस्मात् 'बहुल छन्दसि' इति शपो लुकि श्यनभाव १ ६ १० प्राप्नु-याम जानीम वा ५ ८२ ३ प्राप्नुम १.१७ ३ जानीम १४० १ दूरीकुर्महे ७ ५८ ५ [ईमहे याच्ञाकर्मा निघ० ३ १९ ईङ् गतौ (दिवा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुकि श्यन् न भवति]

ईयचक्षसा ईय प्राप्तव्य ज्ञातव्य वा चक्षोर्दर्शन कथन च ययोस्तौ (मित्रा=सखायौ) ५ ६६ ६ [ईङ् गतौ (दिवा०) धातोर् बाहुलकादौणादिको यक् प्रत्यये ईयम् । चक्षस्-चक्षिङ् व्यक्ताया वाचि, दर्शनेऽपि (अदा०) धातोर-

३ ५७ प्राप्नोति १ १५ [इण् गतौ (अदा०) धातोर्लोटि मध्यमैकवचने रूपम्]

इहेव यथाऽस्मिन् स्थाने तथा १ ३७ ३. [इह-इव-पदयो समास । इह पद व्याख्यातम्]

इहेह अस्मिन् जगति, प्र० अत्र वीप्साया द्वित्वम्, प्रकर्षद्योतनार्थम् ११८१४ अस्मिन्नस्मिन् व्यवहारे २३ ३८ अस्मिन् ससारे व्यवहारे च १९६ ['इह' पद व्याख्यातम् । तस्य वीप्साया द्वित्वम्]

इहेहमातरा इहेह माता जननी ययोस्तौ (भ्रातरा=बन्धू) ६ ५९.२ [इहेह-मातृपदयो समास]

ई उदकम्, प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति मलोप १ १०३ १ ईम् उदकनाम निघ० १ १२ पदनाम निघ० ४.२]

ईक्षते देखता है स० वि० २५४, अथर्व० ९.६ ३ **ईक्षध्वम्**=सम्प्रेक्षध्वम् ५ ३४ **ईक्षन्ताम्**=प्रेक्षन्ताम् ३६.१८ **ईक्षन्ते**=आलोकन्ते १७ ६८ **ईक्षामहे**=पश्येम ३६.१८ **ईक्षे**=पश्यामि ४ २० ८. [ईक्ष दर्शने (भ्वा०) धातोर्लेटि लोटि च रूपाणि । ईक्षे पदनाम निघ० ४ ३ ईक्षे ईशिषे नि० ६ ६]

ईक्षमाणाय दर्शकाय (मनुष्याय) २२ ८ [ईक्ष दर्शने (भ्वा०) धातो शानच्]

ईक्षयत् दर्शयेत् १.१३२ ५ ईक्ष दर्शने (भ्वा०) धातोर्णिजन्ताल् 'लिडर्थे लेट्' इति लेट्]

ईक्षिताय अन्येन दृष्टाय (जीवाय) २२ ८. [ईक्ष दर्शने (भ्वा०) धातो क्तप्रत्यये चतुर्थ्येकवचनम्]

ईङ्खयन्ति खेदयन्ति निपातयन्ति १ १९ ६ [ईखि गतौ धातोर्णिचि लटि च रूपम् । ईङ्खते गतिकर्मा निघ० २ १४.]

ईजते दूरीकरोति ६.६४.३. कम्पते ५ ४८.२. [ईज गतिकुत्सनयो (भ्वा०) धातोर्लट्]

ईजे सङ्गच्छते ६.३ २. यजामि ६.१६ ४. सङ्गच्छे ६ १ ९ [यज देवपूजासगतिकरणदानेपु (भ्वा०) धातो सामान्ये लिट् । 'असयोगाल् लिट् कित्' इति कित्वे यजादि त्वात् सम्प्रसारणम्]

ईजानम् यज्ञ कुर्वन्तम् (पुत्रम्) १ १२५ ४ **ईजानस्य**=यज्ञकर्त्तु. (मर्त्यस्य=साधारणमनुष्यस्य) ६ ४८ २०. **ईजान:**=यजमान (सत्पुरुष) ७ ५९ २ **ईजानाय**=सङ्गन्तु शीलाय (पुरुपाय) १.११३ २० [यज देवपूजासङ्गतिकरणदानेपु (भ्वा०) धातो 'छन्दसि लिट्' अ० ३.२.१०५ सूत्रेण लिटि 'लिट कानज्वा' अ० ३ २.१०६ सूत्रेण कानचि सम्प्रसारणे द्वित्वे च रूपम्]

ईट्टे ऐश्वर्यं प्रयच्छति ७ २४ ५. ऐश्वर्यं लभते ४ २५ १ अधीच्छति ४ २५ ३ स्तौति ११८० २ ऐश्वर्यवान् भवेत् ३ ५२ ५ ऐश्वर्ययुक्त करोति ५ १२ ६ ऐश्वर्यहेतु विदधाति १८५ १८ [ईड स्तुतौ (अदा०) धातोर्लट् । ईश ऐश्वर्ये (अदा०) धातोर्वा साधनीयम्]

ईडत स्तुत १ ९६ ३ स्तुति करो आर्याभि० १ ४०, ऋ० १ ७ ३ ३ **ईडते**=स्तुवन्ति गुणै ,प्रकाशित कुर्वन्ति ५ ८ ३. स्तुवन्ति अध्येपन्ति वा ११५ ७ प्रशसन्ति ७ ४४ ४ स्तुवन्त्यन्विच्छन्ति वा ७ १० ५ **ईडिष्व**=प्रशसाऽध्यन्विच्छ वा ६ ६० १० **ईडीत**=प्रशस्येत् ५ २१ ४ प्रशसत ६ १६ ४६ **ईडे**=स्तौमि प्राप्नोमि ४ ३३ १. स्तुवे, याचेऽधीच्छामि प्रेरयामि वा १ १ १ अध्येषयामि स्तौमि वा ३ १ १५ अध्यन्विच्छामि १३ ४३ गुणै प्रशसामि ७ ५३ १ अधीच्छामि ५ ६० १ सत्कुर्याम् १ ४४ ४ मैं स्तुति करता हूँ आर्याभि० १ २, ऋ० १.१ १ १ [ईड स्तुतौ (अदा०) धातोर्लोट् लट् वा । ईळते याचन्ति स्तुवन्ति वर्धयन्ति पूजयन्तीति वा नि० ८ १ ईळे=याचामि । ईळिरध्येषणाकर्मा पूजाकर्मा वा नि० ७ १५]

ईडान: स्तुवन् (वह्नि=विद्वज्जन) २७ १४ **ईडानाय**=स्तुवते (सज्जनाय) २ ६ ६ [ईड स्तुतौ (अदा०) धातो शानच्]

ईडाना प्रशसन्ती (घृताची=रात्रि) ५ २८ १ [ईड स्तुतौ (अदा०) धातो शानच् प्रत्यये स्त्रिया टापि च रूपम्]

ईडितम् प्रशस्तम् (इन्द्र=राज-राजपुरुपम्) २८ ३ **ईडित:**=प्रशसितगुण (सज्जन) ७ ७ ३ मनुष्यैरध्येपितोऽधिष्ठित (अग्नि=भौतिक) १ १३ ४ विद्यामभीप्सुभि: सम्यगध्येपितव्य (अग्नि=प्रत्यक्षोऽग्नि) २ ३. [ईड स्तुतौ (अदा०) धातो. क्त.]

ईडिता प्रशसितौ (होतारौ=स्त्रीपुरुपौ) ५.५ ७. [ईड स्तुतौ (अदा०) धातो कर्त्तरि तृच्]

ईडेन्यम् प्रशसनीयम् (विद्वज्जनम्) ७ २ ३ स्तोतुमर्हम् (वलम्) २८.२६ **ईडेन्य:**=अन्वेपणीय (अग्नि=पावक) १५ ३६ ईडितु प्रशसितुमर्ह (अग्नि=महाविद्वान्) ३ २७ १३ स्तोतु योग्य (विद्वान्) १ ७९ ५ [ईड स्तुतौ (अदा०) धातो 'कृत्यार्थे तवैकेनुकेन्यत्वन' अ० ३ ४ १४ सूत्रेण केन्य. प्रत्यय । वाग्वाऽ ईडेन्या श०

(इन्द्रम्=ईश्वरम्) १ ११ ८ रचने समर्थ परमेश्वर तन्मध्यस्थविद्यासाधक वायु वा १ ५ २ निर्मातारम् (इन्द्र=परमात्मानम्) ७ ३२.२२ सर्वस्य जगत. स्वामिनम् (ईश्वरम्) ३६ ८ ऐश्वर्ययुक्तम् (कपर्दिनम्=ब्रह्मचारिण विद्वज्जनम्) ६ ५५ २ ईशनशीलम् (परीक्षक जनम्) ६.५४ ८ ईषणशीलम् (सूनु=सत्पुत्रम्) ७.७ ७ ईष्टेऽसावीशान सर्वजगत्कर्त्ता तम् (जगदीश्वरम्) ऋ० भू० ८८ सर्वस्या सृष्टेर्विधातारम् (परमात्मानम्) १ ८८ ५ ईशन उत्पादन करने की इच्छा करने वाले सब जगत् के स्वामी (ईश्वर) को आर्याभि० २ ५०, २५ १८ **ईशानः**=ऐश्वर्यवान्, ऐश्वर्यहेतु, सृष्टे कर्त्ता प्रकाशको वा (इन्द्र.=ईश्वर सूर्यो वा) १ ७ ८ अधिष्ठाता (पुरुष =ईश्वर) ३१ २ पूर्णसामर्थ्य (सेनापति) १ ८७.४. समर्थ (सज्जन.) २ २४ १५ साधक समर्थ (अग्नि =विद्वज्जन) १५ ३५. शक्तिमान् (विद्वान्) १ १३० ६ अधिपति (इन्द्र.=सभाध्यक्ष) १ ६१ १५. ईषणशील सर्वस्येश्वर' (परमेश्वर.) ऋ० भू० १२० ईशनकर्त्ता अर्थात् ईश्वरता करने वाला, सब से बडा और प्रलयोत्तरकाल मे रहने वाला (ईश्वर) आर्याभि० १ २८, ५ ८ १७ ४१ **ईशानाय**=समर्थाय जनाय २४.२८ [ईश ऐश्वर्ये (अदा०) धातोस्ताच्छीलिकश्चानश् । आदित्यो वा ऽ ईशान आदित्यो ह्यस्य सर्व स्येष्टे श० ६ १ ३ १७ एतान्यष्टौ (रुद्र, सर्वशर्व, पशुपति. उग्र, अशनि, भव, महान्देव, ईशान) अग्निरूपाणि । कुमारो नवम श० ६ १ ३ १८. स ह स (असु) ईशानो नाम । स दशधा भवति । स एष एतस्य (आदित्यस्य) रश्मिरसुर्भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थित जै० उ० १.२६ ३ यदीशानोऽन्न तेन की० ६ ८.]

ईशानकृत् य ईशानानीशच्छीलान् पुरुषार्थिन करोति (जगदीश्वर) २ १७ ४ ईशानानैश्वर्यवत करोतीति (इन्द्र =सभाध्यक्ष) १ ६१.११ **ईशानकृतः**=य ईशानान् ऐश्वर्ययुक्तान् कुर्वन्ति ते (वायव) १ ६४ ५ [ईश ऐश्वर्ये (अदा०) धातोस् ताच्छीलिकश्चानश् । ईशानोपपदे डुकृञ् करणे धातो क्विप्]

ईशाना प्रभवित्री (उषा) १ ११३ ७ [ईश ऐश्वर्ये (अदा०) धातोर्लट । शानचि स्त्रिया टापि रूपम्]

ईशाना समर्थौ (मित्रावरुणौ=अध्यापकोपदेशकौ) ५ ७१ २ [ईश ऐश्वर्ये (अदा०) धातो शानच् । 'सुपा सुलुग्' इत्याकार]

ईशानासः ऐश्वर्ययुक्ता (विद्वज्जना) १ १४१ ३ समर्था. स्वामिन' १.७३ ६. [ईश ऐश्वर्ये (अदा०) धातोस्ताच्छीलिकश् चानश् । ततो जसोऽसुगागम']

ईशायै ययैश्वर्यं प्राप्नोति तस्यै (क्रियायै) २१.५७ [ईश ऐश्वर्ये (अदा०) धातोर् औणादिकोऽन् प्रत्यय, ततष्टाप्]

ईशिरे ऐश्वर्यं प्राप्नुवन्ति ५.५८ १ [ईश ऐश्वर्ये (अदा०) धातोर्लिटि प्रथमबहुवचनम्]

ईशिषे इच्छसि ४ ५२ ३ ईश्वरो भवसि ६ ४१.३. ऐश्वर्यवान् भवे. २ ३६.१ ऐश्वर्यं करोषि १ ७०.५ ऐश्वर्यं विदधासि ५ ८१ ५ ईशन करोषि २ २४.१ ईशोऽसि, भा०—स्वामी भवसि १७ ७१ समर्थोऽसि २.१६ ६ **ईशीत**=समर्थो भवेत् ४ १५.५. **ईशीय**=ईश्वर' समथ भवेयम् ७ ३२.१८ **ईशे**=ईष्टे, प्र०—अत्र सर्वत्रैकपक्षे 'लोपस्त आत्मनेपदेषु' इति तलोपोऽन्यत्रोत्तमपुरुषस्यैकवचनम् ३ १६ १ ईष्टे ऐश्वर्यं करोति ४ १२ ३. ईश्वरो भवति ४ २१ ४ इच्छामि ६.५१.८. ईष्टे ज्ञातुमिच्छति ७ ४ ६ रचना करता है स० वि० ५, २३.४३ ऐश्वर्ययुक्तो भवति १ ७१.६ समर्थो भवामि ३ ३२. ईष्टे, प्र०—अत्र 'लोपस्त आत्मने०' इति तलोप २०.३२ [ईश ऐश्वर्ये (अदा०) धातोर्लट् । 'ईश. से' अ० ७ २ ७७ सूत्रेणेडागम । 'ईशीय' प्रयोगे लिङ् । 'ईशे' इत्यत्र 'लोपस्त आत्मनेपदेषु' सूत्रेण तलोप.]

ईषते गच्छति १ १२४ ६ प्राप्नोति प्र०—ईषतीति गतिकर्मा निघ० २ १४, ६ ४२ ३ हिनस्ति ५.८३ २. युद्धमिच्छेत् १ ८४ १७ अभिगच्छति ५ ६७ ५. पश्यन्ति १ १४१.८ ईषधु =प्रापयितुमिच्छतम् १.११२ १६ **ईषन्ते**=हिंसन्ति ६ ६६ ४. [ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लट् । ईषते भीत. पलायते नि० १०.११ ईषति गतिकर्मा निघ० २.१४]

ईषमाणः ऐश्वर्यं कुर्वन् (प्रजाजन) प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १ १७१ ४ **ईषमाणाः**=गच्छन्त (ऊर्मय = उदकतरङ्गा) ४ ५८.६ भयात् पलायमाना (मृगा) १७.६४ [ईष गतिहिंसादर्शनेषु (भ्वा०) धातो शानच्]

ईषा हिंसक. (इन्द्र =ऐश्वर्यवाग्राजा) ३.५३.१७. [ईष गतिहिंसादर्शनेषु (भ्वा०) धातोरिगुपधलक्षण क प्रत्यय । 'सुपा सुलुग्०' इत्याकार]

ईषुः इच्छन्तु ३ १ २ **ईषे**=इच्छामि ५ ४६.१ **ईष्टे**=ईषण करोति ५ ८७ ३. [ईष गतिहिंसादर्शनेषु

सुन् प्रत्ययः। तयो समास]

ईयतुः प्राप्नुत ३ २ ९ गच्छत. ३ ३ ६७ **ईयते**=गमयति १ ३० १६ गच्छति १ १४१ ८ गम्यते २१ ५५ प्राप्नोति १ ४८ ५. **ईयथुः**=प्राप्नुयातम्, प्र०—अत्र पुरुषव्यत्यय ५ ७३ ४ **ईयन्ते**=प्राप्यन्ते ५ ५५ १ **ईयसे**=प्राप्नोषि गच्छसि वा ५ ३ ८ विज्ञायसे विज्ञायते वा ४ ३२ व्याप्नोपि ६ १५ ६ **ईयुः**=प्राप्नुयुर्गच्छेयुर्वा ७ १८ १० यन्ति ३४ ४५ प्राप्नुवन्ति १ १६४ ८ [इण् गतौ (अदा०) धातोर्लिटि प्रथमद्विवचनम् ईयसे, ईयते=ईङ् गतौ (दिवा०) धातोर्लट्]

ईयमानम् गच्छन्तम् (रथम्) ५.३०.१. **ईयमानाः**=प्राप्नुवन्त (परमाणव) ५ ४७ २ [ईङ् गतौ (दिवा०) धातो शानच्]

ईयिवांसम् प्राप्नुवन्तम् (सिह=व्याघ्रम्) ३ ९ ४ [इण् गतौ (अदा०) धातो क्वसु प्रत्यय । 'उपेयिवाननाश्वाननूचानश्च' अ० ३ २ १०९ सूत्रेण द्वित्वेऽभ्यासदीर्घत्वम् इडागमश्च निपात्यते । 'इणो यण्' इति यणादेश]

ईयुषीणाम् अतीतानाम् (उषसाम्) १ १२४ २ गच्छन्तीनाम् (सूर्यकान्तीनाम्) १ ११३ १५ [इण् गतौ (अदा०) धातोर्लिट क्वसु । 'उपेयिवान्०' इति निपातनाद् अभ्यासदीर्घत्वम् इडागमश्च । 'वसो सम्प्रसारणम्' इति सम्प्रसारणम्]

ईरताम् प्राप्नुवन्तु ४ ८ ७ प्राप्नुवन्ति २९ १२ उत्कृष्टतया जायन्ते ५ २५ ७ गच्छन्ति कम्पन्ते वा ५ ६३ ४ प्रेरयन्तु १ १२३ ६ **ईरते**=प्राप्नुयु १ १८७ ५ प्राप्नुवन्ति ७ ५६ १४ गच्छन्ति प्राप्नुवन्ति १ ५२ १ कम्पयन्ति गच्छन्ति वा ५ ८३ ३ **ईरय**=गमय १ ४८ २ प्रेरयत ५ ४२ ३ नियोजय ८ १९. प्रेरय १४ ८ **ईरयथ**=प्रेरयथ ५ ५५ ५ **ईरयध्वम्**=प्रापयत ४ ३४ २ **ईरयन्ति**=प्रेरणा करते है ५ २० २ **ईरयस्व**=प्रापय ७ ५ ८ प्रेरणा कर स० वि० १७०, अथर्व० १४ २ २८ **ईरयामि**=प्रेरयामि २ ३३ ८ [ईर गतौ कम्पने च (अदा०) धातोर्लोट् लट् च । 'वहुल छन्दसी' ति शपो लुङ् न । अन्यत्र ईर क्षेपे (चुरा० पर०) धातो रूपाणि]

ईरयध्यै प्रेरितुम् ४ २ १ [ईर क्षेपे (चुरा०) धातोस्तुमर्थे अध्यै प्रत्यय]

ईरयन्ती सद्य प्रेरयन्ती (उपा) १ ११३ १२ [ईर क्षेपे (चुरा०) धातो शत्रन्तात् ङीप्]

ईरिरे प्रेरयन्ति ३ ११ ९ प्राप्नुवन्ति ३ २९ १५. [ईर गतौ कम्पने च (अदा०) धातोर्लिट् । झस्येरेच्]

ईर्ध्वम् कम्पध्वम् १ ११३ १६ [ईर गतौ कम्पने च (अदा०) धातोर्लोट्]

ईर्म प्राप्तव्य ज्ञातव्य वा (वपु=सुरूपम्) ५ ७३ ३ प्रेरक (सज्जन) ४ २७ २ [ईर गतौ कम्पने च (अदा०) धातोर्वाहुलकादौणादिको मक्। ईर्म इह, ऋणे, अस्मिन् लोक इति वा। ईर्म इति वाहुनाम समीरिततरो भवति नि० ५ २५]

ईर्मान्तासः कम्पनान्ता (अश्वा=अग्न्यादय) १ १६३ १० ईर्म प्रेरित स्थितिर्येपान्ते, भा०—प्रेरणामनुगन्तार (अश्वा) २९ २१ [ईर क्षेपे (चुरा०) धातोर्वाहुलकादौणादिको मन् प्रत्यय । ईर्म=क्षेपोऽन्तो येषामिति समास । ईर्मान्तास=समीरितान्ता नि० ४ १३ ईर्मान्तास पदनाम निघ० ४ १]

ईर्यतायै कम्पनाय ३० ८ [ईर गतौ कम्पने च (अदा०) धातोर्वाहुलकादौणादिको यक्। ईर्य शब्दात् भावे तल्, ततष्टापि चतुर्थ्यां रूपम्]

ईवत् गतिरक्षणवत् (नम=अन्नम्) ५ ४९ ५
ईवतः गच्छत (उद्यमिनो जनस्य) ७ ५६ १८ वहुगतिमत (द्यून्=प्रकाशान्) ४ ४३ ३ प्रशस्तगमनकर्त्तु (सेनापते) ४ १५ ५ सामीप्ये गच्छत (राजपुरुषस्य) ७ २३ १ **ईवते**=उपगताय (जनाय) ६ ७३ २ विद्याव्याप्ताय (ब्रह्मणे=वेदविज्जनाय) ४ ४ ६ [ई गतिप्रजनादिपु (अदा०) धातो गतरि छान्दस रूपम्]

ईशत ईष्टा समर्थो भवतु, अ०—उत्पद्यताम्, भा०—प्रवलो भवेत्, प्र०—अत्र लोडर्थे लङ् 'बहुल छन्दसि' इति शपो लुगभाव १ १ समर्थयन, प्र०—अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च १ २३ ९ विघ्नानामीश्वरो भवेत् ६ ७१ ३ अ०—हन्तु समर्थो भवेत् ११ समर्थो भवतु १ ३६ १६ समर्थो भवेत्, प्र०—अत्र विकरणव्यत्ययेन श २ ४२ ३ [ईश ऐश्वर्ये (अदा०) धातोर्लोट् । 'वहुल छन्दसी' ति शपो लुङ् न]

ईशः करुणामय (ईश्वर) आर्याभि० १ ४१, १ ७ ९ ७ [ईश ऐश्वर्ये (अदा०) धातोरिगुपधलक्षण क प्रत्यय]

ईशा ईश्वरेण सकलैश्वर्यसम्पन्नेन सर्वशक्तिमता परमात्मना ४० १ [ईश ऐश्वर्ये (अदा०) धातो कर्त्तरि क्विप्]

ईशानम् ईष्टे कारणात् सकलस्य जगतस्तम्

उक्थवाहसा प्रशसितविद्याप्रापकौ (इन्द्राग्नी=विद्युद्विद्याविद्विद्वांसौ) ६ ५६ १० [उक्थोपपदे वह प्रापणे (भ्वा०) धातोर्णिजन्ताद् असुन् । उक्थ व्याख्यातम्]

उक्थशसिनः वेदप्रकाशकरणशीलान् (सज्जनान्) ६.४५ ६ [उक्थोपपदे शसु स्तुतौ (भ्वा०) धातोस्ताच्छील्ये णिनि]

उक्थशासः य उक्थाना प्रशसनीयाना मन्त्राणामर्थाञ्छासन्ति ते (नर=विद्वासोऽध्यापका) ७ १६ ६ ये योगाऽभ्यास विहाय उक्थानि वचनानि शसन्ति तेऽर्थात् शब्दार्थयो खण्डने रता (अब्रह्मविदो जना) १७ ३१ य उक्थानि वक्तु योग्यानि वचनानि शसन्ति (पितर=जनकादय) १६ ६६ प्रशसितशासना (पितर=जनका) ४ २ १६ केवल विपय भोगो के लिए ही अवैदिक कर्म करने मे लगे हुए (मनुष्य लोग) आर्याभि० २४४, १७ ३१.

उक्थशासा=उक्था उक्ता शासा शासनानि ययोस्तौ (वाय्वग्नी) २ ३६ १ [उक्थोपपदे शासु अनुशिष्टौ (अदा०) धातोरण् प्रत्यय । उक्थ-शासपदयो समासो वा (शासु धातोर्घञ्) अथवा उक्थोपपदे शसु स्तुतौ (भ्वा०) धातो साधनीयम्]

उक्थशुष्मा: उक्थानि उक्तानि शुष्माणि बलानि याभिस्ता (गिर=वाच) ६ ३६.३ [उक्थ-शुष्मपदयो समास । शुष्मम्=बलनाम निघ० २ ९.]

उक्थाऽर्का उक्थानि प्रशसितानि वचनान्यर्काणि पूजनीयानि च ६ ३४ १ (उक्थ-अर्कपदयो समास । अर्क पदनाम निघ० ४ २ अर्चपूजायाम् (चु०) धातो क औणादिक]

उक्थाव्यम् प्रशसाऽर्हाणि स्तोत्राणि शस्त्रविशेषाणि वा तस्य तमिव मेनापतिम्, भा०—सुशिक्षित शस्त्राऽस्त्रपरमप्रवीणम् ७ २२

उक्थाशस्त्राणि उक्थानि च तानि शस्त्राणि च, प्र०—अत्र 'अन्येपामपि०' इति पूर्वपदस्य दीर्घ १६ २८ [उक्था-शस्त्रपदयो समास]

उक्थिनम् प्रशस्तोक्थवाक्यजन्यबोधनिष्पादितम्, भा०—विद्यासुशिक्षायुक्ता वाचम् (भक्ष्याद्यन्वित भोज्यमन्नरसादिकम्) २० २६ उक्थानि वक्तु योग्यानि प्रशस्तानि वचनानि यस्य तम्, भा०—धर्मसुशिक्षाप्रकाशकम् (इन्द्र—वीरम्) २८ ३३ बहून्युक्थानि वक्तु योग्यानि वेदस्तोत्राणि विद्यन्ते यस्य तम (आप्त विद्वासम्) ३ ५२.१ **उक्थिनः**=गुणप्रशसका (राजप्रजासज्जना.) ३ १२ ५ [वच परिभाषणे (अदा०) धातोस्थक् प्रत्यय । ततो मत्वर्थे इनि प्रत्यय]

उक्थेऽउक्थे वक्तु योग्ये योग्ये व्यवहारे १२.२७ धर्म्यं उपदेष्टव्ये व्यवहारे व्यवहारे ७ २६ २ [उक्थशब्दस्य वीप्साया द्विर्वचनम्]

उक्थेभिः स्तोत्रै, प्र०—अत्र 'बहुल छन्दसि' इति भिस स्थान ऐसभाव १ २ २. प्रशसकै (वचनै.) ५ ४५ ४ सुष्ठूपदेशै २ ११.१६ वेदस्तोत्रैरधीतवेदाप्तोपदिष्टवचनैव १ ४७ १० प्रशसनीयै. स्तुतिसाधकैर्वेदविभागैर्मन्त्रै. ३३.७६ [उक्थम्=वच परिभाषणे (अदा०) धातोस्थक् प्रत्यय]

उक्थ्यम् उक्थेषु प्रशसनीयेषु भवम् (सुप्रवाचन=अध्यापनमुपदेशनम्) १ १०५.१२ उक्थेषु वक्तु योग्येषु भवम् (अशम्) २.१३ १ उच्यते प्रशस्यते यत्तस्मै हितम् (वाजम्) १ ४८.१२ प्रकृष्ट विद्यावच १ १०५.१३ उक्थेषु प्रशसनीयेषु साधुम् (मन्त्रम्) ३४ ५७. प्रशसितम् (वच·) ५ ३८ २ प्रशसितु योग्यम् (अग्नि=विद्युदादिरूप वह्निम्) ३.२६ २ प्रशसनीय कर्म ४ ३६ ४. वक्तु श्रोतु योग्यम् (तोकम्) १ ६४ १४ वक्तु श्रोतु योग्येषु ऋग्वेदादिषु भवम् (मन्त्रम्) १ ४० ५ **उक्थ्यः**=प्रशसितो योग्यो विद्वान् ३ १० ६ यानि विद्यासिद्ध्यर्थं वक्तु वाचयितु वाऽर्हाणि तत्र साधु (इन्द्र=अग्निर्विद्युत्सूर्यो वा, वरुण=जल वायुश्चन्द्रो वा) १ १७ ५ **उक्थ्यैः**=उचन्ति सर्वा विद्या येषु तै (व्यवहारै) ३ ५.२. [उक्थम्=वच परिभाषणे (अदा०) धातोरौणादिकस्थक् । तत 'तत्र साधु' 'तत्र भवे' वार्थे यत् । उक्थ्यम् प्रशस्यनाम निघ० ३.८ वक्तव्यप्रशसनम् नि० ११ ३१ अन्न वा उक्थ्यम् गो० पू० ४ २० पशव उक्थ्यानि कौ० २१ ५. यज्ञिय वै कर्मोक्थ्य वच ऐ० १ २९ उक्थ्या वाजिन गो० उ० १ २२.]

उक्षण· बलप्रदान् (वीरान्) १.१३५ ९ सेचकान् (विदुषो जनान्) ५ ५२ ३ **उक्षणः**=सेचका (सज्जना.) ६ १६ ४७ सुखसेचका (देवा=विद्वज्जना) ३ ७ ७ सेचनकर्त्तार (सत्वान=प्राणिन) १ ६४ २ सेचनसमर्थान् (वीरजनान्) १.१३५ ९ मधुरैरुपदेशै सेचमाना. (वाच) ५ २७ ५ जलस्य सुखस्य वा सेक्तारो महान्त (अग्निपवनमेघादय) प्र०—उक्षा इति महन्नाम निघ० ३ ३, १ १०५.१० सेक्तार (वृपभा) २० ७८ वृषभान् १ १६८ २ [उक्ष सेचने (भ्वा०) धातो 'श्वन्नुक्षन्पूषन्०' उ० १ १५९ सूत्रेण कनिन् प्रत्यय । उक्षण=उक्षतेर्वृद्धिकर्मण, उक्षन्त्युदकेनेति वा । उक्षण एतान् माध्य-

(भ्वा०) धातोर्लिट् सामान्ये। व्यत्ययेन परस्मैपदम्। धातूनामनेकार्थत्वाद् इच्छार्थेऽपि। 'ईष्टे' प्रयोग ईश ऐश्वर्ये (ग्रदा०) धातोरपि सिध्यति]

ईहे ऐश्वर्ययुक्त करोति ५ १२ ६ स्तौति १ १८० २ ऐश्वर्यहेतु विदधाति १ ८४.१८. [ईह चेष्टायाम् (भ्वा०) धातोर्लेटि रूपम्]

उ वितर्के १७ ९७ समुच्चये १२ ५८ उत्तमे २१ ५ निश्चयार्थे ३३ ८१ पादपूरणार्थे १ ६१ १४ प्रसिद्धार्थे १७ २० ग्राकाङ्क्षायाम् १ ६१ १३ ग्रद्भुते ७ २० २ ग्राश्चर्ये ३ ५७ ४ ग्रच्छे प्रकार स० प्र० ११०, १ १७६ १ निश्चय ही ग्रार्याभि० २४३, ३४१ एव ३२४ [उ विनिग्रहार्थे, पदपूरण नि० १ ५]

उक्तः कथित (होता=होतृजन) ४ ४१ १. **उक्ताः**=निरूपिता (भा० —पश्वादिपालनमार्गा) २४ १७ कथिता (सचरा.=पशव) २४ १५ ब्रूञ् व्यक्ताया वाचि (ग्रदा०) धातो क्त। 'ब्रुवो वचिरि' ति वच्यादेशे 'वचिस्वपि०' इति सम्प्रसारणम् वच परिभाषणे (ग्रदा०) धातोर्वा क्त]

उक्तिम् स्तुति को स० प्र० २४८, ४० १६ [ब्रूञ् व्यक्ताया वाचि (ग्रदा०) धातो क्तिन् स्त्रियाम्। धातोश्च वच्यादेश]

उक्थपत्रः उक्थानि वक्तु योग्यानि वेदस्तोत्राणि पत्राणि विज्ञागमकानि यस्य स (घर्म=यज्ञ) १७ ५५ [उक्थ-पत्रपदयो समास। उक्थम्=वच परिभाषणे (ग्रदा०) धातो 'पातृतुदिवचि०' उ० २ ७ सूत्रेण थक्। पत्रम्=पत्लृ गतौ+ष्ट्रन् करणे]

उक्थभृतम् य ऋग्वेद विभर्त्ति (ग्राप्त विद्वासम्) ७ ३३ १४ [उक्थ व्याख्यानम्। तदुपपदे डुभृञ् धारणपोषणयो (जु०) धातो क्विप्। तुगागम.]

उक्थम् शास्त्रप्रवचनम् १ ८६ ४ वक्तु योग्य स्तोत्रम् प्र०—ग्रत्र 'पातृतुदि०' उ० २.७ ग्रनेन वचधातोस्थक् प्रत्यय. १ १० ५ वक्तु योग्य शास्त्रम् ४ १६ २ वक्तुमर्हम् (ग्राज्य=घृतम्) १५ १० प्रशसनीय वचन कर्म वा १ १०० १७. वाच्यम् (विदवचनम्) १५ १२ उच्यन्त ईश्वरगुणा येन तादृक्समूहम् १ ८ १०. वेदविद्या १.१० ६ १४ उपदेष्टु योग्यम् (कर्म वचन वा) १५ ११ प्रशसितम् (वच) ५ ३९ ५ **उक्थस्य**=प्रशसितस्य कर्मण ६ ४४ ६ **उक्थानाम्**=स्तोत्र-विशेषाणाम् १६ २५ **उक्थानि**=वक्तु योग्यानि वचनानि २ ८ ५ प्रशसनीयानि कर्माणि ७ ५६ २३ **उक्थाय**=प्रशसिताय (जनुषे=जन्मने) ५ ४५ ३ **उक्थे**=श्रोतु वक्तुमर्हे वा (वचने) ६ २३ १ वक्तव्ये ४.२० १० **उक्थेन**=प्रशसनीयेन (वाहसा=प्रापणेन) २६ ८ **उक्थेभ्यः**=प्रशसनीयेभ्यो वेदोक्तेभ्य कर्मभ्य ७.२२ **उक्थेषु**=प्रशसितेषु धर्म्येषु कर्मसु ५ ६ ६ वक्तु श्रोतुमर्हेषु वेदविभागेषु १५ ४३ प्रशसनीयेषु व्यवहारेषु ३ ३३ ८ **उक्थैः**=वेदविद्याजन्यैरुपदेशै ५.४५ १ तद्गुणप्रशसकैर्वचोभि ७ ३४ १६ परिभाषितोपदेशै १ ७१ २ वक्तुमर्हैर्वेदितव्यैर्वेदवचनै ६ १३ ४ कीर्त्तनीयैर्वचनै ६ १ १० वेदस्थै स्तोत्रै ६ ६९ ३ प्रशसितैर्गुणै ६ १६ १५ **उक्था**=उक्थानि परिभाषितुमर्हाणि वेदस्थानि सर्वाणि स्तोत्राणि ग्र०—स्तुतिसाधकानि, प्र०—'पातृतुदिवचि०' उ० २ ७ ग्रनेन वचधातो स्थक् प्रत्ययस्तेनोक्थस्य सिद्धि 'शेश्छन्दसि बहुलम्' इति शेर्लुक् १ ५ ८ प्रशस्तानि विज्ञानानि १ १७३ ६ प्रशसनीयानि वस्तूनि ४ २२ १ प्रशसनीये (रजसी=द्यावापृथिव्यौ) ४ ४२ ६ वक्तु योग्यानि वेदस्तोत्राणि वचनानि वा १ ५४ ७ वक्तु श्रोतुमर्हाणि (प्रवचनानि) ६ ६७ १० प्रशसनै ४ ३३ १० प्रशसनीयानि वचनानि ७.१९ ६ उचितानि (सख्या=कर्माणि भावा वा) ४ ३ ४ उक्तानि वक्तव्यानि ६ २९ ४ [वच परिभाषणे (ग्रदा०) धातो 'पातृतुदिवचि०' उ० २ ७ सूत्रेण थक् प्रत्यय। उक्थम् प्राण उ ऽएवोक्तस्यान्नमेव थ तदुक्थम् श० १० ४ १ २३. एष (ग्रग्नि) उ ऽएवोक्तस्यैतदन्न थ तदुक्थम् श० १० ४ १ ४ ग्रग्निर्वा ऽउक्तस्याहुतय एव थम् श० १० ६.२ ८ ग्रादित्यो वा उक्। तस्य चन्द्रमा एव थम् श० १० ६ २ ६ प्राणो वा ऽउक्तस्यान्नमेव थम् श० १० ६ २ १० (देवा. सोम) उक्थैरुदस्थापयन्। तदुक्थानाम् उक्थत्वम् तै० २ २ ८ ७ (वागिति) एतदेषा (नाम्ना) उक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्ति श० १४ ४ ४ १ वागुक्थम् ष० १ ५ ग्रन्नमुक्थानि कौ० ११ ८, १७ ७ प्रजा वा उक्थानि तै० १ ८ ७ २ पशव उक्थानि ऐ० ४ १, १२ गो० उ० ६ ७ तै० १ ८ ७ २ पशवो वा उक्थानि कौ० २८ १०, २९ ८ ष० ३ ११ तै० १ २ २ २ ता० ४ ५ १८ विडुक्थानि ता० १८ ८ ६ ऐन्द्राग्नानि ह्युक्थानि श० ४.२ ५ १४ (देवा) ग्रन्तरिक्षमुक्थेन (ग्रभ्यजयन्) ता० ९ २ ९ ग्रपच्छिदिव वा एतद् यज्ञकाण्ड यदुक्थानि ता० ११ ११ २ यदुक्थानि भवन्त्यनुसन्तत्या एव ता० १८ ८ ६ (तमेतम् पुरुषम्) उक्थमिति बह्वृचा (उपासते) एष हीदꣳ सर्वमुत्थापयति श० १० ५ २ २०.]

शत्रूणा हनने कठिनस्वभाव (इन्द्र=सेनापते) ७ २५ १ वाणादियुक्त (सैनिक) ३ ४६ २ **उग्रम्**=उत्कृष्टम् (शर्म=गृहम्) २६ १६ उत्कृष्टस्वभावम् (इन्द्र=विद्वासम्) ३ ४३ ८. अत्युत्कृष्टम् (गाम्) ३४ ३५ उग्र-गुणकर्मस्वभावम् (पद=विज्ञानम्) ५ ३० २ क्रूर भयङ्करम् (वच =वचनम्) ५ ८ शत्रुभि सोढुम-शक्यम् (शर्द्ध =वल सैन्यम्) १७ ४१ तीक्ष्णस्वभावम् (महादेव=परमात्मानम्) ३९ ८ तीव्र गुणम् ३९ ९. कठिन दृढम् (शव =वलम्) ३ ३६ ४ सर्वै सह समवेतम् (इन्द्र=विद्युतम्) ३ ४६ ४ दुष्टेषु कठिनस्वभाव श्रेष्ठेषु सरलम् (इन्द्र=राजानम्) ३ ४८ ५ दुष्टै शत्रुभि-रसहम् (अश्व=विद्युतम्) १ ११८ ९ दुष्टाना दु खप्रदम् (इन्द्र=राजानम्) ३ ४९ ५ दुष्टाना दमयितारम् (राजानम्) ३ ४७ ५ द्वेषविनाशकम् (शुन=परस्परमेल-जन्य सुखम्) ३ ५० ५ शत्रुवलविदारणक्षमम् (सेनापतिम्) १ १०२ १० दु सहम् (वच =परिभाषणम्) ५ ८. दुर्जयम् (धनम्) ५ ३१ ८ प्रचण्डपराक्रमम् '(इन्द्र=सम्राजम्) ७ ३६ तेजोमयम् (भग=ऐश्वर्यम्) ७ ४१ २ तेजस्वभावम् (इन्द्र=राजाद्यध्यक्षम्) ३ ३२.१७ तेजस्वी (ईश्वर) को स० वि० १५६, ७ ४१ २ **उग्रस्य**=उत्कृष्टस्य (वलस्य) ५ २० २ **उग्रः**=सर्वोत्कृष्ट (इन्द्र =परमैश्वर्यप्रद ईश्वर), 'ऋजेन्द्राग्र०' उ० २ २९ इति निपातनम् १ ७ ४ तीक्ष्णस्वभाव (भा०—शूर (जन) ३३ ८० तीव्र प्रभाव ४ २३ ७ तीव्रकारी (इन्द्र =सभाध्यक्ष) १ ५५ ३ तीव्रभाग्योदय (इन्द्र =ऐश्वर्यवान् विद्वान्) ३ ३६ ५ अतिकठिनदण्डप्रद (इन्द्र =सेनाद्यधि-पति) १ १०० १२ क्रूरस्वभाव (राजपुरुष) २.३३ ९ दुष्टाना वधे तीव्रतेजा (इन्द्र =सेनापति) १७ ३७ दुष्टाना हन्ता (सभाध्यक्ष) १ ५१ ११ दुष्टानामुपरि क्रोधकृत् (इन्द्र =राजा)२० ४८ दुष्टदलने तेजस्वी (राजा) ८ ४६ हिंसने तीव्र (इन्द्र =मन्त्री) १७ २४ भयङ्कर (ईश्वर) आर्याभि० १ ३४ [उच्यति समवैतीति विग्रहे उच समवाये (दिवा०) धातो 'ऋज्र्रेन्द्राग्रवज्र०' इत्यादिना रन् प्रत्य-यान्तो निपातित । वायुर्वाऽउग्र श० ६ १ ३ १३ एता-न्यष्टौ (रुद्र, शर्व, पशुपति, उग्र, अशनि, भव, महादेव, ईशान) अग्निरूपाणि । कुमारो नवम श० ६ १ ३ १८]

उग्र इव तेजस्वीव (राजादिजन इव) ६ १६ ३९ [उग्र-इवपदयो समास]

उग्रधन्वा उग्र धनुर्यस्य (इन्द्र =सर्वसेनाधिपति) १७ ३५ [उग्र-धन्वन्पदयोर्वहुव्रीहि । उग्र व्याख्यातम् । धन्वन्—धवि गतौ (भ्वा०) धातो 'कनिन् युवृषितक्षि०' उ० १ १५६ सूत्रेण कनिन्]

उग्रमुग्रम् तेजस्विन तेजस्विनम् (दुर्जन दुर्जनम्) ६ ४७ १६ [उग्र व्याख्यातम् । तस्य वीप्साया द्विर्वचनम्]

उग्रा तीव्रतेजस्का (द्यौ) ३२.६. **उग्राभिः**=अत्यन्तोत्कृष्टाभि [ऊतिभि =रक्षाप्राप्तिविज्ञानसुख-प्रवेशनै) १ ७ ४ **उग्राः**=कठिनगुणकर्मस्वभावा (पति-व्रता स्त्रिय) ७ ५६ ६. (उग्र व्याख्यातम् । तस्य स्त्रिया टापि रूपम्]

उग्रा उग्रवली तेजस्विस्वभावौ (सभासेनाधीशौ) प्र०—अत्र विभक्तेर्लुक्, सहितायामिति दीर्घ. ३३ ६१. तीक्ष्णस्वभाव वाले (सूर्यादि और पृथिवी) स० वि० ६, ३२ ६ तीव्रौ (वाय्वग्नी) प्र०—अत्र 'सुपा सुलुग्०' इत्याकार १ २१ ४ (उग्र व्याख्यातम्]

उग्राः दृढा, भा०—वलिष्ठा (वाहव =भुजाः) १७.४६. तीव्रसवेगादिगुणसहिता (मरुत =वायव) १ २३.१० [उग्र व्याख्यातम् । तत प्रथमावहुवचनम्]

उग्रादेवम् उग्रान् तीव्रस्वभावान्, विजिगीषुम् (सभाध्यक्षम्) प्र०—अन्येषामपि०, इति पूर्वपदस्य दीर्घ १.३६ १८ [उग्र-देवपदयो समास । देव =दिवु क्रीडा-विजिगीषादिषु (दिवा०) धातो पचाद्यच् प्रत्यय]

उग्रेभिः तेजस्विभि. (विद्वज्जनै) १ १७१ ५ तीक्ष्ण-स्वभावै (शूरवीरै) १ १३३ ६ [उग्र व्याख्यातम् । 'वहुल छन्दसी' ति भिस ऐसादेशो न भवति]

उचथम् वक्तव्यम् (वचनम्) २.१९ ७ वक्तु योग्यम् (वचनम्) १ १८२ ८ **उचथस्य**=वक्तु योग्यस्य (दुर्जनस्य) ७ १८ ५ उचितस्य (जनस्य) ७ १८ ५ **उचथानि**=रुचिकराणि (सुखानि) ४ २४ ७ वेदवचनानि १ ७३ १० उचितानि वचनानि ४ २ २० **उचथाय**=प्रवचनायाऽध्यापनाय १ ११० १ [वच परिभाषणे (अदा०) धातोर्वाहुलकादौणादिकोऽथ प्रत्यय । स च कित् । कित्वासत्प्रसारणम्]

उचथा वक्तुमर्हाणि (व्रह्मा=धनानि) २ २० ५ [उचथ व्याख्यातम् । 'शेश्छन्दसि वहुलमिति' शेर्लुक्]

उच्चरणयत् चरणमिवाऽऽचरेत्, प्र०—'वाच्छन्दसि' अ० १ ४ ९ इत्यत्राऽल्लोप ईत्त्वाऽभावश्च ८ २४ [उत्+चरणप्राति० आचारेऽर्थे क्यच् । छान्दसत्वादल्लोप]

उच्चरत् उत्कृष्टतया चरति सर्वं जानाति ३६ २४ उत्कृष्टतया सर्वत्र व्याप्तमस्ति प० वि० । प्रलय के ऊर्ध्व

मिकान् सस्त्यायान् नि० १२ ६ उक्षन् महन्नाम निघ० ३.३]

उक्षत सिञ्चत १ ८७ २ **उक्षतम्**=सिञ्चतम् २१ ८ मिञ्चेताम् २१ ९ [उक्ष सेचने (भ्वा०) धातोर्लोट्]

उक्षन् सेवन्ते ४ १ १० [उक्ष सेचने (भ्वा०) धातोर्लेट् । अत्र सेवनार्थे धातूनामनेकार्थत्वात्]

उक्षन्ति सिञ्चन्ति १ १६९ ३ **उक्षन्ते**=सेवन्ते ५ ५९ १ सिञ्चन्ति २ ३४ ३ [उक्ष सेचने (भ्वा०) धातोर्लट्]

उक्षन्तम् वीर्यसेचनसमर्थ (जवान) को आर्याभि० १ ५०, १.११४ ७ वीर्यसेक्तारम् (युवानम्) १९ १५ विद्यावीर्यसेचनसमर्थम् (जनम्) प० वि० । [उक्ष सेचने (भ्वा०) धातोर्लट शतृप्रत्यय]

उक्षभिः महद्भि (जनै) १ १३९ १० [उक्षन् व्याख्यातम् । तस्य तृतीयाबहुवचने रूपम् । उक्षन् महन्नाम निघ० ३ ३]

उक्षमाणः सिञ्चमान (मेघ) ५ ४२ १४ **उक्षमाणाः**=सेवमाना (नर) ५ ५८ ८ **उक्षमाणे**=सुखैं सिञ्चमाने (द्यावापृथिव्यौ) ४ ५६ २ [उक्ष सेचने (भ्वा०) धातोर्लट शानच् । अथवा ताच्छील्ये चानश् । व्यत्ययेन आत्मनेपदम्]

उक्षयन्त सिञ्चन्ति ६ १७ ४ [उक्ष सेचने (भ्वा०) धातो स्वार्थे णिजन्ताल् लङ् । आडभावश्छान्दस]

उक्षा वीर्यसेचक (वृषभ) १८ २७ सूर्य ४ ५६ १ वृष्ट्या सेचक (समुद्र) १७ ६० सेचनसमर्थ (गौ = जनो वृषभो वा) २१ २० वर्षा के द्वारा भूगोल का सेचन और आकर्षण करने वाला (सूर्य) स० प्र० ३११ **उक्षाणम्**=वीर्यसेचनसमर्थम् (गा==युवाऽवस्थ वृषभम्) २८ ३२ **उक्षाणः**=वीर्यसेचनसमर्था (पशव) २४ २३ [उक्ष सेचने (भ्वा०) धातो 'श्वन्नुक्षन्०' उ० १ १५९ सूत्रेण कनिन् । उक्षतेर्वृद्धिकर्मण, उक्षन्त्युदकेनेति वा नि० १२ ९]

उक्षामि शोधयामि, आर्द्रीकरोमि, सिञ्चामि वा २ १ [उक्ष सेचने (भ्वा०) धातोर्लट्]

उक्षितम् सिक्तम् (भा०—गर्भम्) १९ १५. वीर्यसेचनस्थित गर्भम् १ ११४ ७ विद्यावीर्यसिक्त जनम् प० वि० । सेवकम् (इन्द्र=विद्युतम्) २ १९ १ गर्भ मे वीर्य के सेचन को, आर्याभि० १ ५०, ऋ० १ ८ ६ ७ **उक्षित**= ससिक्त (अग्नि.) ५ ८ ७ सेवित (शमादिशुभकर्माऽऽचारिजन) २ २१ ३ सिक्त (विद्वज्जन) १ ३६ १९ **उक्षिते**=सिञ्चिते (उपासानक्ता=रात्रिदिने) २ ३ ६ [उक्ष सेचने (भ्वा०) धातो क्त प्रत्यय । उक्षित = महन्नाम निघ० ३ ३]

उक्षितासः वृष्टिद्वारा सेक्तार (रुद्रास =वायव) १ ८५ २ [उक्ष सेचने (भ्वा०) धातो 'क्त । तस्य प्रथमाबहुवचने जसोऽसुगागमे रूपम्]

उखच्छित् य उख गमन छिनत्ति स (राजपुरुष) ४ १९ ९ (उखम्=उख गत्यर्थे (भ्वा०) धातो 'घञर्थे कविधानम्' इति क । तदुपपदे छिदिर् द्वैधीकरणे (रुधा०) धातो क्विप्]

उखा पाकस्थाली ३ ५३ २२ ज्ञातुमर्हा (पृथिवी= स्त्री) १२ ६१ **उखाम्**=सूपादिसाधनी स्थालीम् ११ ५९ प्राप्तव्या कन्याम् ११.६४ **उखायाः**=पाकसाधिकाया (स्थाल्या.) १ १६२ १३ प्राप्ताया प्रजाया १२ १६ **उखे !**=अन्नाऽऽधारा स्थालीव विद्याऽऽधारे, ज्ञानयुक्ते, विज्ञानमिच्छुके, जिज्ञासो वा (कन्ये) ११ ६१ [उख गत्यर्थे (भ्वा०) धातोरौणादिको ऽन् प्रत्यय । तत स्त्रिया टाप् । उखा एतद्वै देवा एतेन कर्मणैतयावृतमेमाल्लोकानुदखनन् यदुदखनस्तम्मादुत्खोत्खा ह वै तामुखेत्याचक्षते परोक्षम् श० ६.७ १ २३ आत्मैवोखा श० ६ ५ ३.४, ६ ६.२ १५ शिर एतद् यज्ञस्य यदुखा श० ६ ५ ३ ८ उदरमुखा श० ७ ५ १ ३८ योनिर्वाऽउखा श० ७ ५ २ २ इमे वै लोका उखा श० ६ ५ २ १७, ६ ७ १ २२, ७ ५ १ २७ प्राजापत्यमेतत् कर्म यदुखा श० ६ २ २.२३ पर्वतदग्नेर्यदुखा श० ६ २ २ २४]

उख्यम् उखाया सस्कृत भक्ष्यमोदनादिकम्, प्र०— अत्र 'शूलोखाद्यत्' अ० ४ २ १६ अनेन 'सस्कृत भक्षा' इत्यर्थे यत् १७ ६५ **उख्यस्य**=उखाया स्थाल्या भवस्य पाकसमूहस्य १४ १ [उखाप्राति० 'शूलोखाद् यत्' अ० ४ २ १६ सूत्रेण 'सस्कृत भक्षा' अर्थे यत् । अथवा उखा प्राति० भवार्थे यत् । अय वाऽग्निरुख्य श० ८ २ १ ४]

उगणाभ्यः विविधतर्कयुक्ता गणा यासु ताभ्य (स्त्रीभ्य) १६ २४ [उ-गणपदयोर्बहुव्रीहि । उ=वितर्के इति व्याख्यातम्]

उगणाः उद्यताऽऽयुधसमूहा (सेना), प्र०—पृषोदरादित्वादभीष्टसिद्धि ११ ७७

उग्र! तेजस्विन् (राजन्) ४ २ १८ प्रतापिन् (इन्द्र= राजन्) ४ २० ७. तीक्ष्णस्वभाव (राजन्) ४ २४ ४.

उत्कृष्टतया प्राप्नुवन्त, भा०—उन्नयन्त (भानव = किरणा) १५ २४ [उत्+ओहाङ् गतौ (जु०) धातो शानच्। धातूनामनेकार्थकत्वात् त्यागेऽपि। अथवा ओहाक् त्यागे (जु०) धातोश्छान्दस रूपम्]

उज्जिहीते उत्कृष्टतया विज्ञापयति ११०५ १८ [उत्+ओहाङ् गतौ (जु०) धातोर्लट्। भृञादित्वादभ्यासस्येत्व श्लौ। हलादौ ङिति 'ई हल्यघो' अ० ६ ४ ११३ इतीत्वम्]

उज्जेषम् उत्कृष्टया नीत्या जयेयमुत्कर्षेयम् ९ ३१. [उत्+जि जये (भ्वा०) धातोर्लिङर्थे लेट्। 'सिब्बहुल लेटी' ति सिप्]

उज्जेषी उत्कृष्टतया जेतु शील (भा०—गृहरथ') १७ ८५ [उत्+जि जये (भ्वा०) धातोस्ताच्छील्ये णिनि। 'सिबुत्सर्गश्छन्दसि' अ० ३ १ ३४ वा सूत्रेण सिप्]

उत् उत्कृष्टार्थे प्र०—उदित्येतयो प्रातिलोम्य प्राह निरु० १ ३, ११० १ ऊर्ध्वे १ ५० १ आश्चर्ये ३० ३१ उत्कृष्टतया ६ ३१ उत्कृष्टरीत्या १५ ५४ अधिकार्थे ७ ३२ १२ उत्कर्षे १७ १० उद्गमने ७ ४२. अपि ४ २८. अत्यन्तार्थे ४ ४५ १ ऊर्ध्वे उत्कृष्टबोधे व्यवहारे च अथर्व० ११ ५ ५, ऋ० भू० २४६ एवार्थे ७ १६.११ क्रियायोगे ७ ४१ चाऽर्थे ६ ७२ २ धात्वर्थे ११२ [उत् (न्यवेति विनिग्रहार्थीयौ) इत्येतयो प्रातिलोम्यम् नि० १ ३. उदिति सोऽसावादित्य जै० उ० २ ६ ८]

उत अप्यर्थे १ २३ १९ यदि १६ १० उत्प्रेक्षायाम् ११७ ६ चाऽर्थे ५ १९ तथा आर्याभि० १ ५० विकल्पे, अव्ययार्थे। और आर्याभि० ११५ [उत अपि नि० १.६. च नि० १० २७]

उतानि सततानि वस्त्राणि १९ ८९ [वेञ् तन्तुसन्ताने (भ्वा०) धातो क्त। यजादित्वात् किति सम्प्रसारणम्]

उतो अपि २५ २९ पक्षान्तरे १ २३ १५

उत्किरामि उत्कृष्टतया विक्षिपामि ५ २३ उत्कृष्टतया प्रक्षिपामि ५ २३ [उत्+कॄ विक्षेपे (तुदा०) धातोर्लट्। 'ऋत इद्धातोरि' तीत्वे रपरत्वे च रूपम्]

उत्कूलनिकूलेभ्यः ऊर्ध्वनीचतटेभ्य ३० १४

उत्क्रमणम् ऊर्ध्वं क्रमण तेज इव ७ २६ [उत्क्रमणपदयो समास। क्रमणम्=क्रमुपादविक्षेपे (भ्वा०) धातोर्ल्युट्]

उत्क्रमः उद्ध्वं क्रम क्रमण यस्मात्तस्य (विद्वज्जन) १५ ९. [उत्+क्रमपदयो. समास। क्रम=क्रमु पादविक्षेपे (भ्वा०) धातोर्घञ्। 'नोदात्तोपदेशस्य०' अ० ७ ३.३४ इति वृद्धिर्न भवति]

उत्क्रान्तिः उत्क्राम्यन्त्युत्तद्घयन्ति समान् विषमान् देशान् यया गत्या तद्विद्याजान्री (विदुषी स्त्री) १५ १ [उत्+क्रमु पादविक्षेपे (भ्वा०) धातो क्तिन्। 'अनुनासिकस्य क्विझलो क्ङिति' अ० ६.४ १५. सूत्रेण उपधाया दीर्घ]

उत्तभान ऊर्ध्व स्तभान १७ ७२ [उत्+स्तम्भु (सौत्रो धातु) धातोर्लोट्। 'स्तम्भुस्तुम्भु०' अ० ३.१ ८२ इति श्ना। 'हल श्न शानज्झौ' इति श्न शानजादेश। 'उद स्थास्तम्भो पूर्वस्य' इति पूर्वसवर्ण]

उत्तभिता धारिताऽस्ति ऋ० भू० १४३ धारण किया है स० प्र० ३११ [उत्+स्तम्भु स्तम्भार्थे सौत्रो धातु। ततस्तृच् कर्त्तरि। पूर्वसवर्णादेशश्च]

उत्तमम् सर्वोत्कृष्टम (सूर्यम्=ईश्वरम्) ३५ १४ श्रेयासम् (रस=वीर्य) ६ ३ प्रशस्तम् (दक्ष=बलम्) ११५६ ४ अतिशयेन श्रेष्ठम् (पुनम्) ५ २५ ५ उत्कृष्टगुणकर्मस्वभावम् (सूर्यम्) १५० १०. विजयाऽऽन्यम् (नाक=सर्वसुखप्रद विजयम), सर्वथोत्कृष्टम् (मोक्षपदम्), प्रशस्तम् (अविद्यमानदुख भोगम्), सर्वश्रेष्ठम् (सर्वदु ख प्रणाशकमानन्दम्) ६ १० सर्वोत्कृष्टम् (ईश्वरम्) २० २१ अतिश्रेष्ठम् (श्रव=अन्नादिक श्रवण वा) ४ ३१.१५. भा०—अत्युत्तमम् (नाकम्=सुखम्) १८ ५१ **उत्तमः**= श्रेष्ठ (भौतिकाग्नि) ३ ५ १० **उत्तमानि**=श्रेष्ठानि (द्युम्नानि=धनानि यशासि वा) ३३ १२ श्रेष्ठनमानि (श्रवासि=श्रवणान्यन्नानि वा) १ ९१ १८ **उत्तमाम्**= अतिश्रेष्ठाम् (श्रियम्=शोभा लक्ष्मी च) ३२ १६ **उत्तमेन**=प्रशस्तेन (पविना=वाचा) ६ ३० [उद् शब्दाद् अतिशायने तमप्]

उत्तमेभिः श्रेष्ठै (कर्मभि) ६ ६० ३ [उत्तम व्याख्यातम्। ततो भिस्। 'बहुल छन्दसीति' ऐसादेशो न भवति]

उत्तम्भनम् उत्कृष्ट प्रतिबन्धनम् प्र०—अत्र 'उद स्थास्तम्भो पूर्वस्य' अ० ८ ४ ६१ अनेन सस्य पूर्वसवर्णादेश ४ ३६ [उत्+स्तम्भु स्तम्भार्थे सौत्रो धातु। ततो ल्युट्। 'उद स्थास्तम्भो०' इति पूर्वसवर्णादेश]

उत्तरणाय अर्वाचीनतटात्परतट प्राप्नुवते प्रापयते वा (जनाय) १६ ४२ [उत्+तॄ प्लवनसन्तरणयो (भ्वा०)

रहता है आर्याभि० २ ३७, ३६ २४ [उत्+चर गतौ (भ्वा०) धातोर्लेट्]

उच्चरन्तम् ऊर्ध्वं प्राप्नुवन्तम् (सूर्यम्) ६ ५२ ५ ऊर्ध्वं विहरन्तम् (सूर्यमण्डलम्) ४.२५.४ [उत्+चर गतौ (भ्वा०) धातो शतृ]

उच्चा ऊर्ध्वं स्थितानि (धनानि) २ ३० ५ उच्चानि उत्कृष्टानि (ब्रह्मचर्य-विद्या-बल-शील-पुरुषार्थाः) २.२ १० उच्चादुत्कृष्टकर्मसेवमानाद, प्र०—अत्र 'सुपा, सुलुग्०' इति पञ्चम्येकवचनस्याकारादेश १ ११६ २२ उच्चे ऊर्ध्वंस्थिते (दिवि=आकाशे) २ ४०.४ उच्चम् (शर्म= गृहम्) २६ १६ उच्चानि वस्तूनि १ १२३ २ उच्चानि सुखानि कर्माणि वा १ ३३ ७ [उच्चा=उच्चैः. नि० ६.३६ उच्चैः=उच्चितं भवति नि० ४ २४]

उच्चाबुध्नम् उच्चा ऊर्ध्वं बुध्नमन्तरिक्ष यस्मिँस्तत् (विमानादियानस्थमुदकाधार कुण्डम्) १ ११६ ६ [उच्च-बुध्नपदयोर्बहुव्रीहि । बुध्नम्=अन्तरिक्षं बद्धा अस्मिन् धृता आप इति वा । इदमपीतरद् (हृदयम्) बुध्नमेतस्मा-देव बद्धा अस्मिन् धृता प्राणा इति नि० १० ४४]

उच्चैर्घोषाय उच्चैर्घोषो यस्य तस्मै (न्यायाधीशाय) १६ १६ [उच्चैस्-घोषपदयो समास । उच्चैः=उच्चित भवति नि० ४ २४]

उच्छ विशिष्टतया वासय १.११३.१७ विवासय ६ ६५ ६ विवस १ ४८ १ उच्छति विवासयति १ ९२ १४ [उच्छी विवासे (भ्वा०) धातोर्लोट्]

उच्छत् विवासयति १ ४८ ८ [उच्छी विवासे (भ्वा०) धातोर्लेट्]

उच्छति विवसति १ ४६ १. **उच्छन्तु**=सेवन्ताम् ७ ४१ ७ तमो विवासयन्तु १ १२४.९ विवसन्तु ३ ४ ४० **उच्छात्**=विवसेत् १ ११३ १३ प्राप्नुयात् १ १२४ ११. **उच्छान्**=विवासयेयु. ४ ५५ २ विवासयेत् ५ ३७ १ [उच्छी विवासे (भ्वा०) धातोर्लेट्, लोट्, लेट् च]

उच्छन्ती विवासयन्ती दूरीकुर्वन्ती (उषा) १ ९२ ६ निवसन्ती (उषा=स्त्री) ५ ७९ १० अन्धकार निस्सार-यन्ती (उषा=प्रातर्वेला) १ १२४ १ **उच्छन्तीम्**= निवासयन्तीम् (उषसम्) १ ७१ १ **उच्छन्तीः**=सेवयन्ती (उषस=प्रातर्वेला) ४ ३९ १ सुवासयन्त्य (स्त्रिय) ४ ५१ ३ **उच्छन्त्याम्**=विविधवासदात्र्याम् (उषसि= प्रभातवेलायाम्) १ १८४ १ [उच्छी विवासे (भ्वा०) धातोः शत्रन्तात् ङीप्]

उच्छशाधि उत्कृष्टतया शिक्षय ७ १ २५ [उत्+ शासु अनुशिष्टौ (अदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु]

उच्छंस उत्कृष्टतया स्तुहि ५ ५२ ८ [उत+शसु स्तुतौ (भ्वा०) धातोर्लोट्]

उच्छात् विवसनात् १ ४८ ३ [उच्छी विवासे (भ्वा०) धातोर्भावे घञ् । तत पञ्चमी]

उच्छिष उच्छिष्टं त्यज ६ ७५ १६ ऊर्ध्वं शिष्ट त्यजेत् १७ ४५

उच्छिष्टात् उत् सर्वस्मादूर्ध्वं शिष्टात् परमेश्वरात् तत्सामर्थ्यात् च ऋ० भू० १३६ [उत्+शासु अनुशिष्टौ (अदा०) धातो क्त । 'शास इदङ्हलोरि' तीत्युपधाया इत्वम् । 'शासि वसिघसीना चे' ति षत्वम्]

उच्छोचस्व उत्कृष्टतया विचारय ४ २ २० [उत्+ शुच शोके (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

उच्छ्रयतात् उच्छ्रित कुर्यात्, भा०—प्रजाराजपुरुषा-नुन्नयेत् २३ २७ [उत्+श्रिञ् सेवायाम् (भ्वा०) धातो-र्लोट् । मध्यमपुरुषैकवचने 'तुह्योस्तातङ्०' इति हे स्थाने तातङ्]

उच्छ्रयस्व उत्कृष्टतया सेवस्व ३ ८ २ उत्कृष्ट सेवस्व सेवते वा ४ १० [उत्+श्रिञ् सेवायाम् (भ्वा०) धातोर्लोट्]

उच्यते उपदिश्यते १ ११४ ६ उपदिश्येत, अ०— उच्येत, तद्गुणान् प्रकाशयेत्, प्र०—लेट्-प्रयोगोऽयम् १२ ८० कथ्यते १ ७७ १ कहा जाता है स० वि० २०८, अथर्व० ६ ६ १ २ **उच्यसे**=परिभाष्यसे १ ३१ १४. **उच्येते**=कथ्येते ३१ १० [वच परिभाषणे (अदा०) धातो कर्मणि लट्]

उच्यसि वदसि ५ ८१ ४ [वच परिभाषणे (अदा०) धातोर्लट् । विकरणव्यत्ययेन यक्]

उज्जजान उत्कृष्टतया जायते ३ १ १२ [उत्+ जनी प्रादुर्भावे (दिवा०) धातोर्लिट्]

उज्जिघ्नते उत्कृष्टतया हिंसन्ति १.६४ ११ [उत्+ हन हिंसागत्यो (अदा०) धातोर्लट् । 'बहुल छन्दसीति' शप श्लु । व्यत्ययेनात्मनेपदम्]

उज्जितम् जयत्यनया सा जितिरुत्कृष्टा चासौ जितिश्च तामुत्कृष्ट विजयम्, विद्यया सम्यगुत्कर्षम् २ १५ [उत्+जि जये (भ्वा०) धातो क्त]

उज्जिहानाः सम्यक् त्यजन्त (मानवा) ५.१.१

धातोर्वा रूपम्]

उत्तिरामसि उत्कृष्टतया तराम ३ ३७ १० [उत्+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लट्। विकरणव्यत्ययेन शप्रत्यये रूपम्। 'इदन्तो मसि' रितीदन्तता मस]

उत्तिष्ठ ऊर्ध्व गच्छ ५ ५६.५ उद्युक्तो भव ४ ४ ४ उत्तिष्ठतु उद्युक्तो भवतु ३४ ५६ प्रकाशितो भव ७ ३८ २ **उत्तिष्ठत**=उद्यता भवत, भा०—प्रयत्नेनोद्यमिनो भवत ३५.१० [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट्। शिति 'पाघ्राध्मास्था०' इत्यादिना तिष्ठादेश। 'उद स्थास्तम्भो०' इति पूर्वसवर्णादेश]

उत्तिष्ठन् उद्यमाय प्रवर्त्तमान (सत्पुरुष.) ७ ३३ १ सद्गुणकर्मस्वभावेषूर्ध्व तिष्ठन् (इन्द्र=सभापती राजा) ८ ३६ [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो शतृ। शिति तिष्ठादेश पूर्वसवर्णादेशश्च पूर्वपदवत्]

उत्थाय आलस्य विहाय ११ ६४ [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्। पूर्वसवर्णादेशश्च पूर्वपदवत्]

उत्थिताय कृतोत्थानाय (जीवाय) २२ ८ [उत्+ष्ठा गतिनिवृत्तौ धातो क्त। 'द्यतिस्यतिमास्थाम्०' इति धातोरिकारादेश। पूर्वसवर्णादेशश्च]

उत्पतन् ऊर्ध्वमुड्डीयमान इव (पक्षी) २ ४३ ३ उत्तम व्यवहार मे पहुँचाता हुआ (परमेश्वर) आर्याभि० १ ५३ [उत्+पत्लृ गतौ (भ्वा०) धातो शतृ]

उत्पतन्ति ऊर्ध्व गमयन्ति ऋ० भू० १६८. प्राप्नुवन्ति १ १६४ ४७ [उत्+पत्लृ गतौ (भ्वा०) धातोर्लट्। अन्तर्भावितण्यर्थश्च]

उत्पातयति ऊर्ध्वं जागरयति १ ४८ ५ [उत्+पत्लृ गतौ (भ्वा०) धातोर्णिजन्तात्लट्]

उत्पारयन्ति उत्कृष्टतया पार गमयन्ति १ १८२.६ [उत्+पार कर्मसमाप्तौ (चुरा०) धातोर्लट्]

उत्पुनामि उत्कृष्टतया पवित्रीकरोमि, प्र०—उदित्येतयो प्रातिलोम्य प्राह, निरु० १ ३, १ ३१. [उत्+पूञ् पवने (क्र्या०) धातोर्लट्। 'प्वादीना ह्रस्व' इति धातोर्ह्रस्वत्वम्]

उत्प्रपूर्याः पूर्ण कुर्य्या १५ ४३ [उत्+प्र+पॄ पालनपूरणयो (जु०) धातोर्लिङ्। 'बहुल छन्दसी' ति शपो लुक्]

उत्सक्थ्याः ऊर्ध्व सक्थिनी यस्यास्तस्या प्रजाया २३ २१ [उत्+सक्थिपदयो समास। सक्थि—षञ्ज सङ्गे (भ्वा०) धातो 'असिसञ्जिभ्या क्थिन्' उ० ३ १५४. सूत्रेण क्थिन् प्रत्यय.। सक्थि-सचतेरासक्तोऽस्मिन् काय नि० ६ १८]

उत्सधिम् उत्सा कूपा धीयन्ते यस्मिन् भूमिभागे तम् १.८८ ४ [उत्सोपपदे डुधाञ् धारणपोषणयो (जु०) धातोरधिकरणे कारके 'कर्मण्यधिकरणे च' इति कि प्रत्यय। उत्स कूपनाम निघ० ३ २३]

उत्सम् उन्दन्ति येन त कूपम्, प्र०—उत्समिति कूपनाम, निघ० ३ २३, १७ ८७ कूपमिव जलेन क्लिन्नम् (दशयन्त्रम्=जगत्) ६.४४ २४ कूप इवाऽऽर्द्रीकरम् (अग्नि=विद्वद्राजानम्) १२ १६ कूपमिव पालक गवादिकम्, अ०—वीर्यसेचक वृषभम् १३ ४६ **उत्सः**=उन्दन्ति यस्मात् स कूप इव (पुरुष) १६ ८७ कूप इव तृप्तिकर (ईश्वर) १ १५४ ५. **उत्सौ**=कूपोदकमिवाऽऽर्द्रीभूतौ (स्त्रीपुरुषौ) १३ ३५ [उनत्ति क्लिद्यतीत्युत्स। उन्दी क्लेदने (रुधा०) धातो 'उन्दिगुधिकुपिभ्यश्च' उ० ३ ६८ सूत्रेण स प्रत्यय. किच्च। उत्स कूपनाम नि० ३ २३. उत्सरणाद्वोत्सदनाद्वोत्स्यन्दनाद्वोनत्तेर्वा नि० १०.६ आपो वा ऽउत्स श०६.७ ४.४.]

उत्सवे हर्षनिमित्ते व्यवहारे १ १०२ १ कर्त्तव्याऽऽनन्दसमये ३३ २६ **उत्सवेषु**=आनन्दयुक्तेषु कर्मसु १ १०० ८ [उत्+षु प्रसवैश्वर्ययो (भ्वा०) धातो. 'ऋदोरवि' त्यप् प्रत्यय]

उत्सादतः त्यागमात्रात् २१ ४५ उत्सादन कुर्वत (प्रत्यङ्गात्) २१ ४३ गात्रोत्सादनात् २१ ४४ [उत्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्णिजन्ताच्छतृ। अथवा=उत्सादप्राति० सार्वविभक्तिकस्तसि प्रत्यय]

उत्सादम् ऊर्ध्व सीदन्ति यस्मिंस्तम् (तालु=आस्याऽवयवम्) २५ १ **उत्सादेभ्यः**=नाशेभ्य प्रवृत्तम् ३० १० [उत्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्घञ् 'हलश्च' सूत्रेण]

उत्सिनाति उत्कृष्टतया बध्नाति १ १२५ २. [उत्+षिञ् बन्धने (क्र्या०) धातोर्लट्]

उत्स्नाय स्नान कृत्वा २ १५ ५ [उत्+ष्णा शौचे (अदा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

उदक् उत्तरत ३ ५३ ११ उत्तरस्या (दिश) ६ ३६ [दिशावाचिन उदक् शब्दादुत्तरस्यास्ताति प्रत्ययस्य 'अञ्चेर्लुक्' अ० ५ ३ ३० सूत्रेण लुक्]

उदकम् (जलम्) १ १६४.७ जल को स० वि०

धातोर्ल्युडन्ताच्चतुर्थी]

उत्तरतः उत्तरस्माद् देशात् ५ ११ उत्तरकाले २ ३ [उत्तरप्राति० पञ्चम्यन्तात् तसिल्]

उत्तरम् प्रलयाऽनन्तर कारणाऽऽख्यम् ११५४ १ सर्वेभ्य सूक्ष्मत्वादुत्तरम् (ईश्वरम्) २० २१ सर्वेभ्य पदार्थेभ्य उत्तरस्मिन् वर्त्तमानम् (सूर्यम्=ईश्वरम्) ३८ २४ उत्पद्यमानम् (रूपम्) १ ९५ ८ अन्ताऽवयवम् (सधस्थ= कारणरूपम्) ५ १८. सर्वेषा लोकानामुत्तारकम् (सूर्य= जगदीश्वरम्) २७ १० सर्वोत्कृष्ट' प्रलयादूर्ध्व वर्त्तमान सप्लवकर्त्तारम् (ईश्वरम्) १ ५० १० उत्तरन्ति येन तत् (दक्ष=वलम्) ६ १९ १७ दु खेभ्य उत्तारक परत्र वर्त्त-मानम्, जन्ममृत्युक्लेशादिभ्य पृथग्वर्त्तमानम् (सूर्यम्= ईश्वरम्) ३५ १४ अर्वाक्कालीनम् (सुम्न=सुखम्) २ २३ ८ उत्तर समुद्र अर्थात् गृहाश्रम को स० वि० ८०, अथर्व० ११ ५ ६ उत्तरा दिशाम् २५ ५ **उत्तरः**= उत्तरकालीन (राजविरोविजन) ४ १८ ६ पश्चात् (पुरुष) ४ ३० १ उत्कृष्ट तारयति समादधाति स (परमेश्वर) २३ ५२ **उत्तरात्**=सर्वेभ्य उत्तरम् (स्व =सुखसम्पादक-दिग्रूपम्) १३ ५७ पश्चात् ५ ६० ७ **उत्तरान्**=आगा-मिन (उपस) १ ११३ १३ **उत्तरे**=विजयाऽनन्तर-समये कुशला विद्यमानजीवना (वीरजना) १७ ४३ सिद्धान्तसिद्धा (स्तोमा =स्तुतिसमूहा) १ ७ ७ **उत्तरेण**=उपरिस्थेन (प्रकाशेन) २५ २ [उत् शब्दादति-शायने तरप्। उत्तर =उद्धततरो भवति नि० २ ११ उत्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'ऋदोरवि' त्यप्। अय वै (भू) लोकोऽद्भ्य उत्तर श० १४ ३ १ २८ तेषु ह वा एष एतदध्याहितस्तपति स वा एष (सूर्य) उत्तरोऽस्मात्सर्वस्माद् भूताद् भविष्यत सर्वमेवेदमतिरोचते यदिद किं च ऐ० ४.१८]

उत्तरवेद्याः उत्तरा चाऽसौ वेदी च तस्या १९ १९ [उत्तरावेदीपदयो समास। उत्तर व्याख्यातम्। वेदी= विद सत्ताया (अदा०) धातो 'हृपिषिरुहिवृतिविदि०' उ० ४ ११९ सूत्रेण इन्। 'कृदिकारादक्तिन' इति ङीप् स्त्रियाम्। नासिका ह वा ऽएषा यज्ञस्य यदुत्तरवेदि। अथ यदेनामुत्तर वेदेरुपकिरति तस्मादुत्तरवेदिर्नाम श० ३ ५ १ २ द्यौरुत्तरवेदि श० ७ ३ १ २७ योनिर्वा ऽउत्तरवेदि श० ७ ३ १ २८ योषा वा ऽउत्तरवेदि श० ३ ५ १ ३३ पशवो वा ऽउत्तरवेदि तै० १ ६ ४ ३ खल उत्तरवेदि ता० १६ १३ ७]

उत्तरस्मिन् उत्तमाऽऽसने १८ ६१ [उत्तरसर्वनाम्न सप्तमी। 'पूर्वादिभ्यो नवभ्यो वा' इति स्मिन्नादेश]

उत्तराम् उत्कृष्टतया तरन्ति यया सेनया ता प्राप्त-विजयाम् (सेनाम्) १७ ५० कारणरूपाम् (दिवम्) १ ५० ११ [उत्+तॄ प्लवनसतरणयोः (भ्वा०) धातो 'ऋदोरवि' त्यप्। तत स्त्रिया टाप्]

उत्तरामुत्तराम् आगामिनीमागामिनीम् (समा= वेलाम्) ३८ २८. पुन पुनर्निर्मिताम् (सीता=भूमि-कर्षिकाम्) ४ ५७ ७ [उत्तराम् पदस्य वीप्साया द्वित्वम्]

उत्तरासदः ये प्रश्नोत्तराणि समादधाना उत्तरस्या दिशि सीदन्ति (देवा =विद्वज्जना) ९ ३६ **उत्तरा-सद्भ्यः**=य उत्तरस्या दिशि सीदन्ति तेभ्य (देवेभ्य = विद्वज्जनेभ्य) ९ ३५ [उत्तरोपपदे पद्लृ विशरणगत्यव-सादनेषु (भ्वा०) धातो क्विप् कर्त्तरि। सहिताया पूर्व-पदस्य दीर्घ]

उत्तानयोः उपरिस्थयो ऊर्ध्व स्थापितयो पृथिवी-सूर्ययो १ १६४ ३३ **उत्तानः**=ऊर्ध्व स्थित (सूर्य) ४ १३.५ ऊर्ध्व तनित इव स्थित (जीवात्मा) ४ १४ ५ [उत्+तनु विस्तारे (तना०) धातो 'तनोतेर्ण उपसस्यानम्' अ० ३ १ १४० वा इति ण प्रत्यय। उत्तान उत्तान ऊर्द्धतानो वा नि० ४ २१]

उत्तानहस्तः ऊर्ध्ववाहु (विद्वज्जन) ६ ६३.३ उत्तानौ उपरिस्थौ हस्तौ यस्य स (मर्त्त =मनुष्य) ६ १६ ४६ **उत्तानहस्ताः**=उत्तानावूर्ध्वगतावभयदातारौ हस्तौ येषान्ते (जना) १८ ७५ उत्थापितकरा (गिप्या) ३ १४ ५ [उत्तान-हस्तपदयो समास। उत्तान व्याख्यातम्। हस्त = हसधातो 'हसिमृ०' उ० ३ ८६ सूत्रेण तन्प्रत्यय। हस्तो हन्ते प्राशुर्हनने नि० १ ७]

उत्तानाम् ऊर्ध्वगामिनीम् (रशना=रज्जुम्) ५ १ ३ **उत्तानायाम्**=उत्कृष्टतया विस्तृताया जगत्याम् १ १६४ १४ उत्कृष्टतया विस्तीर्णाया भूमावन्तरिक्षे वा ३४ १४ उत्तान इव शयानाया पृथिव्याम् २ १०३ सरलतया शयानो मनुष्य इव वर्त्तमानाया भूमौ ३ २९ ३ **उत्ता-नायाः**=उत्कृष्टस्तान शुभलक्षणविस्तारो यया राज्ञ्या-स्तस्या ११ ३९ [उत्+तनु विस्तारे (तना०) धातो 'तनोतेर्ण उपसस्यानम्' इति वा० सूत्रेण ण। स्त्रिया टाप्]

उत्तिरः उत्कृष्टतया विस्तारय, अ०—उत्कृष्टतया निवारय १ ११ ७ [उत्+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लोट। व्यत्ययेन श। तिरते प्रवर्धयते (नि० ११ ६.)

अ० ८ २ १३ सूत्रेण उदधावर्थे सज्ञाया विपये मतावुदकस्योदन्भावो निपात्यते]

उदन्वतीः उदकयुक्ता (नद्य) ७ ५० ४ [उदकप्राति० मतुप् भूम्न्यर्थे। मतुवन्तान् ङीप् । पूर्वपदवत् उदन्भावश्च]

उदपप्तन् ऊर्ध्व पतन्ति १ ६२ २. [उत्+पत्लृ गतौ (भ्वा०) धातोर्लुङ् । लृदित्त्वादङ् । 'पत पुम्' इत्यङि पुमागम]

उदप्रुतम् उदकयुक्तम् (पौर=मनुष्यम्) ५ ७४ ४ **उदप्रुतः**=उदकस्य गमयितार ४ ४५ ४. उदक प्राप्ता नद्य इव (धेनव=वाच) ७ ४२ १ [उदक-प्रुत्पदयो समास । उदकस्य उदादेशश्छान्दस । प्रुत्=प्रुङ् गतौ (भ्वा०) धातो क्विप् । 'ह्रस्वस्य पिति कृति तुग्' इति तुगागम]

उदभिः उदकै २ १३ ५ [उदकप्राति० भिस् । उदकस्योदादेश । 'वहुल छन्दसी' ति भिस ऐसादेशो न भवति]

उदमन्दिषुः उत्कृष्टतया हर्षयन्तु १ ८२ ६ [उत्+मदि स्तुतिमोदमदस्वप्नकान्तिगतिपु (भ्वा०) धातोर्लुङ् । व्यत्ययेन परस्मैपदम्]

उदमुच्ये छोड देता हूँ स० वि० १२२, अथर्व० १४ १ ५७ [उत्+मुच्लृ मोक्षणे (तुदा०) धातो कर्मणि लङ्]

उदमृक्षन्त उत्कृष्टतया मृषन्ति सहन्ते १ १२६ ४ [उत्+मृक्ष सघाते (भ्वा०) धातोर्लङ् । व्यत्ययेनात्मनेपदम् । धातूनामनेकार्थकत्वादत्र सहनेऽपि]

उदमेघे यस्योदकैर्मिह्यते सिच्यते जगत् तस्मिन् समुद्रे १ ११६ ३ [उदक-मेघपदयो समास । उदकस्योदादेशश्छान्दस । मेघ =मिह सेचने (भ्वा०) धातो पचाद्यच् । न्यङ्क्वादिपु पाठात् कुत्वम्]

उदयनात् उदयान् १ ४८ ७ [उत्+अय गतौ (भ्वा०) धातोर्ल्युट् । तत पञ्चमी]

उदयँस्त उद्यच्छति १ ५६ १ [उत्+यमु उपरमे (भ्वा०) धातोर्लुङ् । 'समुदाङ्भ्यो यमोऽग्रन्थे' अ० १ ३ ७५ सूत्रेणात्मनेपदम्]

उदरम् घर के भीतर का प्रसार विस्तार स० वि० १६७, अथर्व० ६ २ १५. **उदरस्य**=उदरस्य सकाशात् २५ ३३ **उदरे**=शरीराऽभ्यन्तरे ४ १२ **उदरेषु**=अन्तर्देशेपु १ २५ १५ [उत्+दॄ विदारणे (क्र्या०) धातो 'उदि दृणातेरलचौ पूर्वपदान्त्यलोपश्च' उ० ५ १६. सूत्रेणाल् अच् वा प्रत्यय । उद्दृणाति येनान्नमिति विग्रह । प्रजापतेर्वा एतदुदर यत्सद. । ता० ६.४.११ उदर वै सद कौ० ११ ८ उदरमेवास्य (यज्ञस्य) सद श० ३.५ ३ ५ उदर मध्यमा चिति श० ८.७ २ १८ उदरम् उखा श० ७ ५ १ १८]

उदर्के उत्कृष्टतयाऽऽप्तौ १ ११३ १८ [उत्+अर्च-पूजायाम् (भ्वा०) 'कृदाधाराचिकलिभ्य क' उ० ३ ४० सूत्रेण क प्रत्यय । रसो वा उदर्क कौ० ११ ५]

उदर्येण उदरे भवेन (व्यवहारेण) २५ ८. [उदर व्याख्यातम् । ततो भवार्थे यत्]

उदव उत्तम रीति मे कृपा करके रक्षण करो, आर्याभि० १ ४३ उत्कृष्टतया रक्ष ५ ५ ६ सर्वथा रक्षा कीजिए स० वि० १५६, ७ ४१ ३ उद्गमय प्रापय, प्राप्त करा आर्याभि० २ ११.३४.३६ **उदवत**=कामयध्वम् २ ३१ २ **उदवन्तु**=उत्कर्षेण रक्षन्तु, भा०—पालयन्तु १६ ४६ [उत्+अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणादिपु (भ्वा०) धातोर्लोट्]

उदवता ऊर्ध्वगमनेन ६ १८ ६ [उत्+अव रक्षणगत्यादिपु (भ्वा०) धातो शतृप्रत्यय]

उदवर्त्तय ऊर्ध्व वर्त्तय १६ ७१ [उत्+वृतु वर्त्तने (भ्वा०) धातोर्णिचि लोट्]

उदवविश्रथाय उत्कृष्टतया विमोचय १२.१२ [उत्+अव+वि+श्रन्थ विमोचनप्रतिहर्षयो (क्र्या०) धातोर्घञ् । 'अवोदैधोद्मप्रश्रथ०' अ० ६ ४ २६ इति निपातनात् नलोपो वृद्ध्यभावश्च]

उदवाहासः य उदक वहन्ति तानिव (मरुत = वायव इव) ५ ८३ ३ [उदकोपपदे वह प्रापणे (भ्वा०) धातोरण् प्रत्ययः । प्रथमावहुवचने जसोऽसुगागम.]

उदव्रजे उदकानि व्रजन्ति यस्मिँस्तस्मिन् (आकाशे) ६ ४७ २१ [उदक-व्रजपदयो समास । व्रज =व्रज गतौ (भ्वा०) धातोरधिकरणे 'गोचरसचरवहव्रज०' अ० ३ ३ ११६ सूत्रेण घप्रत्ययान्तो निपात्यते]

उदसृजत् अपिसृजति ६ ३२ २ **उदसृजः**=उत्सृजति त्यजति २.१३.१८ [उत्+सृज विसर्गे (तुदा०) धातोर्लङ्]

उदस्तभ्नात् उत्कृष्टतया स्तभ्नाति ६ ४७ ५. [उत्+स्तम्भु स्तम्भार्थे (सौत्रो धातु) धातोर्लङ् । 'स्तम्भुस्तुम्भुस्कम्भु०' अ० ३ १ ८२ सूत्रेण श्नाविकरण]

उदस्तम्भीत् उत्तभ्नाति ३ ५ १० [उत्+स्तम्भु

२०६, अथर्व० ६ ६ ४ **उदकाय**=आर्द्रीकारकाय(जलाय) २२.२५. [उदकम् उदकनाम निघ० १ १२ उन्दी क्लेदने (रुधा०) धातो 'उदकञ्च' उ० २.३६ सूत्रेण निपातनात् क्वुन् प्रत्यय । उदक कस्मादुनत्तीति सत नि० २ २४]

उदक्ताः पुनरूर्ध्वं गच्छन्त्य (नाव =विमानानि) १० १६ [उत्+अञ्चु गतिपूजनयो (भ्वा०) धातो क्त]

उदगन्म प्राप्नुयाम प० वि०, २० २१ **उदगात्**= उत्कृष्टतया प्राप्तोऽस्ति प० वि०, १ ११५ १ उद्गमनतया प्राप्नोति ७.४३. उदितोऽस्ति १३ ४६ [उत्+गम्लृ गतौ (भ्वा०) धातोर्लङ् । 'बहुल' छन्दसीति शपो लुक् । 'म्वोश्च' अ० ८ २.६५ सूत्रेण नकारादेश । उदगात्-प्रयोगे-उत्+इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङि' इति गादेश । सिचो लुक् च]

उदच ऊर्ध्वं गच्छति, प्र०—अत्र व्यत्यय ५ ८३ ८ [उत्+अञ्चु गतिपूजनयो (भ्वा०) धातोर्लोट् । विकरण-व्यत्ययेन श प्रत्यय]

उदजते ऊर्ध्वं क्षिपति, प्र०—अत्र व्यत्ययेनाऽऽत्मने-पदम् १ ६५ ७. [उत्+अजगतिक्षेपणयो (भ्वा०) धातो-र्लट् । व्यत्ययेनात्मनेपदम्]

उदजनि उत्कृष्टतया जनयति १ ७४ ३ [उत्+ जनी प्रादुर्भावे (दिवा०) धातोर्लुङ् । 'दीपजन०' इत्यादिना विकल्पेन चिण्]

उदजयत् उत्कृष्टरीत्योत्कर्षेत् ६ ३४ उत्कृष्टतया नीत्या जयेदुत्कर्षेत् ६ ३१ [उत्+जि जये (भ्वा०) धातोर्लङ्]

उदजायन्त उत्कृष्टा भवन्ति ४ १८ १ [उत्+जनी प्रादुर्भावे (दिवा०) धातोर्लङ् । 'ज्ञाजनोर्जा' इति जादेश]

उदञ्चनः उत्कृष्टता प्रापक (विद्वज्जन) ५ ४४ ३ [उत्+अञ्चु गतिपूजनयो (भ्वा०) धातो कर्त्तरि युच् बाहुलकादौणादिक]

उदञ्चम् ऊर्ध्वं प्राप्नुवन्तम् (सिन्धु=समुद्रम्) २ १५ ६ (उत्+अञ्चु गतिपूजनयो (भ्वा०) धातोर्बाहुल-कादन् प्रत्यय औणादिक कर्त्तरि]

उदतिरम् उत्कृष्टतया सन्तरेयमुल्लङ्घेयम् ११.८२ [उत्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो सामान्ये लङ् । विकरणव्यत्ययेन शप्रत्यये ऋत इत्वे रपरत्वे च रूपम्]

उदतिष्ठत् उत्तिष्ठति ४ १८ ८ ऊर्ध्वे उत्कृष्टबोधे व्यवहारे च तिष्ठति ऋ० भू० २३५ उत्कृष्टतया तिष्ठति २ १५ ७ **उदतिष्ठः**=उत्तिष्ठते ५ ११ ३ [उत्+ ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लङ् । णिति प्रत्यये तिष्ठादेश]

उदद्यौत् उत्कृष्टतया द्योतते ३ ५ ६ [उत्+द्यु अभिगमने (अदा०) धातोर्लङ् । 'उतो वृद्धिर्लुकि हलि' सूत्रेण वृद्धि । धातूनामनेकार्थकत्वादत्र द्यु द्योतने]

उदधिम् उदकधारक सागरम् १८ ५५ **उदधिः**= उदकानि धीयन्ते यस्मिँस्तत् समुद्रोऽन्तरिक्ष वा ३८ २२ [उदकोपपदे दधाते 'कर्मण्यधिकरणे च' इत्यधिकरणे कि । उदकस्य 'पेषवासवाहनधि च' अ० ६ ३ ५८. सूत्रेण उदादेश]

उदधीनिव उदकानि धीयन्ते येषु तानिव (सागरा-निव) ३ ४५ ३ [उदकोपपदे डुधाञ् धारणपोषणयो (जु०) धातोरधिकरणे कि. प्रत्यय. । उदकस्य उदादेश]

उदन् उदकमये जलाशये, प्र०—अत्र 'पद्दन्नोमास०' इत्युदकस्योदन्नादेश १ १०४ ३ [उदकशब्दात् सप्तमी । 'सुपा सुलुक्०' इति सप्तम्या लुक् । 'पद्दन्नोमास०' अ० ६ १ ६३ सूत्रेणोदकस्य 'उदन्' इत्यादेशश. । उदन् उदके नि० १० १२]

उदनयः उन्नेय (शिल्पविद्याविज्जन) २ १३ १२.

उदनष्टाम् उत्कृष्टतया प्रसिद्धाम् (प्रशसाम्) ७ ४५ २

उदनि उदके, प्र०—अत्र 'पद्दन्नोमास०' इत्युद-कस्योदन्नादेश. १ ११६ २४ [उदकप्राति० सप्तमी । उदकस्य 'उदन्' आदेश.]

उदनिमान् बहूदक (मेघ) ५ ४२ १४ [उदक प्राति० भूम्न्यर्थे मतुप् । उदकस्योदनिभावश्छान्दस]

उदनेव जलानीव ४ २० ६ [उदक-इव पदयो समास । उदकस्य 'उदन्' आदेश]

उदन्यवः आत्मन उदकमिच्छव (विद्वज्जना) ५ ५४.२ **उदन्यवे** आत्मन उदकानीच्छवे (जिज्ञासवे) ५ ५७ १ [उदकपदात् 'सुप आत्मन क्यच्' सूत्रेणात्मन इच्छाया क्यच् । 'क्याच्छन्दसी' ति उ प्रत्यय । 'पद्दन्नो-मास्०' सूत्रे शस्प्रभृतिष्विति प्रकारे प्रभृतिशब्द । तेन क्यच्यपि उदकस्य उदन्नादेश । उदन्युरुदन्यते नि० ११ १५]

उदन्या इव उदकमन्वन्धिन्य इव (धारा इव) २ ७ ३. [उदकशब्दाद् भवार्थे यत् । उदकस्य उदन्नादेशश्च]

उदन्वता बहूदकसहितेन (रथेन=मेघरूपेण) ५ ८३ ७ [उदकप्राति० भूम्न्यर्थे मतुप् । 'उदन्वानुदधौ च'

(अदा०) धातोर्लिट्]

उदीची या उदङ्ङुत्तर देशमञ्चति सा (दिक्) १५ १३ उत्तरा (दिक्) १४ १३ बाईं ओर (दिशा) प० वि०, अथर्व० ३ २७ ४ **उदीचीम्**=उत्तराम् (दिशम्) १० १३ **उदीचीः**=उत्तरा (दिश) १६ ६४ **उदीच्यै**=योदक् पूर्वाऽभिमुखस्य जनस्य वामभागमञ्चति तस्यै (दिशे) २२ २४ [उत्+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृग्०' अ० ३ २ ५९ सूत्रेण क्विन्। 'अनिदिताम्०' इति नलोपे 'अञ्चतेश्चोपसस्यानम्' अ० ४ १ ६. वा० इति स्त्रिया ङीपि भसञ्ज्ञायाम् 'अच' सूत्रेणाल्लोपे प्राप्ते 'उद ईत्' अ० ६ ४ १३९ इनीकारादेश। उदीची हि मनुष्याणा दिक् श० १ ७ १ १२ एषा (उदीची) वै देवमनुष्याणा शान्ता दिक् तै० २ १ ३ ५ एषा (उदीची) वै रुद्रस्य दिक् तै० १ ७ ८ ६ एषा वै वरुणस्य दिक् तै० ३ ८ २० ४ नक्षत्राणा वा एषा दिग्यदुदीची प० ३ १ साम्नामुदीची महती दिगुच्यते तै० ३ १२ ९ १ उदीच्येव यश गो० पू० ५ १५.]

उदीयुः उत्कृष्टतया प्राप्नुयु १६ ४९ [उत्+इण् गतौ (अदा०) धातोर्लिटि प्रथमबहुवचनम्]

उदीरत् सन्नुदन् ४ २ ७ **उदीरताम्**=उत्कृष्टतया प्रेरताम् १६.४९ **उदीरते**=कम्पयन्ति गच्छन्ति वा ५.८३ ३ उत्कृष्टतया कम्पयन्ति २ १७ १ प्राप्नुवन्ति १२ ८२ उत्कृष्टा जायन्ते १ ८१ ३ उत्कृष्ट कम्पन्ते गच्छन्ति ४ ४५ २ [उत्+ईर गतौ कम्पने च (अदा०) धातो शतृ। व्यत्ययेन परस्मैपदम्। अन्यत्र लोट् लट् च। 'बहुल छन्दसी' ति शपो लुङ् न भवति]

उदीरय उत्कृष्टतया गमय १ ४८ २ प्रेरयत ५ ४२ ३ **उदीरयताम्**=उत्कृष्टतया प्रेरयन्तु १ १२३ ६ **उदीरयन्ति**=उत्कृष्टतया प्रेरते १.१६८ ८ [उद्+ईर गतौ कम्पने च (अदा०) धातोर्णिचि लोट्, लटौ। ईर क्षेपे (चुरा०) धातोर्वा रूपाणि]

उदीरयन्ती कर्मसु प्रवर्त्तयन्ती (उषा) १ ११३ ८ [ईर क्षेपे प्रेरणे (चुरा०) धातो. शत्रन्तान् ङीप्]

उदीराणाः उत्कृष्टता प्राप्ता (राजप्रजाजना) ४.३९ ५. उत्कृष्ट ज्ञान प्राप्ता (मनुष्या) ७.४४ २ [उत्+ईर गतौ (अदा०) धातो शानच्। ताच्छील्ये चानश् वा]

उदीर्ध्वम् ऊर्ध्वं कम्पध्वम् १ ११३ १६ [ईर गतौ कम्पने च (अदा०) धातोर् उत्पूर्वाल् लोट्]

उदीर्ष्व उत्कृष्टमिच्छ ऋ० भू० २११ विचार और निश्चय रख स० प्र० १५२, १०.१८ ८ [ईर गतौ कम्पने च (अदा०) धातोर् उत्पूर्वाल्लोट्]

उदुद्धर्षसे उत्कृष्टतयाऽऽनन्दसि ४ २१ ९ [उत्+हृष तुष्टौ (दिवा०) धातोर्लट्। व्यत्ययेन शप् आत्मनेपद च]

उदूपथुः उत्कृष्टतया वपत १ ११७ १२ ऊर्ध्वं वपेथाम् १ ११६ ११ ऊर्ध्वं वपेतम् १ ११७ ५ [उत्+डुवप् बीजसन्ताने (भ्वा०) धातोर्लिटि मध्यमद्विवचनम्। 'असयोगात्०' इति लिट कित्वे यजादित्वात् सम्प्रसारणम्]

उदूहथुः ऊर्ध्वं वहत १ १८२ ७ [उत्+वह प्रापणे (भ्वा०) धातोर् लिटि मध्यमद्विवचनम्। यजादित्वात् किति सम्प्रसारणम्]

उदृचः उत्कृष्टा अधीता प्रत्यक्षीकृता ऋचो यस्मिँस्तस्य (यजस्य=शिल्पविद्यासिद्धस्य) ४.९ **उदृचि**=उत्कृष्टा ऋचो यस्मिन्नध्ययने तस्मिन् १ ५३ ११ [उत्-ऋच्पदयोर्बहुव्रीहि। 'विभाषा समासान्तो भवति' इति परिभाषाश्रयेण 'ऋक्पूरब्धू पथाम्०' इति समासान्तो न भवति]

उदेति उदय प्राप्नोति। १ १५७ १ सब जगत् मे उदित प्रकाशमान हो रहे हो आर्याभि० १ ४७ **उदेषि**=उत्कृष्टतया प्राप्तोऽसि १ ५०.५ [उत्+इण् गतौ (अदा०) धातोर्लट्]

उदैत् उदेति ३ १ ४ उदित प्रकाशितोऽस्ति ऋ० भू० १२१ **उदैति**=अधिष्ठातृत्वेन व्याप्नोति ऋ० भू० १५२ जाता है स० प्र० २४६, ३४ १ जाता आता है आर्याभि० २.४३, ३४ १ उद्गच्छति ३४ १ [उत्+इण् गतौ (अदा०) धातोर्लङ्। 'आटश्चे' ति वृद्धि]

उदैरत् प्रेरयति ७ २३ १ **उदैरतम्**=उत्कृष्टतया गच्छतम् १.११८ ६. [उत्+ईर गतौ कम्पने च (अदा०) धातोर्लङ्। 'बहुल छन्दसी' ति शपो न लुक्। व्यत्ययेन परस्मैपदम्]

उदैरयतम् प्रेरयतम् १ ११७ २४ उत्कृष्टतया गमयतम् १ ११२ ५ [उत्+ईर क्षेपे=प्रेरणे (चुरा०) धातोर्लङ्]

उदोजसम् उत्कृष्ट पराक्रमम् १२ ८१ [उत्+ओजस्पदयो. समास। ओज=उब्ज आर्जवे (तुदा०) धातो 'उब्जेर्बले बलोपश्च' उ० ४ १९२ इति बलोपो गुणोऽसुन् च प्रत्यय]

न्मभार्ये (मौत्रो धातु) धातोर्लुङ्। 'जॄस्तम्भुम्रुचु०' अ० ३.१.५८ सूत्रेण च्लेर्वाऽङादेशे पक्षे सिच्]

उदस्थात् उत्तिष्ठते ७ १६ ३ उत्तिष्ठति १ १६४ १७ उत्तिष्ठतु १७.४१ ऊर्ध्वमुदेति १ १२३ १ **उदस्थाम्**= उत्कृष्टतया तिष्ठेयम् ४ २८ उत्कृष्टतया प्राप्नुयाम् ४ २८ **उदस्थुः**=उत्तिष्ठन्तु ७.६० ४ [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्। 'गातिस्थाघुपाभूभ्य.' इति सिचो लुक्]

उदहार्य्यः या उदक हरन्ति ता. (स्त्रिय) १६ ७ [उदकोपपदे हृञ् हरणे (भ्वा०) धातोरण्प्रत्यये स्त्रिया ङीप्। उदकस्योदादेशश्छान्दस·]

उदा उदकेन ५.४१ १४ [उदकप्राति० तृतीयैकवचनम्। 'पद्दन्नोमास्' सूत्रेणोदन्नादेश। 'अयस्मयादीनि छन्दसि' इत्यजादावपि पदसञ्ज्ञाया नकारान्लोपो, न स्वरलोप.। इनादेशोऽपि न छान्दसत्वाद्]

उदाचरत् ऊर्ध्वं गच्छति ७ ५५ ७. [उत्+आङ्+चर गतौ (भ्वा०) धातोर्लङ्]

एनी ये इतस्ते (द्यावापृथिव्यौ) १ १४४ ६ [एतद सर्वनाम्नोऽन्वादेशे 'वा छन्दसि०' इत्येनादेश औ प्रत्ययेऽपि]

एनीम् प्राप्तु योग्याम् (श्रियम्) ५ ३३ ६ **एनीः**= एन्यो मृगस्त्रिय इव (अवनय =नद्य) ५ ८५ ६ [एनी नदीनाम निघ० १ १३]

एनोः एनयो (अध्यापकोपदेशकयो) प्र०—अत्र 'छान्दसो वर्णलोप०' इत्यकारलोप १ १३६ १ अनयोर्मध्ये ६ ६९ ८ [इदम सर्वनाम्न ओसि 'द्वितीयाटौस्स्वेन' अ० २ ४ ३४ सूत्रेणान्वादेश एनादेश । 'छान्दसो वर्णलोप' इति वा० सूत्रेणाकारलोप]

एन्यः या यन्ति ता नद्य, प्र०—एन्य इति नदीनाम निघ० १ १३, ५ ५३ ७ [एनी+जस् । एनी नदीनाम निघ० १ १३]

एम प्राप्नुयाम ४ ७ ९ [इण् गतौ (अदा०) धातोर्लङि उत्तमपुरुषबहुवचनम्]

एमन् प्राप्तव्ये स्थाने, प्र०—अत्र सप्तम्या लुक् 'एमन्नादिषु छन्दसि पररूपम्' इति वार्त्तिकेन पररूप च १३ १७ एति गच्छति तस्मिन् वायौ, प्र०—अत्र सप्तमी

ऐन्द्रम् परमैश्वर्यस्वरूप, सब विद्वानों मे अत्यन्त शोभायमान (ईश्वर) को आर्याभि० २.१८ इन्द्रस्यैश्वर्यस्येदम् (सद =सभाम्) १६ १८ इन्द्रस्य परमैश्वर्यस्येदधिकरणम् (ईश्वर सभाध्यक्षो वा) ५ ३० इन्द्रो विद्युद्देवता यस्य तद् विज्ञानम् १६ १५ ऐश्वर्यकारकम् (भवनम्= आरोग्यकर होमादिकम्) १६ २६ इन्द्रस्य विद्युत इदम् (बलम्) १६ ८ **ऐन्द्र:**=विद्युद्देवताक (उदान = य ऊर्ध्वमनिति) ६ २० इन्द्रदेवताक (अरुण पशु) २६ ५८ इन्द्रो जीवो देवताऽस्य स ऐन्द्र (प्राण =शरीरस्थो वायुविशेष) ६ २० [इन्द्रप्राति० 'सास्य देवता' (अ० ४ २ २४) अर्थे 'तस्येदम्' अ० (अ० ४ ३ १२०) अर्थे वाऽण् प्रत्यय]

ऐन्द्रवायव: इन्द्रो विद्युद्वायुश्च तयोरय सम्बन्धी (कर्त्तव्य) १८ १६ [इन्द्र-वायुपदयो समासे 'तस्येदम्' इत्यर्थेऽण् प्रत्यय । वाक् प्राणश्चैन्द्रवायव ऐ० २ २६]

ऐन्द्राग्न: इन्द्राग्निदैवत्य (सहित =दृढाङ्ग पशु) २६ २८ इन्द्रो वायुरग्निर्विद्युच्च ताभ्या निर्वृत्त (व्यवहार) १८ २० **ऐन्द्राग्ना:**=इन्द्राग्निदेवताका (सञ्चरा प्राणिन) २४ १५ वायुविद्युत्सञ्ज्ञिन भा०—वाय्वग्न्यादिगुणा पशव २४ ८ वायुविद्युद्देवताका (सञ्चरा =मार्गा) २४ १७ [इन्द्र-अग्निपदयो समासे 'सास्य देवता' इत्यर्थे तेन निर्वृत्तमित्यर्थे वाऽण् प्रत्यय]

ऐन्द्राबार्हस्पत्या: वायुसूर्यदेवताका (पशव) २४ ७ [इन्द्र-बृहस्पतिपदयो समासे 'सास्य देवता' इत्यर्थे 'दित्यदित्या०' इति ण्य प्रत्यय । 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेण पूर्वपदस्यानङ् । 'देवताद्वन्द्वे च' अ० ७ ३ २१ सूत्रेणोभयपदवृद्धि]

ऐन्द्रावैष्णवा: विद्युद्वायुदेवताका (पशव) २४ ७ [इन्द्र-विष्णुपदयो समासे 'सास्य देवता' इत्यर्थेऽण् । पूर्वपदवदानङ् उभयपदवृद्धिश्च]

ऐमि समन्तात्प्राप्नोमि ४ २ समन्तात् प्राप्नुयाम् प्र०—अत्र लिङर्थे लट् ३ ४१ सब प्रकार से प्राप्त होता हूँ स० वि० १४६, ३ ४१ [आङ्पूर्वाद् इण् गतौ (अदा०) धातोर्लट्]

ऐये गच्छे: ५ २ ८ [ईङ् गतौ (दिवा०) धातोर्लिङ् । आडागमश्छान्दस]

ऐरत् प्राप्नोति २ १५ ८ प्रापयेत् ४ ४ ६ ऐरयति २ १६ ६ कम्पयति यथाक्रम चालयति ४ ५ ६ ३ प्रेरयेत् ३ ३१ १५ प्रेरयति ३ ५५ २० **ऐरत**=प्रेरयन्ति ७ २३ १

ऐरतम्=गच्छतम् १ ११८ ६. [ईर गतौ कम्पने च (अदा०) धातोर्लङ् । 'बहुल छन्दसी' ति शपो लुक् न । व्यत्ययेन परस्मैपदम्]

ऐरम् प्रेरयेयम् ४ २६.३ [ईर गतौ कम्पने च (अदा०) धातोर्लङ् । व्यत्ययेन परस्मैपदम् । छान्दसत्वाच् छपो लुङ् न]

ऐरयत् कम्पयति २ १७ १ गमयति १ ५१.११ प्रेरयति २ २० ७ प्रेरयेत् ६ ५६.३ वीरयत् वीरयत्यूर्ध्वमधो गमयति, प्र०—अत्र लडर्थे लुङ् १ ७ ३. **ऐरयतम्**=प्रापयतम् ६ ७२.३. गमयतम् १ ११२ ५. प्रेरयतम् १ ११७ २४ **ऐरयन्**=प्राप्नुवन्ति, प्र०—अत्र लडर्थे लट् १ २८ **ऐरयम्**=प्रेरयेयम् ४ ४२ ३. [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लट्]

ऐरय: ईर्ष्व २.१७ ३ [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लङि मध्यमैकवचनम्]

ऐरयेथाम् प्रेरयेतम् ६ ६६ ८ चालयेथाम् १ १५७ ५ [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लङि च रूपम्]

ऐरिरे समन्तात् प्राप्नुवन्त, प्र०+ईर गतौ कम्पने च, इत्यस्याऽमन्त्र इति प्रतिषेधादामोऽभावे प्रयोग १ ६ ४, [ईर गतौ कम्पने च (अदा०) धातोराङ् पूर्वाल् लिट् । आमोऽभावश्च छान्दस]

ऐलबृदा: इलाया पृथिव्या इमानि वस्तुजातानि ऐलानि, तानि ये वर्धयन्ति ते, भा०—पृथिवीरक्षका वायव, प्र०—अत्र वर्णव्यत्ययेन धस्य द, इगुपधलक्षण कश्च १६ ६० [इला पृथिवीनाम निघ० १ १ तत 'तस्येदम्' इत्यर्थेऽण् प्रत्यय । ऐलोपपदे वृधु वृद्धौ (भ्वा०) धातोरिगुपधलक्षण क । अन्तर्भावितण्यर्थ. । वर्णव्यत्ययेन धकारस्य दकार]

ऐषन्त इच्छेयु: १ १२६ ५ [ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लङ् । धातूनामनेकार्थत्वाद् इच्छार्थेऽपि]

ओ सम्बोधने १ १७७ ५ आभिमुख्ये १ १६५ १४ अवधारणे १ ११३ ११ प्रेरणेषु २ ३४ १५]

ओकस: सर्वनिवासाऽर्थस्याऽऽकाशस्य १ ३० ६ **ओक:**=गृहम् ४ १६ १५ स्थानम् २ १६ १ निवासस्थानम् ६ ४१ १ **ओकसि**=गृहे ५ ३ ३ ४ **ओकांसि**= निवासान् ३४ ५७ समवेतानि गृहाणि २ ३८ ५ [अवतिरक्षणहेतुर्भवतीति विग्रहे अव रक्षणादिषु (भ्वा०) धातोर्बाहुलकात् कक् प्रत्यय । उच्यते यत्रेति विग्रहे उच समवाये (दिवा०) धातोर्वा बाहुलकाद् औणादिकोऽसुन्

एवावदस्य एवान् प्राप्तान् गुणान् वदन्ति येन तस्य (क्षत्रस्य=राष्ट्रस्य) ५ ४४ १० ['एव' इति व्याख्यातम्। तदुपपदे वद व्यक्ताया वाचि (भ्वा०) धातो 'पुसि सञ्ज्ञाया घ प्रायेण' अ० ३ ३ ११८ सूत्रेण करणे घ प्रत्यय]

एवो एव ४ १२ ६

एषते (आ+ईषते) अभिगच्छति ५ ६७ ५ प्राप्नोति १ १४६ १ हिनस्ति ५ ८६ ३ [आङ् पूर्वाद् ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लट्]

एषस्य सर्वत्र प्राप्तव्यस्य (विष्णो=परमेश्वरस्य) ७ ४० ५ ऐश्वर्यवत (विष्णो=ईश्वरस्य) २ ३४ ११ [इण् गतौ (अदा०) धातोर्बाहु० औणादिक स प्रत्यय]

एषः कार्यकारणसङ्गत्या यदनुमीयते (योनि=असम प्रमाणम्) ८.४१ [इण् गतौ (अदा०) धातोर्बाहुलका-दौणादिक स प्रत्यय]

एषि प्राप्नोषि १ १२३ १० [इण् गतौ (अदा०) धातोर्लट्। मध्यमैकवचनम्]

एषे एतु प्राप्तुम् ५ ४१ ५ गन्तुम् ५ ६६ ३ [इण् गतौ (अदा०) धातोस्तुमर्थे 'तुमर्थे सेसेन०' इति सेन् प्रत्यय]

एषे (आ-इषे) समन्तादिच्छामि ५ ४६ १ सब सुख प्राप्त कराने को समर्थ होवे स० वि० १०५, ५ ४१ ७ [आङ्+ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लट्]

एषे समन्तादिच्छवे (अत्रये=विदुषे जनाय) १ १८० ४ [आङ्पूर्वाद् इषु इच्छायाम् (तुदा०) धातो कर्त्तरि क्विप्। ततश्चतुर्थ्या एकवचनम्]

एषो इयम् (उषा=प्रातर्वेला) १ ४६ १

एष्टयः समन्तादिष्टयो विद्वत्पूजा सत्सङ्गो विद्या-दानञ्च याभ्यस्ता (क्रिया) १८ ४३ **एष्टः**=भा०— समन्तात् पूजितु योग्य (विष्णु=परमेश्वर) २३ ४६ [आङ्+यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो. स्त्रिया क्तिन्। किति सम्प्रसारणम्। ऋक्सामानि वाऽएष्टय ऋक्सामैर्ह्याशासनऽइनि नोऽस्तिवत्य नोऽस्त्विति श० ६ ४ १ १२]

एष्टा पर्यालोचक (विद्वज्जन) १ १८४ २ **एष्टाः**=सर्वत इष्टकारिण (राय=धनसमूहान्) ५ ७. [इष गतौ (दिवा०) धातो कर्त्तरि तृच्। अन्यत्र आङ्-पूर्वाद् इषु इच्छायाम् (तुदा०) धातो क्त]

एष्टौ समन्ताद् यज्ञ+क्रियायाम् ६ २१ ८ [आङ् यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो स्त्रिया क्तिन्। सप्तम्या एकवचनम्]

एहि (आ-इहि) आगच्छ ६ १६ १६ आगच्छन्ति प्र०—अत्र व्यत्यय ५ ८३ ६ प्राप्नुहि प्रापयति वा, प्र०—अत्र पुरुषव्यत्ययो लडर्थे लोट् च १ ६ १ समन्तात् प्राप्नुहि प्राप्नोतु वा ४ २० समन्तात प्राप्नुयात्, प्र०— अत्र व्यत्यय ३ २७ अध्ययनेनैवैति प्राप्नोति १ १५ अभित प्राप्नुहि, समन्तादेति, अ०—सञ्जानीहि ५ ६ [आङ् पूर्वादिइण् गतौ (अदा०) धातोर्लोट्]

एहिमायासः आ समन्ताच्चेष्टाया प्रज्ञा येषान्ते (विश्वेदेवास=समस्तवेदपारगा विद्वास) प्र०—चेष्टार्थ-स्याऽऽङ्पूर्वस्य ईहधातो 'सर्वधातुभ्य इन्' उ० ४ ११६ इतीन्प्रत्ययान्त रूपम् 'मायेति प्रज्ञानामसु पठितम्' निघ० ३ ६, १ ३ ६ [एहि-मायापदयो समास। एहि= आङ्+ईह चेष्टायाम् (भ्वा०) धातो 'सर्वधातुभ्य इन्' उ० ४ ११६ सूत्रेण इन्। माया प्रज्ञानाम निघ० ३ ६]

ऐक्षेताम् पश्यत ३२.७ [ईक्ष दर्शने (भ्वा०) धातोर्लङि प्रथमपुरुषद्विवचनम्]

ऐजन् एजन्ति १ ६३ १ [एजृ कम्पने (भ्वा०) धातोर्लङ्]

ऐट्ट प्रशसेत ३ ४८ ३ [ईड स्तुतौ (अदा०)धातोर्लङ्]

ऐडम् इडाया वाचो व्याख्यात्री साम १३ ५७ **ऐडेन**=इडाया अन्नस्येद सस्करण तेन १५ ७ [इळा वाङ् नाम निघ० १ ११ अन्ननाम निघ० २ ७ इळा-प्राति० व्याख्यानार्थे तस्येदमर्थे वाऽण् प्रत्यय]

ऐत् प्राप्नोति ५ ३० ६ **ऐत**=प्राप्नुत ४ ३५ ३ [इण् गतौ (अदा०) धातोर्लङ्]

ऐतन विज्ञापयत १ ११० ३ विजानीत १ १६१ ६ प्राप्नुत १ ११० २ [इण् गतौ (अदा०) धातोर्लङि मध्यम-बहुवचनम् तस्य तनवादेशश्छान्दस]

ऐताम् प्राप्नुत १४ ३० **ऐतु**=समन्तात्प्राप्नोतु ३३ ३४ [इण् गतौ (अदा०) धातोर्लङि प्रथमद्विवचनम्। ऐतु=आङ्+इण् गतौ+लोट्]

ऐधेव एधै काष्ठैरिव १ १६६ १ [ऐध-इव पदयो समास। एध=ञिइ-धी दीप्तौ (रुधा०) धातोर्घञि 'अवोदैध०' इति नलोप। एधप्राति० 'तस्येदम्' इत्यर्थेऽण्, स्वार्थे वाऽणि 'ऐध' इति रूपम्]

ऐनोः प्रेरये ४ १६ ७ **ऐनोत्**=प्राप्नोति, प्र०— अत्रेणधातोर्व्यत्ययेन श्नु १ ६६ ५ [इण् गतौ (अदा०) धातोर्लङ्। व्यत्ययेन शप श्नु]

ओरिणम् दुःखान्धकारस्यापनयनम् १ ६१ १४ **ओण्योः**=द्यावापृथिव्यो, प्र०—ओण्योरिति द्यावापृथिवीनामसु पठितम्, निघ० ३ ३०, ४.२५ [ओणृ अपनयने (भ्वा०) धातो 'इक् कृष्यादिभ्य' अ० ३ ३ १०८ वा० सूत्रेण इक् प्रत्यय । ओण्यौ द्यावापृथिव्योर्नाम । निघ० ३ ३०]

ओतम् सूत्रे मणिगणा इव प्रोतम्, भा०—सञ्चितम् (ज्ञानम्) ३४ ५ सर्वव्यापक (चित्त=चित्त को) स० प्र० २४७, ३४४ **ओतः**=ऊर्ध्वतन्तु पट इव ३२ ८ [आङ्+वेञ् तन्तुसन्ताने (भ्वा०) धातो क्त । 'ग्रहिज्या०' इति सूत्रेण किति सम्प्रसारणम्]

ओतवै विस्ताराय १ १६४ ५ [आङ्+वेञ् तन्तुसन्ताने (भ्वा०) धातोस्तुमर्थे तवै प्रत्यय । 'छन्दस्युभयथा' इति सार्वधातुकत्वे सार्वधातुकमपिदिति कित्वे च ग्रह्यादिसूत्रेण सम्प्रसारणम्]

ओतुम् रचयितुम् ६ ६ २ [आङ्+वेञ् तन्तुसन्ताने (भ्वा०) धातोस्तुमुन् । 'छन्दस्युभयथा' इति सार्वधातुकत्वे कित्वे सम्प्रसारणम्]

ओतुम् रक्षकम् (तन्तु=जगत्कारणम्) ६ ६ ३ [अव रक्षणादिपु (भ्वा०) धातो 'सितनिगमिमसि०' उ० १ ६६. सूत्रेण तुन् । ज्वरत्वर०' इति सूत्रेणोपधावकारयोरूठ् । ततो गुणे रूपम्]

ओदती उन्दन कुर्वन्ती (उषा) १ ४८ ६ [उन्दी क्लेदने (रुधा०) धातोराङ्पूर्वाच्छत्रन्तान् ङीप् । छान्दसत्वात् श्नमोऽभाव । ओदती उषो नाम । निघ० १ ८]

ओद्मन् ओषधीपु, प्र०—अत्र सप्तमी-लुक् १३ ५३ [उन्दी क्लेदने (रुधा०) धातोर्मनिन्नौणादिक । 'अवोदैधौद्म०' इति न लोपो गुणश्च निपात्यते]

ओपमिमीहि अभित श्रेष्ठैरुपमितान् कुरु १ ८४ २० [आङ्+उप+माङ् माने (जुहो०) धातोर्लोट् । व्यत्ययेन परस्मैपदम्]

ओपशमिव अत्यन्त सम्बद्धम् (द्या=प्रकाशम्) १ १७३ ६ ['ओ' इत्यवधारणे, तदुपपदे पश बन्धने (चुरा०) धातोर्घञर्थे क । तत =ओपशम्-इव-पदयो समास]

ओ३म् योऽवति सकल जगत्तदाख्या ४० १७ एतन्नामवाच्यमीश्वरम् ४० १५ अवतीत्योम्, रक्षा करने से यह ईश्वर का नाम है, म० प्र० १४, ४० १७ ईश्वर-वाचको यज्ञो वेदविद्या वा, प्र०—ओ३म् ख ब्रह्म, अत्र 'अवतेष्टिलोपश्च' उ० १ १४२ अनेनावधातोर्मन् प्रत्ययोऽस्य टिलोपश्च, भ०—हे ओङ्कारवाच्यबृहस्पते, भा०—एतत्परमेश्वरस्यैव नाम २ १३ ओंकार शब्द परमेश्वर का सर्वोत्तम नाम है, इसमे अ, उ और म् तीन अक्षर मिलकर 'ओ३म्' समुदाय हुआ, इस एक नाम से परमात्मा के बहुत नाम आते है, जैसे—अकार से विराट्, अग्नि और विश्वादि, उकार से हिरण्यगर्भ, वायु और तैजसादि, मकार से ईश्वर, आदित्य और प्राज्ञादि स० प्र० ११ रक्षा करने वाला (ईश्वर), स० वि० ११४, १० ८५ ४४ यह मुख्य परमेश्वर का नाम है जिस के साथ अन्य सब नाम लग जाते है स० वि० ७५, ३६३ [अव रक्षणगतिकान्तिप्रीत्यादिपु (भ्वा०) धातो 'अवतेष्टिलोपश्च' उ० १ १४२ सूत्रेण मन्प्रत्ययो टिलोपश्च प्रत्ययस्यैव । धातोरुपधावकारयोरूठ् च चादिपु पाठादव्ययम् । तदेतदक्षर (ओङ्कार) ब्राह्मणो य काममिच्छेत् त्रिरात्रोपोषित प्राङ्मुखो वाग्यतो बर्हिष्युपविश्य सहस्रकृत्व आवर्त्तयेत् सिद्ध्यन्त्यस्यार्था सर्वकर्माणि च गो० पू० १ २२ (ओङ्कारस्य) को धातुरित्याप्लृधातुरवनिमप्येके रूपसामान्यादर्थसामान्यान्नेदीय, तस्मादापेरोङ्कार सर्वमाप्नोतीत्यर्थ गो० पू० १ २६ को विकारो च्यवते । प्रसारणमाप्नोतेराकारपकारौ विकार्यादित ओङ्कारो विक्रियते । द्वितीयो मकार एव द्विवर्ण एकाक्षर ओमित्योङ्कारो निर्वृत्त गो० पू० १.२६ ते (देवा) ओङ्कार ब्रह्मण पुत्र ज्येष्ठ ददृशु गो० पू० १ २३ लातव्यो गोत्रो, ब्रह्मण पुत्रो, गायत्र छन्द, शुक्लो वर्ण., पुसो वत्सा रुद्रो देवता ओङ्कारो वेदानाम् गो० पू० १ २५ तासामभिपीडितानां (व्याहृतीनां) रस प्राणेदत् । तदेतदक्षरमभवदोमिति यदेतत् जै० उ० १ २३ ७ तानि (भूर्भुव स्व) शुक्राण्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त अकार उकारो मकार इति । तानेकधा समभरत्तदेतद् ओ३मिति ऐ० ५ ३२, ओमिति वै साम जै० उ० १ ६ २ ओमिति मन जै० उ० १ ६ २ ओमित्यथर्वणा शुक्रम् गो० पू० २ २४ ओमितीन्द्र जै० उ० १ ६ २ ओमित्यसौ योऽसौ (सूर्य) तपति ऐ० ५ ३२ हन्तेति चन्द्रमा ओमित्यादित्य जै० उ० ३ ६ २ ओमिति वै स्वर्गो लोक ऐ० ५ ३२ ओमित्येतदेवाक्षरमृतम् जै० उ० ३ ३६ ५ तदेत् सत्यमक्षर यदोमिति । तस्मिन्नाप प्रतिष्ठिता जै० उ० १ १० २ तस्मादोमित्येव प्रतिगृह्णीयात् तद्धि सत्य तद्देवा विदु श० ४ ३ २ १३ ओमित्यृच प्रतिगर एव तथेति गाथाया ओमिति वै दैव तथेति मानुषम् ऐ० ७ १८ यद्वै नेत्यृच्योमिति तत् श० १४ १ ३० एतद्ध वा (ओमिति) अक्षर

प्रत्यय (उरगा० ४.२१६)। कुत्वन्तु न्यड्क्वादित्वात्। ओक इति निवासनामोच्यते नि० ३ ३ गृहा वा ओका निरु० ८ २६]

ओकिवांसा सङ्गतौ सम्बद्धौ (इन्द्राग्नी=वायु-विद्युतौ) ६ ५९ ३ [आङ्पूर्वाद् उच समवाये (दिवा०) धातोर्लिट क्वसु। 'सुपा सुलुग्०' इत्याकार। छान्दस रूपम्]

ओक्ता समन्तादुक्तानि प्रशंसितानि (अन्नानि धनानि वा) १ ६३ ६ [आङ्पूर्वाद् वच परिभाषणे (अदा०) धातो क्त। 'शेश्छन्दसि बहुलम्' इति शेर्लोप]

ओक्यम् ओकेषु गृहेषु साधु (विद्योपदेशम्) १.१३३ ५ ['ओक' इति व्याख्यातम्। तत 'तत्र साधु' इत्यर्थे यत्]

ओक्ये गृहे ३ ४२ ८ घर मे, आर्याभि० १ ३७, ऋ० १ ६ २१ १३ ['ओक' इति व्याख्यातम्। ततो भवार्थे यत्]

ओक्षतम् समन्तात् सिञ्चेताम् २ १ ६ [उक्ष सेचने (भ्वा०) धातोर्लेडि मध्यमद्विवचनम्]

ओजस. पराक्रमस्य १ ५२ १२ बलस्य ५ ३२ ६ अपने सामर्थ्य से, आर्याभि० १ १३, ऋ० १ ५२ १२ **ओजसा**=जलेन, प्र०—ओज इत्युदकनाम, निघ० १ १२, २ २२.३ उदकेन सह ३४ ७ स्वबलेन १ १३० ६ प्रशस्त शरीरात्मसभा-सेनाबलेन ८ ३६ बलेन वेगेन वा १ १६ ८ स्वस्य शरीरबुद्धिबलेन सैन्येन वा १७ ३८ अनन्तबलेन, प्र०—ओज इति बलनामसु पठितम्, निघ० २ ६, १ ११.८ पराक्रमेण, कोमलेन कर्मणा वा १ १२७ ४ विद्याबलेन १ ५५ ६ सामर्थ्येन ३० ४१ बलादिगुणसमूहेन १ १६ ४ **ओजसे**=बलयुक्ताय (सभाध्यक्षाय) १ ५७ ५ पराक्रमाय ८ ३६ आत्मबलाय ७ २८ **ओज:**=वेगवद् बलम् ४ ७ १० जलवेग, प्र०—ओज इत्युदकनाम, निघ० १ १२, २८ ५ पराक्रमकारि (अ०—वैद्युत तेज ५ ५ पराक्रमस्वरूप (ईश्वर), आर्याभि० २ ६, १६ ६ पराक्रम को आर्याभि० २ ६, १६ ६. महाप्राणवत्त्वम् १६ ६ पराक्रमयुक्त (अ०—परमात्म परमात्मा) १० १५ जलमिव बलम् ५ ३१ ७ न्यायपालनोऽन्वित पराक्रम, ऋ० भू० १०२ सत्य विद्याबलम्, ऋ० भू० १४६ बलकरमन्नादिकम् ६ ४६ ७ बलपराक्रम ३४ ५१ मानस बलम् ३६ १ शरीरस्य तेज १८ ३ अनन्त सामर्थ्य-युक्त (ईश्वर) स० प्र० २४६, १६ ६ प्राणधारणम् ६ १६ ६ वीर्य्यम् ५ ३२ १० बलकरमन्नादिकम् ६ ४६ ७

ओजांसि=शरीरात्मन पराक्रमान् १ ८० १५ [उब्जति कोमलो भवतीति विग्रहे उब्ज आर्जवे (तुदा०) धातो 'उब्जेर्बले बलोपश्च' उ० ४ १६२ सूत्रेणासुन् प्रत्यय। ओजो बलम्। नि० ६ २३ ओज =उदकनाम निघ० १ १२ बलनाम निघ० २ ६ ओजसा बलेन। ओज ओजतेर्वा उब्जतेर्वा नि० ६ ८ ओज सह सह ओज कौ० ३ ५ वज्रो वा ओज श० ८ ४ १ २०]

ओजस्वती: विद्याबलपराक्रमयुक्ता राजस्त्रिय, जितेन्द्रिया (राजस्त्रिय) १० ३ ['ओज' इति पूर्वपदे व्याख्यातम्। ततोऽतिशायने मतुपि स्त्रिया ङीप्]

ओजायमानम् ओज पराक्रममिवाऽऽचरन्तम् (अहिं=मेघम्) २ १२ ११ बलयन्तम् (अहिं=मेघम्) ३ ३२ ११ **ओजायमान:**=ओज इवाऽऽचरन् (जन) १ १४० ६ [ओजस्पदादाचारेऽर्थे 'कर्त्तु क्यङ् सलोपश्च' अ० ३ १ ११ सूत्रेण क्यङ् सलोपश्च। तत शानच्]

ओजिष्ठ ! अतिशयेनौजस्विन् (राजन्) १ १२६ १० **ओजिष्ठम्**=अतिशयेन बलप्रदम् (श्रव =अन्न श्रवण वा) ६ ४६ ५ अतिशयेन बलिष्ठम् (मेद =स्नेह) ३ २१ ५ अतिशयेन पराक्रमयुक्तम् (द्युम्न=यशोधन वा) ५ १० १ **ओजिष्ठ:**=अतिपराक्रमी (इन्द्र =विद्वान् राजा) ८ ३६ अतिशयेनौजस्वी, भा०—ब्रह्मचर्येण शरीरात्मबलयुक्तो विद्वान् (राजा) ३३.६४ **ओजिष्ठाय**= अतिशयेनौजो विद्यते यस्मिन् विद्या-व्यवहारे तस्मै ५ ५ ['ओजस्' इति व्याख्यातम्। ततोऽतिशायन इष्ठन्। 'टे' अ० ६ ४ १५५ सूत्रेणेष्ठनि परे टेर्लोप]

ओजिष्ठया अतिशयेन पराक्रमयुक्तया (दक्षिणया) १ १६६ ४ [ओजस्प्राति० अतिशायन इष्ठन्। तत स्त्रिया टाप्]

ओजिष्ठेभि: अतिशयेन बलादिगुणयुक्तैर्नरोत्तम-सैन्यै ४ २० १ बलिष्ठैर्योद्धृभि २० ४८ ['ओजिष्ठ' इति व्याख्यातम्। ततो भिस ऐसादेशो न]

ओजीय: बलिष्ठम् (विश्व=जगत्) २ ३३ १० [ओजस्प्राति० अतिशायन ईयसुन्। टेर्लोप]

ओजीयान् अतिशयेन पराक्रमी (राजा) ६ २० ३ [ओजस्प्राति० अतिशायन ईयसुन्। टेर्लोप]

ओजोभि: पराक्रमादिभि ७ ५६ ६ [ओजस्प्राति० तृतीयाबहुवचनम्। 'ओजस्' इति व्याख्यातम्]

ओज्मानम् पराक्रमयुक्त रसम् २६ ५३ बलकारिणम् (मेघमिव सुखम्) ६ ४७ २७.

सर्वासामोषधीना रसो यत्पय को० २ १ अग्नेर्वा एषा तनू यदोषधय तै० ३ २ ५ ७ यद्वग्नो देवा ओषधया वनस्पतयस्तेन को० ६ ५ ओषधयो वै पशुपतिस्तस्माद् यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति श० ६ १ ३ १२ ओषधयो वै मुद, ओषधिभिर्हीद सर्व मोदते श० ६ ४ १ ७ ओषधयो बर्हि ऐ० ५ २८ श० १ ३ ३ ६ तै० २ १ ५ १ ओषधय खलु वै वाज तै० १ ३ ७ १ ओषधयो मधुमती तै० ३ २ ८ २ रसो वा एव ओषधिवनस्पतिषु यन्मधु ऐ० ८ २० सौम्या ओषधय श० १२ १ १ २ सोम ओषधीनामधिराज गो० उ० १ १७ सोमो वै राजा ओषधीनाम् कौ० ४ १२ सोमो वा ओषधीना राजा तै० ३ ६ १७ १ औषधो वै सोमो राजा ऐ० ३ ४० ओषधिलोको वै पितर श० १३ ८ १ २० जगत्य ओषधय श० १ २ २ २ ओषधयो वै देवाना पत्न्य श० ६.५ ४ ४. मैनान्य वा एतदोषधीना यद्यवा ऐ० ८ १६ साम्राज्य वा एतदोषधीना यन्महाव्रीहय ऐ० ८ १६ (प्रजापति) विष्णोरध्योषधीरसृजत तै० २ ३ २ ४]

ओषधिः सोमादि १ १६६ ५ [पूर्वपदे व्याख्यातम्]

ओहते प्राप्नोति ५ ५२ १० व्यवहारान् वहति, प्र०—अत्र 'वाच्छन्दसि' इति सम्प्रसारण लघूपधगुण १ १७६ ४ वहति प्रापयति ५ ४२ १० वितर्कयति ७ १६ ११ प्राप्नोति प्रापयति वा ५ ५२ ११ [वह प्रापणे (भ्वा०) धातोर्लट्। छान्दसत्वात् सम्प्रसारण लघूपधगुण। ऊह् वितर्के (भ्वा०) धातोर्वा छान्दस रूपम्]

ओहते वितर्कयुक्ताय (जनाय) २ २३ १६ [ऊह वितर्के (भ्वा०) धातो शत्रन्ताच्चतुर्थी। अलघूपधत्वेऽपि छान्दसत्वाद् गुण]

ओहम् ओहति प्राप्नोति येन तम् (स्तोम=स्तुतिम्) १ ६१ १ **ओहेन**=बीजादिस्थापनेन '१ १८० ५ **ओहैः**= अर्दकै कर्म्मभि ४ १० १ विद्यासुखप्रापकै (स्तोमै= वेदभागै) १५ ४४ रक्षणादिभि १७ ७७ [वह प्रापणे (भ्वा०) धातोर्घञर्थे क प्रत्यय। छान्दसत्वात्सम्प्रसारणे कृते गुण]

ओहसा प्राप्तेन बलेन वेगेन वा ६ ६७ ६ [वह प्रापणे (भ्वा०) धातोरसुन्। छान्दसत्वात् सम्प्रसारणे कृते गुण]

ओहसानम् तर्कगम्यम् (अहि=मेघम्) ६ १७ ६ [ऊह वितर्के (भ्वा०) धातोर्घञर्थे क। छान्दसत्वाद् गुण। ओहोपपदे षण सम्भक्तौ (भ्वा०) धातोरण् प्रत्यय]

ओहानम् त्यजन्तम् (मेघम्) ५ ३० ६ [ओहाक् त्यागे (जु०) धातो 'कृत्यल्युटो बहुलमि' ति कर्त्तरि ल्युट्। छान्दसत्वादोकारानुबन्धस्य लोपो न]

ओहानः रक्षक (विद्वज्जन) ६ ५२ ५ [ओहाङ् गतौ (जु०) धातो पूर्ववदल्युट् कर्त्तरि]

औषधीः ओषध्य २० १६ [ओषधिप्राति० 'कृदिकारादक्तिन' इति वार्तिकसूत्रेण ङीप्]

औक्षन् सिञ्चन्ति ३ ६.६ सिञ्चेरन् ३ ३ ७ [उक्ष सेचने (भ्वा०) धातोर्लङ्]

औचथ्यम् उचितेषूचितेषु कर्मसु साधुम् (विद्वज्जनम्) १ १५८ ४ **औचथ्यः**=प्रशंसितेषु भव (रेक्ण=धनम्) १ १५८ १ [उच समवाये (दिवा०) धातोर्बाहुलकादौणादिकोऽथ प्रत्यय, स च णित्। औचथप्राति० साध्वर्थे भवार्थे वा यत्]

औच्छत् निवासयति ५ ३० १४ **औच्छः**= विवासयति ५ ७६ २ निवासवती वर्त्तते ५ ७६ ३ [उच्छी विवासे (भ्वा०) धातोर्लङ्]

औद्भिदम् उद्भिनत्ति दु खानि येन तदेव, भा०— विद्वद्भि सह परामृश्य सत्यासत्यनिर्णय (हिरण्य=तेजो सुवर्णादिकम्) ३४ ५० [उत्+भिदिर् विदारणे (रुधा०) धातोर्मूलविभुजादित्वात् क। तत स्वार्थे प्रज्ञादित्वादण्]

औद्भिद्यम् उद्भिदा पृथिवी भित्त्वा जाताना भावम् (वृक्षादि) १८ ६ [उद्भिदप्राति० भावे ष्यञ्]

औपद्रष्ट्र्याय उपद्रष्ट्रत्वाय ३० १३ [उपद्रष्ट्रप्राति० भावे कर्मणि वा ष्यञ्]

औब्जः य उब्जत्यार्जवी करोति तेन निर्वृत्त स (सूर्यलोक) १.५६ ५ [उब्ज आर्जवे (तुदा०) धातोरच् कर्त्तरि। ततो निर्वृत्तार्थेऽण् प्रत्यय]

औब्जः आर्जवे भव २ २३.१८ [उब्ज आर्जवे (तुदा०) धातोर्घञर्थे क। ततो भवार्थेऽण्]

औब्जत् उब्जति सरली करोति १ ८५ ६ [उब्ज आर्जवे (तुदा०) धातोर्लङ्]

औभ्नात् मृद्नाति ४ १६ ४ [उभ उम्भ पूरणे (तुदा०) धातोर्लङ् विकरणव्यत्ययेन शप श्ना। मृद्नात्यर्थे धातूनामनेकार्थकत्वात्]

और्णनाभम् ऊर्णा नाभ्या यस्य तदपत्यमिव (वृत्र= मेघम्) २ ११ १८ [ऊर्णा-नाभिपदयो समास। समासान्तोऽच् प्रत्यय। ततोऽपत्यार्थेऽण्]

और्णोत् ऊर्णुत आच्छादयति १७ १८ स्वीकरोति

वेदाना त्रिविष्टपम् जैं० उ० ३ १९ ७ एतद् (ओमिति) एवाक्षर त्रयी विद्या जैं० उ० १ १८ १० स (ब्रह्मा) ओमित्येतदक्षरमपश्यद् द्विवर्णञ्चतुर्मात्र सर्वव्यापि सर्व-विभ्वयातयाम ब्रह्म गो० पू० १ १६ एप (ओमित्यक्षरम्) उ ह त्वाव सरस जैं० उ० १ ८ ५ यथा सूच्या पलशानि-सन्तृण्णानि स्युरेवमेतेना (ओमिति) अक्षरेणेमे लोका सन्तृ-ण्णा जैं० उ० १ १० ३ एवमेवैत्र विद्वान् ओमित्येतदेवाक्षर समारुह्य यददोऽमृत तपति तत्प्रपद्य ततो मृत्युना पाप्मना व्यावर्त्तते जैं० उ० १ १८ ११]

ओमभि: रक्षणादिकारकै (ओपवै) ५ ४३ १३ [अव रक्षणादिपु (भ्वा०) धातोर्मनिन्। उपधावकारयोरूठ् धातो]

ओमानम् रक्षादिकर्त्तारम् (जनम्) ६ ५०.७ रक्षणा-दिसत्कर्मपालकम् (ऊर्ज=पराक्रमम्) १ ११८ ७ ['ओमन्' इति पूर्वपदे व्याख्यातम्। ततो द्वितीयैकवचनम्]

ओमास: अवन्ति सद्गुणै रक्षन्ति ते (देवास = विद्वज्जना) ७ ३ ३ रक्षका, ज्ञानिनो विद्याकामा उपदेश-प्रीतयो, विज्ञाननृप्तयो याथातथ्यावगमा, शुभगुणप्रवेशा, सर्वविद्याश्राविण, परमेश्वरप्राप्तौ व्यवहारे च पुरुपार्थिन, शुभविद्यागुणयाचिन, क्रियावन्त, सर्वोपकारमिच्छुका, विज्ञाने प्रशस्ता आप्ता सर्वशुभगुणालिङ्गिनो दुष्टहिंसका शुभगुणदाता: सौभाग्यवन्तो ज्ञानवृद्धा, (विश्वेदेवास = सर्वे विद्वास), प्र०—अव रक्षण-गति-कान्ति-प्रीति-तृप्त्य-वगम-प्रवेश-श्रवण-स्वाम्यर्थयाचन-क्रियेच्छा-दीप्त्यवाप्त्या-लिङ्गन-हिंसा-दान-भाग-वृद्धिपु, इत्यस्माद् 'अविसिविसि-शुपिभ्य कित्, इत्यनेनौणादिकेन सूत्रेणाऽवधातोरोमशब्द सिध्यति। ओमास इति पदनामसु पठितम्, निघ० ४ ३, १ ३ ७ [अव रक्षणादिपु (भ्वा०) धातोरौणादिको मन् प्रत्यय। ततो जसोऽसुगागम। ओमास पदनाम निघ० ४ ३ ओमास अवितारो वा ऽवनीया वा नि० १२ ४०]

ओम्यावतीम् अवन्ति त ओमास्तेपु भवा प्रशस्ता विद्या तद्वतीम् (नीतिम्) १ ११२ २० ['ओम' इति पूर्वपदे व्याख्यातम्। ततो भवार्थे यत् प्रत्यये मतुपि च स्त्रियां डीप्]

-**ओम्यावन्तम्** ये अवन्ति ते ओमानस्तान् ये यान्ति प्राप्नुवन्ति त ओम्या, एते प्रशस्ता विद्यन्ते यस्य तम् (विद्वज्जनम्) १ ११२ ७ [अव रक्षणादिपु (भ्वा०) धातोर्मनिन् प्रत्यय ओमन्। तदुपपदे या प्रापणे (अदा०) धातोरण् प्रत्यय। ततोऽतिशायने मतुप्]

ओर्णुत आच्छादयत २.१४.३. आङ्+ऊर्णुञ् आच्छादने (अदा०) धातोर्लोट्]

ओषतात् दह १३ १२ **ओषति**=दहेत् १ १३० ८ **ओष:**=दहसि १ १७५ ३ [उप दाहे (भ्वा०) धातोर्लोट्। 'तुह्योस्तातङ्' इति तातङादेश.। अन्यत्र लट्]

ओषधय: यवादय, प्र०—फलपाकान्ता बहुपुष्प-फलोपगा, मनु० १ ४६, १ २१ सोमाद्या ३६ १७ सोमयवाद्या २० १९ **ओषधीनाम्**=सोमाद्योपधीनाम् १ १२७.८ **ओषधीभि:**=यवादिभि, प्र०—ओपधय ओपद् धयन्तीति वा दोप धयन्तीति वा, नि० ९ २७, १ २१ यवसोमलतादिभि १५ ७ **ओषधीभ्य:**=प्रसिद्धाभ्य (वनस्पतिभ्य) ६ २ रोगनिवारिकाभ्य (सोमलतादिभ्य) ६ ९ **ओषधीषु**=सोमलतादिपु १९ ३३ **ओषधी:**= गोधूमाद्या (अन्नानि) १ १०३ ५ वृक्षादि वनस्थ सत्र पदार्थ, आर्याभि० १ २७, ऋ० ७ ३४ २५ सर्वरोगनाशिका (सोमाद्या) १ ९१ २२ ओपधय १३ २७ यवादीन् १ १६३ ७ सोमलतादय ओपध्य, प्र०—'अत्र वाच्छन्दसि' इति पूर्वसवर्णदीर्घ १ ९० ६ **ओषधे**=ओपधिवद्वर्त्तमाने (स्त्रि) १२ ९९ ओपधिवद्वर्त्तमान विद्वन् (जन) १२ १०० ओपो विज्ञान धीयते यस्मिँस्तत्सम्बुद्धौ (अ० विज्ञानवरा ऽव्यापक, प्र०—अत्र 'ओप गतौ' इत्यस्माद् गतिरत्र विज्ञान गृह्यते ६ १५ ओपधिव्यापिन् (ईश्वर) १ १८७ १० ओपधि १२ १०१ ओपधिम् १२ ९८ सोमलताद्योपधिगण ४ १ सर्वरोगनिवारक (विद्वज्जन) ५ ४२ **ओषध्या:**= यवादे १ २५ [ओपद् उपपदे धेट् पाने (भ्वा०) धातो 'कर्मण्यधिकरणे च' अ० ३ ३ ९३ इति विहित कि प्रत्ययोऽत्र 'कृतो बहुलम्' इति कर्त्तर्यपि, तलोपश्च, स्त्रिया डीप्। ओपद्=उप दाहे (भ्वा०) धातो शतृ। ओपधय ओपद्धयन्तीति वा, ओपत्येना धयन्तीति वा, दोप धयन्तीति वा नि० ९ २७ ओपधय पदनाम निघ० ५ ३ (प्रजापति) ता (आहुति) व्यौक्षत् ओप धयेति, तत ओपधय समभवँ-स्तस्मादोपधयो नाम श० २ २ ४ ५ द्वय्यो वा ओपधय पुष्पेभ्योऽन्या फल गृह्णन्ति। मूलेभ्यो अन्या तै० ३ ८ १७ ४ उभय्यो (ओपधय) ऽस्मै स्वदिता पच्यन्ते ऽकृष्टपच्याश्च कृष्टपच्याश्च ता० ६ ९ ९ वाग्दैवत्य साम, वाचो मनो देवता, मनस पशव, पशूनामोपधय, ओपधी-नामाप। तदेतदद्भ्यो जात सामाप्सु प्रतिष्ठितमिति जैं० उ० १ ५९ १४ आपो ह वाऽओपधीना रस श० ३ ६ १ ७ अपामोपधय (रस) ओपधीना पुष्पाणि (रस) पुष्पाणा फलानि (रस)। श० १४ ९ ४ १ एप ह वै

प्रत्यय: । कक्ष =कक्षो गाहते वस इति नामकरण ख्यातेर्वाऽनर्थकोऽभ्यास । किमस्मिन् ख्यानमिति । तत्सामान्याद् मनुष्यकक्षो बाहुमूलसामान्यादश्वस्य नि० २.२.]

कक्षीवता शिक्षकेन विदुषा १ ११७ ६. **कक्षीवते**= कक्षा प्रशस्ताऽङ्गुलय इव विद्याप्रान्ता विद्यन्ते यस्य तस्मै (जनाय) १ ५१ १३ प्रशस्तशासनयुक्ताय (विद्यार्थिने जनाय) १ ११६ ७ **कक्षीवन्तम्**=कक्षेषु विद्याऽध्ययन-कर्मसु साध्वी-नीति कक्षा, सा बह्वी विद्यते यस्य विद्या जिघृक्षोस्तम् (विद्वज्जनम्), प्र०—अत्र भूम्न्यर्थे मतुप् 'कक्ष्याया सज्ञाया मतो सम्प्रसारण कर्त्तव्यम्' अ० ६ १ ३७. इति वार्त्तिकेन सम्प्रसारणादेश 'आसन्दीवदष्ठीवच्च०' अ० ८ २ १२ इति निपातनात् मकारस्थाने वकारादेशश्च ३ २८ या कक्षासु कराऽङ्गलिक्रियासु भवा शिल्पविद्यास्ता प्रशस्ता विद्यन्ते यस्य तम् (यजमानम्), प्र०—कक्षा इति अङ्गलिनामसु पठितम्, निघ० २ ५, अत्र कक्षाशब्दात् 'भवे च्छन्दसि' इति यत्, तत प्रशसाया मतुप् १ १८ १ प्रशस्ता कक्षा सहाया विद्यन्ते यस्य तम् (स्तोतार जनम्) १ ११२ ११ **कक्षीवन्त:**=प्रशस्ता कक्षयो विद्यन्ते येषान्ते (भृत्या जना) १ १२६ ४ **कक्षीवान्**=सर्वसृष्टि-कक्षा विद्यन्ते यस्मिन् स (ईश्वर) ८ २६ १ युद्धे प्रशस्त-कक्ष (वीरयोद्धा) १ १२६ ३ बह्व्य कक्षयो विद्याप्रदेशा विदिता सन्ति यस्य स (विद्वज्जन) १ १२६ २ ['कक्ष्या' इत्यङ्गुलीनाम निघ० २ ५ ततो भवार्थे यत्। ततो प्रशसाया मतुपि 'कक्ष्याया सज्ञाया मतौ सम्प्रसारणम्' अ० ६ १ ३७ वा सूत्रेण सप्रसारणे 'आसन्दीवदष्ठीवत्०' अ० ८ २ १२ सूत्रेण मकारस्य वकार । कक्षीवत् कक्ष्यावान् नि० ६ १०]

कक्ष्यप्रा कक्ष्य प्रात पिपूर्त्त (हरी=अश्वौ) ८ ३४ कक्षासु भवा कक्ष्या सर्वपदार्थाऽवयवास्ता प्रात प्रपूरयन-स्तौ (हरी=अश्वौ) १ १० ३ [कक्ष्योपपदे प्रा पूरणे (अदा०) धातो क प्रत्यय । 'सुपा सुलुगि' ति सूत्रेणा-कारादेश । कक्ष्या अङ्गुलिनाम निघ० २ ५ प्रकाशयन्ति कर्माणि नि० ३ ६ रज्जुरश्वस्य कक्ष सेवते निरु० २ २.]

कक्ष्य· कक्षासु भव (मद =आनन्द) ५ ४४ ११ **कक्ष्याय**=कक्षासु भवाय, भा०—कक्षास्थाय (जनाय) १६ ३४ **कक्ष्ये**=कक्षासु भवे (रोदसी=द्यावापृथिव्यौ) १ १७३ ६ [कक्षाप्राति० भवार्थे यत्]

कङ्कः लोहपृष्ठ २४ ३१ [ककि गतौ (भ्वा०) धातोरच् प्रत्यय]

कङ्कतः चञ्चल (मनुष्य) १ १९१ १ विषवान् इव (प्राणी इव) १ १९१ १ [ककि गतौ (भ्वा०) धातोर्बाहुल-कादौणादिकोऽतच् प्रत्यय]

कच्च कदा च ३३ ३५

कच्चित् किञ्चित् (आग =अपराधम्) २ २७ १४

कञ्चन् कञ्चिदपि (शत्रुम्) १७ ४५

कण्टकीकारीम् या कण्टकी करोति ताम् (दुष्टा स्त्रियम्) ३० ८ ['कण्टकी' इत्युपपदे डुकृञ् करणे (तना०) धातोरण् प्रत्यय । स्त्रिया ङीप्]

कण्ठ्यम् कण्ठे भव स्वरम् ३९ ६ [कण्ठप्राति० भवार्थे 'शरीरावयवाच्च' अ० ४ ३ ५५ सूत्रेण यत् । कण्ठ =कणति येन शब्द करोतीति विग्रहे कण शब्दार्थे (भ्वा०) धातो 'कणेष्ठ' उ० १ १०३ सूत्रेण ठ०]

कण्वतमः अतिशयेन मेधावी (जन) १ ४८ ४ [कण्वप्राति० अतिशायने तमप् । 'कण्व' इति मेधाविनाम निघ० ३ १५]

कण्वम् मेधाविनम् (जनम्) १ ११२.५ **कण्वाः**= मेधाविनो विद्वास, प्र०—कण्व इति मेधाविनाम, निघ० ३ १५, १ १४ २ [कण्व इति मेधाविनाम । निघ० ३ १५ कणति निमीलति चेष्टते य इति विग्रहे कण निमीलने (चुरा०) धातो 'अशूप्रुषिलटिकणि०' उ० १ १५१ सूत्रेण क्वन् प्रत्यय]

कण्वहोता कण्वो मेधावी चाऽसौ होता दाता च (विद्वान्) ५ ४१ ४ [कण्व-होतृपदयो समास । कण्व इति व्याख्यातम् । होता =हु दानादानयो (जु०) धातो-स्तृच्]

कण्वासः शिल्पविद्याविदो मेधाविन (जना) १ ४६ ९ [कण्व इति व्याख्यातम् । ततो जसोऽसुगागम]

कत् कदा, प्र०—छान्दसो वर्णलोपो वा, इत्याकार-लोप १ १२१ १ कुत्र, प्र०—पृषोदरादित्वात् 'क्व', इत्यस्य स्थाने कत् १ १०५ ५ केन (पथा=मार्गेण) १ १०५ ६ [किम सर्वनाम्न सप्तम्यन्तात् 'सर्वैकान्य०' अ० ५ ३ १५. सूत्रेण दा प्रत्यय । छान्दसत्वादाकारलोप]

कतमत् बहूनामुपादानाना मध्ये किमिति प्रश्ने (आरम्भणम्) १७ १८ **कतमस्य**=किस (देवस्य=सदा मुक्त परमात्मा) का स० प्र० ३३०, १ २४ १ **कतमः**= कौन सा (देव =परमात्मा) स० प्र० २७३, अथर्व० १० २३.४ २० बहूना मध्ये क (सभापती राजा) ७ २६ [किम् सर्वनाम्नो 'वा बहूना जातिपरिप्रश्ने डतमच्' अ० ५ ३ ९३ सूत्रेण डतमच् । ततो नपुसके 'अद्ड्डतरादिभ्य ०'

१ ६८ ५ आच्छादित कर रखा है, आर्याभि० २.३२, १७ १८ **और्णोः**=आच्छादयतु ६ १७ ६ [ऊर्णुञ् आच्छादने (अदा०) धातोर्लङ्]

औशिजस्य कामयमानेषु कुशलस्य (राजभृत्यस्य) ४ २१ ७ कामयमानाऽपत्यस्य ४ २१ ६ य उशजि प्रकाशे जात स उशिक्, तस्य विद्यावत पुत्र इव (यजमान) १ १८ १ य सर्वा विद्या वष्टि स उशिक्, तस्य विद्यापुत्र इव, भा०—विद्याज पुत्र ३ २८. विद्याकामस्य पुत्र १ १२२ ५ कमनीयस्य पुत्र (परिव्राट्=सन्यासी) १ ११६ ६ कामयमानस्य पुत्र ६ ४ ६ **औशिजाय**= मेधाविपुत्राय, प्र०—उशिज इति मेधाविनाम, निघ० ३ ५, १ ११२ ११ [वश कान्तौ (अदा०) धातो 'वश किन्' उ० २ १७ सूत्रेण इजि प्रत्यय किच्च । ग्रह्यादिसूत्रेण सम्प्रसारणम् । वष्टि य कामयते यत्काम्यते वा स उशिक् । उशिज्प्राति० 'कृतलब्धक्रीतकुशला' अ० ४ ३ ३८ सूत्रेण कुशलार्थे वा 'तस्यापत्यम्' अ० ४ १ ९२ सूत्रेणापत्यार्थे वा 'तत्र जात' अ० ४.३ २५ सूत्रेण जातार्थे वा अण् प्रत्यय. । आदिवृद्धि । उशिज इति मेधाविनाम निघ० ३ १५ 'उशिक् इति कान्तिकर्मा निघ० २ ६ औशिज = उशिज पुत्र । उशिग् वष्टे कान्तिकर्मण नि० ६ १०]

औष्णिहाय उष्णिग्व्रोविताय (सवित्रे=ऐश्वर्योत्पादकाय पुरुषाय) २९ ६० [उत्+ष्णिह प्रीतौ (दिवा०) धातो 'ऋत्विग्दधृग्०' अ० ३ २ ५९ सूत्रेण क्विन् प्रत्यय । निपातनादुपसर्गान्तिलोप षत्व च उष्णिगुत्स्नाता भवति, स्निह्यतेर्वा स्यात् कान्तिकर्मण नि० ७ १२ उष्णिह्प्राति० 'प्रज्ञादिभ्यश्च' अ० ५ ४.३८ सूत्रेणाण् ।]

औहत ऊहते १.१६४ २९ [ऊह वितर्के (भ्वा०) धातोर्लङ्]

औहिष्ट वितर्कयति ६ १७ ८ [ऊह वितर्के (भ्वा०) धातोर्लुङ्]

ककरान् पक्षिविशेषान् २४ २० [कक लौल्ये (भ्वा०) धातोर्बाहुलकादौणादिकोऽरन् प्रत्यय]

ककुत् महान् (अग्नि =सर्वस्वामीश्वर, प्रकाशादिगुणवान् भौतिको वा) ककुह इति महन्नामसु पठितम् निघ० ३.३, ककुह-शब्दस्य स्थाने ककुत्, पृषोदराद्याकृतिगणान्तर्गतत्वात् सिद्ध ३ १२ प्र०—ककुहशब्दस्यान्त्यलोपो वर्णव्यत्ययेन हस्य द १३ १४. [ककुह =महन्नाम निघ० ३ ३ पृषोदरादित्वादन्त्यलोपो हस्य च द । अथवा= कस्य देहस्य सुखस्य वा कु भूमि ददातीति विग्रहे कम्+कु+दा+क प्रत्यय । कक लौल्ये (भ्वा०) धातोर्गौणा० इति प्रत्यय.]

ककुत्पतिः दिशा पालक (अग्नि =प्रसिद्ध पावक) १५ २०. [ककुभ =दिङ्नाम निघ० १ ६ ककुभ्-पति-पदयो समास । भस्य दकारो वर्णव्यत्ययेन]

ककुन्मान् प्रशस्ता ककुतो लौल्या गुणा विद्यन्ते यस्मिन् (पराक्रम), प्र०—अत्र कक्धातोर्गौणादिक उति उ० १ ९४, ९ ६ [कक लौल्ये (भ्वा०) धातोर्बाहुलकादौणादिक (१ ९४) उति प्रत्यय । ततोऽतिशायने मतुप्]

ककुप् दिश १४ ६ लालित्ययुक्ता (छन्दोऽर्थविज्ञापनम्) २३ ३३ दिगिव यश. १५ ४ भा०—उत्तमानि वस्त्राणि २१ २१ **ककुभम्**=दिग्वच्छुद्धम (रूपम्) ८ ४६. स्तम्भकम् (इन्द्रिय=धनम्) २८.३३ **ककुभः**=दिश ४ १६ ४ सर्वा दिश, प्र०—ककुभ इति दिङ्नाम, निघ० १ ६, ३४ २४ **ककुभा**=ककुप्छन्दसा २८ ४४ **ककुभाम्**=दिशाम् ५ ४४ २ **ककुभे**=ककुबुष्णिक्-छन्दोऽर्थाय २४.१३. ['ककुभ' इति दिङ्नाम निघ० १ ६ ककुप् ककुभिनी भवति । ककुप् च कुब्जश्च कुजतेर्वोब्जतेर्वा नि० ७ १२ प्राणो वै ककुप् छन्द. श० ८.५ २ ४ कीकसा. ककुभ श० ८.६ २ १० पुरुषो वै ककुप् । ता० ८ १०.६]

ककुभाय प्रसन्नमूर्त्तये (पुरुषाय) १६.२०.]

ककुहः महती (जनित्री +मातृ), प्र०—ककुह इति महन्नाम, निघ० ३ ३, ३ ५४ १४ सर्वा दिश १ १८१.५ **ककुहाः**=दिश १ १८४ ३ ['ककुह' इति महन्नाम निघ० ३ ३]

ककुहः महान् (जन) ५ ७३ ७ **ककुहान्**=महत (यतन्त्र च =ऋत्विज) प्र०—ककुह इति महन्नाम निघ० ३ ३, २ ३४.११ ['ककुह' इति महन्नाम निघ० ३ ३]

ककुहासः महान्तो विद्वास (जना) १ १६ ३ सर्वा दिश ४.४४ २ ['ककुह' इति महन्नाम निघं० ३ ३ ततो जसोऽसुगागम]

कक्कटः मृगविशेष २४ ३२ [कखति हसतीति विग्रहे कखे हसने (भ्वा०) धातोर्बाहुलकादौणादिक (उ० ४ ८१) अटन् प्रत्यय । कुगागमे चर्त्वे च रूपम्]

कक्षः क्रान्तस्तटादि ६ ४५ ३१ **कक्षाणाम्**=गृहप्रान्तावयवेषु स्थितानाम् (जनानाम्) १६ १९ **कक्षेषु**= सामन्तेषु ११ ७९ [कषति हिनस्तीति विग्रहे कष हिंसार्थे (भ्वा०) धातो 'वृतृवदिवचि०' उ० ३ ६२. सूत्रेण स

१ ११६ १० कामयमानानाम् (जनानाम्) १ १६३ ८ कमनीयानाम् (जनानाम्) २६ १६ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्बाहुलकाद् औणादिक ईन प्रत्यय । 'कनीनाम्' प्रयोगे नुटोऽभाव आगमशासनस्यानित्यत्वात्]

कनीयसः अतिशयेन कनिष्ठात् (विद्यार्थिन) ७ २० ७ [युवन्प्राति० अल्पाद्वातिशायने ईयसुन् । 'युवाल्पयो कन्०' इति कन्नादेश]

कनीय. अतिशयेन कनिष्ठम् ['कनीयस' इति पदे ४ २४ ६ [पूर्वपदे व्याख्यातम्]

कनीयान् अतिशयेन कनिष्ठ (बन्धुर्विद्वान्) ४ ३३ ५ व्याख्यातम्]

कन्या कुमारिका (शिष्या) १ १६१ ५ कमनीया (विदुषी कन्या) ६ ४९ ७ [कन्यते दीप्यते काम्यते गच्छति वेति विग्रहे कनी दीप्तिकान्तिगतिषु (भ्वा०) धातो 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक् । स्त्रिया टाप् । कन्या कमनीया भवति, क्वेय नेतव्येति वा, कमनेनानीयत इति वा, कनतेर्वा स्यात्कान्तिकर्मण नि० ४ १५]

कन्या इव यथा कुमार्य्य ४ ५८ ९ कुमार्य्य इव १७ ६७ [कन्या-इव पदयो समास । कन्येति व्याख्यातम्]

कपनेव वायुगतय इव ५ ५४ ६ [कपना-इव-पदयो समास । कपना कम्पना क्रिमयो भवन्ति नि० ६ ४]

कपर्दिनम् कृतब्रह्मचर्य्य जटिल विद्वासम् (वैद्यम्) १ ११४ ५ जटाजूट ब्रह्मचारिणम् (विद्वासम्) ६ ५५ २ **कपर्दिनः**=प्रशसितो जटाजूटो विद्यते यस्य तस्य (अ०—सेनापते) १६ १० **कपर्दिने**=जटिलाय ब्रह्मचारिणे १६ २९ कृतब्रह्मचर्याय (सेनापतये) १६ ४८ जटायुक्ताय जनाय १६ ४३ [कपर्दप्राति० प्रशसाया मत्वर्थीय इनि]

कपिञ्जल. पक्षिविशेष २४ ३८ [कपिशब्दोपपदे जॄ वयोहानौ (क्र्या०) धातो खच्प्रत्ययो बाहुलकाद् रेफस्य लत्व च । कपिञ्जल कपिरिव जीर्ण, कपिरिव जवत ईषत् पिङ्गलो वा, गमनीय शब्द पिञ्जयतीति वा नि० ३ १८]

कबन्धिनः बहूदका (मरुत =मनुष्या) ५ ५४ ८ [कबन्धमित्युदकनाम निघ० १ १२ ततो भूम्नि इनि । कबन्ध मेघम् । कबनमुदक भवति तदस्मिन् धीयते । उदकमपि कबन्धमुच्यते बन्धिरनिभृतत्वे कमनिभृत च नि० १० ४]

कम् सुखम्, प्र०—कमिति वारिमूर्द्धसुखेषु १.२८ ८ सुखस्वरूपम् (देवम्=ईश्वरम्) ५ १८ सुखकारकम् (वपु =शरीरम्) १.१०२ २ सुखकर सुन्दरम् (अत्क=वस्त्रम्) ६ २९ ३ सुखसम्पादकम् (सोमवल्ल्यादिरसम्) १ ४७ १० कल्याणम् १ ८८ ३ सब ते सुख दाता (ईश्वर) को आशीभि० १ ३१, मू० १ ७ ८ १ सुखकारिणम् (नव=नौकादिकम्) १ १८२ ५ सुखप्रदम् (देवम्) १ २९ १ [कम् उदकनाम निघ० १ १२ सुखनाम निघ० ३ ६. पदपूरण नि० १ १९ उदकम् निघ० ४ १७ अन्नम् नि० ६ ३५]

कमयाध्वे कामयध्वम् २ १४ ८ [कमु कान्तौ (भ्वा०) धातो 'कमेर्णिङ्' इति स्वार्थे णिङि लट् । वृद्ध्यभावश्छान्दस]

कयस्य विज्ञातु (विदुषो जनस्य) १.१२९ ५

कर कुर्या ४ ३३.५ कुरु १ ८२ १ [डुकृञ् करणे (तना०) धातोर् लोट् । विकरणव्यत्ययेन शप्]

करञ्जम् य किरति विक्षिपति धार्मिकान्तम् (पर्णयम् =दस्युम्) प्र०—अत्र 'कॄ विक्षेपे' इत्यस्माद्धातोर्बाहुलकादौणादिकोऽञ्-प्रत्यय १ ५३ ८ [कॄ विक्षेपे (तुदा०) धातोर्बाहुलकादौणादिकोऽञ्प्रत्यय]

करणम् साधनम् ६ १८ १३ करोति येन तत् ५ ३१ ७ **करणानि**=साधनानि कर्माणि वा २ १५ १ क्रियन्ते यैस्तानि (अपासि=कर्माणि) ४.१९ १०. कुर्वन्ति यैस्तानि साधनानि ५.३१.६ [डुकृञ् करणे (तना०) धातो करणे ल्युट् । करण कर्मनाम निघ० २ १]

करणा कुर्वन्तौ (अश्विना=स्त्रीपुरुषौ) १ ११९ ७. [डुकृञ् करणे (तना०) धातो 'कृत्यल्युटो बहुलमि' ति कर्त्तरि ल्युट् । 'सुपा सुलुग्' इत्याकार]

करत् कुर्य्यात् ४ ३९ ६ करोतु, प्र०—लेट्-प्रयोगोऽयम् ७ २५ कुर्य्यु , प्र०—लेट्-प्रयोगोऽय 'बहुल छन्दसि' इति विकरणाभाव १ ८९ ३ **करतः**=कुर्याताम् २१ ४३ **करताम्**=कुरुत , प्र०—अत्राऽपि लडर्थे लोट्, विकरणव्यत्ययश्च १ २३ ६ कुर्याताम् ३३ ४६ करति=कुर्य्यात् ४ २२ १ **करते**=करोति ४ ४४ ३ कुर्य्यात् ४ १९ १ **करथः**=कुर्याताम् ६ ५० ३ **करन्**=कुर्य्यात् ५.३० ९ कुर्वन्तु १ १८९ २ कुर्य्यु, प्र०—लेट्प्रयोगोऽयम् 'बहुल छन्दसि' इति विकरणाऽभाव १ ८९ ३ **करसि**=कुर्या ६ ३५ १. **करसे**=कुर्य्या ३ ४३ ५ **कर** =कुर्य्यात् ३.४१ ६ कुर्य्या ६ ४५ २७ करोति ६ २२ १० कुरु १ ८२ १ [डुकृञ् करणे (तना०) धातोर्लेट् । विकरणव्यत्ययेन शप् । करन कुरुथ नि० ३ १५]

करम्भम् भोग कर्त्तु योग्यम् (पदार्थम्) ६ ५७ २

अ० ७ १ २५ सूत्रेण स्वमो स्थानेऽद्ड्]

कतमः अत्यन्ताऽऽनन्दयुक्त (परमात्मा) ऋ० भू० २१८ अतिशयेन सुखकारी (सत्यराजा=सत्यन्याय-प्रकाशक सभेश) २०४ [क० सुखनाम (निघ० ३ ६) ततोऽतिशायने वा तमप्]

कतमाम् बहूना मध्ये काम् (द्या=प्रकाशम्) १ ३५ ७ ['कतम इति व्याख्यातम्। तत स्त्रिया टाप्]

कतरा द्वयोर्द्वयोर्मध्ये कतरौ (द्यावापृथिव्यौ कार्य-कारणे वा) १ १८५ १ अनयोर्मध्ये एक (सभेश सेनेशो वा) ६ ६९ ८ [किम सर्वनाम्न 'किंयत्तदोर्निर्द्धारणे द्वयो-रेकस्य डतरच्' अ० ५ ३ ९२ सूत्रेण निर्धारणे डतरच्]

कतिधा कतिप्रकारै ३१ १० [कतिप्राति० प्रकारेऽर्थे 'सख्याया विधार्थे धा' अ० ५ ३ ४२. सूत्रेण धा। सख्या-सज्ञा तु 'बहुगुणवतु डति सख्या' अ० १ १ २२ सूत्रेण। कति=किम सर्वनाम्न 'किम सख्यापरिमाणे डति च' अ० ५ २ ४१ सूत्रेण डति प्रत्यय]

कत्पयम् कतिपयम् (मेघम्) प्र०—अत्र 'छान्दसो वर्णलोपो वा' इती लोप ५ ३२ ६ [कत्पयम्=सुखपयसम्। सुखमस्य पय नि० ६ ३]

कथा कथम् १ ५४ १ केन प्रकारेण ४ ३ ५ किस प्रकार से, आर्याभि० २ ३२, १७ १८ केन हेतुना १ ४१ ६ [किम सर्वनाम्न 'था हेतौ च च्छन्दसि' अ० ५ ३ २६ सूत्रेण हेतौ प्रकारवचने च था प्रत्यय। तस्य विभक्ति-सज्ञकत्वात् 'किम क' अ० ७ २ १०३ सूत्रेण किम कादेश। कथा कथम् नि० ९ ३०]

कथो कथम् ५ २९ १३

कदा कस्मिन् काले ३ ३४. [किम सर्वनाम्न सप्त-म्यन्तात् काले वाच्ये 'सर्वैकान्य०' अ० ५ ३ १५ सूत्रेण दा प्रत्यय]

कदाचन कदाचिदपि ३४ ४१ कभी भी स० प्र० २३८, १० ४८ ५ ['कदा' इति व्याख्यातम्। कदा-चन-पदयो समास]

कद्रीची अचाक्षुष्यगमना (पृथिवी) १ १६४ १७ [किम्शब्दोपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्०' इत्यादिना क्विन्। 'विष्वग्देवयोश्च०' अ० ६ ३ ९२ सूत्रेण पूर्वपदस्य टेरद्रिरादेश स्त्रिया ङीप्। 'अच' इत्यकारलोपे 'चौ०' अ० ६ ३ १३८ सूत्रेण दीर्घ]

कधप्रियाः ये कधाभि कथाभि प्रीणयन्ति ते (विद्वज्जना) प्र०—अत्र वर्णव्यत्ययेन थकारस्य धकार 'ङ्यापो सज्ञाछन्दसोर्बहुलम्' अ० ६ ३ ६३ अनेन ह्रस्व १ ३८ १ **कधप्रिये**=कथन कथा प्रिया यस्या सा (उप) १ ३० २० [कथोपपदे प्रीञ् तर्पणे कान्तौ च (क्रया०) धातोर्मूलविभुजादित्वात् क। इयङ् आदेश पूर्वपदस्य ह्रस्वत्व थकारस्य च धकार।]

कनिक्रदत् भृश शब्दयन्, भा०—उच्चै शब्दयन् (हरि=अश्व) ३ ३ ९० भृश शब्दायमान (उपदेशक) २ ४२ १ भृश गच्छन् (अग्नि=विद्वत्सन्तान) ११ ४६ [क्रदि आह्वाने रोदने च (भ्वा०) धातो 'दाधर्तिदर्धर्ति०' अ० ७ ४ ६५ सूत्रेण लुङि च्लेरङादेशो द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च निपात्यते। कनिक्रदत्=व्यक्रन्दीत् नि० ९ ३]

कनिक्रदम् भृश विकल प्राप्तव्ययम् (पशुम्) १३ ४८ [क्रदि वैक्लव्ये (भ्वा०) धातोर्यङ्लुङन्तादच्]

कनिष्ठाय अतिशयेन बालकाय १६ ३२ [अल्पप्राति० अतिशायन इष्ठन्। 'युवाल्पयो कन्०' अ० ५ ३ ६४ सूत्रेण वा कन्नादेश]

कनीन इव यथा प्रकाशमानो जन १ १७७ १८ [कनीन-इवपदयो समास। कनीन=कनी दीप्तिकान्ति गतिषु (भ्वा०) धातोर्बाहु० ईनप्रत्यय]

कनीनकम् कनति प्रकाशते येन तत् (चक्षु=दर्शकम्) प्र०—अत्र कनीधातोर्बाहुलकादौणादिक ईनक-प्रत्यय ४ ३२ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्बाहुलकादौणादिक ईनक प्रत्यय]

कनीनकः य कनति दीपयति स एव कनीनक, भा०—वृष्ट्युत्पादक (सूर्य), प्र०—अत्र कनीधातोर्बाहुलकादौ-णादिक ईनप्रत्ययस्तत स्वार्थे कन् ४ ३ **कनीनकाभ्याम्**= प्रदीप्ताभ्या कमनीयाभ्याम् (कर्णाभ्या=श्रवणसाधका-भ्याम्) २५ २ तेजोमयाभ्या कृष्णगोलकतारकाभ्याम् २५ १ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्बाहु० औणादिक ईन प्रत्यय। तत स्वार्थे कन्। कनीनक कन्यके नि० ४ १५ शुष्णो दानव प्रत्यङ् पतित्वा मनुष्या-णामक्षीणि प्रविवेश स एष कनीनक कुमारक इव परि-भासते श० ३ १ ३ ११]

कनीनकेव कमनीयेव (विज्ञानकर्मणी) ४ ३२ २३. [कनीनक इति व्याख्यातम्। तस्य इवपदेन सह समास]

कनीन. दीप्तिमान् (सूर्य) ३ ४८ १ **कनीनाम्**= कान्तीनाम् २ १५ ७ कन्येव वर्त्तमानाना रात्रीणा सूर्यादीना वा १ ६६ ४ यौवनत्वेन दीप्तिमता ब्रह्मचारिणा कन्यानाम्

श्रवणसाधकाभ्याम् २५ २ कुर्वन्ति श्रवणं याभ्याम् १६ ६१ **कर्णाः**=ये कार्याणि कुर्वन्ति ते (पशव) २४ ३ **कर्णे**=कुर्वन्ति येन तस्मिन् ५ ३१ ६ **कर्णेभिः**=श्रोत्रैः, प्र०—अत्र ऐसभाव १ ८६ ८ कानो से श्रार्याभि० २.२७, २५ २१ **कर्णैः**=नौचालकैः (वंवनैः) २ ३४ ३ **कर्णौ**=करोति श्रवणं याभ्यां तौ २५ २ कर्ण्यौ (पृथिवीसूर्य्यौ) ३३ ७१ **कर्णा**=श्रोत्रौ ४ २६ ३ कर्णौ श्रोत्रे ३३ १६ कर्णानि ४ २३ ८. [डुकृञ् करणे (तना०) धातोः कॄ विक्षेपे (तुदा०) धातोर्वा 'कृवृजृसि०' उ० ३ १० सूत्रेण नक् प्रत्ययः। कर्णः कृन्ततेर्निकृत्तद्वारो भवति। ऋच्छतेरित्याग्रायणः। ऋच्छन्तीव से उदगन्तामिति ह विज्ञायते नि० १ ६]

कर्णयोनयः कर्णः श्रोत्रं योनिर्येषां ते (धार्मिका वीराः) २ २४ ८ [कर्ण-योनिपदयोः समासः]

कर्त्त कुरुत, अत्र 'बहुलं छन्दसि' इति विकरणस्य लुक्, लोडादेशस्य तस्य स्थाने तबादेशः १ ६० ५ **कर्त्तन**= कुर्यात् ७ ४८ ४ कुरुत २ १४ ६ कुर्वन्तु १२ ६६ [डुकृञ् करणे (तना०) धातोर्लोट्। 'बहुलं छन्दसीति' विकरणस्य लुक्]

कर्त्तम् कूपम्, प्र०—कर्तमिति कूपनाम, निघ० ३ २३, १ १२१.१३

कर्त्तरि कारके (कर्म सम्पादके जने) १.१३६ ७ [डुकृञ् करणे (तना०) धातोस्तृच्प्रत्यये सप्तम्येकवचनम्]

कर्त्तवै कर्त्तुम् २ २२ १ [डुकृञ् करणे (तना०) धातोस् तुमर्थे तवै प्रत्ययः]

कर्त्ता निष्पादकः (इन्द्र =सेनापतिः) १.१००.६ **कर्त्तारम्**=भा०—त्वष्टारम् (ईश्वरम्) २६ ६ **कर्त्तृभिः**=सुकर्मकारिभिर्जीवैः सह ७ ३६ पुरुषार्थिभिः (जनैः) १ ५५ ८ कर्मकारकैः (सज्जनैः) ६.१६ १ [डुकृञ् करणे (तना०) धातोः कर्त्तरि तृच्। ताच्छील्ये तृन् वा]

कर्त्तोः कर्त्तुं समर्थस्य (परमेश्वरस्य) ३३.३७ [डुकृञ् करणे (तना०) धातोस्तुमर्थे तोसुन् प्रत्ययः। 'क्त्वातोसुन्०' इत्यव्ययसंज्ञा]

कर्त्तोः कर्त्तव्यं गमनाद्यगतस्य कर्म्म २ ३८.४ [डुकृञ् करणे (तना०) धातोस् तोसुन् प्रत्ययः]

कर्त्तात् छेदकात् (अवपदः =आपत्कालात्) २ १६ ६

कर्त्त्वम् कर्त्तुं योग्यं कार्य्यम्, प्र०—अत्र करोतेस्त्वन् प्रत्ययः १.१० २ **कर्त्त्वं** =कर्त्तुं योग्यं (विद्युदादि.) प्र०—अत्र कृत्यार्थे त्वन् प्रत्ययः १ १६१.३ **कर्त्वानि**= कर्त्तुं योग्यानि (धनानि) २ ३० १० [कर्त्वं कर्मनाम निघ० २ १ डुकृञ् करणे (तना०) धातोः 'कृत्यार्थे तवै-केन्०' अ० ३ ४ १४ सूत्रेण त्वन प्रत्ययः]

कर्म धर्म्यं कृत्यम् १ १७३ ६ कर्तुंयदीप्सिततमभीष्टं योग्य चेष्टामयमुत्क्षेपणादि कर्मास्ति तत्, भा०—पुरुषार्थम् प्र०—कर्तुरीप्सिततमं कर्म, अ० १ ४ ४६ क्रियमाणम् १ ६२ ६ अभीप्सिततमा क्रिया १६ १५ **कर्मणः**= चेष्टितस्य (कार्यस्य) १ ११ ४ **कर्मणा**=ईप्सिततमेन व्यापारेण ६.६६ १. सत्क्रियया ७ ३३ १३ [डुकृञ् करणे (तना०) धातोः 'सर्वधातुभ्यो मनिन्' उ० ४ १४५ सूत्रेण मनिन् प्रत्ययः। क्रियते तत् कर्म क्रिया वा। अर्धर्चादित्वादुभयलिङ्गत्वम्। कर्म इत् कर्मनाम निघ० २ १. कर्म कस्मात्. क्रियत इति सतः नि० ३ १ यज्ञो वै कर्म श० १ १ २ १ पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति श० १४ ६ २.१४. वीर्यं वै कर्म श० ११.४ ४ ५ कर्माणि मित्र गो० पू० १ ३२]

कर्म कुर्म्म, प्र०—अत्र लुङि च्लेर्लुक् 'छन्दस्युभयथा' इत्यार्धधातुकत्वेन ङित्वाभावाद् गुणः १ १७३ ४ कुर्याम ६ ५१ ८ [डुकृञ् करणे (तना०) धातोर्लुङ्। छान्दसत्वा-च्च्लेर्लुक्, अडभावो गुणश्च]

कर्मकृतः ये कर्माणि कुर्वन्ति ते, भा०—पुरुषार्थिनः (जनाः) ३ ४७ [कर्मोपपदे डुकृञ् करणे (तना०) धातोः क्विप्। ह्रस्वस्य तुक्]

कर्मणि कर्मणि क्रियायां क्रियायाम् १ १०१ ४ [कर्मणि पदस्य वीप्सायां द्वित्वम्]

कर्मणे कर्त्तव्याय १ ५५ ३ क्रियासिद्धये ३०.७ कर्त्तुं योग्यत्वेन सर्वोपकारार्थाय, भा०—क्रियायै १ १ पञ्चविधलक्षणचेष्टामात्राय, प्र०—उत्क्षेपणमवक्षेपणमा-कुञ्चनं प्रसारणं गमनमिति कर्माणि वैशे० १.७ इत्यत्र पञ्चविधं कर्म गृह्यते १ १३ ['कर्म' इति पदे व्याख्यानम्]

कर्मण्यम् कर्मणा सम्पन्नम् (वीरम्), प्र०—अत्र 'कर्मवेषाद्यत्' अ० ५ १.१००. इति कर्मशब्दाद् यत् 'ये चाभावकर्मणोः' इति प्रकृतिभावश्च १ ६१.२० **कर्मण्यः** = यः कर्मणां सपद्यते सः (वीरः =सन्तानः) ३ ४ ७ कर्मसु कुशलः (वीरजनः) ७.२ ६ ['कर्म' इति व्याख्यातम्। ततः सम्पादिन्यभिधेये 'कर्मवेषाद्यत्' अ० ५ १ १०० सूत्रेण यत्। 'ये चाभावकर्मणोः' अ० ६ ४ १६८ सूत्रेण प्रकृतिभावाट्टेर्लोपो न भवति]

कर्मण्याम् यः कर्मभिः सम्पद्यते ताम् (सूदं=सूति-

दध्यादियुक्त भक्ष्यविशेषम् ३ ५२ ७ **करम्भस्य**=दधिसमृष्टस्य सक्तुन १६ २२ **करम्भः**=कर्त्ता (ईश्वर) १ १८७ १० करोति मथन येन स. १६ २१ **करम्भात्**=य करम्भमन्नविशेषमत्ति स (देव =विद्वज्जन) ६ ५६ १ **करम्भेण**=अविद्याहिंसनेन, प्र०—अत्र 'कृ हिंसायाम्' इत्यस्माद्धातोर्बाहुलकादौणादिकोऽम्भच्-प्रत्यय ३ ४४. [डुकृञ् करणे (तना०) धातो, अथवा कृ हिंसायाम् (क्र्या०) धातोर्बाहुलकादौणादिकोऽम्भच् प्रत्यय]

करम्भिणम् बहव करम्भा पुरुपार्थेन सशोधिता दध्यादय पदार्था विद्यन्ते यस्य तम् (आप्त विद्वासम्) ३ ५२ १ मुष्ठुक्रियया निष्पन्नम् (भोज्यमन्नरसादिकम्) २० २६ [करम्भप्राति० भूम्नि इन् प्रत्यय । 'करम्भम्' इति व्याख्यातम्]

करस्नम् बाहुम्, प्र०—करस्नाविति बाहुनाम, निघ० २४, १ १६१ १२ **करस्ना**=बाहू, प्र०—करस्नौ बाहू कर्मणां प्रस्नातारौ, नि० ६ १४, ३ १८ ५. यौ करान् कर्त्तॄन् स्नापयत शोधयतस्तौ (गभस्ती=हस्तौ) ६ १६ ३ [करस्नौ बाहुनाम निघ० २ ४ करस्नौ बाहु कर्मणा प्रस्नातारौ नि० ६ १७ करोपपदे ष्णा शौचे (अदा०) धातो क प्रत्यय । 'सुपा सुलुगि' त्याकार]

करः य करोति स (विद्वज्जन) ६ १८ १४ [डुकृञ् करणे (तना०) धातोरच् प्रत्यय]

करा कुर्वाणौ (अध्यापकौ) १ ११६ १३

कराम कुर्य्याम, प्र०—अत्र विकरणव्यत्ययेन शप् १६ ६२ **करामहे**=कुर्याम, प्र०—अत्र लेटि व्यत्ययेन शप्, अथवा भ्वादिर्मन्तव्य ६ ५ [डुकृञ् करणे (तना०) धातोर्लेट् । विकरणव्यत्ययेन शप्]

करांसि करणीयानि कर्म्माणि ४ १६ १० [करम् कर्मनाम निघ० २ १ डुकृञ् करणे (तना०) धातोरसुन् प्रत्यय]

करिक्रत् भृश करोति ३.५८ ६ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्तस्य शतरि 'दाधर्त्तिदर्द्धर्ति०' अ० ७ ४ ६५ सूत्रेण निपातनादभ्यासककारस्य चुत्वाऽभावो रिगागमश्च निपात्यते]

करिक्रत् भृश कुर्वन् (इन्द्र.=जगदीश्वर) १ १३१ ३ **करिक्रतः**=येऽतिशयेन कुर्वन्ति (जना) १.१४० ५. [पूर्वपदे व्याख्यातम् । करिक्रत् कर्मनाम निघ० २ १]

करिष्यतः ये करिष्यन्ति तान् (देवान्=दिव्यान् गुणान्) ११.३ [डुकृञ् करणे (तना०) धातोर्लृट स्थाने 'लृट सद्वा' इति सूत्रेण शतरि रूपम्]

करिष्यथ करिष्यमाणं साधयिष्यथ ११ ६८ **करिष्यसि**=करोषि, प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति लडर्थे लृट् १ १ ६ [डुकृञ् करणे (तना०) धातोर्लृट्]

करिष्यन् करूँगा ऐसी इच्छा करता हुआ (सन्यासीजन) स० वि० १६५, ६ ११३ १ [डुकृञ् करणे (तना०) धातोर्लृट स्थाने शतृ]

करिष्या कर्त्तुं योग्यानि (कार्याणि), प्र०—अत्र 'सुपा सुलुग्०' इति डादेश १ १६५ ६

करिष्या करिष्यसि, प्र०—सिज्लोपो दीर्घश्चाऽत्र छान्दस ३३ ७६

करुणस्य कृपामस्य कर्मण १.१०० ७ करुणा करने वाले (ईश्वर) का, आर्याभि०, अथर्व० १२ ३ ४७ [कॄ विक्षेपे (तुदा०) धातो 'कृवृदारिभ्य उनन्' उणा० ३ ५३. सूत्रेण उनन् प्रत्यय । करुणम् कर्मनाम निघ० २ १.]

करूळती य करूनूढा कामयते स करूळत सोऽस्याऽस्तीति (विद्वज्जन) ४ ३० २४

कर्कन्धु येन कर्म दधाति (मधु=विज्ञानम्) १६.६१ **कर्कन्धुभिः**=ये कर्क बदरीक्रिया दधति तै (यवादिभिरन्नै) २१ ३२ **कर्कन्धुम्**=य कर्कान् कारुकानन्तति व्यवहारे बध्नाति तम् (वय्यम्=ज्ञातार विद्वांसम्) १ ११२ ६ **कर्कन्धूनि**=कर्कन्धुफलानि स्थूलानि पक्वानि बदरीफलानीव १६ २३ [कर्क कण्टक दधातीति विग्रहे कर्कोपपदाद् डुधाञ् धारणपोषणयो (जु०) धातोर् 'अन्दूदम्फू०' उ० १ ६३ सूत्रेण कू प्रत्यय । छान्दस ह्रस्वत्वम् । यत्स्नेहस्तत् कर्कन्धु श० १२ ७ १ ४]

कर्कन्धुरोहितः कर्कन्धुर्बदरीफलमिव रोहित- (पशु) २४ २ [कर्कन्धुरोहितपदयो समास । कर्कन्धु पूर्वपदे व्याख्यातम् । रोहित =रोहति प्रादुर्भवतीति विग्रहे रुह प्रादुर्भावे (भ्वा०) धातो 'रुहेरश्च लो वा' उ० ३.६४ सूत्रेण क्त प्रत्यय]

कर्करिः भृश कुर्वन् (उपदेशको जन) २४३ ३ कर्त्तव्य कर्म, धर्म को ही पुरुषार्थ से करता हुआ (ईश्वर) आर्याभि० १ ५३ ऋ० २ ८ १२ ३ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्ताद् बाहुलकाद् औणा० इ प्रत्यय]

कर्णम् श्रुतस्तुतिम् (सखायम्=सुहृद्वद्वर्त्तमानं पतिम्) २६ ४० **कर्णयोः**=श्रोत्रयो २१ ५० **कर्णः**=दीर्घकर्ण (गर्दभ =पशुविशेष) २४ ४० **कर्णाभ्याम्**=

वारिन्) २६.२ कल्याणु अर्थात् संसार और मुक्ति के सुख देने हारी (वाच=ऋग्वेदि चारों वेदों की वाणी को) म० प्र० ९३ २६२. **कल्याण्य.**=कल्याणकारिण्य. (योषा.=स्त्रिय) ४.५८.८ कल्याणाचरणशीला. भा०—सौभाग्यवत्य: (योषा =स्त्रिय) १३६६. [कल्याणपदं व्याख्यातम् । ततः स्त्रियां ङीप् । कल्याणी तत्सम्बुद्धौ. । नि० ४.२५. नौ० ७३४.]

कवचिने सन्नद्धे कवचं शरीररक्षासाधनं विद्यते यस्य तस्मै (पुरुषाय) १६.३५. [कवचशब्दात् मत्वर्थे इनि प्रत्यय । कवचम्=कु अञ्चित भवति. काञ्चितं भवति, कायेऽञ्चित भवतीति वा नि० ५.२६.]

कवत्नवे कुत्सितसंख्यावताय ७.३२.९. [कु शब्दे (अदा०) धातोर्बाहु० औणा० क्त्नु प्रत्यय. । बहुलवचनाद् गुण.]

कवन्धम् मेघम् ५.८५.३ [कबन्धम् उदकनाम निघं० १.१२ ततो मत्वर्थीयप्रत्ययस्य लुक् । कबन्धं मेघम्, कवनमुदकं भवति तदस्मिन् धीयते उदकमपि कबन्धमुच्यते नि० १०.४.]

कवयः सर्वशास्त्रविदः (मन्त =रागद्वेषविरहिणो जना.) ६.४९.११. सकलशास्त्रेषु निपुणा. (विद्वांस.) ५.५२.१३. विक्रान्तप्रज्ञानवन्त (जना.) ३.५४.१०. विद्वांसः क्रान्तदर्शिनः क्रान्तप्रज्ञा वा ऋ० भू० १५८ बहुदर्शिन उपदेशका ८.३६.७ मेधाविन. (विद्वांस), प्र०—कविरिति मेधाविनाम निघं० ३.१५ १० ६३ पूर्णविद्या. (नर = नायका जना) ४.४८.८. अनूचाना विद्वांस ३.८.४. **कवये**=विपश्चिते (विदुषे) ५.१५.१. सर्वविद्यायुक्ताय (धार्मिकाय नरे) ४.२.२०. **कविम्**=सर्वज्ञम् (परमेश्वरम्) २.२३.१ सर्वेषां बुद्धीनां सर्वज्ञतया क्रमितारमीश्वरं, सर्वेषां पदार्थानां दर्शयितारं भौतिकं वा (अग्निम्=ईश्वरं भौतिकं वा) १.१२.७ वेदविद्याया उपदेष्टारं निमित्तं वा (ईश्वरम्) ८.७५ विद्वांसमिव क्रान्तप्रज्ञम् (वायु=पवनम्) ६.४९.४. विद्याशास्त्रदर्शिनम् (मेधाविनम्) १.११६.१४. क्रान्तदर्शनम् (अग्निम्) ७.२८ **कविः**=विक्रान्तदर्शन (अग्नि =पावक ईश्वर) ३.३.८ क्रान्तदर्शन क्रान्तप्रज्ञ. सर्वज्ञो वा (सविता =ईश्वर सूर्यो वा) ११.३. क्रान्तप्रज्ञादर्शन. (मर्त्य= मनुष्य) १.६१.१४ सर्वेषां क्रान्तप्रज्ञ. सर्वज्ञ (सविता= ईश्वर:) ५.८१.२ सर्वविद्यावित् (विद्वज्जन) १.०९५. समर्थ (अग्नि.=पावक.) १४ ३६ सर्वद्रष्टा. (अग्नि.) १३.३४ काव्यादिनिर्माणे चतुर: (मघवा=राजा) ७.१८.२ जातप्रज्ञ: (वसिष्ठोऽतिथि:) ७.१५.२. व्याप्तविद्या दर्शनविषयस्य वा क्रमक. (इन्द्र: =विद्वान् सेनापति सूर्यो वा) १.११.४. पूर्णविद्वान् (परमेश्वर), आर्याभि० २.१७, ५.३२ सर्वशास्त्रविद् (अध्यापक.) २३.३६. **कवी**=क्रान्तदर्शिनौ सर्वव्यवहारदर्शनहेतू (मित्रावरुणौ= सूर्यवायू), प्र०—कवि. क्रान्तदर्शनो भवति कवतेर्वा. नि० १२.१३ एतन्मित्रावरुणौ कविक्रतून् सुकृतावेतौ मित्रावरुणौ गृह्णीते १.२.९. सकलविद्यावेत्तारावध्यापकोपदेशकौ १.१८८.७. ...नौ (तिग्मा=चिकित्सकौ) २८.३ **कवीन्**=धार्मिकान् विदुष. (जनान्) ३.३८.१. **कवे !**= वक्तः (राजन् विद्वन्वा) ७.१६.१०. सकलशास्त्रविद् (आप्ताध्यापक) २.१.१३. [कु शब्दे (अदा०) धातो अच इः उ० ४.१३९ सूत्रेण इः प्रत्यय: । कवि:=मेधाविनाम निघं० ३.१५. कवि: क्रान्तदर्शनो भवति कवतेर्वा नि० १२.१३. असौ वाऽआदित्य: कवि. श० ६.७.२.४. ये वा अनूचानास्ते कवय. ऐ० २.२. एते वै कवयो यदृषय: श० १.४.२.८. ये वै तेन ऋषय: पूर्वे प्रेतास्ते वै कवय. ऐ० ६.२०. शुश्रुवांसो वै कवय. तै० ३.२.२.३. ये विद्वांसस्ते कवय. श० ७.२.२.४.]

कवषम् उपदेशकम् (राजामात्यम्) ७.१८.१२. **कवष:**=शब्दं कुर्वन् (द्वा:=गृहद्वारम्) २९.५. **कवषा:**= शब्दं कुर्वाणा. (द्वार.=गृहद्वाराणि) २९.५. [कु शब्दे (अदा०) धातो. 'ऋतन्यञ्जि०' उ० ४.२. सूत्रेण असच्-प्रत्यय. । सस्य षत्वं छान्दसम्. । बाहुलकाद् औणादिकोऽसच्-प्रत्यय.]

कवष्य. शब्दे साधव (वीरजना.) २०.४०. प्रशस्ता: (द्वार.), प्र०—अत्र 'कुशब्दे' धातोर्बाहुलकादौणादिकोऽसच्-प्रत्यय: २०.६०. सच्छिद्रा: (द्वुर.=द्वाराणि) २१.३४. ['कवषम्' इति व्याख्यातम् । तत. 'तत्र साधु' इत्यर्थे यत्]

कवासख. कवि. सखा यस्य (मघवा=धनवान् मनुष्य.) ५.३४.३. [कवि-सखिपदयो: समास । पूर्वपदस्यैकारस्याकारश्छान्दस. कवासखो यस्य कुत्स्या: सखाय: नि० ६.१९.]

कविक्रतुम् कवि: सर्वज्ञा सकलविद्यायुक्ता क्रतु. प्रज्ञा कर्म क्रमदर्शनं वा यस्य तम् (देवं=परमात्मानं समाध्यक्षं प्रजापुरुषं वा) ४ १५. कवीनां क्रतु यज्ञ इव प्रज्ञा यस्य तम् (अग्नि=भौतिकम्) ३ २.४. कवीनां विदुषां क्रतु. प्रज्ञा कर्म वा क्रतुवत् यस्य स तम् (विद्वज्जनम्) ३.२७ १२ प्रज्ञप्रज्ञाम् ५ ११.४. **कविक्रतु:**=कवि सर्वज्ञ क्रान्तदर्शनो

काम्), प्र०—अत्र 'कर्मवेषाद्यत्' अ० ५.१.१०० इति कर्मशब्दात् सम्पादिन्यर्थे यत् ११ ५५ [कर्मण्यमिति व्याख्यातम्। तत स्त्रिया टाप्]

कर्मन् राज्यकर्मणि १ १२१ ११ ['कर्म' इति व्याख्यातम्]

कर्मन्कर्मन् कर्मणि कर्मणि ११०२६. [कर्मन् पदस्य वीप्सायां द्वित्वम्]

कर्मभिः धर्म्याभि क्रियाभि २३ ३७ **कर्मसु**=कृष्यादिक्रियासु १० ३३ **कर्माणि**=जगत्सृष्टि-पालन-प्रलयकरणन्यायादीनि १३ ३३ सत्कर्मो को स० वि० १४५, ४.२. कर्त्तुरीप्सिततमानि क्रियमाणानि ३४ २ कर्त्तु योग्यानि, कर्त्तुरीप्सिततमानि १ ६१ १३ जगत् की उत्पत्ति-स्थिति-प्रलय आदि कर्मो को, आर्याभि० १ २३, ऋ० १.२७.१६ ['कर्म' इति पद व्याख्यातम्]

कर्मारम् य कर्माण्यलङ्करोति' तम् (सज्जनम्) ३०७ **कर्मारेभ्यः**=असि-भुशुण्डी-शतघ्न्यादिनिर्मातृभ्य (शिल्पिभ्य) १६ २७ [कर्मोपपदे ऋ गतौ (भ्वा०) धातोरण् प्रत्यय]

कर्वरम् कर्त्तव्य कर्म ६ २४ ५ [कर्वर कर्मनाम निघ० २ १ किरति विक्षिपतीति विग्रहे कॄ विक्षेपे (तुदा०) धातो 'कॄगॄ०' उ० २ १२१ सूत्रेण ष्वरच्प्रत्यय]

कर्ष विलिखति ५ ८३ ७ [कृष विलेखने (भ्वा०) धातोर्लडर्थे लोट्]

कर्हि कस्मिन् समये ६ ३५ २ कदा ५ ७४ १० [किम सर्वनाम्न सप्तम्यन्ताद् 'अनद्यतने र्हिलन्यतरस्याम्' अ० ५ ३ २१ सूत्रेण र्हिल्। किम कादेश]

कलविङ्कः चटक २४ ३१ **कलविङ्कान्**=चटकान् २४ २०

कलशम् घटम् १ ११७ १२. **कलशः**=कुम्भ ३ ३२ १५ **कलशे**=पात्रे ६ ४७ ६ [कलाशब्दोपपदात् शीङ् शये (अदा०) धातो. 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ सूत्रेणाधिकरणे ड. प्रत्यय। पूर्वपदस्य ह्रस्वत्वम्। कलश कस्मात्? कला, अस्मिञ्छेरते मात्रा। कलिश्च कलाश्च किरतेर्विकीर्णमात्रा नि० ११ १२]

कलशा कुम्भाविव ६ ६८ २. [पूर्वपदे व्याख्यानम्। 'सुपा 'सुलुगि'त्याकार']

कलिम् य किरति विक्षिपति, दुःखानि ह[illegible] न (मद्वैद्यम्), गणक वा १ ११२ १५ [क[illegible] किरतेर्विकीर्णमात्रा नि० ११.१२. कॄ वि[illegible]

धातो 'सर्वधातुभ्य इन्' उ० ४ ११८ सूत्रेण इन्। अथ ये पञ्च (स्तोमा) कलि स तै० १ ५ ११.१ रेफस्य ल वम्]

कल्पताम् समर्पितोऽस्तु १६ ४५. समर्थो भवतु १८ २६ समर्प्पयतु २२ ३३ समर्था भवतु २२ २२ समर्थताम् ६ २१ स्थिरा भवतु ऋ० भू० २७५ समर्पित भवतु ऋ० भू० १५४ प्रसिद्धो भवतु ऋ० भू० २७४ **कल्पन्ताम्**=समर्था भवन्तु ३५ ६ समर्थयन्ताम् १४.६ समर्थयन्तु १३ २५ सुखयुक्ता भवन्तु १० २८ भा०—स्वाभीष्टानि साधयन्तु १८ ७ **कल्पेताम्**=समर्थयतः १४ १५ समर्थयेताम् १४ ६. भा०—स्वस्वनियमेन समर्थौ भवेताम् १५ ५७ **कल्पस्व**=अध्यापनोपदेशाभ्या समर्थय ५ १० समर्थो भव १ १७० २. **कल्पत**=निवास कर स० वि० ६३, अथर्व० ११ ५ २६ **कल्पयन्ति**=कल्पना करते है स० वि० २०६, अथर्व० ६ ६ ७ समर्थित करते है, स० वि० २०६, अथर्व० ६ ६ ७ **कल्पयाति** कल्पयेत समर्थ कुर्यात्, भा०—सम्पादयेत् १६.६०. समर्थयेत १८ ३३ निष्पादयतु ऋ० भू० २६२ **कल्पयस्व**=समर्थयस्व २३ १५ [कृपू सामर्थ्ये (भ्वा०) धातोर्णिच्। कल्पते अर्चतिकर्मा निघ० ३ १४.]

कल्पमानः समर्थ सन् (ईश्वर) १३.४३. [कृपू सामर्थ्ये (भ्वा०) धातो शानच्]

कल्पयन्ती समर्थयन्त्यौ (प्राची=रोदसी) ५ १७. [कृपू सामर्थ्ये (भ्वा०) धातोर्णिजन्ताच्छत्रन्तात् ङीप्]

कल्पिनम् कल्प. प्रशस्त सामर्थ्य विद्यते यस्य तम् (जनम्) ३० १८ [कल्पप्रातिपदिकात् प्रशसायाम् इनुप्रत्यय.। कल्प =कृपू सामर्थ्ये (भ्वा०) धातोर्घञ् प्रत्यय.]

कल्मलीकिनम् देदीप्यमानम् (नाग) प्र०—कल्मलीकिनमिति ज्वलतो नाम, निघ० १ १७, २ ३३.८

कल्माषग्रीवः जिसके हरित रग वाले वृक्ष आदि ग्रीवा के समान है, वह (विष्णु =परमेश्वर), प० वि०, अथर्व० ३.२७ ५ [कल्माष-ग्रीवापदयो समास.। कल्माष = कालयति, कल्+विच्। त माषयति अभिभवतीति विग्रहे माष्+णिच्+अच्। कल्-माषपदयो समास। ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वा नि० २ २८]

कल्माषः श्वेतकृष्णवर्ण (पशु) २९.५८ [पूर्वपदे व्याख्यानम्]

कल्याण कल्याणकारक (सभास्वामिन्) १.३१.८. [कल्याण कमनीय भवति नि० ?.३.]

कल्याणीम् कल्याणनिमित्ताम् (वाचम

पदनाम, निघ० ५ ४ 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति सर्वनाम-कार्यम् १२ १०२ आनन्दरूपाय (देवाय=परमात्मने) २३ ३ सुखदायक (देवाय=परमेश्वर) के लिए स० वि० ६, ३२६ **कः**=सुखस्वरूपो देव १ २४ १ प्रश्नार्थे ७ २६ कश्चिदेव १ ५४ ५ [क पदनाम निघ० ५ ४ छान्दसत्वात् सर्वनामकार्यम् । क कमनो वा, क्रमणो वा, सुखो वा, नि० १० २२ प्राणो वाव क जै० उ० ४ २३ ४ प्रजापतिरब्रवीदथ कोऽहमिति यदेवैतदवोच इत्यब्रवीत् ततो वै को नाम प्रजापतिरभवत् को वै प्रजापति ऐ० ३ २१ क=आदित्य नि० १३ २५ किम सर्वनाम्नो वा चतुर्थ्या एकवचनम्]

कः करोति ५ २९ ४ कुर्यात्, प्र०—अत्राऽडभावो 'मन्त्रे घस०' इत्यादिना च्लेर्लुक् १ १६२ २० कुर्य्या ७ ४३ ३ कुरु १ १६४ ४६ करोषि ७ २१ ३ [डुकृञ् करणे (तना०) धातोर्लुङ् । मन्त्रे घस०' इति च्लेर्लुक्, अटो ऽभावश्च]

काकवीरम् काकाना गोपकम् (वनस्पति=वटादिकम्) ६ ४८ १७

ग्नावः ग्ना प्रशसिता वाणी विद्यते यस्य तत्सम्बुद्धौ (राजन् शिष्य वा) २ १ ५ सर्वपदार्थप्राप्तिर्यस्य व्यवहारे (ऋतु), प्र०—ग्ना इति उत्तरपदनामसु पठितम्, निघ० ३ २६, १ १५ ३ प्रशस्त-वाग्मिन् (विद्वज्जन), प्र०—ग्नेति वाङ्नाम, निघ० १ १, २६ २१ ['ग्नास् इति व्याख्यातम्। ग्नाप्राति० मत्वर्थे 'छन्दसीवनिपौ च वक्तव्यौ' अ० ५ २ १०९ वा० सूत्रेण वनिप्। 'वन उपसख्यानम्' अ० ८.३ १ वा सूत्रेण रुत्वम्]

ग्नासु गन्तु योग्यासु भूमिषु १ १६१ ४ **ग्नाः**= वेदवाच प्र०—ग्ना इति वाङ्नामसु, निघ० १ ११, ११ ६१ पृथिव्या, प्र०—ग्ना इत्युत्तरपदनामसु पठितम्, निघ० ३ २९, १ २२ १० सुशिक्षिता वाच ३ ३ ४८ ['ग्ना' इति व्याख्यातम्]

ग्नास्पत्नीभिः या ग्ना पतीना स्त्रियस्ताभि (स्वपत्नीभि) ४ ३४ ७ [ग्ना-पतिपदयो समासे स्त्रिया ङीप् नकारान्तादेशश्च। ग्ना इति व्याख्यातम्]

ग्मन् गच्छन्ति ५ ३३ १०. प्राप्नुयु ३ ३८ २ प्राप्नुवन्ति प्र०—अत्र गमधातोर्लुङि 'मन्त्रे घस०' इति च्लेर्लुक्, 'गमहन०' इत्युपधालोपोऽडभावो लडर्थे लुङ् च १ ६५ १ प्राप्नुवन्तु ४ ३४ ५ **ग्मन्त**=प्राप्नुत १ १२२ ११

ग्मः पृथिव्या ५ ३८ ३ पृथिव्यादे, प्र०—ग्मेति पृथिवीनामसु पठितम्, निघ० १ १, १ २५ २० प्रकाशरहितपृथिव्यादिलोकान्। प्र०—अत्र गमधातोर्बाहुलकादौणादिक अ-प्रत्यय उपधालोपश्च १ ३७ ६

ग्मिषीय प्राप्नुयाम्, प्र०—अत्राऽऽशिषि लिङि वा 'छन्दसि सर्वे विधयो वा भवन्ति' इति डागम 'गमहनजन०' अ० ६ ४ ९८ इति उपधालोपश्च ३ १९ [गम्लृ गतौ (भ्वा०) धातोराशिषि लिङ्]

ग्रथिनः अज्ञानेन बद्धान् (अविदुषो जनान्) ७ ६ ३ [ग्रन्थ बन्धने (चुरा०) धातोर्णिनि प्रत्यय। नकारलोपश्छान्दस]

ग्रभणवत् प्रशस्त ग्रभण ग्रहण विद्यते यस्मिँस्तत् (आयु=जीवनम्) १ १२७ ५ [ग्रहणप्राति० मतुप्। हकारस्य भकार 'हृग्रहोर्भश्छन्दसी' ति वार्त्तिकेन]

ग्रभाय ग्रहणाय ७ ४ ८

ग्रभीष्ट गृह्णीया २ २९ ५

ग्रसिताम् निगलिताम् (वर्त्तिकामिव प्रजाम्) १ ११२ ८ [ग्रसु अदने (भ्वा०) धातो क्त]

ग्रसिष्ठः अतिशयेन ग्रसिता (मर्त्त=मनुष्य) २९ १८ [ग्रसु अदने (भ्वा०) धातोस्तृजन्तादतिशायने इष्ठन्। 'तुरिष्ठेमेयस्सु' सूत्रेण तृचो लोप। ग्रसिष्ठ ग्रसितृतम नि० ६ ८]

ग्रहम् गृह्णाति येन तम् (अक्षित=अक्षय सुखम्) ३८ २६ **ग्रहान्**=गृह्यन्ते स्वीक्रियन्ते विवाहकाले नियतशिक्षाविषया ये तान् ८ ९ **ग्रहाभ्याम्**=यौ गृह्णीतस्ताभ्याम् (स्त्रीपुरुषाभ्याम्) १९ ९० याभ्या गृह्णीतस्ताभ्याम् (व्यवहाराभ्याम्) १९ ९१ **ग्रहाः**=ग्रहीतारो गृहाऽऽश्रमिण भा०—राजप्रजाजना गृहस्था ९ ४ यै सर्व क्रियाकाण्ड गृह्णन्ति ते व्यवहारा १९ २८ [ग्रह उपादाने (क्र्या०) धातो 'घञर्थे कविधानम्' इति क प्रत्यय। अन्नमेव ग्रह। अन्नेन हीद सर्व गृहीतम् श० ४ ६ ५ ४ नामैव ग्रह। नाम्ना हीद सर्व गृहीतम् श० ४ ६ ५ ३ वागेव ग्रह। वाचा हीद सर्व गृहीतम् श० ४ ६ ५ २ अङ्गानि वै ग्रहा श० ४ ५ ९ ११ यद् गृह्णाति तस्माद् ग्रह श० १० १.१ ५ त (सोमम्) अघ्नन्। तस्य यशो व्यगृह्णत। ते ग्रहा अभवन्। तद् ग्रहाणा ग्रहत्वम् तै० २ २ ८ ६ तद् यदेन पात्रैर्व्यगृह्णतस्माद् ग्रहा नाम श० ४ १ ३ ५ (प्रजापति) तौ (दर्शपूर्णमासौ) ग्रहेणागृह्णात् तद् ग्रहस्य ग्रहत्वम् तै० २ २ २ १ यद् वित्त (यज्ञ) ग्रहैर्व्यगृह्णत तद् ग्रहाणा ग्रहत्वम् ऐ० ३ ९ तान् पुरस्तात् पवित्रस्य व्यगृह्णात् ते ग्रहा अभवन्। तद् ग्रहाणा ग्रहत्वम् तै० १ ४ १ १ ते (देवा) सोममन्वविन्दन्। तमघ्नन्। तस्य यथाभिज्ञाय तनूर्व्यगृह्णत। ते ग्रहा अभवन्। तद् ग्रहाणा ग्रहत्वम् तै० १ ३ १ २ एष वै ग्रह। य एष (सूर्य) तपति, येनेमा सर्वा प्रजा गृहीता श० ४ ६ ५ १ अष्टौ ग्रहा (प्राण, जिह्वा, वाक्, चक्षु, श्रोत्र, मन, हस्तौ, त्वक्) श० १४ ६ २ १ प्राणा वै ग्रहा श० ४ २ ४ १३ साम ग्रह श० ४ २ ३ ७ ग्रहान् वा अनु प्रजा पशव प्रजायन्ते तै० स० ६ ५ १० १ ग्रहा ह वा ऋतस्य योनि जै० १ १ ० ४ प्राणा वा एत इतरे ग्रहा मै० ४ ६ ६]

ग्राह्यः ग्रहीतु, योग्य, भा०—परस्परमनुष्यग्राह्यानुग्राहकभाव ४ २४ [ग्रह उपादाने (क्र्या०) धातो क्यप्]

ग्रामजितम् येन पूर्व शत्रूणा समूहा जितास्तम्

अन्न यज्ञ वा, प्र०—घर्म इत्यन्ननामसु पठितम्, निघ० १ ९, यज्ञनामसु च, निघ० ३ १७, ८ १९ **घर्मः**=प्रदीप्तो दिवसकर (सूर्य) ३ २६ ७ जिघ्रति येन स प्रकाश इव यज्ञ १८ ६६ यज्ञ इव सगतियुक्त (अग्नि=पावक) २० ५५ पूजनीयतम (अ०—सर्वतो प्रकाशमयजगदीश्वरो विद्वान्वा) ३८ २१ अग्नितापयुक्त शोधक (वर्गो=यज्ञ) १ २ दिनम्, प्र०—घर्मेति अहर्नाम, निघ० १ ९, ३ ५३ १४ आतपम् १ १६४ २८ **घर्माय**=प्रसिद्धाऽप्रसिद्ध-सुखप्रदाय यज्ञाय ३८ ३ [घृ क्षरणदीप्त्यो (जु०) धातो 'घर्मग्रीष्मौ' उ० १ १४९ सूत्रेण मक्-प्रत्यय । घर्म अहर्नाम निघ० १ ९ यज्ञनाम निघ० ३ १७ घर्मम्=हर्म्यम् नि० ६ ३२ हरणम् नि० ११ ४२ तद् यद् (छिन्न विष्णोश्शिर) घृट्टित्यपतत्तस्माद् घर्म श० १४ १ १ १० अस्यैव एतान्यग्न (घर्म, अर्क, शुक्र, ज्योति, सूर्य) नामानि श० ९ ४.२ २५ अग्निर्वै घर्म श० ११ ६ २ २. तप्त इव वै घर्म श० १४ ३ १ ३३ आदित्यो वै घर्म श० ११ ६ २ २ असौ वाऽआदित्यो घर्म श० ९ ४ २ १९ असौ वै घर्मो यो ऽसौ (सूर्य) तपति कौ० २ १ एष वै घर्मो य एष (सूर्य) तपति श० १४ १ ३ १७ वेदमिथुन वा एतद् यद् घर्म गो० उ० २ ६ तदेतद् देवमिथुन यद् घर्म स यो घर्मस्तच्छिश्नम् ऐ० १ २२ अग्निश्च मे घर्मश्च मे (यज्ञेन कल्पताम्) तै० स० ४ ७ ९ १ घर्म इति दिवा ऽऽचक्षीत । सम्राडिति नक्तम् तै० आ० ५ ११ २ तेजो वै घर्म मै० २ २ ८ देवमिथुन वा एतद् यद् घर्म गो० २ ७ ६ ब्रह्मवर्चस वै घर्म तै० स० २ २ ७ २]

घर्मपावभ्यः घर्मेण यज्ञेन पवित्रीकर्तृभ्य (पितृभ्य=पालकजनेभ्य) ३८ १५ [घर्म-पावन्पदयो समास । घर्म इति व्याख्यातम्]

घर्मस्तुभे यो घर्म यज्ञ स्तोभति स्तौति तस्मै (विदुषे जनाय) ५ ५४ १ [घर्म यज्ञनाम निघ० ३ १७ तदुपपदे स्तोभति अर्चतिकर्मा (निघ० ३ १४) धातो क्विप्]

घर्मस्वरसः घर्मे-यज्ञे स्वकीयो रसो यस्य स (विद्वज्जन) ४ ५५ ६ [घर्म-स्वरसपदयो. समास । घर्मपद व्याख्यातम्]

घर्मासः पापानि ७ ३३ ७ [घर्म इति व्याख्यातम्]

घसत् अद्यात् २१ ४५ **घसः**=भक्षय ३ ५२ ३ **घस्ताम्**=भक्षयताम् २१ ४३ [अद भक्षणे (अदा०) धातोर्लुङ् । 'लुङ्सनोर्घस्लृ' अ० २ ४ ३७ सूत्रेण घस्लादेश । अडभावश्च]

घसः भोग ४ ३२ १९ [अद भक्षणे (अदा०) धातो 'उपसर्गेऽद' सूत्रेणानुपसर्गादपि छान्दसत्वादप् धातोर्घस्लृ-आदेश]

घासम् भक्षण, (भा०—यवबुसादिकम्) १ १ ७५

घासे=भोजने २१ ८३ [अद भक्षणे (अदा०) धातोर्घञ् । 'घञपोश्च' अ० २ ४ ३८ सूत्रेण घस्लृ-आदेश]

घासिम् अदनम् २५ ३८ [अद भक्षणे (अदा०) धातो 'इगुपधात्किः' इति इन्प्रत्यय । 'बहुल छन्दसी'ति घस्लादेश । अथवा घस्लृ अदने (भ्वा०) धातो 'जनिघसिभ्यामिण्' उ० ४ १३० सूत्रेण इण्प्रत्यय]

घासेअज्राणाम् भोजनेऽग्रे प्राप्तव्यानाम् (अग्निष्वात्ताना-गृहीताग्निजनानाम्) २१ ४३ भोजने कमनीयानाम (सत्यक्रियाणाम्—विद्वदधिष्ठातृजनानाम) २१ ४४. [घास-अज्रपदयो समास । घास इति व्याख्यातम् । सप्तम्या अलुक् । घासपद व्याख्यातम् । अज्र=अज गतिक्षेपणयो (भ्वा०) धातोर्बाहु०रक्]

घृणा दीप्ति ६ ३ ७ दीप्ति, क्षरण वा १ ५२ ६ [घृ क्षरणदीप्त्यो (जु०) धातोर्बाहुलकादौणादिको नक्-प्रत्यय । घृण अहर्नाम निघ० १ ९]

घृणाः प्रदीप्ता (पदार्था) ४ ४३ ६ [घृ क्षरणदीप्त्यो (जु०) धातो नक्]

घृणिः रश्मिवान् सूर्य ३५ ८ [घृ क्षरणदीप्त्यो (जु०) धातो 'घृणिपृश्नि०' उ० ४ ५२ सूत्रेण निप्रत्ययान्तो निपात्यते । घृणि अहर्नाम निघ० १ ९ ज्वलतो नाम निघ० १ १७ क्रोधनाम निघ० २ १३]

घृणीव प्रदीप्त सूर्य इव २ ३३ ६ [घृणिपद व्याख्यातम्]

घृणीवान् तेजस्वी पशुविशेष २४ ३९ [घृणिरिति व्याख्यातम् । ततोऽतिशायने मतुप् । छान्दस दीर्घत्वम्]

घृणे प्रदीप्ते (रणे=सङ्ग्रामे) ६ १५ ५ [घृ क्षरणदीप्त्यो (जु०) धातो क्त]

घृतच्युतम् उदकात् प्राप्तम् (स्वारम्=उपताप शब्द वा) २ ११ ७ [घृत-च्युतपदयो समास । घृतम्=घृ सेचने (भ्वा०) धातो क्त । घृतम् उदकनाम निघ० १ १२]

घृतनिर्णिक् यो घृतमुदक नितरा नेनेक्ति पुष्णाति स, यद्वा घृतस्य सुस्वरूपम् (सूर्य), प्र०—निर्णिक् इति रूपनाम निघ० ३ ७, २ ३५ ४ यो घृतेन निर्णेक्ति स (अग्नि=पावक) ३ १७ १ आज्योदकयो शोधक (अग्नि=वह्नि) ३.२७ ५ जल को शोधन करने हारा)

ओजो वै वीर्यं ग्रीवा ओजो वीर्य पञ्चदश, तस्मात् पशवो ग्रीवाभिर्भार वहन्ति जै० २ ५७ ग्रीवा अणिष्ठास्सती-र्वीर्यवत्तमा काठ० २५ १ त्रीणि वा आसा ग्रीवाणा पर्वणि शा० आ० २ ३]

ग्रीष्म. यो रसान् ग्रसते स (ऋतु) १३ ५५ मध्याह्न ३१.१४ **ग्रीष्माय**=ग्रीष्मर्तौ सुखाय २४ ११ **ग्रीष्मेण**=सर्वरसग्रहीत्रा (ऋतुना) २१ २४ [ग्रसु अदने (भ्वा०) धातो 'घर्मग्रीष्मौ' उ० १ १४६ सूत्रेण मक् प्रत्यये धातोर्ग्रीभाव पुगागमश्च निपात्यते। ग्रीष्म = स्यन्तेऽस्मिन् रसा नि० ४ २७ अनिरुक्त ऋतूना ग्रीष्म जै० उ० १ १२ १ ३ एतावेव (शुक्रश्च शुचिश्च) ग्रैष्मौ (मासौ)। स यदेतयोर्वलिष्ठ तपति ते नो हैतौ शुक्रश्च शुचिश्च श० ४ ३ १ १५ ग्रीष्म उपर्युष्णोऽधश्शीतमधि-गम्यते। तस्मादु ग्रीष्मे शीता कूप्या अप उदाहरन्ति जै० १ १६७ ग्रीष्म ऋतु (राजन्यस्य) ता० ६ १ ८ ग्रीष्म एव मह गो० १ ५ १५ ग्रीष्म प्रस्ताव प० ३.१ ग्रीष्म-म्प्रस्ताव (प्रजापतिरकरोत्) जै० उ० १ ३ २ ७ ग्रीष्मेण दक्षिण पक्षम् (अचिनुत) तै० स० ५ ६ १० १. ग्रीष्मे वा इन्द्रो वृत्रमहन् मै० १ ६.६ ग्रीष्मो दक्षिण पक्ष तै० ३ ११ १० ग्रीष्मो दक्षिण पक्षम्। वर्षा उत्तरम् मै० ४ ६ १८ ग्रीष्मोऽध्वर्युस्तप्त इव वै ग्रीष्मस्तप्तमिवाध्वर्यु-र्निष्क्रामति श० ११ २ ७ ३२ ग्रीष्मो वै तनूनपाद् ग्रीष्मो ह्यासा प्रजाना तनूस्तपति श० १ ५ ३.१० ग्रीष्मो वै राजन्यस्य ऋतु काठ० ८ १ तै० १ १.२ ७ ग्रीष्मो हि तन्व तपति कौ० ३ ४ तनूनपात यजति ग्रीष्ममेव तै० स० २ ६ १ १ तस्मात् क्षत्रियो ग्रीष्मऽआदधीत क्षत्र हि ग्रीष्म श० २ १.३ ५ यस् स्तनयति तद् ग्रीष्मस्य (रूपम्) श० २ २ ३ ८ वाग् ग्रीष्म अग्निर्ग्रीष्म जै० २ ५० श्वेता (पशव) ग्रीष्माय मै० ३ १३ १६ षड्भिरिन्द्रैः (पशुभि) ग्रीष्मे (यजते) श० १३ ५ ४ २८ स (प्रजापति) ग्रीष्माद् एव वसन्त निरमिमीत जै० ३ १ तस्य (वायो) रथ-स्वनश्च रथेचित्रश्च सेनानीग्रामण्याविति ग्रैष्मौ तावृतू श० ८ ६ १ १७]

ग्रैष्मी ग्रीष्मर्तु व्याख्यात्री ऋक् १३ ५५ [ग्रीष्म इति व्याख्यातम् ततो व्याख्यानेऽर्थेऽण्प्रत्यये स्त्रिया ङीप्]

ग्रैष्मौ ग्रीष्मे भवौ (ज्येष्ठाऽऽषाढौ) १४ ६ [ग्रीष्म इति व्याख्यातम्। ततो भवार्थेऽण्]

ग्लापयन्ति आलपन्ति १ १६४.१० [ग्लै हर्षक्षये (भ्वा०) धातोर्णिचि लट्। धातूनामनेकार्थकत्वादत्रा-लापनेऽपि]

ग्लाविनम् अहर्षितारम् (जनम्) ३० १७. [ग्लै हर्षक्षये (भ्वा०) धातो 'ग्लानुदिभ्या डौ' उ० २ ६४ सूत्रेण डौ प्रत्यय। ग्लौप्राति० मत्वर्थे इनि प्रत्यय]

ग्लौभिः हर्षक्षयै २५ ८ [ग्लाविति व्याख्यातम्]

घ एवाऽर्थो निपात १ ५ ३ अपि २ ३४ १४

घनम् घनीभूतम् (इन्द्र=राजानम्) ३ ४९ १ हन्ति येन तम् ४ ३८ १५ **घनः**=दृढ काठिन्येन मूर्त्ति प्रापितो वा, अ०—मूर्त्तिमानय सूर्यलोक, प्र० मूर्त्तौ घन, अ० ३ ३ ७७ अनेनाऽय निपातित १ ४ ८ **घनाः**=शतघ्नी-भुशुण्ड्यसि-चाप-बाणादीनि दृढानि युद्धसाधनानि, प्र०—अत्र 'शेश्छन्दसि बहुलम्' इति लुक् १ ८ ३ **घने**=हनने ६ २६ ८ **घनेन**=वज्राख्येन शस्त्रेण, प्र०—मूर्त्तौ घन, अ० ३ ३ ७७ इति घनशब्दो निपातितस्तेन काठिन्यादि-गुणयुक्तो हि शस्त्रविशेषो गृह्यते अत्र 'ईषा अक्षादिषु च छन्दसि प्रकृतिभावमात्र द्रष्टव्यम्, अ० ६ १ १२७ इति वार्त्तिकेन प्रकृतिभाव, अत्र सायणाचार्येण द्रष्टव्यमिति भाष्यकार पाठमबुद्ध्वा वक्तव्यमित्यशुद्ध पाठो लिखित, मूलवार्त्तिकस्याऽपि पाठो न बुद्ध १ ३३ ४ [हन हिंसागत्यो (अदा०) धातो 'मूर्त्तौ घन' अ० ३ ३ ७७ सूत्रेण अप्-प्रत्ययो मूर्त्तौ (काठिन्ये) वाच्ये, घश्चादेशो निपात्यते]

घनाघनः अतिशयेन शत्रून् घातुक (इन्द्र=सेनेश) प्र०—'हन्तेर्घत्व च, इति वार्तिकेनाऽचि प्रत्यये घत्वम-भ्यासस्यागागमश्च १७ ३३ [हन हिंसागत्यो (अदा०) धातोरच्प्रत्यये 'हन्तेर्घत्व च' अ० ६ १ १२ वा० सूत्रेण द्वित्वमभ्यासहकारघत्वागागमश्च। परस्य हकारस्याभ्यासा-च्चेति सूत्रेण कुत्वम्]

घनेव यथा घनेन तथा १.६३ ५ [घन-इवपदयो समास। घन इति व्याख्यातम्]

घर्म! प्रदीपक (देव=जगदीश्वर!) ३७ १८ प्रकाशा-ऽऽत्मन्, दिनमिव विशालविद्य, विद्युत् प्रकाश इव वर्त्तमान (विद्वन् विदुषी वा) ३८ १८ प्रकाशमान (देव=विद्वज्जन) ३८ १६ **घर्मम्**=यज्ञम् ५ ७३ ६ अग्निहोत्रादिक यज्ञम्, प्र०—घर्म इति यज्ञनामसु पठितम्, निघ० ३ १७, १७ ५५ सुखवर्धक यज्ञम् ३८ ६. गृहाश्रमकृत्याख्य यज्ञम् ५ ७६ १ गृहाऽऽश्रम-व्यवहाराऽनुष्ठानम् ३८ १३ दिनम् प्र०—घर्म इत्यहर्नामसु पठितम्, निघ० १ ६, ३ ५३ १४ प्रतापम् २६ ६ प्रतापस्वरूपम् (अग्नि=विद्युतम्) १ ११२ १ सूर्यतापम् १ ११९ ६ प्रशस्ता घर्मा यज्ञा विद्यन्ते यस्य तम् (विद्वज्जनम्), प्र०—अत्र घर्मशब्दादर्श आदित्वादच् १ ११२ ७ प्रदीप्त सुगन्धियुक्त भोज्य पदार्थम् १ ११९ २

दुवस्यत घृतैर्बोधयतातिथिम् काठ० १६ १०]

घृतयोनिम् घृत दीपक तत्त्व योनि कारण यस्य तम् (यज्ञम्) ३ ४ २ घृतमुदक प्रदीप्त कारण वा योनिर्गृह यस्य तम् (अग्निम्) ५ ८ ६ **घृतयोनिः**=घृत प्रदीप्त तेजो योनि कारण गृह वा यस्य स (अ० - अग्नि) ३५ १७ **घृतयोनी**=घृतमुदक कारण ययोस्तौ (विद्वांसौ जनौ) ५ ६८ २ **घृतयोने**=यथा जलनिमित्ता विद्युद् वर्त्तते, तथा तत्सम्बुद्धौ (विद्वज्जन) ५ ४१ यथा घृतयोनिरग्निस्तथा तत्सम्बुद्धौ (सुशिक्षित शूर जन) ५ ३८ [घृतयोनिपदयो समास । घृत व्याख्यातम् । योनि =यौति सयोजयति पृथक् करोति वेति विग्रहे यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'वहिश्रिश्रुयु०' उ० ४ ५१ सूत्रेण नि प्रत्यय योनि उदकनाम निघ० १ १२ गृहनाम निघ० ३ ४]

घृतवत् घृतमाज्यमुदक वा प्रशस्त विद्यते यस्मिंस्तत् (मधु=रसम्) ३ ३१ ११ बहुघृतादियुक्त हवि ३ ५६ १ घृत प्रशस्त जल विद्यते यस्मिँस्तत् (पय =रसादिकम्) प्र०—अत्र प्रशसार्थे मतुप् १ २२ १४ बहुघृतयुक्तम् (हव्यम्) ७ ४७ ३ [घृत व्याख्यातम् । तत प्रशसार्थे मतुप्]

घृतवत् घृतेन तुल्यम् ३ ५ ६ घृतेन पुष्टिदीप्तिकारकेण तुल्या ४ २२ [घृतप्राति० तुल्यार्थे वति]

घृतवद्भिः बहुघृतादिपदार्थै सह वर्त्तमानै (द्रव्यैर्हुतै) २ २६ ४ घृतादियुक्तै (इळाभि =अन्नै) ७ ३ ७ [घृत व्याख्यातम् । तत प्रशसार्थे भूम्नि वा मतुप्]

घृतवती घृत बहूदकमस्ति यस्या सा (स्त्री) १४ २ प्रशस्तान्याज्यादीनि विद्यन्ते यस्या सा (स्त्री) १४ ४ प्रशस्ताऽऽज्यादियुक्ता (स्त्री) १५ ३ बहूदकयुक्ता नदी ६ ११ ५ [घृतप्राति० प्रशसार्थे भूम्न्यर्थे वा मतुवन्तात् स्त्रिया ङीप्]

घृतवती घृतमुदक बहु विद्यते ययोस्ते (द्यावापृथिवी=सूर्यभूमी) ३४ ४५ बहु घृतमुदक दीप्तिर्वा विद्यते ययोस्ते (द्यावापृथिवी=सूर्यभूमी), प्र०—घृतमिति उदकनाम, निघ० १ १२, ६ ७० १ [घृत व्याख्यातम् । ततो मतुवन्तात् ङीप् । घृतवती द्यावापृथिव्योर्नाम निघ० ३ ३०]

घृतवन्तम् बहुघृतादिवन्तम् (यज्ञ=सङ्गतिमय व्यवहारम्) ६ १५ १६ बहुघृतमुदक विद्यते यस्मिँस्तम् (योनिं=गृहम्) ३ ५ ७ बहुघृतयुक्तम् (यज्ञम्) १ १४२ २ **घृतवन्तः**=प्रशस्त बहु वा घृतमाज्यमुदक वा विद्यते येषान्ते (पदार्था) ३ २१ २ [घृतवदिति व्याख्यातम् । ततो द्वितीयैकवचनम्]

घृतवृधा घृतेन तेजसा वर्धेते (द्यावापृथिवी=विद्युदन्तरिक्षे) ६ ७० ४ [घृतोपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप् । 'सुपा सुलुगि' त्याकार]

घृतश्चुतम् उदकात् प्राप्तम् (स्वारम्=उपताप शब्द वा) २ ११ ७ **घृतश्चुतः**=घृतेन सिक्ता (मज्जना) ३ २१ ३ **घृतश्चुता**=घृत श्चोतति येन (स्नुना=यज्ञसाधनेनेव योगाभ्यासेन) ५ १४ ३. [घृत-श्चुतपदयो समास । श्चुत =श्चुतिर् क्षरणे (भ्वा०) धातो क्त]

घृतश्च्युत घृतमाज्य श्च्युत निस्सृत याभ्यस्ता (मत्यश्रिय) १ ७ ३ [व्याख्यातम् । अथवा घृतोपपदे श्च्युतिर् क्षरणे (भ्वा०) धातो सम्पदादित्वात् क्विप् । पशवो वै घृतश्च्युत ता० ६ १ १७]

घृतश्रियम् यो घृत श्रयति, घृतेन शुम्भमानस्तम् (राजानम्) ५ ८ ३ घृतेनोदकेन शोभमानम् (भिषजम्=वैद्यम्) २८ ६ **घृतश्रिया**=घृत प्रदीपनमवकाशनञ्च श्रीर्ययोस्ते (द्यावापृथिवी=विद्युदन्तरिक्षे) ६ ७० ४ **घृतश्रीः**=घृतमाज्य सेवमान (अतिथिर्विद्वज्जन) १ १२८ ४ [घृतोपपदे श्रिञ् सेवायाम् (भ्वा०) धातो 'क्विप् वचिप्रच्छ्यायतस्तु०' वार्ति० सूत्रेण क्विप् दीर्घत्व च]

घृतसदम् आज्य प्राप्नुवन्तम् (इन्द्र=सम्राजम्) ६ २ [घृतोपपदे सदॢ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्]

घृतस्नाः याभिर्घृतमाज्यमुदक वा स्नान्ति ता (हरित =अङ्गुलय) ४ ६ ६ [घृतोपपदे ष्णा शौचे (अदा०) धातो क प्रत्यय]

घृतस्नुना घृतमिव शुद्धेन (हव्येन=अध्ययनेन श्रवणेन वा) ६ ५२ ८ **घृतस्नुः**=यो घृतमुदक स्नाति (रथ =विमानादियानम्) ५ ७७ ३ [घृत व्याख्यातम् । तदुपपदे ष्णा शौचे (अदा०) धातो 'मितद्र्वादिभ्य उपसख्यानम्' इति डु प्रत्यय]

घृतस्नुवः घृतमुदक स्नुवन्ति प्रस्रवन्ति यास्ता (धाना =दीप्तय) १ १६ २ **घृतस्नुवा**=यौ घृतमुदक स्नुत =स्रावयतस्तौ (सूर्यविद्युतौ) ३ ६ ६ **घृतस्नू**=घृतस्य स्रावकौ (मित्रावरुणौ=सुहृद्वरौ) १ १५३ १ यौ घृतमुदक स्नुत प्रस्रावयतस्तौ (वाय्वग्नी) ४ २ ३ यौ घृतमुदक स्नात शोधयतस्तौ (अग्नी) ३ ४१ ६ [घृत व्याख्यातम् । तदुपपदे ष्णु प्रस्रवणे (अदा०) धातो क्विप् । तत प्रथमाद्विवचनम् घृतस्नू =घृतप्रस्राविण्य ,

(अग्नि) स० वि० १०४, २ ३५ ४ **घृतनिर्णिजः**= घृतेनाऽऽज्येनोदकेन शुद्धीकृता (यज्ञा =सत्या व्यवहारा) ४ ३७ २ [घृत व्याख्यातम्। तदुपपदे णिजिर् शोच-पोषणयो (जु०) धातोर्निरुपसर्गात् क्विप्]

घृतपावानः उदकपा वीरा (जना) ६.१६ [घृत व्याख्यातम्। तदुपपदे पा पाने (भ्वा०) धातो 'आतो मनिन्क्वनिब्वनिपश्च' अ० ३ २ ७४ सूत्रेण वनिप्]

घृतपृचा घृतेन प्रदीपनेनोदकेन वा सम्पृक्ते (द्यावा-पृथिवी =विद्युदन्तरिक्षे) ६ ७० ४ [घृत व्याख्यातम्। तदुपपदे पृची सम्पर्चने (अदा०) धातो क्विप्]

घृतपृष्ठम् घृत पृष्ठमिव यस्य तम् (अग्निम्) ७ २ ४ घृतमुदकमाज्य पृष्ठ आधारे यस्य तम् (अग्निम्) ५ ४ ३. घृत दीपनमाज्यमुदक वा पृष्ठे यस्य तम् (अग्निम्) ५ १४ ५ घृतमुदक पृष्ठे यस्मिँस्तत् (बर्हि =अन्तरिक्षम्) १ १३ ५ **घृतपृष्ठः**=घृतमुदक पृष्ठे यस्य स (शिल्पी जन) ५ ३७ १ घृत जल पृष्ठेऽस्य (सूर्य) १ १६४ १ **घृतपृष्ठाः**= घृतमुदक पृष्ठे आधारे येषा ते (वह्नय =अग्नय) १ १४ ६ [घृत-पृष्ठपदयो समास। पृष्ठ =पृषु सेचने (भ्वा०) धातो 'तिथपृष्ठगूथयूथप्रोथा' उ० २ १२ सूत्रेण थक्-प्रत्यय]

घृतप्रतीकम् ये घृतमाज्य प्रत्येति तम् (अग्नि= विद्वज्जनम्) १ १४३ ७ **घृतप्रतीकः**=प्रतीतिकर जल-माज्य वा यस्य स (अग्नि =विद्युत्) १५ २७ घृतमाज्य प्रतीक प्रदीपक यस्य स (अग्नि =पावक) ३ ११८ यो घृतमुदक प्रत्याययति स (घृतयोनि =अग्नि) ३५ १७ घृतमाज्यमुदक वा प्रतीतिकर यस्य स (अग्नि) ५ ११ १ [घृत-प्रतीकपदयो समास। घृत व्याख्यातम्]

घृतप्रयाः यो घृतेन प्रीणाति स (सज्जन) ३ ४३ ३ [घृतोपपदे प्रीञ् तर्पणे कान्तो च (क्र्या०) धातोरच्-प्रत्यय]

घृतप्रसत्त. घृते प्रसत्त (अग्नि) ५ १५ १ [घृत-प्रसत्तपदयो समास। प्रसत्त =प्र+सद्लृ विशरणगत्य-वसादनेषु (भ्वा०) धातो क्त। नत्वाऽभावश्छान्दस]

घृतप्रुषम् यो यज्ञसिद्धेन घृतेन प्रुष्णाति स्निह्यति तम् (जनम्) १ ४५ १ घृतेनोदकेनाऽऽज्येन वा सिक्तम् (आहारम्) ७ ४७ १ **घृतप्रुषः**=ये घृतमुदक प्रोषयन्ति पूरयन्ति ते (ऊर्मय =समुद्रादिजलतरङ्गा) ६ ४४ २० **घृतप्रुषा**= घृतेन तेजसा प्रुट् पूर्णस्तेन (मनसा=विज्ञानेन) २ ३ २ [घृतोपपदे प्रुष स्नेहन-सेचन-पूरणेषु (क्र्या०) धातो क्विप्]

घृतप्व. घृत पुनन्ति यास्ता (आप =जलानि) ४ २ [घृतोपपदे पूञ् पवने (क्र्या०) धातो क्विप्]

घृतम् उदकम्, प्र०—घृतमित्युदकनामसु पठितम्, निघ० १ १२, ६ १६ शुद्ध प्रदीप्तमुदकम् ३४ ४० घृतमिवा-ऽऽनन्दप्रद विज्ञानम् ४ ५८ ४ सन्दीप्त तेज २ ३ ११. उदकमाज्य वा १ ११० ६ आज्यादिकम् ३ २ प्रदीप्त-विज्ञानम् १ १३५ ७ **घृतस्य**=शुद्धस्य ज्ञानस्य १७ ९६ विज्ञानस्य १७ ९५ प्रदीप्तस्य विज्ञानस्य १७ ९८ प्रकाश-स्य ४ ५८ ६ प्रकाशितस्य बोधस्य ४ ५८ १० **घृतेन**= प्रदीपकेनोदकेनाऽऽज्येन वा ७ ८ १ उदकेनाऽन्नेन वा २९ २ विद्याप्रकाशेन ५ ११ ३ सुगन्ध्यादिगुणयुक्तेना-ऽऽज्येन २ २२ **घृतेभिः**=आज्यादिभि २ ७ ४ **घृतैः**= उदकादिभि ३ ६२ १६ शोधितै सुगन्ध्यादियुक्तैर्घृतादिभि-र्यानेषु जलवाष्पादिभिर्वा प्र०—अत्र बहुवचनमकसाधन-द्योतनार्थम् ३ १ आज्यादिभी रसै १ १५३ १ प्रदीपकै साधनै ५ ८ ७ [घृ क्षरणदीप्त्यो (जु०) धातो 'अञ्जि-घृसिभ्य क्त' उ० ३ ८९ सूत्रेण क्त प्रत्यय। घृतम् उदकनाम निघ० १ १२ घृतमित्युदकनाम जिघर्त्ते सिञ्चति-कर्मण नि० ७ २४ एतद्वा अग्ने प्रिय धाम यद् घृतम् तै० १ १ ९ ६ घृत वै देवा वज्र कृत्वा सोममघ्नन् गो० उ० २ ४ देवव्रत वै घृतम् ता० १८ २ ६ बहुदेवत्य वै घृतम् कौ० २० ४ सर्वदेवत्य वै घृतम् कौ० २१ ४ रेतो वै घृतम् श० ९ २ ३ ३४ रेतसिक्तिर्वै घृतम् कौ० १६ ५ उल्व घृतम् श० ६ ६ २ १५ घृतमित्यन्तरिक्षस्य (रूपम्) श० ७ ५ १ ३ एतद्वै प्रत्यक्षाद् यज्ञरूप यद् घृतम् श० १२ ८ अन्तो वै पयसा घृतम् जै० १ २२४ अन्नस्य घृतमेव रस-स्तेज म० २ ६ १५ आयुर्दा देवजरस वृणानो घृत वसानो घृतपृष्ठो अग्ने काठ० ११ १३ एतद्रूपा वै पशवो यद् घृतम् काठ० ११ २ घृत वै देवाना फाण्ट मनुष्याणाम् श० ३ १ ३ ८ घृत वै देवाना मधु काठ० २६ ३ घृत च मे मधु च मे (यज्ञन कल्पताम्) तै० स० ४ ७ ४ १ घृत दुहाना-दितिर्जनाय, सा मे धुक्ष्व सर्वान् भूतिकामान् काठ० ३१.१४ घृत देवानामायुत मनुष्याणाम् मै० ३ ६ २ काठ० २३ १ घृत मनुष्याणाम् (सुरभि) ऐ० १ ३ घृतेन ते (अग्ने) तन्व वर्धयामि काठ० ३८ १२ तेजो वा एतत् पशूना यद् घृतम् ऐ० ८ २० तेजो वै घृतम् तै० स० २ २ ९ ६ मै० १ ६ ८ काठ० १० १ पयो वै घृतम् मै० २ १ ७ पशवो घृतम् मै० १ १० काठ० २२ ६ भूतिर्दध्ना घृतेन वर्धताम् तै० स० ३ २ ६ १ मै० ४ ८ ९. यदघ्रियत तद् घृतम् तै० स० २ ३ १० १ मै० २ ३ ४ वज्रो घृतम् काठ० २० ५ स घृद्इत्यकरोत् तद् घृतस्य घृतत्वम् काठ० २४ ७ समिधाग्नि

भू० २५६ **घोरा**=भयङ्करी (अश्वा=तुरङ्गी, महान्ती जनौ वा) ६ ६७ ४ भयङ्करा (समृति =युद्धम्) ४.१६ १७ दुष्टाना दु खप्रदा (सरस्वती=विद्याविज्ञानयुक्ता वाणी) ६ ६१ ७ **घोरा:**=विशुद्योगेन भयङ्करा (मरुत =वायव) १ १६७ ४ **घोरे !**=हे भयानके (अ०-पत्ति !) १२ ६४ [हन हिंसागत्यो' (अदा०) धातो 'हन्तेरच् घुर च' उ० ५ ६४ सूत्रेणाच् प्रत्ययो धातोर्घुरादेशश्च]

घोरवर्पस: घोर हननशील वर्पो रूप स्वरूप येषान्ते (मरुत =वायव), प्र०—वर्प इति रूपनामसु पठितम् निघ० ३ ७, १ १६ ५ [घोर-वर्पस्पदयो समास]

घोषतम् घोप कुर्वन्तौ स्त ५ १७ **घोषथ:**=विशेषेण शब्दयथ १ १५ १ ४ [घुषिरविशब्दने (भ्वा०) धातोर्लोट् अन्यत्र लट्]

घोषम् विद्या सुशिक्षायुक्ता वाचम्, प्र०—घोप इति वाड्नामसु पठितम्, निघ० १ ११, ३ ७ ६ **घोष:**=सुवक्तृत्वयुक्ता वाक् ७ २३ २ शौर्योत्साहजनको विचित्र-वादित्र-स्वरालापशब्द , भा०—मनोहरो निर्भयादिजनको वादित्रशब्द १७ ४१ वाणी , प्र०—घोप इति वाड्नाम, निघ० १ ११, ३ ३० १६ **घोषात्**=सुशिक्षिताया वाच ६ ३८ २ शब्दद्वारया ५ ३७ ३ **घोषान्**=वाक्प्रयोगान् ३ ३३ ८ शब्दान् ६ ७५ ७ **घोषाय**=सत्प्रियभाषणादि-युक्तायै वाण्यै १० ५ **घोषा.**=शब्दा १७ ४२ **घोषे**=उत्तमाया वाचि १ १२० ५ [घुषिरविशब्दने (भ्वा०) धातोर्घञ् । घोप =वाड्नाम निघ० १.११ घोपो घुष्यते नि० ९ ९]

घोषायै घोपा प्रशसिता शब्दा, गवादिस्थित्यर्था स्थानविशेषा वा विद्यन्ते यस्या तस्यै (कृपिभूम्यै) १ ११७ ७ [घोपप्राति० 'अर्श आदिभ्योऽच्' इत्यच् मत्वर्थे । तत स्त्रिया टाप् । घोष इति व्याख्यातम्]

घोषि शब्दयुक्त वच ४ ४ ८ घोपो यस्मिन्नस्ति तत् (मन्म=विज्ञानम्) ६ ५ ६ [घोपप्राति० मत्वर्थ इनि]

घोषेव आमाना वागिव १ १२२ ५ [घोप-इवपदयो समास । घोप =वाड्नाम निघ० १ ११]

घ्नन् नाशयन् (सेनापति) ६ ७३ २ विनाशयन् (बलाध्यक्षो न्यायाधीश) ४ १२ २ **घ्नन्तम्**=विरोध विनाशयन्तम् (इन्द्र=विद्वज्जनम्) ३ ४३ ८ हन्तारम् (इन्द्र=राजाद्यध्यक्षम्) ३ ३२ १७ विद्यावन्त शूरवीरमिव ३ ३९ ६ **घ्नन्त.**=शत्रु-हनन कुर्वन्त (राजपुरुषा) १ ३६ ८ [हन हिंसागत्यो (अदा०) धातो शतृप्रत्यय]

घ्नन्ति नाशयन्ति १ ४१ ३ [हन हिंसागत्यो (अदा०) धातो लटि प्रथमबहुवचनम्]

घ्रंसम् रात्र्या दिनम्, प्र०—घ्रंस इत्यहर्नाम, निघ० १.९, १ ११६ ८ दिनम् ५.४८ ७ [घ्रंस अहर्नाम निघ० १ ९ घ्रसम् अह नि० ६.३६]

घ्राताय योऽघ्रायि तस्मै (जनाय) २२ ९ [घ्रा गन्धोपादाने (भ्वा०) धातो क्त प्रत्यय । 'नुदविद०' निष्ठानत्वविकल्प]

च अनुक्त-समुच्चयार्थे १ २ ५ पुनरर्थ १.२६ आवृत्त्यर्थे १ ७४ अन्वाचये २ १४ पश्चादर्थे २ १६ पूर्वार्था-नुकर्पणे १ १४ १ और, स०वि० १६७, ऋ० ६ ११३ ११ भी, आर्याभि० २ ३७, ३६ २४ पश्चाज्जने ६ २६ [च समुच्चयार्थे नि० १ ४]

चकनन्त कामयन्ते १ १६८ ४ [कानिपन् कान्ति-कर्मा निघ० २ ६ कनी दीप्तिकान्तिगतिषु (भ्वा०) धातो-र्यङ्लुकि व्यत्ययेनात्मनेपदम्]

चकमान: कामयमान (राजा) ५ ३६ १ [चकमान कान्तिकर्मा निघ० २ ६ चक तृप्तौ प्रतिघाते च (भ्वा०) धातो शानच्]

चकर करोमि १ १६५ ८ **चकरम्** भृश करोमि ४ ४२ ६ [डुकृञ् करणे (तना०) धातो सामान्ये लिट् । अन्यत्र यङ्लुकि रूपम्]

चकर्तिथ कृन्तसि १ ५९.६ **चकर्थ**=करोषि २ १३ ११ करोति १ ६३ ८ कुरु १ १३१ ५ कुर्य्या ५ ३३ ४ [कृती छेदने (तुदा०) धातो सामान्ये लिट् । अन्यत्र डुकृञ् करणे (तना०) धातोर्लिट्]

चकर्थ कृन्त ३ ३० १७

चकान: कामयमान (इन्द्र=विद्वान् राजा) ७ २७ १ **चकाना**=कामयमानौ (सभासेनेशौ) ६ ६८ ३ **चकाना** =देदीप्यमाना (सेनाऽस्मा यादिजना) ४ १६ १५ [चक तृप्तौ प्रतिघाते च (भ्वा०) धातो शानच् । व्यत्यये-नात्मनेपदम्, सुगभावश्च छान्दस चकमान कान्तिकर्मा निघ० २ ६]

चकार कुर्य्या, प्र०—अत्र लिङर्थे लिट् ८ २३ करोति ४ १६ ४ कुर्यात् १२ ६५ कृतवान्, करोमि करि-ष्यामि वा, प्र०—अत्र 'छन्दसि लुङ्लङ्लिट' अ० ३ ४ ६ इति कालसामान्ये लिट् ८ १३ करोति करिष्यति वा, प्र०—अत्र सामान्यकाले लिट् १ ३२ १ करोतु ७ २६ ३. [डुकृञ् करणे (तना०) धातो सामान्ये लिट्]

घृतसारिण्य, घृतमानिन्य इति वा नि० १२ ३६ अन्यत्र ष्णा शौचे (अदा०) धातोरौणा० उ प्रत्यय]

घृतस्नूः या घृतमुदक स्नान्ति शोधयन्ति ता (गिर = सस्कृता वाणी) २ २७ १ घृतमुदकमिव प्रदीप्त व्यवहार स्नान्ति शोधयन्ति ता (गिर = वाच) ३४ ५४ [घृतस्नु-रिति व्याख्यातम्]

घृतस्नो यो घृत स्नाति शुन्धति तत्सम्बुद्धौ (विद्वन्) ५ २६ २ [घृतस्नुपद व्याख्यातम्। तत सम्बुद्धौ रूपम्]

घृतहस्ता घृत हस्ते गृह्यते यया सा (इळा = प्रशसनीया वाक्) ७ १६ ८ [घृत-हस्तपदयो समास]

घृताची घृतमुदकमञ्चत इति घृताची अग्निवाय्वोर्घर्षणाकर्षणक्रिये, भा०—रसच्छेदकधारकौ (अग्निवायू) प्र०—अत्र पूर्वसवर्णादेश 'घृतमित्युदकनाम' निघ० १ १२, २ १६

घृताची सुखप्रदा रात्रीव ३ ३० ७ घृतमाज्यमुदक वाऽञ्चति प्राप्नोति सा दीप्ति १५ १८ घृतमायुर्निमित्त-मञ्चति प्राप्नोत्यनया सुनियमाचरणक्रियया सा २ ६ या घृतमुदकमञ्चति प्राप्नोति सा (रात्रि) घृतमाज्यमञ्चति प्राप्नोत्यनयाऽऽदानक्रियया सा २ ६ या होमक्रिया घृतमुदक-मञ्चति प्रापयति सा, प्र०—घृतमित्युदकनामसु पठितम्, निघ० १ १२, २ ६ या घृतमुदकमञ्चति सा (देवी = विदुषी स्त्री) ५ ४३ ११ रात्रि, प्र०—घृताचीति रात्रि-नाम, निघ० १ ७, ६ ६३ ४

घृताचीम् या घृतमुदकमञ्चति प्राप्नोति ता रात्रीम् ३ १६ २ घृत जलमञ्चति प्रापयतीति ता क्रियाम्, प्र०—घृतमित्युदकनामसु पठितम्, निघ० १ १२, १ २७ **घृताचीः** = या घृतमुदकमञ्चन्ति ता (अ०—द्युती) १७ ५६ या घृतमाज्यादिक जल वाऽञ्चन्ति प्रापयन्ति ता (समिध) ३ ४ **घृताच्या** = या घृतमुदकमञ्चति प्राप्नोति तया रात्र्या ३ २७ १ [घृताची रात्रिनाम निघ० १ ७ घृतमित्युदकनाम (निघ० १ १२) तदुपपदे अञ्चु गति-पूजनयो (भ्वा०) धातो 'ऋत्विग्०' इत्यादिना क्विन्। 'अनिदिताम०' इति नकारलोपे 'अञ्चतेश्चोपसख्यानमि' ति ङीप्। 'अच' इत्यकारलोपे 'चौ' इति दीर्घ। घृताच्यसि जुहूर्नाम्ना श० १ ३ ४ १४ घृताच्यसि ध्रुवा नाम्ना श० १ ३ ४ १४ घृताच्यस्युपभृन्नाम्ना श० १ ३ ४ १४ स्रुग् घृताची श० ८ ६ १ १६ स विश्वाचीरभिचष्टे घृताचीरिति स्रुचश्चैतद् वेदीश्चाह घृताची—स्रुक् श० ६ ? ३ १? वाग्वै धीर्घृताची ऐ० आ० १ १ ४]

घृताऽन्नः घृतमाज्य प्रदीपनमन्नमिव प्रदीपक यस्य (अग्नि = विद्युत्) ७ ३ १ [घृत-अन्नपदयो समास]

घृतावृधा घृतेन तेजसा वर्धेते (द्यावापृथिवी = विद्युद्-अन्तरिक्षे) ६ ७० ४ [घृतोपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप्। 'सुपा सुलुगि' त्याकार]

घृतासुति. घृतमासूयते येन स (विद्वज्जन) १ १५ ६ १ **घृतासुती** = घृतेन समन्तात् सुति प्रेरण ययोस्तौ (इन्द्राविष्णू = वायुसूर्यौ) ६ ६९ ६ घृतेनाऽऽसुति सवन ययोस्तौ (अध्यापकोपदेशकौ) १ १३६ १ यौ घृतमुदक-मासुत (सूर्याचन्द्रमसौ) २ ४१ ६ [घृत व्याख्यातम्। सुति = पु प्रसवैश्वर्ययो (भ्वा०) धातो क्तिन्। तयो समास]

घृताहवन घृतमाज्यादिक जल चाऽऽसमन्ताद् जुह्वति यस्मिन् स (अग्ने = अग्निर्भौतिक) १ १२ ५ घृतग्राहिन् (विद्वज्जन) १ ४५ ५ [घृतोपपदे हु दानाऽदानयो (जु०) धातोरधिकरणे ल्युट्]

घृषुम् घर्षणशीलम् (मरुता गणम्) १ ६४ १२ **घृषौ** दुष्टाना घर्षणे ६ ४६ ४ [घृसु सघर्षे (भ्वा०) धातो 'मृगय्वादयश्च' उ० १ ३७ सूत्रेण कु प्रत्यय]

घृष्वय. सम्यग् घर्षणशीला (वीरजना) १ ८५ १ प्र०—'कृविघृष्वि०' उ० ४ ५६ घृषु सङ्घर्षे इत्यस्माद् विन् प्रत्यय १ ८५ १ मोढार (क्रीडा = क्रीडका जना) १ १६६ २ **घृष्वये** = घर्षिताय शुद्धाय (प्रजाजनाय) ४ ३२ ६ घर्षणाय ४ ३२ ६ घर्षन्ति परस्पर सञ्चूर्णयन्ति येन तस्मै (प्रकाशमानाय यशसे) १ ३७ ४ **घृष्वे !** = पदार्थाना सङ्घर्षक ! (अग्ने = राजन्) ४ २ १३ **घृष्वेः** = दुष्टाना घर्षकस्य (वीरजनस्य) ६ १८ १२ [घृषु सघर्षे (भ्वा०) धातो 'कृविघृष्विच्छवि०' उ० ४ ५६ सूत्रेण विन् प्रत्ययान्तो निपात्यते]

घृष्विराधसः घृष्वीनि सम्बद्धानि राधासि धनानि येषान्ते (मरुत = धार्मिका विद्वासो जना) ७ ५६ ५ [घृष्विरिति व्याख्यातम्। राधस् इति धननाम निघ० २ १० तयो समास]

घोरम् हननम् २ १२ ५ **घोरः** = यो हन्ति स (इन्द्र = राजा) ७ २८ २ **घोरस्य** = दुष्टस्य (जनस्य) ४ ६ ६ **घोराणाम्** = हन्त्रीणाम् (मरुता = वायूनामिव) १ १६६.७ **घोराय** = हन्यन्ते सुखानि यस्मिन् तद् घोर, तन्निवारणाय, प्र०—'हन्तेरच् घुर् च' उ० ५ ६४ अनेन घोर इति सिद्धयति २ ३२ आपत्काल-निवारणाय, भ०

चक्राणौ कुर्वन्तौ (राजप्रजाजनौ) ४ ४१ १० [डुकृञ् करणे (तना०) धातोर्लिट कानच्। लिट् च सामान्ये]

चक्रिम् शिल्पविद्याक्रियासाधनेषु यानाना शीघ्रचालनस्वभावम् (ईम्=जलमग्नि वा) १ ६ २ **चक्रिः**=य करोति स, कर्त्तु शील (परमात्मा) ३ १६ ४ कर्त्ता (इन्द्र=सूर्य इव राजा) ७ २० १ [डुकृञ् करणे (तना०) धातोस्तच्छीलादिष्वर्थेषु 'आद्दगमहन०' अ० ३ २ १७१ सूत्रेण किलिड्वच्च]

चक्रिया चक्रेण २ ३४ ६ चक्राविव वर्त्तमानान् (वायून्) २ ३४ १४ [चक्रिरिति व्याख्यातम्। ततस्तृतीयास्थाने 'सुपा सुलुग्०' सूत्रेण यादेश]

चक्रियेव यथा चक्रे भवा पदार्था १ १८५ १ यथा चक्राणि तथा ५ ३० ८ [चक्रियेव=चक्रयुक्ते इव नि० ३ २२]

चक्रयोः चक्रयो ६ २४ ३ रथाङ्गयो, प्र०—अत्र कृञ् धातो 'आद्गमहन०' अ० ३ २ १७१ इति कि-प्रत्यय १ ३० १४ [चक्रिरिति व्याख्यातम्। तत पष्ठ्या=सप्तम्या वा द्विवचनम्]

चक्रेव चक्राणीव ४ ३० २

चक्षणम् प्रकाशनम् ५ ५५ ४ दर्शनम्, प्र०—चक्षिङ् दर्शने, इत्यस्माल्ल्युटि प्रत्यये परे 'असनयोश्च, अ० २ ४ ५४ इति वार्तिकेन ख्याञादेशाऽभाव १ १३ ५ [चक्षिङ् व्यक्तायां वाचि, अय दर्शनेऽपि (अदा०) धातोर्भावे ल्युट। 'चक्षिङ ख्याञ्' इति ख्याञादेशे प्राप्ते 'असनयोश्चे' ति प्रतिषेध]

चक्षणिः प्रकाशक सूर्य ६ ४ २ [चक्षिङ् दर्शने (अदा०) धातोर्बाहुलकादौणादिकोऽनि प्रत्यय]

चक्षत चक्षीत १ १२१ २ **चक्षते**=सत्यमुपदिशन्ति १ १६० ६ दर्शयन्ति १ १२१ २ [चक्षिङ् व्यक्ताया वाचि (अदा०) अय दर्शनेऽपि, धातोर्लङ्, अडभावश्छान्दस। अन्यत्र लट्]

चक्षदानम् व्यक्तोपदेशकम् (लम्पटजनम्), प्र०—अत्र चक्षिङ्धातोरौणादिक आनक्प्रत्ययोऽडुगागमश्च बाहुलकात् १ ११६ १६ **चक्षदानः**=चक्षो विद्यावचो दीयते येन स (जार=वृद्धो जन) १ ११७ १८

चक्षमीथाः सहस्व २ ३३ ७ [क्षमूष् सहने (भ्वा०) धातोर्लिङ्। विकरणस्य लुक् द्वित्वञ्च छान्दसम्]

चक्षय प्रख्यापय १ १३४ ३ [चक्षिङ् व्यक्ताया वाचि (अदा०) धातोर्णिजन्तात्लोट्]

चक्षसा प्रज्ञानेन ६ ७ ६ दर्शनेन (विचक्षणा=सूर्येण) १ ६६ २. दर्शनेन वा १ ८७ ५ प्रकाशेन १ ५० ६ तन्निमित्तभूतेन दर्शनेन १ ६२ ११ व्यक्तेन दर्शनेनोपदेशेन वा ३३ ३२. प्रज्ञानेन ६ ७ ६ **चक्षसे**=प्रसिद्धाय (ऊर्जे=बलाय) ३६ १४ सर्वद्रष्टुर्दर्शयितुर्वा (सूर्याय=परमेश्वराय सूर्यलोकाय वा), प्र०—अत्र षष्ठ्यर्थे चतुर्थी, इति वार्तिकेन चतुर्थी 'चष्ट इति पश्यतिकर्मसु पठितम्' निघ० ३ ११, ४ ३५ ख्यापयितुम् ५ १५ ४ विद्यायुक्तवाण्या प्रकाशाय १ ११२ ८ ख्यातु योग्याय (रणाय=सङ्ग्रामाय) ११ ५० द्रष्टुम् १ ४८ ८ दर्शनाय १ ७ ३ [चक्षिङ् व्यक्ताया वाचि, अय दर्शनेऽपि (अदा०) धातोरौणादिकोऽसुन्प्रत्यय। चष्टे पश्यतिकर्मा निघ० ३ ११ चक्षसे दर्शनाय नि० ६ २७.]

चक्षसे उपदिशे ५ ३ ६ **चक्षाथाम्**=उपदिशेताम् १० १६ **चक्षाथे**=उपदिशथ ५ ६२ ८ **चक्षि**=वदेयम् ७ ३ ६ [चक्षिङ् व्यक्ताया वाचि (अदा०) धातोर्लट्। 'बहुल छन्दसी' ति शपो न लुक्]

चक्षाणः उपदिशन् (विद्वज्जन) १ १२८ ३ [चक्षिङ् व्यक्ताया वाचि (अदा०) धातोर्लट शानच्]

चक्षुरिव यथा चक्षु ५ ५४ ६

चक्षुर्दाः चष्टेऽनेन तद्, ददातीति, भा०—चक्षु-व्यवहार-साधक (सूर्य) ४ ३ [चक्षुस्-उपपदे डुदाञ् दाने (जु०) धातो क्विप्। चक्षुरिति व्याख्यास्यते]

चक्षुषम् प्रत्यक्षम् १२ ५ ६ प्रकाशकम् (ब्रह्म) १८ ६६ दर्शक ब्रह्म १ ११५ १ नेत्रवद् दर्शनहेतु (ब्रह्म) १ ६२ ६

चक्षुषः प्रत्यक्षादेरिन्द्रियोत्पन्नात्, भा०—प्रत्यक्षादिप्रमाणात् १८ ५८ न्यायदर्शकस्य (उपदेशकस्य) १७ २५ नेत्र का, आर्याभि० २ ३६, ३६ २ नेत्रस्य ३६ २ **चक्षुषा**=दृष्ट्या ५ ३४ लोचनेन, भा०—विवेकेन ११ ६० स्वात्मवत् प्रेमबुद्ध्या, ऋ० भू० ६८, दृष्टि से स० वि० २१४, ३६ १८ विज्ञानेन प्रत्यक्षप्रमाणेन नेत्रेण १ ३० दर्शनशक्तियुक्तौ (जलाऽग्नी) २ ३६ ५ **चक्षुषे**=चष्टे पश्यति येन तस्मै २२ २३ एकस्य चक्षुर्गोलकस्य दहनाय ३६ ३ पदार्थाना दृष्ट्यै १ २० **चक्षुः**=चष्टेऽनेन तन्नेत्रम् ६ १४ चष्टे नेनेक्ति नेत्रेन्द्रियम् ३ २६ ७ चष्टे येन तन्नेत्रम् प्र०—'चक्षे शिच्च' उ० २ ११५ अनेन चक्षेरुसि प्रत्यय शिच्च १ २२ २० चष्टे पश्यति येन तत्

चकृपन्ते कृपालवो भवन्ति १ १७६ ५

चकृम कुर्याम २५ ३० विदध्याम १ १०१ ६ कुर्मो वा करिष्याम २० १७ कुर्महे करिष्यामो वा, प्र०—अत्र लट्लृटोरर्थे लिट् ३ ४५ [डुकृञ् करणे (तना०) धातो सामान्ये लिट्]

चकृवान् कृतवान् (इन्द्र =परमैश्वर्यवान्राजा) ५ २६ १४ **चकृवांसम्**=कुर्वन्तम् (इन्द्र=परमैश्वर्यवन्त शत्रुविदारक वा राजानम्) ६ १७ १३ **चकृवांसः**=कर्त्तार (मेधाविनो जना) १ १६१ ४ [डुकृञ् करणे (तना०) धातोर्लिट क्वसु]

चकृषन्त कृपालवो भवन्ति ४ १ १४

चकृषे करोपि ४ ३५ ७ करोति १५ २३ कृतवानसि उत्पन्न किया है, आर्याभि० १ १५, १ ५२ १४ कुर्या १ ११३ ६ [डुकृञ् करणे (तना०) धातोर्लिटि मध्यमैकवचने रूपम्]

चके कामितवान् कामयता वा, प्र०—अत्र पक्षे लोडर्थे लिट् 'आचके इति कान्तिकर्मसु पठितम् निघ० २ ६, ४ २१ कामये २१ १ प्रशसामि १ २५ १६ कामयते, प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति यलोप ३ ३ २ कामयेत ३ ३ १० कृतवानस्ति ऋ० भू० ४३, १० ७ ३२ [आचक इति कान्तिकर्मसु पठितम् निघ० २ ६ चक तृप्तौ प्रतिघाते च (भ्वा०) धातोर्लिट्]

चक्र कुरुत, प्र०—अत्र लोडर्थे लिट् १ ८६ ६ कुर्वन्तु २५ २२ कुर्वन्ति ७ ५६ २३ कुर्याम ४ ३६ ४ [डुकृञ् करणे (तना०) धातोर्लिटि मध्यमबहुवचनम्]

चक्रतुः कुर्याताम्, प्र०—अत्र लिडर्थे लिट् ८ ३७ कुरुत १ ११६ २ **चक्रयुः**=कुर्यातम् १ १०८ ५ कुरुतम् १ ११७ १७ कुरुथ ६ ५६ १ **चक्राते**=कुरुत ३ ५४ ६ **चक्राथे**=कुरुत १ १०८ ३ **चक्रिरे**=कुर्वन्ति ७ ६० ११ कृतवन्त सन्ति १ ४० ५ **चक्रुः**=कृतवन्त १६ ५३ कुर्वन्ति ४ १६ ३ कुर्य्यु ४ ३३ ३ **चक्रे**=कुर्य्याम् ३ ४८ ३ कृतवान् २ ४० ४ करोति, प्र०—अत्र लडर्थे लिट् १ ३३ १० [डुकृञ् करणे (तना०) धातो सामान्ये लिट्]

चक्रम् भूगोलराज्यम् १ १७५ ४ भूगोलसमूहम् २ ११ २० स्वराज्यम् १ १७४ ५ कलाचालकम् ५ ३१.११ क्रामति रथो येन तत् १ १२१ १३ कला-यन्त्रादिकम् ६ ५४ ३ चक्रवद्वर्त्तमान जगत् पृथिव्यादिकम् १ १३० ६ चक्रमिव वर्त्तमान ब्रह्माण्ड ४.१६ चरति येन तत् ५ ७३ ३ यन्त्रकलासमूहम् १ ३० १६

चक्राणि=चक्रवद्वर्त्तमानानि कर्म्माणि ४ ३१ ६

चक्रेण=शस्त्रसमूहेन चक्राऽङ्कयुक्तेन यानसमूहेन वा १ ५३ ६ **चक्रैः**=लोकभ्रमणाय परिध्यास्यै ६ ६२ १० [चक्रम्=चकतेर्वा, चरतेर्वा, क्रामतेर्वा नि० ४ २६ डुकृञ् करणे (तना०) धातो 'घञर्थे कविधानम्' इति क प्रत्यय । 'कृञादीना के द्वे भवत इति वक्तव्यम्' अ० ६ १ १२. वा० सूत्रे द्वित्वम् । वज्रो वै चक्रम् तै० १ ४ ४ १० जै० १ ५ १]

चक्रमन्त क्रमन्ते गच्छन्ति ४ ४२ ६ रमन्ते २ १६ ६ [क्रमु पादविक्षेपे (भ्वा०) धातोर्लिट् । छान्दसत्वाद् भस्य इरेच् न]

चक्रमे क्रमते ५ ८७ ४ यथायोग्य प्रकृतिपरमाण्वा-दिपादानशान् विक्षिप्य साऽवयव कृतवान् १ २२ १७ क्रान्तवान्, निक्षिप्तवान्, क्राम्यति, क्रमिष्यति वा, प्र०—अत्र सामान्यार्थे लिट् २ १५ विहितवान् १ २२ १८ [क्रमु पादविक्षेपे (भ्वा०) धातोर्लिट् । 'अनुपसर्गाद्वा' इत्यात्मने-पदम्]

चक्रमाणा क्रमयितारौ (वायुविद्युतौ) ६ ६२ २ [क्रमु पादविक्षेपे (भ्वा०) धातोर्लिट् । 'लिट कानज्वा' इति कानच् । 'सुपा सुलुगि' त्याकारादेश]

चक्रमाथे कामयय ६ ६९ ५ [क्रमु पादविक्षेपे (भ्वा०) धातोर्लिटि मध्यमद्विवचनम् । 'अनुपसर्गाद्वा' इत्यात्मनेपदम्]

चक्रमासज. यो चक्रस्य मासकालस्य मासान्तेभ्यो जात (आर्य =राजा) ५ ३४ ६ [चक्रमासोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड प्रत्यय]

चक्रमिव यथा चक्र गच्छति तथा ३ ६१ ३ [चक्र-इवपदयो समास । चक्रपद व्याख्यातम्]

चक्रये पुरुषार्थकरणशीलाय (इन्द्राय=ऐश्वर्यमिच्छवे जीवाय) १ ६ २ [डुकृञ् करणे (तना०) धातोस्तच्छीला-दिष्वर्थेषु 'आदृगमहन०' अ० ३ २ १७१ सूत्रेण किलिड्वच्च]

चक्रवाकः पक्षिविशेष २४ ३२ **चक्रवाकौ**=पक्षि-विशेषाविव २५ ८ चकवा चकवी के समान एक दूसरे से प्रेम बद्ध (स्त्रीपुरुष) स० वि० १४०, अथर्व० १४ २ ६४

चक्राणासः भृश युद्ध कुर्वाणा (योद्धृजना) १ ३३ ८ [डुकृञ् करणे (तना०) धातोर्लिट कानच् । 'सोऽसुगागम]

अभ्यश्नुत एभिरिति वा, नि० ९ ७, १ ३१ १३ [चतुर्-अक्षपदयो समास । अक्ष =अशूङ् व्याप्तौ (स्वा०) धातो 'अशेर्देवने स' उ० ३ ६५ सूत्रेण स । अक्षा अश्नुवत एनानिति वाभ्यश्नुवते एभिरिति वा नि० ९ ६]

चतुरनीकः चतुर्विधान्यनीकानि यस्य स (राजा) ५ ४८ ५ [चतुर्-अनीकपदयो समास]

चतुरश्रिम् चतुरङ्गिणी सेना प्राप्तम् (राजाख्य वीर-जनम्) ४ २२ २ **चतुरश्रिः**=चतुरो वेदानश्नुते स (विद्वज्जन) १ १५२ २ [चतुर्-अश्रिपदयो समास । अश्रि =श्रिञ् सेवायाम् (भ्वा०) धातोराङ्पूर्वात् 'आङि श्रिहनिभ्या ह्रस्वश्च' उ० ४ १३८ सूत्रेण इण्प्रत्यय उपसर्गस्य ह्रस्वश्च ।]

चतुरः एतत्सङ्ख्याकान् (भागान्) ४ ३५ ४ धर्मा-ऽर्थकाम-मोक्षान् २३ २० चतुर्विधानि भू–जलाऽग्नि-वायुभि सिद्धानि शिल्पकर्माणि १ २० ६ वाय्वग्नि-जल-भूमी १ १६१ २ धर्माऽर्थ-काम-मोक्षान् २३ २० [चतुर्पद व्याख्यातम्]

चतुर्थी चतुर्णां पूर्णा (क्रिया) २५ ४ ५ [चतुर्-प्राति० पूरणार्थे डट् । 'षट्कतिकतिपयचतुरा थुक्' अ० ५ २ ५१ सूत्रेण थुगागम । स्त्रिया ङीप् । यज्ञ एव चतुर्थी चिति श० ८ ७ ४ १५ यदूर्ध्व मध्यादर्वाचीन ग्रीवाभ्य-स्तच्चतुर्थी चिति श० ८ ७ ४ २१]

चतुर्दशम् दशेन्द्रिय-मनोबुद्धिचित्ताना सङ्ख्यापूरक-महङ्कारम् ९ ३४ [चतुर्-दशन्पदयो समासे पूरणार्थे डट्-प्रत्यय]

चतुर्दशाक्षरेण साम्न्युष्णिहा (छन्दसा) ९ ३४ [चतुर्दश-अक्षरपदयो समास]

चतुर्धा अध-ऊर्ध्व-तिर्यक्-समगतियुक्तम् (चमस=रथम्) ४ ३५ २ [चतुर्प्राति० 'सख्याया विधार्थे धा' अ० ५ ३ ४२ सूत्रेण धाप्रत्यय]

चतुर्भिः चतुष्ट्वसङ्ख्याकै (नामभि) १ १५५ ६ [चतुर् इति व्याख्यातम्]

चतुर्युगः यश्चतुर्षु युज्यते स (रथ) २ १८ १ [चतुर्-युगपदयो समास । युग =युजिर् योगे (रुधा०) धातोर्घञ् उच्छादिपाठादगुणत्वम्]

चतुर्वयम् चत्वारो वयम् (जनसमूहम्) ४ ३६ ४ चत्वारो धर्मार्थ-काम-मोक्षा वया व्याप्तव्या येन तम् (विद्वद्व्यवहारम्) १ ११० ३

चतुर्विंशतिः चतुरधिका विंशति (सङ्ख्या) १८ २५ [चतुर्-विंशतिपदयो समास]

चतुर्विंशः चतुर्विंशतिधा (स्तोम) १४ २५ [चतुर्विंश एव स्तोमो भवति तेजसे ब्रह्मवर्चसाय ता० १५ ९ १ १६ तेजश्चतुर्विंश स्तोमानाम् ता० १५ १० ६ चतुर्विंशो वै सवत्सरोऽन्न पञ्चविंशम् ता० ४ १० ५]

चतुश्चत्वारिंशत् चतुरधिका चत्वारिंशत् (सङ्ख्या) १८ २५ [चतुर्-चत्वारिंशत्पदयो समास]

चतुश्चत्वारिंशः एतत्सङ्ख्याया पूरक (स्तोम) १४ २६ [चतुश्चत्वारिंशत्प्राति० पूरणार्थे डट्प्रत्यय]

चतुःशृङ्गः चत्वारो वेदा शृङ्गाणीव यस्य (ब्रह्मा=चतुर्वेदविज्जन) ४ ५८ २ चत्वारो वेदा शृङ्गवदुत्तमा यस्य स (ब्रह्मा=चतुर्वेदविज्जन) १७ ९० [चतुर्-शृङ्गपदयो समास । शृङ्ग =शॄ हिंसायाम् (क्र्या०) धातो 'शृणातेर्ह्रस्वश्च' उ० १ १२६ सूत्रेण गन्प्रत्यय स किद् नुडागमश्च । शृङ्ग श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा नि० २ ८]

चतुष्टोमः चत्वार स्तोमा स्तुतयो यस्मिन् सवत्सरे स १४ २३ चतुर्भिर्वेदै स्तूयते य स्तोता (विद्वज्जन) १४ २५ [चतुर्-स्तोमपदयो समास । 'स्तुतस्तोमयो-श्छन्दसि' अ० ८ ३ १०५ सूत्रेण छन्दसि मूर्धन्य । स्तोम =ष्टुञ् स्तुतौ (अदा०) धातो 'अर्त्तिस्तुसुहु०' उ० १ १४० सूत्रेण मन्प्रत्यय । यच्चतुष्ट्या देवाश्चतुर्भि स्तोमैरस्तुवस्तस्माच्चतुः स्तोम, त चतु स्तोम सन्त चतुष्टोममित्याचक्षते ऐ० ३ ४३ प्रतिष्ठा वै चतुष्टोम ता० ६ ३ १६ प्रतिष्ठा चतुष्टोम श० ८ २ ४ २६ परमश्चतु-ष्टोम मस्तोनाम् श० १३ ३ ३ १ अन्तश्चतुष्टोम स्तोमानाम् ता० २१ ४ ६ सरघा वा अश्वस्य सक्थ्या वृहत तद्देवाश्चतुष्टोमेन प्रत्यदधुर्यच्चतुष्टोमो भवत्यश्वस्य सर्वत्वाय ता० २१ ४ ४]

चतुष्पक्षा जिसके पूर्व, पश्चिम, दक्षिण और उत्तर मे एक एक शाला और इनके मध्य मे पाँचवी बडी शाला हो, स० वि० १६८, अथर्व० ९ २ ३ २१ [चतुर्-पक्षपदयो समास]

चतुष्पत् चत्वार पादा यस्य पश्वादे स, अत्र 'वाच्छन्दसि' इति पदादेश १ ४९ ३ **चतुष्पदः**=गवादे २३ ३ चत्वार पादा यस्य गवादेस्तस्य २५ १७ गौ आदि प्राणि-समूह के, स० वि० ५, २३ ३ **चतुष्पदा**=गवादिना २६ १९ चत्वार पादा यस्मिँस्तेन (वाकेन=यजुषा)

३६ १ चष्टे येन तद्रूपग्राहकमिन्द्रियम् ४ १५ नेत्रव्यवहारम् ४ ३ प्रकाशक (विद्वज्जन) ५ ५९ ३ व्यक्तिकारकम् (इन्द्रियम्) १ १६४ १४ बाह्यमाभ्यन्तर विज्ञान तत्साधन वा (अग्ने=अग्निर्भौतिक) २ १६ चक्षुरिव सर्वदर्शकम् (ब्रह्म=ईश्वर) ३६ २४ नेत्रदृष्टि, ऋ० भू० ४४ नेत्रवद् दर्शनहेतु (उपा) १ ९२ ९ दर्शक प्रकाशकम् (घृतम्=आज्यम्) १८ ६६ प्रकाशको विज्ञानमयो विज्ञापकश्च (ब्रह्म) प० वि० । सर्वदृग् (ब्रह्म) प० वि० । चाक्षुप प्रत्यक्षम्, ऋ० भू० १०४ चक्षुरादीन्द्रियम् ३ ३७ २ दर्शनम् १४ १७ नेत्रम् १९ ८९ **चक्षोः**=ज्योति स्वरूपात् (ब्रह्मण) ३१ १२ ज्योतिर्मयात् (परमेश्वरात्) ऋ० भू० १२६ [चक्षिङ् व्यक्ताया वाचि, अय दर्शनेऽपि (अदा०) धातो 'चक्षे शिच्च' उ० २ ११९ सूत्रेण उसि प्रत्यय, स च शित्। चक्षु ख्यातेर्वा चष्टेर्वा नि० ४ ३ चक्षु=ख्यानम् नि० १२ १६ चक्षुर्वा ऋतम् ऐ० २ ४० सत्य वै चक्षु श० १ ३ १ २७ एतद्ध वै मनुष्येषु सत्य निहित यच्चक्षु ऐ० १ ६ एतद्वै मनुष्येषु सत्य यच्चक्षु गो० उ० २ २३ सत्य वै चक्षु श० ४ २ १ २६ चक्षुर्वै सत्यम् तै० ३ ३ ५ २ चक्षुर्निवित् जै० उ० ३ ४ ३ तस्मादेक सच्चक्षुर्द्वेधा ऐ० २ ३२ त्रिवृद् वै चक्षु शुक्ल कृष्ण लोहितमिति कौ० ३ ५ तस्माद् विरूप चक्षु कृष्णमन्यच्छुक्लमन्यत् प० २ २ चक्षुर्हृदये (श्रितम्) तै० ३ १० ८.५ शश्वद्ध वै रेतस सिक्तस्य चक्षुषी ऽएव प्रथमे सम्भवत श० ४ २ १ २८ चक्षु पुरुषस्य प्रथम सम्भवत सम्भवति ऐ० ३ २ चक्षुर्वै ऋक् श० ६ ३ ३ ११ चक्षुर्वै विचक्षण चक्षुषा हि विपश्यति कौ० ७ ३ चक्षुर्वै विचक्षण वि ह्यनेन पश्यतीति ऐ० १ ६ यच्चक्षु स बृहस्पति गो० उ० ४ ११ चक्षुर्वै जमदग्निर्ऋषि, यदेनेन जगत् पश्यत्यथो मनुते तस्माच्चक्षुर्जमदग्निर्ऋषि श० ८ १ २ ३ चक्षुषी वै रोहिणौ (पुरोडाशौ) श० १४ २ १ ५ चक्षुर्मैत्रावरुण कौ० १३ ५ चक्षुश्च मनश्च मैत्रावरुण ऐ० २ २६ चक्षुरध्वर्यु गो० उ० ५ ४ चक्षुर्वै यज्ञस्याध्वर्यु श० १४ ६ १ ६ चक्षुरेवोद्गाता गो० पू० २ १० चक्षुर्ब्रह्मा तै० २ १ ५ ९ चक्षुर्वै ब्रह्म श० १४ ६ १० ८ चक्षुर्ब्रह्म गो० पू० २ १० चक्षुर्देव गो० पू० २ १० यद्वै चक्षुस्तद् हिरण्यम् गो० पू० २ ११ सूर्यो मे चक्षुषि श्रित तै० ३ १० ८ ५ चक्षुरादित्य जै० उ० ३ २ ७ तद् यच्चक्षुरादित्य स जै० उ० १ २८ ७ यत्तच्चक्षुरसौ स आदित्य श० १० ३ ३ ७ अर्कश्चक्षुस्तदसौ सूर्य तै० १ १ ७ २ चक्षुर्वा ऽअपा क्षयस्तत्र हि सर्वदैवाप क्षियन्ति श० ७ ५ २ ५४ चक्षुरेव चरण चक्षुषा ह्ययमात्मा चरति श० १० ३ ५ ७ चक्षुरुष्णिक् श० १० ३ ११. त्रैष्टुभ चक्षु ता० २० १६ ५ चक्षुर्वै प्रतिष्ठा श० १४ ९ २ ३ चक्षुर्वाव साम्नोऽपचिति जै० उ० २ ३९ ५. चक्षुर्यश श० १२ ३ ४ १० चक्षुरेव यश गो० पू० ५ १५. यच्चक्षु स बृहस्पति गो० २ ४ ११ प्रजापतेर्वा एते चक्षुषी यच् शुक्रामन्थिनौ मै० ४ ६ ३ चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे तै० स० ५ ३ १ ४ चक्षुश्चतुर्होता मै० १ ९ ५ काठ० ९ १३ चक्षुर्वै शुक्र मै० ४ १ १२ ६ तै० ३ ३ ५ २]

चक्षुष्पाः चक्षुर्दर्शन रक्षतीति स, भा०—दृष्टिव्यवहारस्य पालक (अग्ने=अग्निर्भौतिक) २ १६ यश्चक्षु पाति (विद्वज्जन) २० ३४ [चक्षुरिति व्याख्यातम्, तदुपपदे पा रक्षणे (अदा०) धातो क्विप् प्रत्यय । विद्वद्वसु अक्षुष्पा तै० स० ३ २ १० २]

चक्षुष्मते प्रशस्त चक्षुर्विद्यते यस्य तस्मै (जनाय) ३५ ७ [चक्षुष्प्राति०, अतिशायने मतुप् । चक्षुरिति व्याख्यातम्]

चख्वांसम् प्रतिघातम् (दुर्जनम्) २ १४ ४

चचक्ष कथयेत् ५ २ ८ [चक्षिङ् व्यक्ताया वाचि (अदा०) धातोर्लिट् । व्यत्ययेन परस्मैपदम्]

चतन्तम् गच्छन्त व्याप्तम् (नम=सत्कारमन्न वा) प्र०—चततीति गतिकर्मसु पठितम्, निघ० २ १४, १ ६५ १ [चतति गतिकर्मा (निघ० २ १४) धातो शतृप्रत्यय]

चतसृभिः धर्माऽर्थ-काम-मोक्षविज्ञापिकाभि गीर्भि=वाग्भि) २७ ४३ **चतस्रः**=चतु सङ्ख्योपेता (उपदिश) १ १६४ ४२ चतु सङ्ख्याका (उपरा=दिशा) १ ६२ ८ पूर्वाद्या दिश १८ ३२ चतुष्ट्वविशिष्टा सङ्ख्या अ०—चतु सङ्ख्या १८ २५ एतत्सङ्ख्याप्रमिता (प्रदिश) २७ १ साम-दाम-दण्ड-भेदाऽऽख्या वृत्तय ५ ३२ २ [चतुर्प्राति० स्त्रिया तृतीयाबहुवचनम् । चतुरश्चतसृ आदेश । चतुर्=चते-याचने (भ्वा०) धातो 'चतेरुरन्' उ० ५ ५८ सूत्रेण उरन् । चत्वारश्चलिततमा सख्या नि० ३ १०]

चतिनम् आनन्दप्रदम् (इन्द्र=परमैश्वर्यप्रदमीश्वरम्) ६ १९ ४

चतुरक्षरेण दैव्या बृहत्या (छन्दसा) ९ ३१ [चतुर्-अक्षरपदयो समास]

चतुरक्षः य खलु चतस्र सेना अश्नुते व्याप्नोति स चतुरक्ष (सभाध्यक्ष) प्र०—अक्षा अश्नुवते इति वा

दीना हित (अग्नि=सूर्य) ३ ३ ६ २ चन स्वन्नादिषु हितो=हितकारी (अग्नि=विद्वज्जन) ३ ११ २ अन्नाय हितकारी (अग्नि=पावक) ३ २ ७ चनसे अन्नाय हित (अग्नि) ३ २ २ चनसे पृथिव्याद्यन्नाय हितकारी (अग्नि) प्र०—चन इत्यन्ननाम, नि० ६ १५, ३३ ७५ [चनस्पद व्याख्यातम्। तदुपपदे हि गतौ वृद्धौ च (स्वा०) धातोरौणादिक क्त। अथवा=चनस्-हितपदयो समास]

चन्द्र आह्लादप्रद (विद्वज्जन) ५ १० ४ **चन्द्रम्**= आह्लादकारकम् (यन्त्रम्) ४ १८ सुवर्णम्, प्र०—चन्द्रमिति हिरण्यनामसु पठितम्, निघ० १ २, ४ २६ आनन्दकर देदीप्यमान सुवर्णमिव वर्त्तमानम् (अग्नि=वह्निम्) ३ ३ ५ आह्लादकर सुवर्णम् ४ २ ३१ हिरण्यवदानन्दप्रदम् (स्वरूपम्) १२ १०४ **चन्द्राणि**=काञ्चनादीन् धातून् ४ २६ **चन्द्राय**=चन्द्रलोकस्य प्राप्तये ३६ २ चन्द्रमण्डलाय २२ २६ चन्द्रलोकाय २२ २८ **चन्द्रा:**= आह्लादकरा (विद्वज्जना) ७ ३६ ७ आनन्ददा (विदुष्य स्त्रिय) ७ ४० ७ चन्द्रादिलोकान्, प्र०—अत्र शस स्थाने जस् १२ १०२ **चन्द्रे**=हे आह्लादकारके (पत्नि) ८ ४३ **चन्द्रेण**=इन्दुना १ ४८ ६ आनन्देन १६ ६३ रत्नजटितेन (रथेन=यानेन) ४ ४८ ३ आह्लादकेन सुवर्णादिजटितेन (रथेन=यानेन) ४ ४८ २ सुवर्णमयेन (रथेन) ४ ४८ १ [चदि आह्लादने दीप्तौ च (भ्वा०) धातो 'स्फायितञ्चिवञ्चि०' उ० २ १३ सूत्रेण रक्-प्रत्यय चन्द्रम्=हिरण्यनाम निघ० १ २ चन्द्रमाश्चायन् द्रमति, चन्द्रो माता, चान्द्र मानमस्येति वा। चन्द्रश्चन्दते कान्तिकर्मण। चन्दनमित्यप्यस्य भवति। चारु द्रमति, चिर द्रमति, चमेर्वा पूर्वम् नि० ११ ५ असौ वै चन्द्र प्रजापति श० ६ २ २ १६ चन्द्र एव सविता जै० उ० ४ २७ १३ चन्द्र ह्येतच्चन्द्रेण क्रीणाति यत्सोम हिरण्येन (चन्द्र = सोम, चन्द्रम्=हिरण्यम्) श० ३ ३ ३ ६ चन्द्र हिरण्यम् तै० १ ७ ६ ३ चन्द्रा ह्याप तै० १ ७ ६ ३ असौ वै चन्द्र पशुस्त देवा पौर्णमास्यामालभन्ते श० ६ २ २ १७]

चन्द्रदक्षिणा.=चन्द्र सुवर्ण दक्षिणा दान येषान्ते (सेनाप्रजाजना) ७ ४५ [चन्द्र-दक्षिणापदयो समास। चन्द्र इति पद व्याख्यातम्। दक्षिणा=दक्षते समर्द्धयतिकर्मणो व्यृद्ध समर्द्धयतीति नि० १ ७]

चन्द्रबुध्न. चन्द्र सुवर्ण चन्द्रमा वा बुध्नेऽन्तरिक्षे यस्य यस्माद्वा स (मेघ), प्र०—चन्द्रमिति हिरण्यनाम, निघ० १ २, १ ५२ ३ [चन्द्र-बुध्नपदयो समास। चन्द्र इति व्याख्यातम्। बुध्नमन्तरिक्ष बद्धा अस्मिन् धृता आप इति वा इदमपीतरद् (शरीरस्य मूल हृदयम्) बुध्नमेतस्मादेव बद्धा अस्मिन् धृता प्राणा इति नि० १० ४४]

चन्द्रमसम् चन्द्रलोकम् २३ ५६ **चन्द्रमस:**=चन्द्रलोकाऽऽदे १ ८४ १५ चन्द्रस्य २४ ३५ **चन्द्रमसि**= चन्द्रलोके २३ ४ चन्द्रलोकसमीप आह्लादे वा १ २८ **चन्द्रमा:**=यस्सर्वान् चन्दत्याह्लादयति स १८ ४० इन्दु (देवता) १४ २० आह्लादकारक इन्दुलोक ११०५ १ चन्द्रलोक २३ ४ आनन्दस्वरूपत्वादाह्लादकत्वाच्च (ईश्वर) ३२ १ शैत्यकर (चन्द्रलोक) ३३ ६० आह्लादकरश्चन्द्र २३ ४६ आनन्दस्वरूप और स्व-सेवको को आनन्द देने वाला (ईश्वर), आर्याभि० २ ४, ३२ १ [चन्द्र इति व्याख्यातम्, तदुपपदे माङ् माने शब्दे च (जु०) धातो 'चन्द्रे मो डित्' उ० ४ २२८ सूत्रेणासि प्रत्यय। चन्द्रमा पदनाम निघ० ५ ५ चन्द्रमा=चायन् द्रमति, चन्द्रो माता, चान्द्र मानमस्येति वा नि० ११ ५ स (इन्द्र) चन्द्र म आहरेति प्रालपत्। तच्चन्द्रमसश्चन्द्रमसत्वम् तै० २ २ १० ३ चन्द्रमा वै मा मास। तस्मान् मेत्याह। भा इति हेतत् परोक्षेणैव जै० उ० ३ १२ ६ चन्द्रमा वै सोम कौ० १६ ५ तै० १ ४ १० ७ श० १२ १ १ २ चन्द्रमा उ वै सोम श० ६ ५ १ १ सोमो राजा चन्द्रमा श० १० ४ २ १ असौ वै सोमो राजा विचक्षणश्चन्द्रमा कौ० ४ ४७ १० एतद्वै देवसोम यच्चन्द्रमा ऐ० ७ ११ चन्द्रमा वाऽस्य (सोमस्य) दिवि श्रव उत्तमम् श० ७ ३ १ ४६ यद्रुद्रश्चन्द्रमास्तेन कौ० ६ ७ (प्रजापति) त (रुद्र) अब्रवीन्महान्देवोऽसीति। तद्यदस्य तन्नामाकरोच्चन्द्रमास्तद्रूपमभवत् प्रजापतिर्वै चन्द्रमा प्रजापतिर्वै महान्देव श० ६ १ ३ १६ (इन्द्र.) त (वृत्र) द्वेधान्वभिनत्तस्य यत् सौम्य न्यवतमास त चन्द्रमस चकाराथ यदस्यासुर्य्यमास तेनेमा प्रजा उदरेणाविध्यत् श० १ ६ ३ १७ अथैष एव वृत्रो यच्चन्द्रमा श० १ ६ ४ १३ चन्द्रमा एव मन्थी श० ४ २ १ १ चन्द्रमा वै वरेण्यम् जै० उ० ४ २८ १ चन्द्रमा द्विपात्तस्य पूर्वपक्षापरपक्षौ पादौ गो० पू० २ ८ चन्द्रमा वै पञ्चदश एप हि पञ्चदश्यामपक्षीयते पञ्चदश्यामापूर्य्यते तै० १ ५ १० ५ अथो चन्द्रमा वै भान्त पञ्चदश स च पञ्चदशाहान्यापूर्यते पञ्चदशापक्षीयते तद् यत्तमाह भान्त इति भाति हि चन्द्रमा श० ८ ४ १ १० षोडशकलो वै चन्द्रमा ष० ४ ६ एतद्वै देवसत्य यच्चन्द्रमा कौ० ३ १ चन्द्रमा पुनरसु० तै० २ ५ ७ ३ चन्द्रमा वै जायते पुन तै० ३ ६ ५ ४ मनो मे रेतो मे प्रजा मे पुनस् सम्भूतिर्मे तन्मे त्वयि (चन्द्रमसि) जै० उ० ३ २७ १४ नक्षत्राणि स्थ चन्द्रमसि श्रितानि। सवत्सरस्य प्रतिष्ठा

१ १६४ २४ **चतुष्पदे**=गवाद्याय १६ ४८. गवादि पशु-वर्ग के लिए आर्याभि० २ २१, ३६ ८ [चतुर्-पादपदयो समास । पादस्य पदादेशश्छान्दस । समासान्तलोपे पदा-देशश्छान्दस]

चतुष्पदाः चत्वारि पदानि यासु ता (प्रजा) २३ ३४ [चतुर्-पादशब्दयो समासे समासान्तलोपे पदा-देशे 'टाबृचि' अ० ४ १ ६ सूत्रेण टाप्]

चतुष्पदी चतुर्वेदाऽध्यापिका (विदुषी स्त्री) १ १६४ ४१ **चतुष्पदीम्**=चत्वारि धर्मार्थकाममोक्षा पदानि यस्यास्ताम् (स्वाहा=वाचम्) ८ ३० [चतुर्-पादपदयो समासे समासान्तलोपे पदादेशे स्त्रिया 'पादोऽन्यत-रस्याम्' इति डीप्]

चतुष्पदे चत्वार पादा यस्य गवादेस्तस्मै ११ ८३

चतुष्पात् चत्वार पादा यस्य स गवादि ४ ५१ ५ गवादिकम् १४ २५ गवादीन् १४ ८ [चतुर्-पादयो समासे समासान्तलोपे 'पादोऽन्यतरस्याम्' इति डीपोऽभावे रूपम्। चतुष्पाद पशव गो० उ० १ ४ तै० २ १ ३५ चतुष्पादा पशव ता० ३.८ ३ चतुष्पादा वै पशव ऐ० २ १८ चतुष्टया वै पशवोऽथो चतुष्पादा कौ० १६ ३]

चतुस्त्रिंशत् एतत्सङ्ख्याका (वङ्की =कुटिला गती) १ १६२ १८ अष्टौ वसव एकादश रुद्रा, द्वादशाऽऽ-दित्या, इन्द्र, प्रजापति प्रकृतिश्चेति (तन्तव =वस्त्रादय) ८ ६१ शिक्षणानि २५ ४१ [चतुर्-त्रिंशत्पदयो समास]

चतुस्त्रिंशः चतुस्त्रिंशद्विध (नाक =आनन्द) १४ २३ [तस्य चतुस्त्रिंशोऽग्निष्टोम प्रजापतिश्चतुस्त्रिंशो देवतानाम् ता० १२ ७ ५ अश्वश्चतुस्त्रिंशो दक्षिणाना प्रजापतिश्चतुस्त्रिंशो देवतानाम् ता० १७ ११ ३]

चतु.सहस्रम् चत्वारि सहस्राणि सङ्ख्या यस्य तम् (घर्म=प्रतापम्) ५ ३० १५

चतुःस्रक्तिः चतुरस्रा, भा०—प्राप्तरसा (नाभि) चार ३८ २० कोणे वाली (नाभि) आर्याभि० २ ४१, ३८ २० [एप वै चतुःस्रक्तिर्य एप (सूर्य) तपति दिशो ह्येतस्य स्रक्तय श० १४ ३ १ १७]

चत्ताय याचिताय (शत्रवे) १ १३२.६ आह्लादाय, अ०—आनन्दाय ८ ५३ [चते याचने (भ्वा०) धातो क्त]

चत्वारः वर्णा आश्रमाश्च १ १२२.१५ ऋत्विज ७ १८ २३ पृथिव्यादय ५ ४७ ४ [चतुर् इति व्याख्यानम् तत प्रथमाबहुवचनम् । 'चतुरनडुहोरामुदात्त' इत्यामागम । चत्वारश्चलिततमा सख्या नि० ३ १०]

चत्वारि चत्वारो वेदा ४ ५८ ३ नामाख्यातोपसर्ग-निपाता १ १६४ ४५

चत्वारिंशः एतत्सङ्ख्यापूरको ब्रह्मचर्यव्यवहारकर (वर्च =अध्ययनम्) १५ ३ [चत्वारिंशत्प्राति० पूरणार्थे डट्]

चत्वारिंश्याम् चत्वारिंशत पूर्णायाम् (शरदि=शरद्दतौ) २ १२ ११ [चत्वारिंशत्प्राति० पूरणार्थे डट् । तत स्त्रिया डीप्]

चन अपि ४ १८ ८ कदाचित् १ १८ ७ आकाङ्क्षा-याम् ३ ३४

चनस्यतम् अन्नवदेतौ सेव्येताम्, प्र०—'चायनेरन्ने ह्रस्वश्च' उ० ४ २०० अनेनाऽसुन्प्रत्ययान्ताच्चनस्शब्दात् क्यच्प्रत्ययान्तो नामधातोर्लोटि मध्यमस्य द्विवचनेऽस्य प्रयोग १ ३ १. [चनस्शब्दाद् 'उपमानादाचारे' अ० ३ १ १० सूत्रेण क्यच् । ततो लोट्]

चनः अन्नादिकमैश्वर्य्यम् ७ ३८ ३ भोग्यमन्नम् २० ८६ अन्नभोजनादिव्यवहारम् १ ३ ६ भक्ष्य-भोज्य-लेह्यचूष्यामरयन्नम्, प्र०—अत्र 'चायतेरन्ने ह्रस्वश्च' उ० ४ २००. अनेनाऽसुन्प्रत्ययो नुडागमश्च १ २६ १० [चायृ पूजानिशामनयो (भ्वा०) धातो 'चायतेरन्ने ह्रस्वश्च' उ० ४ २०० सूत्रेणासुन् प्रत्ययस्य नुडागमे सति यलोपो ह्रस्वश्च । चन अन्ननाम नि० ६ १५]

चनिश्चदत् आह्लादयति ५ ४३ ४

चनिष्ठम् अतिशयेनाऽन्नम् ५ ७७ ४. [चनस्पद व्याख्यातम् । ततोऽतिशायन इष्ठन् प्रत्यये टिलोपे रूपम्]

चनिष्ठा अतिशयेनाऽन्नाद्यैश्वर्ययुक्ता (सुमति =शोभना प्रज्ञा) ७ ५७ ४ [चनिष्ठ व्याख्यातम् । तत स्त्रिया टाप्]

चनोधाः चनास्यन्नानि दधातीनि (गृहपतिर्जन), प्र०—चन इत्यन्ननामसु पठितम्, निघ० ६ १५, ८ ७ अभ्यासेनाऽविकार्यो ग्राह्य, सर्वेभ्योऽधिकाऽन्नवान् गम्यते (गृहपतिर्जन) प्र०—अभ्यासे भूयासमर्थ मन्यते, नि० १० ४२, ८ ७ [चनस्पद व्याख्यातम् । तदुपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप् । चन इत्यन्ननाम नि० ६ १५]

चनोहितः यश्चनांस्यन्नानि हिनोति प्रापयति स (अग्नि =पावक) २२ १६. ओषधिपाकसामर्थ्येन अन्ना-

चन्द्रेव सुवर्णानीव, प्र०—चन्द्रमिति सुवर्णनाम, निघ० १ १२, ३ ६१.७ [चन्द्र-इवपदयो समास]

चमसम् यज्ञसाधनम् ८ ३५ ३ चमत्यस्मिन् मेघे १ ११० ३ मेघम् १ १६१ १ मेघमिव गर्जनायुक्त रथम् ४ ३५ २. पेयसाधनम् ४ ३५ ५ मेघमिव विभक्तम् (उक्थ्य=प्रशसनीय कर्म) ४ ३६ ४ **चमस:**=आचामति येन स (यज्ञपात्रम्) ४ ३५ ४ **चमसा**=चमसौ ४ ३३ ५ **चमसान्**=मेघानिव (पदार्थान्) १ १६१ ६ मेघान् प्र०—चमस इति मेघनाम, निघ० १ १०, ४ ३३ ६ **चमसा**.=ये चाम्यन्ति अदन्ति भोगान् येभ्यो मेघेभ्यस्ते (इन्द्रयाना:=मेघा) १ ५४ ६ होम-भोजन-पात्राणि १८ २१ [चमु अदने (भ्वा०) धातो 'अत्यविचमि०' उ० ३ ११७ सूत्रेण असच्प्रत्यय । चमस =मेघनाम निघ० १ १० चमस कस्मात् ? चमन्त्यस्मिन्निति नि० १० १२]

चमू द्विविधे सेने ५ ५१ ४. सेनया, प्र०—अत्र 'सुपा सुलुक्०' इति तृतीयैकवचनस्य लुक् ८ ३६ **चमूषु**=भक्षयित्रीषु सेनासु ३ ४८ ४ **चम्वा**=सेनयेव ३ ५५ २० **चम्वो:**=सेनयोर्मध्ये ४ १८ ३ द्यावापृथिव्योर्मध्ये ६ ५७ २ पदाति-हस्त्यश्वादिस्थयो सेनयोरिव १ २८ ९ [चमु अदने (भ्वा०) धातो 'कृपिचमितनि०' उ० १ ८० सूत्रेण ऊ प्रत्यय स्त्रियाम् । चम्वौ द्यावापृथिव्योर्नाम निघ० ३ ३०]

चमूषद: से चमूषु सेनासु सीदन्ति अवस्थिता भवन्ति ते वीरा १ ५४ ९ चमन्त्यदन्ति विनाशयन्ति शत्रुबलानि याभिस्ताश्चम्व, ये चमूषु सेनासु सीदन्ति ते (इन्दव =सोमाद्योषधिगणा), प्र०—अत्र 'कृतो बहुलम्' इति वार्त्तिकमाश्रित्य 'सत्सूद्विष०' अ० ३ २ ६१ अनेन करणे क्विप् 'कृपि-चमितनि०' उ० १ ८१ अनेन चमूशब्दश्च सिद्ध १ १४ ४ [चमूपद व्याख्यानम् । तदुपपदे षद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातो करणे क्विप्]

चम्रिष: चमन्त्यदन्ति भोगांस्तान् (पूर्वी =प्राचीना प्रजा), प्र०—अत्र बाहुलकादौणादिक इसि प्रत्ययो रुटागमश्च १ ५६ १ [चमु अदने (भ्वा०) धातोर्बाहुलकाद् इसि प्रत्ययो रुट् च]

चम्रीष: ये चमूभि शत्रुसेना ईषन्ते हिंसन्ति ते (वीरा योद्धृजना) १ १०० १२ चमू=सेना से वश को प्राप्त (परमात्मा) आर्याभि० १ ३४, ऋ० १ ७ १० १२

चम्वीव यथा चम्वौ यज्ञपात्रे २० ७६

चयत् चिनोमि ५ ६० १ **चयते**=एकत्र करोति १ १६७ ८ **चयध्वे**=सञ्चिनुत ७ ५२ २. सञ्चिनुथ ६ ५१ ७ [चिञ् चयने (स्वा०) धातोर्लेट् । अन्यत्र लट् । विकरणव्यत्ययेन शप्]

चयमाना: वर्धमाना (देवा =पूर्णविद्या विद्वज्जना) २ २७ ४ [चय गतौ (भ्वा०) धातो शानच्]

चयसे प्राप्नोषि १.१६० ५ **चयिष्टम्**=चिनुत ६ ६७ ८ **चयेम**=चिनुयाम १ १३२ १ [चय गतौ (भ्वा०) धातोर्लेट् । अन्यत्र लुङ् लिङ् च । चिञ् चयने (स्वा०) धातोर्वा रूपाणि । विकरणव्यत्ययेन शप् । चयसे=चातयसि नि० ४.२५]

चय्यम् चयेषु सान्त्वनेषु भवम् प्र०—'चय सान्त्वने' धातोरच् ततो यत् १६ ८८ [चय गतौ (भ्वा०) धातोरच् । ततो भवार्थे यत् । धातूनामनेकार्थकत्वात् सान्त्वनेऽर्थेऽपि]

चर विजानीहि, प्र०—अत्र चर इत्यस्य गत्यर्थत्वात् प्राप्त्यर्थो गृह्यते ८ ३४ प्राप्नुहि प्राप्नोति वा १ १० ३ [चर गतौ (भ्वा०) धातोर्लोट्]

चरकाचार्यम् चरकाणा भक्षकाणामाचार्य्यम् ३० १८ [चरक-आचार्यपदयो समास । चरक =चर भक्षणार्थे ऽपि (भ्वा०) धातोरच् । तत स्वार्थे कन् । अथवा चर धातो 'क्वुन् शिल्पिसञ्ज्ञयो ०' उ० २ ३२ सूत्रेण क्वुन्]

चरणम् गमनम् ३ ५ ५ विहरना, स० वि० १६७, ६ ११३ ६ [चर गतौ (भ्वा०) धातोर्भावे ल्युट् । चक्षुरेव-चरण चक्षुषा ह्ययमात्मा चरति श० १० ३ ५ ७ आदित्य एव चरण यदा ह्येवैष उदेत्यथेद सर्व चरति श० १० ३.५ ३]

चरणीयमाना प्राप्नुवती (उष =उषा) ३ ६१ ३

चरण्यत् चरणमिवाऽऽचरेत्, प्र०—'वाच्छन्दसि' इत्यत्रात्लोप ईत्वाऽभावश्च ८ २४ [चरणपदात् 'उपमानादाचारे' इति क्यच् । ततो नामधातोर्लेट् । अल्लोप ईत्वाभावश्च छान्दसम्]

चरत् चरति ३३ ६३ गच्छति ६ ५६ ६ प्राप्नोति १ १७३ ३ सर्व जानाति, प० वि०, ३६ २४ **चरत:**=कुरुत २ २४ ५ वर्त्तेते २० २५ चलत ६ २७ ७ आगच्छत १ ६२ ८ प्राप्नुत १ १०२ २ **चरति**=प्राप्तोऽस्ति ३ ५५ ६ विलसति ३ ५८ १ स्वेनैव स्व प्रकाशित सन् भवति, ऋ० भू० १४४ भ्रमति २३.४६ सेवते १ ५२ ६. प्राप्नोति ५ ४४ ८ गच्छति ५ ६३.४ [चर गतौ (भ्वा०) धातोर्लेट् । अन्यत्र लट्]

यन्त्रम्) ऋ० भू० १६६, ऋ० १ ८.२१ १० **दुष्टरस्य**=दुःखेन तरितु योग्यस्य (साधो =सत्पुरुषस्य) ७ ८ ३. **दुष्टरः**=दुःखेन तरितुमुल्लङ्घयितु जेतु योग्य (अग्नि = राजा) ३ २४ १ दुःखेन तरितु सम्प्लवितु योग्य (अग्नि = विद्वान्राजा) ६ ३७ **दुष्टरा**=दुःखेन तरितुमुल्लङ्घयितु योग्यौ (इन्द्राग्नी=नरेश-सेनापती) ५ ८६ २ [दुस् इत्युपपदे तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'ऋदोरप्' इत्यप्प्रत्यय । दुसो मूर्धन्यादेशश्छान्दस. । दुष्टरा दुरनुकराण्यन्यै. नि० ५ २५ दुष्टरस्तन्न रातीरिति दुस्तरो ह्येष रक्षोभिर्नाप्ट्राभि श० ५ २४ १६]

दुष्टरीतये शत्रुभिर्दुःखेन तरितुमर्हाय (इन्द्राय=सभासेनेशाय) २ २१ २ [दुस् इत्युपपदे तॄ प्लवनसन्तरणयो (भ्वा०) धातोरौणादिको वाहुलकाद् ईति प्रत्यय]

दुष्टरीतु दुःखेन तरितुमुल्लङ्घयितु योग्यम् (सह) ६ ११ [दुस् उपपदे तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्बाहु० औणादिक ईतु प्रत्यय]

दुष्टुतिः दुष्टा चासौ स्तुति पापकीर्त्तिश्च सा १ ५३ १ **दुष्टुती** दुष्टया प्रशसया ७ ३२ २१ दुष्टया स्तुत्या प्र०—अत्र 'सुपा सुलुक्०' इति पूर्वसवर्ण २ ३३ ४ [दुस्-स्तुतिपदयो समास]

दुः दद्यु प्र०—अत्र लुङ्यडभाव १ १२७ ४ [डुदाञ् दाने (जु०) धातोर्लुङ् । अडभावश्छान्दस । 'गातिस्थाघु०' इति सिचो लोप]

दुष्पदा दुःखेन पत्तु प्राप्तु योग्येन (चक्रेण=शस्त्र-समूहेन यानसमूहेन वा) १ ५३ ६ [दुस् इत्युपपदे पद गतौ (दिवा०) धातो 'सम्पदादित्वात्' क्विप् । ततस्तृतीया]

दुष्परिहन्तु दुःखेन परिहनन यस्य तद्विद्याद्यभ्यासार्थम् (शर्म=गृहम्) २ २७ ६ [दुस्-परिहन्तुपदयो समास । परिहन्तु=परि पूर्वाद् हन् हिंसागत्यो (अदा०) धातोरौणादि-कस्तु प्रत्ययो वाहुलकाद्]

दुष्प्राव्यः दुःखेन प्रावितु योग्य (इन्द्र =राजपुरुष) ४ २५ ६ [दुस् इत्युपपदे प्रुङ् प्लुङ् गतौ (भ्वा०) धातोर्ण्यत्]

दुस्तरम् दुःखेन तरितु योग्य वलम् १ १३६.८ [दुस्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'ऋदोरप्' इत्यप्प्रत्यय]

दुहन्ता प्रपूरयन्तौ (अश्विना=सभासेनेशौ) १ ११७ २१ [दुह प्रपूरणे (अदा०) धातो. शतृप्रत्यय । 'सुपा सुलुग्०' इत्याकारादेश]

दुहन्ति प्रपूरयन्ति १ १३७ ३ पिप्रति १ ६४ ५ पिपुरति १ ६४ ६ प्रपिपुरति १ १३७ ३ **दुहाते**=पिपृते ६ ७० २ प्रात ४ २३ १० [दुह प्रपूरणे (अदा०) धातोर्लट्]

दुहाना प्रपूरयन्ती (धेनु =वाक्) ३ ५८ १ **दुहानाम्**=सुखप्रपूरिकाम् (धेनु=वाणीम्) २ ३२ ३ प्रपूरयन्तीम् (अदिति=धेनुम्) १३ ४६ **दुहानाः**=पूर्णशिक्षाविद्या (धारा.=वाच) ७ ४३ ४ काममलङ्कुर्वाणा (उपस = प्रभातवेला) ६ २८ १ प्रपूरयन्त (भानव =किरण-दीप्तय) ३ ११४ प्रपूरयन्त्य (उपास =प्रभाता) ३४ ४० [दुह प्रपूरणे (अदा०) धातो शानच् । तत स्त्रिया टाप्]

दुहाम् प्रपूरिकाम् (सीता=भूमिकर्षिकाम्) ४ ५७ ७ [दुह प्रपूरणे (अदा०) धातो 'इगुपधज्ञाप्रीकिर क' सूत्रेण क । तत स्त्रिया टाप्]

दुहितरम् कन्यामिव वर्त्तमानाम् (उषास=प्रातर्वेलाम्) ४ ३० ९ **दुहितरः**=कन्या इव किरणा ४ ५१ १० **दुहितरा**=कन्ये इव वर्त्तमाने (अहोरात्रे) ६ ४९ ३. **दुहितरि**=कन्येव वर्त्तमानायाम् (उपसि) १ ७१ ५ **दुहितः**=पुत्रीव उप १ ४८ १ **दुहिता**=पूर्णयुवति कन्या १ ११७ १३ पुत्री इव (उषा) १ ४८ ८ दुहितेवोषा ३ ५५ १२ पुत्रीवोषा १९ ४ दुहितेव कान्ति ४ ४३ २ दूरे हिता कन्येव कान्तिरषा १ ११६ १७ दूरे हिता पुत्री वा १ ९२ ५ कन्येव वर्त्तमाना (उषा) ४ ५२ १ **दुहितुः**=दूरे हिताया कन्याया ३ ३१ १ उपस १ १६४ ३३ **दुहित्रा**=या कन्येव वर्त्तमाना तया (उपसा=प्रभातवेलया) १ १८३ २ [दोग्धि कार्याणि प्रपूरयतीति विग्रहे दुह प्रपूरणे (अदा०) धातो 'नप्तृनेष्टृ०' उ० २ ९५ सूत्रेण तृच् निपात्यते, दुहिता दुर्हिता दूरे हिता दोग्धेर्वा नि० ३ ४]

दुहीत परिपूर्णा स्यात् २ १८ ८ [दुह प्रपूरणे (अदा०) धातोर्लिङ्]

दुहीयत् दुह्यात्, प्र०—अत्र व्यत्ययेन परस्मैपद यासुटो ह्रस्वश्च २ ११ १० प्रपूरयेत् २ १७ ६ प्रपूरयति २ १८ ६ **दुहीयन्**=या दुग्धादिभि प्रपिपुरति, प्र०—दुह धातोरौणादिक इ किच्च, तस्मात् क्यजन्ताल्लेड्-बहु-

जसोऽसुग् आगम । दृढमिति व्याख्यातम्]

दृतिम् चर्ममय-सुरापात्रमिव १ १९ १ १० दृतिमिव वर्त्तमान मेघम् ४ ४५ ३ यो दृणाति त दृतिरिव जलेन पूर्णम् ५ ८३ ७ **दृतिः**=मेघ, प्र०—दृतिरिति मेघनाम, निघ० १ १०, ४ ४५ १ **दृते!**=अविद्याऽन्धकार-निवारक जगदीश्वर विद्वन् वा ३६ १८ सकल मोहाऽऽवरणविच्छेदको पदेशक वा परमात्मन् ३६ १६ हे सर्वदु खविनाशकेश्वर, ऋ० भू० ६८, ३६ १८ हे अनन्त-बल, महावीर, दुष्ट-स्वभाव-नाशक ईश्वर, आर्याभि० २ ३, ३६ १८ हे सर्व-दु खविदारक परमात्मन्, स० वि० २१४, ३६ १८ [दीर्यतेऽसौ दृतिरिति विग्रहे दृ विदारणे (क्र्या०) धातो 'दृणातेर्ह्रस्व' उ० ४ १८४ सूत्रेण ति प्रत्ययो ह्रस्वश्च । दृति मेघनाम निघ० १ १० सवत्सरो वै वाकुरो दृति जै० २ ३९६]

दृतेरिव मेघस्येव ६ ४८ १८ [दृते -इवपदयो समास । दृतिमिति व्याख्यातम्]

दृभ्रम् सुखवर्धकम् (दृढज्ञानम्) ४ १ १५ [दृह वृद्धौ (भ्वा०) धातोरौणादिको रक् । वर्णव्यत्ययेन हकारस्य धकारादेश]

दृभीकम् भयङ्करम् (दुर्जनम्) २ १४ ३ दृभी भये (चुरा०) धातोरौणादिको बाहुलकाद् ईकन् प्रत्यय । गुणाऽभावो बाहुलकादेव]

दृवा य शत्रून् दृणाति (राजा), प्र०—अत्र 'अन्येपामपि०' अ० ३ २ ७५ इति क्वनिप् १० ८ [दृ विदारणे (क्र्या०) धातो क्वनिप्प्रत्यय । दृवा (इपु) स यया प्रथमया (इष्वा) समर्पणेन पराभिनत्ति सैका सेय पृथिवी सैषा दृवा नाम श० ५ ३ ५ २९]

दृशतिः दर्शनम् ६ ३ ३ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्वाहु० औणादिकोऽति प्रत्यय किच्च]

दृशये दर्शनाय ६ ९ ५ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'इक् कृष्यादिभ्य' इति वा० सूत्रेण इक्प्रत्यय । दृशि प्राति० चतुर्थी]

दृशानम् दृश्यमान दर्शयितार वा (अग्निम्) २ १० ४ सप्रेक्षणीयम् (वायुम्) ११ २३ **दृशानः**=दर्शक अमृत = नाशरहित ईश्वर.) १२ २५ **दृशाना**=दृश्यमाना (उषा) प्र०—अत्र कर्मणि लट शानच् 'बहुल छन्दसि' इति विकरणस्य लुक् च १ ९२ १२ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'युधिबुधिदृश किच्च' उ० २ ९० सूत्रेण आनच्-प्रत्यय । अथवा दृशिर् धातो कर्मणि शानच् । 'बहुल छन्दसी' ति विकरणस्य लुक् । 'दृशाना' प्रयोगे स्त्रिया टाप् । दृशान (यजु० ११ २३) व्यचिष्ठमन्नैरभस दृशानमित्यव-काशव-तमन्नैरन्नाद दीप्यमानमित्येतत् श० ६ ३ ३ १९]

दृशि दर्शके ५ ५२ १२ [दृशिर् प्रेक्षणे (भ्वा०) धातो क्विप् प्रत्यय । तत सप्तमी]

दृशीकम् द्रष्टुमर्हम् (स्तोमम्) प्र०—अत्र बाहुलका-दौणादिक ईकन् प्रत्यय किच्च १ २७ १० **दृशीके**= द्रष्टव्ये (तनये=कुमारे) ४ ४१ ६ द्रष्टव्ये ज्ञानव्यवहारे १ ६६ ५ दर्शके (आदित्ये) १ ६६ ५ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्बाहुलकादौणादिक ईकन् प्रत्यय किच्च । दृशीकम्=दर्शनीयम् नि० १० ८]

दृशे द्रष्टुम्, प्र०—'दृशे विख्ये च' अ० ३ ४ ११ अनेनाऽय निपातित १ २३ २१ दर्शयितुम् १ ५२ ८ द्रष्टु दर्शयितु वा १ ५१ ४ द्रष्टव्ये (रूपे) ४ ११ १ दर्श-नाय ३० ३१ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'दृशे विख्ये च' अ० ३ ४ ११ सूत्रेण के प्रत्ययो निपात्यते । दृशे दर्शनाय नि० १२ १५]

दृशेयम् दर्शन कराता है, स० प्र० ३३०, १ २४ १. दृश्यासम्, इच्छा कुर्याम्, प्र०—अत्र 'दृशेरग् वक्तव्य' अ० ३ १ ८६ अनेन वार्त्तिकेनाशीर्लिङि दृशेरग् विकरणेन रूपम् १ २४ १

दृश्यान् द्रष्टव्यान् (अ०—कवीन्) ४ २ १२ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'ऋदुपधाच्चाक्लृपिचृते' अ० ३ १ १०९ सूत्रेण क्यप्]

दृषद्वत्याम् बहवो दृषदो विद्यन्ते यस्याम् (सर-स्वत्या=वाचि) ३ २३ ४. [दृषद्-प्राति० भूम्नि मतुवन्तान् ङीप्-प्रत्यय । दृषद्=दृ विदारणे (क्र्या०) धातो 'दृणाते पुग्घ्रस्वश्च' उ० १ १३१ सूत्रेण अदि प्रत्यय पुक् च]

दृष्टः समीक्षित (रुद्र =सेनेश) १६ ७ [दृशिर् प्रेक्षणे (भ्वा०) धातो क्त प्रत्यय]

दृष्टवीर्यम् दृष्ट सम्प्रेक्षित वीर्य यस्य तम् (बृहस्पति=राजानम्) २ २३ १४ [दृष्ट-वीर्यपदयो समास]

दृष्ट्वा सम्प्रेक्ष्य १९ ७७ पर्य्यालोच्य १९ ७९ [दृशिर् प्रेक्षणे (भ्वा०) धातो क्त्वा-प्रत्यय]

दृहळम् सुस्थिरम् (राज्यम्) ४ १७ १० निश्चयम् ३ ३० ५ सुखवर्धकम् (अद्रिं=मेघमिव) ४ १ १५ ध्रुवम् (भागम्) ६ ३० ५ **दृहळा**=दृढानि (धरुणानि= उदकानीवाचरणानि) ४ २३ ९ दृढम् प्र०—अत्राकारादेश.

(सवितु'=परमात्मा) का, स० वि० ७५, ३६ ३. गदा मुक्त परमात्मा का, रा० प्र० ३३०, १ २४ २. **देवः**= सर्वेषा सुखाना दाता, सर्वविद्या-द्योतक (सविता=भगवान्), प्र०—देवो दानाद्वा दीपनाद्वा द्योतनाद्वा, द्युस्थानो भवतीति वा, यो देव सा देवता, नि० ७ १५, १ १. विद्या-प्रकाश-दाता १ ७१ ५ जिगीषु (राजा) १ १८८ १ विद्वान् पिता ४ ५५ ७ रक्षक सन् (ईश्वर) ३७ १८. सकलसुखदातेश्वर भा०—मङ्गलप्रद १७ ६२ शुद्धस्वरूप (ईश्वर) १८ ३० अखिल-राज्येश्वर ६ २ सुखयिता (अध्वर =यज्ञ) ६ २३ शत्रून् विजिगीषु (इन्द्र =सभापती राजा) ६ ३७ विद्या-प्रकाशित (सविता=ऐश्वर्यवान् सभापति) ६ २६ द्योतनात्मक (सूर्य) २ ३१ ४ दाता प्रकाशको वा (ईश्वरो भौतिको वा) ४ १६ प्रकाशमान प्रकाशहेतुर्वा (सविता= जगदीश्वर सूर्यलोको वा) १ २० स्वप्रकाश प्रकाश-करो वा (अग्नि =परमेश्वरो भौतिको वा) १ १ ५ दिव्यगुण-कर्म-स्वभाव कमनीय (अग्नि =आप्तजन) ४ २ १ दिव्यगुणसम्पन्नो विद्वान् १ ६८ १ जीव २८ १६ य स्वप्रकाशेन सर्वस्य प्रकाशक (ईश्वर) ४ ४ सङ्गमनीय प्रकाशको वा (वृषभ =यज्ञ शब्दो वा) १७ ९१ स्वय प्रकाशस्वरूप परमेश्वर १ ३ सूर्य इव विद्वान् (जन) ४ २३ ५ देदीप्यमान सूर्य ५ १ २ दिव्य-गुणप्रद (वनस्पति =किरणाना पालक सूर्य) २८ २० दिव्य सभ्य (भा०—राजपुरुष) २८ ४३ दिव्यस्वरूप (ईश्वर) ३२ ४ दिव्यगुणो मेघ २९ ३५ दिव्यगुणयुक्तो विद्युदाख्य ३६ १० स्वप्रकाशस्वरूप (अ०—परमात्मा) ३७ १४ सर्वज्ञ (अग्नि =ईश्वर) २८ ४५ द्योतनात्मक (सूर्य) ऋ० भू० १४२, ३३ ४३ प्रशस्तो विद्वान् मनुष्य १ १०५ १४ जगदीश्वर इव (अग्नि =परमविद्वान् जन) ४ ११ ६ दिव्यसुखदाता (विद्वान् जन) १ ७३ ३ विजय-प्रदाता (विद्वान् जन) ४ ३० २४ विद्याप्रकाशस्य (सभाध्यक्षो राजा) ५ ३९ कामयमान (आप्तो जन) ४ ८ ३ व्यवहार-हेतु (अग्नि =विद्युदाख्य) २ ४ १ विद्वान् प्रकाशमानो लोको वा ६ ३० ४ दाता दिव्यगुण (सूर्यो विद्वान् वा) ७ ४५ १ कमनीयतम (अध्यापक) १ १९० ८ द्योतमान (सविता=परमेश्वर) ४ ५३ १ प्रकाशस्वरूप (सविता=सूर्य) स० प्र० ३१३, ३३ ४३ देदीप्यमान कामयमानो वा (विद्वज्जन) ७ १० २ सूर्यादीनामपि प्रकाशक (परमेश्वर) ७ ३८ ३ पूर्णविद्य सुखप्रद (प्रशस्तयशो राजा) ७ ६ ७ देदीप्यमाना (विद्युत्) ३४ ३१ सकल सुखदाता परमेश्वर, स० वि० ७, ४० १६. दिव्य-प्रकाश (सविता=कर्मसुप्रेरक ईश्वर) १ १२४ १. व्यव-हर्त्ता (अग्नि =विद्वान् जन) २७ १३ विद्या-दाता (अग्नि =विद्वान् जन) १७ ७९ सत्य न्याय प्रकाशक. (इन्द्र =सभेश) १ १२९ ११ सब जगत् के बाहर और भीतर सूर्य के समान प्रकाशक ईश्वर आर्याभि० १ ४६, ऋ० १ ५ १६ ३ दिव्यस्वभाव (वनस्पति =पिप्पलादि) २१.५८ द्योतमान (वनस्पति =सूर्य) २१ ५६ दिव्यस्व-रूपः (अ०—वायु, भा० जीव) १७ ३२ आनन्दोत्पादक (अग्नि =जगदीश्वर) १ ३१ १ सर्वस्य न्यायविनयस्य द्योतक (अग्नि =सभास्वामी) १.३१ ६ दानादिगुणयुक्त (मेघ) १ ३२ १२ दीव्यति प्रकाशयतीति स (परमेश्वर) १ ३५ २. सर्वव्यवहारसाधक (वायु) १ ३५ १०. **देवा**= दिव्यगुणौ (इन्द्रवायू =अग्निपवनौ), प्र० =अत्र 'सुपां सुलुक्०' इत्याकारादेश १ २३ २ दिव्यगुणयुक्तौ (विद्युदग्नि-वायू) ३.२५ ४ दिव्यसुखप्रदौ (राज्य-सेनाऽधीशौ) ३.५३ १ दिव्यगुणप्रापकौ (वसुविदौ =अध्यापकोपदेशकौ) १.४६ २ कमनीयौ विद्वांसौ २८ ४०. सुखप्रदातारौ (अ०—वायुवह्नी) २८ १७ वैद्यविद्यया प्रकाशमानौ (भिषजा=चिकित्सकौ) २१ ५३ दिव्यस्वभावौ (सुहृदौ) ५ ६७ १ दातारौ (अध्यापकोपदेशकौ) १ १८४ ३ वि०—देदीप्यमानौ (अश्विनौ= अग्निजले) १ २२ २. **देवान्**=दिव्यानीन्द्रियाणि विद्यादि-दिव्यगुणान्, दिव्यान् ऋतून्, दिव्यान् भोगान् वा, प्र०— ऋतवो वै देवा, शत० ७ २ २ २६ अनेनर्त्तु-शब्देन दिव्यगुणविशिष्टा भोगा गृह्यन्ते १ १ २ दिव्यगुणसाहित्ये-नोत्तम-गुणप्रकाशकान् (मरुत =शिल्पव्यवहारप्रापक-वायून्) १ २३ १० धार्मिकान् विदुष ३७ १८ शुभान् गुणान् विदुषो वा ३८.१० विदुषो दिव्यगुणान् ऋतून्, भोगान् वा ५.१२ परमविदुष (जनान्) १ १३.१२ दिव्यान् गुणान् विजिगीषकान् वीरान् वा २ ६ ६ विदुषो जीवानिन्द्रियाणि च १ २० दिव्यान् क्रियासिद्धान् व्यव-हारान् १ १४ १२ दिव्यगुणयुक्तान् पदार्थान् १ ४८ १२ धार्मिकान् विदुष ४ १ २ विदुषो वस्वादीन् वा २ २४ ११ वीरान् विदुषो दिव्यगुणान् वा १ ४४ ७ विदुषोऽतिथीन् ५ १ ११ दिव्यगुणसहितान् पदार्थान् १ १२ ३ दिव्य-व्यवहारान् १ १५ १२ दिव्यगुणान् मनुष्यान् ३ २२ ३ दिव्यगुण-कर्मस्वभावान् पृथिव्यादीन् २१ ५८ दिव्यगुणा-ऽन्वितान् दिव्यान् गुणान् वा १ १०५ १७ विदुषो दिव्य-क्रियायुक्तान् वा (पदार्थान्) १ १०५ १४ उपासकान् योगिन (जनान्) ऋ० भू० १५६, ११ ४ प्रकाशितव्यान् दिव्यगुणान् पृथिव्यादीन् २ १२ १ दिव्यान् व्यवहारान्

१ ६३ ८ सुखप्रद १ १७३ १३ योगेनाऽऽत्मप्रकाशित। (योगिजन) ७ ७ योगजिज्ञासो (सोम=प्रशस्त-गुण शिष्य) ७ १४ दिव्याऽऽत्मन् ७ ३ दिव्यविद्यासम्पन्न सेनाध्यक्ष ६ २० परमविद्वन् ६ ३६ १ देव फलादीना दाता (वनस्पति =अपुष्पफलवान्) १ १३ १० सर्वाऽऽनन्दप्रद व्यवहारहेतुर्वा (ईश्वर सूर्यो वा) १ २६ विजयप्रद विजय-हेतुर्वा (ईश्वर सूर्यो वा) १ २६ सूर्यादिप्रकाशकेश्वर १ २५ विद्वन् (जन) १ १४ १२ अग्निरिव द्योतमान (विद्वज्जन) २ ३ ४. सूर्याऽऽदिसर्वजगद्-विद्याप्रकाशक सर्वाऽऽनन्दप्रद (परमेश्वर) ऋ० भू० ३, ३० ३ सर्वप्रकाशकेश्वर प्रकाश-दाहयुक्तमग्नि वा १ ११२ ८ दिव्य-विज्ञानप्रद, अ०—सत्ययोगविद्ययोपासनीय (सवित =सर्वसिद्ध्युत्पादक भगवन्) ११ ७ सत्यकामनाप्रद (सवित =अन्तर्यामिरूपेण प्रेरक जगदीश) ११ ८ शुभगुण-दात (अ०—जगदीश्वर) २ २१ सर्वजगत्प्रकाशक (ईश्वर) २ २१ दिव्यविद्य (रथ =रमणीयस्वरूप विद्वन् जन) २६ ५४ दिव्यसुख-गुणाना दात. (जगदीश्वर) २ १२ दिव्यकर्मकारिन् (रुद्र= न्यायाधीश) १ ११४ १० दिव्यगुणप्रापक दिव्यगुणनिमित्तो वा (सोम=विद्वज्जन) १ ९१ १४ सब सुखो के दाता परमेश्वर स० वि० २१४, ४० १६ दिव्य गुण युक्त (राज्य) आर्याभि० १ ५, ऋ० १ ११.५ **देवम्**= देदीप्यमानम्, भा०—श्रेष्ठौषधदायकम् (भिषजम्=वैद्यम्) २८ ९ विजयादिलाभप्रदम्, भा०—महादेवम् (सूर्यं= परमात्मानम्) ३५ १४ दिव्यम् (बर्हि =उदकम्) २८ ४४ दिव्यगुणकर्मस्वभाव, सर्वानन्दप्रदम् (परमात्मानम्) ३ ६ ८ कमनीय दातारम् (परमेश्वरम्) ३ २० ५. दिव्य-गुणवन्तम् (परमेश्वर भौतिकमग्नि वा) १ १५ ७ प्रकाश-मानम् (भा०—मुक्तादिरत्नम्) २८ ४४ विद्याविनयाभ्या सुशोभितम् (इन्द्र=राजानम्) २८.२ सुखदातारम् (सवि-तारम्=ईश्वरम्) ४ २५ कामयमानम् (इन्द्र=जीवम्) २८ ४० धार्मिकम् (इन्द्र=जीवम्) २८ ४५ स्त्रीव्रत विद्वासम् २८ ३९ दातार, हर्षकर, विजेतार, द्योतक वा (अग्नि=परमेश्वर भौतिक वा) १ १.१ द्योतमानम् (सूर्य=जगदीश्वरम्) २७ १० सुखदातारम् (अग्नि= परमेश्वर भौतिक वा) १ १२ ७ कान्तारम् (विद्वासम्) १ १३८ २ धर्मात्मना, मुमुक्षूणा, मुक्ताना च सर्वाऽऽनन्दस्य दातार मोदयितार च (ईश्वरम्) प० वि०, ३५ १४ प्रकाशकम् (अग्नि=पावकम्) ३ २६ १ परमेश्वर विद्या-युक्त शुद्धव्यवहार वा ४ २० पूज्यतम, कमनीयतम ईश्वर को, आर्याभि० १ २, ऋ० १ १ १ द्योतकम् (इन्द्र= सूर्यम्) २० ४१ दिव्यगुणप्रदम् (ज्योति=तेज) २० ३०. दातार सुखाना द्योतक सर्वस्य जगत प्रकाशक सर्वैर्विद्वद्भि कमनीय स्वभक्ताना मोदक हर्षकर शत्रूणा मनुष्याणा कामक्रोधादीना वा विजिगीषकम् (ईश्वरम्) वे० भा० न० **देवस्य**=यो दीव्यति दीव्यते वा स देवस्तस्य 'जो सब सुखो का देने हारा है और जिसकी प्राप्ति की कामना सब करते हैं, उस (सवितु =परमात्मा का), स० प्र० ५१, ३६ ३ द्योतमानस्य (विदुषो जनस्य) ५ १३ २ सकल-जगत्प्रकाशकस्य (सवितु =सर्वान्तियामिन ईश्वरस्य) ३७ २ स्वप्रकाशस्येश्वरस्य १८ ३६ वेदविद्याप्रकाशकस्य (सवितु =सकलैश्वर्यवतो जगदीश्वरस्य) ६ ९. प्रकाशित-न्यायस्य (सवितु =सेनेशस्य) ९ ३८ सर्वजगत्प्रकाशकस्य सर्वसुखदातुरीश्वरस्य १ १० विधातुरीश्वरस्य द्योतकस्य सूर्यस्य वा १ २१ सर्वानन्दप्रदस्य (सवितु =प्रेरकस्येश्वर-स्य सूर्यस्य वा) १ २४ दिव्यगुणकर्मस्वभावस्य (राज्ञ) ४ १ ६. कर्मफल-प्रदातु (ईश्वरस्य) ३ ३४ दिव्यसुखप्रापकस्य (भगस्य=ऐश्वर्यस्य) ४ ५५ ५ सूर्यादिजगते प्रदीपकस्य (सवितु =प्रेरकस्येश्वरस्य) ११ ९ प्रकाशमयस्य शुद्धस्य सर्वसुखप्रदातु परमेश्वरस्य ३.३५ हर्षकरस्य (सवितु = ईश्वरस्य) २ ११ सुखप्रदातु (सवितु =परमेश्वरस्य) ३० २ स्वप्रकाशकस्य परमेश्वरस्य ६ ७१ २ देदीप्यमानस्य (सूर्यस्य) ३७ १२ कामयमानस्य (विदुषो जनस्य) ४ २ १९ स्वप्रकाशस्याऽऽनन्दप्रदस्य (परमेश्वरस्य) ऋ० भू० १५६, ११ ३ सर्वजगत्प्रकाशकस्य (ईश्वरस्य) ऋ० भू० १५६, ऋ० ४ ४ २४ १ स्वप्रकाशमानस्य, सर्वस्य जगत उत्पादक-स्य परमेश्वरस्य, ऋ० भू० २१७, कमनीयस्य पत्यु ११ ६२ सर्वजगत्प्रकाशकस्य परमेश्वरस्य ११ ६७ सर्वतो दीप्यमानस्य (अ०—ईश्वरस्य) २० ३ सकलैश्वर्यदातु, प्रकाशमानस्य, सर्वप्रकाशकस्य, सर्वत्र व्याप्तस्याऽन्तर्यामिण (सवितु =ईश्वरस्य) ३ ६२ १० अखिलविद्याशुभगुण-कर्म-स्वभाव-द्योतकस्य (बृहस्पते =परमेश्वरस्य) ९ १० सर्वत प्रकाशमानस्य (सवितु =जगदीश्वरस्य) ९ १० धनुर्वेदादियुद्धविद्या-प्रापकस्य (इन्द्रस्य=सेनापते) ९ १० सर्वेषु प्रकाशमानस्य (अग्ने =अग्न्यादिपदार्थस्य) ६ १४ स्वप्रकाशस्वरूपस्य सर्वै कमनीयस्य, सर्वसुखप्रदस्य (सवितु =परमेश्वरस्य) २२ ९ स्तोतुमर्हस्य (ईश्वरस्य) २२ ११ सर्वद्योतकस्य (सवितु =जगदीश्वरस्य) ११ २ प्रकाशमानेश्वरस्य २० ११ यो दीव्यति प्रकाशयति खल्वा-नन्दयति सर्व विश्व स देवस्तस्य (ईश्वरस्य) प० वि०, ३ ६२ १० कामना करने योग्य, सर्वत्र विजय कराने वाले

(आप्ता विद्वांसो जना) ९ ३६ योगिनो न्यायाऽधीशा ९ ३६ दिव्याऽऽत्मानो योगिन १७ ७३ हे पूर्ण विद्वान् जनो, स० वि० १९८, १० ७२ ७ इन्द्रियाणि, ऋ० भू० १३४, ३१ २१ दिव्यगुणवन्तस्तत्सम्बुद्धौ दिव्यगुणा वा १.१०६ २ पृथिवीसूर्यलोकादय ११६४ ३९ त्रयस्त्रिंशद् वस्वादय, ऋ० भू० ९०, अथर्व० १० २३ ४ ३८ विजिगीषव (अ०—विद्वांसो जना) १७ ४३ दिव्यगुणा ऋत्विज १७ ५२ मोदका (रुद्रा = बलवन्तो वायव) १५ ११ दिव्यस्वरूपा (विद्वांसो जना) २१ ५८ अ०—दिव्यगुणा भ्रमन्त पृथिव्यादयो लोका १ ११ ५ हे विद्वांनो राजप्रजा जनो, स० प्र० १८३, ९ ४० पृथिव्यादय इव विद्वांस (जना) २५ १४ दिव्यगुणादियुक्ता पृथिव्यादय, भा०—पृथिव्यादीनि तत्त्वानि २५ २३ सुसभ्या विद्वांस (जना) २७ ८ देदीप्यमाना विद्वांस (जना) ३१ १६ दिव्यविद्या ३४ ११ पूर्णविद्वांस, भा०—विद्वत्तमा (जना) १७ १४ विद्वान् लोग, प्र०—विद्वांसो हि देवा, शत० ब्राह्म०, आर्याभि० २ ६, ३२ १० सब दिव्य गुण-कर्म-स्वभाव और विद्यायुक्त (विद्वान्), स० प्र० २३६, १ १६४ ३९ विद्यासुशिक्षे-जिज्ञासव (जना) १ ११० ७ दिव्यगुण-कर्म-स्वभावा विपश्चित ३ ८ ९ दिव्या प्राणा १२ २ द्योतका (सूर्यादय) १५ १४ भा०—योगिनो विद्वांस ३२ १० दिव्यसुखप्रदा (अधिपतय = स्वामिनो जना) १५ १२ आ०—उपासका विद्वांस ३४ ३८ दातार (मर्त्ता) १ १९० १ विद्यादातार (विद्वज्जना) १७ ५६ सुशिक्षयोरकृष्टा, विद्वांस ऐश्वर्यभागिनो, राजभक्ता (अ०—सभाजना) ९ ३३ भा०—धार्मिका सुशीला विद्वांसो राजादयो मनुष्या ९ ३६ भा०—विवेचका (विद्वज्जना) १७ ७० कामयमाना (विद्वांस) १७ ७८ भा०—शिल्पिनो विद्वांस (जना) ३३ ७ **देवेन**=सूर्यादिप्रकाशकेन (सवित्रा=सर्वान्तर्यामिणा जगदीश्वरेण) ३ १० सर्वजगद्योतकेन (सवित्रा=सर्वस्य जगत उत्पादकेनेश्वरेण) ३ १० सर्वगतेन (वातेन=वायुना सह) ६ ११ दिव्यगुण-कर्म-स्वभावयुक्तेन, भा०—शुद्धेन (मनसा) ३४ २३ विदुषा (जनेन) ३७ १४ दिव्यसुखप्रदेन (त्वष्ट्रा=गुणेन) ८ १० दिव्यगुणसम्पन्नेन (मनसा) १ ९१ २२ **देवेभ्य:**= दिव्येभ्य शत्रुभ्य १ १६२ ११ दिव्यगुणेभ्यो दिव्यगुणयुक्तपतिभ्य ८ ४३ विद्वद्भ्यो दिव्यगुणसुखेभ्यो वा (पदार्थेभ्य) ३ ४७ दिव्यसुखकारकेभ्य पूर्वोक्तेभ्य (य० २५) वस्वादिभ्य, भा०—दिव्यपदार्थेभ्य २ ७ भा०—विद्यासुशिक्षा-ब्रह्मचर्य सत्सङ्गिभ्य (जनेभ्य) २२ ४ दिव्यगुणेभ्य २२ २८ दिव्य सुखाना प्राप्तये २ ८ विद्वद्भ्यो दिव्यसुखेभ्यो वा २ ९ भा०—दिव्यौषध्यादिभ्य २ ५ दिव्येभ्यो जलादिभ्य ३९ १३. क्रीडमानेभ्यो जीवेभ्य २ ३८ १ धार्मिकेभ्य (पुरुषेभ्य) ५ १० सुशीलेभ्यो विद्वद्भ्य (जनेभ्य) ५ १० दिव्यगुणेभ्यो विद्या चिकीर्षुभ्य शूरवीरेभ्य (जनेभ्य) ५ १० दिव्यन्यायप्रकाशकेभ्य (विद्वद्भ्य) ९ ३५ सकलविद्याप्रचारकेभ्य (भा०—विद्वद्वरेभ्यो जनेभ्य) ९ ३५ दिव्यसुखप्रदेभ्य (राजकर्मचारिभ्य) ९ ३५ विपश्चिद्भ्य (जनेभ्य) ९ ३५ धार्मिकेभ्यो विद्वद्भ्य ९ ३५ दीव्यन्ति प्रकाशन्ते सत्कर्माऽनुष्ठानेन ये तेभ्यो धर्मिष्ठेभ्यो विद्वद्भ्य ६.११ शुभेभ्यो गुणेभ्य ६ ११ शोधकेभ्यो वाय्वादिभ्य ७ ३ प्रशस्त-गुण-पदार्थेभ्य ७ ६ दिव्यगुणेभ्य पृथिव्यादिभ्य ३१ २० इन्द्रियेभ्य, ऋ० भू० २३८, अथर्व० ११ ३ १९ दिव्यभोगेभ्य २२ १९ कमनीयदिव्यसुखेभ्य ८ ८ दिव्यगुणेभ्यो जनेभ्य २९ ६० भा०—दिव्यगुणकर्मसिद्धये १२ १०४ दिव्यगुणकर्मस्वभावेभ्य (भा०—विद्वद्भ्यो जनेभ्य.) २२ ४ **देवेषु**= प्रकृत्यादि-जीवेषु २७ २६ सत्य-विद्या प्राप्तेषु (विद्वत्सु जनेषु) ५ ६८ ३ विद्वत्सु कामेषु वा १ १७९ ६ प्रशंसकेषु (विद्वज्जनेषु) ३ १६ ४. दिव्येषु गुणेषु विद्वत्सु वा १८ ६२ दानसाधकेषु (अवयवेषु) १५ १२ विजिगीषमाणेषु राजसु ८ ३९ अखिलविद्यासु प्रकाशमानेषु विद्वत्सु ८ ४० दिव्येषु धर्म्येषु व्यवहारेषु १८ ६४ विद्याकामेषु (कुमारेषु) २ ४१ १८ द्योतमानेषु लोकेषु १ १४२ ११ विद्वत्सु, प्र०—विद्वांसो हि देवा, शत० ३ ७ ३ १०, ३ ६२ दिव्येषु पदार्थेषु विद्वत्सु वा ४ २ १ कमनीयेषु पदार्थेषु १५ १० विद्वत्सु, दिव्येषु सूर्यादिपदार्थेषु वा, अ०—दिव्येषु कर्मसु राज्येषु, शिल्पविद्यासिद्धेषु विमानेषु वा १ १५ ८ द्योतमानेषु (पदार्थेषु) ४ १५ १ विद्वद्वर्येषु (जनेषु) ८ ३८ सद्विद्यादिदिव्यगुणेषु विद्वत्सु ६ १३ पितृषु ६ १५ ६ सृष्ट्यादौ पुण्यात्मसु जातेषु अग्निवाय्वादित्याङ्गिरस्सु मनुष्येषु १ २७ ४ प्रशंसकेषु (जनेषु) ३ १६.४ **देवै:**= सत्यवादिभिर्विद्वद्भि, प्र०—'सत्यमेव देवा.' शत० १ का० । १ प्रपा० । १ ब्रा० । ४ क०, ७ २ ८ विद्वद्भिर्दिव्यगुणैर्वा ७ २ ११ अन्नादि कामयमानैर्विद्वद्भि १२ ७० विद्वद्भिर्वीरै (जनै) ६.४७ २९ दिव्यैर्गुण-कर्म-स्वभावैर्विद्वद्भिर्वा १ ९० १ पूर्णविद्यै (जनै:) १४ ७ परोपकाराय सत्याऽसत्यविज्ञापयितृभि (जनै) १४ ७ भा०—आप्तविद्वदनुमतिभि २८ ३ द्योतनाऽऽत्मकैर्मन आदीन्द्रियै ३ ४८

२६ १० दिव्य-गुण अर्थात् विद्यादि को, आर्याभि० १४, ऋ० १.११२ विदुषोऽध्यापकान् ७ १७ ३ दिव्यविद्व-द्विपश्चित (जनान्) ५ २११ दिव्यगुणान् विदुषो विद्या-र्थिनो वा १२४६ विद्या कामयमानान् (विद्यार्थिजनान्) ११४२११ दिव्यानीन्द्रियाणि विद्यादि दिव्यगुणान् दिव्यर्त्तून् दिव्यभोगांश्च वे० भा० न० ११२ भा०—अविद्यादिक्लेशाना निवारकान् शुद्धान् गुणान् ११ ३ भा०—विद्वत्सङ्ग-सत्यशास्त्र-प्राणायामाऽभ्यासान् २० ४४ **देवानाम्**=दिव्याना गुणाना विदुषा वा १ ७० ३ दिव्य-गुणाना पृथिव्यादीना मध्ये ११८८ ११ आप्ताना विदुषाम् (जनानाम्) ७ ४१ ४ विदुषा पृथिव्यादिलोकाना वा २ ८ ६ दिव्यगुणसम्पन्नाना विदुषा पदार्थाना वा १ ६४ १३ दयया विद्यावृद्धि चिकीर्षताम् (विदुषाम्) १ ८६ २ विदुषा योद्धॄणा मध्ये १७ ५१ धार्मिकाणा विदुषा मध्ये १४ ३ सुखदातॄणा विदुषाम् (जनानाम्) २१ ५३ पृथिव्यादीना-मेकत्रिंशत १ २२ ६ दिव्याना पृथिव्यादीनाम् २७ २५ देदीप्यमानाना राज्ञाम् ३ ५५ २१ सूर्यादीना विदुषा वा मध्ये ३ ५५ ४ दिव्याना जलादीनाम् १ १८५ ४ आप्ताना विपश्चिताम् (जनानाम्) ८ १५ धार्मिकाणामाप्ताना विदु-षाम् ८ ५० आचार्यादीना विदुषाम् (जनानाम्) १६ ४७ सत्य कामयमानाना विदुषाम् १ १३६ ७ दिव्याना विदुषा पतीनाम्, भा०—सुशिक्षिताना विदुषा यूनाम् (जनानाम्) १२ ५५ दिव्यगुणवता विदुषाम् प० वि०, ७ ४२ पूर्ण विद्वान् धार्मिक आप्त लोगो की, स० वि० १५६, ७ ४१ २४ ब्रह्मचर्य सुनियमो से पूर्ण विद्वानो के, स० प्र० ११०, ३ ५५ १६ परम विद्वानो के, आर्याभि० १ ४८, ऋ० १ ६ ३ २ १३ दिव्य सूर्यादि-लोको तथा इन्द्रियादियो और विद्वानो का, आर्याभि० २ ४२, १७ २७ दातॄणाम् (विदुषा जनानाम्) २५ १५ भा०—प्रशसिताना विदुषाम् २६ २८ सूर्यादीनाम् भा०—सूर्यकिरणवद् वर्त्तमानाना पदार्थानाम् २४ ६ **देवाय**=दीपकाय (ईश्वराय सूर्याय वा) २५ ११ कामाय (विदुषे जनाय) २ ३५ ५ दिव्याय कमनीयाय (भगाय=धनाद्याय) ८ ७ परमात्मदेव की, स० प० २८२, १० १२११ सर्वसुखप्रदात्रे परमात्मने २३ १ विद्या कामयमानाय (विद्यार्थिजनाय) २२ १२ कामना करने योग्य पर-ब्रह्म की प्राप्ति के लिए, स० वि० ६, ३२ ६ दिव्यसुखप्रदाय विज्ञानस्वरूपाय (ईश्वराय) १२ १०२ विदुषे, देवाना विदुषामेव सत्काराय ११२७ ६ दिव्यगुणभोगयुक्ताय (जन्मने= पुन शरीरधारणेन प्रादु-र्भावाय) १२० १ काम के लिए, स० वि० १०४, २ ३५ ५ स्वप्रकाशाय सकलसुख-दात्रे (ईश्वराय) ३२ ६ सकल ऐश्वर्य के देने वाले परमात्मा के लिए स० वि० ५, २३ ३ सकल ज्ञान के देने वाले परमात्मा की प्राप्ति के लिए स० वि० ५, २५ १३ द्योतमानाय (अ०—परमे-श्वराय) २५ १० सर्वसुखप्रदाय (ईश्वराय) २७ २६ प्रकाश-मानाय (अ० परमेश्वराय) १३ ४ दिव्यगुण-सम्पन्नाय (नृपाय) ४ ३ ३ विदुषे न्याय कामयमानाय ७ ४६ १ शुद्ध परमात्मा के लिए, स० वि० ५, १३ ४ कमनीयाय, भा०—धर्मार्थ-काम-मोक्षफलप्रापकाय (परमात्मने) २३ ३ दिव्यगुणाय (सूर्याय=परमेश्वराय सूर्यलोकाय वा) ४ ३५ शुद्धस्वरूपाय (ईश्वराय) ३२ ७ **देवाः**=दिव्य-गुणा (पृथिव्यादयोऽष्टवसव, प्राणादयो दश वायवो जीवात्मा च, चैत्रादयो द्वादश मासा, विद्युद्यज्ञश्च) २० ११ देव-शब्देन् मन षष्ठानि श्रोत्रादीनीन्द्रियाणि गृह्यन्ते तेषा शब्दस्पर्श-रूप-रस-गन्धाना सत्याऽसत्ययोश्चार्थाना द्योतक-त्वात् तान्यपि देवा, ऋ० भू० ६४, ४०४ चन्द्रादयो दिव्या पदार्था इव विद्वास (जना) उपदेशका विद्वासो ऽधिष्ठातारो वा ६ ७५ १८ शत्रून् विजिगीषमाणा (विद्वासो जना) १२ २६ सत्योपदेशका विद्वास (जना) ११ ६० सदुपदेशप्रदातार (विद्वासो जना) ११ ६५ सूर्यादय इव विद्वास (जना) २ २७ ४ वस्वादय ५ ८१ ३ दिव्या पृथिव्यादयो विद्वासो वा २० २५ दिव्याऽऽत्माऽन्त करणा योगविद (जना) १७ ३० पृथिवीसूर्यलोकादय १ १६४ ३६ विद्वासो भूम्यादयो वा १ १६३ ६ विद्याया कामयितार (भा०—प्रशस्ता विद्वास) १८ ६१ विद्यादि-शुभगुणाना दातार (सर्वविद्वासो जना) ७ ३५ ११ वेद-शास्त्रविद सेनापतय, भा०—उपदेशका राजपुरुषा १० १८ धार्मिका विद्वास (जना) ६ ४० विद्यासुशिक्षा-दान-रक्षका (विद्वासो जना) २ २६ ६ स्वस्वविषयप्रकाश-कानि श्रोत्रादीनीन्द्रियाणि ६ ६ ५ सत्याऽसत्य-स्तावका गृहस्था (जना) ८ २१ व्यवहरमाणा (विद्वासो जना) ८ १८ अध्यापकोपदेष्टार (विद्वज्जना) ६ ५२ ८ विद्वासो मनुष्या इन्द्रियाणि च, ऋ० भू० ३१६, १ १६४ ३६ विद्वासोऽग्न्यादयो वा १ २२ १६ सद्गुणिनो धर्मात्मानो विद्वास (जना) १ १७४ १ प्रशसनीया (राजजना) ३३ ५० विद्वास सभासद (जना) २५ ४६ देदीप्यमाना योगिन (पुरुषा) ७ १२ धनुर्वेदविदो विद्वास, भा०—सत्पुरुषा धनुर्वेदज्ञा परोपकारिणो विद्वास ७ २४ आयुर्वेद-विद (विद्वासो जना) ६ ३६ सर्वेभ्य सुखदातार, भा०—सर्वसुखैरलङ्कर्त्तार (विद्वासो जना) ६ ३६ सर्वविद्याविद

श० ११६३४-५ पञ्चवा वै देवा व्युत्क्रामन् अग्निर्वसुभि सोमो रुद्रै, इन्द्रो मरुद्भि, वरुण आदित्यै, बृहस्पतिर्विश्वैर्देवै गो० उ० २२ तस्य वाऽएतस्य वासस । अग्ने पर्यासो भवति वायोरनुछादो नीवि पितृणा सर्पाणा प्रवानो विश्वेषा देवाना तन्तव आरोका नक्षत्राणामेव हि वा ऽएतत्सर्वे देवा अन्वायत्ता श० ३.१२१८ अग्निर्वायुरादित्य एतानि ह तानि देवाना हृदयानि श० ६११२३ अग्निर्वै देवानामवमो विष्णु परमस्तदन्तरेण सर्वा अन्या देवता ऐ० ११ तद्यदेतस्मिन्नाके स्वर्गे लोके देवा अमीदस्तस्माद्देवा नाकमद श० ८६११. द्यौर्वै सर्वेषा देवानामायतनम् श० १४३२८ पृथिवी वै सर्वेषा देवानामायतनम् श० १४३२४ देवगृहा वै नक्षत्राणि तै० १५२६ नगो वै देवाना ग्राम ता० ६६२ स यदेव यजेत । तेन देवेभ्य ऋण जायते तद् ह्येभ्य एतत् करोति यदेनान् यजते यदेभ्यो जुहोति श० १७२२ देवा यज्ञिया श० १५२.३ दिव तृतीय देवान् यज्ञोऽगात ऐ० ७५ यज्ञ उ देवानामात्मा श० ८६१२० यज्ञो वै देवानामात्मा श० ६३२७ सर्वेषा वाऽएष भूताना सर्वेषा देवानामात्मा यद् यज्ञ श० १४३२१ एतद्वै देवानामपराजितमायतन यद् यज्ञ तै० ३३७७ यज्ञ उ देवानामन्नम् श० ८१२१० ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिण जान्वाच्योपामीदन् (प्रजापति) तान् (देवान्) अब्रवीद् यज्ञो वोऽन्नममृतत्व व ऊर्व सूर्यो वो ज्योतिरिति श० २४२१. किं नु तेऽस्मासु (देवेषु) इति । अमृतमिति जै० उ० ३२६८ ऊर्गिति देवा (उपासते) श० १०५२२० साम देवानामन्नम् ता० ६४१३ एतद्वै देवाना परममन्न यत्सोम । एतन्मनुष्याणा यत्सुरा तै० १३३२-३ एष वै सोमा राजा देवानामन्न यच्चन्द्रमा श० १६४५, २४२७, १११४४ हविर्वै देवाना सोम श० ३५३२ एतद्वै देवाना परममन्न यन्नीवारा तै० १३६८ इत (हवि) प्रदानाद्धि देवा उपजीवन्ति श० १२५२४ उभये देवमनुष्या पशूनुपजीवन्ति श० ६४४२२ तस्यै (वाचे) द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकार च वषट्कार च श० १४८६१. जीव वै देवाना हविरमृतममृतानाम् श० १२११२० एक वा एतद्देवानामह सवत्सर तै० ३६२२१ सवत्सरो वै देवाना गृहपति. ता० १०३६ सवत्सरो वै देवाना जन्म श० ८७३.२१ सवत्सर खलु वै देवाना पू तै० १७७५. स प्राणेन देवान् देवलोकेऽदधात् जै० उ० २८३ प्राणेन वै देवा अन्नमदन्ति । अग्निरु देवाना प्राण श० १०१.४१२ न ह वा अनार्षे यस्य देवा हविरश्नन्ति कौ० ३.२ नहि देवा अहुतस्याश्नन्ति तै० १६६.४ न ह वा अव्रतस्य देवा हविरश्नन्ति ऐ० ७११ कौ० ३१ सूर्यो वै सर्वेषा देवानामात्मा श० १४३२.६ यज्ञो वै स्व अहर् देवा सूर्य. श० ११२२१ देवा वै स्व श० १६३१४ अहरेव देवा श० २१३१ अहर्वै देवा अश्रयन्त रात्रीमसुरा ऐ० ४५ अहर्वै देवा आश्रयन्त रात्रीमसुरा. गो० उ० ५१ देवा वै नृचक्षस श० ८४२५ गातुविदो हि देवा श० ४४४१३ देवाना वा एतद् यज्ञिय गुह्य नाम यच्चतुर्होतार ऐ० ५.२३. युञ्जन्तु त्वा मरुतो विश्ववेदस इति युञ्जन्तु त्वा देवा इत्येवैतदाह श० ५१४६ देवा महिमान. श० १०.२२ अमृता देवा २१३४. देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावँस्तेभ्य एतेन नवरात्रेणामृतत्व प्रायच्छन् ता० २२१२१ देवा वै सर्पा । तेषामिय (पृथिवी) राज्ञी तै० २२६२२ विप्रा विप्रस्य इति प्रजापतिर्वै विप्रो देवा विप्रा श० ६३११६ स ह स न मनुष्यो य एवविद्देवाना हैव स एक श० १०३५१३ अथ हैते मनुष्यदेवा ये ब्राह्मणा ष० १.१ एते वै देवा अहुतादो यद् ब्राह्मणा गो० उ० १६ ब्राह्मणो वै सर्वा देवता तै० १४४२,४ आहुतिभिरेव देवान् प्रीणाति दक्षिणाभिर्मनुष्यदेवान् ब्राह्मणाञ्छुश्रुवुषोऽनूचानान् श० २२२६ द्वया वै देवा । अहैव देवा अथ ये ब्राह्मणा शुश्रुवासोऽनूचानास्ते मनुष्यदेवा श० २२२६, ४३४४ विद्वासो हि देवा श० ३७३१० धर्म इन्द्रो राजेत्याह तस्य देवा विशस्तऽइमऽआसत इति श्रोत्रिया अप्रतिग्राहका उपसमेता भवन्ति तानुपदिशति सामानि वेद सोऽयमिति श० १३४३१४ ऋतवो वै देवा श० ७२४२६. वसन्तो ग्रीष्मो वर्षा ते देवा ऋतव, श० २१३१ तस्मात् प्राणा देवा, श० ७.५१२१ प्राणा देवा श० ६३११५ चक्षुर्देव गो० पू० २११ मनो देव गो० पू० २१० मनो वै देववाहन मनो हीद मनस्विन भूयिष्ठ वनीवाह्यते श० १४३.६ वाक् च वै मनश्च देवाना मिथुनम् ऐ० ५२३ वागेव देवा श० १४४३.१३ वाग्देव गो० पू० २१० वाग्वै देवाना पुरान्नमासीत् तै० १३५१ वागिति सर्वे देवा जै० उ० १६२ वायुर्वै देव जै० उ० ३४८, सा या पूर्वाहुति । ते देवाः श० २.३ २१६ अह्न पूर्वाह्णो देवा. श० २१३१ तस्मै (वृत्राय) ह स्म पूर्वाह्णे देवा । अशनमभिहरन्ति श० १६३१२ य एवापूर्यतेऽर्धमास स देवा श० २१३१ य एवापूर्यते त (अर्धमास) देवा उपायन् श० १७२२२ अर्धमासे देवा इज्यन्ते तै० १४६१ देवाश्च वा ऽअसुराश्च । उभये

विद्वानो वा दिव्यगुणो के साथ वर्त्तमान आर्याभि० १ १८, ऋ० १ ६ १७ १ देदीप्यमानैः (गुणै) २८ २० द्योतमानै (पृथिव्यादिभि) २० ११ भा०—धार्मिकैरध्यापकै २० ३८ प्रकाशकै (किरणै) २१ ५६ **देवौ**=दिव्य-स्वरूपौ प्राणापानौ ३४ ५५ शुभगुणान् कामयमानौ माता-पितरौ, भा०—विद्वासौ स्त्रीपुरुषौ, २८ ४० वैद्यकविद्यया प्रकाशमानौ (भिषजा=चिकित्सकौ) २८ ७ विद्यादातारौ (विद्वासौ स्त्रीपुरुषौ) ४ १५ १० दिव्यगुण-कर्म-स्वभावौ (सूर्याचन्द्रमसौ) ५ ३८ ३ [दिवु क्रीडाविजिगीषाव्यवहार-द्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु (दिवा०) धातो पचाद्यच् प्रत्यय । दिवु मर्दने (चुरा०) दिवु परिकूजने (चुरा०) धातोर्वा अच् । देवो दानाद्वा, दीपनाद्वा, द्योतनाद्वा, द्युस्थानो भवतीति वा । यो देव स देवता निघ० ७ १५ दिवा वै नोऽभूदिति । तद् देवाना देवत्वम् तै० २ २ ९ ९ दिवा देवानसृजत नक्तमसुरान् यद्दिवा देवानसृजत तद् देवाना देवत्वम् ष० ४ १ तस्मै मनुष्यान्त्सृजानाय (प्रजा-पतये) दिवा (=दिवस) देवत्रा (अभवत् । तदनु देवान-सृजत । तद् देवाना देवत्वम् तै० २ ३ ८ ३ तद् देवाना देवत्व यद् दिवसमभिपद्यासृज्यन्त श० ११ १ ६ ७ तद्वेव देवाना देवत्व यदस्मै ससृजानाय दिवेवास श० ११ १ ६ ७ मर्त्या ह वाऽअग्रे देवा आसु स यदैव ते सवत्सर-मापुरथामृता आसु श० ११ १ २ १२ मर्त्या ह वाऽअग्रे देवा आसु । स यदैव ते ब्रह्मणापुरथामृता आसु श० ११ २ ३ ६ एतेन वै (अष्टरात्रेण) देवा देवत्वमगच्छन् । देवत्व गच्छति य एव वेद ता० २२ ११ २-३ उभये ह वाऽइदमग्रे सहासुर्देवाश्च मनुष्याश्च श० २ ३ ४ ४ उभय-म्वैतत् प्रजापतिर्यच्च देवा यच्च मनुष्या श० ६ ८ १ ४ प्राचीनप्रजनना वै देवा प्रतीचीनप्रजनना मनुष्या श० ७ ४ २ ४० प्राची हि देवाना दिक् श० १ २ ५ १७ देवाना वा एषा दिग्यत्प्राची ष० ३ १ यद्वै मनुष्याणा प्रत्यक्षन्तद् देवाना परोक्षमथ यन्मनुष्याणा परोक्षन्तद् देवाना प्रत्यक्षम् ता० २२ १० ३ तस्मै (चन्द्रमसे) ह स्म पूर्वाह्णे देवा अशनमभिहरन्ति मध्यन्दिने मनुष्याऽपराह्णे पितर श० १ ६ ३ १२ द्राघीयो हि देवायुष ह्रसीयो मनुष्यायुषम् श० ७ ३ १ १० देवाना वै विधामनु मनुष्या श० ६ ७ ४ ६, ६ १ १.१६ स (सूर्य) यत्रोदङ्डावर्त्तते । देवेषु तर्हि भवति देवान्तर्ह्यभिगोपायति श० २ १ ३ ३ देवाश्च वा असुराश्च प्रजापतेर्द्वया पुत्रा आसन् ता० १८ १ २ उभये वा एते प्रजापतेरध्यसृज्यन्त । देवाश्चासुराश्च तै० १ ४ १.१ स (प्रजापति) · · अकामयत प्रजायेयेति । स तपोऽतप्यत ।

सोऽन्तर्वानभवत् । स जघनादसुरानसृजत · · स मुखाद् देवानसृजत तै० २ २ ९ ५-८ स (प्रजापति) आस्येनैव देवानसृजत श० ११ १ ६ ७ (प्रजापते) कनीयास (पुत्रा) देवा ता० १८ १ २ कानीयसा एव देवा ज्यायसा असुरा श० १४ ४ १ १ कनीयस्विन इव वै तर्हि (युद्ध-समये) देवा आसन् भूयस्विनोऽसुरा ता० १२ १३ ३१. ते देवाश्चक्रमाचरञ्छालम् असुरा आसन् श० ६ ८ १.१ एकाक्षर वै देवानामवम छन्द आसीत्सप्ताक्षरम् ता० १२ १३ २७ उत्तरावती वै देवा आहुतिमजुहवु । अवाची-मसुरा तै० २ १ ४ १ देवाना वै यज्ञ रक्षास्यजिघासन् ता० १४ १२ ७ त्रया वै देवा । वसवो रुद्रा आदित्या श० ४ ३ ५ १ एते वै त्रया देवा यद् वसवो रुद्रा आदित्या श० १ ३ ४ १२, १ ५ १ १७, १ ८.३ ८ कतमे ते त्रयो देवा इति । इम ऽ एव त्रयो लोका एषु हीमे सर्वे देवा इति । कतमौ तौ द्वौ देवावित्यन्न चैव प्राणश्चेति । कतमोऽध्यर्ध इति योऽय पवत इति । कतम एको देव इति प्राण इति श० ११ ६ ३ १० त्रयस्त्रिशद् देवता ता० ४ ४ ११ त्रय-स्त्रिशद्वै देवता तै० १ २ २ ५, १ ८ ७ १, २ ७ १ ३-४ त्रयस्त्रिशद्वै सर्वा देवता कौ० ८ ६ त्रयस्त्रिशद्वै देवा प्रजा-पतिश्चतुस्त्रिश श० १२ ६ १ ३७ त्रयस्त्रिशद् देवता प्रजापतिश्चतुस्त्रिश ता० १० १ १६, १२ १३ २४ अष्टौ वसव । एकादश रुद्रा द्वादशादित्या इमेऽएव द्यावापृथिवी त्रयस्त्रिश्यौ त्रयस्त्रिशद्वै देवा प्रजापतिश्चतुस्त्रिश श० ४ ५ ७ २ देवता वाव त्रयस्त्रिशोऽष्टौ वसव एकादश रुद्रा द्वादशादित्या प्रजापतिश्च वषट्कारश्च ता० ६ २ ५ (त्रयस्त्रिशत्) अष्टौ वसव एकादश रुद्रा द्वादशादित्या प्रजापतिश्च वषट्कारश्च ऐ० २ १८, ३७, ३ २२ अष्टौ वसव एकादश रुद्रा द्वादशादित्या वाग् द्वात्रिंशी स्वरस्त्रय-स्त्रिशस्त्रयस्त्रिशद्देवा गो० उ० २ १३ त्रयस्त्रिशद्वै देवा सोमपास्त्रयस्त्रिशदसोमपा अष्टौ वसव एकादश रुद्रा द्वादशा-दित्या प्रजापतिश्च वषट्कारश्चैते देवा सोमपा एकादश प्रयाजा एकादशानुयाजा एकादशोपयाजा एतेऽसोमपा पशु-भाजना ऐ० २ १८ त्रयस्त्रिशद् वै सोमपा देवताया सोमाहुतीरन्वायत्ता अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रो द्वात्रिंश प्रजापतिस्त्रयस्त्रिशस् त्रयस्त्रिशत् पशुभाजना कौ० १२ ६ कतमे ते (देवा) त्रयस्त्रिशदिति । अष्टौ वसव एकादश रुद्रा द्वादशादित्यास्तऽ एकत्रिंशदिन्द्रश्चैव प्रजा-पतिश्च श० ११ ६ ३ ५. कतमे ते (देवा) त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति । स (याज्ञवल्क्य) होवाच । महिमान एवैषा (देवानाम्) एते त्रयस्त्रिशत् त्वेव देवा इति

देवकृतस्य=दानशीलकृतस्य (एनस =पापस्य) भा०—दानादि-प्रशक्तमनुष्यस्य ८ १३ इन्द्रिय, विद्वान् और दिव्य-गुणयुक्त जन के, आर्याभि० २ १६, ८ १३ [देव-कृतपदयो समास]

देवक्षत्रे देवानां धने राज्ये वा ५ ६४ ७ [देव-क्षत्र-पदयो. समास । क्षत्रम्=उदकनाम निघ० १ १२ धननाम निघ० २ १० 'क्षद' इति सौत्रो धातु । क्षदति रक्षतीति क्षत्रम् । 'गुधृवीपचिवचि०' उ० ४ १६७ सूत्रेण क्षदधातो ष्ट्र प्रत्यय । क्षतात् त्रायत इत्यपि विग्रह]

देवगणाः विद्वत्समूहा, प० वि० ३२ १४ देवाना विदुषा समूहा ३२ १४ विद्वानों के वृन्द, आर्याभि० २ ५३, ३२.१४ विनगे विज्ञानिनश्च, ऋ० भू० १४६, ३२ १४. [देव-गणपदयो समास]

देवगोपाः देवा विद्वासो गोपा रक्षका येषान्ते, यद्वा ये देवाना दिव्याना गुणाना कर्मणा वा गोपा (सर्वमनुष्या) १ ५३ ११ यो देवान् विदुषो गोपायति (राजा) ६ ६८ ७. देवाना विदुषा रक्षका (मनुष्या) ५ ४५ ११ सर्वेषा रक्षक (पृश्नि =अन्तरिक्षमवकाश) ७ ३५ १३ [देव-गोपपदयो समास । अथवा=देवोपपदे गुपू रक्षणे (भ्वा०) धातो 'कर्मण्यण्' सूत्रेण अण्प्रत्यय । देवगोपा=देवी गोप्त्री, देवान् गोपायतीति, देवा एन गोपायन्त्विति वा नि० ११ ४२]

देवजनाः देवा विद्वासश्च ते जना धर्मे प्रसिद्धाश्च भा०—विद्वासो विदुष्यश्च १६.३६. विद्वांस श्रेष्ठा ज्ञानिनो विद्यादानिन (ईश्वराज्ञापालका जना) ऋ० भू० २६७, १६ ३६ [देव-जनपदयो समास]

देवजातस्य देवेभ्यो दिव्येभ्यो गुणेभ्य प्रकटस्य (सप्ते =अश्वस्य) १ १६२.१ देवैर्दिव्यैर्गुणै प्रसिद्धस्य (सप्ते =अश्वस्य) २५ २४ **देवजाताय**=देवैर्दिव्यैर्गुणै. प्रसिद्धाय (सूर्याय=परमेश्वराय सूर्यलोकाय वा) ४ ३५ [देव जातपदयो समास । देवजातस्य=देवैर्जातस्य नि० ६ ३.]

देवजामिभ्यः विदुषा भगिनीभ्य २४ २४. **देव-जामिः**=यो देवै सह जमति स (घोष =वाक्) ७ २३ २ [देव-जामिपदयो समास । जामि =या प्रापणे (अदा०) धातोर् बाहु० औणादिको मि प्रत्यय (उ० ४.४३) आदेर्जत्वम् । अथवा देवोपपदे जमु अदने धातोरौणादिको बाहु० इञ्प्रत्यय]

देवजाः यो देवेषु विद्वत्सु जात (आप्तो विद्वान्) ३ ५३ ६ देवाद् विद्युतो जाता (ऋतव) १ १६४ १५. [देवोपपदे जनी प्रादुर्भावे (दिवा०) धातो 'सप्तम्या जनेर्ड' सूत्रेण 'पञ्चम्यामजातौ' सूत्रेण वा ड प्रत्यय । अथवा देवो-पपदाज् जनी धातो क्विप्प्रत्यय । 'जनसनखना०' इत्या-कारान्तादेश]

देवजुष्टम् विद्वद्भि सेवितम् (अन्नम्) ४ २६ ४ **देवजुष्टा**=विद्वद्भि प्रीता सेविता वा (वाक्) १ ७७ १ **देवजुष्टैः**=विद्वद्भि सेवितै (वचोभि =वचनै) ५ ४५ ४. [देव-जुष्टपदयो समास । 'देवजुष्टा' प्रयोगे स्त्रिया टाप् । जुष्टम्=जुषी प्रीतिसेवनयो (तुदा०) धातो क्त]

देवजूतम् देवै प्राप्तम् (शूष=बलम्) ७ २५ ५. **देवजूतः**=देवै प्रेरित (आप्तो जन) ३ ५३ ६ देवैर्विदित-श्चालित (रयि =धनम्) ४ ११ ४ [देव-जूतपदयो समास । देवजूतम्=देवगत देवप्रीत वा निघ० १० २८ जूतम्=जवति गतिकर्मा (निघ० २ १४) ततो भावे क्तः प्रत्यय]

देवतमः विद्वत्तम (राजा) ४ २२ ३ **देवतमाय**=अतिशयेन प्रकाशयुक्ताय (सूर्याय) २ २४ ३. [देव इति व्याख्यातम् । ततोऽतिशायने तमप्]

देवतया दिव्यसुखप्रदया (धर्मानुष्ठानयुक्तया क्रियया) १२ ५३ दिव्यगुणया (ईश्वरेण) १४ ६ दिव्यगुणप्रापिकया (विदुष्स्त्रिया) १२ ५३ परमपूज्यया परमेश्वराख्यया १३ २५ दिव्यया (पत्या) १३ २४ दिव्यगुणयुक्तया (पत्याख्यया) १५ ५८ पूज्यतमया व्याप्तया ब्रह्माख्यया सह १५ ५७ देदीप्यमानया (राज्या) सह १० ३० भा०—सुलक्षणया वाचा पत्न्या च सह २७ ४५ दिव्यसुखप्रदान-क्रियया सह १४ १२ विवाहितपतिरूपया सुखप्रदया (पत्न्या) १३ १६ दिव्यया (पत्या सह) १३ २४ **देवता**=देव एव देवता (ईश्वर) प्र०—स्वार्थे तल् प्रत्यय ३३ ७६ द्योतमान एव (इन्द्र =सभाध्यक्ष) १ ५५ ३ देव एव दिव्यगुणत्वात् १४ २० देव एव देवता विद्वानेव, प्र०—देवात्तल् इति स्वार्थे तल्, जातावेकवचनञ्च ४ ५८ १० दिव्य-गुणयुक्तम् (त्वामग्निमिव वर्त्तमान विद्वासम्) प्र०—अत्र सुपो लुक् ३३ १३ दिव्यगुण (अग्नि =विद्वज्जन) ७ १ २३. जगदीश्वर ६ ४ ७ उपासनीय इष्टदेव एव (सविता=ईश्वर) २२ १० पूज्यतमा (सविता=जगदीश्वर) १ २२.५ विद्वास (जना), प्र०—अत्र 'सुपा सुलुक्०' इति जसो लुक् १७ ६८. विद्वान्, सूर्यादि, बुद्ध्यादि, आर्याभि० १ ३२. ऋ० १ ७ १० १५. दिव्यजनानाम्,

प्राजापत्य। प्रजापते पितुर्दायमुपेयुरेतावेवार्धमासौ (शुक्ल-कृष्णपक्षौ) श० १ ७ २ २२ यशो देवा श० २ १ ४ ६ तस्माद् (देवा) यश श० ३ ४ २ ८ देवा वै यशस्कामा सत्रमासत ता० ७ ५ ६ ते (देवा) आसत श्रिय गच्छेम यश स्यामान्नादा स्यामेति श० १४ १ १ ३. श्रीर्देवा श० २ १ ४ ६ सर्वे वै देवास्त्विपिमन्तो हरस्विन तै० ३ ८ ७.३ तिर इव वै देवा मनुष्येभ्य श० ३ १ १ ८, ३.३ ४ ६ परोक्ष वै देवा श० ३ १ ३ २५ परोक्षकामा हि देवा श० ६ १ १ २, ७ ४ १ १० परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विप गो० पू० २ २१ यदु ह किं च देवा कुर्वते स्तोमेनैव तत्कुर्वते यज्ञो वै स्तोमो यज्ञेनैव तत्कुर्वते श० ८ ४ ३ २ मनो ह वै देवा मनुष्यस्याजानन्ति श० २ १ ४ १, २ ४ १ ११ मनो देवा मनुष्यस्याजानन्ति श० ३ ४ २ ६ (देवा प्रजापतिमब्रुवन्) दाम्यतेति न आत्थेति श० १४ ८ २ २ जाग्रति देवा श० २ १ ४ ७. न वै देवा स्वपन्ति श० ३ २ २ २२ यो वै देवाना पर्यैति स ऋतम्य पर्यैति श० ४ ३ ४ १६ एक ह वै देवा व्रत चरन्ति सत्यमेव श० ३ ४ २ ८ एक ह वै देवा व्रत चरन्ति यत्सत्य तस्मादु सत्यमेव वदेत् श० १४ १ १ ३३ सत्यमेव देवा अनृत मनुष्या श० १ १ १ ४, १ १ २ १७, ३ ३ २ २, ३ ६ ४ १ सत्यसहिता वै देवा ऐ० १ ६ सत्यमया उ देवा कौ० २ ८ शैशिरेणर्त्तुना देवा । त्रयस्त्रिशेऽमृत स्तुत सत्येन रैवती क्षत्रम् । हविरिन्द्रे वयो दधु तै० २ ६ १९ २ त्रिपत्या हि देवा श० ११ तै० ३ २ ३ ८ अपहतपाप्मानो देवा श० २ १ ३ ४ अथ देवा । अन्योऽन्यस्मिन्नेव जुह्वतश् चेरुस्तेभ्य प्रजापतिरात्मान प्रददौ श० ५ १ १ २, ११ १ ८ २ ते देवा प्रजापतिमेवाभ्ययजन्त । अन्योऽन्यस्यासन्न-सुरा अजुहवु । प्रजापतिर्देवानुपावर्त्तत गो० उ० १ ७ अग्र देवा ऊर्ध्व पृष्ठेभ्योऽपश्यन् । त उपपक्षावग्रे ऽवपन्त । अथ श्मश्रूणि । अथ केशान् । ततस्ते ऽभवन् । सुवर्ग लोक-मायन् । यस्यैव वपन्ति । भवत्यात्मना । अथो सुवर्ग लोक-मेति । तै० १ ५ ६ २ देवा वै छन्दास्यब्रुवन् युष्माभि स्वर्ग लोकमयामेति ता० ७ ४ २ छन्दोभिर्हि देवा स्वर्ग लोक समाश्नुवत श० ३ ९ २ १० सर्वैर्वै छन्दोभिरिष्ट्वा देवा स्वर्ग लोकमजयन् ऐ० १ ९ यज्ञेन वै देवा दिवमुपोद-क्रामन् श० १ ७ ३ १ यज्ञेन वै तद्देवा यज्ञमयजन्त यदग्निना-ऽग्निमयजन्त ते स्वर्ग लोकमायन् ऐ० १ १६ तम् (अग्नि) देवा रोहिण्यामादधत ततो वै ते सर्वान् रोहानरोहन् तै० १ १ २ २ आनन्दात्मानो हैव सर्वे देवा श० १० ३ ५ १३ इन्द्रो वै देवानामोजिष्ठो वलिष्ठ, कौ० ६ १४ गो० उ० १ ३ इन्द्राग्नी वै देवानामोजिष्ठौ ता० २४ १७ ३. प० ३ ७ इन्द्राग्नी वै सर्वे देवा कौ० १२ ६, १६ ११ श० ६ १ २ २८ हव्यवाहनो वै (अग्नि) देवानाम् श० २ ६. १ ३० अग्निर्वै देवाना होता ऐ० १ २८, ३ १४ अग्निरेव देवाना दूत आस श० ३ ५ १ २१ वरुणो वै देवाना राजा श० १२ ८ ३ १० तस्मादाहुर्विष्णुर्देवाना श्रेष्ठ इति श० १४ १ १ ५ रुद्रो वै ज्येष्ठश्च श्रेष्ठश्च देवानाम् कौ० २५ १३ विश्वे वै देवा देवाना यशस्वितमा तै० ३ ८ ७ २ श० १३ १ २ ८ शृतकामा इव हि देवा तै० ३ २ ८.१२ अग्नयो वै सर्वे देवा जै० २ २२५ अन्नमु देवाना सोम जै० ३ १७४ अभिपिक्तो (राजा) वै देवाना वरुण मै० ४ ३ ७ अस्या (पृथिव्याम्) वै प्रतिष्ठाय देवा यज्ञमतन्वत मै० ३ ७ १ एप ह वै देवाना राज्ञी यच्छ्रद्धा जै० २.४२६ ओपधयो वै देवाना पत्न्य मै० ३ १ ८ तस्य (अमृतस्य) देवा आयुष्कृत मै० २ ३ ४ दिवा वै मनुष्या यज्ञेन चरन्ति नक्त देवा । मै० ४ ५ १ काठ० २३ ५ देवा एकरूपा रार्वे शुक्ला जै० १ २७८ देवा ह धर्मणा ध्रुवा काठ० ३५ ७ न हि देवा अश्रु कुर्वन्ति मै० २ १ १० नियुतो देवाना विश काठ० १२ १३ प्रजापतिश्रेष्ठा वै देवा जै० २ ३७१ बिभ्यति वै देवेभ्य पशव काठ० ७.७]

देवकम् देवमिव वर्त्तमानम् (सत्पुरुषम्) ७ १८ २० [देवप्राति० इवार्थे कन्प्रत्यय । स्वार्थे वा क प्रत्यय । देवपद व्याख्यातम्]

देवकामम् यो देवान् विदुप कामयते तम्, भा०—विद्याकामम् (वीरमनुष्यम्) २९ ९ **देवकाम:**=यो देवान् विदुप कामयते स (यजमानो जन) ४ २५ १ देवाना विदुपा काम इच्छा यस्य स (वीरजन) ७ २ ९ [देवोपपदे कमु कान्तौ (भ्वा०) धातो 'कमेर्णिङ्' इति णिङन्तात् 'कर्मण्यण्' इत्यण्प्रत्यय । देव-कामपदयोर्वा समास]

देवकिल्विषात् देवेपु विद्वत्स्वपराधकरणात्, भा०—पापाचरणाद्, विद्वदीर्ष्या-विषयात् १२ ९० [देव-किल्विप-पदयो समास । किलति क्रीडति विचारशून्यतया कार्येपु प्रवर्त्तते येन तत् किल्विप पाप । 'किलेर्बुक् च' उ० १ ५० सूत्रेण टिषच् प्रत्ययो बुगागमश्च]

देवकृतम् देवैराचरितम् (एन =पापम्) २० १८ विद्वद्भिर्विद्याध्ययनाय निर्मितम् (योनि=गृहम्) ७.४ ५ कामिभिरनुष्ठितम् (एन =दुष्टाचरणम्) ८ २७ इन्द्रिय-कृत कर्म ८ १५ यद् देवैरिन्द्रियै कृत तत् (एन =पापम्) ३ ४८ देवैर्विद्वद्भि कृत निष्पादित शास्त्रम् ३ ३३ ४

प्र०—विष्वदेवयोश्च टेरद्र्यञ्चतौ वप्रत्यये, अ० ६ ३ ९२ अनेन देवशब्दस्य टेरद्रिरादेश १ ९३ ८ देवानञ्चता प्राप्नुवता, भा०—दिव्येन (मनसा) २९ २३ [देवान् अञ्चतीति विग्रहे देवोपपदाद् अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृग्०' इति क्विन्प्रत्यय । 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये' अ० ६ ३ ९२ सूत्रेण देवस्य टेरद्र्यादेश । 'अच' इत्यकारलोपे 'चौ' सूत्रेण पूर्वस्य दीर्घत्वम्]

देवद्रीचीम् यया देवानञ्चति ताम् (रात्रिम्) ३.६ १ [देवद्रीचेति व्याख्यातम् । तत स्त्रियाम् 'अञ्चतेश्चोपसख्यानम्' । यस्योर्व्वा वाक् स आर्त्विजीनो देवेत्रैव हि स काठ० १३ ४ असुर्य पात्रमनाच्छृण्णम्, आच्छृणत्ति देवत्राऽक तै० स० ५ १ ७ ४]

देवनिदः ये देवान्निन्दन्ति तान् (दुर्जनान्) १ १५२ २ ये देवान् विदुषो दिव्यगुणान्वा निन्दन्ति तान् (नास्तिकान् जनान्) २ २३ ८ [देवोपपदान् णिदि कुत्सायाम् (भ्वा०) धातो क्विप् प्रत्यय । आगमशासनस्यानित्यत्वान् नुमोऽभाव]

देवन्देवम् विद्वास विद्वास, दिव्य दिव्य पदार्थ वा ३३ ९ १. ['देवम्' पदस्य वीप्साया द्विर्वचनम्]

देवपत्नीः देवैर्विद्वद्भि पालनीया (ग्ना =वाणी) १ ६१ ८ देवाना विदुषा स्त्रिय ५ ४६ ८ [देव-पत्नी-पदयो समास । देवपत्नी =देवपत्न्य नि० १२ ४६ देव-पत्न्यो देवाना पत्न्य नि० १२ ४४]

देवपणिभिः देवाना दिव्यगुणवतामग्नि-पृथिव्यादीना विदुषा वा पणयो व्यवहारा स्तुतयश्च ताभि २ १७. [देव-पणिपदयो समास । पणि =पण व्यवहारे स्तुतौ च (भ्वा०) धातोर्नाहि० औणादिक इन्प्रत्यय]

देवपानम् देवै किरणैरिन्द्रियैर्वा पेयम् (चमस= मेघ) १ १६१ ५ देवा पिबन्ति येन तत् (चमस =यज्ञ-पात्रम्) ४ ३५ ५ [देवोपपदे पा पाने (भ्वा०) धातोर्ल्युट् प्रत्यय]

देवपीयवः ये देवाना विदुषा द्वेष्टार, भा०—ये आप्तान् विदुषो द्विषन्ति ते (पणय =व्यवहारिणो जना) ३५ १ (देव-पीयुपदयो समास । पीयु =पा पाने (भ्वा०) धातो 'मृगय्वादयश्च'... 'ऋरुदाड्कुपीयुनीलङ्गुलिगु' उ० १ ३६ सूत्रेण कु प्रत्यये धातोरीकारादेशो युगागमश्च निपात्यते । देवपीयुम् । पीयतिर्हिंसाकर्मा नि० ४ २५]

देवपुत्रे देवस्य परमात्मन पुत्रवद्वर्त्तमाने (रोदसी= प्रकाशभूमी) १ १८५.४ देवाना विदुषा पुत्र इव वर्त्तमाने (रोदसी =भूमिसूर्यलोकौ) ६ १७ ७ देवा विद्वास पुत्रा पुत्रवत्पालका ययोस्ते (सूर्यभूमी) ७ ५३ १ देवैर्दिव्यै प्रकृत्यशै पुत्र इव प्रजाते (क्षितिसूर्यौ) १ १५९ १ देवा दिव्या विद्वासो दिव्यरत्नादियुक्ता पर्वतादयो वा पुत्रा पालयितारो ययोस्ते (देवी =द्यावापृथिव्यौ भूमिसूर्यप्रकाशौ) १ १०६ ३ देवा विद्वास पुत्रा ययोस्ते द्यावापृथिव्यौ) ४ ५६ २ [देव-पुत्रपदयो समासे प्रथमा-द्विवचनम्]

देवप्सरस्तमम् देवैर्विद्वद्भिरतिशयेन ग्राह्यम् (वच.) १ ७५ १ [देव-प्सरस्पदयो समासेऽतिशायने तमप् । प्सर =रूपनाम निघ० ३ ७]

देवबन्धोः प्रकाशमानाना पृथिव्यादीना सम्बन्धिन (वाजिन =जलादय.) १ १६२ १८ देवा विद्वासो बन्धुवद् यस्य तस्य (अश्वस्य) २५ ४१ [देव-बन्धुपदयो समास । बन्धु =बन्धबन्धने (क्र्या०) धातो 'शॄस्वृस्निहित्रपि०' उ० १ १० सूत्रेण उ प्रत्यय]

देवभक्तम् देवैर्विद्वद्भि सेवितम् (अपूप =भोज्य-पदार्थम्) १२.२९ देवै सेवितम् (रत्न =रमणीय धनम्) ४ १ १० [देव-भक्तपदयो समास । भक्तम् =भज सेवायाम् (भ्वा०) धातो क्त प्रत्यय]

देवयजनम् देवाना विदुषा यजन पूजनं तेभ्यो दानञ्च ४ १ देवैर्यदिज्यते येन वा देवाना यजन देवयजन तद् (ब्रह्म यज्ञो वा) १ ३१ विद्वानो के यजन करने के समान, स० वि० २०९, अथर्व० ९ ६ १ ३ **देवयजनात्**=देवा यजन्ति यस्मिन् तस्मात् (भा०—विद्वत्कार्याऽनुष्ठानात्) १ २६ **देवयजने**=देवाना विदुषा सङ्गतिकरणे, एतेभ्यो दाने वा ४ २२ देवा विद्वासो यजन्ति यस्मिन् तस्मिन् (यज्ञमन्दिरे) ३७ ३ विदुषा पूजने ३७ ९ विद्वद्यजनाऽधिकरणे (यज्ञ-स्थाने) ३७ ९ विदुषा पूजने स्थानविशेषे ३७ ६ [देवोपपदे यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो 'करणाधिकरणयोश्च' अ० ३ ३ ११७ सूत्रेण ल्युट् । देवयजनम् =भौम देवयजनम् गो० पू० २ १४ देवयजन वै वर पृथिव्यै ऐ० १ १३ ऋत्विजो देवयजनम् गो० पू० २ १४ श्रद्धा देवयजनम् गो० पू० २ १४ आत्मा देवयजनम् गो० पू० २ १४ ऋत्विजो हैव देवयजन ये ब्राह्मणा. श० ३ १ १ ५ एष हि पृथिव्या मूर्धा यद् देवयजनम् मै० ३ ७ ६ काठ० २४ १ दक्षिणतो वर्षीयसी करोति, देवयजनस्यैव रूपमक तै० स० २ ६ ४ ३ पृथिव्या ह्येष मूर्धा यद् देवयजनम् तै० स० ६ १ ८ २ ब्राह्मणा वाव

प्र०—निर्धारणेऽत्र षष्ठी 'सुपा सुलुक्०' इत्यासो लुक् च १ १०० १५ दिव्यगुणसम्पन्नौ (अश्विनौ=अध्यापकोपदेशकौ) ४ ४४ २ दिव्यस्वरूपे (भूमिसूर्य्यौ) ६ ७० ५ कर्मकाण्डे देवताशब्देन वेदमन्त्राणां ग्रहणम् । गायत्र्यादीनि छन्दांसि ह्यग्न्यादिदेवताख्यान्येव गृह्यन्ते, ऋ० भू० ६०, **देवताम्**=दिव्यगुणताम् (अग्रम्=उत्तम सुखम्) अ०—मुखम् १३ ५१ **देवतायाम्**=पूजनीयायाम् (प्रजापतौ=परमेश्वरे) ३५ ६ **देवतासु**=विद्वत्सु १६ ३२ **देवताः**=देवा एव देवतास्ता (विदुषो जनान्) १६ ५ दिव्या विद्वांसो गुणा वा १३ १ देवा विद्वांस (जना) १६ ८१ [देव इति व्याख्यातम् । तत 'देवात्तल्' अ० ५.४ २७ सूत्रेण तल्प्रत्यय । देवतामृगब्भ्यनूक्ता या यजु सैव देवता सर्क्सो देवता तद् यजु श० ६ ५ १ २ त्रयस्त्रिंशद् देवता ता० ४ ४ ११ आपो वै सर्वा देवता ऐ० २ १६ अग्नौ हि सर्वा देवता इज्यन्ते काठ० २५ ३ एता वै सर्वा देवता यद् वसतीवर्य जै० १ ३४२ कतमैका देवतेति, प्राण इति जै० २ ७७ देवता एव पृष्ठैरवरुन्धते तै० स० ७ ४ २ ३ देवता यजत्रा काठ० २६ ८ देवता वै यज्ञस्य शर्म यज्ञो यजमानस्य मै० ३ ६.६ देवता वै विश्वा धामानि काठ० २४ ७ देवता वै विश्वा धामानि काठ० २४ ७. देवतैव मेधपतिरिति कौ० १० ४ न प्रजापतेरन्या पूर्वा देवतास्ति जै० २ १७४ प्रजापति सर्वा देवता तै० स० २ १ ४ ३ प्राणा वै देवता मै० २ ३ ५ काठ० ११ ८ ब्राह्मणो वै सर्वा देवता तै० १ ४ ४ २ मध्यायतनो वै प्रजापतिर्देवतानाम् जै० २ ३४६ मुख वा अग्निर्देवतानाम् जै० ३ ३०० यतो यज्ञस्ततो देवता मै० ३ ६ ६ यावतीर्वै देवतास्ता सर्वा वेदविदि ब्राह्मणे वसन्ति तै० आ० २ १५ ६ वाक् च वै वायुश्चैत देवतानामानशानी जै० २ ३८६ विष्णुर्वै परमो देवतानाम् जै० २.१६२]

देवतातये देवेभ्यो विद्वद्भ्यो दिव्यगुणेभ्यो वा ३३ ८७ दिव्यगुणप्राप्तये ३ २६ २ देवाना विदुषामेव सत्काराय १ १३७ ६. **देवताता**=देवाना विदुषा कर्मसु, प्र०—अत्र 'देवात्तातिल्, अ० ४ ४ १४२ 'सुपा सुलुक्०' अ० ७.१.३६ इति डादेशश्च ६ १६ देवा एव देवतास्तासा भाव १ ५८ १. देवतातौ (विद्वत्पङ्क्तौ) ४ ६ १ सत्ये व्यवहारे यज्ञे ६ ६८ २ देवैर्विद्वद्भि कृता (शस्ति=प्रशसा) ४ ३ १५ देवान् विदुष ३ १६ १ देवैरनुष्ठातव्ये सङ्गन्तव्ये व्यवहारे ७ २ ५ विद्वद्भिरनुष्ठातव्ये यज्ञे ७ ३८ ७ देवता विद्वांस इव वर्त्तमाना (वाजिन=विद्वज्जना) २१ १०. दिव्ये यज्ञे ६ ४ १ दिव्यगुणप्रापके यज्ञे ७ ४३ ३ देवैरीश्वरेण विद्वद्भिर्वा सह, प्र०—अत्र देवशब्दात 'सर्वदेवात्तातिल्' इति तातिलि कृते 'सुपा सुलुक्०' इति तृतीयास्थाने डादेश १ ६५.८ विद्वत्कर्त्तव्ये व्यवहारे ५ २६.१. शिल्पक्रियायज्ञसम्पत्तिहेतू यद्वा देवान् विदुषो दिव्यगुणान् वा तनुतस्तौ (अश्विनौ=द्यावापृथिव्यौ) प्र०—अत्र 'दुतनिभ्या दीर्घश्च' उ० ३.८८ इति क्त प्रत्यय 'देवतातेति यज्ञनामसु पठितम्' निघ० ३ १७, १ ३४.५ देवा एव देवतास्तासा भाव १ ५८ १. देवैनेव १ १२८ २ **देवतातिम्**=देवनामेव परमात्मानम् १ १४१ १० दिव्यस्वरूपाम् (घृताचीं=रात्रीम्) ३.१६ २. दिव्यस्वभावम् (शर्व=बलम्) ३ १६ ४ दिव्यसुखप्रापक यज्ञम् ७ १ १८ देवैरनुष्ठित यज्ञम् ७ ३६.१. दिव्यगुणाऽन्विताम् (परिचर्य्याम्) ४ ६ ३ देवान् ४ ६ ६ [देव प्राति० 'सर्वदेवात् तातिल्' अ० ४ ४ १४२ सूत्रेण स्वार्थे तातिलप्रत्यय । अथवा तनु विस्तारे (तना०) धातो 'दुतनिभ्या दीर्घश्च' उ० ३ ६० सूत्रेण क्तप्रत्यये तात । देव-तातपदयो समासे 'सुपा सुलुग्०' इति विभक्तेराकारादेशे देवताता शब्दः सिध्यति । देवताता यज्ञनाम निघ० ३ १७ देवतातौ यज्ञे नि० १२.४३]

देवत्तम् यद् देवेनेश्वरेण दत्त विद्वद्भिर्वाऽध्यापकेन तत् १ ३७ ४. [देवोपपदे डुदाञ् दाने (जु०) धातो क्तः प्रत्यय । छान्दसत्वादनुपसर्गादपि ददातेस्तकारादेश]

देवत्रा देवेषु वर्त्तमानम् (सूर्य=जगदीश्वरम्) २७.१० दिव्यगुणेषु देवेषु २०.२१ देवेषु विद्वत्सु दिव्यगुणेषु वा १ ६३ ६ प्रकाशमयेषु सूर्येषु ३५ १४ विद्वत्सु, मनुष्येषु, पृथिव्यादिषु वा वर्त्तमानम् १ ५० १० सर्वेषु दिव्यगुणवत्सु पदार्थेषु प० वि०, ३५ १४ देवेषु दिव्येषु पदार्थेषु ३८ २४ दिव्यान् गुणान् ६ २७ देवेषु पतिषु ६ ३४ देव देवमिति देवत्रा ६ २० देवेषु पवित्रगुणकर्मस्वभावेषु वर्त्तमाना (प्रजा-सभा-सेना-जना) ७ ४३ देवेष्विति १ १८२ ५ [देवप्राति० 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' अ० ५ ४ ५६ सूत्रेण त्रा प्रत्यय । देवत्रा=देवान् नि० ८ ६ अ० ४ १ ६ वा० सूत्रेण ङीप्प्रत्यय]

देवत्वम् विदुषा भावम् १ १३६ १ प्रकाशमयस्य भाव १ ११५ ४ विद्वत्त्वम् ३ ११ ३ देवस्य भावम् ३३ ३७ विदुषा कर्म भाव वा १० १४ **देवत्वा**=देवाना विदुषा दिव्यगुणाना वा भावरूपाणि (गुणकर्माणि) १ ६६ ३ [देवप्राति० भावे कर्मणि वा त्व-प्रत्यय । 'देवत्वा' प्रयोगे प्रथमाबहुवचने शेर्लोप.]

देवद्रीचा देवान् विदुषोऽञ्चता सत्कारिणा (मनसा)

गच्छन्ति येषु तान् (पथ =मार्गान्), भा०—वाष्पयानान् २६ २ यान्ति यैस्तान् देवाना विदुषा गमनाऽधिकरणान् (अध्वन =मार्गान्) १ ७२ ७. **देवयानाः**=याभिर्देवान् दिव्यान् भोगान् प्राप्नुवन्ति ता (अन्या =गा) १२ ७३. **देवयाने**=यथा विदुषा गमनागमनाधिकरणे तथा (पथि=मार्गे) ५ ३३ परमार्थ मार्ग मे, आर्याभि० २ १८, ५ ३३ **देवयानैः**=देवा विद्वामो यान्ति येषु तै (पथिभि) भा०—धर्म्यमार्गे २१ ११ विद्वन्मार्गे ७ ३८ ८ देवा धार्मिका विद्वासो गच्छन्ति येषु तै (पथिभि =मार्गे), भा०—विद्वत्सङ्गयोगाभ्यासधर्माऽऽचारै १८ ६० विद्वासो यान्ति यैर्धर्म्यै (पथिभि), भा०—धार्मिकाणा विदुषा मार्गै ६ १८ देवा विद्वामो यान्ति यैस्तै (मार्गै) ३ ५८ ५ आप्ता विद्वासो गच्छन्ति येषु तै (पथिभि = मार्गै) ५ ४३ ६ देवा आप्ना विद्वासो यान्ति यैस्तै (मार्गै) १६ ५८ [देवयानपदयोः समास । यानम्=या प्रापणे (अदा०) धातो करणेऽधिकरणे वा कारके ल्युट् प्रत्यय । ‘देवयाना’ प्रयोगे देवोपपदे या प्रापणे धातो ‘छन्दसि गत्यर्थेभ्य’ अ० ३ ३ १२६ सूत्रेण युच्प्रत्यय । तत स्त्रिया टाप् । देवयाना-वै ज्योतिष्मन्त पन्थान ऐ० ३ ३८ त्रयो वै देवयाना पन्थान गो० उ० २ १ १. तै० स० २ ५ ११ ६ ये चत्वारो पथयो देवयाना अन्तरा द्यावा-पृथिवी वियन्ति तै० स० ५ ७ २ ३ यमाहुर्ज्यैम्न पन्था ऽन्येष वाव देवयान पन्था ता० १२ १२ ३ वागु देवयान (पन्था) जै० २ २६८ यो देवयान पन्थास्तेन यज्ञो देवान् अप्येतु तै० स० १ ६ ३ २ वर्हिर्यजति, य एव देवयाना पन्थानस्तेष्वेव प्रतितिष्ठति तै० स० २ ६ १ ३ तस्य वा एतस्य सवत्सरस्याग्निष्टोमसामान्येव देवयान पन्था जै० २ ६० एष वाव देवयान पन्था यत् पृष्ठ्य षडह जै० २ ४३३]

देवयावा यो देवान् दिव्यगुणान् भोगान् याति प्राप्नोति स (अग्नि =पावक इव विपश्चित्, ७ १० २ [देव-यावन्पदयो समास । यावन्=या प्रापणे (अदा०) धातो ‘आतो मनिन्क्वनिब्वनिपश्च’ अ० ३ २.७४ सूत्रेण वनिप्प्रत्यय]

देवया. देवान् दिव्यान् गुणान् विदुषो वा याति प्राप्नोति येन स (यज्ञ) १ १७७ ४ ये देवान् दिव्यान् गुणान् यान्ति ते (प्राणा) १ १६८ १ देवान् विदुषो यजमान पूजयन् (विप्र =मेधावी जन) ३ ८ ५ या देवान् विदुषो यान्ति ता (वाच =वाण्य) ५ ७६ १ नियताऽऽत्मा (विप्र =मेधाविजन) ३ ८ ५ [देवोपपदे या प्रापणे (अदा०) धातो क्विप्प्रत्यय । देवया=देवेज्या नि० १२ ५ अत्र देवोपपदे यजतेर्ण्विन् प्रत्ययश्छान्दस]

देवयूनि देवान् दिव्यान् गुणान् कुर्वन्ति (शोचीषि= तेजासि) ७ ४३ २ [देवोपपदाद् या प्रापणे (अदा०) धातो ‘मृगय्वादयश्च’ उ० १ ३७ सूत्रेण कु प्रत्यय । देवयुशब्दस्य नपुसके प्रथमाबहुवचने रूपम्]

देवरम् द्वितीय वर नियोगेन प्राप्तम्, प्र०—देवर कस्मात् ? द्वितीयो वर उच्यते, नि० ३ १४, १४० २ देवर को, स० प्र० १० ४० २ द्वितीय वरम्, ऋ० भू० २११, ऋ० ७८१८ २ [दिवु क्रीडाद्यर्थेषु (दिवा०) धातो ‘अर्तिकमिभ्रमिचमि०’ उ० ३ १३२ सूत्रेण अर प्रत्यय । दीव्यति क्रीडादिक करोतीति देवर । विधवाया द्वितीय पति पत्यु कनिष्ठभ्राता। देवर कस्मात् ? द्वितीयो वर उच्यते नि० ३ १४]

देवृषु मेरे भाई जो तेरे देवर ज्येष्ठ अथवा कनिष्ठ हैं, उनमे । स० वि० १३५, १० ८५ ४६ [दिवु क्रीडाव्यवहार-द्युतिस्तुतिमोदमदादिषु (दिवा०) धातो ‘दिवेर्ऋ’ उ० २ ६६ सूत्रेण ऋप्रत्यये देवृशब्द । दीव्यति क्रीडादिक करोतीति देवा, पत्यु कनीयान् भ्राता वा]

देवलोकम् देवाना विदुषा लोक दर्शक व्यवहारम् २६ १० **देवलोकाय**=देवाना दर्शनाय ३० १२ [देव-लोकपदयो समास । अथवा-देवोपपदे लोकृ दर्शने (भ्वा०) धातो ‘कर्मण्यण्’ इत्यण्प्रत्यय । लोक =लोकृ दर्शने (भ्वा०) धातो कर्त्तरि अच्, भावे वा घञ्प्रत्यय । देव-लोक त्रयो वै देवलोका गो० उ० १ १ सप्त वै देव-लोका ऐ० २ १६ चतस्रो दिशस्त्रय इमे लोका एते वै सप्त देवलोका श० १० २ ४ ४ एकविंशतिर्वै देवलोका । द्वादशमासा पञ्चर्त्तव । त्रय इमे लोका । असावादित्य एकविंश तै० ३ ८ १० २ वेदिर्वै देवलोक श० ८ ६ ३ ६ देवलोको वा एष यद् विषुवान् ता० ४ ६.२ उत्तरो वै देवलोक श० १२ ७ ३ ७ देवलोको वा इन्द्र कौ० १६ ८ देवलोको वा आदित्य कौ० ५ ७ विद्यया देवलोक (जय्य) श० १४ ४३ २४ अन्तर्हितो हि देवलोको मनुष्य-लोकात् तै० स० ६ १ १ १ उदञ्च प्राञ्च प्रश्रयतेष वै देवलोक काठ० २६ ३ एते ह वाव द्वादश देवलोका जै० २ ६ त्रयस्त्रिंशद् देवलोका जै० २.२१० नव देव-लोका तै० स० २ ५ ११ ६ स्वराड् वै देवलोक जै० २ १६६]

देववतः प्रशस्तगुण-विद्वद्युक्तस्य (गो =धेनो भूमेर्वा)

देवयजनम् काठ० २५ ३ यत्र क्वचिद् ब्राह्मणो विद्यावान् मन्त्रेण करोति तद्देवयजनम् गो० १ २ १४ यद्वै (देवा) तद्यज्ञमविन्दंस्तद् देवयजनस्य देवयजनत्वम् मै० ३ ८ १ वर्ष्म ह्येतत् पृथिव्या यद् देवयजनम् तै० स० ६ २ ६ ३]

देवयजनि देवा यजन्ति यस्या सा (पृथिवी) १ २५ देवा यजन्ति यस्या तस्या, अ०—देवयजन्या (पृथिवि=पृथिव्या), प्र०—अत्र प्रातिपदिकनिर्देशानामर्थतन्त्रत्वात् षष्ठ्यर्थे प्रथमा विपरिणम्यते ३ ५ [देवोपपदे यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोरौणादिको वाहु० अनि प्रत्यय । अथवा देवोपपदे यजतेर्ल्युट्, ततो डीप् । छान्दस ह्रस्वत्वम् । इय वै पृथिवी देवी देवयजनी श० ३ २ २ २०]

देवयजम् देवान् विदुषो दिव्यगुणान् वा यजति सङ्गतान् करोति येन यज्ञेन स देवयट्, तम् । भा०—दिव्यगुणप्रकाशकम् (अग्नि=विद्युदाख्यम्) प्र०—अत्र 'अन्येभ्योऽपि दृश्यन्ते' इति सूत्रेण 'कृतो बहुलम्०' इति वार्त्तिकेन करणे विच्प्रत्यय १ १७ [देवोपपदे यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' अ० ३ २ ७५ सूत्रेण विच् कर्त्तरि । करणे तु 'कृतो बहुलम्' इति वार्त्तिकेन विच्]

पतिलोकम् पतिसुखम् ऋ० भू० २११, अथर्व० १८ ३ १ १ पति के घर वा सुख को स० वि० १३४, १० ८५ ४३ [पति-लोकपदयो समास]

पतिवेदनम् पाति रक्षति स पति, पतेर्वेदन प्रापण ज्ञान वा यस्मात्तम् (त्र्यम्बक=सर्वाध्यक्ष रुद्रम्) ३ ६० [पति-वेदनपदयो. समास । वेदनम्=विद्लृ लाभे (तुदा०)

(आप्तैर्मनुष्यै)१७ ६२ प्रशमितैर्व्यवहर्त्तृभि (विद्वन्मनुष्यै) ४ ५८ ४ पणयो व्यवहारा स्तुतयश्च ताभि २ १७ **पणिम्**=व्यवहारम् १ ६३ ४ प्रशसनीयम् (वेदज्ञानम्) ६ ६१ १ व्यवहर्त्तारम् (स्तेन-जनम्) ६ ५१ १४ **पणि:**=प्रशसित (विद्वान् जन) ५ ६१ ८ सत्य-व्यवहार १ ३३ ३ व्यवहर्त्ता (जन) १ १८० ७ **पणीन्**=प्रशस्तव्यवहारकर्त्रीन् (अध्येतॄनुपदेष्टाॅश्च) १ १८४ २ प्रशसनीयान् व्यवहारान् ६ ३६ २ व्यवहर्तॄन् (विद्यार्थिन) ७ १६ ६ प्रशसिनान् (सज्जनान्) ६ ३३ २ **पणीनाम्**=द्यूतादिव्यवहार-कर्त्तॄणाम् (कितवानाम्) ६.५३.५ प्रशमिताना व्यवहर्तॄणाम् (व्यापारिकाना जना-नाम्) ६ ४५ ३१ स्तुत्यव्यवहारकर्त्तॄणाम् (प्रजाजनानाम्) ७ ६ २ व्यवहारनिष्ठाना प्रशसनीयाना नृणाम् २ २४.६ **पणे**=स्तूयमानस्य (प्रजाजनस्य) ५ ३४ ७ स्तुत्यव्यव-हारस्य १ ८३ ४. प्रशमितव्यवहारकर्त्तु (सत्पुरुषस्य) ६ ५३ ६ द्यूतकर्त्तु (पाखण्डिजनस्य) ६ ५३ ३ व्यव-हारस्य ३ ५८.२ सदसद्व्यवहर्त्तु (जनस्य)१ १८२ ३ [पण व्यवहारे स्तुतौ च (भ्वा०) धातोरौणादिक इन् । पणि पणनात् नि० २ १७. पणीन्=वणिज नि० ६ २७]

पणिनेव गोपालेन वणिग्जनेनेव १ ३२ ११ [पणिना-इवपदयो समास । पणिरिति व्याख्यातम्]

पण्यमानः स्तूयमान (मित्र =सुहृज्जन) ८ ५५ [पण व्यवहारे स्तुतौ च (भ्वा०) धातो कर्मणि शानच्]

पत गृहाण १२ ४. प्रपातय १२ ८७ पतति गच्छति प्र०—अत्र व्यत्ययो लडर्थे लोट् च ३ ४६ गच्छ ४ ३४. **पतत्**=पतति ४ २७ ४ पतति गच्छति प्राप्नोति वा ३ ३६ ३ **पतथ**=अथ आगच्छत १ १६८ ६ **पतथ.**= गच्छथ १ १८३ १ **पतन्ति**=पतन्तु गच्छन्तु, प्र०—लोडर्थे लट् १ २५ ४. उपरिष्टादध पतन्ति १ ७६ २ प्राप्नुवन्ति १ १६४ ४७ श्येनवच्छत्रुदले सञ्चरन्ति १३ १० **पतसि**=गच्छसि २ १६ ३ **पतात्**=गच्छेत् १ ४६ ३ **पतामि**=प्राप्नोमि १ ३३ २ [पत्लृ गतौ (भ्वा०) धातो-र्लोटि लटि च रूपाणि]

पतङ्गम् य प्रतिपात गच्छति तम् (अग्नि=अश्वम्) १ १६३ ६ सूर्य प्रति २६ १७ **पतङ्गान्**=अश्वान्, प्र०—पतङ्गा इत्यश्वनाम, निघ० १ १४, १३ १०. अग्निकणा इव वर्त्तमानानश्वान् ४ ४ २ **पतङ्गाय**=पतति गच्छतीति पतङ्गस्तस्मा सूर्याय, भा०—पतन-पातनादिगुणप्रकाशिताय, भा०—तद्गुणप्रकाशाय ३ ८ **पतङ्गा.**=सूर्य इव देदीप्य-माना (आशव =अश्वा) १ ११८ ४ **पतङ्गैः**=अश्ववद् वेगिभि रथै १ ११६ ४ प्रतिपात वेगेन गन्तृभि (नर्यै) ऋ० भू० १६०, ऋ० १ ८८ ४ [पतङ्गा अश्वनाम निघ० १ १४ पत्लृ गतौ (भ्वा०) धातो 'पतेरङ्गच् पक्षिणि' उ० १ ११६ सूत्रेणाङ्गच्-प्रत्यय । बहुलवचनात् पक्षिणोऽन्य-त्रापि । पतङ्ग =पतत्रिव ह्लेत्वङ्गेवेति रथगुप्तीरग्ने । पतङ्ग इत्याचक्षते जै० उ० ३ ३५ २ प्राणो वै पतङ्ग कौ० ८ ४]

पतङ्गर: य पतङ्गेऽग्नौ रमते, पतङ्ग ददाति वा स (राजा) ४ ४०. २ [पतङ्गोपपदे रमु क्रीडायाम् (भ्वा०) धातो, रा दाने (अदा०) धातोर्वा ड प्रत्यय]

पतत: पतनशीलस्य (मनुष्यस्य) ६ ४ ५ **पतताम्**= गच्छताम् (वीना=विमानाना सर्वलोकाना पक्षिणा वा) १ २५ ७ [पत्लृ गतौ (भ्वा०) धातो शतृप्रत्यय]

पतत्रि पतनशीलम्, भा०—सद्यो गमयितारम् (शिर =विमानम्) २६ १७ [पत्लृ गतौ (भ्वा०) धातो 'पतेरत्रिन्' उ० ४ ६६ सूत्रेणात्रिन् प्रत्यय]

पतत्रिणम् पतत्र. शीघ्र गन्तु बहुवेगो यस्यास्ति त (पक्षिणम्) १६ १० **पतत्रिणः**=पक्षिण १ ५८ ५ शत्रव पक्षिणो वा १ ६४ ११ पतनशीला (वय = पक्षिण) प्र०—अत्र 'पतेरत्रिन्' उ० ४ ६६ अनेनाऽय सिद्ध १ ४६ ३ **पतत्रिणौ**=पतत्राण्यूर्ध्वगमनानि सन्ति ययोस्तौ (पक्षौ=परिग्रहौ कार्यकारणरूपौ) १८ ५२ **पतत्रिभिः**=गमनशीलै (पक्षिभि) ६ ६२ ६ [पत्लृ गतौ (भ्वा०) धातो 'पतेरत्रिन्' उ० ४ ६६ सूत्रेणात्रिन् प्रत्यय । अथवा पत् धातो 'अमिनक्षि०' उ० ३ १०५ सूत्रेणात्रन्-प्रत्यय । ततो मत्वर्थ इनि]

पतत्रिणी पतितु विनाशयितु कुशिके १ १५८ ४ **पतत्रिणीः**=पतितु गन्तु शीला (सीरा =नदी) १२ ८३ [पतत्रिन् इति पूर्वपदे व्याख्यातम् । तत स्त्रिया 'ऋन्नेभ्यो ङीप्' इति ङीप्]

पतत्रैः गमनशीलै परमाण्वादिभि, भा०—अतिसूक्ष्मै कारणै १७ १६ प्राप्त होने वाले (सूक्ष्म-स्थूल पदार्थों से) आर्याभि० २ ३८, १७ ६ [पत्लृ गतौ (भ्वा०) धातो 'अमिनक्षि०' उ० ३ १०५ सूत्रेणात्रन्-प्रत्यय]

पतन्ती गच्छन्ती (हरित =हरितवर्णा किरणा) ५ २६ ५ [पत्लृ गतौ (भ्वा०) धातो शत्रन्तात् ङीप् स्त्रियाम्]

पतयत् पतिरिवाऽऽचरति इति सन् (कवि.—विद्वान्) ७ ४५ ६. यत् पति करोति पतित्वमप्राप्तान (विजाना-

पत्यमाना: पतिरिवाऽऽचरन्ती (दिव =ज्योतीषि) ३ ५६ ५ प्राप्नुवन्त्य (स्त्रिय) ६ ६५ ३. [पतिपदादाचारे ऽर्थे क्यङ् प्रत्ययान्ताच्छानच् । तत स्त्रिया टाप्]

पत्रम् पक्ष १९ ८६ [पत्लृ गतौ (भ्वा०) धातो 'दाम्नीशसयुयुज०' अ० ३ २ १८२ सूत्रेण करणे ष्ट्रन्-प्रत्यय]

पत्वभि: गमनै ५ ६ ७ **पत्वा**=पतति गच्छतीति स (अग्नि =विदुषो सुसन्तान) ११ ४६ योऽध पतति स. (अग्नि =सूर्यरूप) २२ १६ [पत्लृ गतौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप्]

पत्सुत:शी: य पादेपु अध शेते स (वृत्र =मेघ) प्र०—अत्र सप्तम्यन्तान् पादशब्दात् 'इतराभ्योऽपि दृश्यन्ते' अ० ५ ३ १४ इति तसिल् 'वाच्छन्दसि' इति विभक्त्यलुक्, शीङ्धातो क्विप् च १ ३२ ८

पथस्पथ: मार्गस्य मार्गस्य ३४ ४२ मार्गान् मार्गान् ६ ४६ ८ [पथ पदस्य वीप्साया द्वित्वम्]

· **पथ:** धर्म-राज-प्रजा-मार्गात् १ ४२ २ मार्गान् २७ १२ उत्तममार्गान् १ ६०.४ **पथा**=उत्तममार्गेण ११०५ १८ गृहाश्रममार्गेण ५ ४७ ६ **पथाम्**=मार्गाणाम् ९ १४ **पथि**=व्यवहार-मार्ग मे आर्याभि० २ १८, ५ ३३ मार्गे ५ ३३ **पथिभि:**=सुमार्गै ६ ४ ८ ज्ञान-मार्गै, भा०—सर्वधर्म्यमार्गै. ३७ १७ **पन्था:**=देवप्रतिपादितो मार्ग ११०५ १६ मुक्ति का मार्ग आर्याभि० २ ८, ३१ १८ मार्गा, प्र०—अत्र वचनव्यत्ययेनैकवचनम् ३४ २७ धर्ममार्गा, प्र०—अत्र 'सुपा सुलुक्०' इति जस स्थाने सु १ ३५ ११ [पत्लृ गतौ (भ्वा०) धातो: 'पत स्थ च' उ० ४ १२ सूत्रेण इनि प्रत्यय । थकारान्तादेशश्च]

पथिकृत् सकलसुकृन्मार्ग-प्रचारक (बृहस्पति = परमेश्वरो) विद्वज्जनो वा २ २३ ६ य पन्थान करोति (इन्द्र =विद्वज्जन) ६ २१ १२ [पथिन्-उपपदे डुकृञ् करणे (तना०) धातो कर्त्तरि क्विप् । 'ह्रस्वस्य पिति कृति तुग्' इति तुगागम]

पथिरक्षय: ये पथिपु विचरता जनाना रक्षयो रक्षका (भा०—राजजना) १६ ६० [पथिन्-रक्षिपदयो समास । रक्षि=रक्ष पालने (भ्वा०) धातोरौणादिक इन्प्रत्यय]

पथीनाम् मार्गाणाम् ५ १ ११ मार्गे गन्तृणाम्, भा०—गन्तुकानाम् (जनानाम्) २२ ३३ [पथिन्-प्राति० पष्ठ्या बहुवचने रूपम्]

पथेव पथा मार्गेणेव ११३६ ४ [पथिन्-इवपदयो समास । समासे विभक्तेरलुक् च]

पथेष्ठाम् यो धर्मे पथि तिष्ठति तम् (जनम्) ५ ५० ३ [पथोपपदे ष्ठा गति निवृत्तौ (भ्वा०) धातो' कर्त्तरि क्विप् । पथ =पथे गतौ (भ्वा०) धातो पचाद्यच्-प्रत्यय]

पथ्या पथोऽनपेता (स्त्री) ३ ५४ ५ स्वकक्षा विहायाऽन्यत्रागन्त्री (रात्रि) ३ ५५ १५ पथिषु साध्वी (नीति) ७ १८ ३ **पथ्या:**=पथि साध्वीर्वीथी) ३ १२ ७ पथे हिता (वर्षा) ५ ५४ ६ पथि साधव (राय =श्रिय.) ६ १९ ५ पथिपु साध्वीर्गती ६ ६६ ७ या धर्मपन्थानमर्हन्ति ता (प्रजा) ७.७ २ **पथ्याम्**=पथि साध्वी गतिम् ७ ४४ ५ धर्ममार्गम्, ऋ० भू० २०२, ऋ० ८ १ २३ ७. [पथिन्-प्राति० 'धर्मपथ्यर्थन्यायादनपेते' अ० ४ ४ ९२ सूत्रेणानपेतेऽर्थे यत् । तत. स्त्रिया टाप् । अथवा साध्वर्थे हितार्थे वा यत्]

पथ्याय पथि भवाय गन्तुकाय १६ ३७ **पथ्ये**= पथोऽनपैते कर्मणि ५ ५१ १४ [पथिन्-प्राति० भवार्थे यत् । अथवा अनपेतेऽर्थे पथिन्प्राति० यत्]

पथ्येव यथा पथि साध्वी गति, भा०—यथा धर्ममार्ग ११ ५ [पथ्या-इवपदयो समास । पथ्येति व्याख्यातम्]

पत्सु पादेपु ९ ८ **पद:**=प्राप्तव्यान् (चतुर = धर्मार्थकाममोक्षान्) २३ २० पदान् १ १४६ २ **पदा**= पादेन ११३३ २ पदार्थप्राप्त्यो १ ८४ ८ प्रापकेण गमन-रूपेण ११६४ १७ पादाक्रमणेन १ ४२ ४ **पदि**=पद्यते जानाति प्राप्नोति येन व्यवहारेण तस्मिन्, प्र०—अत्र कृतो बहुलम्०' इति करणे क्विप् ४ १६ प्राप्तव्ये विज्ञाने ४ १२ ६ **पद्भ्याम्**=सेवा-निरभिमानाभ्याम् ३१ ११ पृथिवी-कारणसामर्थ्यात् ३१ १३ जो पग अर्थात् नीच अग के सदृश मूर्खत्वादि गुणो से स० प्र० ११४, ३१ ११ [पाद =पद गतौ (दिवा०) 'धातो पदरुजविशस्पृशो घञ्' इति घञ् । पादप्राति० शस्प्रभृतिपु परेपु 'पद्दन्नोमास्०' इत्यादिना पदादेश । पदा=पादेन नि० ५ १८]

पदज्ञा: ये पदानि प्राप्तव्यानि धर्मार्थकाम-मोक्षाख्यानि साधितु साधयितु वा जानन्ति ते (अङ्गिरस =प्राणविद्याविदो जना) १ ६२ २ ये पद प्राप्तव्य जानन्ति ते (पितर =विद्वासो जनका) ३ ५५ २ ये पद ज्ञातव्य प्रापणीयमात्मस्वरूप जानन्ति ते (पितर =ज्ञानिनो जना) ३४ १७ [पदोपपदे ज्ञा अवबोधने (क्र्या०) धातो क. प्रत्यय]

विद ज्ञाने (अदा०) धातोर्वा ल्युट्]

पतेम गच्छेम १८ ५२ [पत्लृ गतौ (भ्वा०) धातोर्लिङ्]

पत्तवे पत्तु प्राप्तुम् ४ १८ १ [पत्लृ गतौ (भ्वा०) धातोस्तुमर्थे तवेन्-प्रत्यय]

पत्तीनाम् सेनाऽङ्गानाम् १६ १६ [पद गतौ (दिवा०) धातो 'पदिप्रथिभ्या नित्' उ० ४ १८३. सूत्रेण नि प्रत्यय]

पत्नी स्त्री १६ ६४ भार्या म० वि० १२१, अथर्व० १४ १ ५१ पत्नीवद्वर्त्तमाना (उषा =प्रभातवेला) ३ ६१ ४ **पत्नीभिः**=स्वस्वस्त्रीभि १५ ५०. **पत्नीभ्यः**=भार्याभ्य २४ ५ पालिकाभ्य. क्रियाभ्य २४ ६ स्त्रीभ्य. २४ २४ **पत्नीम्**=स्त्रीवद् वर्त्तमानाम् (मही=भूमिम्) २१ ५ **पत्नीः**=यज्ञसम्बन्धिनी स्त्रिय १ १४० ६ द्रव्याणा शक्तय, प्र०—पत्युर्नो यज्ञसयोगे, अ० ४ १ ३३. अनेन ङीप् प्रत्ययो नकारादेशश्च। इय वै पृथिव्यदिति सेय देवाना पत्नी श० ५ २ ५ ४ 'देवाना पत्न्य उशत्योऽवन्तु न प्रावन्तु न स्तुतयेऽपत्यजननाय चाऽन्न ससननाय च या पार्थिवासो या अपामपि व्रते कर्मणि ता नो देव्य सुहवा शर्म यच्छन्तु शरणम्। अपि च ग्ना व्यन्तु देवपत्न्य इन्द्राणीन्द्रस्य पत्न्य ग्नाय्यग्ने पत्न्यश्विन्यश्विनो पत्नी राड्राजते रोदसी रुद्रस्य पत्नी वरुणानी च वरुणस्य पत्नी व्यन्तु देव्य कामयन्ता च ऋतु कालो जायाना य ऋतुकालो जायानाम् नि० १२ ४६ देवाना विदुषा पालनयोग्याऽन्यादीना स्थित्यर्थेय पृथिवी वर्त्तते तस्माद् देवपत्नीत्युच्यते। यस्मिन् यस्मिन् द्रव्ये या या शक्तय सन्ति तास्तास्तेषा द्रव्याणा पत्न्य इवेत्युच्यन्ते १ २२ ९ स्त्री ११ ६१ भार्या युवतय १ ६२ ११ पत्न्य १ १०३ ७ दारान् १ १८६ ७ **पत्न्यः**=स्त्रिय २३ ३६ **पत्न्या**=युद्धादौ सगमनीये यज्ञे सयुक्तया स्त्रिया १ ८२ ६ **पत्न्यौ**=स्त्रीवद्वर्त्तमाने (अहोरात्रे) ३१ २२ [पतिप्राति० स्त्रियाम् 'पत्युर्नो यज्ञसयोगे' अ० ४ १ ३३ सूत्रेण ङीप् नकारान्तादेशश्च। श्रियै वा एतद्रूप यत् पत्न्य श० १३ २ ६ ७ गार्हपत्यभाजो वै पत्न्य कौ० ३ ६. अर्धो अर्द्धो वा एष आत्मन, यत्पत्नी तै० ३ ३ ५ जघनार्धो वा ऽएष यज्ञस्य यत्पत्नी श० १ ३ १ १२ पूर्वार्धो वै यज्ञस्याध्वर्युर्जघनार्ध पत्नी श० १ ९ २ ३ पत्नी धाय्या गो० उ० ३.३१ पत्नी स्थाली तै० २ १ ३ १ पत्नी भाजन वै नेष्टा ऐ० ६ ३ गो० उ० ४ ५ अन्तभाजो वै पत्न्य कौ० १६ ७ अर्धात्मा वा एष यजमानस्य यत् पत्नी जै० १ ८६ गृहा वै पत्न्यै प्रतिष्ठा श० ३ ३ १ १० पत्नी हि सर्वस्य मित्रम् तै० स० ६ २ ९ २ श्रद्धा पत्नी तै० आ० १० ६ ४ १ यद्वै पत्नी यज्ञे करोति तन् मिथुनम् तै० स० ६ २ १ १]

पत्नीवतः प्रशस्ता पत्नयो विद्यन्ते येषा तानस्मान् (सुगृहस्थान् जनान्) प्र०—अत्र प्रशसार्थे मतुप् १ १४ ७ प्रशस्ता यज्ञसम्बन्धिनी जाया यस्य तस्य (बृहस्पतिसुतस्य=गृहपत्यु पुत्रस्य) ८ ६ **पत्नीवद्भिः**=बहुच. पत्न्यो विद्यन्ते येषु तै (वरुथै=उत्तमैर्गृहे) ४ ५६ ४ **पत्नीवन्**!=प्रशस्ता यज्ञसम्बन्धिनी पत्नी यस्य तत्सम्बुद्धौ। (गृहपते) ८ १० **पत्नीवन्तः**=प्रशस्ता विद्यायुक्ता यज्ञसम्बन्धिन्य स्त्रियो विद्यन्ते येषान्ते (विद्वासो जना) १ ७२ ५ [पत्नीति व्याख्यातम्। तत प्रशसायामर्थे मतुप्]

पत्नीशालम् पत्न्या शाला पत्नीशालम् १६ १८ [पत्नीशाला पदयो समासे 'विभाषा सेनासुरा०' अ० २ ४ २५. सूत्रेण नपुसकत्वे ह्रस्वत्वम्]

पत्नीसंयाजान् ये पत्न्या सह समिज्यन्ते तान् (जनान्) १६ २६ [पत्नी-सयाजपदयो समास। सयाज=सम्+यज देवपूजादिषु (भ्वा०) धातोर्घञ् प्रत्यये कुत्वाभावे रूपम्]

पत्मन् धर्मात् पतनशील (दुराचारिन् पते!) हे चञ्चलचेत (दुराचारिन् पते) ८ ४८ पतन्ति यस्मिन् मार्गे तस्मिन् ५ ५ ७ पतन्ति गच्छन्ति यस्मिन् मार्गे तस्मिन् ६ ४.६ पत्मनि मार्गे ५ ४१ ३ [पत्लृ गतौ (भ्वा०) धातोर्बाहु० औणादिको मनिन्]

पत्मना उद्गमनेन ६ ३.७ [पत्मन् इति व्याख्यातम्]

पत्यते पतिं कुर्वते (विदुषे जनाय) २ ३७ २ [पतिपदाद् इच्छायामर्थे क्यजन्ताच् छतृप्रत्यय]

पत्यते पतिरिवाचरति ३ ५४ ८ **पत्यसे**=पतिभावमाचरसि २ १ ८ [पतिपदादाचारे 'उपमानादाचारे' सूत्रेण क्यङ्]

पत्यते प्राप्यते १ ८४ ९ प्राप्नोति ३ ३६ ४ **पत्येते**=श्रेष्ठे प्राप्येते ८ ५९ [पत्लृ गतौ (भ्वा०) धातो कर्मणि लट्]

पत्यमानम् गम्यमानम् (पतिम्) ६ ६६ १ **पत्यमान**·=ऐश्वर्यमिच्छन् (कवि=विद्वज्जन) ६ ४९ ४ पति स्वामीवाचरन् (इन्द्र=परमैश्वर्यो राजा) ३ ५४ १५ प्राप्नुवन् (विद्वज्जन) ३३ ५५ **पत्यमानाः**=स्वामित्व कुर्वाणा (विद्वज्जना) २७ १६ पतिरिवाचरन्त (सैनिका वीरपुरुषा) ६ २७ ६ [पत्लृ गतौ (भ्वा०) धातो कर्मणि शानच्। अथवा पति-पदादाचारे 'उपमानादाचारे' सूत्रेण क्यङ्। तत शानच्]

प्राप्तव्येन (रपसा=पापाचरणेन) ७.५०.३ [पद गतौ (दिवा०) धातोरर्हेऽर्थे यत्]

पद्वत् पद्भ्यां तुल्यम् ३.३९.६ [पादप्राति० तुल्यार्थे वति प्रत्यय । पादस्य पदादेश]

पद्वतीनाम् प्रशस्ता पादा विभागा विद्यन्ते यासा तासाम् (विद्यानाम्) १.१५२.३ **पद्वतीभ्यः**=पद्भ्या कृताभ्यो गतिभ्य ६.५९.६ वहव पादा यासु प्रजासु ताभ्य सुप्ताभ्य प्रजाभ्य ३.३.६३ **पद्वतीम्**=पादा इव प्रशस्तानि चक्राणि विद्यन्ते यस्या ताम् (नावम्) १.१४०.१२ [पादप्राति० प्रशसाया मतुबन्तान् ङीप् । पादस्य पदादेश]

पद्वते पादौ विद्येते यस्य तस्मै (पक्षिणे) १.१४०.६ **पद्वन्तम्**=वहव पादा विद्यन्ते यस्मिँस्तम् (गर्भम्=कार्य-जगत्) १.१८५.२ [पादप्राति० भूम्न्यर्थे मतुप् पादस्य पदादेशश्च]

पनन्त स्तुवन्ति २.४.५ प्रशसेयु ३.३.२८ **पनय**=देहि १.९.६४ व्यवहारेण प्रापय ५.२०.१. [पन व्यवहारे स्तुतौ च (भ्वा०) धातोर्लङ् अडभाव । अन्यत्र लोट्]

पनयत् प्रशसेत् ४.३३.५ **पनयन्त**=पन व्यवहार कुर्वन्ति, प्र०—अत्र 'वहुल छन्दस्यमाङ्योगेऽपि' इत्यड-भाव । अत्र 'तत्करोति तदाचष्टे' इति णिजपि १.८७.३ प्रशसत ३.६.७ स्तुवन्ति व्यवहरन्ति वा. ७.१.१०. **पनयन्ति**=स्तावयन्ति ६.४.३ पनायन्ति प्रशसन्ति प्र०—अत्र 'वाच्छन्दसि' इति ह्रस्व ३.३४.६ व्यवहरन्ति स्तुवन्ति वा ४.३८.९ [पन व्यवहारे स्तुतौ च (भ्वा०) धातोरच्-प्रत्यये पन । पनप्राति० 'तत्करोति तदाचष्टे' इति णिजन्ताल् लङ् । अन्यत्र लट्]

पनस्यते य पनायति व्यवहरति स पना इवाचरति १.५५.२ व्यवहरति ३.५१.३ स्तूयते ३.३.३९ [पनम् प्राति० आचारेऽर्थे 'उपमानादाचारे' इति क्यङ् । पनम्=पन व्यवहारे स्तुतौ च (भ्वा०) धातोर्बाहु० असुन्]

पनस्युम् पनायति व्यवहरति येन तदात्मन इच्छुम् (मारुत गणम्) प्र०—अत्र 'क्याच्छन्दसि' इत्यु प्रत्यय १.३८.१५ आत्मन पन स्तवनमिच्छुम् (कृतब्रह्मचर्य पतिम्) ५.५९.९ [पनस्-प्राति० आत्मन इच्छायामर्थे क्यच् । तत 'क्याच्छन्दसि' सूत्रेण उ प्रत्यय]

पनायत व्यवहरत स्तुत वा ६.७५.६ [पन व्यवहारे स्तुतौ च (भ्वा०) धातो 'गुपूधूप०' इति आयप्रत्ययान्ताल् लोट् । पनायत=पूजयत नि० ६.१६]

पनाय्यम् प्रशसनीयम् (अन्तरिक्षम्=आकाशम्) ६.६९.५ स्तोतुमर्हम् (ओज.=पराक्रमम्) १.१६०.५ [पन व्यवहारे स्तुतौ च (भ्वा०) धातो 'गुपूधूप०' इति आय प्रत्यय । तत 'सनाद्यन्ता धातव ' इति धातुसज्ञाया यत्प्रत्यय]

पनितः! प्रशसित (विद्वज्जन) ५.४१.९ **पनि-तारम्**=स्तावक धर्म्येण व्यवहर्त्तारम् (देव=विद्वाम जनम्) ५.४१.९ **पनितारः**=स्तोतारो व्यवहर्त्तारो वा (सज्जना) ३.५७.१ (पन व्यवहारे स्तुतौ च (भ्वा०) धातो कर्त्तरि तृच्]

पनिष्ट पन्यते स्तूयते ७.४५.२ [पन व्यवहारे स्तुतौ च (भ्वा०) धातोर्लुङ् । अडभावश्छान्दस]

पनिष्ठम् स्तोतुमर्हम् (विद्युद्रूपमग्निम्) ३.१.१३ **पनिष्ठः**=अतिशयेन प्रशसित (राजा प्रजाजनो वा) ६.५९.२ [पनितृप्राति० अतिशायनेऽर्थे 'तुश्छन्दसि' अ० ५.३.५९ सूत्रेण इष्ठन् । 'तुरिष्ठेमेयस्सु' इति तृचो लोप । पनितृ=पन व्यवहारे स्तुतौ च धातो कर्त्तरि तृच्]

पनीयसी अतीव प्रशसनीया (समित्) ५.६.४ अति-शयेन स्तोतुमर्हा व्यवहारसाधिका (तविषी=सेना) १.३९.२ अत्यन्त-प्रशसनीया (सेना) ऋ० भू० १५१, ऋ० १.३.१८.२ उत्तम-सेना आर्याभि० १.२२, ऋ० १.३.१८.२ [पनितृप्राति० अतिशायने 'तुश्छन्दसि' सूत्रेण ईयसुन् । तत 'तुरिष्ठेमेयस्सु' इति तृचो लोप । स्त्रिया ङीप्]

पनीयसे यथायोग्य व्यवहार कुर्वते स्तोतुमर्हाय (सभाध्यक्षाय) १.५७.३ [पनितृप्राति० अतिशायने ईयसुन्-प्रत्यये तृचोलोपे चतुर्थ्या एकवचनम्]

पन्थाम् धर्म्यं मार्गं, पन्थानम्, प्र०—अत्र वर्ण-व्यत्ययेन नस्य स्थानेऽकारादेश १.१२७.६ पन्थानम् प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति नलोप १.११३.१६. न्यायमार्गम् ८.२३ [पथिन्प्राति० द्वितीयैकवचनम् । नलोपश्छान्दस]

पन्थासः मार्गा १.१००.३ [पथिन्प्राति० जसि रूपम् । वर्णव्यत्ययेन नकारस्य सकारादेश । पन्था पततेर्वा पद्यतेर्वा पन्थतेर्वा नि० २.२८]

पन्यतमाय अतिशयेन प्रशंसिताय (मित्राय=आप्ताय विदुषे) ३.५९.५ [पन व्यवहारे स्तुतौ च (भ्वा०) धातो-र्यत् प्रत्ययान्तादतिशायने तमप्]

पन्यसा शुद्धेन व्यवहारेण ६.१८.९ [पन व्यवहारे

पदपङ्क्तिः अथ लोक १५४

पदम् पद्यते गम्यते यत्तत् (परमाण्वादिरूपम्) प्र०—अत्र 'घञर्थे क-विधानम्०' इति क प्रत्यय ५ १५ प्राप्तव्य स्थानम् ३ ५ ५ यत् पद्यते प्राप्यते तत् (जगत्) १ २२.१७ अन्वेष्य ज्ञातव्य प्राप्तव्य वा (मोक्षाख्यम्) १ २२ २०. प्रापणीयम् (जगदीश्वरम्) १ २२ २१ वेदितव्यम् (प्राण्यादिक जगत्) १ १६४ २३ प्राप्तुमर्हम् (स्थानम्) ६ ५ पत्तु योग्यम् (स्थानम्) ६ ३ पदनीयम् (स्थानम्) १ १४६ ४ पद्यते प्राप्नोऽस्ति चराचर जगत्तम् (सवितार=जगदीश्वरम्) १ २२ ५ विचारमय शिल्पव्यवहारम् १ १०५ १. पदनीय सर्वोत्तमोपायमंनुष्यैं प्रापणीय मोक्षाख्यम् ऋ० भू० ४३, ऋ० १ २७ ५. पाद-चिह्नम् ४ ५ ३ पदनीय अर्थात् जानने के योग्य उस पद को कि जिसको प्राप्त होके पूर्णानन्द मे रहने हैं, वहा से फिर शीघ्र दु ख मे नही गिरते आर्याभि० १ २१ १ २ ७ २० पदनीय गन्तव्यमार्गम् १ २५ ७ ऋ० **पदानि**=ज्ञातु प्रापयितु वा योग्यानि कारण-सूक्ष्म-स्थूलरूपाणि (जगन्ति) ३४ ४३ प्राप्तुमर्हाणि (लोकान्) १ १५४ ४ वेदितुं (योग्यानि चत्वारि नामाख्यातोपसर्गाख्यानि) १ १६४ ४५ ज्ञातुमर्हाणि (त्रीणि=उत्पत्तिस्थितिप्रलया काला वा) ३२ ९ पत्तु प्राप्तु ज्ञातु योग्यानि (शास्त्राणि) १ १६४ ५ व्याप्तव्यानि (ज्ञानानि) १ ६७ ३ जगत् की उत्पत्ति, स्थिति और प्रलय करने के सामर्थ्य आर्याभि० २ २४, ३२ ९ **पदाय**=प्राप्तव्याय (ईश्वराय) ७ ४१.६ प्रापणीयाय (व्यवहाराय) ३४ ३९ **पदे**=तले स्थाने २ १० १ सर्वत्र प्राप्तेऽन्तरिक्षे १ २२ १४. प्रापणीये (मोक्षे) ५ ४३ १४ प्राप्ते (स्थाने) ३ २९ ४ प्रतिष्ठायाम्, भा०—अविकारे ३४ १५ प्रापणे १ १४९ १ गन्तव्ये मार्गे १ ४६ ९ सृष्टि मे स० प्र० ४२३, ९ ८३ २. प्राप्तव्ये गुणसमूहे १ ७२ ४ **पदेन**=प्राप्तव्येन विज्ञानेन १ १३९ ९ **पदेषु**=प्राप्तु योग्येषु नामस्थानजन्माख्येषु २३ ५० **पदैः**=विभक्त्यन्तै. (शब्दै) १९ २५ प्रत्यक्षेण प्राप्तैर्गुणनियमै १ ६५ १ [पद गतौ (दिवा०) धातोर् 'घञर्थे कविधानम्' इति क प्रत्यय । आत्मा वै पदम् कौ० २३ ६ पाद पद्यते । तन्निधानात्पदम् । पशुपादप्रकृति प्रभागपादसामान्याद् इतराणि पदानि नि० २ ८ पशव पदम् मै० ३ ७ ७]

पदवीः य पदानि व्येति प्राप्नोति स (जगदीश्वर) ३ ५६ ४ य पद व्येति स (इन=ईश्वर) ७ ३६ २. य प्राप्तव्यानि पदानि व्येति व्याप्नोति स (विप्र=मेधाविजन) ३ ५ १ प्रतिष्ठा ३ ३१ ८ **पदव्यः**=सुख प्राप्ना (जीवा) १ ७२ २ [पदोपपदे वी गतिकान्त्यादिषु (अदा०) धातो क्विप् । पदवी=पद वेत्ति नि० १३ ७२]

पदा प्राप्तुमर्हाणि (साङ्गोपाङ्गाँश्चतुरो वेदान् त्रीन् क्रियाकौशल-विज्ञानपुरुपार्थान्) १ ७२ ६. पदानि वेद्यानि प्राप्तव्यानि वा (धामानि), प्र०—अत्र 'शेश्छन्दसि बहुलम्' इति लोप १ २२ १८ प्राप्ति-साधकान् मुहूर्त्तान् ३३ ९३ ज्ञातु प्रापयितु वा योग्यानि कारणसूक्ष्मस्थूलरूपाणि ३४ ४३ [पद गतौ (दिवा०) धातोर्घञर्थे क । पदप्राति० छन्दसि शेर्लोप]

पदिम् पद्यते गम्यते या श्रीस्ताम् १ १२५.२ [पद गतौ (दिवा०) धातो 'इक् कृष्यादिभ्य' वा० सूत्रेण इक्-प्रत्यय]

पदीष्ट पत्सीष्ट प्राप्नुयात्, प्र०—अत्र 'छन्दस्युभयथा इति सार्वधातुकाश्रयणात् सलोप १ ३८ ६ पद्यते प्र०—अत्र 'लिङ सलोपोऽन०' इति सकारलोप 'अन्येषामपि०' इति दीर्घ १ ७९ ११ [पद गतौ (दिवा०) धातोर्लिङ्]

पदे इव यथा पादौ तथा (रात्रिदिने) ३ ५५ १५ [पदे-इवपदयो समास]

पदेभिः ज्ञातुमर्हैं (स्थूलसूक्ष्मातिसूक्ष्मैरवयवैं) १ १५४ ३ [पद-गतौ (दिवा०) धातो 'घञर्थे कविधानम्' इति क । छन्दसि भिस ऐस् न भवति]

पदे-पदे- प्राप्तव्ये प्राप्तव्ये, वेदितव्ये वेदितव्ये, गन्तव्ये गन्तव्ये वा पदार्थे ५ ४१ १५ [पदे पदस्य वीप्साया द्वित्वम्]

पदेव पद्यन्ते यैस्तानि पदानि चरणानीव (व्रतानि=सत्याचरणरूपाणि कर्माणि) ५ ६७ ३ [पदा-इवपदयो समास । पदा=पदप्राति० शेर्लोप]

पदेव पद्भ्यामिव ४.३१ ५ [पदा-इवपदयो समास. । पदा=पाद-प्राति० तृतीयैकवचने पदादेश]

पद्यते प्राप्नोति ६ ५४ ३ अवगच्छति ४ १३.५ **पद्यस्व**=प्राप्नुहि १७.४५ **पद्ये**=प्राप्नोमि ३ ४३ प्राप्नुयाम् ३६ १ [पद गतौ (दिवा०) धातोर्लट् । अन्यत्र लोट्]

पद्या पादेषु अशेषु भवा (रात्रि) ३ ५५ १४ **पद्याभिः**=पत्तु गन्तु योग्याभिर्गतिभि. २ ३१ २ प्रापणीयाभि क्रियाभि २ ३२.३. [पादप्राति० भवार्थे यत्प्रत्यये 'पद् यत्यतदर्थे' अ० ६ ३ ५३ सूत्रेण पदादेश । पद गतौ (दिवा०) धातोर्वा 'अर्हे कृत्यतृचश्च' इति यत्]

पद्येन प्राप्तु योग्येन (रपसा=पापेन) ७ ५० १

पप्रथुः व्याप्नुत, प्र०—अत्र पुरुषव्यत्यय. ६ ७२.३ **पप्रथे**=भा०—विस्तीर्णा भवति ३३ ८३. प्रथते ३ ६१ ४ प्रथयति विस्तृणाति ६.७.७ प्रथताम् ३ ३० १६. प्रख्यापयति ५ ८७ ७ **पप्राथ**=प्राति पूरयति ६ १७ ७ [प्रथ प्रख्याने (भ्वा०) धातोर्लिट्]

पप्रा स्वविद्यापूर्ण (विद्वान् मनुष्य), प्र०—अत्र 'आद्दगम०' इति कि 'सुपा सुलुक्०' इति सोऽर्डादेशश्च १ ६६ १ [प्रा पूरणे (अदा०) धातो. कि प्रत्ययो लिड्वच्च। पप्रिप्राति० सु स्थाने छान्दसो डादेश]

पप्रिणा परिपूर्णेन (विदुषा जनेन) २ २३ १०. **पप्रिम्**=पूर्णबलविद्य पालक वा (राजा सेनापतिर्वा) ३४ २० पालनशीलम् (सेनाद्यध्यक्षम्) १ ६१ २१ **पप्रिः**= पूरक (वव्र=कूप इव मेघ) १ ५२ ३ पूरयन् (द्यौ=सूर्य) ६ ५० १३ [प्रा पूरणे (अदा०) धातो 'आद्दगमहन०' इति सूत्रेण कि प्रत्ययो लिड्वच्च]

पप्रितमम् प्राति प्रपूरयति सर्वाभिर्विद्याभिरानन्दैश्च जनान् स्वव्याप्त्या जगद्वा मूर्त्त वस्तु शिल्पविद्यासाध्याऽङ्गानि च य सोऽतिशयितस्तम्, भा०—पूर्णविद्याप्रदातारम् (ईश्वर भौतिक वा) १ ८ [प्रा पूरणे (अदा०) धातो 'आद्दगमहन०' इति सूत्रेण कि प्रत्ययो लिड्वच्च। पप्रिप्राति० अतिशायने तमप्]

पप्रौ प्रपूर्त्ति १ ८१ ५ प्राति ३ ३० ११. व्याप्नोति ३ ५४ १५ [प्रा पूरणे (अदा०) धातो सामान्ये लिट्]

पयते गच्छति १ १६४.२८. [पयते प्रप्यायते नि० ११४२]

पयसः दुग्धस्य जलस्य वा १६ २३ उदकस्य दुग्धस्य वा ३८ २८ **पयसा**=पयन्ते विजानन्ति सर्वान् पदार्थान् येन ज्ञानेन तेन भा०—विज्ञानेन २ २४ जनेन प्र०—पय इत्युदकनाम निघ० १ १२, ३ ३३ १ अन्नादिना १७ ७४ दुग्धेन १६ ६५ दुग्धदानेन ५ ४३ १ जलेन दुग्धेन वा १२ ७० जलवर्षणेन २८ ३६ रसविशेषेण ६ ६१ १४. रात्र्या, प्र०—पय इति रात्रिनामसु पठितम् निघ० १ ७, ८ १६ जलेनान्नेन वा, प्र०—पय इत्यन्ननाम, निघ० २ ६, ८ १४ शब्दार्थसम्बन्धरसेन २० ४३ जलेनेव १३ ४१. दुग्धेनेव जलेन ३ ५५ १३ **पयः**=दुग्धमुदकमन्न वा प्र०—पय इत्युदकनाम निघ० १ १२ अन्ननाम च निघ० २ ७, ६ ५२ १० रसादिकम् १ २२ १४ रसवत् (इन्द्रिय=धनम्) १६ ७६ सुखकारक रसम् १ २३ १६ रसनिमित्तम् (सूर्य) ४ ३ रसयुक्त जलम् १७ १ सुरसम् १६ ७६ सुखप्रदम् (इन्द्रिय=विज्ञानसाधनम्) १६ ७७ उत्तम अन्न दूध स० वि० १४५, अथर्व० १२.५ १०. सर्वौषधिरसः २१ ३५ पातुमर्हम् (रस=सारभूतम्) १६ ७५ सर्वपदार्थसार-विज्ञानयुक्तम् ऋ० भू० ३०६, १६ ७५ भा०—उत्तमाऽन्न रसश्च १८ ३६. **पयांसि**=जलान्यन्नानि वा १ ६१.१८ जलानि दुग्धानि वा १२.११३ **पयोभिः**= जलै. १ १६४.२८. उदकै. ४.२१.८ [पीयते तत् पय इति विग्रहे पा पाने (भ्वा०) धातोर्बाहु० औणादिकोऽसुन्। बहुलवचनाद् धातोरीत्वे गुणेऽयादेशे च रूपम्। पय. रात्रिनाम निघ० १ ७ पय· ज्वलतो नाम निघ० १ १७ पय उदकनाम निघ० १ १२ पय अन्ननाम निघ० २ ७. पय पिबतेर्वा प्यायतेर्वा नि० २ ५. पय.—यत्पयस्तत्रेत गो० उ० २ २६ क्षत्र वै पय श० १२ ७ ३ ८. (यज्ञस्य) प्राण पय श० ६ ५.४ १५ रसो वै पय श० ४.४.४ ८ आपो हि पय कौ० ५ ४ अपामेप ओपधीना रसो यत्पय श० १२ ८. २ १३. पयो वा ओषधय तै० ३ ७ १ ५ सोम. पय श० १२ ७ ३ १३ आपो हि पय कौ० ५ ४ गो० २ १ २२ एतत् सोमस्य (तेज) यत् पय तै० स० २ ५ २ ७ ऐन्द्र पय तै० स० ६ २ ५ ३ गो० २ १ २२ द्वादश वै पयासि मै० ४ ४ ८ पयो वै पुरुष तै० स० २.५ ५ १ पयो हि रेत श० ६ ५ १ ५६ परम वा एतत्पयो यदजक्षीरम् तै० स० ५ १ ७ ४ पशूना वा एतत् पयो यद् व्रीहियवौ मै० १ ८ २ प्राण पय. श० ६ ५.४ १५ कौ० १० ६. वायुर्वै पयस प्रदाता काठ० ३५.१७]

पयस्पाः पयस उदकस्य पातार (विद्युदादय) १ १८१ २ [पयस् इति व्याख्यातम्। तदुपपदे पा पाने (भ्वा०) धातो कर्त्तरि क प्रत्यय.]

पयस्या पयसि जले कुशलौ (विद्वासौ जनौ) २६ ६० [पयस्प्राति० कुशलार्थे यत्। 'सुपा सुलुग्' इत्याकारादेश। योषा पयस्या रेतो वाजिनम् श० २ ४ ४ २१. पयो वै पयस्या काठ० १२ १ मित्रावरुणयो पयस्येति, प्राणापानौ वै मित्रावरुणौ मै० ३ १० ६]

पयस्वती पय प्रशस्तो रसो विद्यतेऽस्या सा रसवती (पृथिवी), प्र०—अत्र प्रशसार्थे मतुप् 'पयस्वती रसवती' शत० १.२ ५ ११, १ २७. बहूदकयुक्ता (भूमि) ४ ५७ ७. प्रशस्तानि पयास्यन्नानि उदकानि वा यस्या सा (पत्नी) ८ ४२ जल, दूध रसादि से परिपूर्ण (शाला) स० वि० १६७, अथर्व० ६ २ ३ १६ **पयस्वतीः**=पयो बहुरसो विद्यते यासु ता (प्रदिश=प्रकृष्टा दिश) १८ ३६ [पयस् इति व्याख्यातम्। तत प्रशसाया भूम्न्यर्थे वा मतुप्। तत

स्तुतौ च (भ्वा०) धातोरौणादिकोऽसुन् । अकारस्य यकारश्छान्दस]

पन्यसीम् प्रशंसनीयाम् (धीतिं धियम्) ६ ३८ १ [पनप्राति० अतिशायने ईयसुन् । तत स्त्रिया ङीप् । पन =पन व्यवहारे स्तुतौ च (भ्वा०) धातो घञर्थे क. प्रत्यय]

पन्यः स्तुत्य (इन्द्र =ऐश्वर्यमिच्छुजन) ३ ३६ ३. [पन व्यवहारे स्तुतौ च (भ्वा०) धातोर्ण्यत् । छान्दसो ह्रस्व]

पन्वा स्तुत्येन कर्मणा १ ६५ २ [पन व्यवहारे स्तुतौ च (भ्वा०) धातोर्वाहु० औणादिको वन्प्रत्यय]

पपथुः पिवतम् १ ४७ १० **पपिरे**=पिबन्ति २ २४ ४ (पा पाने (भ्वा०) धातोर्लिट् । अन्यत्र व्यत्ययेनात्मने पदम्]

पपानः पालयन् (राजा) ६ ४४ ७ पा रक्षणे (अदा०) धातोर्लिट स्थाने कानच्]

पपिवान् रसान् पीतवान् (वीरजन) १ ६१ ७ पाता (राजजन.) २ ११ १० पानकर सूर्य ५ २९ ३ य पिबति स (इन्द्र =सूर्य) ५ ३० ११ **पपिवांसम्**=रक्षकम् (राजानम्) ५ २९ २ पिबन्तम् (इन्द्र=राजादिक शूरवीरम्) ६ ४७ १ पीतवन्तम् (ऋषिम्=वेदमन्त्रार्थवेत्तारम्) ३ ४३ ५ **पपिवासः**=पीतवन्त (गृहस्था) ८ १९ [पा पाने (भ्वा०) पा रक्षणे (अदा०) धातोर्वा लिट स्थाने क्वसु । पपिवास =पीतवन्त । नि० १२ ४२]

पपिवांसा पीतवन्तौ (इन्द्राग्नी=धनाढ्य-युद्धविद्याप्रवीणौ) १ १०८ १३ [पा पाने (भ्वा०) धातोर्लिट. स्थाने क्वसु । 'सुपा सुलुग्०' इत्याकारादेश]

पपिः पाता (राजा) ६ २३ ४ [पा रक्षणे (अदा०) धातो 'आदृगमहन०' अ० ३ २ १७१ सूत्रेण कि प्रत्यय । लिड्वद्भावाच्च द्वित्वम्]

पपीयात् वर्धेत ६ ३७ २ [ओप्यायी वृद्धौ (भ्वा०) धातोर्यङ्लुगन्ताल् लिङ् । धातो स्थाने पी-आदेशे छान्दस रूपम्]

पपुरि पालक पुष्टिकरम् (श्रव =अन्न श्रवण वा) ६ ४६ ५ **पपुरिम्**=पुष्टम् (पुत्रम्) १ १२५ ४ पालकम् (विद्यार्थिन राजजन वा) ४ २३ ३ **पपुरिः**=प्रपूरको विद्वान् १ १६ ४ (पृ पालनपूरणयो (जु०) धातो 'आदृगमहन०' इति सूत्रेण कि प्रत्ययो लिड्वच्च । 'उदोष्ठ्यपूर्वस्य' इत्युत्वम् । पिपर्त्ति पपुरिति पृणाति निगमौ वा प्रीणाति-निगमौ वा नि० ४ २४.]

पपृक्षे सम्बध्नाति ४ ४३ ७ सम्बध्नातु ४ ४४.७ **पपृचासि**=सम्बध्नाति, प्र०—अत्र व्यत्ययेन मध्यमपुरुष १ १४१.११ **पपृच्यात्**=सयुज्येत ४ २४ ५ [पृची सम्पर्चने (अदा०) पृची सपर्के (रुधा०) धातोर्वा लिट् । अन्यत्र यङ्लुगन्ताल् लट् । अपरत्र च लिङ्-विकरणव्यत्ययेन श्लु । पपृक्षा अर्चतिकर्मा निघ० ३ १४]

पपृक्षेण्यम् प्रष्टु योग्यम् (ओज) ५.३३ ६. [पृची सम्पर्के (रुधा०) धातोर्यङ्लुगन्तात् कृत्यार्थे केन्य प्रत्यय सुडागमश्च छान्दस]

पपृचानासः सम्पर्क कुर्वाणा (जना) १ १४१ ६ [पृची सम्पर्के (रुधा०) धातोर्लिट कानच् । जसोऽसुक् च]

पपौ पिबति २५ ३८ [पा पाने (भ्वा०) धातोर्लिट्]

पप्तत उत्पतत १ ८८ १ **पप्तन्**=पतन्ति ६.६३ ६ पतेयु २ ३१ १ **पप्तः**=पततु, प्र०—अत्र लोडर्थे लुङ् १ २६ **पप्तुः**=प्राप्नुवन्ति ५ ५९ ७ पतन्ति २ २८.४ [पत्लृ गतौ (भ्वा०) धातोर्लुङ् । लृदित्वादङि 'पत पुम्' इति पुम् । अडभाव । पप्तता=अपतत नि० ११ १४]

पप्तिवांसः पतनशीला (वय) १ ४८ ६ (पत्लृ गतौ (भ्वा०) धातोर्लिट क्वसु । धातोरुपधालोपश्छान्दस]

पप्ने व्यवहारे ६ ६० ४ [पन व्यवहारे स्तुतौ च (भ्वा०) धातोश्छान्दस रूपम्]

पप्रथत् विस्तारयति २ १५ २ प्रथयति ७ ४२ ६ स्वतेजो विस्तार्य स्वेन तेजसा सर्व जगत् प्रकाशयति १ १०३ २ प्रख्यापयति २ २५ २ **पप्रथः**=प्रख्यापय ३ ३० २०. प्रख्यातो भव ३ ५० ४ **पप्रथन्**=विस्तारयेयु २ ११ ८ [प्रथ प्रख्याने (चुरा०) धातोर्लुङ् । अडभाव । 'अत् स्मृदृत्वर०' इति सूत्रेणाभ्यासस्याकारादेश]

पप्रथानः प्रख्यातविद्य (विद्वान् जन) ५ १५ ४ **पप्रथानाः**=प्रख्याता (कवय =मेधाविनो जना) ३ ५४ १० विस्तीर्णविद्यासौन्दर्यादिगुणा (देवी =विदुष्य) ४ ५१ ८ [प्रथ प्रख्याने (भ्वा०) धातोर्लिट कानच्]

पप्रथाना विस्तीर्णानि (अर्णांसि=उदकानि) ७ १८ ५ [प्रथ प्रख्याने (भ्वा०) धातोर्लिट कानच् । तत शेर्लोप]

पप्रथानेभिः भृश विस्तृत (गुणै) ४ ५६ १ [प्रथ प्रख्याने (भ्वा०) धातोर्लिट कानच् । ततो भिस ऐसादेशो न भवति]

परशुम् कुठारम् ३ ५३ २२ [परान् शत्रून् शृणाति हिनस्ति येनेति विग्रहे परोपपदे शृ हिंसायाम् (क्र्या०) धातो 'आङ्परयो खनिशृभ्या डिच्च' उ० १ ३३ सूत्रेण कु प्रत्यय । परशु वज्रनाम निघ० २ २०]

परश्वेव यथा परशुना १ १३०.४ [परश्वा-इवपदयो समास । वज्रो वै परशु श० ३ ६ ४ १०]

परस्तात् परस्मिन् देशे ३ ५५ ६ उत्तरस्मात् (समात्) ८ ६ परा, भा०—उपरिस्था (जलानि वायवो वा) १२ ४६ परस्मिन् वर्त्तमान भा०—दूरे वर्त्तमानम् (ब्रह्म) ३१ १८ पृथग् वर्त्तमानम् (परमात्मानम्) ऋ० भू० १३३, रहितम् (परमात्मा को) आर्याभि० २.८, ३१ १८ परशब्दात् 'विभाषा परावराभ्याम्' अ० ५ ३ २९ सूत्रेण सप्तम्यन्तादस्ताति प्रत्यय]

परस्पा यौ परान् पातो रक्षतस्तौ (राजाना=राजाऽमात्यौ) ५ ६२ ५ [परोपपदे पा रक्षणे (अदा०) धातो कर्त्तरि क । 'सुपा सुलुग्०' इत्याकारादेश । पूर्वपदस्य सुगागम]

परस्पाय येन परानन्यान् पाति तस्मै (साधनप्राप्तये) ३८ १९ (परस्प इति व्याख्यातम् । ततश्चतुर्थी]

परस्पाः पारयिता रक्षकश्च (अग्नि =पावकवद् विद्वज्जन) २ ९ २ [परोपपदे पा रक्षणे (अदा०) धातो. क्विप् कर्त्तरि । पूर्वपदस्य सुगागमश्छान्दस]

परस्याः शत्रूणा सेनाया उपरि १८ ७१ प्रकृष्टाया कन्याया ११ ७१ [परप्राति० षष्ठ्या एकवचनम्]

परस्वतः मृगविशेषान् २४ २८

परा ऊर्ध्वाऽर्थे प्र०—प्रपरेत्यस्य प्रातिलोम्य प्राहु नि० १० ३, ३ ४९ उपरिभावे १ २५ ४ दूरार्थे ५ ६१ ४ पृथक् १ १ ४ प्रकृष्टार्थे १ २५ १६ दूरीकरणे १ ३३ ५ पश्चादर्थे ६ २० ११ पराजयार्थे, ६ ६९ ८ पराङ्मुख ६.७५ १६]

पराकात् दूरदेशात् १.३० २१ [पराके दूरनाम निघ० ३ २६]

पराके दूरे ३५ २० पराक इति दूर-नाम निघ० ३ २६, १ १२९ ६ [पराके दूरनाम निघ० ३ २६ पराके= पराक्रान्ते नि० ५ ६]

परागात् परागच्छति १ १६४ १७ **परागाः**=दूर गच्छे ३ ५३ २ [परा+इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङि' इति गादेश । 'गातिस्था०' इति सिचो लोप]

पराचरन्तम् प्राप्नुवन्तम् (गोपा=जगदीश्वरम्) ३७.१७ [परा+चर गतौ (भ्वा०) धातो शतृप्रत्यय]

पराचः पराङ्मुखान् (शत्रून्) ६ ४४ १७ परभागप्राप्तान् (पदार्थान्) १ १६४ १९ पराग्भूतान् दूरस्थान् (शत्रून्) ३ ३० ६. **पराचैः**=धर्मात् पराङ्मुखै (शत्रुजनै) प्र०—अत्र 'बहुल छन्दसि' इति भिस ऐस्भाव १ २४.९ बाह्यचिह्नै १ १०५ १. **पराञ्चः**=परत्वेन व्यपदिष्टा (पदार्था) १ १६४.१९ [परा+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृग्०' इत्यादिना क्विन् । पराचै दूरनाम निघ० ३ २६]

पराचीना पराचीनानि दूरीभूतानि (मुखा=मुखानि) १६.५३ [पराच्प्राति० स्वार्थे 'विभाषाञ्चेरदिक् स्त्रियाम्' अ० ५ ४ ८ सूत्रेण ख । खस्येनादेश । पराच्=परा+ अञ्चु गतिपूजनयो (भ्वा०) धातो क्विन्]

पराचीः या परागञ्चन्ति ता (विषजन्यव्याधय) १ १९१ १५ [परा+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृग्०' इति क्विन् । तत स्त्रियाम् 'अञ्चतेश्चोपसख्यानम्' अ० ४ १ ६ वा० सूत्रेण ङीप्]

पराचैः दूरार्थे, प्र०—अत्र बाहुलकात् परोपपदादपि चिधातोर्डैसि प्रत्यय १ ६३.४ [पराचै दूरनाम निघ० ३ २६ पराचै =पराञ्चनैरचित नि० ११ २५]

पराजघ्नुः पराहता विनष्टा भवेयु, अ०—निवृत्ता भवेयु प्र०—अत्र लिङर्थे लिट् १ १३ [परा+हन हिंसागत्यो (अदा०) धातोर्लिट्]

पराजयातै शत्रुओ से पराजित हो स० प्र० १८३, अथर्व० ६ १० ९८ १ **पराजिग्ये**=पराजय को प्राप्त होता हूँ, स० प्र० २३८, १० ४८ ५ पराजितो भवति ६ ६९ ८ [परा+जि जये (भ्वा०) धातोर्लेट् । अन्यत्र लिट् । 'विपराभ्या जे ' इति सूत्रेणात्मनेपदम्]

पराणि उत्तरकालस्थानि (विज्ञानानि) ६ २१ ६ उत्कृष्टानि (प्रियाणि=सुखानि) ३ ३८ १

पराणुदस्व परास्त कर दे आर्याभि० १ २४, ५ ३ २१ २५ प्रेरय ७ ३२ २५ [परा+णुद प्रेरणे (तुदा०) धातोर्लोट्]

पराणुदे दुष्टाना शत्रूणा पराजयाय, ऋ० भू० १५१, ऋ० १ ३ १८ २ शत्रुओ के पराजय करने के लिए स० प्र० १८४, १ ३९ २ परान्नुदन्ति शत्रून् यस्मिन् युद्धे प्र०—अत्र 'कृतो बहुलम्०' इति अधिकरणे क्विप् १ ३९ २ [परा+णुद प्रेरणे (तुदा०) धातोः क्विप्]

स्त्रिया ङीप् । पयस्वती रात्रिनाम निघ० १ ७.]

पयस्वती प्रशस्तजलयुक्ते (उपासानक्ता=रात्रिदिने) २ ३ ६ बहूदकयुक्ते (रोदसी=सूर्यभूमी) ६ ७० २ रात्र्यन्धकारयुक्ते (उषासानक्ता=उषाश्च नक्तश्च ते) २० ४१ [पयस्वतीति व्याख्यातम् । तत प्रथमा द्विवचनस्य पूर्वसवर्णादेश । पयस्वती=उदकवत्यौ नि० ५ २ पयस्वती रात्रिनाम निघ० १ ७.]

पयस्वन्तम् बहुदुग्धादिमन्तम् (करदायम्) ६ ३०. **पयस्वन्तः**=प्रशस्तजल-दुग्धादियुक्ता (मधुश्चुत =खाद्यपदार्था) २१ ४२ **पयस्वान्**=प्रशस्तजलविद्यादियुक्त (जन) २० २२ रसवच्छरीरयुक्तो भूत्वा (जन) १.२३ २३ [पयस् इति व्याख्यातम् । तत प्रशसार्थे मतुप्]

पयोदुहाना अनेकरस-फलादिभि प्राणिन प्रपूरयती (भूमि) ऋ० भू० १३८, ऋ० ८ २ १० १ [पयस्-दुहानापदयो. समास । दुहाना=दुह प्रपूरणे (अदा०) धातो शानच् । तत स्त्रिया टाप्]

पयोधाः ये पयासि स्वगतानि दधति ते (मरुत = वलिष्ठा राजजना) ७ ५६ १६ [पयस् इत्युपपदे डुधाञ् धारणपोषणयो (जु०) धातो कर्त्तरि क प्रत्यय]

पयोवृधः ये पय उदक रात्रिं वा वर्धयन्ति ते (मरुत = वायव) १ ६४ ११ [पयस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

पर पालय ६ ३६ [पॄ पालनपूरणयो (जु०) धातोर्लोट् । 'बहुल छन्दसीति' शप श्लुर्न भवति]

परम् परभागस्थम् (अन्त=सीमानम्) २३ ६१ इष्टम् (असु=प्राणम्) १ १४० ८ शत्रुम् १ २५ विद्याशत्रुम् १ २६ शत्रुभूतम् १ २६ **परस्मात्**=श्रेष्ठात् (रजस =लोकात्) १३ ४४ **परस्य**=श्रेष्ठस्य (सज्जनस्य) ३ १८ २ **परः**=उत्तम (पदार्थ) ८ ३६ प्रकृष्ट (विद्वज्जन) २ ३५ ६ उपरिष्ठो द्वितीय (प्राप्तविद्यासुशिक्षमपत्यम्) ६ ६ ३. सर्वोत्तम (परमेश्वर) १७ २६. उत्कृष्ट (विद्वज्जन) ६ ४८ १६ प्रकृष्टगुण. (मह = महिमा) १ १६ २ अत्यन्तोत्कृष्ट (इन्द्र =सर्वजगद्राज) १ ८ ५ अ०—प्रकृष्टसामर्थ्य (रुद्र =शूरवीर सेनाध्यक्ष) ३ ६१ बडा, श्रेष्ठ (परमेश्वर) आर्याभि० २ १४, ८ ३६ अन्य (मर्त्य =मनुष्य) २० ८२ **पराणि**=उत्तरकालस्थानि (विषयान्) ६ २१.६ **परेषु**=सूक्ष्मेषु (व्रतेषु= सत्यभाषणादिनियमेषु) ३ ५४ ५ **परैः**=उत्तमैश्वर्यव्यवहारै ७ ५

परमम् सर्वोत्कृष्टम् (पद=प्राप्तुमर्ह स्थानम्) ६ ५. सर्वथोत्कृष्टम् (पद=पत्तु योग्य स्थानम्) ६ ३ प्रकृष्ट प्रापणीयम् (पदम्) ४ ५ १२ सर्वोत्तमगुणप्रकाशम् (पद= जगदीश्वरम्) १ २२ २१ अत्युत्तमम् (अन्तरिक्ष=विज्ञानम्) ८ ६ **परमस्य**=श्रेष्ठस्य (राय =धनस्य) ७.६० ११. अत्युत्तमस्य (राय =धनादेर्मध्ये) ४ १२ ३. **परमः**= अतीव श्रेष्ठ (विद्वज्जन) ५ ३० ५ सर्वोत्कृष्ट (परमात्मा) आर्याभि० २ ४०, १७.२६ **परमात्**=उत्कृष्टात् (सधस्थात्=समानस्थानात्) १२ ११५ **परमे**=अत्युत्तमे मोक्षे पदे १ १५४.५ अत्यन्तोत्कृष्टे (सधस्थे=स्थाने) १ १०१ ८ सर्वोत्कृष्टे योगसस्कारजे (जन्मन्=जन्मनि) १७.७५ **परमेण**=प्रकृष्टमुखयुक्तेन (धाम्ना=इहलोकेन परलोकेन) १ २ **प्रकृष्टेन**=पशुना ४ २६ [अन्तो वै परमम् ऐ० ५ २१]

परमस्याः अनुत्तमगुणरूपशीलाया (अ०—कन्याया) ११.७२ अतिश्रेष्ठाया (ईश्वर-सृष्टे) ५ ६१ १ **परमस्याम्**=उत्कृष्टगुणायाम् (पृथिव्याम्) १ १०८ ६ **परमा**=उत्कृष्टा नीतिः ४ ५० ३

परमा परमाणि उत्कृष्टानि (रजासि=लोकस्थानि) ३.३० २ श्रेष्ठानि (इष्टानि=कर्माणि) १७ २६ दूरस्थानि (रजासि=स्थानानि) ३४ १६ प्रकृष्टानि कर्माणि २ २७ ३. [परमप्राति० शेर्लोप]

परमाणि उत्कृष्टनि (विद्यासुशिक्षाकर्माणि) ४ १ १६

परमेष्ठिनम् प्रजापतिम् (परमेश्वरम्) ऋ० भू० २३७ अथर्व० ११ ३ ७ **परमेष्ठी**=परमे प्रकृष्टे स्वरूपे तिष्ठतीति (प्रजापति =ईश्वर) ८ ५४ परम आकाशेऽभिव्याप्य स्थित (परमेश्वर) १५ ५८ सर्वेषा स्वामी (विश्वकर्मा=राजा) १४ ६. परमेश्वररूपे आकाशे वाऽभिव्याप्य तिष्ठतीति (प्रजापति =प्रजापालक ईश्वर) १४ ३१ [परमोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो. 'परमे कित्' उ० ४ १० सूत्रेण इनि प्रत्यय । सप्तम्या अलुक् । 'स्थास्थिन्स्थॄणामिति वक्तव्यम्' अ० ८.३ ६७. वा० सूत्रेण स्थिन् सकारस्य मूर्धन्य । आपो वै प्रजापति परमेष्ठी, ता हि परमे स्थाने तिष्ठन्ति श० ८ २.३ १३. परमेष्ठी वा एष यदोदन तै० १ ७ १०.६ ऋतमेव परमेष्ठी तै० १ ५ ५ १ परमेष्ठी स्वाराज्यम् ता० १६ १३ ३ ४ तपसा परमेष्ठी काठ० ३५ १५ परमेष्ठी राजन्यो मनुष्याणाम् मै० २ २ ५ विश्वकर्मा वय परमेष्ठी छन्द तै० स० ४ ३ ५ २]

गमय ऋ० भू० ३, ३० ३ दूर कर दीजिए स० वि० ४, ३० ३. [परा+आङ्+णु प्रेरणे (तुदा०) धातोर्लोट्]

पराहता दूर प्राप्ता (पृथिवी) ५ ५६ ३ [परा+हन् हिंसागत्यो (अदा०) धातो क्त । तत स्त्रिया टाप्]

पराऽहन् पराहन्ति ४ १६ ७ दूरीकुर्या ६ २६ ३ [परा+हन हिंसागत्यो (अदा०) धातो सामान्ये लङ्]

परि पर्य्यायेण १ ६५ ६ उपरिभावे १ १०५ ३ निपेधे १ ५४ ५ सर्वतो भावे प्र०—परीति सर्वतो भाव प्राह नि० १ ३, १ ७ १० मध्ये १२ ४१ वर्जने ३८ २४ परित अ०—सर्वत १ १० १२ सर्वतस्त्यागे १ १६७ ६. अभित १ ६१ ८

परिक्रोशम् परित सर्वत क्रोशन्ति रुदन्ति यस्मिन् दु खसमूहे तम् १ २६ ७ [परि+क्रुश आह्वाने रोदने च (भ्वा०) धातोरधिकरणे घञ्]

परिक्षिता सर्वतो निवसन्ती (मातरा=जलाग्नी) ३ ७ १ [परि+क्षि निवासगत्यो (तुदा०) धातो क्त । तत 'सुपा सुलुग्०' इत्याकारादेश]

परिक्षितोः सर्वतो निवसतो , प्र०—अत्र तुमर्थे तोसुन् १ १२३ ७ [परि+क्षि निवासगत्यो (तुदा०) धातोस्तुमर्थे तोसुन्]

परिख्यत् सर्वतो वर्जयेत् ७ ३६ ७ **परिख्यतम्**=वर्जनपूर्वक निराकुरुतम् ५ ६५ ६ **परिख्यन्**=सर्वतो वर्जयेयु २५ २४ वर्जितु ख्यापयेयु १ १६२ १ [परि+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्लुङ् । 'चक्षिङ ख्याञ्' अ० २ ४ ५४ सूत्रेण ख्याञ्-आदेश । 'अस्यति वक्ति०' अ० ३ १ ५२ सूत्रेणाङ् । अडभाव । 'वर्जने प्रतिपेध ' अ० २ ४ ५४ वा० सूत्रेण ज्ञाप्यते यदय धातुर्वर्जनार्थेऽपि]

परिगत्य परित सर्वतो गत्वा २ १५ ४ [परि+गम्लृ गतौ (भ्वा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

परिगधिता परित सर्वतो गधिता शुभैर्गुणैर्युक्ता नीति प्र०—गध्यतिर्मिश्रीभावकर्मा नि० ५ १५, १ १२६ ६ [परि+गध+क्त+टाप् । गध्यतिरिति नैरुक्तो धातु मिश्रीभावकर्मा]

परिगृहीतम् परित सर्वतो गृहीत ज्ञातम् (भूत-भुवनभविष्यत्-सम्बन्धिव्यवहारम्) ३४.४ त्रिकालिक व्यवहारो को स० प्र० २४७, ३४ ४ [परि+ग्रह उपादाने (क्र्या०) धातो क्त । ग्रहिज्यादिना सम्प्रसारणम् । 'ग्रहोऽलिटि दीर्घ ' इतीटो दीर्घ]

परिगृह्णामि समन्तात् स्वीकरोमि १ २७ अभित सम्पादयामि १ २७ सर्वतो-भावेन सम्पादयामि, प्र०—परीति सर्वतोभाव प्राह नि० १.३, १ २७ [परि+ग्रह उपादाने (क्र्या०) धातोर्लट् । 'ग्रहिज्यावयिव्यधि०' इत्यादिना सम्प्रसारणम्]

परिगृह्य सर्वतो गृहीत्वा १७ ५५ [परि+ग्रह उपादाने (क्र्या०) धातो क्त्वा । समासे क्त्वो ल्यप्]

परिग्मन् परितो गच्छन्ति ४ ४३ ६ [परि+गम्लृ गतौ (भ्वा०) धातोर्लुङ् । 'मन्त्रे घसह्वरणश०' अ० २ ४ ८० सूत्रेण लेर्लुक् । 'गमहनजन०' अ० ६ ४ ९८ सूत्रेणोपधालोप.]

परिचक्षत सर्वतो चक्षीत, प्र०—अत्र शपो लुक् १ १२१ २ [परि+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्लङ् । अटोऽभाव]

परिचक्ष्याणि परित सर्वत ख्यातु योग्यानि (वचासि=वचनानि) ६ ५२ १४ [परि+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्ण्यत्]

परिचरति सर्वत सेवते १ ५२.६ **परिचरन्ति**= सर्वतो जानन्ति गच्छन्ति वा ७ १ १५ [परि+चर गतौ (भ्वा०) धातोर्लट्]

परिचराणि सर्वतो गतिमन्ति प्राप्तव्यानि वा (सैन्यानि) ५ २६ १३ **परिचराय**=यो धर्म, विद्या, मातापितरौ, स्वमित्रादींश्च सेवते तस्मै (भा०—सेवकाय) [परि+चर गतौ (भ्वा०) धातोर्मूलविभुजादित्वात् क प्रत्यय । यजमान परिचर ता० ३ १ ३]

परिचित् विद्या-परिचय प्राप्ता (कन्या) १२ ५३ **परिचितः**=परित सर्वत सञ्चेतार (विद्वासो जना) १२ ४६ [परि+चिञ् चयने (स्वा०) धातो कर्त्तरि क्विप्]

परिच्छिन्नाः छिन्नभिन्नविज्ञाना (अध्येतारो जना) ७ ३३ ६ [परि+छिदिर् द्वैधीकरणे (रुधा०) धातो क्त । 'रदाभ्याम्०' इति नकारादेश]

परिजग्रभत् सर्वतो गृह्णाति ३२ २ [परि+ग्रह उपादाने (क्र्या०) धातोश्छान्दस रूपम् । 'हृग्रहोर्भश्छन्दसि' इति हकारस्य भकार]

परिजजान सर्वतो जनयति १३ ४५ [परि+जनी प्रादुर्भावे (दिवा०) धातोर्लिट् । व्यत्ययेन परस्मैपदम्]

परिजरते परित स्तौति १२ १८ [परि+जरते अर्चतिकर्मा (निघ० ३ १४) धातोर्लट्]

परिजर्भुराणः परित सर्वतोऽतिशयेन पुष्यन् (विद्वान्

पराणुदे दूरे नुदति ७ १८ १६ [परा+णुद प्रेरणे (तुदा०) धातोर्लिट्]

पराददाति पूर्वं प्रयच्छति १ ८१ ६ **परादा**=दूरे तिष्ठ प० वि० **पराऽदात्** =दूर गमयेत् ५ ३ १२ दूरीकुर्यात् ६ २७ ७ **परादाः**=पराद्या १ १०४ ८ दोरवखण्डयोर्विनाशये १ १०४ ५ दूरीकुर्या १ १८६ ५ पराङ्मुखान् कुर्या ७ १ १६ [परा+डुदाञ् दाने (जु०) धातोर्लेट्। अन्यत्र लुङ्। 'गातिस्थाघु०' इति सिचो लोप। दो अवखण्डने (दिवा०) धातोर्वा रूपम्]

परादद्दिः पराञ्छत्रूनादाता (सेनापति) १ ८१ २ [आददि =आङ्+डुदाञ् दाने (जु०) धातो 'आदृगमहन०' इति सूत्रेण कि प्रत्ययो लिड्वच्च। परा-आददिपदयो समास]

परादानम् परेभ्य आदानम् १८ ६४ [परा-आदानपदयो समास। आदानम्=आङ्+डुदाञ् दाने (जु०) धातोर्ल्युट्]

परादै पराशनाय त्यागाय त्यक्तव्याय ८ १६ ७

परापत ऊर्ध्वं पतति गच्छति अ०—ऊर्ध्वं द्रव्य गमयति प्र०—अत्र व्यत्ययो लडर्थे लोट् च 'परा इत्येतस्य प्रातिलोम्य प्राह' नि० १ ३, ३ ४६ परायाहि १७ ४५ दूर गच्छ ४ ३४ [परा+पत्लृ गतौ (भ्वा०) धातोर्लोट्]

पराऽपरा या परोत्कृष्टा चाऽसावपराऽनुत्कृष्टा च सा (निर्ऋतिः=वायुना रोगकारिका दुःखप्रदा गति) १ ३८ ६ [परा-अपरा पदयो समास]

परापुरः ये परागतानि स्वमुखार्थान्यधर्मकार्याणि पिपुरति ते (दुष्टा जना) २ ३० [परा+पॄ पालनपूरणयो (जु०) धातो कर्त्तरि क्विप्। 'उदोष्ठ्यपूर्वस्य' सूत्रेणोत्वम्]

परापूतम् परागत पूत पवित्रत्व यस्मात्तत् (रक्ष=दुष्टस्वभावो मूर्ख) १ १६ **परापूताः**=परागत पूतः पवित्रस्वभावो येभ्यस्ते (अरातय=शत्रव) १ १६ [परा-पूतपदयो समास। पूत=पूञ् पवने (क्र्या०) धातो क्त]

परामृश विचारय १ १२६ ७ [परा+मृश आमर्शने (स्पर्शे) (तुदा०) धातोर्लोट्]

परायती परागच्छन्ती (प्राप्यमाणौषधी) १ १६१ २ **परायतीनाम्**=पूर्वं गतानाम् (उषसाम्) १ ११३ ८. **परायतीम्**=म्रियमाणाम् (मातर=जननीम्) ४ १८ ३ [परा+या प्रापणे (अदा०) धातो शत्रन्तात् ङीप्]

परायन् परेत सन् (न्यायाधीशो राजा) १२ २३ [परा+इण् गतौ (अदा०) धातो शतृप्रत्यय]

परायन्ति परागच्छन्ति पुनरागच्छन्ति च १ १२३ १२ [परा+इण् गतौ (अदा०) धातोर्लट् प्रथमबहुवचनम्]

परायाहि दूर गच्छ ३ ५३ ५ [परा+या प्रापणे (अदा०) धातोर्लोट्]

परार्धः अन्तो दशवार सङ्ख्यात परार्द्ध १७ २

परावत् परा गुणा विद्यन्ते यस्मिन् तत् (कर्म) ४ ५० ३ **परावतम्**=दूरदेशस्थम् (राजानम्) ३ ४० ६ **परावतः**=दूरदेशात् १८ ७२ विप्रकृष्टाद् देशात् ३ ६ ५ दूरस्था (दिश) १८ ३२ दूरस्थितस्य (विवस्वत=सूर्यस्य) ६ ८ ४ दूरत (स्थानात्) १ १३० ६ दूरमार्गान् १ ३५ ३ दूरस्थानानि प्र०—परावत प्रेरितवत. परागता नि० ११ ४८ 'परावत इति दूरनामसु पठितम्' निघ० ३ २६, १ ३४ ७ **परावति**=दूरे देशे ५ ३० ५ दूर दूर देश प्रति गमने कर्त्तव्ये १ ४७ ७ विप्रकृष्टे मार्गे १ १२२ १३ [पराशब्दाद् मतुप् पूर्वस्य च दीर्घश्छान्दस। परावत दूरनाम निघ० ३ २६ परावत प्रेरितवत परागताद्वा नि० ७ २६ परा उपसर्गाद्वा गतार्थे वति प्रत्यय 'उपसर्गाच्छन्दसि धात्वर्थे' अ० ५ १ ११७ सूत्रेण। अतो वै परावत ऐ० ५ २]

परावप दूरे निक्षिप १६ ६ [परा+टुवप बीजसन्ताने (भ्वा०) धातोर्लोट्]

परावृक् य परावृणक्ति स (इन्द्र=सूर्य) २ १५ ७. **परावृजम्**=धर्मविरुद्धगामिनम् (पुरुषम्) १ ११२ ८ परागता वृजस्त्यागकारा यस्मात्तम् (अन्ध=चक्षुर्विहीन जनम्) २.१३ १२ [परा+वृजी वर्जने (रुधा०) धातो कर्त्तरि क्विप्]

परावृक्तम् अच्छिन्नवीर्यम् (पुत्रम्) ४ ३० १६

परावृणक्ति दूरे त्यजति ६ ४७ १७ [परा+वृजी वर्जने (रुधा०) धातोर्लट्]

पराशरः दुष्टाना हिंसक. (राजा) ७ १८ २१ [परा+शॄ हिंसायाम् (क्र्या०) धातो पचाद्यच्-प्रत्यय। पराशर=पराशीर्णस्य वसिष्ठस्य। इन्द्रोऽपि पराशर उच्यते परा शातयिता यातूनाम् नि० ६ ३०]

परास पराङ्मुखस्यति ४ १८ ८ [परा+असु क्षेपणे (दिवा०) धातोरण्-प्रत्यय]

परासः भविष्यन्त (पितर=जनका) ४ २ १६ प्रकृष्टा भा०—उत्तमा (पितर=रक्षितार पित्रादय) १६ ४६

परासुव दूरे प्रक्षिप भा०—निवारय १६ ५ दूरे

परितसयध्यै सर्वतो भूषयितुम् ६ २२ ७ परित सर्वतस्तसयितु भूषयितुम् १ १७३ ७ [परि+तसि अलङ्कारे (चुरा०) धातोस्तुमर्थेऽध्यै प्रत्यय]

परितृढाः सर्वतो हिंसिता (अमित्रा =शत्रव) १ १३३ १ [परि+तृहू हिंसार्थे (तुदा०) धातो. क्त]

परित्रिधातु अयस्ताम्ररजतादि-धातुनयेण सर्वतो रचनीयम् (यानम्) ऋ० भू० १९९, ऋ० १.३४.७ [परि-त्रिधातुपदयो समास]

परिददामि सर्वतो ददामि १८ ५९. [परि+डुदाञ् दाने (जु०) धातोर्लट्]

परिदधातु सर्वतोभावेन दधाति वा, प्र०—अत्र लडर्थे लोट् २ ३ [परि+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्]

परिदधिरे सर्वतो दध्यु ५ १८ ४ सर्वतो दधति २ १३ १० [परि+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट्]

परिदधे सर्वतो धरामि ४ २ [परिपूर्वाद् दधातेर्लट्]

परिदर्षीष्ट सर्वतो विदारय ८ ५३ [परि+दृ विदारणे (क्र्या०) धातोर्लिङ् । व्यत्ययेनात्मनेपदम्]

परिदेहत् सर्वतो वर्धये ७ ५० २ [परि+दिह उपचये (अदा०) धातोर्लेट् । विकरणव्यत्ययेन शप्]

परिदाय सर्वतो दत्त्वा १ १०५ २ [परि+डुदाञ् दाने (जु०) धातो क्त्वा । समासे क्त्वो ल्यप्]

परिदाशेम सर्वतो दद्याम ७ ३ ७ [परि+दाशृ दाने (भ्वा०) धातोर्लिङ्]

परिदीय सर्वत उपक्षयति प्र०—अत्र व्यत्ययेन परस्मैपदम् ५ ८३ ७ सर्वत क्षिणुमहि १७ ३६ **परिदीयत्**=सर्वतो गच्छेत् प्र०—दीयतीति गतिकर्मा निघ० २ १४, १ १८० १ **परिदीयन्ति**=परिक्षयन्ति [परि+दीङ् क्षये (दिवा०) धातोर्लोट् । व्यत्ययेन परस्मैपदम् । अन्यत्र लेट् । दीयतीति गतिकर्मा निघ० २ १४]

परिधत्ताम् सब ओर से आच्छादित शोभायुक्त करो स० वि० १२१, अथर्व० १४ १ ५३ सर्वतो धारयतो वा प्र०—अत्र लडर्थे लोट् २ ३ [परि+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्]

परिधयः परित सर्वत सूत्रवद्धीयन्ते ये ते (गायत्र्यादिछन्दांसि) ३१ १५ परिधिर्हि गोलस्योपरिभागस्य यावता सूत्रेण परिवेष्टन भवति, ते समुद्रादय सप्त सन्त्येते समुद्र एकस्तदुपरि त्रसरेणु सहितो वायुर्द्वितीय , मेघमण्डलस्थस्तृतीयो वायुस्तृतीय वृष्टिजल चतुर्थस्तदुपरि वायु पञ्चमोऽत्यन्तसूक्ष्मो धनञ्जयस्षष्ठ , सूत्रात्मा सर्वव्याप्त सप्तमश्च ऋ० भू० १२८, ३१ १५ **परिधिना**=य परित सर्वतो धीयते तेन (यजुर्वेदेन) १८.६८ **परिधिम्**=सर्वतोऽऽवरणम् ७ ३३ ९. सर्वतो धीयन्ते नद्यो यस्मिंस्तम् (समुद्रम्) ३ ३३ ६. परित सर्वतो धीयते यस्मिंस्तम् (प्रभुत्वम्) २ १७ भा०—धर्मावरण कार्यमधर्मावरण त्याज्यमिति मर्यादाम् ३५ १५ **परिधिः**=परित सर्वाणि वस्तूनि धीयन्ते येन स. (वायु) २ ३. विद्यापरिधानम् २ ३ विद्याऽवधि (अग्नि =प्रत्यक्षो भौतिक) २ ३ आवरण मर्यादा १ १२५ ७ अस्य सर्वस्य विश्वस्य पृष्ठावरणम् (गोलस्य पदार्थस्योपरि सर्वत सूत्रवेष्टन कृत्वा यावती रेखा लभ्यते स परिधिरित्युच्यते) ऋ० भू० १४७ **परिधीन्**=यत्र परित सर्वतो धीयन्ते तान् (मार्गान्) १९ ५३ [परि+डुधाञ् धारणपोषणयो (जु०) धातो 'कर्मण्यधिकरणे च' सूत्रेण कि प्रत्यय. । दिश: परिधय गो० ५ २८ इमे वै लोका परिधय तै० ३ ८ १८ ४ गुप्त्यै वाऽभित परिधयो भवन्ति श० १ ३ ४ ८ आयतनानि परिधय क० ४८ ९ परिधयो रश्मय म० ४ ५ ५]

परिधीनिव सर्वत उपस्थित गोलरेखा इव १ ५२ ५ [परिधीन्-इव पदयो समास.]

परिधेयाः परित सर्वतो धातु धापयितुमर्हा (देवा =विद्वांसो दिव्या पदार्था वा) २ १८. [परि+डुधाञ् धारणपोषणयो (जु०) धातो 'अचो यत्' इति यत् । 'ईद् यति' इति धातोरीकारादेश]

परिनक्षति सर्वतो व्याप्नोति ४ ४३ ५ [परि+णक्ष गतौ (भ्वा०) धातोर्लट् । नक्षते व्याप्तिकर्मा निघ० २ १८]

परिनयन्ति सर्वत प्राप्नुवन्ति २५ २७ [परि+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

परिनिषेदथुः परितो निषीदत ४ ५६ ७ [परि+नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिटि मध्यम-द्विवचनम्]

परिपतये परित सर्वत पतयो यस्मिँस्तस्मै (रक्षणाय) ५ ५ **परिपतिम्**=स्वामिनम् ३ ४ ४२ पतिं वर्जयित्वा वा सर्वत स्वामिनम् ६ ४९ ८ [परि-पतिपदयो समास । परिपतिम्=अधिपतिम् नि० १२ १८ मनो वै परिपति तै० स० ६ २ २ ३ गो० २ २ ३]

परिपन्थिनम् प्रतिकूल, पन्थान परित्यज्य स्तेनाय

जन) १ १४० १० [परि+डुभृञ् धारणपोषणयो (जु०) धातोर्यङ्लुगन्ताच्छानच् । व्यत्ययेनात्मनेपदम्]

परिजायते सर्वत उत्पद्यते ७ ५० ३ [परि+जनी प्रादुर्भावे (दिवा०) धातोर्लट् । 'ज्ञाजनोर्जा' इति धातोर्जा आदेश]

परिजिहीते परितो गच्छत ३ ३१ १७ [परि+ओहाङ् गतौ (जु०) धातोर्लट्]

परिज्मन् परित सर्वतो गच्छन्, उपर्य्यध सर्वान् पदार्थानितस्तत क्षेप्ता (अ०—वायु) प्र०—अयमजधातो प्रयोग 'श्वन्नुक्षन्०' उ० १ १५७ इति कनिन्-प्रत्ययान्तो मुडागमेनाऽकारलोपेन च निपातित १ ६ ६ परित सर्वतो गच्छति यस्मिन् मार्गे १ ११७ ६ परित सर्वतो वर्त्तमानाया भूमौ २ २८ ४ परित सर्वतो जहि हिनस्ति दुष्टाँस्तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) १ ६३ ८ परित सर्वतो व्याप्त (वात =वायु) २ ३८ २ सर्वतो व्याप्तेऽन्तरिक्षे विस्तृताया भूमौ वा प्र०—ज्मेति पृथिवीनाम निघ० १ १, ४ २२ ४ **परिज्मनः**=परित सर्वतो व्याप्तस्य (अग्ने =पावकस्य) ३ २ ६. **परिज्मने**=परित सर्वतो ज्मा भूमिर्यस्य तस्मै (राज्ञे) ४ ३ ६ **परिज्मनोः**=य परित सर्वतोऽजत प्रक्षिपतो गच्छतस्तयो (सूर्याचन्द्रमसो) १ ४६ १४ **परिज्मा**=परित सर्वतो गन्ता वायु १ ११२ ४ य परित सर्वतो गच्छति स जीव १ ७६ ३ परितो जनत्यत्ति य सोऽग्नि १ १२२ ३ परित सर्वतो ज्माया भूमौ गच्छति त्यजति वा य स (भानु =सूर्य) ४ ४५ १ य परित सर्वतोऽजति गच्छति (अग्नि =यजमान सन्यासी) ७ १३ ३ **परिज्मानः**=परितो ज्मा भूमिर्येषान्ते (विद्वांसो जना) ५ १० ५ **परिज्मानम्**=परित सर्वतो भोक्तारम् (विप्र= विद्वज्जनम्) १ १२७ २ परित सर्वतोऽजन्ति मार्गं येन तम् (सुख रथम्) प्र०—अय परिपूर्वकाऽजधातो 'श्वन्नुक्षन्०' इत्यादिना निपातित १ २० ३ [परि+अज गतिक्षेपणयो (भ्वा०) धातोर्बाहु० 'श्वन्नुक्षन्०' उ० १ १५६ सूत्रेण कनिन्-प्रत्यये मुडागमोऽकारलोपश्च निपात्यते अथवा परि-ज्मन् पदयो समास । ज्मा इति पृथिवीनाम निघ० १ १ अथवा परि+जमु अदने (भ्वा०) धातो कनिन्-प्रत्यय । उपधालोपश्छान्दस]

परिज्मेव परित सर्वतो गन्ता वायुरिव ६ १३ २ **परिज्मामिव**=परित सर्वतो भोक्तारमिव [परिज्मा-इव पदयो समास । परिज्मेति व्याख्यातम्]

परिज्रय. ये परित सर्वतो जीर्णयन्ति ते (वाता) १ ६४ ५ ये परित सर्वतो गच्छन्ति ते (विद्वज्जना) ५ ५४ २ परित सर्वतो ज्रयो गतिमन्त । (विद्वांसो जना) ५ ५४ २ [परिपूर्वाद् ज्रयति गतिकर्मा (निघ० २ १४) धातोरच् । परि+ज्रि अभिभवे (भ्वा०) धातोर्वा अच्]

परिणयन्ति सर्वत प्रापयन्ति प्र०—अत्राऽन्तर्गतो ण्यर्थ १ ६५ २ सर्वत प्राप्नुवन्ति १ १६२ ४ [परि+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

परिणशे परित सर्वतो नश्यन्त्यदृश्या भवन्ति यस्मिँस्तस्मिन् (अहसि=पापे) १ ५४ १ [परि+णश अदर्शने (दिवा०) धातो 'घञर्थे क-विधानम्' इति क प्रत्यय]

परिणीयते सर्वतो नीयते ४ ६ ३ सर्वत प्राप्यते ४ १५ १ [परि+णीञ् प्रापणे (भ्वा०) धातो कर्मणि लट्]

परितक्म्या आनन्दप्रदा (रात्रि) ५ ३० १४ **परि-तक्म्यायाम्**=रात्रौ प्र०—'परितक्म्या रात्रि परित एन तक्म 'तक्मेत्युष्णनाम तकत इति सत, नि० ११ २५, १ ११६ १५ परित सर्वतस्तकन्ति हसन्ति यस्या सृष्टौ तस्याम् ४ ४३ ३ निशि ६ २४ ६ परित सर्वतस्तक्माणि भवन्ति यस्या तस्या रात्रौ ५ ३१ ११. परितस्तक्मानोऽश्वा यस्या तस्याम् (राज्यभूम्याम्) ४ ४१ ६ **परितक्म्याया.**= परित सर्वत तकन्ति हसन्ति यै कर्मभिस्तेषु भवाया (रात्रे) ५ ३० १३ [परि+तक गत्याम् धातोर्मनिन् तकति गतिकर्मा निघ० २ १४ प्रत्ययरथमकारादनन्तर यकारोपजनश्छान्दस । परितक्या रात्रि, परित एना तक्म । तक्मेत्युष्णनाम तकते इति सत नि० ११ २५ परि+तके हसने (भ्वा०) धातोर्वा मनिन्-प्रत्यये छान्दस रूपम्]

परितक्म्ये परित सर्वतो हर्षनिमित्ते (व्यवहारे) १ १३ ६ [परि+तके हसने (भ्वा०) धातोर्मनिन् । ततो भवार्थे यत्-प्रत्यये छान्दस रूपम्]

परितनुष्व सर्वतो विस्तृणु १६ ५० [परि+तनु विस्तारे (तना०) धातोर्लोट्]

परितप्तम् सर्वत सन्तप्तम् (विद्वांस जनम्) १ ११६ ६ [परि+तप सन्तापे (भ्वा०) धातो क्त]

परितस्थुषः सर्वतस्तिष्ठन्ति तान् सर्वान् स्थावरान् पदार्थान् मनुष्यान् वा प्र०—तस्थुष इति मनुष्यनाम, निघ० २ ३, १ ६ १ [परि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लिट क्वसु: । अथवा परि-तस्थुषपदयो समास । तस्थुष मनुष्यनाम निघ० २ ३ इमे वै लोका परितस्थुष तै० ३ ६ ४ २]

गुप्त स्थितम् प्र०—अत्र 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' अ० ५ २ ८९ अनेन पर्यवस्थाता विरोधी गृह्यते १ ४२ २ **परिपन्थिनः**=उत्कोचका दस्यव ४ ३४ [परिपन्थिन्शब्दो 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' अ० ५ २ ८९ सूत्रेण इनि-प्रत्ययान्तो निपात्यते]

परिपन्थीव यथा दस्युस्तथा चोराणा प्राण-पदार्थ-हर्त्ता (शूर सेनापति) १ १०३ ६ [परिपन्थिन्-इवपदयो समास । परिपन्थिन् इति व्याख्यातम्]

परिपरिणः परित सर्वतश्छलेन रात्रौ वा परस्वादायिनश्चौरा प्र०—छन्दसि परिपन्थिपरिपरिणौ० अ० ५ २ ८९ अनेनैतौ शब्दौ स्तेनविषये निपात्येते ४ ३४ [परिपरिन् शब्दो निपात्यते 'छन्दसि परिपन्थिपरिपरिणौ०' अ० ५ २ ८९ सूत्रेण]

परिपश्यन्ति सर्वतोऽन्वीक्षन्ते २५ ३५ परित सर्वत प्रेक्षन्ते ऋ० भू० १ ३२ [परि+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लट् । धातो पश्यादेश शिति]

परिपातम् सर्वतो रक्षतम् ३४ ३० **परिपात**=सर्वतो रक्षत १ १३६ ५ **परिपातु**=सर्वथा पालन करो, सदा सब उपद्रवो, पीडाओ से पृथक् रखो, यथावत् रक्षा करो आर्याभि० १ ४७, ऋ० ७ ८ १२ २ [परि+पा रक्षणे (अदा०) धातोर्लोट्]

परिपानम् परित सर्वत. पानम् ५ ४४ ११ [परि+पा पाने (भ्वा०) धातोर्भावे ल्युट्]

परिपासतः सर्वतो रक्षेताम् ७ ३४ २३ [परि+पा रक्षणे (अदा०) धातोश्छान्दस रूपम्]

परिपाहि परितो रक्ष ३३ ६६ सर्वतो रक्ष ३३ ८४ [परि+पा रक्षणे (अदा०) धातोर्लोट्]

परिपिन्वस्व सर्वतो सेवस्व भा०—प्रशसितो भव १२ १० [परि+पिवि सेवने (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

परिपूतः सर्वत पवित्र (सोम) १.१३५ २ [परि+पूञ् पवने (क्र्या०) धातो क्त]

परिप्रयाथ सर्वत प्राप्नुयात ४ ५१ ५ [परि+प्र+या प्रापणे (अदा०) धातोर्लट्]

परिप्ररोहन्ती सर्वत प्रकृष्टतया वर्द्धमाना (दूर्वा=ओषधी) १३ २० [परि+प्र+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो शत्रन्तान् ङीप्]

परिप्रासृजः सर्वत प्रासृज ३ ३२ ६ [परि+प्र+सृज विसर्गे (तुदा०) धातोर्लोडर्थे लङ्]

परिप्रीतः सर्वत प्रसन्न (मित्र) १ १६० ६ [परि+प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातो क्त]

परिप्लवेभ्यः तारकेभ्य नक्षत्रेभ्य) २२ २९ [देवचक्र वा एतत् परिप्लवम् कौ० २० १]

परिबभूव सर्वथा तिरस्कार करता है स० वि० ६, १० १२१ १० **परिबभूवतुः**=सर्वतो भवत ५ १६ ४ **परिबभूवुः**=परितो भवन्ति ४ ३३ १ [परि+ भू सत्तायाम् (भ्वा०) धातोर्लिट्]

परिबाधमानः सर्वतो निरुन्धान (राजभृत्य) ६ ७५ १४ सर्वतो निवारयन् (पुमान्=पुरुपार्थी सेनापति) २९ ५१ [परि+बाधृ विलोडने (प्रतिघाते) धातो शानच्]

परिबाधः सर्वतो बाधनानि ५ २ १० [परि+बाधृ विलोडने (भ्वा०) धातोर्घञ् प्रत्यय]

परिबोभवीति सर्वतो भृश भवति ३ ५३ ८ [परि+भू सत्तायाम् (भ्वा०) धातोर्यङ्लुगन्ताल् लट्]

परिभुज समन्तात् पालय १६ ११ **परिभुजत्**=सर्वतो भुञ्ज्यात् पालयेत् प्र०—अत्र भुज धातोर्लिटि विकरणव्यत्ययेन श १ १०० १४ [परि+भुज पालनाभ्यवहारयो (रुधा०) धातोर्लोट् । विकरणव्यत्ययेन श]

परिभुवः परित सर्वतो विद्यासु भवन्ति ते (विपश्चित =विद्वासो जना) १ १६४ ३६ **परिभूः**=य परित सर्वत पदार्थेषु भवति स (अग्नि =परमेश्वरो भौतिको वा) प्र०—परीति सर्वतोभाव प्राह नि० १ १३, ११.४ सर्वतो भावयिता (विद्वान् जन) ५ ३ ६ सर्वोपरि विराजमान (जगदीश्वर) १ ९७ ६ परित सर्वतो भवतीति अ०—यज्ञप्रद (जगदीश्वर) ४ ३७ व्याप्त (परमेश्वर) वे० भा०, ऋ० ११ १४ सर्वत सामर्थ्ययोगेन सर्वोपरि विराजमान (ईश्वर) प० वि० य सर्वतो भवति सर्वेपामुपरि विराजमान (सविता=परमेश्वर) ४ ५३ ५ सर्वत पुरुपार्थी (जगदीश्वर) १५ ४ सब दिशाओ और सब जगहो मे परिपूर्ण हो रहा सबके ऊपर विराजमान (ईश्वर) आर्याभि० २ २, ४० ८ यो दुष्टान् पापिन परिभवति तिरस्करोति स (ईश्वर) ४० ८ [परि+भू सत्तायाम् (भ्वा०) धातो क्विप् । सवत्सरेण परिभू (इन्द्र) तै० स० ४ ४ ८ १]

परिभूष सर्वतोभावेन भूषयति अलङ्करोति १ १५ ४. **परिभूषति**=सर्वतोऽलङ्करोति ३ ३ २ **परिभूषथः**=परितोऽलङ्कुरुथ ३ १२ ९ [परि+भूष अलकारे (भ्वा०)

परिषदः परिषीदन्ति यासु ता सभा ३ ३३ ९ [परि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो सम्पदादित्वात् स्त्रियां क्विप्]

परिषद्यम् परिषदि सभायां भवम् (रेवण =धनम्) ७ ४ ७ **परिषदः**=परिषदि भव (भगवान् विद्वान्वा) ५ ३२ सभा का आज्ञापक, सभ्य, सभापति, सभाप्रिय, सभारक्षक, सभा से ही सुखदायक (ईश्वर) आर्याभि० २ १७, ५ ३२ [परिषद् इति व्याख्यानम् । ततो भवार्थे यत् । परिषद्य=परिहर्त्तव्य हि नोपसर्त्तव्यम् नि० ३ २.]

परिषस्वजाते सर्वत स्वजेते, आश्रयत १ १६४ २० सर्वथा आश्रय करते हैं स० प्र० २८३, १.१६४ २० [परि+ष्वञ्ज परिष्वङ्गे (भ्वा०) धातोर्लिट् । 'श्रन्थि-ग्रन्थि०' अ० १ २ ६ वा० सूत्रेण लिट कित्वेनानुनासिक-लोप]

परिषस्वजाना परित सर्वत सङ्ग कुर्वाणा (योषा=स्त्री) २६ ४० परित कृतसङ्गा (योषा=पत्नी) ६ ७५ ३ [परि+ष्वञ्ज परिष्वङ्गे (भ्वा०) धातोर्लिट कानच् । स्त्रियां टाप्]

परिषिक्तम् सर्वत आर्द्रीभूत कृतम् (अन्ध =अन्नम्) ४ ११६ सर्वत सिक्तम् (अन्ध =अन्नम्) ६ ६८ ११ परित सर्वत श्रेष्ठै पदार्थै संयोजितम् (आदित्यब्रह्म-चर्यम्) ४ ३५ ६ **परिषिक्तः**=परित सर्वतोऽन्यै-रुत्तमैर्द्रव्यै सिक्त (सोम =ओषधिगण) ७ १८ ६ [परि+षिच् क्षरणे (तुदा०) धातो क्त]

परिषिक्ता परित सर्वत सिक्तानि (मधुराणि द्रव्याणि) १ १७७ ३ [परि+षिच् क्षरणे (तुदा०) धातो क्त । छन्दसि शेर्लोप]

परिषिक्तेभिः सर्वथा कृतसिञ्चनै (सेचनक्रियाभि) १ १०८ ४ [परि+षिच् क्षरणे (तुदा०)+क्त । 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

परिषिच्यते सर्वत सिच्यते १६ १५ [परि+षिच् क्षरणे (तुदा०) धातो कर्मणि लट्]

परिषूताः परित सर्वत सूता उत्पन्ना उत्पादिता वा पदार्था १ ५३ ८ [परि+षूङ् प्राणिगर्भविमोचने (अदा०) धातो क्त]

परिषूतेः परित सर्वतो द्वितीये विद्याजन्मनि प्रादुर्भूतात् (विद्वज्जनात्) १ ११६ ६ [परि+षूङ् प्राणिगर्भ-विमोचने (अदा०) धातो क्तिन् । तत पञ्चमी]

परिष्कन्दम् सर्वतो रेतस सेक्तारम् (पुरुषम्) ३० १३ [परि+स्कन्दिर् गतिशोषणयोः (भ्वा०) धातो-रच् कर्तरि]

परिष्कृतः सर्वत शुद्ध सम्पादित (पुरोळा—अन्नविशेष) ३ २८ २ शुद्ध शोधिता दृष्टा (इन्द्र=आनन्ददायक सन्नारी) स० वि० १६६, ६.११३ ४ **परिष्कृता**=परित शोभिता (मधुच्छन्दा—माधुर्य-पदार्थ) प्र०—सम्पर्युपेभ्यः करोतौ भूषणे इति सुट् २१ ८७ [परि+डुकृञ् करणे (तना०) धातो क्त । 'सम्पर्युपेभ्य करोतौ भूषणे' इति कात्वं सुट् । पश्य परिष्कृत. जै० १ ६०]

परिष्टिः परित सर्वत इष्टिरन्वेषणं यस्या सा (द्यौ) प्र०—अत्र 'एमन्नादिषु पररूप वक्तव्यम्' ६ १.९४ इति वार्तिकेन पररूप एकादेश १ ६५ २ **परिष्टौ**= परित सङ्गन्तव्यायाम् (प्रजायाम्) ७ १६ : [परि+इष्टि-पदयो. समासे 'एमन्नादिषु०' इति वा० सूत्रेण पररूपम् । इष्टि =यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो क्तिन् । अथवा इषु इच्छायाम् (तुदा०) धातो बाहु० क्तिन्]

परिष्टुतिः परित सर्वत स्तुति प्रशंसा भा०—प्रशंसाहष्टान्ता ३८ २ परित सर्वत स्तूयते यया सा (स्वाहा=सत्या वाक्) ५.१८ परित सर्वत स्तुवन्ति यया सा (सहनी प्रशंसा) ११ ४ परितो व्याप्ता चासौ स्तुतिश्च ५ ८१.१ [परि+स्तुतिपदयो समास । स्तुति =ष्टुञ् स्तुतौ (अदा०) धातो स्त्रियां क्तिन्]

परिष्टुभ. सर्वतो धर्त्रीः (मरुत =वायव इव) १ १६६ १ [परि+ष्टुभु स्तम्भने (भ्वा०) धातो कर्तरि क्विप्]

परिष्टोभत सर्वत स्तम्भयत १ ८० ६ [परि+ष्टुभु स्तम्भने (भ्वा०) धातोर्लोट्]

परिष्ठात् सर्वतस्तिष्ठेत् ३.१५ ६. **परिष्ठा**= सर्वतस्तिष्ठति ४ ३० १२ [परि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । अडभाव सिचो लुक् च]

परिष्ठाम् य परितस्तिष्ठति तम् (अहिं=मेघम्) ६ ७२ ३ **परिष्ठाः**=सर्वत स्थिता (ओषधी =सोम-यवाद्या) १२ ८४ [परि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो कर्तरि क्विप्]

परिष्ठितम् परित सर्वत स्थितम् (क्षोद =उदकम्) ६ १७ १२ [परि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त । 'द्यतिस्यतिमास्थामि' तीत्वम्]

परिष्ठिताः परित सर्वत स्थिता (अप =जलानि) ७ २१ ३ [परि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त]

लाभे (तुदा०) धातोर्लङ् । अडभाव]

परिविश्वानि विश्वस्थानि सर्वाणि वस्तूनि प्राणि जातानि च ऋ० भू० २१६, ऋ० ३ २ ३४ ६.. [परि-विश्वपदयो समास]

परिविष्टम् सर्वतो व्याप्नुतम् (राज्यम्) १ ११६ २० [परि+विष्लृ व्याप्तौ (जु०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक्]

परिविष्टी सर्वतो विद्या व्याप्नोति यया तया क्रियया ४ ३३ २ [परि+विष्लृ व्याप्तौ (जु०) धातो स्त्रिया क्तिन् । तत 'सुपा सुलुग्०' इति टा-स्थाने पूर्वसवर्णदीर्घ । विष्टी कर्मनाम निघ० २ १]

परिवीतम् परित सर्वतो वीत व्याप्त कमनीय च जलम् १ १३० ३ **परिवीतः**=परित सर्वतो व्याप्तशुभ-गुणकर्मस्वभाव (विद्वान् राजा) ४ १ ७ परित सर्वतो व्याप्तविद्य (विद्वज्जन) ३ ८ ४ परित आवृत (जीव) १ १६४ ३२ सब ओर से यज्ञोपवीत, उत्तम-ब्रह्मचर्य और उत्तम शिक्षा, विद्या से युक्त (पुरुष) स० प्र० १०६, ३ ८ ४ परित सर्वतो वीत प्राप्त विज्ञान येन स (मनुष्य =विद्वज्जन) १ १२८ १ [परि+वी गतिव्याप्ति-प्रजनकान्त्यसनखादनेषु (अदा०) धातो. क्त]

परिवीः यथा परित सर्वत सर्वा विद्या व्येति व्याप्नोति यथा अ०—सर्वविद्याव्यापकवत् (सभाध्यक्षो राजा) ६ ६ [परि+वी गतिव्याप्तिप्रजनादिषु (अदा०) धातो क्विप्]

परिवृङ्क्त सर्वत त्यजत १ १७२ ३ **परिवृङ्ग्धि**= सर्वतो वर्जय ६ ७५ १२ सर्वतो वर्जय १३ ४१ **परि-वृणक्ति**=सर्वतो दूरीकरोति ६ ५१ १६ परितस्त्यजति १ १२४ ६ सर्वतश्छिनत्ति ३ २६ ६ सर्वतो वर्जयति प्र०—अत्राऽन्तर्गतो ण्यर्थ ४ २६ परिवृणक्तु=परितो वर्जयतु ७ ४६ ३ परित्यजतु १६ १२ सर्वत पृथग् भवतु ७ ६० ६ सर्वत पृथक् करोतु १६ ५० सर्वतश्छिन्नो भवतु १३ ४५ **परिवृणक्षि**=सर्वतस्त्यजसि १ १२६ ३ [परि+वृजी वर्जने (रुधा०) धातोर्लोट् । अन्यत्र लट्]

परिवृज्याम् परितस्त्यजेयम् २ २७ ५ **परि-वृज्या**=परिवृणक्तु ६ २८ ७ [परि+वृजी वर्जने (अदा०) धातोर्लिङ्]

परिवृणीमहे सर्वत स्वीकुर्महे ४ ४१ ७ [परि+वृञ् वरणे (क्र्या०) धातोर्लट्]

परिवृतम् सर्वत स्वीकृतम् (राध =धनम्) ७ २७ २ [परि+वृञ् वरणे (स्वा०) धातो क्त]

परिवृताः आच्छादिता विद्युत्य (स्त्रिय) १ १४८ २ [परि+वृञ् आवरणे (चुरा०) धातो क्त । अनित्यण्यन्ता-श्चुरादय इति णिच् न]

परिवेद सर्वतो जानीयाम् १२ ६४ [परि+विद ज्ञाने (अदा०) धातोर्लट् । 'विदो लटो वा' इति णल्]

परिवेष्टारम् परित सर्वतो व्याप्तविद्य विद्वांसम् ३० १३ परिवेषणकर्त्तारम् (पुरुषम्) ३० १२ **परि-वेष्टारः**=परितो व्याप्ता (विद्वास पतय) ६ १३ [परि+विष्लृ व्याप्तौ (जु०) धातो कर्त्तरि तृच्]

परिवोचे सर्वतो वदामि ७ ३३ १ [परि+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लुङ् । 'अस्यतिवक्ति०' सूत्रेणाङि प्रत्यये 'ब्रुवो वचि' इति वचिरादेश । 'वच उम्' इति धातोर् उमागमे आद्गुणे रूपम् । अडभावश्छान्दस.]

परिव्यत सर्वतो व्याप्नुत २ १७ २ [परि+वी गतिव्याप्त्यादिषु (अदा०) धातोर्लोट् । विकरणव्यत्ययेन श । व्यय गतौ (भ्वा०) धातोर्वा रूपम्]

परिव्ययन्ताम् सर्वतो विशिष्टतया प्राप्नुवन्तु जानन्तु वा ६ ६ [परि+व्यय गतौ (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

परिव्ययामसि सर्वतो सङ्गृणुम १७ ५ सर्वत प्राप्ता स्म १७ ४ [परि+व्यय गतौ (भ्वा०) धातोर्लट् । 'इदन्तो मसि' इति मस इदन्तता]

परिव्युच्छन्ती सर्वतो निवासयन्ती (दुहिता=कन्या) ४ ५२ १ [परि+वि+उच्छी विवासे (भ्वा०) धातो शत्रन्तात् ङीप्]

परिशयानम् योऽन्तरिक्षे सर्वत शेते तम् (अहि= मेघम्) ४ १६ २ सर्वत शयानमिव (अहिं=मेघम्) ६ ३० ४ सर्वत आकाशे शयानमिव वर्त्तमानम् (अहिं=मेघम्) ३ ३२ ११ [परि+शीङ् शये (अदा०) धातो शानच्]

परिशम् परित सर्वतोऽश्न लेशम् (अन्नम्) प्र०— अत्र 'छान्दसो वर्णलोपो वा' इत्यलोप १ १८७ ८ [परि-अशपदयो समास । अकारलोपश्छान्दस]

परिषदन् परिषीदन्ति ४ ३ ११ [परि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लङ् । अत्र छन्दसि सीदादेशोऽडागमश्च न भवत]

परिषदन्तः परिषदमाचरन्त (राजप्रजाजना) ४ २ १७ [परि+षद्लृ धातो शतृ-प्रत्यय । सीदादेशो न, छान्दसत्वात्]

विना अपर्याप्त (खाली) न रह कर आर्याभि० २१०, ३२११ [परि+इण् गतौ (अदा०) धातोः क्त्वा । समासे क्त्वो ल्यप्]

परीयानम् सर्वतो गच्छन्तम् (रथ=रमणीय विमानादियानम्) ११८०१० [परि=या प्रापणे (अदा०) धातोर्ल्युट् करणे]

परीवापस्य पिष्टादेः १६२२ **परीवापः**=परितः सर्वतो वापो बीजारोपणं यस्मिन् सः (क्षेत्रम्) १६२१ [परि-वापपदयोः समासः । वापः=डुवप् बीजसन्ताने (भ्वा०) धातोर्घञ् प्रत्ययः । अन्नमेव परिवापः ऐ० २२४ भारत्यै परिवापः तै० १५११२ सरस्वतीवान् भारतीवान् परिवापः ऐ० २२४ मै० ३१०६ काठ० २६१]

परीवृतम् सर्वतः आवृतम् (अर्णव=समुद्रम्) २१३१८ **परीवृताः**=परीतोऽन्धकारेणाऽऽवृता (द्वारः=द्वाराणि) ११३०३ परितः सर्वतो वृता युक्ता प्रकाशयितारः (सर्वे मनुष्याः) ऋ० भू० १०१, अथर्व० १२५२. सब ओर से संयुक्त (हे स्त्रीपुरुषो !) स० वि० १४३ अथर्व० १२५२ परितः आच्छादिता विदुष्यः ११४४२. [परि+वृञ् आवरणे (चुरा०) धातोः क्तः । पूर्वस्य दीर्घश्छान्दसः]

परीवृता परितः सर्वतो वर्त्तन्ते यानि तानि (गोत्रा=गोत्राणि) २१७१ [परि+वृतु वर्त्तने (भ्वा०) धातोरिगुपधलक्षणः कः । ततः शेर्लोपश्छन्दसि) पूर्वस्य दीर्घश्छान्दसः]

परीहि सर्वतः प्राप्नुहि ७१३ [परि+इण् गतौ (अदा०) धातोर्लोट्]

परुषः परुषः मर्मणो मर्मणः १३२० ['परुषः' पदस्य वीप्सायां द्वित्वम् । परुष् इति व्याख्यास्यते]

परुषा मर्मणा २०२७ परुषि=कठोरे व्यवहारे ७५०२ **परुः**=मर्म २०२७ **परूंषि**=मर्मस्थलानि १८३ कठोराणि वचनानि २३४१ कठोर स्वभाव आदि स० वि० २०८, अथर्व० ६६११ [पॄ पालनपूरणयोः (जु०) धातोः 'अर्त्तिपॄवपियजि०' उ० २११७ सूत्रेण उसि प्रत्ययः]

परुषाः कठोराः (वाचः) ५२७५ **परुषे**=कठोरे व्यवहारे ६५६३ [पॄ पालनपूरणयोः (जु०) धातोः 'पॄनहिकलिभ्य उपच्' उ० ४७५ सूत्रेण उपच् । परुषे=पर्ववति भास्वतीत्यौपमन्यवः नि० २६]

परुष्णीम् पालिकाम् (पृथिवी=भूमिम्) ७१८८ विभागवतीम् (अशुभेनाम्) ४२२२ **परुष्ण्याम्**=पालनकर्त्र्याम् (पृथिव्याम्) ५५२९ [परुष् इति व्याख्यातम् । ततो मत्वर्थीयो नः प्रत्ययः । ततः स्त्रियां छान्दसो ङीप् । इरावती परुष्णीत्याहुः पर्ववती भास्वती कुटिलगामिनी नि० ६२५]

परुष्परुः मर्म मर्म २५४१ प्रतिमर्म १.१६२१८. [परुष्पदस्य वीप्सायां द्वित्वम् । परुष् इति व्याख्यातम्]

परेताः सर्वतः सुखं प्राप्ताः (जनाः) १३३१ [परा+इण् गतौ (अदा०) धातोः क्तः.]

परेहि पृथग् भव १४४ दूरं गच्छतु अ०—परैतु ३५७ दूरं गच्छ १७४४ [परा+इण् गतौ (अदा०) धातोर्लोट्]

परैतन दूरं प्राप्नुत प्र०—अत्र 'इण् गतौ' इत्यस्माल्लोटि युष्मद्बहुवचने 'तप्तनप्तनथनाश्च' अ० ७१४५ इति तनबादेशः ५६१४ [परा+आङ् इण् गतौ (अदा०) धातोर्लोटि तप्रत्ययस्य तनबादेशः]

पर्जन्य ! मेघ इव वर्त्तमान (राजपुरुष) ५६३४ **पर्जन्यः**=पालनजनकः (मेघः) ५८३४ [पर्षति सिञ्चतीति विग्रहे पृषु सेचने (भ्वा०) धातोः 'पर्जन्य' उ० ३१०३ सूत्रेण अन्यः प्रत्ययो निपात्यते । निपातनात् षकारस्य जकारः । पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः । परो जेता वा । परो जनयिता वा । प्रार्जयिता वा रसानाम् नि० १०१० पर्जन्यो वा उद्गाता श० १२१९३ पर्जन्यः सदस्यः गो० पू० ११३, पर्जन्य (संवत्सरस्य) वसोर्धारा तै० ३१११०३ पर्जन्यो वा अग्निः श० १४६११३ पर्जन्यस्य विद्युत् (पत्नी) तै० आ० ३९२ पर्जन्यो भूत्वा (प्रजापतिः) प्रजानां जनित्रमभवत् जै० १३१४ पर्जन्यो मे मूर्ध्नि श्रितः तै० ३१०८८ वृषा पर्जन्यः तै० सं० २४९४]

पर्जन्य इव यथा मेघो गर्जनं कुर्वन् वृष्टिं तनोति १३८१४ [पर्जन्य-इव पदयोः समासः । पर्जन्य इति व्याख्यातम्]

पर्जन्यरेतसे पर्जन्यस्य रेतः उदकमिव रेतो वीर्यं यस्यास्तस्यै (शूरवीरायै राज्ञै) प्र०—रेतः इत्युदकनाम निघ० ११२, ६७५१५ [पर्जन्य-रेतस्-पदयोः समासः]

पर्जन्यवाता पर्जन्यश्च वातश्च तौ ६५०१२ पर्जन्यस्थौ वायू ६४९६ [पर्जन्य-वातपदयोः समासः]

पर्णकम् यः पर्णेषु पालनेषु कुत्सिततरतम् (भील-जनम्) ३०१६ [पर्णप्राति० 'कुत्सिते' अ० ५३७४ सूत्रेण

परिष्ठुः सर्वतस्तिष्ठन्ति ५ १५ ३ सर्वतस्त्यागे तिष्ठेयु १ १६७ ६ [परि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्, अडभाव]

परिष्वजत् सर्वत सम्वध्नाति ६ ६० १० [परि+ष्वञ्ज परिष्वङ्गे (भ्वा०) धातोर्लङ्, अडभाव । 'दससञ्जस्वञ्जा शपि' इत्यनुनासिकलोप]

परिसदाम परित प्राप्नुयाम ७ ४ ६ [परि+षद्लृ विशरणगत्यादिपु (भ्वा०) धातोर्लङ् । सीदादेशोऽट् च न भवतश्छान्दसत्वात्]

परिसिञ्चत सर्वत सिञ्चत १६ २ [परि+षिच् क्षरणे (तुदा०) धातोर्लट्]

परिस्तरणम् जो सब ओर से शास्त्र, आसन आदि सामग्री स० वि० २०८, अथर्व० ६ ६ १ २ [परि+स्तृञ् आच्छादने (क्र्या०) धातोर्ल्युट्]

परिस्तः अभितो भवत १ ६१ ८ [परि+अस भुवि (अदा०) धातोर्लट् । 'श्नसोऽल्लोप' इत्यल्लोप]

परिस्रव यथार्थ पुरुषार्थ कर स० वि० १६६ अथर्व० ६ ११३ ४ सब प्रकार से प्राप्त कर स० वि० १६६, अथर्व० ६ ११३ ६ सब ओर से गमन कर स० वि० १६५, अथर्व० ६ ११३ २ सर्वथा सत्योपदेश की वृष्टि कर स० वि० १६५, अथर्व० ६ ११३ १ करुणावृष्टि कीजिए, कृपा से सर्वथा प्राप्त हूजिए स० वि० १६७, अथर्व० ६ ११३ १०, ६ ११३ ६ [परि+स्रु गतौ (भ्वा०) धातोर्लोट्]

परिस्रुत् य परित सर्वत स्रवति प्राप्नोति स रस १६ १५ **परिस्रुतम्**=सर्वत प्राप्तम् (सोमम्=ओपधिरसम्) १६ ४ परित- सर्वत स्रुत सुरसयोगेन परिपक्व फलादिकम् २ ३४ माक्षिक मधुकालपक्व फलादिक च ऋ० भू० २५४, २ ३४ **परिस्रुत**.=सर्वत स्रुत पक्वात् (अन्नात्=यवादे) १६ ७५ सर्वत प्राप्त (प्रजापति = राजा) १६ ७६ **परिस्रुता**=परित स्रुता प्राप्तेन (रसेन) २१ ३१ सर्वतोऽभिगतेन पुरुपार्थेन २१ ३८ सर्वतो मधुरादिरसयुक्तेन (मासरेण=प्रमितेन मण्डेन) २० ६६ परित सर्वत सुता प्राप्तेन रसेन २१ २६ परित सर्वत स्रवति तेन (जलादिपदार्थेन) २० ६५ परित सर्वत स्रवन्ति येन तेन (जलप्रस्रवणेन) २० ६३ परित स्रवन्ति प्राप्नुवन्ति येन (पयसा=दुग्धेन) १६ ६५ परित सर्वत सुतम् (रसम्=आनन्दम्) प्र०=अत्र 'सुपाम्०' इत्याकारादेश १६ ८३ [परि+स्रु गतौ (भ्वा०) धातो कर्त्तरि क्विप्]

परिस्रुता परित सर्वतो गच्छन्तावव्याहतगती (सरस्वती=प्रशसिता गृहिणी तथा पुरुप) प्र०—'स्रु गतौ' धातो क्विप्, तुक्, द्विवचनस्य 'सुपाम्०' इत्यात्वम् २० ५६ [परि+स्रु गतौ (भ्वा०) धातो क्विप् । 'सुपा सुलुग्' इति द्विवचनस्याकारादेश]

परिहवामहे सर्वत स्तुवीम १ ७ १० सर्वत स्वीकुर्महे ५ ६४ १ [परि+हु दानादानयो (जु०) धातोर्लट् । 'बहुल छन्दसि' इति शप श्लुर्न भवति]

परिहितम् सर्वत सुखप्रदम् (ओज =बलम्) १ ११२ १० [परि+दधाते क्त । 'दधातेर्हि' इति हिरादेश]

परिहिताः परित सर्वतो हिता हितकारिण (सर्वे मनुष्या) ऋ० भू० १०२, अथर्व० १२ ५ ३ सब के हितकारी (स्त्रीपुरुषो !) स० वि० १४३, अथर्व० १२ ५ ३ [परिहित व्याख्यातम् । तत प्रथमाबहुवचनम्]

परिह्वृत् य परित सर्वतो ह्वरति कुटिला गति गच्छति स (दुर्जन) ६ ४ ५ [परि+ह्वृ कौटिल्ये (भ्वा०) धातो कर्त्तरि क्विप्]

परीणशे परित सर्वतो नश्यन्त्यदृश्या भवन्ति यस्मिँस्तस्मिन् (अहसि=पापे) प्र०—अत्र घञर्थे क प्रत्ययो 'अन्येपामपि०' इति दीर्घश्च १ ५४ १ [परि+णश अदर्शने (दिवा०) धातो 'घञर्थे कविधानम्' इति क प्रत्यय]

परीणसम् बहुविधम् (रयि=धनम्) प्र०—परीणस इति बहुनाम निघ० ३ १, ३ २४ ५ **परीणसः**=बहून् (गृहान्) १ १३३ ७ बह्वच (गूर्त्तय =उद्यमयुक्ता कन्या) १ ५६ २ **परीणसा**=बहुगुणया (राया =श्रिया) १ १२६ ६ बहुविधेन (राया =धनेन) ४ ३१ १२ [परीणसा बहुनाम निघ० ३ १ अन्न वै परीणसम् जै० ३ १७४]

परीणहम् परितस्सर्वत प्रबन्धन सुखाच्छादकत्वेन व्यापन वा प्र०—'णह बन्धने' इत्यस्मात् 'क्विप् च' इति क्विप् 'नहिवृति०' अनेनाऽऽदेर्दीर्घ १ ३३ ८ [परि+णह बन्धने (दिवा०) धातो क्विप्प्रत्यये पूर्वस्य दीर्घ]

परीत्तः सर्वतो दत्त (जव =वेग) ६ ६ [परि+डुदाञ् दाने (जु०) धातो क्त । 'अच उपसर्गात्त' इति तकारादेशे 'दस्ति' सूत्रेण दीर्घ]

परीत्य परित सर्वतोऽभिव्याप्य ३२ ११ सर्वत इत्वा प्राप्य विदित्वा च ऋ० भू० ८६, ३२ ११ व्यापक होकर स० वि० २१५, ३२ ११ एक कण भी उसके

निवृत्तौ (भ्वा०) धातोर्लुङ् । 'गातिस्था०' इति सिचो लुक्]

पर्य्यहृषत सर्वतो हरत ३५ १८ [परि+हृषु अलीके (भ्वा०) धातोर्लङ् । व्यत्ययेन श प्रत्यय]

पर्य्यागुः सर्वत आभिमुख्येन प्राप्नुवन्त १ ८८ ४. [परि+आङ्+इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङी' ति गादेशे सिचो लुकि च रूपम्]

पर्य्यानयत् सर्वत आनयति ३ ६ ५. [परि+आङ्+णीञ् प्रापणे (भ्वा०) धातोर्लङ्]

पर्य्याभृतम् सर्वत आभिमुख्येन धृतम् (सह =बलम्) ६ ४७ २७ [परि+आङ्+डुभृञ् धारणपोषणयो (जु०) धातो क्त]

पर्य्याप सर्वत प्राप्नोति १ ७६ १ [परि+आप्लृ व्याप्तौ (स्वा०) धातोर्लिट्]

पर्य्यायन्ति सर्वत समन्तात् प्राप्नुवन्ति २ १३ २ [परि+आङ्+इण् गतौ (अदा०) धातोर्लट् । 'इणो यण्' इति यणादेश]

पर्य्यायिणीम् परित कालक्रमशाम् (स्त्रीम्) ३०.१५ [परि+इण् गतौ (अदा०) धातो ताच्छील्ये णिनि । स्त्रिया ङीप् । अथवा पर्यायप्राति० मत्वर्थ इनि । तत स्त्रिया ङीप्]

पर्य्यावर्त्तयाते सर्वत आवर्त्तयेत प्र०—लेट्-प्रथमैकवचन आडागमे णिजन्तस्य वर्त्ते प्रयोग ५ ३७ ३ [परि+आङ्+वृतु वर्त्तने (भ्वा०)+णिच्+लेट्]

पर्य्यावृतम् सर्वत आच्छादितम् (मेघम्) ६ ४७ २७ [परि+आङ्+वृञ् आवरणे (चुरा०) धातो क्त]

पर्य्यास सर्वतोऽस्यति ७ ३२ १० [परि+असु क्षेपणे (दिवा०) धातोर्लिट्]

पर्य्यासते सर्वत उपविशन्ति ३ ६ ३ [परि+आस उपवेशने (अदा०) धातोर्लट्]

पर्य्यासीत् सर्वतोऽस्ति ३२ १२ [परि+अस् भुवि (अदा०) धातोर्लङ्]

पर्य्युदगन्म परित उत्कृष्टतया प्राप्नुयाम १ ५० १० सर्वत उत्कर्ष प्राप्नुयाम २७ १० [परि+उत्+गम्लृ गतौ (भ्वा०) धातोर्लुङि 'मन्त्रे घसह्वरणश०' अ० २ ४ ८० सूत्रेण लेर्लुक्]

पर्य्युद्बाधस्व सर्वतोऽपि निवर्त्तय ४ २८ [परि+उत्+बाधृ विलोडने (भ्वा०) धातोर्लोट्]

पर्य्युपस्थात् सर्वत समीप तिष्ठेत् १.६८.१. [परि+उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । अडभाव सिचो लुक् च]

पर्य्यूढाः परित सर्वत ऊढा प्राप्यन्त. (सर्व मनुष्या) ऋ० भू० १०२, अथर्व० १२ ५ ३ सब ओर से सदा सत्याचरण प्राप्त कराने वाले (स्त्री-पुरुषो !) स० वि० १४३, अथर्व० १२ ५ ३. [परि+वह प्रापणे (भ्वा०) धातो क्त]

पर्य्यूर्णोत् सर्वत ऊर्णोत्याच्छादयति, स्वीकरोति १ ६८ १. [परि+ऊर्णुञ् आच्छादने (अदा०) धातोर्लङ् । आडभावश्छान्दस.]

पर्य्यूवुः परित सर्वतस्तान्युवद् विस्तारयेयु १.६१.८. [परि+वेञ् तन्तुसन्ताने (भ्वा०) धातोर्लिट्]

पर्य्यूहामि परितो विनिश्चयतया तर्कयामि ६ ३ सर्वतो वितर्कयामि ५ २० सर्वतस्तर्केण निश्चिनोमि ५ २५ [परि+ऊह वितर्के (भ्वा०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

पर्य्येता वर्जिता (जन) ७ ४०.३ सर्वत प्राप्त (इन्द्र =राजा) ६ २४ ५ सर्वतोऽनुग्रहीता (सहनशीलो विद्वान्) १ २७ ८ [परि+इण् गतौ (अदा०) धातो कर्त्तरि तृच् प्रत्यय]

पर्य्येति परित प्राप्नोति ६ ७५ १४ पर्यायेण प्राप्नोति १ ६५ ६ सर्वत प्राप्नोति गच्छति वा ६ ४८ २१ **पर्य्येमि**=भा०—सर्वतोऽनन्तस्वरूपेण पूर्णोऽस्मि, सर्वत प्राप्तोऽस्मि २३ ५० **पर्य्येषि** =तूने अपनी व्याप्ति से व्याप्त कर रखा है स० प्र० ४२३, ६ ८३ १ [परि+इण् गतौ (अदा०) धातोर्लट्। पर्येति =परिखिद्यति नि० ६.१५]

पर्व पालनम् २३ ४० पालकम् (राजानम्) ४ १६ ६ अङ्गमङ्गम् १ ६१ १२ **पर्वभिः**=पूर्णै साधनाऽङ्गै (नमोभि =अन्नै) १३ ४३ **पर्वाणि**=पूर्णानि पालनानि ४ २२ २ [पॄ पालनपूरणयो (जु०) धातो 'स्नामदिपद्यर्ति-पॄशकिभ्यो वनिप्' उ० ४ ११३ सूत्रेण वनिप् । पर्व पुन पृणाते प्रीणातेर्वा, अर्धमासपर्व, देवानस्मिन् प्रीणन्तीति । तत् प्रकृतीतरत् सन्धिसामान्यात् नि० १ २०]

पर्वणा पर्वणा पूर्णेन पूर्णेन साधनेन प्र०—अत्र 'नित्यवीप्सयो' इति द्विर्वचनम् १ ६४ ४ [पर्वन् इति व्याख्यातम् । पर्वणा पदस्य वीप्साया द्वित्वम्]

पर्वतच्युतः ये पर्वतान् मेघान् च्यावयन्ति ते (मरुत.=मानवा) ५ ५४ ३ **पर्वतच्युते**=पर्वतान्मेघाच्च्युतो य पर्वत मेघ च्यावयति वा तस्मै (विदुषे शिल्पिने) ५ ५४ १

क प्रत्यय । पर्णमिनि व्याख्यास्यते]

पर्णम् पत्रम् ४ २७ ४ पक्षम् १ ११६ १५ प्रजापालनम् ४ ४० ३ **पर्णाय**=य प्रतिपालयति तस्मै (पुरुषाय) १६ ४६ **पर्णे**=पर्णवच्चञ्चले जीवने भा०—क्षणभङ्गुरे जीवने ३५ ४ चलिते पत्रे १२ ७६ **पर्णैः**=पक्षै ११८३ १ [पॄ पालनपूरणयो' (जु०) धातो 'धापॄवस्यज्यतिभ्यो न' उ० ३ ६ सूत्रेण न प्रत्यय । गायत्री वै पर्ण तै० ३ २ ११ सोमो वै पर्ण श० ६ ५ ५ १ ब्रह्म वै पर्ण तै० १ ७ १६ ३. राष्ट्र वै पर्ण श० ६ ५ ११]

पर्णयम् पर्णानि परप्राणानि वस्तूनि याति प्राप्नोति त चौरम् १ ५३ ८ [पर्णोपपदे या प्रापणे (ग्रदा०) धातो कर्त्तरि क प्रत्यय]

पर्णशदाय य पर्णानि शीयते छिनत्ति तस्मै (पुरुषाय) १६ ४६ [पर्णोपपदे शद्लृ शातने (भ्वा०) धातोर्मूलविभुजादित्वात् क कर्त्तरि]

पर्णा पर्णानि ११८२ ७ [पर्णप्राति० नपुसके जस शेर्लोपश्छन्दसि । पर्णमिति व्याख्यातम्]

पर्णिनः पक्षिण ६ ४६ ११ [पर्णप्राति० मत्वर्थे इनि प्रत्यय]

पर्तृभिः पालकै (शुभगुणै) ६ ४८ १० [पॄ पालनपूरणयो (जु०) धातो कर्त्तरि तृच्]

पर्यक्रमीत् परिक्राम्यति ४ १५ ३ [परि+क्रमु पादविक्षेपे (भ्वा०) धातोर्लुङ्]

पर्यगात् परित सर्वतोऽगाद् व्याप्तवानस्ति प० वि० सब मे व्यापक है स० प्र० २४४, ४० ८ सर्वतो व्याप्तोऽस्ति ४० ८ आकाश के समान सब जगह मे परिपूर्ण (व्यापक ईश्वर), आर्याभि० २ २, ४० ८ [परि+इण् गतौ (ग्रदा०) धातोर्लुङ् । 'इणो गा लुङि' सूत्रेण गादेशे सिचो लोपे च रूपम्]

पर्यगृभ्णा. सर्वतो गृहाण ५ ३१ ७ [परि+ग्रह उपादाने (क्र्या०) धातो लड् सामान्यकाले]

पर्य्यतिष्ठत् सर्वत आवृत्य स्थित १ ३२ ८ [परि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लङ् । शिति धातोस् तिष्ठादेश]

पर्यधत्थाः सर्वतो दधासि दधाति वा प्र०—अत्र लडर्थे लङ् पक्षे व्यत्ययश्च २ १७ [परि+डुधाञ् धारणपोषणयो (जु०) धातोर्लङ्]

पर्यनुवाति सर्वतोऽनुगच्छति ६ १५. [परि+अनु+वा गतिगन्धनयो (ग्रदा०) धातोर्लट्]

पर्यनेषत सर्वतोऽनेपत ३५ १८ [परि+णीञ् प्रापणे (भ्वा०) धातोर्लङ् । 'व्यत्ययो बहुलम्' इति द्विविकरणता (शप् सिप् च)]

पर्यपश्यत् सर्वत पश्येत् ३ २६ ८ सर्वत पश्यति ३२ १२ **पर्यपश्यन्**=सर्वत पश्येयु ११६८ ६ **पर्यपश्यन्त**=परित पश्यन्ति ११४६ ४ [परि+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लङ् । 'पर्यपश्यन्त' प्रयोगे व्यत्ययेनात्मनेपदम्]

पर्यभवत् सर्वतो भवति ३२ १२ **पर्यभूवन्**=परितस्सर्वनस्तिरस्कुर्वन्ति १ ३३ १० [परि+भू सत्तायाम् (भ्वा०) धातो सामान्ये लड्]

पर्यभूषत् सर्वतो भूषत्यलङ्करोति २ १२ १ [परि+भूष अलकारे (भ्वा०) धातोर्लङ् । पर्यभूषत्=पर्यगृह्णात् पर्यरक्षद् अत्यक्रामदिति वा नि० १० १०]

पर्यभूषयन् सर्वतो भूषयेयु, भा०—सर्वत सुभूषिता भवन्ति ३३ २२ [परि+भूष अलङ्कारे (चुरा०) धातोर्लङ्]

पर्यमथ्नात् सर्वतो मथ्नाति १ ९३ ६ [परि+मन्थ विलोडने (क्र्या०) धातोर्लङ्]

पर्ययच्छत् सर्वतो यच्छेत् १ ६१ ११ [परि+यमु उपरमे (भ्वा०) धातोर्लङ् । 'इषुगमियमा छ' इति सूत्रेण छकारादेश]

पर्यवदन् सर्वत उपदिशन्तु भा०—विद्या प्रदद्यु १२ ६१ [परि+वद व्यक्ताया वाचि (भ्वा०) धातोर्लङ्]

पर्यवसृष्टा सर्वत शत्रुप्रेरिता (दिद्युत्=न्यायदीप्ति) ७ ४६ ३ [परि+अव+सृज विसर्गे (तुदा०) धातो क्त । तत स्त्रिया टाप्]

पर्यवृञ्जन् परिवृञ्जन्ति ३ ५६ ४ [परि+वृजी वर्जने (रुधा०) धातोर्लङ्]

पर्यश्नोतु सर्वतोऽश्नुताम्, व्याप्नोतु अ०—सर्वत प्राप्नोतु प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ३६ **पर्यश्याम**=सर्वत प्राप्नुयाम ३ ११ ८ [परि+अशूङ् व्याप्तौ सघाते च (भ्वा०) धातोर्लोट् । व्यत्ययेन परस्मैपदम् । 'पर्यश्याम' प्रयोगे लिङ् । परस्मैपद तु व्यत्ययेनैव]

पर्यषस्वजत् परिष्वजति ११८२ ७ [परि+ष्वञ्ज परिष्वङ्गे (भ्वा०) धातोर्णिजन्ताल् लुङ्]

पर्यसर्पत् परित सर्वतो विजानीत ११६१ १२ [परि+सृप्लृ गतौ (भ्वा०) धातोर्लङ्]

पर्यस्थात् सर्वतस्तिष्ठेत् ४ ६ ४ [परि+ष्ठा गति-

[पर्वतोपपदे च्युङ् गतौ (भ्वा०) धातो कर्त्तरि क्विप्। पर्वतमिति व्याख्यास्यते]

पर्वतम् पर्वताकार मेघम् ५ ३२ १ पर्वतमिवोच्छ्रितम् (अश्मान=मेघम्) ४ ५६ ४ मेघाश्रित जलमिव पर्वताश्रित शत्रुम् १ ५७ ६ **पर्वतस्य**=प्र०—पर्वत इति मेघनाम निघ १ १०, १० १६ शैलस्य ५ ३६ २ **पर्वतः**=पर्वताऽऽकारो घनसमूहवान् मेघ १ ५४ १० पक्षीव पर्ववान् मेघ ५ ४५ ३ **पर्वतान्**=मेघान् शैलान् वा ५ ४६ ३ शैलानिवोच्छ्रितान् मेघान् ३ २६ ४ **पर्वताः**=जलप्रदा मेघा ५ ४१ ६ ह्रस्वा महान्त शैला १८ १३ **पर्वते**=गिरौ मेघे वा १ ५७ २ पर्वताकारे (अश्मन्=अश्मनि मेघे) १७ १ **पर्वतेन**=ज्ञानेन ब्रह्मचर्यादिना वा ३५ १५ **पर्वतेभिः**=मेघै सह ४ ३४ ८ **पर्वतेभ्यः**=गिरिभ्य ३० १६ **पर्वतेषु**=अभ्रेषु २ १२ ११ शैलेषु मेघावयवेषु वा १ ८४ १४ [पर्व पूरणे (भ्वा०) धातो 'भृमृदृशियजिपर्वि०' उ० ३ ११० सूत्रेणातच्प्रत्यय । पर्वत इति मेघनाम निघ० १ १० पर्ववान् पर्वत पर्व पुन पृणाते प्रीणातेर्वा नि० १ २० पर्वतम्=मेघम् नि० १० ६ 'तप् पर्वमरुद्भ्या वक्तव्य' इति पर्वन्प्राति० मत्वर्थे तप्]

पर्वता इव यथा मेघा शैला वा धर्त्तार सन्ति तथैव मूर्त्तद्रव्यधर्त्तार (रुद्रा=वायव) १ ६४.३ [पर्वता इव पदयो समास]

पर्वतासः मेघा ६ ५२ १ शैला ६ ५२ ४ पर्वताकारा मेघा ३ ३० ३ पर्वाण्युरसवा विद्यन्ते येषान्ते (राजजना) ३३ ५० प्र०—अत्र 'पर्वमरुद्भ्या तप्' इति तप्प्रत्यय शैला इवोच्छ्रिता मेघा ४ १७ २ [पर्वत इति व्याख्यातम् । ततो जसोऽसुगागम । विष्णु पर्वताना (अधिपति) तै० स० ३ ४ ५ १]

पर्वती पर्वण=पर बहुज्ञान विद्यतेऽस्या क्रियाया सा पर्वती (धिषणा=धारणावती द्यौ), प्र०—अत्र सम्पदादित्वात् क्विप्, भूम्नि मतुप् 'उगितश्च' इति ङीप् । प प्रशस्त प्रापण यस्या सा (धिषणा=वाग्, वेदवाणी, बुद्धि), अ०—ब्रह्मज्ञानवती धिषणा प्र०—अत्र प्रशसार्थे मतुप् १ १६

पर्वतेष्ठाम् पर्वते मेघे स्थिता विद्युतमिव शुद्धस्वरूपम् (परमात्मानम) ६ २२ २ [पर्वतोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्विप् । सप्तम्या अलुक्]

पर्वशः सन्धित (भा०—शरीराऽवयवान्) २३ ४२ अङ्गमङ्गम् १ ५७ ६ [पर्वन्प्राति० वीप्साया शस्-प्रत्यय । पर्वन् इति व्याख्यातम्]

पर्शवः परानन्यान् शृणन्ति हिंसन्ति ते पर्शव पार्श्वस्था मनुष्यादय प्राग्निन १ १० ५ ८ [परोपपदे शॄ हिंसायाम् (क्र्या०) धातो 'आङ्परयो शमिशृभ्या डिच्च' उ० १ ३३ सूत्रेण कु प्रत्यय । पर्शु स्पृशते नि० ४ ३ पर्शवो बृहत्य श० ८ ६ २ १० पर्शव (बहुवचने) परशव उ ह वै पड्क्तय कौ० १० ४]

पर्षणिम् सेचनीयाम् (नावम्) १ १३१.२ [पृषु सेचने (भ्वा०) धातोर्बाहु० औणादिकोऽनि प्रत्यय]

पर्षत् सिञ्चेत् १ १८६ ३ पार प्रापयतु ३ २० ४ सन्तारयति १ ६ ११ **पर्षति**=पारयति ५ २५ १ **पर्षथ**=सिञ्चत, दत्त १ ८६ ७ **पर्षथः**=सिञ्चथ ५ ७३ ८ **पर्षन्**=सिञ्चन्तु ४ ३६ १ पारयति ७ ६० ७ उल्लङ्घेयु ७ ४० ४ **पर्षि**=सिञ्चसि १ १२६ ५ पालयसि प्र०—अत्र विकरणाभाव ३ १५ ३ पिपूरय २ ७ २ पारयसि २ ३३ ३ पूरयसि ७ २३ २ [पृषु सेचने (भ्वा०) धातोर्लेट् । 'पर्षन्' प्रयोगे लङ् । अडभाव । 'पर्षि' प्रयोगे लट् । विकरणस्य शपो लुक् । पॄ पालनपूरणयो (जु०) धातोर्वा रूपम्]

पर्षि सिक्तमुदकम् १ १७४ ६ [पृषु सेचने (भ्वा०) धातोर्बाहु० औणादिक इन् प्रत्यय]

पलक्षी पले चञ्चले अक्षीणी यस्या सा (पक्षिणी) २४ ४ [पल-अक्षिपदयो समासे शकन्ध्वादित्वात्पररूपम्]

पलस्तिजमदग्नयः प्रजमिता विदिता अग्नय पलस्तयो वयोज्ञानवृद्धाश्च जमदग्नयो यैस्ते (सज्जना) ३ ५३ १६ [पलस्ति-जमदग्निपदयो समास । जमदग्नय प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा नि० ७ २५]

पलिक्नीम् श्वेत-केशाम् (स्त्रियम्) ३० १५ **पलिक्नीः**=श्वेतकेशा (युवतय) ५ ३ ४ [पलितप्राति० स्त्रिया 'छन्दसि क्नमित्येके' अ० ४ १ ३६ वा० सूत्रेण तकारस्य क्नम् ङीप् च । पलितमिति व्याख्यास्यते]

पलितस्य प्राप्तवृद्धाऽवस्थस्य (विदुषो जनस्य) १ १६४ १ **पलितः**=जातश्वेतकेश (युवा पुत्र) १ १४४ ४ श्वेत-केश (दूत=वृद्धो दूत इव परमात्मा) ३ ५५ ६ [पलितस्य=पालयितु नि० ४ २५ फल निष्पत्तौ (भ्वा०) धातो 'फलेरितजादेश्च प' उ० ५ ३४ सूत्रेणेतच् प्रत्यय आदेश्च पकारादेश]

पवताम् चलतु ३६ १० **पवते**=पवित्रीकरोति १६ ५ विजानीयात् प्र०—लेट्-प्रयोग , पूतो भवेत्, ज्ञान-

१४ ११ ११ पशव कालेयम् (नाम) ता० ११ ४ १० पशवो वै रयिष्ठम् (नाम) ता० १४.११ ३१ पशव शक्वर्य ता० १३ १ ३ पशवो वै रेवत्यो मधुप्रियम् ता० १३ ७ ३ पशवो वै रैवत्य ता० १३ १० ११. रेवन्तो हि पशवस्तस्मादाह रेवती रमध्वम् इति श० २ ३ ४ २६ रनसो यज्ञ इति पशव इति श० ११ ६ ३ ६ पशवो वै बर्हि गो० २ ४ पशवो वै यूपमुच्छ्रयन्ति श० ३ ७ २ ४ पशवश्छन्दोमा गो० ५ १६ पशवो वै छन्दासि श० ७ ५ २ ४२ पाङ्क्ता वै पशव श० १ ८ १ १२ गायत्रा पशव तै० ३ २ १ १ त्रैष्टुभा पशव कौ० १० २ पशवो जगती कौ० १६ २ पशवो बृहती कौ० १७ २ बार्हता पशव श० १३ ४ ३ १५ पशवो वा उष्णिक् ता० ८ १० ४ पशवो वालखिल्या ता० २० ६ २ पशवो वा अक्षरपङ्क्तय कौ० १६ ८ पशव पृष्ठ्यानि कौ० २१ ५ पशव प्रयाज गो० ३ १६ पशवो वै प्रयाजा कौ० ३ ४ पशव परिमाद श० १० १ २ ८ अथ य स्तुति परिनिर्दिष्टि ते पशव श० १ ३ २ १६ पशवो वै पुरीषम् श० १२ ५ १ ७ पशवो वै वयासि श० ६ ३ ३ ७ वपुर्हि पशव गो० ५ ६ पुष्प पशूनाम् (अधिपति) ता० ६ २ ७ ओषधय पशव मै० २ ५ १]

पशुपतये पशूना पालकाय (रुद्राय=दुष्टाना रोदकाय) २४ ३ **पशुपतिम्**=पशूना पालक, जगद्धर्त्तार रुद्र सर्वप्राणम् ३६ ८ **पशुपतेः**=पशुरक्षकस्य पुरुषस्य ३६ ६ [पशु-पतिपदयो समास । 'पति समास एव' इति घिसज्ञकत्वाद् गुण । पशुपति=ओषधयो वै पशुपतिस्तस्माद् यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति श० ६ १ ३ १२. यत्पशुपतिर्वायुस्तेन कौ० ६ ४]

पशुपाः य पशून् पाति स (जन) ४ ६ ४. य पशून् पाति रक्षति स (देव=विद्वज्जन) ६ ५८ २ [पशूपपदे पा रक्षणे (अदा०) धातो कर्त्तरि क्विप्]

पशुपा इव यथा पशुपालकस्तथा (पुरुष) १ ११४ ६ यथा पशुपालको गवादिभ्यो दुग्धादिक गृहीत्वा गोस्वामिने समर्पयति तथा १ १४४.६ [पशुपा-इवपदयो समास । पशुपा=पशूपपदे पा रक्षणे (अदा०) धातो कर्त्तरि क्विप्]

पशुमत् पशवो विद्यन्ते यस्मिँस्तत् (श्रव=श्रवणमन्न वा) ४ ३८ ५ [पशुप्राति० भूम्न्यर्थे प्रशसाया वा मतुप्]

पशुमत्यै बहव पशवो विद्यन्ते यस्या तस्यै (प्रजायै) ५ ४१ १३ [पशुप्राति० भूम्न्यर्थे मतुवन्तात् टीप्]

पशुमान् बहुपशुयुक्त (गातु=भूमि) ३ ५४ १८ [पशुप्राति० भूम्न्यर्थे मतुप् । य एव विद्वानग्निमुपतिष्ठते पशुमान् भवति तै० स० १.५ ९ ३]

पशुरक्षि पशूना रक्षक (मनुष्य) ६ ४६ १२ [पशु-रक्षिपदयो समास । रक्षि=रक्ष पालने (भ्वा०) धातोरौणादिक इन्]

पशुपः पशून् ५ ४१ १ **पशुषे**=बन्धकाय (अग्नये=उपदेशकाय) १ १७ १० [पशूपपदे षण् सम्भक्तौ (भ्वा०) धातो 'जनसनखन०' अ० ३ २ ६७ सूत्रेण विट् । 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१. सूत्रेणात्वम् 'सनोतेरन' अ० ८ ३ १०८ सूत्रेण मूर्धन्य पशुषाप्राति० द्वितीयाबहुवचने रूपम्]

पशुसनि पशून् सनति सम्भजति येन त त् (अपत्यम्) १९४८ [पशूपपदे षण सम्भक्तौ (भ्वा०) धातो हि० औणादिक इन्-प्रत्यय]

पशुसाधनी पशून् साध्नुवन्ति यया सा (पशुवर्धनक्रिया) ६ ५३ ६. [पशु-साधनीपदयो समास । साधनी=साध ससिद्धौ (स्वा०) धातो करणे ल्युट् । तत स्त्रिया ङीप्]

पश्चा पश्चिमा (दिक्) २ २७ ११ पश्चात् ४ १ १८ [अपरप्राति० अस्तातेरर्थे 'पश्चपश्चा च छन्दसि' अ० ५ ३ ३३ सूत्रेणा ऽऽत्प्रत्यय पश्चादेशश्च निपात्यते]

पश्चात् पश्चिमदेशात् ५ ११ पश्चिमाया दिशि वर्त्तमान (आदित्य) १३ ५६ पश्चिमत (देशात्) ३७ १२ [अपरप्राति० अस्तातेरर्थे (दिग्देशकालेषु) 'पश्चात्' अ० ५ ३ ३२ सूत्रेणाति. प्रत्यय पश्चादेशश्च निपात्यते]

पश्चात्सद्भ्यः ये पश्चात् सीदन्ति तेभ्य (देवेभ्य=दिव्यसुखप्रदेभ्यो जनेभ्य) ९ ३५. **पश्चात्सदः**=ये पश्चिमाया दिशि सीदन्ति ते (देवा=सर्वविद्याविदो विद्वज्जना) ९ ३६ [पश्चादिति व्याख्यातम्, तदुपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप् कर्त्तरि]

पश्चादोषाय पश्चाद् दोषदानाय ३० १७ ['पश्चा' इति व्याख्यातम् । पश्चा-दोषपदयो समास]

पश्य समीक्षस्व ३ २३ २ **पश्यत्**=ज्ञानदृष्ट्या पश्यति भा०—जानाति ३२ ८. पश्येत् प्र०—अत्र लड्यडभाव. १ १६४ १६ **पश्यत**=सम्प्रेक्षध्वम् ६.४ सम्यग् विजानीत १ २२ १६ **पश्यति**=प्रेक्षते १ २५ ११ **पश्यन्**=समीक्षन्ते १ १७४ ६ **पश्यन्ति**=सप्रेक्षन्ते

पवित्रवान् बहूनि पवित्राणि कर्माणि विद्यन्ते यस्य स (पावक) १ १६० ३. [पवित्रप्राति० भूम्न्यर्थे मतुप्]

पवित्रे पवित्रकरणहेतू प्राणाऽपानगती, ग्र०—शुद्धौ (वैष्णव्यौ=पवनपावकौ) १ १२ शुद्धाचरणे (वैष्णव्यौ= अध्येत्रध्यापकौ) १० ६ [पवित्र व्याख्यातम्। तस्य प्रथमाद्विवचने रूपम्]

पवीरवत् प्रशस्त पवीर फालो विद्यते यस्मिन् तत् (लाङ्गल=काष्ठम्) १२ ७१ [पवीरप्राति० प्रशसार्थे मतुप्। पवीर=पवि वज्रनाम (निघ० २ २०), तत इरन् मत्वर्थीयश्छान्दस। पवि शत्रो भवति यद् विपुनाति काय तद्वत् पवीरमायुधम्। तद्वान् इन्द्र पवीरवान् नि० १२ ३०]

पवीरवस्य वज्रध्वने १ १७४.४ [पवि-रव-पदयो समास। पूर्वस्य दीर्घ। पवि वज्रनाम निघ० २ २०]

पवीरवि यो धनादिरक्षार्थं पवीर शस्त्र वाति प्राप्नोति तस्मिन् (ग्रर्ये=वैश्ये) ३३ ८२ [पवीरोपपदे वा गति-गन्धनयो (ग्रदा०) धातो क प्रत्यय। सप्तम्यामकार-लोपश्छान्दस]

पवेथाम् प्राप्नुतम् ७ २७ प्रापयेयाम् ७ २८ [पवते गतिकर्मा (निघ० २ १४) धातोर्लोट्]

पशवः गवादय २० ६९ सिहादय १४ ३० गाय आदि सब पशु स० वि० १४५ अथर्व० १२ ५ १० **पशु**=पशुमिव प्र०—अत्र 'सुपा सुलुक्०' इति विभक्ते-र्लुक् ३ ५३ २३ **पशुना**=व्यवहृतेन विक्रीतेन गवादिना ४ २६ **पशुभिः**=हस्त्यश्वगवादिभि ५ २८ **पशुभ्यः**= पशुओ के लिए स० प्र० १५२ अथर्व० १४ २ १८. **पशुम्**=प्रसिद्धम् (गवादिकम्) १३ ४७ द्रष्टव्यम् (अश्वा-दिकम्) १३ ४८ पश्यन्तम् (कामासक्त रवपतिम्) ५ ६१ ५ सर्वद्रष्टारम् (परमेश्वरम्) ऋ० भू० १२८, ३१ १५ **पशुः**=पश्यकश्चतुष्पात् सिहादि ६ ६ यो दृश्यते भोग्य-पदार्थसमूह समक्षे स्थापित स प्र०—अत्र 'अर्जिदृशि-कमि०' उ० १ २७ इत्यौणादिक-सूत्रेणाऽस्य सिद्धि ३ ५७ दृश्य, द्रष्टव्य (अग्नि=वह्नि) २३ १७. **पशून्**=पशुवद् वर्त्तमानान् मूर्खत्वयुक्तान् गवादीन् वा १ ७२ ६ गोहस्त्यश्वादीन् ६ ३१ श्रिय प्रजा वा, प्र०— श्रीर्हि पशव शत० १ ६ ३ ३६ प्रजा वै पशव शत० १ ४ ६ १७ हरिणादीनारण्यान् ६ ३१ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'अर्जिदृशिकम्यमि०' उ० १ २७. उ प्रत्यय धातोश्च पशिरादेश। पशु=पश्यने नि०

पशव (अग्नि) एतान् पञ्चपशूनपश्यत्। पुरुषमश्व गामवि-मज यदपश्यत्तस्मादेते पशव श० ६ २ १ २ तएते सर्वे पशवो यदग्नि। श० ६ २ १ १२ अग्निर्हि देवाना पशु ऐ० १ १५ योनिर्वै पशूनामाहवनीय (अग्नि) कौ० १८ ६ रौद्रा वै पशव श० ६ ३ २ ७ वायुप्रणेत्रा वै पशव. श० ४ ४ १ १५ त्वष्टुर्हि पशव श० ३ ८ ३ ११ पशवो वै सविता श० ३ २ ३ ११ अन्तरिक्षदेवत्या खलु वै पशव तै० ३ २ १ ३ पशवो वै वैश्वदेवम् (शस्त्रम्) कौ० १६ ३ सप्त ग्राम्या पशव सप्तारण्या श० ३ ८ ४ १६ पशवो वै घृतश्चुत ता० ९ १ १७. पशवो वै हविष्मन्त श० १ ४ १ ९ पशवो वै हविष्पङ्क्ति कौ० १३ २ पशवो वै हरिश्रिय ता० १५ ३ १० श्रीर्वै पशव ता० १३ २ २ पशवो यश श० १२ ८ ३ १ शान्ति. पशव ता० ४ ५ १८ इन्द्रिय वै वीर्य रस पशव ता० १३ ७ ४ पशवो वै वसु ता० ७ १० १७ पशवो वै रयि तै० १ ४ ४ ९ पशवो वै राय श० ३ ३ १ ८ पशवो वै रायस्पोष श० ३ ४ १ १३ पुष्टि पशव श० ३ १ ४ ९ पौष्णा पशव श० ५ २ ५ ६ साहस्रा पशव कौ० २१ ५ पशव सहस्रम् ता० १६ १० १२ पशव शिपि तै० १ ३ ८ ५ पशवो वै मरुत ऐ० ३ १९ पशुर्वै मेध ऐ० २ ६ वाजो वै पशव ऐ० ५ ८ पशवो वै वाजिनम् तै० १ ६.३ १० अन्न पशव श० ६ २ १ १५ पशवो वै धाना गो० उ० ४ ६ पशवो वा इडा कौ० ३ ७ प्राणा पशव श० ७ ५ २ ६ गृहा वै पशव श० १ ८ २ १४ पशवो वा उत्तरवेदि तै० १ ६ ४ ३ पशवो वै चतुरुत्तराणि छन्दासि ता० ४ ४ ६ आत्मा वै पशु. कौ० १२ ७ यजमान पशु तै० २ १ ५ २. वज्रो वै पशव श० ६ ४ ४ ६ पशवो वै ग्रावाण ता० ९.९ १३ पशवो वै उक्थानि कौ० २८ १० पशव ऊपा श० ७ १ १ ६ पशवो वै नियुत ता० ४ ६ ११ प्रजा पशव सूक्तम् कौ० १४ ४ स्तोमो वै पशु ता० ५ १० ८ पशवो वै सप्तदश ता० १९ १० ७ पशवो वै प्रतिहर्त्ता ता० ६ ७ १५ पशव स्वर गो० उ० ३ २२ पशवो वै बृहद्रथन्तरे ता० ७ ७ १ पशवो वै श्यैतम् (साम) ता० ७ १० १३ पशवो वै वामदेव्यम् (साम) ता० ४ ८ १५ वाम हि पशव ऐ० ५ ६ पशवो वै वैरूपम् (साम) ता० ५ ३.१२ पशवो वै लोम (साम) ता० १ ३ ११ ११ पशवो वै रौरवम् (साम) ता० ७ ५ ८. पशवो वै यण्वम् (साम) [illegible] १३ ३ ६ पशवो वै श्रद्धय (साम) पशूनाम-[illegible] १ ५ ३४ पशव सद्यो विशीयग [illegible]
ता [illegible] पशवो वै सुरूप (साम) [illegible]

धातोर्लिट् । सम्प्रसारणमकारलोपश्च छान्दसः]

पाकम् परिपक्वव्यवहारम् १.१६४.२१. पचन्ति परिपक्वं ज्ञानं कुर्वन्ति यस्मिन् धर्म्ये व्यवहारे तम् १ ३१.१४ **पाकः**=ब्रह्मचर्यादितपसा परिपचनीयः (मनुष्य.) १.१६४.५. **पाकाय**=परिपक्वत्वाय ३ ९.७. परिपक्वव्यवहाराय ४.५ २. [डुपचष् पाके (भ्वा०) धातोर्घञ् प्रत्ययः । पाकः प्रशस्यनाम निघ० ३.४ पा पाने (भ्वा०) धातोर्वा 'अर्भकपृथुकपाका वयसि' उ० ५ ५३. सूत्रेण कन् प्रत्ययो निपात्यते]

पाकारोः मुखादिपाकस्यारोर्मर्मच्छिदः शूलस्य च १२.९७ [पाक-अरुशब्दयोः समासः । पाकमिति व्याख्यातम् । अरु=ऋ गतौ (भ्वा०) धातोर् औणादिको बाहु० उ. प्रत्ययः]

पाक्या विद्यायोगाभ्यासेन परिपक्वधिया (देवान्=विदुषो जनान्) प्र०—अत्र विभक्तेराकारादेशः १ १२०.४. पाकोऽस्याऽस्तीति पाकी (विज्ञानपुरस्सरः परमात्मा) प्र०—अत्र 'सुपां सुलुक्०' इति ड्यादेशः २ २७.११ [पाक इति व्याख्यातम् । ततो मत्वर्थ इनिः । पाकी प्राति० 'सुपां सुलुक्०' इति ड्यादेशः]

पङ्क्तिराधसम् यः पङ्क्तीः समुदायान् राध्नोति तम् (यज्ञम्) ३७.७. ['पङ्क्ति' इत्युपपदे राध समिद्धौ (स्वा०) धातोरौणादिकोऽसुन्-प्रत्ययः.]

पाङ्क्तान् पङ्क्तिरूपेण गन्तॄन् पक्षिविशेषान् २४.२६. **पाङ्क्ताय**=पङ्क्तिषु साधवे (शाक्वराय=शक्तिजाय यज्ञाय) २९ ६०. **पाङ्क्तेन**=पङ्क्तिप्रकाशितेन (छन्दसा=स्वच्छेनार्ऽथेन) १३.५३. [पङ्क्तिप्राति० 'तत्र साधुः' इत्यर्थे भवार्थे वा अण् प्रत्ययः]

पाजः बलम् प्र०—पाजस् इति बलनाम निघ० २ ९, १ ११५ ५ **पाजः**=बलम् ७ ३ ४ प्र० पातेर्बले जुट् च उ० ४.२०३. इत्यसुन् १३ ९ अन्नादिकम् ७.१० १. **पाजसा**=बलेन ११४९ [पा रक्षणे (अदा०) धातोः 'पातेर्बले जुट् च' उ० ४.२०३. सूत्रेणासुन्प्रत्ययः । पाज अन्ननाम निघ० २ ७ बलनाम निघ० २.९ पाज =पालनात् नि० ६ १२]

पाजसी रक्षणनिमित्ते (द्यावाक्षामा=सूर्यपृथिव्यौ) प्र०—अत्र विभक्तेः पूर्वसवर्णः. 'पातेर्बले जुट् च' उ० ४.२०३ अनेन पा धातोरसुन् जुडागमश्च १ १२१.११. [पाजस् इति व्याख्यातम्]

पाजस्यम् पाजस्वन्नेषु साधु (यवादिकमन्नम्) २५ ८. [पाजस् इति व्याख्यानम् । तत्र 'तत्र साधुः' इत्यर्थे यत्]

पाञ्चजन्यम् पञ्चसु जनेषु प्राणादिषु भवां प्राप्तयोगसिद्धिम् (ऋषि=वेदपारगाध्यापकम्) १ ११७.३. पञ्चजनाः प्राणा बलवन्तो यस्य तदपत्यम् ५ ३२ ११. **पाञ्चजन्यः**=पञ्चसु सकलविद्येषु अध्यापकोपदेशक-राजसभा-सेना-सर्वजनाधीशेषु जनेषु भवः (इन्द्र=सेनाद्यधिपतिः) प्र०—अत्र 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' अ० ४ ३ ५८. इति वार्त्तिकेन ञ्य प्रत्ययः १ १००.१२. पञ्चानां पञ्चसु वा जनेषु साधुः (अग्नि =विद्वज्जन) २६ ९. पांच प्राणों का जनक (ईश्वर) आर्याभि० १ ३४ ऋ० १ ७ १० १२. **पाञ्चजन्याः**=पञ्चजनेभ्यो हिताः (अग्नयः =आहवनीयादयः पावकाः) प्र०—पञ्चजनाः इति मनुष्यनाम निघ० २ ३, १८.६७ [पञ्चन्-जनपदयोः समासे भवार्थे 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' अ० ४ ३ ५८. वा० सूत्रेण ञ्यः प्रत्ययः । पाञ्चजन्यया=पञ्चजनीनया नि० ३ ८ पञ्चजनाः =गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः नि० ३.८. एष वा अग्निः पाञ्चजन्यः तै० म० ५ ३ ११ ३]

पाञ्चजन्यासु पञ्चसु दिनेषु प्राणेषु भवासु (कृष्टिषु=मनुष्यादिप्रजासु) ३ ५३ १६ [पाञ्चजन्यमिति व्याख्यातम् । ततः स्त्रियां टाप्]

पाणिघ्नम् यः पाणिभ्यां हन्ति तम् (पुरुषम्) ३० २० [पाणीत्युपपदे हन हिंसागत्योः (अदा०) धातोः 'कृतो बहुलं वा' इति वा० सूत्रेण टक्]

पाणिना स्तुतिसमूहेन १ २० किरणसमूहेन व्यवहारेण १.१६ **पाणिभिः**=करैः २ ३१ २ **पाणी**=बाहू ४ २१ ९ प्रशंसनीयौ (बाहू=भुजौ) ६ ७१ १ [पाणि =पण व्यवहारे स्तुतौ च (भ्वा०) धातोः 'पणिपणाय्योरुडायलुकौ च' उ० ४ १३३ सूत्रेण इण्प्रत्ययः आयलुक् च । पाणिः पणायते पूजाकर्मणः प्रगृह्य पाणी देवान् पूजयन्ति नि० २ २६ पाणी वै गभस्ती श० ४.१.१ ९]

पात् रक्षतु ४.५५ ५. **पात**=रक्षत २७ २८ **पातम्**=रक्षत, प्र०—अत्र व्यत्ययः ४९ रक्षतम् १ १२० ४. प्राप्नुतम् १.४६ ५ पालयत १ ९३ ८. पिबतम् १ १५३ ४ **पाताम्**=रक्षताम् १ १८५ १० **पाति**=रक्षति ५.१२.६. प्राप्नोति ३ ५ ५ पालयति ४.५ ८. **पातु**=रक्षति प्र०—अत्र लडर्थे लोट् २ ५. रक्षतु ४ १६ पालयतु पालयति वा ४ १५ **पाथ**=रक्षका भवथ १ ८६ १. प्राप्नुत ८ ३१. **पाथः**=रक्षथ. १.१५९.३ **पान्ति**=

१.२२ २० अवलोकन्ते ६ ५ देखते हैं आर्याभि० १ २१ ऋ० १२७२० **पश्यात्**=सम्प्रेक्षते ४ २५ ४ **पश्यात्**=पश्येयु १ ११३ ११ **पश्यामि**=सप्रेक्षे १ ३०. **पश्येम**=हम देखें आर्याभि० २ २७, २५ २१ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लोट् । शिति पश्यादेश । अन्यत्र लङ्, लोट्, लट्, लेट् लिङ् च]

पश्यद्भ्य: सप्रेक्षमाणेभ्य (मनुष्येभ्य) १ ११३ ५ **पश्यन्**=सत्याऽसत्यं प्रेक्षमाण (सुवीर पालको जन) १ ११६ २५ पर्य्यालोचमान (गोतम =विद्वज्जन) १ ८८ ५ विजानन् (परमेश्वर) ७.६० २. समीक्षमाण (वैश्वानर =ब्रह्मचारी जन) ६.९ ३ दर्शयन् (सविता= सूर्य) प्र०—अत्रान्तर्गतो ण्यर्थ ३३ ४३ देखता हुआ (पति) स० वि० १२२, अथर्व० १४ १ ५७ दिखाता हुआ (सविता=सूर्य) स० प्र० ३१३, ३३ ४३ **पश्यन्तौ**= समीक्षमाणौ (देवौ=देदीप्यमानौ विद्वज्जनौ) २९ ७ [दृशिर् प्रेक्षणे (भ्वा०) धातो शतृ-प्रत्यय । शिति पश्यादेश]

पश्व इष्टि: पशो सङ्गति १ १८० ४ [पश्व-इष्टि-पदयो समास. पश्व =पशुप्राति० पष्ठी । गुणाऽभावश्छान्दस 'जसादिषु छन्दसि वावचनम्' अ० ७ ३ १०९ (वा०) इति विकल्पनात् । इष्टि =यज देवपूजासगतिकरण-दानेषु (भ्वा०) धातो स्त्रियां क्तिन्]

पश्वयन्त्रास: पश्वानि दृष्टानि यन्त्राणि यैस्ते (मनुष्या) ४ १ १४. [पश्व-यन्त्रपदयो समासे जसोऽसुगागम]

पश्व: पशून् ४ ६ ३ गवादीन् (पशून्) ६ १ १२. पशो ४ २ १८ **पश्वा**=अपहृतस्य पशो स्वरूपाङ्गपाद-चिह्नाऽन्वेषणेन १ ६५ १ **पश्वे**=पशुसमूहाय १ ४३ २ [पशव इति व्याख्यातम् । पशुप्राति० 'जसादिषु छन्दसि वा वचनम्' अ० ७ ३ १०९ वा० सूत्रेण गुणादीना विकल्पे यणादेशे रूपम्]

पश्विषे पशूनामिषे वृद्धीच्छायै १ १२१ ७ [पशूपपदे इषु इच्छायाम् (तुदा०) धातो सम्पदादित्वात् क्विप् स्त्रियाम्]

पष्ठवाट् य पष्ठेन पृष्ठेन वहति स उष्ट्रादि प्र०— वर्णव्यत्ययेन ऋकारस्याऽऽकारादेश १४ ९ प्र०—इद पद पृषोदरादिना सिद्धम् २१ १७ [पृष्ठोपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' अ० ३ २ ६४ सूत्रेण ण्वि प्रत्यय । ऋकारस्याकारश्छान्दस]

पष्ठौही वडवाऽऽदि १८ २७ [पष्ठवाट् इति व्याख्यातम् । तत. 'तस्येदम्' इत्यण्-प्रत्यये स्त्रियां ङीपि 'वाह ऊठ्' इत्यूठि 'एत्येधत्यूठ्सु' इति वृद्धि । प्रजनन वै पष्ठौही । प्रजनन ब्रह्मा ज० २ २०३ धात्रे द्वादशकपाल, पष्ठौह्य-प्रवीता दक्षिणा काठ० १५ ३]

पस: राष्ट्रम् २३ २२ लिङ्गम् २० ९. राष्ट्रं पस श० १३ २९ ६. भगस्सौभाग्य पस काठ० ३८ ४]

पस्त्यसद: ये पस्त्येषु गृहेषु सीदन्ति तान् (नॄन्= उत्तमविदुषो जनान्) ६.५१ ९. [पस्त्योपपदे षद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप् । पस्त्य गृहनाम निघ० ३ ४]

पस्त्याभि: पस्त्यानि गृहाणि विद्यन्ते यासु भूमिषु ताभि प्र०—पस्त्यमिति गृहनाम निघ० ३ ४ तत 'अर्शआदि-भ्योऽच्' अ० ५ २ १२७. इत्यच्-प्रत्यय १ ४०.७ **पस्त्यानाम्**=गृहाणा जीवशरीराणा वा १ १६४ ३० **पस्त्याम्**= गृहम् ४ ५५ ३ **पस्त्यासु**=पस्त्येभ्यो गृहेभ्यो हितासु प्रजासु १ २५ १० गृहशालासु १० ७ न्यायगृहेषु १० २९ [पस्त्यम् गृहनाम (निघ० ३ ४) ततो मत्वर्थे 'अर्शआदिभ्यो ऽच्' अ० ५ २ १२७ सूत्रेणाच् । अथवा हितार्थे यत् । विशो वै पस्त्या श० ५ ३ ५ १९]

पस्त्यावत् गृहवत् २ ११ १६ **पस्त्यावत:**=प्रशस्तानि पस्त्यानि गृहाणि विद्यन्ते यस्य (विदुषो जनस्य) १ १५१ २ प्रशमितानि पस्त्यानि विद्यन्ते येषु तान् (क्षयान्=निवासान्) ४ ५४ ५ [पस्त्यमिति गृहनाम निघ० ३ ४ तत प्रशसाया मतुप् । मतुपि पूर्वस्य दीर्घश्छान्दस]

पस्पशे स्पृशति कर्त्तुं शक्नोति वा प्र०—अत्र लडर्थे लिट् १ २२ १९ बध्नाति प्र०—अत्र लडर्थे लिट् ६ ४ समर्थ हुआ आर्याभि० १.२३ ऋ० १२७१९ [स्पश बाधनस्पर्शनयो (भ्वा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

पस्पृधानम् पुन. पुन स्पर्धमानम् (एतश=अश्वम्) १ ६१ १५ **पस्पृधानेभ्य:**=स्पर्द्धमानेभ्य ईप्समानेभ्यो वा (नृभ्य =मनुष्येभ्य) २ १९ ४ [स्पर्द्ध सङ्घर्षे (भ्वा०) धातो शानचि सम्प्रसारणमकारलोपश्च छान्दसम् । मुगागमोऽपि न आगमशासनस्याऽनित्यत्वात्]

पस्पृधानास: स्पर्धमाना (प्रजा) ७ १८ ३. [स्पर्ध संघर्षे (भ्वा०) धातो शानच् । ततो जसोऽसुक् । आगम-शासनस्याऽनित्यत्वात् मुग् आगमो न भवति]

पस्पृधे स्पर्द्धन्ते ६ ३४ १ [स्पर्ध सघर्षे (भ्वा०)

पाद ग्र० १३८३८ पाद पद्यते नि० २.८ दिश पादा तै० म० ७ ५ २५ १]

पादा चरणौ प्र०—ग्रत्राऽऽकारादेश ८ २३ पादौ ६ २९ ३ मूर्खत्वादिनीचगुणैरुत्पन्नौ (शूद्रौ) ऋ० भू० १२५,३१ १० पद्यते गम्यते याभ्या गमनागमनाभ्या तौ (चरणौ) प्र०—ग्रत्र 'सुपा सुलुक्०' इत्याकारादेश १ २४ ८ [पद गतौ (दिवा०) धातोर्घञ् । 'सुपा सुलुग्०' इत्याकारादेश]

पादि गच्छ ११ ४६ प्रनिपद्यताम्, प्राप्यताम् १ १०५ ३ पाद्येत ६ २० ५ [पद गतौ (दिवा०) धातोर्लुङि रूपम् । ग्रडभावश्छान्दस]

पान्तम् रक्षन्तम् (इन्द्र=परमैश्वर्यम्) ७ ३३ २ [पा रक्षणे (ग्रदा०) धातो शतृप्रत्यय । ग्रहर्वै पान्तम् । ता० ६ १ ७ पान्तम्=पानीयम् । नि० ७ २५ पान्तो वै पुरुष जै० ३ ६५ रात्रि पान्तम् । जै० १ २१४]

पान्ता रक्षकौ (ग्रध्यापकोपदेशकौ) १ १२२ ४ [पा रक्षणे (ग्रदा०) धातो शत्रन्तात् प्रथमाद्विवचनस्याकारादेश]

पापतीति प्रकर्षेण पुन पुन पतति गच्छति ६ ६ ५ [पत्लृ गतौ (भ्वा०) धातोर्यङ्लुगन्ताल्लट्]

पापत्वाय पापस्य भावाय ७ ३२ १८ [पापप्राति० भावे त्व प्रत्यय]

पापया ग्रधर्मरूपया (क्रियया) १ २९ ५ [पापप्राति० स्त्रिया टाप्]

पापस्य पापाऽऽचारस्य (रक्षस) १ १२९ ११ **पापा:**=ग्रधर्माऽऽचरणा (जना) १ १९० ५ [पा रक्षणे (ग्रदा०) धातो 'पानीविषिभ्य प.' उ० ३ २३ सूत्रेण प प्रत्यय । पान्ति रक्षन्त्यस्मादिति विग्रह । पापप्राति० मत्वर्थीयस्य लुक् । पाप पानाऽपेयाना पापत्यमानोऽवाङेव पततीति वा पापत्यतेर्वा स्यात् नि० ५ २]

पापास: ग्रधर्माचारा (दुर्जना) ४ ५ ५ [पापप्राति० जसोऽसुगागम । पापास =पापा नि० ६ २५]

पाप्मना ग्रधर्मात्मना जनेन ६ ४ पापेन १९ ११ **पाप्मने**=पापाऽऽत्मने (दुर्जनाय) ३० १८ पापाऽऽचरणाय ३० ५ **पाप्मा**=ग्रपराध ६ ३५ **पाप्मानम्**=दुष्टकर्मकारिणम् (भा०—दुष्ट जनम्) २६ १० रोगादिकम् १२ ९९ [पा रक्षणे (ग्रदा०) धातो पा पाने (भ्वा०) धातोर्वा 'नामन्-सीमन्व्योमन्०' उ० ४ १५१ सूत्रेण मनिन्-प्रत्यय पगागमश्च निपात्यते । पाप्मा वाऽग्रशस्ति श० ६.३ २ ७ पाप्मा वै सपत्न श० ८.५ १ ६ पाप्मा वै वृक श० ११ ५ ७ १३ पाप्मा वै मृत्यु श० ६ ३ ३ ८ वरुणो वाऽएत गृह्णाति य पाप्मना गृहीतो भवति श० १२.७ २ १७. श्रमो वै पाप्मा श० ६ ३ ३ ७ पाप्मा वै वृत्र. श० ८.५ १ ६ पाप्मा मृग काठ० १४ ६ भ्रातृव्यो वै पाप्मा जै० ३ २२२]

पायनाय पानाय १ ११६ ६ [पा पाने (भ्वा०) धातोर्णिजन्तात् ल्युट् । योऽन्तादेश]

पायय पाययति वा ग्र०—तत्पाने हेतुरस्ति १ १५ ३ [पा पाने (भ्वा०) धातोर्णिजन्ताल्लोट् । व्यत्ययेन परस्मैपदम्]

पाययते रक्षा कारयते १ ५६ १ [पा रक्षणे (ग्रदा०) धातोर्णिजन्ताल्लट् । लुगागमस्तु न छन्दसि सर्वविधीना विकल्पनात्]

पायव: रक्षका (ग्राप्ता भृत्या) ४ ४.१३ पालका (राजपुरुषा) ५ १२ ४ **पायवे**=पालनाय ६ ४७ २८ गुह्यावयवदाहाय ३९ १० **पायुना**=पाय्विन्द्रियेण २५ ७ **पायुभि:**=रक्षणै रक्षकैर्वा ५ ३० २ रक्षणोपायै १ १८९ ४ रक्षकै (विद्वद्भि) १ १४३ ८ रक्षादिभि ३४ १३ **पायुम्**=पात्यनेन त गुह्येन्द्रियम् ६ १४ य पिबति तम् (जनम्) २ २ ४ **पायु:**=पालनकर्त्ता (परमेश्वर) १ ८९ ५ पालक (ग्रग्नि =नृपति) २ १ ७ गुदेन्द्रियम् २० ८ सर्वस्य रक्षक (ईशान =ईश्वर) २५ १८. निरन्तर रक्षक (ईश्वर) ग्रार्याभि० १ १० ऋ० १ ६ १५ ५ पालनहेतु (सभाध्यक्ष) प्र०—ग्रत्र 'पा रक्षणे' इत्यस्मादुण् १ ३१ १३ [पा रक्षणे (ग्रदा० धातो 'कृवापाजि०' उ० १ १ सूत्रेण उण्प्रत्यय]

पारत: पारात् ४ ३० १८ [पारप्राति० 'तसि प्रकरणे ग्राद्यादिभ्य उपसङ्ख्यानम्' ग्र० ५ ४ ४४ वा० सूत्रेण तसि]

पारम् परभागम् १ ४६ ११ सर्वदु खेभ्य पृथग्भूतम् (परतटम्) ३ १८ परतटम् १ १८३ ६ **पार:**=य पारयिता स (इन्द्र =राजा) ५ ३१ ८ **पाराय**=सुगकर्मसमाप्त्यर्थम् ३० १६ **पारे**=ग्रपरभागे १ ५२ १२ समुद्रभूमिपरभागे २ ११ ८ [पार कर्मसमाप्तौ (चुरा०) धातोरच्प्रत्यय । पार पर भवति नि० २ २४]

पारय दु खात्पार देश गमय ६ २० १२ पार प्रापय १ ९७ ७ दु खाचारात् पृथक्कृत्वा श्रेष्ठाचार नय १ १८९ २ तीरे प्रापय १ १७४ ९ **पारयतम्**=पारयत २.३९ ४

रक्षन्ति ५ ६७ ३ प्राप्नुवन्ति २ ११ १४ पालयन्ति ५ ५२ २ **पान्तु**=सतत रक्षन्तु ४ ११ पालयन्तु २ ३ ८ **पासतः**=रक्षेताम् ७ ३४ २३ **पासि**=रक्षसि १ १३४.५ पालयसि २ १ ६ **पाहि**=अ०—दूरे रक्ष ३ ४८ पाति रक्षति २ १६. रक्षय प्र०—अत्रान्तर्गतो ण्यर्थ ३ ३७ पाति वा ३ १७ पालय २ ६ रक्षा कीजिए स० वि० १४६, ३.३७ रक्षयति पाति वा १ २ १ पालन कर आर्याभि० २ ३३, ३ १७ **पाः**=रक्ष ४ २० ४ [पा रक्षणे (अदा०) धातोर्लेट् । अन्यत्र लोट् लट् लङ् च । पातमित्यत्र पा पाने (भ्वा०) धातोर्वा लुङ् अडभाव]

पातयति जागरयति १ ४८ ५ [पत्लृ गतौ (भ्वा०) धातोर्णिजन्ताल् लट्]

पातल्ये पतनशीले (प्राणिनि) ३ ५३ १७ [पाताल-प्राति० भवार्थे यत् । पाताल =पत्लृ गतौ (भ्वा०) धातो 'पतिचण्डिभ्यामालञ्' उ० १ ११७ सूत्रेण आलञ्]

पातवे पातुम् प्र०—अत्र पा-धातोस्तुमर्थे तवेन्-प्रत्यय २० ५६ पातु पान कर्त्तुम् १ २८ ६ रक्षितुम् २६ २५ [पा पाने (भ्वा०) धातोस्तुमर्थे तवेन्-प्रत्यय]

पातवै पातु रक्षितुम् ३ ४६ ५ [पा रक्षणे (अदा०) धातोस्तुमर्थे तवैप्रत्यय]

पाता रक्षक (इन्द्र =ऐश्वर्यकारी राजा) ६ २३ ३. पानकर्त्ता (इन्द्र =राजा) प्र०—अत्र तृन्-प्रत्यय ६ ४४ १५ [पा रक्षणे (अदा०) पा पाने (भ्वा०) धातोर्वा कर्त्तरि तृच् तृन् वा]

पात्नीवतः प्रशस्ता पत्नी यज्ञसम्बन्धिनी तद्वतोऽयम् भा०—विवाहितस्त्रीव्रत (जन) १८ २० [पत्नीशब्दात् प्रशसायामर्थे मतुप् । 'छन्दसीर' अ० ८.२ १४ सूत्रेण मतोर्मस्य वकार । पत्नीवत्-प्राति० 'तस्येदमिति' अण्-प्रत्यय । रेत सिक्तिर्वै पात्नीवतग्रह कौ० १६ ६ रेतो वै पात्नीवत. गो० उ० ४ ५ अग्निर्हि देवाना पात्नीवत नेष्ट-र्त्विजाम् कौ० २८ ३]

पात्रम् पिबति पाति वा येन ६ ४४ १६ दातु योग्यम् (प्रय =अन्नादिकम्) २ ३७ ४ पद्यते येन तत् (रथम्) १ ८२ ४ पान्ति रक्षन्ति तम् ३३ ८ य पातिस्तम् (राजा-नम्) ६ ७ १ पालनम् १ १२१ १ पत्राणा ज्ञानाना समूहम् १ ११० ५ पाति रक्षति समस्त शिल्पव्यवहार यस्तम् (अग्निम्) ७ २४ काष्ठादिक पात्रम् १ १७५ ३ **पात्राणि**=यै पिबन्ति तानि १९ ८६ **पात्रेषु**=पानसाधनेपु १६ ६२ [पा रक्षणे (अदा०) पा पाने (भ्वा०) धातोर्वा 'दादिभ्य-श्छन्दसि' उ० ४ १७० सूत्रेण त्रन्प्रत्यय । 'सर्वधातुभ्य ष्ट्रन्' उ० ४ १५९. सूत्रेण वा ष्ट्रन् पात्र पानात् नि० ५ १ पत्रप्राति० वा समूहार्थे अण्]

पात्रस्येव यथा पात्रस्य मध्ये १ ७५ १ [पात्रस्य-इव-पदयो समास]

पात्रा पात्राणि सुवर्णरजतादीनि १ १०४ ८ शत्रूणा यानानि ६.२७ ६ भोजनाद्यर्थं सुवर्णादि पात्रो को आर्याभि० १.४९ ऋ० १ ७ १९ ८ [पात्रप्राति० शेर्लोप-श्छन्दसि । पात्रमिति व्याख्यातम्]

पाथन रक्षत १ १६६ ८ [पा रक्षणे (अदा०) धातो-र्लोट् । त-प्रत्ययस्य थनादेश 'तप्तनप्तनथनाश्च' इति सूत्रेण]

पाथसि अन्ने १३ ५३ **पाथः**=पालकमन्नम् २१ ४० रक्षणीयमाचरणम् प्र०—पाथ इति पदनाम, निघ० ४ ३, ८ ५० पृथिव्यादिकम् ७ ५ ७ अन्तरिक्षमार्गम् १ ११३.८ पृथिव्याद्यन्नम् ३.५५ १०. अन्नाद्यैश्वर्यम् ७ ४७ ३. वर्त्म १ १५४ ५ विज्ञानाचरणम् ८ ५० ज्ञातव्य कर्म्म ८ ५० मार्गम् ३ ८.९ रक्षकमन्नम् २ ३ ९ अन्नमुदक वा ३ ३१ ६ पाति शरीरमात्मानञ्च येन तदन्नम्, प्र०—'अन्ने च' उ० ४ २०५. अनेन पातेरन्नेऽसुन्प्रत्यय थुडागमश्च २ १७ उदकम् ७ ३४ १० **पाथांसि**=फलादीनि २१ ४७ अन्नानि २१ ४६. रक्षणीयान्याचरणानि प्र०—पाथ इति पदनाम निघ० ४ ३, ८ ५० ३ [पा रक्षणे (अदा०) धातो 'उदके थुट् च' उ० ४ २०४ 'अन्ने च' उ० ४ २०५ सूत्रेण वा असुन्प्रत्यय थुडागमश्च । पाथोऽन्तरिक्ष पथा व्याख्यातम् । उदकमपि पाथ उच्यते पानात् । अन्नमपि पाथ उच्यते पानादेव नि० ६ ६]

पाथ्यः पथिषु भव (वृषा=वर्षकस्सूर्य) ६ १६ १५ [पाथस् इति व्याख्यातम् । ततो भवार्थे यत् । पथिन्प्राति० वा भवार्थे यत्]

पादगृह्य पादान् ग्रहीतु योग्य (शत्रुर्जन) ४ १८ १२ [पादोपपदे ग्रह उपादाने (क्र्या०) धातो क्यप् प्रत्यय-श्छान्दस]

पादम् चरणम् ७ ३२.२ **पादः**=एकोऽगो भागो वा ३१ ३ प्रकाश्यमान जगदेकगुणम् ऋ० भू० १२१, ३१ ३ **पादाः**=पत्तव्या (कर्मोपासनाज्ञानानि काला सवनानि वा) ४ ५८ ३ पद्यन्ते गच्छन्ति यैस्ते २९ २० अधिगमसाधनानि १७ ९१. **पादौ**=नीचस्थानीयौ (पदार्थौ) ३१.१० चरणौ ६ ४७ १५ [पद गतौ (दिवा०) धातो. 'पदरुजविशस्पृशो घञ्' इति घञ्प्रत्यय । प्रतिष्ठा वै

योग्या (इक्षव =गुडादिनिमित्ता) २५ १ पालनीया (धिय =प्रज्ञा) ७ २७ १ **पार्ये**=पालयितव्ये (शूरसातौ=सङ्ग्रामे) ६ २६ १ पालनीये पूर्णे वा (दिवि=प्रकाशे) ७ ३२ १४ पालयितु पूरयितु योग्ये (दिवि=कामे) ७ ३२ २१ पूरयितव्ये (शर्मन्=गृहे) ६ ३३ ५ पारयितव्ये (भरद्वाजे=राज्यपोषकव्यवहारे) ६ १७ १४ [पार कर्मसमाप्तौ (चुरा०) धातोर्णिजन्ताद् यत् अथवा पृ पालनपूरणयो (जु०) धातो 'ऋहलोर्ण्यत्' इति ण्यत्-प्रत्यय]

पार्वतेयी पर्वतस्य मेघस्य दुहितेव या सा पार्वतेयी (धिषणा=धारण वती द्यौ) प्र०—पर्वत इति मेघनामसु पठितम्, निघ० १ १०, पर्वतस्येय घनपङ्क्ति पार्वती तस्याऽपत्य दुहितेव पार्वतेयी वृष्टि 'स्त्रीभ्यो ढक्' अ० ४ १ १२० अनेन ढक्-प्रत्यय १ १९ [पर्वत इति मेघनाम निघ० १ १० तत 'तस्येदम्' इत्यण्प्रत्ययान्तान् ङीप्। तत 'स्त्रीभ्यो ढक्' इत्यपत्यार्थे ढक्। 'टिड्ढाणञ्०' इति ङीप्]

पार्श्वत: समीपात्, उभयत इतस्ततोऽङ्गात् २१ ४४, ४३, ४५ [स्पृश सस्पर्शने (तुदा०) धातो 'स्पृशे श्वण्शुनौ पृ च' उ० ५ २७ सूत्रेण श्वण्प्रत्यय 'पृ' आदेशश्च। स्पृशति येन स पार्श्व। तत 'तसिप्रकरणे आद्यादिभ्य उपसख्यानम्' अ० ५ ४ ४४ वा० सूत्रेण तसि]

पार्श्वयो: वाम-दक्षिणभागयो २४ १ **पार्श्वे**=अग्रे पृष्ठे ३१ २२ [पूर्वपदे व्याख्यातम्। पार्श्वौ द्यावापृथिवीनाम निघ० ३ ३०]

पार्ष्ण्या पार्ष्णिषु कक्षासु साधूनि (ताडनानि) २५ ४० स्पर्शकारकेण (कशया) १ १६२ १७ [पर्षति सिञ्चतीति विग्रहे पृषु सेचने (भ्वा०) धातो 'घृणिपृश्निपार्ष्णि०' उ० ४ ५२ सूत्रेण नि प्रत्ययो वृद्धिश्च निपात्यते। पार्ष्णि प्राति०'तत्र साधु' इत्यर्थे यत्। तत शेर्लोप]

पावक ! पवित्रकारक पवित्रताहेतोर्वा (विश्वेश्वर भौतिकाऽग्ने वा) १ १३ १ पवित्रकर्त्त शुद्धिहेतुर्वा (अग्ने=जगदीश्वर भौतिकोऽग्निर्वा) १ १२ १० पुनाति पवित्रता करोति तत्सम्बुद्धावीश्वर ! पवित्रताहेतुरग्निर्वा १ १२ ९ वह्निवत् पवित्रकारक (विद्वज्जन) ३ १० ८ जनाऽन्त करणशोधक (अग्ने=विद्याप्रकाशोपदेशक) १७ ८ **पावकम्**=पवित्रकारकम् (मरुता गणम्) १ ६४ १२ पवित्रकर वह्निम् ५ ४ ३ **पावक:**=पवित्रकर (अग्निरिव विद्वज्जन) ५ ७ ४ शुद्धिप्रचारक (विद्वान् राजा वा) १७ १५ शोधक (भा०—पवित्रो जन) १७ ११ पवित्रकारी (विद्वान् गृहस्थो जन) १७ ७ प्रकाशितयशा (राजा) ७ ३ ९ पवित्रीकर (विद्वज्जन) ७ ९ १ **पावका:**=पवित्रा पवित्रकरा (प्रजासेनाध्यक्षा) ३ ३१ २०. **पावके**=वह्निरिव पवित्रस्तस्मिन् (राजनि) ६ ५ २ [पूङ् पवने (भ्वा०) धातो कर्त्तरि ण्वुल्-प्रत्यय। यद्वै शिव शान्त तत्पावकम् श० ६ १ २ ३० अन्न वै पावकम् श० २ २ १ ७]

पावकया पावकस्य क्रियया ६ १५ ५ पवित्रकारिकया (कृपा=सामर्थ्येन) १७ ९१ **पावका**=पाव पवित्रकारक व्यवहार काययति शब्दयति या सा (सरस्वती=सर्वविद्याप्रापिका वाक्) प्र०—'पूञ् पवने' इत्यस्माद्भावार्थे घञ्, तस्मिन् सति 'कै शब्दे' इत्यस्माद् 'आतोऽनुपसर्गे क' अ० ३ २ ३ इति क प्रत्यय 'उपपदमतिङ्' अ० २ २ १९. इति समास. १ ३ १० पवित्रकारिका (सरस्वती=सुसस्कृता वाक्) २० ८४. पवित्रस्वरूप और पवित्र करने वाली सत्यभाषणमय मङ्गलकारक वाणी आर्याभि० १९ ऋ० १ १ ६ १० **पावकायै**=पवित्रकर्त्र्यै (सरस्वत्यै=वाचे) २२ २० **पावका:**=पवित्रकर्त्र्य (आप =जलानि) ७ ४९ २ पवित्रा (मिह =सेचका वृष्ट्य) ३ ३१ २० पवित्रकर्मकर्त्र्य (उपस =प्रभातवेलेव दुहितर) ४ ५१ २. वह्नय इव वर्त्तमाना (मरुत =मनुष्या) ७ ५६ १२ [पूङ् पवने (भ्वा०) धातो कर्त्तरि ण्वुल्। तत स्त्रिया टाप्। 'पावकादीना छन्दस्युपसख्यानम्' अ० ७ ३ ४५ वा० सूत्रेण इत्व न भवति। अथवा पाव-कपदयो समासे स्त्रिया टाप्। पाव =पूङ् पवने (भ्वा०) धातोर्घञ्। क =कै शब्दे (भ्वा०) धातो क प्रत्यय]

पावकवर्चा: पवित्रीकारिकाया विद्युतो वर्चो दीप्तिरिव वर्चोऽध्ययन यस्य स (पुत्र) १२ १०७ [पावका-वर्चस्-पदयो समास। पूर्वपदस्य ह्रस्व]

पावकवर्णम् अग्निवत् प्रकाशमानम् (यज्ञं=गृहाश्रमाख्यम्) १७ ६ **पावकवर्णा:**=पावकवत् पवित्रो गौरो वर्णो येषा ते ब्रह्मवर्चस्विन (विपश्चित =विद्वासो जना) ३३ ८१ [पावक-वर्णपदयो समास]

पावकशोचिषम् पवित्रकरदीप्तिम् (विद्युदाख्य वह्निम्) ३ ९ ८ पावकस्य शोचिरिव शोचिर्दीप्तिर्यस्य तम् (अग्नि=वह्निम्) ४ ७ ५ **पावकशोचिष:**=पावकस्याऽग्ने शोचिर्दीप्तिरिव शोचिर्यस्य विदुषस्तस्य ३ ११ ७. **पावक-**

पारयथ=पार प्राप्नुथ २ ३४ १५. **पारयन्ति**=पार गमयन्ति १ १८२ ६ **पारयात्**=समुद्रपार गमयेत् १ १४० १२ [पार कर्मसमाप्तौ (चुरा०) धातोर्लोट् । अन्यत्र लटलेटावपि]

पारयन्ता पार गमयन्तौ (इन्द्राविष्णू=महाराजशिल्पिनौ) ६ ६९ १ [पार कर्मसमाप्तौ (चुरा०) धातो शतृप्रत्यय । 'सुपा सुलुग्०' सूत्रेण प्रथमाद्विवचनस्याकारादेश]

पारयन्ती विजय प्रापयन्ती (ज्या=प्रत्यञ्चा) २६ ४० पार प्रापयन्ती (योषा=पत्नी) ६ ७५ ३ [पार कर्मसमाप्तौ (चुरा०) धातो शत्रन्तान् ङीप् । पारयन्ती=पार नयन्ती नि० ९ १८]

पारयामसि रोगसमुद्रात् पार गमयेम १२ ९६ [पार कर्मसमाप्तौ (चुरा०) धातोर्लेट् । 'इदन्तो मसि' इति मस इदन्तता]

पारयिष्णवः रोगजदु खेभ्य पार नेतु समर्था (ओषधी=सोमादीन्) १२ ७७ **पारयिष्णुः**=दु खात् पारयिता (सेनाध्यक्षो राजा) ९ ६ [पार कर्मसमाप्तौ (चुरा०) धातो 'णेश्छन्दसि' अ० ३ २ १२७ सूत्रेण तच्छीलादिष्वर्थेषु इष्णुच्]

पारावतघ्नीम् पाराऽवारघातिनीम् (सरस्वती=विदुषी स्त्रियम्) ६ ६१ २ ['पारावत' इत्युपपदे हन हिंसागत्यो (अदा०) धातो टक् 'क्तनो वहुल वा' इति वा० सूत्रेण । ततो ङीप् । पारावतघ्नीम्=पारावारघातिनीम् नि० २ २४]

पारावतान् कलरवान् (कपोतान्) २४ २५ **पारावताः**=परावति दूरदेशे भवा (चित्रा=रूपाणि) ५ ५२ ११ [परप्राति० मतुप्प्रत्यये परवत् । छान्दस पूर्वस्य दीर्घ । परावन्प्राति० भवार्थेऽण् । अथवा पारापतशब्दोऽयम् । पकारस्य वकार पृषोदरादित्वात् । पारापत = परोपपदे आङ्पूर्वात् पततेरच्प्रत्यय]

पारिषत् मुखे प्रजा पालयेत् प्र०—अत्र पृ-धातोर्लेटि सिप् 'सिब्बहुल णिद्' इति वार्त्तिकेन णित्वाद् वृद्धि १ १०० १४ [पृ पालनपूरणयो (जु०)धातोर्लेट् । 'सिब्बहुल लेटि' इति सिप् । तस्य च णित्वाद् वृद्धि]

पारुष्णान् पक्षिविशेषान् २४ २४

पार्जन्यः पर्जन्यवद्गुण (सुपर्ण=पक्षिविशेष) २४ ३४ मेघदेवताक (पशु) २४ ३ **पार्जन्याः**=मेघदेवताका (नभोरूपा=पशव पक्षिणो वा) २४ ६ [पर्जन्य इति व्याख्यातम् । तत 'साऽस्य देवता' इति सूत्रेण अण्प्रत्यय]

पार्थवानाम् पृथौ विस्तीर्णाया विद्याया भवाना राज्ञाम् ६ २७ ८ [पृथुप्राति० 'तत्र भव' इत्यर्थेऽण्प्रत्यय]

पार्थिवम् पृथिव्या सम्बन्धि (रज =लोक) ३४ ३२ पृथिव्या विकारम् (रज =द्व्यणुकादिरेणु) १३ २८ पृथिव्या विदितम् (रज =अणुत्रसरेण्वादि) १ ९० ७ पृथिवीमय पृथिव्यामन्तरिक्षे वा विदितम् (रज) १ ८१ ५ **पार्थिवस्य**=पृथिव्या विदितस्य पदार्थविज्ञानस्य १ १४४ ६ **पार्थिवः**=पृथिव्या विदित (पदार्थ) २७ ३६ **पार्थिवात्**=पृथिवीसयोगात (दिव =प्रकाशात्) प्र०—'सर्वभूमिपृथिवीभ्यामणञौ' अ० ५ १ ४१ इति सूत्रेण पृथिवीशब्दादञ्प्रत्यय १ ६ १० **पार्थिवानाम्**=पृथिव्यामन्तरिक्षे विदितानां मध्ये १ ९५ ३ **पार्थिवानि**=पृथिव्यामन्तरिक्षे भवानि विदितानि वा (परमाण्वादीन्) ६ ६१ ११ पृथिव्या विकाराः अन्तरिक्षे विदितानि च (रजासि=लोकान्) प्र०—अत्र 'तत्र विदित इति च' अ० ५ १ ४३ अनेनाऽञ्-प्रत्यय ५ १८ पृथिवीविकारजातानि (शारीरिकबलादीनि) १ १५५ ४ अन्तरिक्षे विदितानि कार्याणि (रजांसि =लोकान्) प्र०—पृथिवीत्यन्तरिक्षनाम निघ० १ ३, ५ ८१ ३ पृथिव्यादिकृतानि वा (कार्याणि) ६ ६ ६ **पार्थिवाः**=पृथिव्या विदिता राजानो बहुमूल्या पदार्था वा ७ ३५ ११ **पार्थिवे**=पृथिवीसम्बन्धिभूगर्भविद्यायाम् ऋ० भू० २६४ [पृथिवीप्राति० विदितार्थे 'तत्र विदित इति च' सूत्रेण निमित्ते सयोगोत्पातौ च 'सर्वभूमिपृथिवीभ्यामणञौ' सूत्रेणाञ्प्रत्यय । अथवाभवार्थेऽञ्]

पार्थिवा पृथिवीत्याख्यस्य कारणस्य विकारभूतानि भूगोलाख्यानि कार्याणि १ ६४ ३ पृथिव्या विदितानि (वसूनि=द्रव्याणि) ६ ४५ २० [पार्थिवप्राति० शेर्लोपश्छन्दसि । पार्थिव इति व्याख्यातम्]

पार्थिवासः पृथिव्या विदिता (अग्नय =पावका) ३५ ८ पृथिव्या भवा (पदार्था) ६ ५० ११ [पार्थिवप्राति० जसोऽसुगागम । पार्थिव इति व्याख्यातम्]

पार्यम् पार्य्यते समाप्यते कर्म येन तम् (वीरजनम्) १ १२१ १२ **पार्याणि**=परितु पूरयितु योग्यानि (पक्ष्माणि=कर्माणि नेत्रोर्ध्वलोमानि वा) २५ १ **पार्याय**=दु खेभ्य पारे वर्त्तमानाय (जनाय) १६ ४२ पारभवाय (व्यवहाराय) ४ १६ ११ दु खपार गमयते (अवसे=रक्षणायाय) ४ २५ १ **पार्या**=परितु पालयित

पृथ्वी विस्तीर्णे (द्यावापृथिवी=भूमिसूर्यौ) ६.७० १ भूम्यन्तरिक्षे ४ २३ १० पृथ्वीति व्याख्यातम् । तत प्रथमाद्विवचनस्य पूर्वसवर्णदीर्घ]

पृदाकुः मूढवदभिमानी व्याघवद्वा हिंसक (विद्वज्जन) ६ १२ कुत्सितवाक् (अहि=विषधर) ८ २३ सर्प्प २४ ३३ [पर्द कुत्सिते शब्दे (भ्वा०) धातो 'पर्देर्निन् सम्प्रसारणमलोपश्च' उ० ३ ८० सूत्रेण काकु प्रत्यय सम्प्रसारणमकारलोपश्च]

पृशनायुवः आत्मन स्पर्शमिच्छन्त्य (धेनव=किरणा गावो वाचो वा) प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति सलोप १ ८४ ११ [पृशनपदाद् आत्मन इच्छाया क्यजन्ताद् उ प्रत्यय । स्त्रियामूङ् । पृशनम्=स्पृश सस्पर्शने (तुदा०) धातोश्छान्दस रूपम्]

पृशन्यः पर्शिता (देव=सूर्य) १ ७१ ५

पृश्नयः प्रष्टव्या (पशव) २४ १४ विचित्रचिह्ना (प्राणिन) २४ १५ या स्पृशन्ति ता (धेनव=किरणा गावो वाचो वा) प्र०—अत्र 'घृणिपृश्नि०' उ० ४ ५४ अनेनास्य निपातित १ ८४ ११ सुस्पर्शास्तन्वङ्ग्य (भा०—स्वसदृश रूपगुणसम्पन्ना स्त्रिय) प्र०—अत्र स्पृशधातोर्नि प्रत्यय सलोपश्च १२ ५५ प्रष्ठ्य (विश=प्रजा) १५ ६०. **पृश्निम्**=सूर्यम् १ १६० ३ अन्तरिक्षम् ५ ५२.१६ आकाशम् १ १६४ ४३ **पृश्निः**=स्पर्ष्टव्य (पशु पक्षी वा) २४ ४ अन्तरिक्षमवकाश ७ ३५ १३ अन्तरिक्षमिव गम्भीराशयोऽक्षोभ. (धीर=मेधावी विद्वान्) ७ ५६ ४ अन्तरिक्षमिव वृद्धि ५ ६० ५ विचित्रवर्ण सूर्य १७ ६० अन्तरिक्षस्था (यज्ञे कृताऽऽहुति) प्र०—पृश्निरिति साधारणनामसु पठितम् निघ० १ ४, २ १६ आदित्य इव १ १६८ ९ अन्तरिक्षे प्र०—अत्र 'सुपा सुलुक्०' सप्तम्येकवचने प्रथमैकवचनम् ३ ६ जल के सहित सूर्य स० प्र० ३१३, ३६ **पृश्नेः**=अन्तरिक्षस्य मध्ये ६ ६ ४ [पृश्निरिति पृश्निगर्भा पदे द्रष्टव्यम् अन्न वै देवा पृश्नीति वदन्ति ता० १२ १० २४ अन्न वै पृश्नि श० ८ ७ ३ २१ इय (पृथिवी) वै पृश्नि तै० १.४.१ ५ त्रय पृश्नय सर्वदेवत्या काठ० ४९ १०. पृश्नयो मारुता मै० ३ १३ १२ पृश्निर्यै पयसो मरुतो जाता तै० स० २ २ ११ ४ पृश्नियै प्रियङ्गव तै० स० २ २ ११ ४ वाग्वै पृश्नि काठ० ३४ १ व्याघ्रम्प वै पृश्नि मै ४ २.२४ यत् पृश्निस्तेन मारुत तै० स० २ १ ३.३ मारुती पृश्नि पष्ठौही गर्भिणी मै० २ ६ १३]

पृश्निगर्भाः पृश्निमन्तरिक्ष गर्भो येषा ते पृश्निगर्भा (लोका) ७ १६ [पृश्नि-गर्भपदयो समास । पृश्नि=स्पृश सस्पर्शने (तुदा०) धातो 'घृणिपृश्नि०' उ० ४ ५२. सूत्रेण नि प्रत्यय सलोपश्च निपात्यते । पृश्नि साधारणनाम निघ० १ ४ पृश्निगर्भाः प्राष्टवर्णगर्भा आप इति वा नि० १० ३९ पृश्निरादित्यो भवति प्राश्नुत एन वर्ण इति नैरुक्ता सस्पृष्टा रसान् । सम्पृष्टा भास ज्योतिषा सस्पृष्टो भासेति वा । अथ द्यौ सस्पृष्टा ज्योतिर्भि पुण्यकृद्भिश्च नि० २ १४]

पृश्निगावः पृश्निवदन्तरिक्षवद् गावो येषान्ते (नियत=निश्चिद्‌गतयो वायव) ७ १८ १० [पृश्निगोपदयो समास । पृश्निपद व्याख्यातम्]

पृश्निगुम् अन्तरिक्षे गन्तारम् (यानम्) १ ११२ ७ [पृश्निपद व्याख्यातम् । तदुपपदे गम्लृ गतौ (भ्वा०) धातो 'डुप्रकरणे मितद्र्वादिभ्य उपसख्यानम्' अ० ३ २.१८० वा० सूत्रेण डु प्रत्यय]

पृश्निनिप्रेषितासः पृश्नावन्तरिक्षे नितरा प्रेषिता यैस्ते (नियत.=निश्चिद्‌गतयो वायव) ७ १८ १० [पृश्निनिप्रेषितपदयो. समासे जसोऽसुगागम । निप्रेषित=नि+प्र+इष गतौ (दिवा०) धातोः क्त]

पृश्निमातरः पृश्निराकाशमन्तरिक्ष मातोत्पत्तिनिमित्त येषा ते (मरुत=शिल्पव्यवहारप्रापका वायव) प्र०—पृश्निरिति साधारणनामसु पठितम् निघ० १ ४, १ २३ १० आकाशादुत्पद्यमाना (मरुत=वायव) इव १.८९ ७ पृश्निरन्तरिक्ष माता येषा वायूना त इव १ ८५ २ अन्तरिक्षमातर (वायव) ५ ५७.३ [पृश्नि-मातृपदयो समास । पृश्निरिति व्याख्यातम् । पृश्निमातरो हि मरुत मै० २ ५ ७ मरुत पृश्निमातर इति वा आहु जै० २ १७६]

पृश्न्याः अन्तरिक्षे भवा सृष्टय ६ ४८ २२ पृश्नावन्तरिक्षे भवम् (ऊध.=पयोऽधिकरणम्) २ ३४ १० अन्तरिक्षस्य मध्ये २ २ ४ [पृश्निप्राति० भवार्थे यत् । पृश्निरिति व्याख्यातम्]

पृषतः स्थूलान् (पदार्थान्) २४ ११ मृगविशेष २४ ४० [पृषु सेचने (भ्वा०) धातो 'वर्त्तमाने पृषद्‌वृहन्०' उ० २ ८४ सूत्रेण अतिप्रत्यय शतृवच्च कार्यम्]

पृषतान् मृगविशेषान् २४ २७ [पृषु सेचने (भ्वा०)

पृथिवीद्यावा भूमिविद्युतौ ३ ४६.५

पृथु विस्तीर्णम् (ज्रय =तेज) प्र०—'प्रथिम्रदिभ्रस्जा सम्प्रसारण सलोपश्च' उ० १ २८ इति प्रथधातो कु प्रत्यय सम्प्रसारणञ्च १.१०१ ७ विस्तीर्ण प्रख्यात वा (सद्म=गृहम्) ५ ८७ ७ सर्वर्त्तुस्थानाऽवकाशयोगेन विशालम् (छर्दि =गृहम्) १ ४८ ५ नानाविद्यासु विस्तीर्णम् (श्रव =सुवर्णादिधनम्) १ ९ ७ अतिविस्तीर्णम् (यान=रथ) ऋ० भू० १९९ **पृथूनि**=विस्तीर्णानि (सुखानि) ६ ६ २ [पथ प्रख्याने (भ्वा०) धातो 'प्रथिम्रदिभ्रस्जा सम्प्रसारणम्०' उ० १ २८ सूत्रेण कु प्रत्यय सम्प्रसारणञ्च। पृथु महान्त लोकम् नि० १२ २२]

पृथुः विस्तृतमुख (अर्वा=विज्ञानयुक्त पुत्र) ११ ४४ विस्तीर्णपुरुषार्थ (अग्नि =राजा) ४ २ १३ अतीव विस्तृतो व्यापक परमेश्वर ऋ० भू० १९२, अथर्व० १३ ४ ५२ विस्तीर्णवल (इन्द्र विद्याप्रकाशको राजा) २ २१ ४ महान् (अग्नि =विद्युत्) १० २९ **पृथू**=विस्तीर्णौ (गभस्ती=हस्तौ) ६ १९ ३ [पृथुरिति व्याख्यातम्। अदो वै पृथु यस्मिन् देवा श० १४.१ २७ श्रोत्र वै पृथु श्रवाय्यम् श० १४ ३ ४]

पृथुज्रयम् विस्तीर्णं वहुगतिम् (रथ=रमणीय यानम्) ४ ४४ १ **पृथुज्रयाः**=पृथुस्तीव्रो ज्रयो वेगो यस्य स (सर्ववलाध्यक्षो राजा) ३ ४९ २ [पृथु-ज्रयपदयो समास। पृथुरिति व्याख्यातम्। ज्रय =जि अभिभवे (भ्वा०) धातोरच्प्रत्यय। अन्यत्र औणादिकोऽसुन्। पृथुज्रया पृथुजव नि० ५ ९]

पृथुज्रयी वहुवेगा (असुर्येव=असुषु प्राणेषु भवा विद्युदिव) १ १६८ ७ [पृथुज्रय व्याख्यातम्। तत स्त्रिया ङीप् गौरादित्वात्]

पृथुपाजसः वहुवला (अश्वा =व्याप्ता किरणा) ३.६१ २ **पृथुपाजसा**=विस्तीर्णवलेन (रथेन=रमणीयेन यानेन) ४.४६ ५. **पृथुपाजसे**=वलावलाय (गातवे=स्तावकाय जनाय) ३ ३ १ **पृथुपाजाः**=बृहद्-वल (विप्र =मेधाविजन) ३ ५ १ विस्तीर्णवल (अग्नि =वह्नि) ३ २ ११ पृथु विस्तीर्ण पाजो वल यस्य स (अग्नि =वह्नि) ३ २७ ५ [पृथु-पाजस्पदयो समास। पाज =अन्ननाम निघ० २ ७ वलनाम निघ० २ ९ पा रक्षणे (अदा०) धातो 'पातेर्वले जुट् च' उ० ४ २०३. सूत्रेण असुन्]

पृथुपाणिः पृथवो विस्तीर्णा पाणिरिव किरणा यस्य स (सविता=जगदीश्वर) २.३८ २ [पृथु-पाणिपदयो समास। पाणि =पण व्यवहारे स्तुतौ च (भ्वा०) धातो 'अशिपणायोरुडाय्यलुकौ च' उ० ४ १३३ सूत्रेण इण् आयप्रत्ययस्य च लुक्]

पृथुप्रगाणम् पृथूनि प्रकृष्टानि गानानि स्तवनानि यस्मिँस्तम् (अ०—स्वस्वभावाख्य गृहम्) ३.५ ७ [पृथु-प्रगानपदयो समास]

पृथुप्रगामा पृथुभिर्विस्तृतैर्यानै प्रकृष्टो गामो गमन यस्य स (सूनु =कार्यकारी सन्तान) प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेराकारादेश १ २७ २ [पृथु-प्रगामपदयो समास। विभक्तेराकारादेशश्छान्दस। प्रगाम = प्र+गम्लृ गतौ (भ्वा०) धातोर्घञ्]

पृथुबुध्नः पृथु विस्तीर्णं वुध्नमन्तरिक्ष निवासार्थ यस्य स (मेघ) प्र०—वुध्नमन्तरिक्ष वद्धा अस्मिन् धृता आप इति नि० १० ४४, ११४ विस्तीर्ण-प्रवन्ध (अग्नि =विद्वान् जन) ४ २ ५ पृथु महद् वुध्न मूल यस्य स (ग्रावा=पाषाण) १ २८ १ [पृथु-वुध्नपदयो समास। वुध्न =वन्धवन्धने (क्र्या०) धातो 'वन्धे ब्रधिवुधी च' उ० ३ ५ सूत्रेण नक् प्रत्ययो धातोश्च बुधादेश। वुध्नमन्तरिक्ष वद्धा अस्मिन् धृता आप इति वा। इदमपीतरद् वुध्नमेतस्मादेव वद्धा अस्मिन् धृता प्राणा इति नि० १० ४४]

पृथुबुध्नासः विस्तीर्णाऽन्तरिक्षा (अ०—जना स्त्रियश्च) १ १६९ ६ [पृथुवुध्न इति व्याख्यातम्। ततो जसोऽसुगागम]

पृथुयामन् वहुप्रापक (ऋष्वे=महागुणयुक्त विद्वज्जन) ६ ६४ ४ [पृथूपपदे या प्रापणे (अदा०) धातोर्मनिन्प्रत्यय]

पृथुश्रवसः पृथूनि विस्तृतानि श्रवास्यन्नानि यासा ता (अराती =शत्रुसेना) १ ११६ २१ [पृथु-श्रवस्पदयो समास। श्रवस्=अन्ननाम निघ० २ ७ धननाम निघ० २ १०]

पृथुष्टुके पृथुर्विस्तीर्णा ष्टुका स्तुति केशभार कामो वा यस्या तत्सम्बुद्धौ, महास्तुते, पृथुकेशभारे, पृथुकामे वा (देवि=कुमारि) ३४ १० विस्तीर्णजघने (सिनीवालि=विद्वत्कुलस्य कन्ये) २ ३२ ६ [पृथु-ष्टुकापदयो समास। ष्टुका=स्त्यै सघाते (भ्वा०) धातोरौणादिको डुकन्प्रत्यय.। पृथुष्टुके पृथुजघने, स्तुक स्त्यायते सघात पृथुकेशस्तुके पृथुस्तुके वा नि० ११ ३२]

पृथ्वी भूमि १ ६५ ३ **पृथ्वीम्**=भूमिम् १३ ९

१० १६ **पृष्ठे**=उपरि अ०—पृष्ठोपरि ३ ५ परभागे १ १६४ १० पश्चाद्भागे २६ ४२ ज्ञीप्सिते (लोके=द्रष्टव्ये स्थाने) १५ ५० सेचके भागे १५ ११ तले १३ २४ [पृष्ठ स्पृशते सस्पृष्टमङ्गं नि० ४ ३ स्पृश सस्पर्शने (तुदा०) धातो 'तिथपृष्ठगूढयूथप्रोथ' उ० २ १२ सूत्रेण थक्प्रत्यय आदे सकारस्य च लोपो निपात्यते। प्रच्छ ज्ञीप्सायाम् (तुदा०) धातोर्वा रूपम्। पृपु सेचने (भ्वा०) धातोर्वा रूपम्। पृष्ठानि=पृष्ठैर्वै देवा स्वर्गं लोकमस्पृक्षन् कौ० २४ ८ स्वर्गो लोक पृष्ठानि ता० १६ १५ ६ तदाहुर्नाना लोकानि पृष्ठानि ता० १६ १५ ६ एतानि खलु वै सामानि यत्पृष्ठानि तै० १ ८ ८ ३ स्वराणि पृष्ठानि भवन्ति कौ० २४ ८ सर्वाणि हि पृष्ठानीन्द्रस्य निष्केवल्यानि ता० ७ ८ ५. पिता वै वामदेव्य पुत्रा पृष्ठानि ता० ७ ६.१ आत्मा वै पृष्ठानि कौ० २५ १२ ऋतवो वै पृष्ठानि श० १३ ३ २ १ सप्त पृष्ठानि श० ६ ५ २ ८ अन्न पशव पृष्ठानि ता० १६ १५ ८ वीर्यं वै पृष्ठानि ता० ४ ८ ७ तेजो ब्रह्मवर्च्चस श्रीर्वै पृष्ठानि ऐ० ६ ५ एषा ह वा उत्तरावती श्रीर्यत्पृष्ठानि जै० २ ४२५ ऐन्द्राणि पृष्ठानि काठ० ३४ १६ ओज एव वीर्य पृष्ठानि तै० स० ७ ३ ५ ३ चक्रियौ पृष्ठानि मै० ४ ७ ३ पृष्ठानि वै यज्ञस्य दोह काठ० ३३ ८ यज्ञो वै पृष्ठानि काठ० ३२ ६]

पृष्ठयज्वने य पृष्ठेन यजति तस्मै (विदुषे जनाय) ५.५४.१ [पृष्ठ-यज्वन्पदयो समास। यज्वन्=यज देवपूजादिषु (भ्वा०) धातो 'सुयजोर्ङ्वनिप्' अ० ३ २ १०३ सूत्रेण ङ्वनिप्प्रत्यय]

पृष्ठीः पृष्ठदेश पश्चाद्भाग प्र०—अत्र 'सुपा सुलुक्०' इति सो स्थाने सु २० ८

पृष्ठेव पृष्ठानीव ४ २ ११ [पृष्ठा-इव पदयो समास। पृष्ठा=पृष्ठप्राति० शेर्लोपश्छन्दसि]

पृष्ठ्येन पश्चाद्भवेन सुखेन ४ २० ४ पृष्ठे भवेन दिनेन ४ ३ १० [पृष्ठप्राति० भवार्थे यत्। पृष्ठमिति व्याख्यातम्। पृष्ठ्य =(आङ्गिरसा) सर्वे पृष्ठ्यै स्वर्ग लोकमभ्यस्पशन्त यदभ्यस्पशन्त तस्मात् स्पश्यस्तं वा एत स्पश्य सन्त पृष्ठ्य इत्याचक्षते परोक्षेण गो० पू० ४ २३ पिता वा अभिप्लव पुत्र पृष्ठ्य गो० पू० ४ १६ पृष्ठ्यानि—श्री पृष्ठ्यानि कौ० २१ ५ पशव पृष्ठ्यानि कौ० २१ ५]

पेचे पचति ४ १८ १३ [डुपचप् पाके (भ्वा०) धातोर्लिट्]

पेतथुः पतेतम् १.१८२ ५ [पत्लृ गतौ (भ्वा०) धातोर्लिट्]

पेत्वः पतनशील (कृष्ण पशु) २६ ५८ शीघ्रगामी (पशु) २६ ५६ **पेत्वेन**=प्रापणेन ७ १८ १७ [पत्लृ गतौ (भ्वा०) धातो पा पाने (भ्वा०) धातोर्वा 'अन्येऽपि दृश्यन्ते' उ० ४ १०५ सूत्रेण त्वन्। पतते तस्य लोप]

पेदवे गमनाय प्र०—अत्र पद-धातोरौणादिक उ० प्रत्यय वर्णव्यत्ययेनाकारस्य एकारश्च १ ११७ ६ प्राप्तु गन्तु वा १ ११६ १०. गमनाऽऽगमनाय १ ११८ ६ परमोत्तमव्यवहारसिद्धि-प्रापणाय ऋ० भू० १६६ [पद गतौ (दिवा०) धातोरौणादिक उ प्रत्यय। धातोरकारस्य एकारो वर्णव्यत्ययेन]

पेयाः पिवे ५ २६ ३ [पा पाने (भ्वा०) धातोर्लिङ्]

पेरुके पालके (कर्मणि) ६ ६३ ६ [पेरुप्राति० स्वार्थे कन्। पेरुरिति व्याख्यास्यते]

पेरुम् पूरकम् (स्तुत्य जनम्) ५ ८४ २ **पेरुः**=पाता (विद्वज्जन) १ १५८ ३ पारयिता (नपात्=नौ) ७ ३५ १३ रक्षक (शिष्यो जन) ६.१० [पीङ् पाने (दिवा०) धातो 'मीपीभ्या रु' उ० ४ १०१ सूत्रेण रु प्रत्यय। पृ पालनपूरणयो (जु०) धातोर्वा रु प्रत्यय। धातोर्गुणे रपरत्वे च अकारस्य एकारादेशो वर्णव्यत्ययेन]

पेशलम् उत्तमाङ्गवत् (वपु=शरीरमुदक वा) १६ ८३ [पिश अवयवे (तुदा०) धातोरौणादिक कल् प्रत्यय]

पेशसा रूपेण २० ४१ **पेशः**=रूपम् १६ ८६ सुरूपम् ७.४२ १ सुन्दर रूप हिरण्यञ्च प्र०—पेश इति रूपनाम निघं० ३ ७ हिरण्यनाम निघ० १ २, ४ ३६.७ हिरण्यादिधनम् श्रेष्ठ रूप वा १ ६ ३ **पेशांसि**=रूपाणि १ ६२ ४ [पेश रूपनाम निघ० ३ ७ हिरण्यनाम निघ० १.२ पेश इति रूपनाम पिंशतेर्विपिंशित भवति नि० ८ ११]

पेशस्कारीम् रूपकर्त्रीम् (व्यभिचारिणी स्त्रीम्) ३० ६ [पेशस् उपपदे डुकृञ् करणे (तना०) धातोरण्। तत स्त्रिया ङीप्। पेशस् व्याख्यातम्]

पेशस्वतीः प्रशस्तसुरूपवती (त्रिविधा वाच) २८ ३१ [पेशस्प्राति० प्रशसाया मतुवन्तात् ङीप्]

पेशितारम् विद्याऽवयवेत्तारम् भा०—विद्यान्यायप्रकाशकम् (पुरुषम्) [पिश अवयवे (तुदा०) धातो कर्त्तरि तृच्]

धातो 'पृषिरञ्जिभ्या किन्' उ० ३ १११ सूत्रेण अतच् किच्च । पृषतो वैश्वदेव काठ० ४७ ७]

पृषती अङ्गैः सुसिक्ता (पशु-जाति') २४ २ **पृषतीभिः**=स्वगमनागमनवेगादिगुणैः १ ६४ ८ मरुद्गतिभि २ ३६ २ वेगादिभि ५ ५८ ६ वायुगतिसदृशगतिविशिष्टाभि-र्धाराभि २ ३४ ३ पर्षन्ति सिञ्चन्ति धर्मवृक्ष याभिरद्भि १ ३७ २ **पृषतीषु**=सेचनकर्त्रीषु (भा०—उत्तमासु विद्यासु) ५ ६० २ **पृषतीः**=अग्निवायुयुक्ता अप १ ८५ ५ मरुत्सम्बन्धिनीरप १ ८५ ४ सेचननिमित्ता गती ३ २६ ४ सेचनकर्त्रीरुदकधारा ५ ५७ ३ वायुजलगती ५ ५५ ६ पर्षन्ति सिञ्चन्ति याभिर्नाडीभिर्नदीभिस्ता (अ०—नाडी-र्नदीर्वा) २ १६ पर्षन्ति सिञ्चन्ति याभिस्ता शीघ्रगती मरुता धारणवेगादयोऽश्वा प्र०—पृषत्यो मरुतामित्या-दिष्टोपयोजननामसु पठितम् निघ० १ १५, १ ३६ ६ [पृषदिति शत्रन्त व्याख्यातम् । तत स्त्रिया डीप् । पृषती गौर्धेनुर्दक्षिणा, सा हि वैश्वदेवी मै० २ ३ २ वैश्वदेवी हि पृषती काठ० १२ २]

पृषती सेक्तारौ जलगुणौ १ १६२ २१ स्थूलौ (हरी=हरणशीलावश्वौ) २५ ४४ [पृषदिति व्याख्यातम् । ततो नपुसके प्रथमाद्विवचने रूपम् । लिङ्गव्यत्यय]

पृषदश्वः पृषदिव वेगवन्तस्तुरङ्गा यस्य स (सेना-पति) १ ८७ ४ **पृषदश्वान्**=सिञ्चकानाशुगामिन पदार्थान् वा ५ ४२ १५ **पृषदश्वाः**=सिक्तजलाग्निनाऽऽशु-गामिनो महान्त (मरुत =विद्वासो मनुष्या) ७ ४० ३ पृषत पुष्ट्यादिना ससिक्ताऽङ्गा अश्वा येषान्ते (मरुत = मनुष्या) २५ २० सेनाया पृषन्तोऽश्वा येषान्ते (देवा = विद्वज्जना) १ ८६ ७ [पृषद्-अश्वपदयो समास । पृषदिति व्याख्यातम्]

पृषदश्वासः पृषत स्थूला सिञ्चिता अश्वा यैस्ते (प्राज्ञा राजजना) २ ३४ ४ पृषत पुष्टा पुष्टा अश्वा येषान्ते (देवा =विद्वज्जना) १ १८६ ८ पृषत सेचका अश्वा वेगादयो गुणा येषु ते (गन्तार =वायव) ३ २६ ६ [पृषद्-अश्वपदयो समासे जसोऽसुगागम । पृषदिति व्याख्यातम्]

पृषदाज्यम् दध्याज्यादिभोज्य वस्तु ३१ ६ पर्षन्ति सिञ्चन्ति क्षुन्निवृत्त्यादिकारकमन्नादि वस्तु यस्मिँस्तत् पृषच्चा-ऽऽज्य घृत मधुदुग्धादिकञ्च तत् (भक्ष्याऽन्नोपलक्षण वस्तु) ऋ० भू० १२३, ३१ ६ [पृषद्-आज्यपदयो समास । पृष-दिति व्याख्यातम्। आज्यम्='आङ् पूर्वादञ्जे सज्ञायामुप-सख्यानम्' अ० ३ १ १०६ वा० सूत्रेण अञ्जेराङ्पूर्वात् क्यप् । अन्न हि पृषदाज्यम् श० ३ ८ ४ ८ प्राणो हि पृष-दाज्यम् श० ३ ८ ४ ८ पय पृषदाज्यम् श० ३ ८ ४ ८ पशवो वै पृषदाज्यम् तै० १ ६ ३ २ प्राणापानौ वै पृष-दाज्यम् मै० ३ १० २ ४ प्राणापानौ वा एतौ पशूना यत् पृषदाज्यम् तै० स० ६ ३ ६ ६ ऐन्द्राग्न पृषदाज्य देवतया काठ० ३६ २]

पृषद्योनिः स्पृपतिर्वृष्टिर्योनिर्यस्या सा (गी =वाक्) ५ ४२ १ [पृषद्-योनिपदयो समास । पृषद् इति व्याख्या-तम् । योनि =यु मिश्रणेऽमिश्रणे च (अ०) धातो 'वहि-श्रिश्रुयुद्रु०' उ० ४ ५१ सूत्रेण नि प्रत्यय । योनि = परियुतो भवति नि० २ ८]

पृषद्वत् सेचकवत् ७ २ ४ [पृषत्प्राति० तुल्यार्थे वति । पृषदिति व्याख्यातम्]

पृषन्तम् विद्यादिशुभगुणान् सिञ्चन्तम् (जनम्) ४ ५० २ **पृषन्तः**=स्थूलाऽङ्गा (त्र्यम्बका =गवादय) २४ १८ [पृषु सेचने (भ्वा०) धातोरौणादिकोऽति प्रत्यय शतृवच्च]

– **पृष्टबन्धो** य पृष्टान् जनानुत्तरेषु बध्नाति तत्सम्बुद्धौ [अग्ने=प्रकाशात्मन् विद्वन्) ३ २० ३ [पृष्ट-बन्धुपदयो समास । पृष्ट =प्रच्छ ज्ञीप्सायाम् (तुदा०) धातो क्त]

पृष्टः विदुष प्रति य पृच्छ्यते प्रष्टव्यो वा स (अग्नि =विज्ञानस्वरूप ईश्वर विद्युदग्निर्वा) १ ६८ २ सिक्त स्थित (अग्नि =सूर्य) ३३ ६२ प्रष्टु योग्य (रथ =रमणीय यानम्) ३ ४६ ४ ज्ञातुमिष्ट (अग्नि = प्रसिद्ध पावक) १८ ७३ [प्रच्छ ज्ञीप्सायाम् (तुदा०) धातो क्त]

पृष्ट्यामयी पृष्टौ पृष्ठ आमय क्लेशरूपो रोगो विद्यते यस्य स (विद्वज्जन) १ १०५ १८ [पृष्टचामयी= पृष्ठरोगी नि० ५ २१]

पृष्ठम् ज्ञीप्सितम् (स्व =सुखम्) १७ ६५ उपरि-भागम् १ १६६ ५ भूम्याद्यधिकरणम् ऋ० भू० १५४ अर्वाग् व्यवहार ११ २० पृथिवी आदि सब लोक का आधार आर्याभि० २ १३, १८ २६ परभागम् (नाक= मोक्षसुखम्) ३ २ १२ ज्ञातुमिच्छा १८ २६ प्रश्न शिष्ट च २२ ३३ प्रच्छनीयम् (धनम्) ४ ५ ६ पश्चाद्-भागम् १ ११५ ३ प्रच्छन्नम् ६ २१ पृष्ठभागम् १ ५८ २. आधा-रम् २३ ५० अधिकरणम् (समुद्रम्=अन्तरिक्षमिव सागरम्) १३ २ **पृष्ठात्**=समीपात् १७ ६७ उपरिभागात्

पुम्पाणां समूहे साध्व्य (स्त्रिय) २१ ४३ [पौरुषेय इति व्याख्यातम्। तत स्त्रिया 'टिड्ढाणञ्०' इति ङीप्]

पौल्कसम् पुक्कसस्याऽन्त्यजस्याऽपत्यम् प्र०— अत्र पृषोदरादित्वादभीष्टसिद्धि ३० १७

पौष्णः पूष्ण पृथिव्या अय सम्बन्धी (प्रजापति = जीव) ३९ ५ पूषदेवताका (श्याम पशु) २९ ५८ **पौष्णाः**=पुष्टिनिमित्तमेघदेवताका (श्यामा पशव) २४ ७ पुष्टिकरमेघदेवताका (श्यामा पशव) २४.१४ पुष्टिकर-सम्बन्धिन (कुलुङ्गाऽज-नकुलादय) २४ ३२ **पौष्णी**=पूषदैवत्यौ (पिशङ्गौ=पीतवर्णौ पशू) २९ ५९ [पूषन् इति व्याख्यातम्। तत 'सास्य देवता' इत्यण्-प्रत्यये 'अन्' अ० ६ ४ १६७ सूत्रेण प्रकृतिभावे प्राप्ते 'पपूर्वहन्धृत-राज्ञामणि' अ० ६ ४ १३५ सूत्रेणाकारलोप.]

पौंस्यम् पुसु साधु (बलम्) ४.३० २३. पुम्भ्यो हितम् (वीर्यं=पराक्रमम्) ४ ३० ८ पुरुषार्थम् २ १३ १० पुरुषार्थस्य भावम् १ १५५ ४ पुसो भावम् १ १५५ ३ पुसो भाव कर्म बल वा १ ८० १० पुरुषार्थयुक्त बलम् १.१०१ ३ **पौंस्यानि**=वचनानि ६ ३६.३ **पौंस्याय**= पुसु भवाय बलाय ७ ३० १ **पौंस्ये**=पुसो भवे यौवने १ ५६ ३ [पौंस्यानि बलनाम निघ० २ ९ पौंस्ये सग्राम-नाम निघ० २ १७ पुस्प्राति० भावे कर्मणि वा ष्यञ् प्रत्यय। अथवा हितार्थे साध्वर्थे भवार्थे वा यत् छान्दस]

पौंस्या पुम्भ्यो हितानि बलानि ४ ३२ ११ पुसो बलानि प्र०—पौंस्यानीति बलनामसु पठितम् निघ० २.९ 'शेर्लुगत्र १ ५ ९ पुमामिमानि बलानि ५ ५९ ४ पुरुषार्थ-जानि बलानि ६ ४६ ७ पुसु साधूनि बलानि १ १३९ ८ पौंस्यमिति व्याख्यातम। तत शेर्लोपश्छन्दसि]

पौंस्येभिः उत्कृष्टै शरीरात्मबलै १ १०० १० पुरुषार्थै १ १६५ ७ [पौंस्यमिति व्याख्यातम, तत 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

प्यायताम् सर्वतो वर्धताम् ३८ १८ वर्धयताम्, प्र०—अत्राऽन्तर्गतो ण्यर्थ ५.७ **प्यायध्वम्**=आप्यायामहे वा प्र०—अत्र पक्षे व्यत्यय १ १ **प्यायन्ताम्**=पुष्टा भवन्तु १ ९३ १२ **प्यायय**=वर्धय वर्धयति वा ५ ७ **प्यायस्व**=पुषाण ३८ २१ प्यायते वा २ १४ वर्धस्व वर्धयेद् वा ५ ७ [ओप्यायी वृद्धौ (भ्वा०) धातोर्लोट्]

प्यासिषीमहि स्तुवीमहि प्र०—अत्र 'प्यैङ् स्तुतौ' धातो 'सिब्बहुलंछन्दसि' अ० ३ १ ३४ अनेन वार्त्तिकेन सिप् प्रत्यय २ १४ सर्वतो वर्द्धेमहि ३८ २१ [प्यैङ् वृद्धौ (भ्वा०) धातोर्लिङ्। सिब्विकरणश्छान्दस]

प्र प्रकृष्टार्थे क्रियायोगे १ १०.११ गुणैर्यत्प्रकृष्ट तदर्थे क्रियायोगे २ ११ अत्यन्तम् ८ ३ प्रगत १० ३० प्रकृष्ट-तया २.१५ प्रकृष्टम् २ १२ प्रयत्नेन १७ ३९ अधिक आर्याभि० २ ११, ३४ ३६ [आ इत्यर्वागर्थे, प्र परेत्यस्य प्रातिलोम्यम् नि० १ ३ प्रेव नश्यसि पराचीव नश्यसि नि० ९ २८ अन्तरिक्ष वै प्र ऐ० २ ४१ प्राणो वै प्र ऐ० २ ४०]

प्रउगम् प्रयोगार्हम् (उक्थ्यम्=उपदेष्टु योग्य वचनम्) १५ ११ [प्राणा प्रउगम् कौ० १४ ४ आति-च्छन्दस प्रउग कौ० २३ ६ ग्रहोक्थ वा एतद्यत्प्रउगम् ऐ० ३ १]

प्रकङ्कताः प्रकृष्टपीडाप्रदाश्चञ्चला (सर्पादय) १ १९१ ८ [प्र-कङ्कतपदयो समास। कङ्कतम्=ककि गतौ (भ्वा०) धातोर्बाहु० औणादिकोऽतच्]

प्रकरत् प्रकृष्टतया कुर्यात ४ २९ ३ [प्र+डुकृञ् करणे (तना०) धातोर्लुङ्। 'कृमृदृरुहिभ्य०' इति च्ले स्थानेऽङ्]

प्रकरितारम् विक्षेप्तारम् (पुरुषम्) ३० १२ [प्र+ कॄ विक्षेपे (तुदा०) धातो कर्त्तरि तृच्]

प्रकलवित् य प्रकृष्ट कलन सङ्ख्या वेत्ति स (इन्द्र =राजा) ७ १८ १५ [प्रकलोपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप्। प्रकलविद् वणिग् भवति, कलाश्च वेद प्रकलाश्च नि० ६ ६]

प्रकामाय प्रकृष्टकामनासिद्धये ३० १२ [प्र-काम-पदयो समास। काम =कमु कान्तौ (भ्वा०) धातोर्घञ्]

प्रकामोद्याय य प्रकृष्टै कामैरुद्यतस्तस्मै (पुरुषाय) ३० ९

प्रकुपितान् प्रकोपयुक्तान् शत्रूनिव वर्त्तमानान् (पर्वतान्=मेघान्) २ १२ २ [प्र+कुप क्रोधे (दिवा०) धातो क्त प्रत्यय]

प्रकृणुध्वम् प्रकुरुध्वम् १ १२२ ४ **प्रकृण्वे**=प्रकर्ष-तया करोमि १ १३८ २ [प्र+डुकृञ् करणे (तना०) धातोर्लोट्। विकरणव्यत्ययेन श्नु]

प्रकृथ प्रकर्षेण कुरुथ प्र०—अत्र लोडर्थे लट् विक-रणस्य लुक् च १ ११२ ८ [प्र+डुकृञ् करणे (तना०) धातोर्लट्। विकरणस्य लुक्]

प्रकेतम् प्रकृष्ट विज्ञानम् २ १७ ७ **प्रकेतः**=प्रकृष्टा केत प्रज्ञा यस्य स (भा०—अध्यापक उपदेष्टा च जन)

पेशी पेश्याकार गर्भस्थ वीर्य कृतवती (युवति) ५ २ २

पैङ्गराजः पक्षिविशेप २४ ३४

पैजवनस्य वेगयुक्तस्य (नप्तु =पौत्रस्य) ७ १८ २२ क्षमाशीलस्य पुत्रस्य ७ १८ २३ क्षमाशीलाज्जातस्य पुत्रस्य ७ १८ २५ [पैजवन पिजवनस्य पुत्र । पिजवन पुन. स्पर्द्धनीयजनो वाऽमिश्रीभावगतिर्वा नि० २ २४]

पैतृमत्यम् पितृमता भावमेव ७ ४६ [पितृमत्प्राति० भावे ष्यञ्-प्रत्ययो ब्राह्मणादित्वात् । अथवा 'वाङ्-मतिपितृमता छन्दस्युपसङ्ख्यानम्' अ० ४ १ ८५ वा० सूत्रेण प्राग्दीव्यतीयेष्वर्थेपु ण्य प्रत्यय]

पैद्वः सुखेन प्रापक (वाजी=ज्ञानवान् जन) १ ११६ ६ यो यान मार्गे शीघ्रवेगेन गमयिता ऋ० भू० १६४, ऋ० १ ८ ६ १ [पैद्व अश्वनाम निघ० १ १४]

पोता पवित्रकर्त्ता (अग्नि = विद्वज्जन) ४ ६ ३ पवित्र पवित्रकर्त्ता वा (पुरोहित) १ ९४ ६ शोधक (सूर्य) २५ २ [पूञ् पवने (क्र्या०) धातो कर्त्तरि तृच्-प्रत्यय.]

पोत्रम् पवित्रम् (कर्म्म) २ १ २ पवित्रकारकम् (श्रेष्ठ वस्तु) १ ७६ ४ **पोत्रात्**=पुनाति येन गुणेन तस्मात् प्र०—अत्र 'सर्वधातुभ्य ष्ट्रन्' उ० ४ १६३ इति पूञ्धातो ष्ट्रन्-प्रत्यय स्वरव्यत्ययश्च १ १५ २ पवित्रकर्त्तु (विदुपो जनात्) २ ३७ २ [पूञ् पवने (क्र्या०) धातो-रौणादिक ष्ट्रन्प्रत्यय । अथवा पूञ्धातो 'हलसूकरयो पुव' अ० ३ २ १८३ सूत्रेण करणे ष्ट्रन्-प्रत्यय]

पोषम् शरीरात्मपुष्टिकारकम् (सुवीर्यं=विद्याभ्यासम्) १ ६३ २ पुष्टिम् २३ ३१. आत्मशरीरयो पुष्ट्या सुख-प्रदम् (रयिं=विद्यासुवर्णादि-सुधनम्) १ १ ३ पोपकम् (हिरण्य=तेजो सुवर्ण वा) ३४ ५० महापुष्टि करने वाले (रयिं=विद्यादि तथा सुवर्ण आदि धन को) आर्याभि० १.३ ऋ० १ १ १ ३ उत्तमाना धनाना भोगम् ३ २० **पोषस्य**=पोपकस्य जनस्य १२ ८ **पोषः**=बहुगुणयोगेन पुष्ट (पदार्थ) प्र०—भूमा वै रायस्पोप शत० ३ १ १ १२, ३ २० **पोषाय**=पुष्यन्ति प्राणिनो यस्मिन् व्यवहारे तस्मै ३ २३ पोपणकराय (पुरुषाय) ११ ७६ पुष्टिकराय (राये=धनाय) १ १४२ १० **पोषे**=पुष्टौ १७ ५४ पुष्यन्ति=यस्मिँस्तस्मिन् (यज्ञे) ५ ५ ६ पोपणे १७ ५४ **पोषेण**=पालनेन १२ ८ पोपणेन १७ ५० घृतदुग्धादिपुष्टिकारकपदार्थप्राप्त्या प० वि० । पुष्यन्ति येन तेन (पदार्थेन) ४ २२ **पोषैः**=पुष्टिकारकैराप्तविद्याजनितै-वीर्ययुक्तैर्व्यवहारै ३ ३७ उत्तम पुष्टिकारक व्यवहारो से स० वि० १४६, ३ ३७ [पुप पुष्टौ (भ्वा०) धातोर्घञ् अथवा कर्त्तरि अच्]

पोषयत् पोषयेत् ५ ६ ७ [पुष पुष्टौ (दिवा०) धातोर्णिजन्ताल् लङ्]

पोपयित्नु पोपकम् (अध्यापनासनम्) ७ २ ६. पोप-यित्री (धर्मशिक्षा) ३ ४ ६ पुष्टिकरम् (द्रव्यम्) ४ ५७.१ [पुष पुष्टौ (दिवा०) धातो 'स्तनिहृषिपुषि०' उ० ३ २९ सूत्रेण णिजन्ताद् इत्नुच् प्रत्यय । पोपयित्नु=पुष्ट पोप-यितृ नि० १० १५]

पोष्या पोपयितुमर्हाणि (वार्य्याणि=धनादीनि) १ ११३ १५ [पुप पुष्टौ (दिवा०) धातोर्ण्यत् । तत शेर्लोप-श्छन्दसि]

पोष्या पोपण करने योग्य पत्नी स० वि० १४७, अथर्व० १४ १ ५२. **पोष्याणाम्**=पोपितु योग्यानाम् (हरीणा=मनुष्याणाम्) ४ ४८ ५. [पुप पुष्टौ (दिवा०) धातोर्ण्यत् । तत स्त्रियां टाप्]

पोष्यावतः बहव पोष्या पोपणीया विद्यन्ते येषान्तान् (नॄन्) ५ ४१ ८ [पोष्यप्राति० भूम्न्यर्थे मतुप् । मतुप्-प्रत्यये परे दीर्घश्छान्दस]

पौञ्जिष्ठम् पुल्कसम् ३०.८

पौर पुरोर्मनुष्यस्याऽपत्य तत्सम्बुद्धौ ५ ७४ ४ **पौरम्**=पुरि भव मनुष्यम् ५ ७४ ४ **पौरः**=पुरि भव (इन्द्र=वैद्य) २ ११ ११ **पौराय**=पुरि भवाय (मनुष्याय) ५ ७४.४ [पुरव मनुष्यनाम निघ० २.३ ततो-ऽपत्यार्थेऽण् । उकारलोपश्छान्दस । अथवा पुर्-प्राति० भवार्थेऽण्]

पौरुकुत्सिम् पुरवो बहव कुत्सा शस्त्राऽस्त्रविद्या-योगा यस्य तस्याऽपत्यम् (सत्पुरुषम्) ७ १६ ३ [पुरु-कुत्स-पदयो समासे कृतेऽपत्यार्थे 'अत इञ्' इतीञ् प्रत्यय । पुरु=बहुनाम निघ० ३ १ कुत्स =वज्रनाम निघ० २ २०]

पौरुकुत्स्यस्य बहुवज्रादिशस्त्राऽस्त्रविदोऽपत्यस्य (सूरे =मेधाविनो जनस्य) ५ ३३ ८ [पुरु-कुत्सपदयो समासे कृतेऽपत्यार्थे यञ्-प्रत्यय]

पौरुषेयः पुरुषाणा समूह १५ १५ [पुरुषप्राति० समूहार्थे 'पुरुषाद् वधविकारसमूह तेनकृतेष्विति वक्तव्यम्' अ० ५ १ १० वा० सूत्रेण ढञ् । ढस्य एयादेश]

पौरुषेयीम् पौरुषेयस्य रीतिम् ७ ४ ३ **पौरुषेय्याः**=पुरुषसम्बन्धिन्या (युक्ताहारविहारक्रियाया) २१ ४४.

चिकित्सकौ) २८ ७ **प्रचेतः**=प्रकृष्ट-प्रज्ञ (विद्वज्जन) १.११३ १. प्रकृष्टविज्ञान (अग्ने=विद्वज्जन) ६ १३ ३ प्रकर्षेण प्रज्ञया युक्त (अध्यापक) ७ १७ ५ **प्रचेताः**=प्रकृष्ट चेत प्रज्ञा यस्य स, भा०—यो न मूढ (विद्वान् जन) २० ३७ य अयानान् प्रचेतयति स (अग्नि=विद्युत्) २ १० ३ प्रकृष्टञ्चेत सज्ञानमस्य स (कवि=क्रान्तप्रज्ञो मेधाविजन) २६ २५ प्रकृष्टयुक्तो विज्ञापको वा (अग्नि=विद्वान्) ३ २५ १ यथा प्राण प्रचेतयति तथा (जगदीश्वरो विद्वान् वा पुरुष) ५ ३१ प्राज्ञ प्रज्ञापक (अग्नि=विद्वान् जन) ४ ६ २ प्रज्ञापयिता (महाविद्वज्जन) ७.४४ प्रकर्षेण प्रज्ञापक (अग्निरिव गृहपालको मनुष्य) ७ १६ ५ प्रकृष्ट ज्ञानस्वरूप, प्रकृष्ट ज्ञान को देने वाला (ईश्वर) आर्याभि० २ १६, ५ ३१ य. प्रकृष्टविज्ञान (विश्वकर्मा=विद्वान् जन.) यया प्रकृष्टतया चेतन्ति सजानन्ति सा (वाक्) ५ ११ प्रकृष्टतया सदर्थज्ञापिका (स्त्री) ३.६१.१. [प्र-चेतस्पदयो समास । चेतस्=चिती सज्ञाने (भ्वा०) धातोरसुन् । चेत प्रज्ञानाम निघ० ३ ६ प्रचेता=प्रवृद्धचेता. नि० ८ ५. प्रचेतस=प्रवृद्धचेतस नि० ६.१६.]

प्रचेतसा प्रकृष्टतया प्रज्ञाननिमित्ते (क्षितिसूर्यौ) १ १५९.१ प्रकृष्टज्ञानौ (मित्रावरुणौ=अध्यापकोपदेशकौ) ५ ७१ २ प्रकृष्ट चेतो विज्ञान ययोस्तौ (कवी=मेधाविनौ) २८ ३० [प्र-चेतस्पदयो समासे 'सुपा सुलुक्०' इति प्रथमाद्विवचनस्याकारादेश']

प्रचेतुने प्रचेतयन्त्यानन्देन यस्मिँस्तस्मिन् (पदे=प्राप्तु योग्ये व्यवहारे) १ २१ ६ [प्र+चिती सज्ञाने (भ्वा०) धातोश्छान्दस रूपम्]

प्रचोदयन् प्रज्ञापयन् (अध्यापक) ३ २७ ७. [प्र+चुद सञ्चोदने (चुरा०) धातो शतृप्रत्यय]

प्रचोदयन्ता प्रेरयन्तौ (कारू=शिल्पिनौ जनौ) २६ ३२ [प्र+चुद् सञ्चोदने (चुरा०)+शतृ । 'सुपा सुलुग्०' इत्याकारादेश । प्रचोदयन्ता=प्रचोदयमानौ नि० ८.१२.]

प्रचोदयात् सद्गुणकर्मस्वभावेषु प्रेरयतु ३ ६२ १० भा०—अधर्माचरणान्निवर्त्य धर्माचरणे प्रेरयेत् २२ ६. प्रकृष्ट प्रेरयेत भा०—नित्य प्रवर्त्तयेत् ३ ३५ प्रेरणा करे स० वि० ७५, ३६ ३ बुरे कामो मे छुटाकर अच्छे कामो मे प्रवृत्त करे स० प्र० ५१, ३६ ३ [प्र+चुद सञ्चोदने (चुरा०) धातोर्लेट्]

प्रच्छद् प्रयत्नेन दुष्टस्वभावदूरीकरणार्थं कर्म्म १५ ५. [प्र+छद अपवारणे (चुरा०) धातो क्विप्]

प्रच्छिदम् य प्रच्छिनत्ति तम् (नरम्) ३०.१७ [प्रोपपदे छिदिर् द्वैधीकरणे (रुधा०) धातो कर्त्तरि क्विप्]

प्रच्यावयति प्रकर्षेण चालयति ७ १६ १ **प्रच्यावयन्ति**=प्रकृष्टतया प्रचालयन्ति १.६४ ३. निपातयन्ति ५.५६.४ **प्रच्यावयसि**=प्रापयसि ३ ४३.७ [प्र+च्युङ् गतौ (भ्वा०) धातोर्णिजन्ताल् लट्]

प्रच्यावयन्तः विमानादीनि यानानि प्रचालयन्त सन्त (सभाद्यध्यक्षादय) १ ८५ ४ [प्र+च्युङ् गतौ (भ्वा०) धातोर्णिजन्ताच् छतृप्रत्यय]

प्रजज्ञिवान् प्रजात सन् (अग्नि=वह्नि) ३.२ ११ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लिट' क्वसु प्रत्यय]

प्रजज्ञे प्रकृष्टतया जायताम् १.१२१.६. [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लिट् । 'गमहन०' इत्युपधालोप]

प्रजननम् प्रजनयन्ति येन तत् (अपत्यम्) १६ ४८ प्रकटनम् ३ २६ १ **प्रजननाय**=सन्तानोत्पादनाय ३.६३ [प्र+जनी प्रादुर्भावे (दिवा०) धातो करणे ल्युट् । प्रजापति. प्रजननम् । जै० २ ६५. प्रजनन वै सोम जै० ३ १६१ प्रजनन सप्तदश काठ० २१ १ प्रजा वै पशव प्रजननम् जै २.१०८. यानि द्वादश (अक्षराणि) प्रजनन तत् जै० १ २०४ सवत्सरो वै प्रजननम् काठ० ७.१५.]

प्रजनय प्रकटय ३४ ३६ प्रकट कीजिए स० वि० १५६, ७ ४१ ३. अच्छे प्रकार मे उत्पन्न कर आर्याभि० २ ११, ३४ ३६ [प्र+जनी प्रादुर्भावे (दिवा०) धातार्णिजन्तात्लोट्]

प्रजनयन् निष्पादयन्नेव (योगी) ७ १३. परमेश्वर इव प्रकटयन् (न्यायाधीशो राजा) ७ १८ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताच्छतृप्रत्यय']

प्रजभ्रुः प्रकर्षेण धरन्तु ३ ५४ १ [प्र+हृञ् हरणे (भ्वा०) धातोर्लिट् । 'हृग्रहोर्भश्छन्दसि' इति हकारस्य भकारादेश]

प्रजया सर्वेण ससारेण ८ ३६. स्वसन्तानादिना ८ १७ राज्येन सन्तानसमूहेन वा ५ २८ प्रजातया (सृष्ट्या) ३२.५ सुसन्तानाद्यया सह १ १३६ ६ सुपुत्रादियुक्तया १ ६३ ३ सुसन्तानै २० २२ सन्तानेन १२ ७ **प्रजा**=सुसन्ताना यज्ञसम्पादिका (सृष्टि) १ २३. **प्रजानाम्**=प्राणिमात्राणाम् ३४ २. उत्पन्नाना पदार्थानाम् ३७ १४. सर्वेषा व्यवहाराणाम् ३४ ५ मनुष्यादीनाम् १६ ४७ पालनीयानाम् (सन्तनीनाम्) १८ २८. **प्रजाभिः**=प्रजातै

३४ १८ प्रकृष्टप्रज्ञ (वसिष्ठ =पूर्णविद्वान् जन) ७ ३३ १२ प्रकृष्टप्रज्ञावान् प्रज्ञापक (अग्नि =स्वप्रकाशस्वरूपो जगदीश्वर) ७ ११ १ **प्रकेतेन**=प्रकृष्टेन विज्ञानेन १५.६ **प्रकेतैः**=प्रकृष्टाभि प्रज्ञाभि ७ ३३ ६ [प्र+केतपदयो. समास । केत प्रज्ञानाम निघ० ३ ६ प्रकेत =प्रकेतनम् प्रज्ञाततमम् नि० २ १६]

प्रक्रमते प्रकर्षेण प्राप्नोति १ १५४ १ [प्र=क्रमु पादविक्षेपे (भ्वा०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

प्रक्रीळान् प्रकृष्टान् विहारान् ४ ४१ ११ **प्रक्रीडेन**= उत्तमक्रीडया ३६ ६ [प्र+क्रीड़ृ विहारे (भ्वा०) धातोर्घञ् प्रत्यय]

प्रक्रीळिनः प्रकृष्टा क्रीळा विद्यते येषान्ते (वत्सास = सद्यो जाता वत्सा) ७ ५६ १६ [प्रक्रीडाप्राति० प्रशसायाम् इनि प्रत्यय]

प्रखादः अतिभक्षक (इन्द्र =सेनेश) १ १७८ ४ [प्र+खाद भक्षणे (भ्वा०) धातोरच् कर्त्तरि]

प्रखिदते प्रकृष्टतया क्षीणाय (जनाय) १६ ४६ [प्र+खिद दैन्ये (दिवा०) धातो शतृ । व्यत्ययेन श]

प्रगर्द्धिनः प्रकर्षोऽभिकाङ्क्षिण (श्येनस्य) ६ १५ प्रलुब्धस्य (श्येनस्य) ४ ४० ३ [प्र+गृधु अभिकाङ्क्षायाम् (दिवा०) धातोस्ताच्छील्ये णिनि]

प्रगाथाः ये प्रकर्षेण गीयन्ते ते (विद्वासो जना) १६ २४ [प्र+गाथपदयो समास । गाथ =गै शब्दे (भ्वा०) धातो 'उपिकुषिगार्त्तिभ्यस्थन्०' उ० २ ५ सूत्रेण थन् । मन प्रगाथ जै० उ० ३ १ ४ ३ प्राणापानौ वै वार्हत प्रगाथ कौ० १५ ४]

प्रगाय अधिक स्तुहि ६ ४० १ **प्रगायत**=प्रशसत ५ ६८ १. [प्र+गै शब्दे (भ्वा०) धातोर्लोट्]

प्रगाहमानः प्रयत्नेन विलोडन कुर्वन् (इन्द्र =सेनापति) १७.३६ [प्र+गाहू विलोडने (भ्वा०) धातो शानच्]

प्रगिरिभ्यः प्रकर्षेण शैलेभ्य १ १०६ ६ [प्र-गिरिपदयो समास]

प्रगूर्त्त उद्यच्छत १ १७३ २ [प्र+गुर्वी उद्यमने (भ्वा०) धातोर्लोट् । विकरणस्य शपो लुक्]

प्रघासिनः प्रघस्तुमत्तु शीलमेषा तान् (अ०—अतिथीन्) ३ ४४ **प्रघासी**=बहव प्रकृष्टा घासा भोज्यानि विद्यन्ते यस्य स (भा०—बह्वन्नसामर्थ्यो गृहस्थ-जन) १७ ८५ [प्र+घस्लृ अदने (भ्वा०) धातोस्ताच्छील्ये णिनि । अथवा प्र-घासपदयो समासे मतुवर्थे इनि]

प्रचक्ष्व प्रख्यापय १ १३४ ३ [प्र+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्णिजन्ताल्लोट्]

प्रचर विजानीह्यनुतिष्ठ ४ ३७ [प्र+चर गतौ (भ्वा०) धातोर्लोट्]

प्रचर्षणी सम्यक् सुख-प्रापकौ (इन्द्राग्नी=विद्युद्भौतिकाग्नी) प्र०—चर्षणिरिति पदनाम निघ० ४ २, १ १०६ ५ [प्र-चर्षणिपदयो समास । चर्षणि =चायिता नि० ८ १४]

प्रचाकशत प्रकाशते ४ ५३ ४ [प्र+काशृ दीप्तौ (भ्वा०) धातोर्णिजन्ताल्लुङ् । अडभावश्छान्दस]

प्रचातयस्व प्रकर्षेण हिंस्य हिन्धि वा ५.४ ६ प्रकृष्टतया नाश प्रापय प्र०—चततिर्गतिकर्मा निघ० २ १४, ७ १ ७ [प्र+चतति गतिकर्मा (निघ० २ १४) धातोर्णिजन्ताल्लोट्]

प्रचिकितः प्राप्तविज्ञान (पित्रादिजन) १६ ५२ [प्र-चिकितपदयो समास]

प्रचिकितुः विजानन्ति ७ ११ ३ [प्र+कि ज्ञाने (जु०) धातोर्लिट्]

प्रचिकित्स रोगनिवारणायेव विघ्ननिवारणोपाय कुरु ३४ २३ [कित निवासे रोगापनयने च (भ्वा०) धातो प्रपूर्वाद् 'गुप्तिज्किद्भ्य सन्' इति स्वार्थे सन्नन्ताल् लोट्]

प्रचेकिते प्रकृष्टतया जानाति १ ५५ ३ [प्र कि ज्ञाने (जु०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

प्रचेतयति प्रकृष्टतया सम्यङ् ज्ञापयति १ ३ १२ प्रज्ञापयति २० ८६ [प्र+चिती सज्ञाने (भ्वा०) धातोर्णिजन्ताल् लट्]

प्रचेतसम् प्रकर्षेण ज्ञापयितारम् (अध्यापकम्) ७ १६ १२ प्रकर्षेण सञ्ज्ञापकम् (अग्नि=पावकम्) ३ २६ ५ प्रकृष्टं चेतो विज्ञान यस्य यस्माद् वा तम् (विद्यावन्त जनम्) १ ४४ ११ प्रकृष्टप्रज्ञायुक्तम् (विद्वासम्) ४ १ १ विविधप्रज्ञानयुक्तम् (अग्नि=विद्वास जनम्) ४ १ १ प्रकृतप्रज्ञम् (पुरुषम्) प्र०—चेता इति प्रज्ञानाम निघ० ३ ६, १२ ११० **प्रचेतसः**=प्रकृष्ट चेत सज्ञान येभ्यस्ते (वायव) १ ६४ ८ शिक्षया प्रकर्षेण विज्ञापितान् (अश्वान्=तुरङ्गान्) २६ ५० प्रकृष्ट चेतो विज्ञान यासा ता (सेना) १ ८४ १२ प्रकृष्ट चेतो ज्ञान यस्य तस्य (परमेश्वरस्य) २ २३ २ प्रज्ञापका (विद्वज्जना) ५ ८७ ६ **प्रचेतसे**=प्रकृष्ट चेत प्रज्ञा यस्य तस्मै (महाराजाय) ७ ३१ १० **प्रचेतसौ**=प्रकृष्टविज्ञानयुक्तौ (भिषजा=

(पशुभि) ६ ७० ३ पालनीयाभि (सन्ततिभि) ५ ४ १०. अनुकूलाभि स्त्र्यौरसविद्यासन्तान-मित्र-भृत्य-राज्य-पश्वादिभि ३ ३७ भा०—सभ्यसैन्य-प्रजाजनै ७ २६ पुत्रपौत्रादि उत्तमगुणवाली प्रजाओ से आर्याभि० २ ३५, ३ ३७ **प्रजाभ्यः**=उत्पन्नाभ्य सृष्टिभ्य ४ २५ स्वसन्तानेभ्य १२.७२ पालनीयाभ्य (प्राणिभ्य) ११ ३८ प्रसिद्धाभ्य (मानुषीभ्य =मनुष्यादिभ्य) ११ ४५ प्रजाताभ्यो विद्युदादिभ्य १३ ५७ **प्रजाम्**=या प्रजायते ताम् (सृष्टिम्) ४ १३ स्वसन्तानान् सरक्षणीयान् जनान् ६ ३. पुत्रपौत्रप्रभृतिम् १६ ४८ पुत्रपौत्रादिकाम् ११२५ १. उत्तमान् सन्तानान् राष्ट्र वा ४ ३६ ६ सुसन्तानरूपाम् (सृष्टिम्) ३४ १० उत्पन्ना सृष्टिम् ५ १७ पालनीयाम् (सृष्टिम्) ६.२५ उत्पादनीयाम् (सन्ततिम्) ५ २७ सन्ततिम् २५ ७ सुसन्तानम् ११ ५८ सत्यबलधर्मयुक्ताम् (सृष्टिम्) ११ ५८ सुप्रजाताम् (सन्तानोत्पत्तिम्) ११ ५८ राज्यम् १ १७६ ६ प्रजा को स० वि० १३८, अथर्व० १४ २.३१ **प्रजायाः**=मनुष्यादिसृष्टये प्र०—अत्र चतुर्थ्यर्थे षष्ठी १.१५६ २ विद्यमानाया (सृष्टे) ३ ३६ **प्रजायै**=प्रजासुखाय ७ ५७ ६ **प्रजासु**=प्रकृतिजीवादिषु ३२ ८ जनेषु ३४.३ प्रजाओ मे स० प्र० २४७, ३४ ३. **प्रजाः**=प्रादुर्भूता पालनीया (सृष्टय) १४३ ६ समुत्पन्ना (सृष्टय) १ ६७ ५. मनुष्यादिसृष्टय ४ २५ जगत्स्था (सृष्टय) ४ २५ प्रजननीया (प्रजाजना.) ६ २६ प्रजा एव ७ १८. सरक्षणीया (सृष्टय) ७.१७ प्रजायन्ते यास्ता (सन्ततय) १ ६६ २ पालनीया (सन्ततय) १४ २६ तदधीनपालना (सन्ततयः) ६ २१. प्रजाता. (सर्वलोका) ३ ५५.१६. [प्र+जनी प्रादुर्भावे (दिवा०) धातो 'उपसर्गे च सज्ञायाम्' अ० ३ २ ६६ सूत्रेण ड प्रत्यय । स्त्रिया टाप् । प्रजा अपत्यनाम निघ० २ २ प्रजा वै तोकम् श० ७ ५ २ ३६. प्रजा वै सूनु श० ७ १ १ २७. प्रजा वै तन्तु ऐ० ३ ११ प्रजा वा अप्नुरित्याहु गो० पू० ५.६ प्रजा वा ऽअरी श० ३ ६ ४ २१ प्रजा वा ऽइष श० १ ७ ३ १४ प्रजा वै भूतानि श० २ ४ २ १ प्रजा वै बर्हि कौ० ५ ७, १८ १० प्रजानुरूप ऐ० ३ २३ प्रजाशस्त्रम् श० ५ २ २ २० प्रजा पशव सूक्तम् कौ० १४ ४ प्रजा वा उक्थानि तै० १ ८ ७ २ प्रजा. सतो बृहती गो० उ० ६.८ आदित्या वा इमा प्रजा ता० १८ ८ १२ द्वय्यो ह वा ऽइदमग्रे प्रजा आसु । आदित्याश्चाङ्गिरसश्च श० ३ ५.१.१३ वैश्वदेव्यो वै प्रजा तै० १ ६ २ ५ आगस्त्यो वै प्रजा श० १३ ३ ४ ५, आयास्यो वै प्रजा तै० ३ ६ ११ ४. आद्या ह्वीमा प्रजा विश श० ४ २ १ १७]

प्रजवः प्रकृष्टो वेग ७.३३ ८ [प्र+जु इति सौत्रो धातु, वेगिताया गतौ । तत 'जवसवौ छन्दसि वक्तव्यौ' अ० ३ ३ ५६ वा० सूत्रेण अच्प्रत्यय]

प्रजवेते प्रगच्छत ३ ३३ १ [प्र+जु इति सौत्रो धातु । ततो लट्]

प्रजातम् उत्पन्नम् (मन) १ १६४ १८ **प्रजातः**=प्रसिद्ध उत्पन्न (पुत्र =अध्येता) १ ६६ १ [प्र+जनी प्रादुर्भावे (दिवा०) धातो क्त । धातो स्थाने जादेश]

प्रजानतीव यथा विज्ञानवती विदुषी तथा (उषा) १ १२४ ३ [प्रजानती-इवपदयो समास । प्रजानती=प्र+ज्ञा अवबोधने (क्र्या०)+शतृ+ङीप्]

प्रजानन् प्रकृष्टतया जानीयु १ ७२.१० [प्र+ज्ञा अवबोधने (क्र्या०) धातोर्लङ् । अटोऽभाव]

प्रजानन् प्रज्ञावान् सन् (सम्राट्=चक्रवर्त्ती राजा) ६ २४ प्रकृष्टतया जानन् (पति) १३ ३४ प्रकर्षेण जानन् सन् (न्यायाधीश) ३५ १ प्रकृष्टतया बुद्ध्यमानः (इन्द्र =शिल्पिजन) ३ ३५ ४ प्रकर्षेण विदन्त्सन् (अश्व = शीघ्रगामी वह्नि) २६ १० प्रकर्षता से जानता हुआ गृहस्थ जन) स० वि० १८६, अथर्व० ६ ५ १ विद्वान् (पुरुषार्थिजन) ३ २६.१६. [प्र+ज्ञा अवबोधने (क्र्या०) धातो शतृ-प्रत्यय]

प्रजापतये प्रजापालकाय (विदुषे जनाय) २२ ५ प्रजाया पालकाय (विदुषे गृहस्थाय) २२ ४ प्रजास्वामिने (राज्ञे) २४ २६ प्रजारक्षकाय (राजपुरुषाय) १८ २८ **प्रजापतिम्**=विश्वस्य पालक स्वामिनम् (परमेश्वरम्) २३ ६४ **प्रजापतिः**=प्रजापालक ईश्वर १४ ३ प्रजापालको जीव १६ ७८ प्रजापालक सूर्य २३.६३ प्रजाया स्वामी (परमेश्वर) ८ ५४ विश्वस्याऽध्यक्ष (ईश्वर) ८ ३६ सन्तानादिपालक (गृहपति) ८ १०. सर्वस्या प्रजाया स्वामित्वात् (ईश्वर) ३२ १ प्रजाया पालकोऽधिष्ठाता (परमेश्वर) ३२ ५ प्रजापालक सभेशो राजा १६ ७५ सब जगत् का पति (स्वामी) और पालन करने वाला (परमात्मा) आर्याभि० २ ४, ३२ १ सब ससार का अधिष्ठाता पालक (ईश्वर) आर्याभि० २ ५४ सकल सृष्टि की उत्पत्ति और पालन करने हारा सर्वव्यापक स्वामी परमात्मा स० वि० १८७, १६ ७७ **प्रजापते**=प्रजाया स्वामिन्नीश्वर १० २० प्रजारक्षक (राजन्) २३ ८ **प्रजापतेः**=सन्तानादिरक्षकस्य (गृहपते) ८ १० प्रजाया

प्रणव गो० उ० ३ ११. ब्रह्म वै प्रणव कौ० ११.४]

प्रणिदधात प्रणिधत्त ५.२२.२. [प्र+नि+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्]

प्रणिनाय प्रकर्षेण प्रापय ३ ८ ११ यथा त्व प्रणये-न्नया अ०—प्रापयति ५ ४३ [प्र=णीञ् प्रापणे (भ्वा०) धातोर्लिट्]

प्रणीतयः प्रकृष्टा नीतय ६ ४५ ३ [प्र+णीञ् प्रापणे (भ्वा०) धातो स्त्रिया क्तिन्]

प्रणीतम् प्रकृष्टतया प्रापितम् (तम.=अन्धकाररूप दु खम्) १ ११७.१३ **प्रणीत:**=प्रकृष्टतया सम्मिलित. (अग्नि=पावक) १९ १७ [प्र+णीञ् प्रापणे (भ्वा०) धातो क्त]

प्रणीतिषु प्रकृष्टासु नीतिषु १ ११४ २ **प्रणीतिः**= प्रकृष्टा नीति ६ ४८.२० **प्रणीतौ**=प्रकृष्टाया नीतौ ३ १५ १ प्रकृष्टाया धर्म्याया नीतौ ११ ४९ [प्र+णीञ् प्रापणे (भ्वा०) धातो स्त्रिया क्तिन्]

प्रणीती प्रकृष्टा चासौ नीतिस्तया प्र०—अत्र 'सुपा सुलुक्०' इति पूर्वसवर्णदीर्घ १ ९१ १. प्रकृष्टा नीतिम् प्र०—अत्र पूर्वसवर्णादेश ७ ३५ प्रकृष्टनीत्या ७ २८ ३. [प्रणीतिप्राति० तृतीयैकवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

प्रणीयते प्रकर्षेण प्राप्यते ३ २७ ८ **प्रणीयन्ते**= प्रयुक्त किये जाते हैं स० वि० २०९, अथर्व० ९ ६.१५ [प्र+णीञ् प्रापणे (भ्वा०) धातो कर्मणि लट्]

प्रणुद प्रकृष्टतया दूरे क्षिप १५.१ प्रकर्षेण हिन्धि १५ २. **प्रणुदाति**=प्रकर्षेण दूरीकरोतु २ ३०. [प्र+णुद प्रेरणे (तुदा०) धातोर्लोट्। अन्यत्र लेटि आडागम.]

प्रणेतः प्रकर्षेण प्रापक (ईश्वर) ७.४१ ३ पुरुषार्थ प्रति प्रेरक (ईश्वर) ३४.३६. य सत्यान्नत्ये प्रणयति तत्सम्बुद्धौ (इन्द्र=परमैश्वर्ययुक्त जन) ३ ३०.१८. सर्वेषां नयनकर्त्त (विद्वत्पिन) २.२८ ३ सब के उत्पादक सत्याचार मे प्रेरक (ईश्वर) स० वि० १५९, ७ ४१ ३ **प्रणेता**= प्रकृष्टतया नेता (अग्नि=पावकवद्विद्वज्जन) २.९ २. प्रेरक (अग्नि.=पावक.) ३ २३ १ **प्रणेतारः**=प्रकृष्ट न्याय कुर्वन्त (विद्वज्जना.) ३ ५७.२ प्रनायका (देवा= वायुविद्याविन्जना) १ १६९ ५ प्रेरका (मेधाविनो जना) ५ ६१ १५ [प्र+णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि तृच्]

प्रणेनी प्रकर्षेण न्यायकृत् (इन्द्र=राजा) ९ २३ ३. [प्र पूर्वात् णीञ् प्रापणे (भ्वा०) धातोर्यङ्लुगन्तात् क्विप्]

प्रणेषत् प्रकृष्ट नय प्राप्नुयात् प्रापयेद् वा २ २०.३. [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लेट्। 'व्यत्ययो बहुलम्' इति शप्सिपौ]

प्रणोनुमः प्रकृष्टमतिशयेन स्तुम., पुन पुनर्नमस्कुर्म्मः प्र०—अत्र 'णु स्तुतौ' इत्यस्य यङ्लुकि प्रयोग 'उपसर्गाद-समासेऽपि णोपदेशस्य' अ० ८.४.१४ इति णकारादेशश्च १ ११ २ प्रकर्षेण भृशन्नमेम ७.३१.४. [प्र+णु स्तुतौ (अदा०) धातोर्यङ्लुगन्ताल् लट्]

प्रण्यः प्रकृष्टा नीतिर्यासा ता (सत्स्त्रिय) ३ ३८.२ [नी=णीञ् प्रापणे (भ्वा०) धातो क्विप्। प्र-नीपदयो समास.]

प्रतक्वा यथा प्रतकति प्रकर्षेण हर्षतीति तथा (भगवान्) प्र०—अत्र 'अन्येषामपि दृश्यन्ते' इति वनिन् ५ ३२. सब का ज्ञाता, सत्यासत्यकारी जनो के कर्मो की साक्ष्य रखने वाला (ईश्वर) आर्याभि० २.१७, ५.३२. [प्र+तक हसने (भ्वा०) धातो. कर्त्तरि वनिप्]

प्रतताः विस्तीर्णा. स्वरूपगुणा. (प्रजासेनाध्यक्षा:) ३ ३१.२०. [प्र+तनु विस्तारे (तना०) धातो क्त। 'अनुदात्तोपदेश०' इत्यनुनासिकलोप]

प्रतनु प्रकृष्टतया विस्तृणुहि १३.२० [तनु विस्तारे (तना०) धातोर्लोट्]

प्रतरणः दु खात् प्रकृष्टतया तारक (विद्वान् जन) १ ९१ ६ य. प्रकृष्टतया दु खानि तरति (अग्नि=अध्या-पक) २ १.१२. प्रतरति दु.खानि येन स (यज्ञ) ४.३७ प्रतारक. (राजा) ६ ४७ २६ शत्रुबलस्योल्लङ्घक (वन-स्पति=वनादिपालको विद्वान् राजा) २९ ५२. **प्रतर-णाय**=नौकादिना परतटादर्वाचीनतटप्राप्ताय प्रापयित्रे वा (पुरुषाय) १९ ४२. [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो करणे ल्युट्। कर्त्तरि वा 'कृत्यल्युटो बहुलमि' ति ल्युट्। प्रतरण प्रतारयिता ऐ० ३ १३.]

प्रतरणी दोष और शोकादि से पृथक् रहने वाली (वरानना स्त्री) स० वि० १३८, अथर्व० १४.२ २६. **प्रतरणीम्**=प्रतरन्ति यया ताम् (विद्याम्) ५ ४६ १. [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्ल्युडन्तात् ङीप्]

प्रतरत दु खान्युल्लङ्घयत भा०—दु खसागर सहजत सन्तरत ३५ १०. [प्र+तॄ प्लवनसन्तरणयो. (भ्वा०) धातोर्लोट्]

प्रतरम् प्रकृष्टतया तरति प्लावयति दूरीकरोति दु ख येन तत् (आयु=जीवनम्) १ ५३ ११ प्रतरन्ति दु.ख येन

प्रजापति तै० स० ५ २ ८ ३]

प्रजापतिगृहीतया प्रजापतिर्गृहीतो यया स्त्रिया तया १३ ५४ [प्रजापति-गृहीतपदयो समास । गृहीत =ग्रह उपादाने (क्र्या०)+क्त]

प्रजापतिभक्षितस्य प्रजास्वामिनेश्वरेण सेवितस्य भक्षितस्य वा (पयस =उदकस्य दुग्धस्य वा ३८.२८ [प्रजापति-भक्षितपदयो समास]

प्रजायन्ते प्रकृष्टतयोत्पद्यन्ते ३ ३६ ५ **प्रजायेमहि**= प्रकृष्टतया जायेमहि १ ६७ ४ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लेट् । अन्यत्र लड् अडभावश्च]

प्रजावत् प्रजा विद्यन्ते यस्मिँस्तत् (ब्रह्म=धनमन्न वा) ६ १६ ३६ प्रशस्ता प्रजा भवन्ति यस्मात्तत् (आयु = अन्नम्) १ ११३.१७ बह्वच प्रजा विद्यन्ते यस्य तत् (सौभग=महदैश्वर्यम्) ५ ८२ ४ **प्रजावता**=प्रशस्ता प्रजा विद्यन्ते यस्मिँस्तेन (राधसा=विद्यासुवर्णादिधनेन) १ ६४ १५ **प्रजावतः**=प्रशस्ता प्रजा येषु तान् (वाजान्= सङ्ग्रामान्) १ ६२ ७ प्रशस्ता प्रजा विद्यन्ते यस्मिँस्तस्य (वाजस्य=अन्नादेर्विज्ञानस्य वा) ३ १६ ६ [प्रजाप्राति० प्रशसाया भूम्न्यर्थे वा मतुप्]

प्रजावती प्रजापालनतत्परा (विधवा स्त्री) ऋ० भू० २१४, अथर्व० १४ २ १८ उत्तम पुत्र-पौत्रादि से सहित (स्त्री) स० प्र० १५२, अथर्व० १४ २ १८ प्रजा को प्राप्त होने वाली (सौभाग्यप्रदा नारी) स० वि० १३६, अथर्व० १४ २ ३२. **प्रजावतीषु**=प्रशस्तप्रजायुक्तासु (रीतिषु) ७ १ ११ **प्रजावतीः**=बहुप्रजा विद्यन्ते यासु ता (उषस =प्रभातवेला) ६ २८ १ बहुप्रशसितप्रजायुक्ता (इष =अन्नादीच्छा) ६ ५२ १६ भूयस्य प्रजा वर्त्तन्ते यासु ता (अघ्न्या =गा) प्र०—अत्र भूम्न्यर्थे मतुप् १.१ प्रशस्ता प्रजा विद्यन्ते यासा ता (गा) ६ २८ ७ [प्रजा-प्राति० प्रशसाया भूम्न्यर्थे वा मतुवन्तान् ङीप्]

प्रजावतः बह्वच प्रजा उत्पन्ना विद्यन्ते येषु मासेषु तान् प्र०—अत्र भूमार्थे मतुप् १ २५ ८ **प्रजावन्तम्**= बहुप्रजायुक्तम् (रयिं=धनम्) ४ ५३ ७ बह्वच प्रजा विद्यन्ते यस्य तम् (रयिं=धनम्) ४ ५१ १० **प्रजावन्तः**= बह्वच सुसन्तानराष्ट्रास्या प्रजा विद्यन्ते येषान्ते (मनुष्या) प्र०—अत्र भूम्न्यर्थे मतुप् ३ ५६ **प्रजावान्**=सन्तानवान् (गातु =भूमि) ३ ५४ १८ बह्वच प्रजा विद्यन्ते यस्य स (परमेश्वर) ३ ५६ ३ बह्वय प्रजा विद्यन्ते यस्मिन् स (भग =ऐश्वर्यम्) ३ ३० १८ [प्रजाप्राति० भूम्न्यर्थे मतुप्]

प्रजासनि प्रजा सनति येन तत् (अपत्यम्) १६ ४८. [प्रजोपपदे षण सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसन-रक्षिमथाम्' अ० ३ २ २७ सूत्रेण इन् प्रत्यय.]

प्रजिगतः प्रकर्षेण भृश प्राप्नुत प्र०—अत्र यङन्तात् परस्य लट शतृ यङो लुक् 'वाच्छन्दसि' इत्यभ्यासस्येत्वम् १ १५० २ **प्रजिगाति**=प्रकर्षेण गच्छति ६ ६ १ प्रकृष्ट-तया प्रशसति १ ८७ ५ प्रकर्षेण स्तौति ३ २७ १ [प्रपूर्वाद् गा स्तुतौ (जु०) धातोर्यङन्ताच्छतृ । यङो लुक् च । अन्यत्र लट्]

प्रजिन्व प्रकृष्टतया प्रीणीहि ३ १५ ६ **प्रजिन्वन्**= प्रकृष्टतया तर्प्पयन्तु १ ७१ १ [प्रपूर्वाज् जिवि प्रीणनार्थे (भ्वा०) धातोर्लोट् । अन्यत्र लङ् । अडभावश्छान्दस]

प्रजिहीते प्रकर्षेण प्राप्नोति १ १६६ ५ [प्रपूर्वाद् ओहाङ् गतौ (जु०) धातोर्लट्]

प्रजुजुषुः प्रकृष्टतया सेवेरन् १ १५२ ५ [प्रपूर्वाज् जुषी प्रीतिसेवनयो (तुदा०) धातोर्लिट् । व्यत्ययेन परस्मै-पदम्]

प्रजुहोमि प्रकर्षेण क्षिपामि १ १६२ १६

प्रज्ञानम् प्रजानाति येन तद् बुद्धिस्वरूपम् (मन) ३४ ३ उत्कृष्ट ज्ञान वाला (मन =मन) स० प्र० २४६, ३४ ३ **प्रज्ञानाय**=प्रकृष्टज्ञानवर्द्धनाय भा०—प्रज्ञादानाय ३० १० [प्र+ज्ञा अवबोधने (क्र्या०) धातो करणे ल्युट् । प्रज्ञान ब्रह्म ऐ० आ० २ ६]

प्रज्ञानीः प्रज्ञापिनी व्यवहारसाधिका (दिश) ऋ० भू० ५ [प्र+ज्ञा अवबोधने (क्र्या०) धातोर्ल्युडन्तान् ङीप्]

प्रज्ञेषम् प्रकर्षेण जानीयाम् प्र०—जानातेर्लेटि सिपि रूपम् २० २५ [प्र+ज्ञा अवबोधने (क्र्या०) धातोर्लेटि सिपि च रूपम्]

प्रणक् प्रणश्यतु प्र०—अत्र लोडर्थे लुङ् 'मन्त्रे घस-ह्वरणश०' अ० २ ४ ८० अनेन सूत्रेण च्लेर्लुक् च १.१८ ३ प्रणष्टो भवेत् २ २३ १२ प्रणाशयेत् ७ ५६ ६ [प्र+णश् अदर्शने (दिवा०) धातोर्लुङ् । 'मन्त्रे घसह्वरणश०' इति च्लेर्लुक्]

प्रणयति प्राप्नोति २ २६ ४ डालता है स० वि० २०६, अथर्व० ६ ६ १४ **प्रणयन्ति**=प्रकर्षेण प्राप्नुवन्ति १ ८३ २ **प्रणयन्तु**=प्रीणयन्तु ७ १७ **प्रणयसि**= प्रापयसि १ १२६ १ [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

प्रणवैः ओङ्कारैः १६ २५ [प्रणव =अमृत वै

प्रतिचक्ष्येव प्रत्यक्ष दृष्ट्वेव १ १२४ ८. [प्रतिचक्ष्य-इवपदयो समास । प्रतिचक्ष्येति व्याख्यातम्]

प्रतिजन्यानि प्रत्यक्षेण जनितु योग्यानि (नाका-लोकान्तराणि) ४ ५० ७ [प्रतिपूर्वाज् जनी प्रादुर्भावे (दिवा०) धातो 'तकिशसि०' वा० सूत्रेण यत्प्रत्यय']

प्रतिजन्यानि जन जन प्रति योग्यानि (धनानि) ४ ५० ६ [प्रति-जन्यपदयो समास]

प्रतिजरन्ते स्तुवन्ति ५ ८० १ [जरते अर्चतिकर्मा निघ० ३ १४]

प्रतिजागरासि प्रत्यक्ष सव कामो मे जागती रहे स० वि० १३८, अथर्व० १४ २ ३१ [प्रति+जागृ निद्रा-क्षये (अदा०) धातोर्लेट् । 'लेटोऽडाटौ' इत्याडागम]

प्रतिजागृहि यजमान प्रबोधयाऽविद्यानिद्रा पृथक्कृत्य विद्याया जागरूक कुरु १८ ६१ अविद्यानिद्रा त्यक्त्वा विद्यया चेत १५ ५४ अविद्याऽन्धकारनिद्रात सर्वान् जीवान् पृथक्कृत्य विद्यार्कप्रकाशे जागृतवान् कुरु ऋ० भू० ३०५, १५ ५४ [प्रति+जागृ निद्राक्षये (अदा०) धातोर्लोट्]

प्रतिजानते प्रतिज्ञया व्यवहारस्य साधकाय (सज्जनाय) ३ ४५ ४ [प्रति+ज्ञा अवबोधने (क्र्या०) धातो. शतृ]

प्रतिजूतिवर्पस प्रतीत जूतिर्वेगवद् वर्पो रूप येषा ते (राजपुरुषा) ३ ६० १ [प्रति-जूति-वर्पस्-पदाना समास जूति =जु वेगितायां गतौ (सौत्रो धातु) धातो स्त्रिया 'ऊतियूतिजूति०' अ० ३ ३ ९७ सूत्रेण क्तिन् उदात्तश्च निपात्यते । वर्प =रूपनाम निघ० ३ ७]

प्रतितिष्ठामि प्रतिनिधिभावेन तिष्ठामि भा०—सर्वपूज्यो भवामि २०.१० [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट्]

प्रतिदधानेभ्यः ये शत्रून् प्रति शस्त्राणि दधति तेभ्य (सैनिकेभ्य) १६ २२ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो शानच्]

प्रतिदह प्रत्यक्ष भस्मीकुरु १५ ३७ पुन पुनर्दहति प्र०—अत्र व्यत्यय १ १२ ५ [प्रति+दह भस्मीकरणे (भ्वा०) धातोर्लोट्]

प्रतिदीधिम प्रतीत्या प्रकाशयेम ३३ ४१ [प्रति+दीधीङ् दीप्तिदेवनयो (अदा०) धातोर्लिङ्]

प्रतिदुवस्व प्रत्यक्ष सेवस्व ५.४६ २ [प्रति+दुवस्यति परिचरणकर्मा (निघ० ३ ५) धातोर्लोट् । व्यत्यये-नात्मनेपदम्]

प्रतिदुहीयत् प्रतिपादयन् (इन्द्र =राजा) २ ११ २१ [प्रति+दुह प्रपूरणे (अदा०) धातो शतरि छान्दस रूपम्]

प्रतिदृक्षत प्रत्यक्ष पश्यन्ति १ ४८.१३ [प्रति-दृशिर् प्रेक्षणे (भ्वा०) धातोर्लुङ् । सगो विकरणश्छान्दस । व्यत्ययेनात्मनेपदम्]

प्रतिदोषम् यथा रात्रिं रात्रिं प्रति सूर्यस्तथा ६.७१ ४ प्रति-जन यो दोषन्तम् प्र०—अत्रोत्तरपदलोप ३ ८ ६. रात्रिं रात्रिं प्रति, प्र०—अत्र रात्रेरुपलक्षणत्वाद् दिन-स्यापि ग्रहणमस्ति प्रतिसमयमित्यर्थ 'दोषेति रात्रिनामसु पठितम्' निघ० १ ७, १.३५.१० [प्रति-दोषापदयो समास दोषेति रात्रिनाम निघ० १.७.]

प्रतिद्रवन्ती पत्यक्ष जानन्ती गच्छन्ती वा (देवी=विदुषी) ५ ४१ १२ [प्रति+द्रु गतौ (भ्वा०) धातो. शत्रन्तात् ङीप्]

प्रतिधत् प्रतिदधाति ४.२७.५. [प्रति+डुधाञ् धारण-पोषणयो (जु०) धातोर्लेट् । विकरणव्यत्ययेन श]

प्रतिधर्ता प्रत्यक्ष धारक (मित्र =मित्र) १५ १० प्रतीत्या धर्ता (बृहस्पति =सूर्य) १५ १४ [प्रति+धृञ् धारणे (भ्वा०) धातो कर्तरि तृच्]

प्रतिधातवे प्रतिधर्त्तुम् ८ २३ प्रतिधातुम् प्र०—अत्र 'तुमर्थे सेसेन०' इत्यनेन तवेन्प्रत्यय. १ २४ ८ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातोस्तुमर्थे तवेन्-प्रत्यय]

प्रतिधिना प्रतिदधाति यस्मिंस्तेन (पृथिव्या =भूगर्भ-विज्ञानेन) १५ ६ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो 'कर्मण्यधिकरणे च' ति कि प्रत्यय]

प्रतिधीयताम् प्रतिधीयन्ताम् प्र०—अत्र वचनव्यत्य-येनैकवचनम् ३६ ११ स्थापन करो आर्याभि० २ २३, ३६ ११ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि लोट्]

प्रतिधीयमानम् सम्यग् ध्रियमाणम् (ज्ञानम्) १ १५५ २ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि शानच्]

प्रतिपचता प्रत्यक्ष पचतानि पक्तव्यानि (खाद्यान्नानि) २१ ६० [प्रति-पचतपदयो समासे शेर्लोपश्छन्दसि पचत=डुपचष् पाके (भ्वा०) धातोरौणादिक अतच्]

प्रतिपत् पद्यते विचार्यते योऽर्थविषय स पत्, पत पत प्रतीति प्रतिपत् (इन्द्र =सभासेनापति) ७ ३८ प्रतिपद्यते प्राप्यते या सा (लक्ष्मी) १५ ८ [प्रति-पत्पदयो समास । पत्-पद गतौ (दिवा०) धातो कर्मणि क्विप्]

प्रतिपदे ऐश्वर्याय १५ ८ [प्रतिपूर्वात् पद गतौ

तम् (उत्तमाऽन्नम्) ५.३४.१. प्रकर्षेण दुःखात्तारक व्यवहारम् ५.५५ ३ पाकस्य सन्तारकम् (पाचकम्) भा०—पाक-कर्त्तारम् १२ २६ प्रतरन्ति येन तत् (आयु =जीवनम्) ४ १२.६ प्रकृष्टम् (पुरुषार्थमाश्रित्य) १ ६४ ४ पुष्कलम् (आयु =जीवनम्) २ ३२.१ शत्रूणा वलोल्लङ्घनम् ६ ४७ ७ प्रतरति शत्रुबलानि येन तत्सैन्यम् १ १४१ १३ पारस्य सन्तारकम् (पाककर्त्तार जनम्) १२ २६ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'ऋदोरप्' इत्यप्प्रत्यय]

प्रतराम् प्रतरन्त्युल्लङ्घयन्ति शत्रुबलानि यया नीत्या ताम् १७ ५१ [प्रतर व्याख्यातम् । तत स्त्रिया टाप्]

प्रतवसः प्रकृष्टानि तवासि बलानि सैन्यानि येषा ते (नृतमास =नायका जना) १ ८७ १ **प्रतवसे**=प्रकृष्टबलाय (वाताय=विज्ञानाय) ४ ३ ६ [प्र-तवस्पदयो समास । तवस् वलनाम निघ० २ ९]

प्रतस्थुः प्रतिष्ठन्ते २ १५ ५ [प्र+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लिट्]

प्रतारि प्रकर्षेण प्लूयते ४ १२ ६]प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो कर्मणि लुङ्]

प्रतारिषत् प्रकृष्टतया वर्द्धयेत् ४ ३९ ६ **प्रतारिषः**=सन्तारयसि ३४ ८ **प्रतारिष्टम्**=प्रकर्षेण वर्धयतम् ३४ ४७ प्रयत्नेन पारयतम् १ १५७ ४ **प्रतारीः**=प्रतारय उल्लङ्घय ६ ८ ७ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लेटि सिपि च रूपम् । 'सिव् वहुल णिद् वक्तव्य' इति वा० सूत्रेण सिपो णित्वेन वृद्धि]

प्रति आभिमुख्येन १ ४८ २ वीप्सायाम् १ १६९ ७ प्रतिनिधौ २ १ १५ क्रमाऽर्थे १ ९२ १ योगे १ ५५ १ क्रियार्थे पञ्चादर्थे १ १४ प्रत्यक्षे १५ ३७ इत्थभूताख्याने १ १९ व्याप्तौ २० ३७ प्रतीतार्थे १ २५.२० क्रियायोगे १ १६ वीप्सार्थे, अ०—पुन पुन १ १२ ५ प्राप्त्यर्थे १ ५७ ४ प्रतिवन्धने १ ८८ ६ इन्द्रियागोचरेऽर्थे अ०—इत्थभूतम् प्र०—प्रतीत्येतस्य प्रातिलोम्य प्राह नि० १ ३, १.९ ४ [अभि इत्याभिमुख्यम्, प्रतीत्यस्य प्रातिलोम्यम् नि० १ ३]

प्रतिकामम् काम काम् प्रति (सोम) ३ ४८.१ काम काम प्रतीति प्रतिकामम् भा०—प्रतिक्षण सुखम् १९ ५१ [प्रति-कामपदयो समास]

प्रतिक्षत्रे धर्मेण प्रतीते क्षत्रे विद्याधर्मप्रचारिते देशे ऋ० भू० २२०, २० १० [प्रति-क्षत्रपदयो समास]

प्रतिक्षियन्तम् प्रत्यक्ष निवसन्तम् (वायुम्) ११.२३ पदार्थ पदार्थ प्रति वसन्तम् (अग्निम्) २.१०.४ [प्रति-क्षियन्पदयो समास । क्षियन्=क्षि निवासगत्यो (तुदा०) धातो शतृप्रत्यय]

प्रतिख्यातः ख्यात ख्यात प्रतीति (वात =वाह्यो वायु) ८ ५८ [प्रति-ख्यातपदयो समास. । ख्यात =ख्या प्रकथने (अदा०) धातो क्त]

प्रतिगात् प्रत्येति १.१०४ ५ [प्रति+इण् गतौ (अदा०) धातोर्लुङ् । अटोऽभाव । 'इणो गा लुङी' ति गादेश]

प्रतिगृभाय प्रतीत्या गृहाण ६.४७ २८ प्रतिगृहाण ४ ४ १५ [प्रतिपूर्वाद् ग्रह उपादाने (क्र्या०) धातोर्लोट् । 'छन्दसि शायजपि' इति श्न स्थाने शायजादेश । धातोर्हकारस्य भकारो 'हृग्रहोर्भश्छन्दसि' वा० सूत्रेण]

प्रतिगृभ्णन्ति प्रतिगृह्णन्ति २५.३७ **प्रतिगृभ्णाति**=प्रतिगृह्णाति १ ५५ २ **प्रतिगृभ्णातु**=प्रतिगृह्णाति अ०—प्रतिगृभ्णाति प्र०—अत्र हृग्रहोर्भश्छन्दसि हस्य भत्व वक्तव्यम् अ० ५ २ ३२ इति हकारस्य स्थाने भकार लडर्थे लोट् च १ १९ **प्रतिगृभ्णीत**=स्वीकुर्वीत १२ ३५ [प्रति+ग्रह उपादाने (क्र्या०) धातोर्लट् । हस्य भकारादेश । अन्यत्र लोट् लिङ् चापि]

प्रतिगृह्णतः प्रतिग्रहण करने हारो (गृहस्थ जनो) को स० वि० १६७, अथर्व० ९ २.३ १६ [प्रति+ग्रह उपादाने (क्र्या०) धातो शतृप्रत्यय]

प्रतिगृह्णामि प्रतिग्रहण करता हूँ स० वि० १६७, अथर्व० ९ २ ३ १५ [प्रति+ग्रह उपादाने (क्र्या०) धातोर्लट्]

प्रतिगृह्य प्रत्यक्षेण दत्त्वा गृहीत्वा च १ १२५ १ [प्रति+ग्रह उपादाने (क्र्या०) धातो क्त्वा । समासे क्त्वो ल्यप्]

प्रतिचक्षणाय प्रत्यक्ष कथनाय ६ ४७ १८ [प्रति+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्ल्युट् । 'वहुल सज्ञाछन्दसोरिति वक्तव्यम्' अ० २ ४ ५४ वा० सूत्रेण ख्याञ्-आदेशस्य प्रतिषेध]

प्रतिचक्ष्य निषेध्य २ २४ ७ प्रत्यक्षेण प्रत्याख्याय २.२४ ६ [प्रति+चक्षिङ् व्यक्ताया वाचि (अदा०) धातो क्त्वा । समासे क्त्वो ल्यप् । 'वर्जने प्रतिषेधो वक्तव्य' इति ख्याञ् न भवति]

प्रतिचक्ष्या प्रत्यक्षेण द्रष्टु योग्या (उषा) १.११३ ११ [प्रति+चक्षिङ् व्यक्ताया वाचि (अदा०) धातोर्ण्यत् । स्त्रिया टाप्]

प्रतिरः=प्रकृष्टतया प्लव दुःखात्पार गच्छ ३.४०.३ **प्रतिरेत**=प्रवर्धये ७.५८.३ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लोट्। व्यत्ययेन शप स्थाने श। अन्यत्र लट्, लङ्, लिङ् च। 'प्रतिरते' प्रयोगे व्यत्ययेनात्मनेपदम्। प्रतिरन्तु प्रवर्धयन्तु। नि० १२.३७ प्रतिरते=प्रवर्धयते नि० ११.६]

प्रतिरक्षन् प्रत्यक्षतया पालयन् (गृहस्थो राजजन प्रजाजनो वा) ८.२४ [प्रति+रक्ष पालने (भ्वा०) धातो' शतृप्रत्यय]

प्रतिरन् प्रकर्षेण दुःखात्तरन् (नमस्य=पूजितु योग्यो विद्वान्) १.४४.६ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो शतृ। व्यत्ययेन श]

प्रतिरवेभ्यः ये रवान् प्रति रुवन्ति शब्दायन्ते तेभ्य (पुरुषेभ्य) ३८.१५ [प्रति+रु शब्दे (अदा०) धातोरच्-प्रत्यय। प्राणा वै प्रतिरवा प्राणान् हीद सर्वं प्रतिरतम् श० १४.२.२.३४]

प्रतिरूपः तदाकारवर्त्तमान (इन्द्र=जीव) ६.४७.१८ [प्रतिरूपपदयो समास। य आदित्ये (पुरुष) स प्रतिरूप जै० उ० १.८.२.४]

प्रतिलामि प्रत्यक्षतया स्निह्यामि २३.२४ [प्र+तिल स्नेहने (तुदा०) धातोर्लट]

प्रतिलोभयन्ती प्रत्यक्ष मोहयन्ती (स्वसेना) १७.४४ [प्रति+लुभ गार्ध्ये (दिवा०) धातोर्णिजन्ताच्छतृ। तत स्त्रिया ङीप्। प्रतिलोभयन्ती प्रतिलोभयमाना नि० ९.३३]

प्रतिवद प्रत्यक्षतयोपदिश ११.६ **प्रतिवदत्**=प्रतिवदेत् १.११६.६ [प्रति+वद व्यक्तायां वाचि (भ्वा०) धातोर्लोट्। अन्यत्र लेट्]

प्रतिवस्तोः दिन दिन प्रति अ०—प्रतिदिनम् भा०—नित्यम् प्र०—वस्तोरित्यहर्नामसु पठितम् निघ० १.९, ३.८ [प्रति-वस्तो पदयो समास। वस्तो अहर्नाम निघ० १.९]

प्रतिविध्य प्रतिताडय १३.१३ [प्रति+व्यध ताडने (दिवा०) धातोर्लोट्। 'ग्रहिज्या०' सूत्रेण सम्प्रसारणम्]

प्रतिवेत्तु प्रतिजानातु अ०—प्रतिजानन्तु ११.९ पश्चाद् जानातु ज्ञापयतु वा प्र०—प्रतीत्येतस्य प्रातिलोम्य प्राह नि० १.३, ११.४ अ०—यथावज्जानन्तु ११.९ [प्रति+विद ज्ञाने (अदा०) धातोर्लोट्]

प्रतिवेदयन् स्वगुण प्रत्यक्षतया प्रज्ञापयन् (प्राज्ञो जन) १.१६२.४ विज्ञापयन् (अज=पशुविशेष) २५.२७. [प्रति+विद ज्ञाने (अदा०) धातोर्णिजन्ताच्छतृ]

प्रतिवेशाः प्रतीता वेशा धर्मप्रवेशा येषा ते (राजजना) ११.७५ विरुद्ध-व्यवहारा. (अराजजना.) पा० वि० प्रतिकूला: (प्रजाजना) ऋ० भू० २९८, अथर्व० १९.७.७ [प्रति-वेशपदया समास। वेश=विश प्रवेशे (तुदा०) धातोर्घञ्]

प्रतिवोचे प्रतिवदेयमुपदिशेय वा ४.५.१० [प्रति+वच परिभाषणे (अदा०) धातोर्लुङ्। अडभाव। व्यत्ययेनात्मनेपदम्]

प्रतिश्रवाय य प्रतिशृणोति प्रतिजानीते तस्मै (भा०—अव्यापकाय) १६.३४ [प्रति+श्रु श्रवणे (भ्वा०) धातोरच्]

प्रतिश्रुत्कायै प्रतिज्ञात्र्यै (स्त्रियै) ३०.१९. प्रति-श्राविकायै (ध्वन्याख्यायै क्रियायै) २४.३२

प्रतिशृणीहि प्रतिहिन्धि ३.३०.१७ (प्रति+शॄ हिंसायाम् (क्र्या०) धातोर्लोट्]

प्रतिष्कभे प्रतिष्कम्भते प्रतिबध्नाति शत्रून् येन कर्मणा तस्मै प्र०—अत्र सौत्रात् स्कम्भु-धातो प्रतिपूर्वात् क्विप् १.३९.२ प्रतिष्टम्भनाय पराङ्मुखतया पराजय-करणाय च ऋ० भू० १५१. शत्रुओं के वेग को थामने के लिए आर्याभि० १.२२, ऋ० १.३९.८.२ [प्रति+स्कम्भु (सौत्रो धातु) धातो क्विप्]

प्रतिष्टोभति प्रतिबन्धेन बध्नाति १.८८.६ **प्रति-ष्टोभन्ति**=प्रत्यक्षतया स्तुवन्ति ५.८४.२ प्रस्तभ्नन्ति प्र०—अत्र व्यत्ययेन परस्मैपदम् १.१६८.८. [प्रति+ष्टुभु स्तम्भे (भ्वा०) धातोर्लट्]

प्रतिष्ठ प्रतिष्ठति वा प०—अत्रान्त्यपक्षे व्यत्ययो लडर्थे लोट् च अ०—कृपयेम यज्ञ विद्या च प्रतिष्ठापय २.१३ **प्रतिष्ठत**=प्रकृष्टतया प्रतिष्ठा प्राप्नुत अ०—प्रतिष्ठध्वम् प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति नियमात् 'समवप्रविभ्य स्थ' अ० १.३.२२ इत्यात्मनेपद न भवति १.१५.९ **प्रतिष्ठात्**=प्रतितिष्ठति २.१५.७ [प्र+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट्। 'पाघ्राध्मा०' इति शिति तिष्ठादेश। 'समवप्रविभ्य स्थ.' इत्यात्मनेपद न भवति छन्दसि सर्वविधीना विकल्पनात्। 'प्रतिष्ठात्' प्रयोगे लेट्]

प्रतिष्ठा प्रतिष्ठन्ति यस्या सा (सत्क्रिया) १४.२३ **प्रतिष्ठायै**=सर्वत्र सत्काराय १५.६४ सत्कृतये भा०—सत्काराय १३.१९ प्रतितिष्ठन्ति सत्कार प्राप्नुवन्ति यस्या तस्यै (सत्क्रियायै) २.२५ [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०)

(दिवा०) धातो सम्पदादित्वात् क्विप्]

प्रतिपप्रथे प्रत्यक्ष प्रख्याति २ २४ ११ [प्रति+प्रथ प्रख्याने (भ्वा०) धातोर्लिट्]

प्रतिपश्यति प्रत्यक्ष देखता है स० वि० २०६, अथर्व० ६.६ १ ३ [प्रति+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लट्]

प्रतिपस्थानः य प्रस्थान गमन प्रति वर्त्तते स (व्यवहार) १८ १६ [प्रति-प्रस्थानपदयो समास । प्रस्थानम्=प्र+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्ल्युट् । पापीय प्रतिप्रस्थानम् मै० ४ ६ २]

प्रतिप्रसिस्रते प्रत्यक्ष प्रसरन्ति गच्छन्ति ५ ११ [प्रति+प्र+सृ गतौ (जु०) धातोर्लट् । अभ्यासस्येत्वमात्मनेपदञ्च छान्दसम्]

प्रतिबुद्धाः प्रतीतेन ज्ञानेन युक्ता (जना) १ १६१ ५ [प्रति+बुध अवगमने (दिवा०) धातो क्त]

प्रतिभूषति प्रत्यक्षतयाऽलङ्करोति १ ४६ १२, ६ ५२ ८ [प्रति+भूष अलङ्कारे (भ्वा०) धातोर्लट्]

बप्सता बप्सन्तौ (अ०—स्त्रीपुरुषौ) प्र०—अत्र 'भस भर्त्सनदीप्त्यो' इत्यस्माल्लट शत्रादेश 'घसिभसोर्हलि च' अ० ६ ४ १०० अनेनोपधालोप, सुगममन्यत् । भस धातोर्भर्त्सन इत्यर्थो नवीनो भक्षण इति प्राचीनोऽर्थ १ २८ ७. [भस भर्त्सनदीप्त्यो (जु०) धातो शतृ । तत प्रथमाद्विवचनस्याकारादेश । शेष स्पष्टम् । बप्सता=भुञ्जाते नि० ६ ३५]

बबाधे बाधते ४ २३ ७ [बाधृ विलोडने (भ्वा०) धातोर्लिट्]

बबृहाणस्य प्रवृद्धस्य (अद्रे=मेघस्य) ५ ४१ १२ [बृह वृद्धौ (भ्वा०) धातोर्लिटः कानच् । व्यत्ययेनात्मनेपदम्]

बभसत् दीपयेत् भर्त्सयेत् ४ ५ ४ [भस भर्त्सनदीप्त्यो (जु०) धातोर्लेट्]

ऽस्ति २९ २९ उत्तम सर्वेषां वर्धक कर्म्म ७ ३९ २ उत्तम घृतादिकम् ७ २ ४. उत्तम गृह शरीर वा ७ २ ८ अन्तरिक्षस्थमुत्तममासनम् ७ ५७ २ **बर्हीषि**=अन्तरिक्षाऽवयवा २८ २१ [वृहि वृद्धौ (भ्वा०) धातो 'वृहेर्नलोपश्च' उ० २ १०९ सूत्रेण इसि प्र० नलोपश्च। वर्हि अन्तरिक्षनाम निघ० १ ३ उदक नाम निघ० १ १२ पदनाम निघ० ५ २ वर्हि परिवर्हणात् नि० ८ ९ प्रजा वै वर्हि कौ० ५ ७ पशवो वै वर्हि ऐ० २ ४ ओषधयो वर्हि ऐ० ५ २८ अय लोको वर्हि श० १ ४ १ २४ शरद् वै वर्हिरिति श० १ ५.३ १२ क्षत्र वै प्रस्तरो विश इतर वर्हि श० १ ३ ४ १० भूमा वै वर्हि श० १ ५ ४ ४]

बर्हिष्ठम् वर्हिषि यज्ञे तिष्ठतीति (विद्वास जनम्) ३ १३.१ [वर्हिष् उपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क। सलोपश्छान्दस। वर्हिष्ठ महन्नाम निघ० ३ ३]

बर्हिष्ठाम् यो वर्हिषि अन्तरिक्षे तिष्ठति तम् (सोमम्=ओषधिगणमिवैश्वर्यम्) ३ ४२ २ [वर्हिष् इति व्याख्यातम् तदुपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो. क्विप्। सलोपश्छान्दस]

बर्हिष्मतः अन्तरिक्षस्य सम्बन्धो विद्यते येषा तान् (भा०—वायुजलादिपदार्थान्) २८ १२ **बर्हिष्मते**=वर्हिष प्रशस्ता ज्ञानादिगुणा विद्यन्ते यस्मिन् व्यवहारे तन्निष्पत्तये १ ५१ ८ उत्तमगुणकर्मस्वभावविज्ञानप्राप्तये प० वि० विज्ञानवते (कारवे=कर्मकर्त्रे मनुष्याय) १ ५३ ६ प्रवृद्धविज्ञानाय (विद्वज्जनाय) ५ २ १२ सर्वोपकारक यज्ञ के विध्वस करने वाले (दुष्ट) के लिए आर्याभि० १ ४ [वर्हिष्प्राति० मतुप्]

बर्हिष्मती प्रशस्त-वृद्धियुक्ता (राति=दत्ति) १ ११७ १ [वर्हिषप्राति० मतुबन्तात् ङीप्]

बर्हिष्येषु वर्हिष्पूत्तमेषु साधुषु (निधिषु=धनकोशेषु) १९ ५७ [वर्हिष्प्राति० 'तत्र साधु' रिनि यत्]

बर्हीत् वर्हेति १ १०० १८ **बर्हीः**=उत्पाटय ४ १९ १२ [वृहू उद्यमने (तुदा०) धातोर्लुङ्। अडभावश्छान्दस]

बलगम् वलप्रापक, वल गच्छन्त, राज्यवलप्रापकम्, आत्मवलप्रापकम् (अ०—यज्ञम्) ५ २३ [वलोपपदे गम्लृ गतौ (भ्वा०) धातोर्ड प्रत्यय]

बलगहनम् यो वलानि गाहते तम् (वलवत्पुरुषम्) प्र०—अत्र गाहू-धातोर्बाहुलकादौणादिक क्यु प्रत्ययो ह्रस्वत्व च ५ २३ **बलगहनः**=यथा यो वलानि शत्रुसैन्यानि गाहते तथाभूतोऽहम् (यजमान. पुरुष) ५ २५ यथाऽह वलानि स्वसैन्यानि गाहे तथा व्यूहशिक्षया विलोडयन् (यजमानपुरुष) ५ २५ **बलगहनौ**=यौ वलानि गाहेथे, तौ (प्रजासभाद्यध्यक्षौ) ५ २५ [वलोपपदे गाहू विलोडने (भ्वा०) धातोर्बाहु० औणा० क्यु, धातोर्ह्रस्वश्च]

बलदाः यो वल ददाति स (जगदीश्वर) २५ १३ शरीर, आत्मा और समाज के वल का देने वाला (परमात्मा) स० वि० ५, २५ २३. मानसिक-विज्ञानवल इन्द्रियसम्वन्धिश्रोत्रादि की स्वस्थता तेजोवृद्धि शरीरसम्वन्धि-महापुष्टि दृढाङ्गता और वीर्यादिवृद्धि इन तीनो वलो का दाता (ईश्वर) आर्याभि० २ ४८ २५ १३ शरीरेन्द्रिय-प्राणाऽऽत्ममनसा पुष्ट्युत्साहपराक्रमदृढत्वप्रद (ईश्वर.) ऋ० भू० ६, २५ १३ [वलोपपदे डुदाञ् दाने (जु०) धातो. कर्त्तरि क्विप्]

बलम् सामर्थ्यम् १ १ ८२ सर्वाऽङ्गदृढत्वम् १ ९ ६ वलयुक्त मेघम् १ ६ २ ४ सेनादिकम् १ ३७ १२ वल पराक्रम वा ३ ५३ १८ ब्रह्मचर्यादिसुनियमाचरणेन शरीरबुद्ध्यादि-रोगनिराकरण, दृढाङ्गतानिश्चलवुद्धित्वसम्पादन, भीषणादिकर्मयुक्तम् (व्यवहारम्) ऋ० भू० १०२, अथर्व० १२ ५ ७ महाबलेश्वर ऋ० भू० १४९, १९९ आवरक मेघम् २ २४.३ भा०—स्वाऽङ्गपुष्टिम् २५ ६ अनन्तवलयुक्त (ईश्वर) स० प्र० २४६, १९ ९ **बलस्य**=वलवत शत्रोर्मेघस्य १ ५२ ५ **बलाय**=योगसामर्थ्याय १९ ६१ वलवृद्धये ३०.९ पुष्टत्वाय २० ३ **बलेन**=सैन्येन पराक्रमेण वा ९ ९ भा०—ब्रह्मचर्येण शरीरात्मवल तेन २१ ३२. [डुभृञ् धारणपोषणयो (जु०) धातो पचाद्यच्। भकारस्य वकारो रेफस्य लकारश्च बाहुलकादेव। वल प्राणने (भ्वा०) धातोर्वा अच् प्रत्यय। वल कस्मात् वल भर भवति विभर्ते नि० ३ ९ वल इति मेघनाम निघ० १ १० वल वा द्रविण यदेनेनाभिद्रवन्ति नि० ८ १ वल हृदये (श्रितम्) तै० ३ १०.८ ८ इन्द्रो वलपति श० ११ ४ ३ १२ वल वै मरुत काठ० २१ ९ वल वै सह श० ६ ६ २ १४ वल विश्वे देवा मै० ४ ७ ८ आत्मा वै वलम् काठसक० ७२ ५]

बलवान् बहुवलयुक्त (सेनाऽध्यक्षो राजा) ९ ९. [वलप्राति० भूम्न्यर्थे मतुप्]

बलविज्ञायः यो वल वलयुक्त सैन्य कर्त्तुं जानाति स (इन्द्र=सेनापति) १७ ३७ [वलोपपदे विपूर्वाज् ज्ञा अवबोधने (क्र्या०) धातो क। युगागम]

पदनामसु पठितम् निघ० ४ ३ अनेन प्राप्त्यर्थो गृह्यते १ ५२ ११ वर्धनेन ६ ४४ ६ वृद्धियुक्तेन (व्यवहारेण) १ ५४ ३ [वृह वृद्धौ (भ्वा०) धातोरौणादिको वाहु० अन्। वर्हणा पदनाम निघ० ४.३. वर्हणा परिवर्हणा नि० ६.१८]

बर्हणा वर्धते या सा (दिद्युत्=विद्युत्) १ १६६ ६ **बर्हणाः**=वर्धमाना (तुज =सेना) ३ ३४ ५ [वृह वृद्धौ (भ्वा०) धातोश्छान्दस स्त्रिया युच् । ततष्टाप्]

बर्हणा वृह्यते येन तत् (रज =पृथिव्यादिलोकजातम्) १ ५६ ५ [वृह वृद्धौ (भ्वा०) धातोर्ल्युटि 'सुपा सुलुग्०' इत्याकारादेश]

बर्हणा वर्धकौ (मित्रावरुणौ=अध्यापकोपदेशकौ) ५ ७१ १ [वृह वृद्धौ (भ्वा०) धातो कर्त्तरि छान्दसो युच् । ततो द्विवचनस्याकारश्छान्दस.]

बर्हणावत् वर्हण वृद्धिकारक विज्ञान धन वा विद्यते यस्मिँस्तत् (ज्योति =विज्ञानदीप्ति) ३ ३६ ८ **बर्हणावता**=बहुविध वर्हण वर्द्धन विद्यते यस्य तेन (मनसा) प्र०—अत्र भूम्न्यर्थे मतुप् १ ५४ ५ [वर्हणेति व्याख्यातम्। ततो भूम्न्यर्थे मतुप्]

बर्हय वर्धय ७ ३१ १२ नितरामुत्पादय २ २३ ८ निस्सारय १ १३३ ५ [वृह वृद्धौ (भ्वा०) धातोर्णिजन्ताल्लोट्]

बर्हिरिव परिवृहक छेदकमुदकमिव प्र०—वर्हिरित्युदकनाम निघ० १ १२, १ ११६ १. जलमिव ५ ६२ ५ कुशपिञ्जुली के समान स० वि० २०६, अथर्व० ६ ६ १ ८ [वर्हिष्-इवपदयो समास । वर्हिष् इति व्याख्यास्यते]

बर्हिषदम् यो वर्हिष्याकाशे सीदति तम् (यज्ञम्) १६.३२ यो वर्हिरन्तरिक्षे सीदति तम् (वृजन=योगवलम्) ७.१२ **बर्हिषदः**=ये वर्हिष्युत्तमाया सभाया सीदन्ति ते (पितर =न्यायेन पालका पित्रादय) १६ ५५ उत्तमाऽऽसने सीदन्ति ते (पितर) १६ ५६. ये वर्हिषि सर्वोत्तमे ब्रह्मणि विद्याया च निपण्णा (पितर) ऋ० भू० २६०, १६ ५६ **बर्हिषदाम्**=ये वर्हिषि सभाया सीदन्ति ते (पितृणा= जनकजननीनाम्) २४ १८. **बर्हिषदे**=य प्रजाया वर्धके व्यवहारे तिष्ठति तस्मै भा०—प्रजावर्धकाय (विद्वत्पुरुषाय) १७ १२ [वर्हिष् उपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्। पूर्वपदस्य षकारलोपश्छान्दस.। वर्हिष् इति व्याख्यास्यते]

बर्हिषदम् वृहत्सु पदार्थेषु सीदन्तम् (शर्ध =वलम्) २ ३.३ वर्हिष्युत्तमाऽऽसनेऽन्तरिक्षे वा सीदन्तम् (राजानम्) ५ ४४ १ [व्याख्यातम् मासा वै पितरो वर्हिषद तै० १ ६.८ ३ वर्हिषत् महन्नाम निघ० ३ ३]

बर्हिषदा ये वर्हिष्यन्तरिक्षे सीदतस्ते (उषासानक्ता= रात्रिप्रातर्वेले) ७ २ ६ [वर्हिषदिति व्याख्यातम् । ततो द्विवचनस्य 'सुपा सुलुग्०' इत्याकारादेश]

बर्हिषः जलस्य २३ ३८ अवकाशस्य ६ १२ १ विद्यावर्धकान् (नॄन्=नायकाञ्जनान्) ७ ३३ १ वृद्धा (विद्वत्पुरुषा) १० ३२ प्रवृद्धा (विद्वासो जना) ७ ४३ ३ अन्नादिप्रापका (यवमन्त =कृषीवला) १६ ६ **बर्हिषा**= महता पुरुषार्थेन १६ १७ उत्तमेन कर्म्मणा १८ ६३ अन्तरिक्षेण २१ ४८ सुखवर्द्धकेन कर्मणा २० ५६ **बर्हिषि**= वृहन्ते वर्धयन्ते येन तत् वर्हिर्ज्ञान प्राप्त कर्मकाण्ड वा तस्मिन् २ १८ उत्तमे व्यवहारे १ ८६ ४ उपवर्धयितव्ये (यज्ञे=शिल्पव्यवहारे) १ १०६ ५ उत्तम आसने स्थाने वा ६ ५२ १३ अत्युत्तमे (यज्ञे) १ १०१ ६ सभायाम् ७ १३ १ आकाशमिव व्याप्ते (प्रिये=कमनीये परमात्मस्वरूपे) २८ २७ अवकाशे ६ ६८ ११ हृदयाऽन्तरिक्षे ऋ० भू० १२४, ३१ ६ उत्तमे साधुनि (यज्ञे) २६ २३ उत्तमाया विद्वत्सभायाम् २८ ४ मानसे ज्ञानयज्ञे ३१ ६. यज्ञकुण्डे ६ ५२ १७. वृहन्ति वर्धन्ते सर्वे पदार्था यस्मिन्नन्तरिक्षे तस्मिन् प्र०—वृ हेर्नलोपश्च उ० २ १०६ अनेन इसि प्रत्ययो नकारलोपश्च १ १६ ६ अन्तरिक्षस्थे जगति २ ६ ८ वृद्धिकरे व्यवहारे ७ ४४ २ **बर्हिषे**=अन्तरिक्षगमनाय प्र०—वर्हिरित्यन्तरिक्षनामसु पठितम् निघ० १ ३, २ १ **बर्हिः**=वृहन्ते सर्वे पदार्था यस्मिँस्तदन्तरिक्षम् २ २२. शुद्धमुदकम् २ १ सर्वद्धितं तेज इव विज्ञानम् १ १८८ ४ उत्तममासनम् ४ ६ १ अतीव विशालम् (छर्दि =गृहम्) ६ ६७ २ वृहत् (गृहम्) १ १४२ ५ वर्द्धनम् १ १४४ ६ अन्तरिक्षमुत्तम वस्तुजातम् १ ४७ ८ उपगत वृद्धम् (व्यवहारम्) १ १४२ ६. उत्तम स्थानमाकाश वा ७ २४ ३ उत्तमा सभाम् २८ ४ अतीवोत्तमम् (सद =आसनम्) ३ २४ ३ वृद्धमुदकम् ३ ३५ ७ उपवर्द्धको दर्भसमूह १८ २१. उत्तम प्रवृद्ध हवि ७ ७ ३ घृतम् ६ ११ ५ प्रतिगृहादिकम् प्र०—वर्हिरिति पदनामसु पठितम् निघ० ५ २ तस्मादत्र ज्ञानार्थो गृह्यते १ १३ ६. निवासप्रापक स्थानम् प्र०—अत्र प्राप्त्यर्थो गृह्यते १.१३ ७ वर्द्धनम् १६ ६१ अन्तरिक्षवद् व्यापक ब्रह्म भा०—यथाऽऽकाश सर्वासु दिक्षु पृथिव्यादिषु च व्याप्तमस्ति तथा जगदीश्वर. सर्वत्र व्याप्तो-

बलः बलवान् (इन्द्रः=राजा) ३ ३० १० [बल-प्राति० मतुवर्थीयस्य लुक्]

बलाका विशेषपक्षिणी २४ ३३ **बलाकाः**=बलाकाना स्त्रिय २४ २२ [बलाकप्राति० स्त्रिया टाप्। सौरी बलाका मै० ३ १४ १४]

बलाशस्य आविर्भूतकफस्य १२ ९७

बलिम् भोग्य पदार्थम् ७ १८ १९ भक्ष्यभोज्यादि-पदार्थसमुदायम् ५ १ १० सवरणम् (स्व) १ ७० ५ [बल सवरणे सञ्चरणे च (भ्वा०) धातो. 'सर्वधातुभ्य इन्' उ० ४ ११८ सूत्रेण इन्। अथवा वर्णि सौत्रो धातु, तत. 'वर्णेर्वलिश्चाहिरण्ये' उ० ४ १२४ सूत्रेण इन्प्रत्ययो निपात्यते। वस्य वकारश्छान्दस]

बलिहृत. या बलि हरन्ति ता (विश=प्रजा) ७ ६ ५ ['बलि' इत्युपपदे हृञ् हरणे (भ्वा०) धातो क्विप्]

बल्मीकान् मार्गान् २५ ८ [बल सवरणे सञ्चरणे च (भ्वा०) धातोर्बाहु० औणा० कीकन् मुडागमश्च]

बष्कये द्रष्टव्ये (वत्से) १ १६४ ५ [बष्क दर्शने (चुरा०) धातोरौणा० इन्]

बष्किहान् चिरप्रसूतान् (भा०—पशून्) २४ १६

बस्तः आच्छादक (भा०—मूर्खो जडधी) १ १६१ १३ [वस आच्छादने (अदा०) धातोरौणादिक क्तो बहुलवचनात्। व-बयोरभेद]

बस्रि सुख-स्तम्भनात् प्र०—'बसु-स्तम्भे' इत्यस्मादौ-णादिको रिक्, विभक्ति-लुक् च १ १२० १२ [बसु स्तम्भे (दिवा०) धातोरौणा० रिक्। विभक्तेश्च लुक्]

बहवः अनेके (दभ्रा=हिंसका जना) ४.२५ ५ **बहुभ्यः**=अनेकेभ्य पदार्थेभ्य १ ९३ ४ **बहुम्**=अधिक कर्म्म १७ ५० **बहु.**=अधिक, भा०—अत्यन्त (सौमनस=आनन्द, सुहृद्भाव) ३ ४२ बहुगुण (इषुधि) २९ ४२ बहुत (प्रीति) स० वि० १४६, ३ ४२ **बहोः**=बहुविधस्य ससारस्य २९ ९ [बृहि वृद्धौ (भ्वा०) धातो 'लङ्घिबह्योर्नलोपश्च' उ० १ २९. सूत्रेण उ। अनन्तो वै बहु ऐ० ५ २]

बहिर्द्धा या बहिर्वाह्ये देशे धरति शब्दान् सा (वाक्) ५ ११ [बहिर्-उपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप्]

बहु अधिकम् (भा०—शूद्रकुलम्) २३ ३१ अनेक (शुभगुणकर्मस्वभाव) स० वि० ९३, अथर्व० ११.५ २६ [बहु कस्मात् प्रभवतीति सत नि० ३ १३]

बहुकार बहूना सुखाना कर्त्त (राजन्) १० २८ [बहूपपदे डुकृञ् करणे (तना०) धातोरण्]

बहुधा बहुप्रकारै ३१ १९ बहुत प्रकार के स० वि० १८९, अथर्व० ९ ५ १ [बहुसंख्यावाचिन प्राति० 'सख्याया विधार्थे धा' अ० ५ ३ ४२ सूत्रेण धा]

बहुपाय्ये बहुभी रक्षणीये (स्वराज्ये=स्वकीये राष्ट्रे) ५ ६६ ६ [बहूपपदे पा रक्षणे (अदा०) धातोर्ण्यत्]

बहुप्रजाः बहुजन्मा (जीव) १ १६४ ३२ [बहूपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड। समासान्तोऽसिच् छान्दस]

बहुरूपाः बहूनि रूपाणि येषा ते (पशव) २४ १४ बहुवर्णयुक्ता (सञ्चराः=मार्गा) २४ १७ [बहु-रूपपदयो समास]

बहुलम् पुष्कलम् (रयि=धनम्) ३ १ १९ बहुपदार्था-न्वितम् (शर्म=गृहम्) ६ ५१ ५ [बहूपपदे ला आदाने (अदा०) धातो क]

बहुलः यो बहूनि सुखानि लाति स (अग्नि=अव्यापक) २ १ १२ **बहुलाः**=ये बहूनि सुखानि युद्धकर्माणि लान्ति प्रयच्छन्ति ते (चमूषद) १ ५४ ९ [बहुलमिति व्याख्यातम्]

बहुला या बहून् पदार्थान् लाति सा (पृथ्वी) १ १८९ २ **बहुलाम्**=बहूनि सुखानि ददाति या ताम् (प्रजा=पुत्रपौत्रप्रभृतिम्) १९ ४८ **बहुले**=ये बहूनि वस्तूनि लातो गृह्णीतस्ते (द्यावापृथिवी) १ १८५ ७ बहु-पदार्थयुक्ते (पृथ्वी=भूम्यन्तरिक्षे) ४ २३ १० बहूनर्थान् लान्ति याभ्यान्ते (अ०—विद्युदन्तरिक्षे) ११ ३० [बहुल व्याख्यातम्। तत स्त्रिया टाप्। बहुले द्यावापृथिवीनाम निघ० ३ ३०]

बहुला याभ्या बहून् लाति तौ (गभस्ती=हस्तौ) ६ १९ ३ [बहुलप्राति० प्रथमाद्विवचनस्याकारश्छान्दस]

बहुलाभिमानः बहुलो बहुविधोऽभिमानो यस्य स (बहुसुसभ्यावृतो राजा) ३३ ६४ [बहुल-अभिमानपदयो समास]

बहुसूवरी बहूनामपत्याना जनयित्री (सूत्तमा पत्नी) २ ३२ ७ [बहूपपदे षूङ् प्राणिगर्भविमोचने (अदा०) धातो क्वनिप्। 'वनो र च' इति स्त्रिया ङीप् रेफश्चान्तादेश]

बह्वीनाम् अनेकासा द्यावापृथिव्यादीना दिशा वा १ ९५ ४ **बह्वचः**=अनेका (वीतपृष्ठा=पूर्णविद्यासुशिक्षा-युक्ता बालिका) १९ ४४ **बह्वीः**=अनेका (त्रिगुणात्मिका मात्रा) १ १८८ ५ बह्व्य (अ०—गाव) प्र०—अत्र

धातो 'मानवधदान्०' इति स्वार्थे सन्नन्तात् स्त्रियाम् टा-प्रत्यय]

बीभत्सुः याऽभयजना गा (गाना=पृथिवी) १ १६४ ८. [बध संयमने (चुरा०) धातो स्वार्थे सन्नन्तात् उ]

बीभयत भयिनु भवन्तीति १ ८० १२. [जिभी भये (जु०) धातोर्लेट् । विकरणव्यत्ययेन द्विविकरणता]

बीरिटे अन्तरिक्षे ७ ३६ २. [बीरिट तैटीकिरन्तरिक्ष-मेवमाह । पूर्वं वयतेरुत्तरमिरतेर्वयांसीरन्त्यस्मिन् भासि वा नि० ५ २७ बीरिटमन्तरिक्षं भियो वा भासो वा ततो । बीरिटे गणे मनुष्याणाम् नि० ५ २७]

बुधन्त बोधयन्ति ७ ६४. [बुध अवगमने (भ्वा०) धातोर्लङ् । व्यत्ययेन च आत्मनेपदं च । अडभावश्च]

बुधानः बोधयन् (श्लोक=वाक्) ४ २३ ८ [बुध अवगमने (भ्वा०) धातो 'बुधियुधिवशिभ्य किच्च' उ० २ ९० सूत्रेण आनच् किच्च बुध . अवगमने (भ्वा०) धातोर्वा शानच् । व्यत्ययेन श । लुगभावश्च । बुधान =बोधयन् नि० १० ४०]

बुधानाः प्रबोधयन्त्य (देवी =विदुष्य: स्त्रिय) ४ ५१.८ [बुधान इति व्याख्यातम् । तत स्त्रियां टाप्]

बुधि बोधे प्र०—अत्र सम्पदादित्वात् क्विप् १ १३७ २ [बुध अवगमने (भ्वा०) धातो सम्पदादित्वात् क्विप्]

बुध्नम् प्राणबलमन्यद्विविज्ञानम् प्र०—इदमपीतरद् बुध्नमेतस्मादेव बद्धा अस्मिन् धृता प्राणा इति नि० १०.४४, १ ६४ ८ शरीरम् १ ५२ ६ बुध्नः=यो बोधयति सर्वान् पदार्थान् वेदद्वारा स (अग्नि =परमेश्वर.) १.९६ ६ बुध्नमन्तरिक्ष निवासस्थान विद्यते यस्य स (सूर्य) प्र०—अत्राऽर्शआदित्वादच् ३ ५५ ७ बद्धा आपो यस्मिन् स बुध्नो मेघ १ २४ ७ बुध्नात्=अन्तरिक्षात् १ १४२.३ बुध्ने=बध्नन्त्यापो यस्मिंस्तस्मिन्नन्तरिक्षे ३ ३६ ३ [बुध्नमन्तरिक्ष बद्धा अस्मिन् धृता आप इति वा । इदमपीतरद् बुध्नमेतस्मादेव बद्धा अस्मिन् धृता प्राणा इति नि० १० ४४ बन्ध बन्धने (क्र्या०) धातो 'बन्धेर्ब्रधि-बुधी च' उ० ३ ५ सूत्रेण नक् धातोर्बुधादेशश्च]

बुध्न्यम् बुध्नेऽन्तरिक्षे भवम् (अहि=मेघम्) १० १६ बुध्न्य.=अन्तरिक्षस्य (अहि =मेघ) १ १८६ ५ अन्तरिक्षे भव. (अहि) ६ ४९ १४ सब जगत् के मूल कारण और अन्तरिक्ष मे भी सदा पूर्ण (ईश्वर) आर्याभि० २ १८, ५ ३३ बुध्नेऽन्तरिक्षे व्याप्त (मेघ) २ ३१ ६ बुध्न्याः= पृथिव्यादिलोकान्तर्गत हिमादि पदार्थ आर्याभि० २ २८, १३ ३ बुध्ने अन्तरिक्षेऽन्तरिक्षे भवा सूर्यचन्द्रपृथिवीताराऽऽदयो लोका. १३ ३ बुध्नेऽन्तरिक्षे भवा मेघाः ७.४६.१४ **बुध्न्याय**– बुध्ने अन्तरिक्षेऽन्तरिक्षे भवाय मेघायेव वर्तमानाय दात्रे १६ ३८ [बुध्नशब्दात् भवार्थे यत् । बोध्यते स बुध्नः बुध्नमन्तरिक्षं सन्निबन्धात् नि० १० ४४. स्मा धार्यन्त (सूर्येण) बुध्न्या उक्ता विद्या. म० ७ ६.१.८८.]

बुध्न्या बुध्न्यानि अन्तरिक्षस्थानि (वसूनि=द्रव्याणि) ७ ६ ७ [बुध्न्यानि व्याख्यातम् । अत्र [illegible]]

बुध्यमाना उत्तम शिक्षा को प्राप्त (वनिता स्त्री) सं० वि० १३८, अथर्व० १४.२.३१. ज्ञानयुक्त हुई (वनिता स्त्री) सं० वि० १८०, अथर्व० १४ २ ७५ [बुध अवगमने (भ्वा०) धातो कर्मणि शानच् स्त्रियां टाप्]

बुध्यस्व जानिये १५ ५४ चेतो जागो जाग सं० वि० १८०. अथर्व० १४ २ ७५. [बुध अवगमने (दिवा०) धातोर्लोट्]

बुबुधानः जानन् (विद्वज्जन) ७ ४४ ३. **बुबुधाना.**=सम्बोधयुक्ता (नर =नायका जना) ५.३० २ विजानन्त. (देवा =विद्वांसो जना) ४ १ १८ [बुध अवगमने (भ्वा०) धातोर्लिट कानच् । शानचि वा द्वित्व छान्दसम् । विकरणव्यत्ययेन च.]

बुबोध बुध्यते ८ २७ ६ [बुध अवगमने (भ्वा०) धातोर्लिट्]

बुभुजिरे भुञ्जते १ १३८.२. [भुज पालनाभ्यवहारयो (रुधा०) धातोर्लिट्]

बुभूषन् भवितुमिच्छन् (वृष.=मेघ) १ ३२ ७ [भू सत्तायाम (भ्वा०) धातोरिच्छायामर्थे सन्नन्तात् शतृ]

बृबुम् मुख्य शिल्पिनम् ६ ४५ ३३ **बृबु.**=देता (शिल्पिजन) ६ ४५ ३१

बृसयस्य आच्छादकस्य (सूर्यस्य) प्र०—'बस आच्छादने' इत्यस्मात् पृषोदरादित्वादिष्टसिद्धि १ ९३ ४ अविद्या-च्छेदकस्य (मायिन =प्रशंसितप्रज्ञस्य विदुषो जनस्य) ६ ६१ ३

बृहच्छरीरः बृहत् महच्छरीरं यस्य स (युवा जन) १ १५५.६. [बृहत्-शरीरपदयो समास]

बृहच्छ्रवाः बृहच्छ्रवणं यस्य स (प्र०—विद्वन्मनुष्य.) १ ५४ ३ [बृहत्-श्रवस्पदयो समास]

बृहज्ज्योतिः अनन्तप्रकाशम् (दिवं=दिव्य स्वरूव-

बाहुशर्द्धो बाह्वो शर्द्धो बल- यस्य स (इन्द्र.=सर्वसेनाऽधिपति) १७ ३५ [बाहु-शर्ध्रपदयो समासे मत्वर्थे इनि । शर्ध =बलनाम निघ० २ ६]

बाह्यतः बहिरपि वर्त्तमान (ईश्वर) ४० ५ भा०—सर्वस्य प्रकृत्यादेर्बाह्याभ्यन्तराऽवयवानभिव्याप्त ब्रह्म ४० ५

बाह्यम् बहिर्भवम् (अङ्गम्) २५ २ [बहिर्प्राति० भवार्थे 'बहिषष्टिलोपश्च' अ० ४ १ ८५ वा० सूत्रेण यञ्]

बाह्वोजसः भुजबलस्य १ १३५ ६ [बाहु-ओजस्-पदयो समास]

बिभर्त्ति दधाति १ १०५ ४ धरति पुष्यति वा ३ ५५ २२ धारण करता है स० वि० ८०, अथर्व० ११ ५ २४ **बिभर्षि**=धरसि १.५५ ८ **बिभृत**=धरत पुष्यत ८ २६ धरत तेन पुष्यत वा १ ३६ १०. **बिभृतः**=धरत ३ ४६ ५ बिभृताम्=धरेताम् २६ ४१ **बिभृथः**=धरथ ५ ६२ ६ बिभ्रति=धरन्ति ५ ४७ ४ भरन्ति ६ १६ ४० धरन्ति पोषयन्ति वा १ १०२.२ [डुभृञ् धारणपोषणयो (जु०) धातोर्लट् । अन्यत्र लोडपि]

बिभाय बिभेति ५ ८३ २ **बिभीत**=भय कुरुत ३ ४१ डरो स० वि० १४६, ३ ४१ **बिभीयात्**=भय कुर्यात् १ ४१ ६ [ञिभी भये (जु०) धातोर्लिट् । अन्यत्र लोट् लिङ् च । बिभाय=बिभ्यति नि० १० ११]

बिभिद्युः भिन्दन्तु १ ८५ १० भिन्दन्ति ४ १६ ६ **बिभेद**=भिन्द्यात् ३ ३४ १० भिनत्ति २ ४१ ६ [भिदिर् विदारणे (रुधा०) धातोर्लिट्]

बिभृतम् सबका धारण और पोषण करने वाला (ब्रह्म) आर्याभि० २ २४, ३२ ६ [डुभृञ् धारणपोषणयो (जु०) धातोरौणादिके क्तप्रत्यये छान्दस द्वित्वम्]

बिभृतः यो विविध बिभर्त्ति स (अग्नि =पावक) २ १० २ विविधद्रव्यविद्याधारक (वायु) १ ७१.४ [डुभृञ् धारणपोषणयो (जु०) धातोश्छान्दस रूपम्]

बिभ्यतुः भीपयेते प्र०—अत्र लडर्थे लिडन्तर्गतो ण्यर्थश्च १ ६५ ५ **बिभ्युः**=भय प्राप्नुवन्तु १ ६४.११ [ञिभी भये (जु०) धातोर्लिट्]

बिभ्युषः यो बिभेति तस्य (शत्रो) ६ २३ २ **बिभ्युषे**=भय प्राप्ताय (कण्वाय=मेधाविने जनाय) १ ३६ ७ [ञिभी भये (जु०) धातोर्लिट- क्वसु]

बिभ्युषी भयप्रदा (उषा =प्रातर्वेला) ४ ३० १० [ञिभी भये (जु०) धातोर्लिट क्वसौ स्त्रिया ङीप्]

बिभ्रत् विद्या धरन् (वसिष्ठ =आप्तो विद्वान्) ७ ३३ १४. धरन्त्सन् (इन्द्र =राजा) ४ २२ १ धारयन् (पुरुष) ३ ४१ धारण करता हुआ स० वि० १४६, ३ ४१ **बिभ्रतम्**=धरन्तम् (इन्द्र=परमैश्वर्यम्) २८.३२ **बिभ्रतः**=विद्यासुखेन सर्वान् पुष्यत (विदुषो जनस्य) १.१२२ १३. धारकान् पोषकान् (भा०—शरीरात्मपुष्टि-करान् पदार्थान्) ६ ५५ ६. धारयन्त (गृहा =गृहाश्रमस्था मनुष्या) ३ ४१ धारयन्त पोषयन्तश्च (मनुष्या) ३ ५६ धरन्त (अ०—वीरजना) १७ ६५ **बिभ्रते**=धर्त्रे (वेधसे=मेधाविने जनाय) ३ १० ५ **बिभ्रतौ**=धरन्तौ (नरा=राजामात्यौ) ५ ६४ ७ [डुभृञ् धारणपोषणयो (जु०) धातो शतृ]

बिभ्रता धरन्तौ (अश्विनौ=सभासेनेशौ) १ ४६ ६ [डुभृञ् धारणपोषणयो (जु०) धातो शत्रन्ताद् प्रथमा-द्विवचनस्याकारादेशश्छान्दस]

बिभ्रती धरन्ती (इन्द्र =विद्युत्) ३ ३० १४ **बिभ्रतीः**=धरन्त्य पोषयन्त्य (आप =जलानि) २ १३.२ [डुभृञ् धारणपोषणयो (जु०) धातो. शत्रन्तात् ङीप्]

बिभ्रती धरन्त्यौ (भूमिसूर्यौ) ५ ५६ ८ [डुभृञ् धारणपोषणयो (जु०) धातो शत्रन्तात् ङीपि द्विवचनस्य पूर्वसवर्णदीर्घ]

बिलम् भरण धारणम् अ०—ब्रह्मचर्यधारणम् ११ ५६. जलसमूहम् १ ११ ५ गर्त्तम् १ ३२.११. [बिल भर भवति बिभर्त्ते नि० २ १७]

बिलिमने प्रशस्तं बिलम धारण वा विद्यते यस्य तस्मै (पुरुषाय) १६ ३५ [बिलमप्राति० मत्वर्थे इनि]

बिल्मैः प्रदीप्तसाधनै २ ३५ १२ [बिल्म भिल्म भासनमिति वा नि० १ २०]

बिसखा इव यो बिस कमलतन्तु खनति तद्वद्वर्त्त-माना (विद्वांसो जना) ६ ६१ २ [बिसखा-इवपदयो समास । बिसखा=बिसोपपदे खनु अवदारणे (भ्वा०) धातो 'जनसनखनक्रमगमो विट्' इति विट् । 'विड्वनोरनु-नासिकस्यात्' इत्याकारादेश । बिस बिस्यतेर्भेदनकर्मणो वृद्धिकर्मणो वा नि० २ २३]

बीजम् यवादिक सिद्धिमूल वा १२ ६८ वपनाऽर्हम् ५ ५३ १३ विज्ञानाऽऽख्यम् (सिद्धिमूलम्) ऋ० भू० १५६, १२ ६८ वीर्य को स० वि० १३६, अथर्व० १४ २.३८ [बीजमित्यपत्यनाम निघ० २ २]

बीभत्सायै भर्त्सनाय ३० १७ [बध संयमने (चुरा०)

बृहत्सुकीर्त्तिः महोत्तमप्रशस (विद्वज्जन) ५ १० ४. [बृहत्-सुकीर्त्तिपदयो समास]

बृहत्सुम्नः महत सुखम्य ४ ५३ ६ [बृहत् सुम्नपदयो समास । सुम्नम् सुखनाम निघ० ३ ६]

बृहथः वर्द्धयेथाम् २.३० ६ [बृह वृद्धौ (भ्वा०) धातोर्लेट् व्यत्ययेन श]

बृहदुक्थम् बृहन्महदुक्थ प्रशसन यस्य तम् (जेतार=जयशील सेनापतिम्) ११ ७६ **बृहदुक्थः**=महत्प्रशसित (मनुष्य) ५ १९ ३ [बृहत्-उक्थपदयो समास । उक्थम्=वच परिभाषणे (अदा०) धातो 'पातृतुदिवचिरिरिचि०' उ० २.७ सूत्रेण थक्]

बृहदुक्ष बृहदुक्ष सेचन येभ्यस्ते (मरुत =वायव) ३.२६ ४ **बृहदुक्षाय**=यो बृहद्वीर्यमुक्षति सिञ्चति तस्मै (गृहपतये) प्र०—बृहदिति महन्नामसु पठितम् निघ० ३ ३, ८ ८ [बृहत्-उक्षपदयो समास । बृहत्=महन्नाम निघ० ३ ३ उक्ष =उक्ष सेचने (भ्वा०) धातोर्घञर्थे क । कर्त्तरि वा अच् । प्रजापतिर्वै बृहद् उक्ष श० ४ ४ १ १४]

बृहद्गिरयः बहुप्रशसा (कवय =विद्वासो जना) ५ ५७ ८ बृहन्तो गिरयो मेघा इवोपकारका गुणा येषान्ते (मरुत =मनुष्या) ५ ५८ ८ [बृहत्-गिरिपदयो समास गिरि मेघनाम निघ० १ १०]

बृहद्ग्रावा बृहच्चाऽसौ ग्रावा च स (यज्ञ) १.१५ [बृहत्-ग्रावापदयो समास । ग्रावा मेघनाम निघ० १ १०]

बृहद्दिवस्य बृहत प्रकाशमानस्य (राज्ञ) ४ २१ ५ **बृहद्दिवेषु**=बृहती द्यो प्रकाशो येषु तेषु (अमृतेषु=जीवेषु) २ २ ६ बृहत्सु दिव्येषु पदार्थेषु ४ ३७ ३ **बृहद्दिवैः**=बृहती द्यौर्विद्या येषा तै (अवोभि =रक्षणादिभि) ११६७२. [बृहत्-दिवपदयो समास । दिव=दिवु क्रीडाविजिगीषादिषु (दिवा०) धातोर्घञर्थे क]

बृहद्दिवः बृहत प्रकाशस्य ५ ४३ १३ [बृहत्-दिव्-पदयो समास]

बृहद्दिवा बृहती द्यो प्रकाशो यस्या सा (उर्वशी=प्रज्ञा) ५ ४१ १९ बृहती द्यौर्विद्याप्रकाशो यस्या सा (सरस्वती=वाक्) ५ ४२ १२ [बृहद्दिवा महद्दिवा नि० ११ ४५ दिवा=दिवु क्रीडाविजिगीषादिषु (दिवा०) धातोर्घञर्थे क । तत स्त्रिया टाप्]

बृहद्भानुः बृहन्तो भानव प्रकाशा यस्य स (अग्नि) १ २७ १२ **बृहद्भानो**!=बृहन्ति भानवो विद्यैश्वर्यतेजासि यस्य तत्सम्बुद्धौ (अग्ने=सभाध्यक्ष महाराज) १ ३६ १५ अग्निवद् बृहन्तो महान्तो भानवो विद्याप्रकाशा यस्य तत्सम्बुद्धौ (अग्ने=विद्वज्जन) १२ १०६ बृहन्तो भानव किरणा इव कीर्त्तयो यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) ३३ ९५ हे महातेज (ईश्वर) आर्याभि० १ १२, ऋ० १ ३ १० १५ [बृहत्-भानुपदयो समास । भानु =अहर्नाम निघ० १.९ भानु =भा दीप्तौ (अदा०) धातो 'दाभाभ्यानु' उ० ३ ३२ सूत्रेण नु:]

बृहद्भाः महाप्रकाश (अग्नि =सेनेश) १२ ३४. [बृहत्-भापदयो समास । बृहदुपपदे भा दीप्तौ (अदा०) धातोर्वा]

बृहद्रथन्तरे बृहद्भी रथैस्तरन्ति दु खानि याभ्या सामभ्या ते १२.४ बृहच्च रथन्तरञ्च ते १८ २३ [बृहत्-रथन्तरपदयो समास । प्राणापानौ वै बृहद्रथन्तरे ता० ७.६ १२ पशवो वै बृहद्रथन्तरे ता० ७ ७ १ बृहद्रथन्तरे (महाव्रतस्य) पक्षौ ता० १६ ११ ११ पक्षौ वै बृहद्रथन्तरे शिर एतद् आरम्भणीयम् अह ऐ० ४ १३ पादौ वै बृहद्रथन्तरे शिर एतद् (आरम्भणीयम्) अह ऐ० ४.१३ एते वै यज्ञस्य नावौ सपारिण्यौ यद् बृहद्रथन्तरे ताभ्यामेव तत्सवत्सर तरन्ति ऐ० ४.१३ बृहद्रथन्तरे छन्दो द्यावापृथिवी देवते पक्षौ श० १० ३ २ ४. बृहद्रथन्तरे (सामनी) अनड्वाहौ वा एतौ देवयानौ यजमानस्य यद् बृहद्रथन्तरे ता० १२.४.१४]

बृहद्रथम् बृहन्तो रथा रमणसाधका यस्य तम् (तुर्वीति=दुष्टजनम्) १ ३६.१८ [बृहत्-रथपदयो समास । रथ =रमु क्रीडायाम् (भ्वा०) धातो 'हनिकुषि०' उ० २ २ सूत्रेण क्थन्]

बृहद्रथा महान्तो रथा यस्या सा (उषा =प्रातर्वेला) ५ ८० २ [बृहत्-रथपदयो समासे स्त्रिया टाप्]

बृहद्रयिम् महान् रयिर्यस्मात् तम् (वायु=पवनम्) ६ ४९ ४ बृहन्तो रायो यस्मिँस्तम् (भा०—अखिल धनम्) ३३ ५५ **बृहद्रये**=बृहन्तो रायो धनानि यस्य तस्मै (महिष्ठाय सभाध्यक्षाय) प्र०—अत्र वर्णव्यत्ययेन ऐकारस्य स्थान एकार १ ५७ १ [बृहत्-रयिपदयो समास । बृहत्-रैपदयोर्वा समासे वर्णव्यत्ययेन ऐकारस्य एकारादेश । रयिरिति धननाम रातेर्दानकर्मण नि० ४ १७.]

बृहद्रवाः यथा बृहच्छब्दवान् (विद्वज्जन) ५ २२ [बृहत्-रवपदयो समास । रव =रु शब्दे (अदा०) धातोरप्]

बृहद्रेणुः बृहन्तो रेणवो यस्मिँस (राजकर्मचारी)

स्पम्) ऋ० भू० १५६, ११.४. [वृहत्-ज्योतिष्पदयो समास]

वृहत् महद्वस्तु ब्रह्म २ २ १३ महान्तम् (वह्नि=अग्निम्) प्र०—अत्र 'सुपा सुलुक्०' इत्यमो लुक् ३ २ १४ वर्धकम् (धनम्) ४ ५ ६ महाविद्यादिगुणयुक्तम् (ऋतम्) १ ७५ ५ महान् (अग्नि=सूर्य) ३३.६२ महदर्थम् (साम=एतदुक्त कर्म) १५ ११ महत्तमम् (श्रव=अन्नम्) १ ४४ २ विस्तीर्णम् (भग=धनम्) २ ११ २१ अनेकै शुभगुणैर्भोगैश्च महत् (श्रव=सुवर्णादिधनम्) १ ९ ७ उपवृहितम् (द्युम्न=ज्ञानम्) १ ९ ८ सर्वथा वृद्धम् (शूप=वल सुख च) १ ९ १० महदर्थयुक्तम् (वच=वचनम्) ३ १० ५. महत्सुखकारकम् (हवि) १ ४५ ८ महद्विद्याज विज्ञानशास्त्रम् २ १७ ९ महद्विज्ञानम् २ ३९ ८ महत्साम २० ३० सब से बडे (परब्रह्म) को आर्याभि० १ ५३, ऋ० २ ८ १२ ३ **वृहत:**=महाशयान् (विदुषो जनान्) ५ ४३ ११ अतिवृद्धस्य (राज्यप्रकाशस्य) १ १५ १ ४ महत सत्यशुभगुणयुक्तात् (दिव=प्रकाशमयान्न्यायात्) १ ५४ ४ महतो गुणान् प्राप्तस्य (विप्रस्य=सर्वशास्त्रविदो मेधाविजनस्य) ११ ४ महत कार्यस्य ३ २ ८ विद्यादिशुभगुणैर्वृद्धस्य (अग्ने=विदुष) ३ १५ १ महाविषयस्य (क्रतो=प्रज्ञाया) १५ ४५ व्यापकस्य वा (विप्रस्य=जगदीश्वरस्य) ५ १४ महत्परिमाणयुक्तस्य (सूर्यस्य) २३ ६० **वृहता**=महागुणविशिष्टेन १ ४८ १ **वृहते**=वृद्धाय (विदुषे जनाय) ५ ४३ १५ वर्धमानाय (शर्धाय=वलाय) ४ ३.८ गुणैर्महते (महिष्ठाय=सभाध्यक्षाय) १ ५७ १ सर्वोत्कृष्टगुणैर्महते व्यापकाय (इन्द्राय=परमेश्वराय) १ ९ १० विद्यादिगुणैर्वृद्धाय (दिवे=राज्याय) १ ५४ ३. **वृहद्रुच:**=महद्रुच (पर्वतेभ्य=मेघादिभ्य) ४ ५४ ५ [वृह वृद्धौ (भ्वा०) धातो 'वर्त्तमाने पृषद्वृहन्-महज्जगच्छतृवच्च' उ० २ ८४ सूत्रेण अति । वृहत्=महन्नाम निघ० ३ ३ वृहदिति महतो नामवेय परिवृढ भवति नि० १ ७ वृहत=महत नि० ९ ६ वृहत (साम) वर्म वै वृहत् ता० ११ ९ ४ वृहद् विराट् तै० १ ३ ३ ३ एतद्वै वृहत स्वमायतन यत् त्रिष्टुप् ता० ४ ४ १० वृहन्मर्या इद स ज्योगन्तरभूदिति तद् वृहतो वृहत्त्वम् ता० ७ ६ ५ साम वै वृहत् ता० ७,६ १७ भारद्वाज वै वृहत् ऐ० ८ ३ द्वयक्षर वृहत् तै० २ १ ५ ७ वृहद् हि पूर्व रथन्तरात् ता० ११ १ ४ यद् ह्रस्व तद्रथन्तर यद्दीर्घं तद् वृहत् कौ० ३ ५ यद्वै वृहत्तद्रैवतम् ऐ० ४ १३ वृहदेतत् परोक्ष यद्वैरूपम् (साम) ता० १२ ८ ४. यद्वै वृहत तद् वैराजम् (साम) ऐ० ४.१३. श्रैष्ठ्य वै वृहत् ऐ० ८ २ ज्यैष्ठ्य वै वृहत् ऐ० ८ २ यथा वै पुत्रो ज्येष्ठ एव वृहत् प्रजापते ता० ७ ६ ६ ऊर्ध्वमिव हि वृहत् ता० ८ ९ ११ द्यौर्वै वृहद् श० ९ १ २ ३७. स्वर्गो लोको वृहत् ता० १६ ५ १५ आदित्यो वृहत् ऐ० ५ ३० प्राणो वृहत् ता० ७ ६ १४ क्षेत्र वृहत् ऐ० ८ १ २ मनो वै वृहत् ता० ७ ६ १७.]

वृहती महदर्था (ककुप्=लालित्ययुक्त छन्द.) २३ ३३. महती (दिक्) १५ १४ महापुरुषार्थयुक्ता (विदुषी कन्या) ११ ६४ महासुखवर्धिका (स्त्री) १ ११३.१९ वृहद्-ब्रह्मादिवस्तुप्रकाशिका (गी=वाक्) ५ ४३ ८ महत्त्वम् (छन्द=पराक्रमम्) १४ ९ **वृहतीम्**=विस्तीर्णाम् (मही=भूमिम्) ३३ २८ वृहत्पदार्थविषयाम् (मही=वाचम्) ५ ४३ ६ **वृहती:**=वृहद्विषया (गिर=विदुषा वाच) ३ ५१ १ महत्य (आप=जलानि) ३२ ७ महती. (द्वार=अवकाशरूपा दिश) २९ ३० महागुणविशिष्टा अ०—महत्य (आप=प्राणा जलानि वा) ४ ७ वृहत्य (आप) २७ २५ **वृहत्यै**=वृहती-छन्दोऽर्थाय २४ १३ महत्यै सेनायै ४ ३ ७ [वृहदिति व्याख्यातम् । तत्र शतृवद्भावेन ङीप् । वृहत्या=महत्या नि० २ २५ वृहती परिवर्हणात् नि० ९ ७ वृहती (छन्द) वृहती वृ हतेर्वृद्धिकर्मण दे० ३ ११ वृहती मर्या ययेमान् लोकान् व्यापामेति तद् वृहत्या वृहत्त्वम् ता० ७ ४ ३ यस्य नवता वृहतीम् कौ० ९ २ षट्त्रिंशदक्षरा वृहती श० ८ ३ ८ ३ गोऽश्वमेव हि वृहती कौ० ११ २ पशवो वृहती कौ० १७ २ स्वाराज्य छन्दसा वृहती ता० २४ ६ ३ श्रीर्वै वृहती कौ० २८ ७ वृहती स्वर्गो लोक श० १० ५ ४ ६ अय मध्यमो (लोक.=अन्तरिक्षम्) वृहती ता० ७ ३ ९ वृहती हि सवत्सर श० ६ ४ २ १०. वाग्वै वृहती श० १४ ४ १ २२ मनो वृहती श० १० ३ ११, प्राणा वै वृहत्य ऐ० ३ १४ व्यानो वृहती ता० ७ ३ ८. आत्मा वै वृहती ऐ० ६ २८ एतद्वै रथन्तरस्य स्वमायतन यद् वृहती ता० ४ ४ १० वृहती द्यावापृथिवीनाम निघ० ३ ३]

वृहती वर्धमाने उपासानक्ता २० ४१ महान्त्यौ (उषासानक्ता=रात्रिदिने) २९ ३१ [वृहतीशब्दाद् द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

वृहतीव यथा महागुणयुक्ता पूज्या माता १ ५९ ४ [वृहती-इवपदयो समास]

वृहत्केतुम् महाप्रज्ञम् (गृहपतिम्) ५.८ २. [वृहत्-केतुपदयो समास । केतु प्रज्ञानाम निघ० ३ ९]

पदयो समासे 'तद्बृहतो करपत्योश्चोरदेवतयो सुट् तलोपश्च' अ० ६ १ १५७ वा० सूत्रेण सुट् तलोपश्च। बृहस्पति =बृहत पाता वा पालयिता वा नि० १० १२ बृहस्पतिर्ब्रह्मासीत् सोऽस्मै वाचमयच्छत्। बृहदुपव्याख्यातम् नि० २ १२ अय वै बृहस्पतिर्योऽय (वायु) पवते श० १४ २.२ १० एष (प्राण) उ एव बृहस्पति श० १४.४ १ २२ अथ यस्सोऽपान आसीत् स बृहस्पतिरभवत् जै० उ० २ २ ५ यच्चक्षु स बृहस्पति. गो० उ० ४ ११ द्युम्न हि बृहस्पति श० ३ १ ४ १६ बृहस्पतिर्वै सर्व ब्रह्म गो० उ० १ ३ ४ ब्रह्म वै बृहस्पति ऐ० १ १ ३ बृहस्पतिर्ब्रह्म ब्रह्मपति तै० २ ५ ७ ४ बृहस्पते ब्रह्मणस्पते तै० ३ ११ ४ २ बृहस्पतिर्वै देवाना ब्रह्मा श० १ ४ १ १ बृहस्पतिर्वा आगिरसो देवाना ब्रह्मा गो० उ० १ १ बृहस्पति पुर एता तै० २ ५ ७ ३ बृहस्पतिर्वै देवाना पुरोहित ऐ० ८ २६ यजमानदेवत्यो वै बृहस्पति श० १.८ ३ १ मित्राबृहस्पती वै यज्ञपथ श० ५ ३ २ ४]

बृहस्पतिपुरोहिताः बृहस्पति सूर्य पुर पूर्वो हितो धृतो येषु ते (त्रयस्त्रिंशा देवा पृथिव्यादय) २० ११. [बृहस्पति-पुरोहितपदयो समास। पुरोहित =पुर एनं दधति नि० २ १२]

बृहस्पतिप्रसूताः बृहता पतिनेश्वरेणोत्पादिता भा०—ईश्वरेण निर्मिता (ओषधय) १२ ८६ बृहत. कारणस्य पालकेश्वरस्य निर्माणादुत्पन्ना (ओषधी =ओषध्य) १२ ६३ [बृहस्पति-प्रसूतपदयो समास। प्रसूत =प्र+षूङ् प्राणिगर्भविमोचने (अदा०) धातो क्त]

बृहस्पतिसुतस्य बृहत्या वेदवाण्या. पते पालकस्य पुत्रस्य ८ ६ [बृहस्पति-सुतपदयो समास]

बोध जानीहि ७ २२ ३ अवगच्छ १२ ४२ विजानीहि ७ २२ ४ बोधय ७ २११ **बोधत्**=बोधय ४ १५ ७ **बोधतम्**=विजानीतम् २ ३६ ६ **बोधति**=विजानाति २ २५ २ **बोधतु**=जानातु २ ३२ ४ **बोधन्तु**=जानन्तु १ २६ ४ **बोधय**=प्रदीपय ५ १४ १ सचेतन कुरु २७ ८ बोधयति प्र०—अत्र व्यत्यय १ १२ ४. अवगमय १ २२ १ **बोधयत**=प्रदीपयत ऋ० भू० २ ४६, ३ १ चेतयत १२ ३० उद्दीपयत ३ १ **बोधाति**=जानीयात् १ ७७ २ **बोधि**=बुध्येत प्र०—अत्र लिडर्थे लुडडभावश्च १ ४४ ६ जानीहि १.७६ ४ विदितो भव, विदितगुणो वा भवति प्र०—अत्र लोडर्थे लडर्थे च लुडडभावश्च १ २४ ११. बोधय प्र०—अत्र लोडर्थे लडडभावोऽन्तर्गतो ण्यर्थश्च १ ३१ ८ जानाति २ ६.४ जानीहि २ २४.१६ बुध्यस्व ४ ३ ४ बुध्यसे ३ ४.१. बोधयति प्र०—अत्र लडर्थे लुङ् 'बहुल छन्दसि' इत्यडभावोऽन्तर्गतो ण्यर्थश्च ३.२६ विज्ञापय ६ ४६.४ [बुध अवगमने (भ्वा०) धातोर्लोट्। अन्यत्र लटि लुडि लेटि च रूपाणि। 'बोधय' एतदादिषु तु णिजन्ताल्लोट्]

बोधयन्ती जागरयन्ती (उषा स्त्री वा) १.१२४.४. चेतयन्ती (उषा) १ ६२ ६. [बुध अवगमने (भ्वा०) धातोर्णिचि शतरि स्त्रियां ङीपि च रूपम्]

बोधयितारम् ज्ञापयितारम् (प्राज्ञ जनम्) १ १६१ १३ [बुध अवगमने (भ्वा०) धातोर्णिजन्तात् तृच्]

बोधामसि बोधयेम ७ २१ १ [बुध अवगमने (भ्वा०) धातोर्लेटि 'इदन्तो मसि' इति मस इदन्तता]

बोधिन्मनसा बोधित मनो ययोस्तौ (अश्विना=विद्याध्यापकोपदेशकौ) ५ ७५ ५ [बोधित-मनस्पदयो समासे पूर्वपदस्यान्त्याकारलोपश्छान्दस। द्विवचनस्याकार]

बोभवीति भृश भवति ३ ५३ ८. [भू सत्तायाम् (भ्वा०) धातोर्यङ्लुकि लटि रूपम्]

ब्रजः यो व्रजति गच्छेत् स (इन्द्र =राजा) ३ ३० १० [व्रज गतौ (भ्वा०) धातो कर्त्तरि अच्। वकारस्य बकारश्छान्दस]

ब्रज्याय व्रजिषु क्रियासु भवाय (भा०—मनुष्याय) १६ ४४ [व्रज गतौ (भ्वा०) धातो स्त्रियां 'इक् कृष्यादिभ्य' इतीक्। व्रजिप्राति० भवार्थे यत्]

ब्रध्नम् महान्त परमेश्वर शिल्पविद्यासिद्धय आदित्यमग्नि प्राण वा १ ६ १ महान्तम् (सूर्यम्) ७ ४४.३. सर्वानन्दवर्धक महान्त परमेश्वरम्, सर्वाऽवयववृद्धिकर प्राणम् ऋ० भू० १६३, ऋ० १ १ १११ **ब्रध्नस्य**=अश्वस्य ३० १२ सबसे बडे प्रकाशमान सूर्य का स० वि० १६७, ६ १ ११३.१० महत (परमेश्वरस्य) १८ ५१ [ब्रध्न. अश्वनाम निघ० १ १४ ब्रध्न महन्नाम निघ० ३ ३ बन्ध बन्धने (क्र्या०) धातो 'बन्धेर्ब्रधिबुधी च' उ० ३ ५ सूत्रेण नक् ब्रध्यादेशश्च]

ब्रन्दिनः निन्दिता ब्रन्दा सन्ति येषा तान् दुष्टान् १ ५४ ५ निन्दिता ब्रन्दा मनुष्यादि समूहा विद्यन्ते येषा तान् मायिन १ ५४ ४ [ब्रन्द-प्राति० निन्दायामर्थ इनि.। ब्रन्द =वृञ् वरणे (स्वा०) धातो 'अब्दादयश्च' उ० ४.६८ सूत्रेण दन् नुम् च। ऋकारस्य रेफश्छान्दस]

६ १८ २ [वृहत्-रेणुपदयो. समास । रेणु =री गति-रेषणयो (क्र्या०) धातो 'अजिवृरीभ्य ०' उ० ३ ३८ सूत्रेण णु]

वृहद्वते प्रशस्तानि वृहन्ति कर्माणि यस्य तस्मै (इन्द्राय=सेनापतये) ७ २२ [वृहत्-प्राति० प्रशसाया मतुप् । वृहत्=महन्नाम निघ० ३ ३]

वृहन् वर्धमान (अग्नि =अध्यापक) २ १ १२ महान् (क्रतु =प्रज्ञा कर्म वा) ३ ५२ ४ वर्धमानो वर्धयन् (विद्वज्जन) ५ २२ **वृहन्तम्**=अतिप्रवृद्धम् (रयिं=धनम्) १.११७.२३ वर्धमानम् (रयिं=श्रियम्) २ ४ ८ सर्वदा वृद्धियोगेन महत्तमम् (रयिम्) १ ९२ ८ महान्तम् (क्रतु=सर्व सङ्गत ससाराख्य यज्ञम्) १ २.८ पृथिव्या. सकाशादतिविस्तीर्णम् (युवान जनम्) ६ १९ २ सर्वेभ्यो महान्त सुखवर्धकमीश्वर, वृहता कार्याणा साधक भौतिक वा (अग्निम्) २ ४ वर्धकम् (रुद्र =परमात्मानम्) ६ ४९ १० **वृहन्तः**=वर्धका (शवला =पश्वादय) २४ १० वर्धमाना वर्धयन्तश्च (देवा =विद्वासो .दिव्या पदार्था वा) २ १८ [वृह वृद्धौ (भ्वा०) धातो शतृ । व्यत्ययेन श । 'वर्त्तमाने पृषद्वृहत्०' उ० २ ८४ सूत्रेण वा अति शतृवच्च । वृहन् एप ते शुक्रो य एप (सूर्य) तपत्येप उ ऽएव वृहन् श० ४.५ ९ ६]

वृहन्ता सद्गुणैर्महान्तौ (इन्द्रावरुणौ=राजसेनेशौ) ४ ४१.११ ['वृहत्' इति व्याख्यातम् । तत प्रथमा-द्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश]

वृहस्पतये वृहत्या वाचो वृहतामाकाशादीनाञ्च पति. स्वामी तस्मै जगदीश्वराय ४ ७ वृहत्या वेदवाण्या पालकाय (विदुषे जनाय) २ १२ वृहतामाप्ताना पालकाय (ईश्वराय) २६ ३ वृहता प्रकृत्यादीना पत्युरीश्वरस्य विज्ञानाय १० ५ अध्ययनाऽध्यापनाभ्या विद्याप्रचाररक्षकाय (राजपुरुषाय) ९ ११ चत्वारिंशद्वर्षपर्यन्त ब्रह्मचर्य सेवित्वा वृहत्या वेदविद्यावाच पालकाय (ब्रह्मचारिणे) ७ ४७ **वृहस्पतिना**=वृहता पालकेन चतुर्वेदविदा विदुषेव विद्यासुशिक्षाप्रचारेण १० ३० **वृहस्पतिम्**=वृहत शास्त्रबोधस्य पालकमतिथिम् १ १९० १ वृहतीना स्वामिनम् (विद्वास जनम्) ५ ५१ १२ वाग्विद्यारक्षकम् (वेदार्थविद्वज्जनम्) ३ ६२ ५ वृहता पालक राजानम् ३ ६२ ६ वृहत्या वाच स्वामिन विद्वासम् २५.३ महता पतिम् (वेधस=विद्वास जनम्) ५ ४३ १२ वृहत्या ऋग्वेदादिवेदवाच पालक परमात्मानम् ७ १० ४ वृहता पालनहेतु सूर्यप्रकाशम् प्र०—'तद्वृहतो करपत्योश्चोरदेवतयो सुट् तलोपश्च' अ० ६ १ १५७. अनेन वार्त्तिकेन 'वृहस्पति.' सिद्ध । 'पातेर्डति' उ० ४ ५८ अनेन पतिशब्दश्च १ १४ ३ सकलविद्याऽध्यापकम् (विद्वास जनम्) ९.२७. वृहता पालक वायुम् ३ २० ५ सम्राजमनूचानमध्यापक वा ९ ११. वेदशास्त्रपालकम् (वाज=सङ्ग्रामम्) ९ १२. **वृहस्पतिः**=वृहत्या वेदवाच पालयिता (विद्वान्) १ १९० २. वृहता वेदानामध्यापनोपदेशाभ्या पालयिता (विद्वान् जनः) १ १९० ८ वृहता पालको वैश्य १४ २९ वृहता पति सूर्य इव (विद्वान् शिल्पिजन.) १ १६१ ६ वृहत्या वेदवाच पालिकाऽध्यापिका (विदुषी स्त्री) १२ ५४. वृहता पालको विद्युद्रूपोऽग्नि २८ १९ वृहत्या वाचो, वृहतो वेदशास्त्रस्य, वृहतामाकाशादीनाञ्च पतिरीश्वर प० वि० वृहतो वचनस्य ब्रह्माण्डस्य वा पालक (परमात्मा) १४ २५ वृहता प्रकृत्याकाशादीना पति पालको जगदीश्वर २ १३. वृहत् शब्दपूर्वक पा रक्षणे इस धातु से डति प्रत्यय, वृहत् के तकार का लोप और सुडागम होने से वृहस्पति शब्द सिद्ध होता है 'यो वृहतामाकाशादीना पति स्वामी पालयिता स वृहस्पति 'जो बडो मे भी बडा और बडे आकाशादि ब्रह्माण्डो का स्वामी है, वह परमात्मा सब का अधिष्ठाता है स० प्र० २०, ३९ ९ वृहत्या सभाया सेनाया वा पालक (इन्द्र =सेनापति) १७ ४८ वृहता पालक सूत्रात्मा ३९ ६. वृहतामधिकाराणामध्यक्ष (सेनाध्यक्ष) १७ ४० वृहता महत्तत्त्वादीना स्वामी पालक (इन्द्र =ईश्वर) वृहता व्यवहाराणा रक्षक (जन) १८ १९ महाविद्यावाचोऽधिपति, सबसे बडे सुख का देने वाला परमात्मा आर्याभि० ११, ऋ० १ ६.१८.९ बडी प्रजा का पालन करने वाला श्रेष्ठ न्यायकारी राजा स० वि० १२२, अथर्व० १४ १ ५४ **वृहस्पते**=वृहत्या वेदवाच पते पात परमविद्वन् ९ ८ विद्याद्युत्तमपदार्थाना पालक (राजन्) ५ ४२ ८ वृहत्या वाच स्वामिन् (विद्वन्नध्यापक) २ २४ १. वृहत्सत्यप्रचारक (परमेश्वर विद्वन् वा) २ २३ ६ वृहत पापाद्वियोजक (परमेश्वर विद्वन्वा) २ २३ ७ वृहता प्रकृत्यादीनां जीवानाञ्च पालकेश्वर २६ ३ वृहता धार्मिकाणा वृद्धाना सेनाना वा पतिस्तत्सम्बुद्धौ (भा०—राजन्) १७.३६ वृहता विदुषा पालक अ०—परीक्षक (ईश्वर) १३ २३ **वृहस्पतेः**=वृहता प्रकृत्यादीना पालकस्य (सवितु.=जगदीश्वरस्य) ९ १० वृहत्या सेनाया. स्वामिन (सेनापते) ९ १९ वृहत्या वेदवाच पालकस्य (ईश्वरस्य) १४ २५ वृहता पालकस्य महतत्त्वस्य २५ ४ महता वीराणा पालयितु सेनाध्यक्षस्य ९ ९ [वृहत्-पति-

१४.७.२.३१ ब्रह्म वै भूताना ज्येष्ठम् तै० २.८.८.१०. तस्मादाहुर्ब्रह्मैव देवाना श्रेष्ठमिति श० ८ ४ १ ३. कतम एको देव इति स ब्रह्म त्यदित्याचक्षते श० १४ ६ ६ १० तद् (ब्रह्म) इदमन्तरिक्षम् जै० उ० २ ६ ६ ब्रह्म वै त्रिवृत् ता० २ १६ ४]

ब्रह्मकाराः ये ब्रह्म धनमन्न वा कुर्वन्ति ते (सज्जना) ६ २९ ४ [ब्रह्मन्-उपपदे डुकृञ् करणे (तना०) धातोरण् कर्त्तरि]

ब्रह्मकृतः ये ब्रह्म धनमन्न वा कुर्वन्ति ते (धार्मिका विद्वास) ७ ३२ २ **ब्रह्मकृता**=येन ब्रह्म धनमन्न वा करोति तेन (गणेन=समूहेन) ७ ९ ५ ['ब्रह्मन्' उपपदे डुकृञ् करणे (तना०) धातो कर्त्तरि क्विप्]

ब्रह्मकृतिम् ब्रह्मण परमेश्वरस्य कृति ससारम् ७ २९.२ ब्रह्मणो धनस्य कृति क्रिया यस्य तम् (इन्द्र= दुष्टशत्रुविदारक राजानम्) ७ २८ ५ परमेश्वरोपदिष्टा प्रिया गाम् (वेदवाणीम्) ७ ३० ५ वेदोक्ता सत्यक्रियाम् ७ २९ ५ (ब्रह्मन्-कृतिपदयो समास । कृतिम्=डुकृञ् करणे (तना०) धातो स्त्रिया क्तिन्]

ब्रह्मचर्येण वेदाऽध्ययनेन ब्रह्मविज्ञानेन ऋ० भू० २३८ अथर्व० ११ ५ १९ ब्रह्मचर्य-सेवन से स० प्र० ९८, अथर्व० ३ १४ ११.१८ पूर्ण ब्रह्मचर्य रूप तप से स० वि० ८०, अथर्व० ११ ५ १७ ['ब्रह्मन्' उपपदे चर गतौ (भ्वा०) धातो. 'गदमदचर०' अ० ३ १ १०० इति यत्]

ब्रह्मचारिणम् ब्रह्मचारी को स० वि० ८०, अथर्व० ११ ५ ३ **ब्रह्मचारी**=ब्रह्मणि वेदे चरितु शील यस्य स ऋ० भू० २३५, अथर्व० ११ ३ ५ ५ [ब्रह्मन्नुपपदे चर गतौ (भ्वा०) धातोस्ताच्छील्ये णिनि]

ब्रह्मचोदनीम् विद्या-धनप्राप्तये प्रेरिकाम् (राजनीतिम्) ६ ५३ ८ [ब्रह्मन्-चोदनीपदयो समास । चोदनी चुद सञ्चोदने (चु०) धातोर्ल्युडन्तात् स्त्रिया ङीप्]

ब्रह्मचोदनौ आत्माऽन्नप्राप्तिप्रेरकौ (घृर्षाही= सूर्यविद्वांसौ) ४ ३३ [ब्रह्मन्-चोदनपदयो समास । चोदन=चुद सञ्चोदने (चु०) धातो कर्त्तरि ल्युट् छान्दस]

ब्रह्मजूतः धनानि प्राप्त (इन्द्र=राजपुरुष) ३ ३४ १ ब्रह्मणा धनेनाऽन्नेन युक्त (इन्द्र=शत्रुविदारक सेनेश) ७ १९ ११ [ब्रह्मन्-जूतपदयो समास । जूत= 'जू' इति सौत्रो धातु, तत क्त]

ब्रह्मज्येष्ठम् ब्रह्मैव परमेश्वरो विद्या वा ज्येष्ठा सर्वोत्कृष्टा यस्य तम् (ब्रह्मचारिणम्) ऋ० भू० २३२, [ब्रह्मन्-ज्येष्ठपदयो समास । ज्येष्ठम्=प्रशस्यप्राति० अतिशायन इष्ठन्प्रत्यये 'ज्य च' इति ज्यादेश]

ब्रह्मणस्पतिम् ब्रह्माण्डस्य स्वामिन परमात्मानम् ७.४४ १ ब्रह्मणो वेदस्य ब्रह्माण्डस्य सकलैश्वर्यस्य वा स्वामिन जगदीश्वरम् ७ ४१ १. ब्रह्माण्डस्य वेदस्य वा पालकम् (ईश्वरम्) ३३.४९ अपने उपासक वेद और ब्रह्माण्ड के पालन करने वाले (ईश्वर) को स० वि० १५५, ७ ४१ १ **ब्रह्मणस्पतिः**=बृहत्या प्रजाया पालक (राजसेनाऽधीश) २ २४ २ धनस्य वेदस्य वा पालक स्वामी (ईश्वर) ३३ ८९ धनकोशेश (राजा) ६ ७५ १७ ब्रह्माण्डस्य पालयिता परमेश्वर) १ १८.४ वेदविद्याया पालक (अ०—परमात्मा) ३४ ५७ **ब्रह्मणस्पते**= ब्रह्माण्डस्य पालकेश्वर १ १८.५ वेदविद्याप्रचारक (अलविद्यो जन) २ १ ३ ब्रह्माण्डस्य रक्षक (भा०—जगदीश्वर) ३४ ५८ वेदस्य ब्रह्माण्डस्य वा स्वामिन् (ईश्वर) प्र०— 'षष्ठ्या पतिपुत्र०' इति विसर्जनीयस्य सत्वम् १.१८ ३ सनातनस्य वेदशास्त्रस्य पालकेश्वर ३ २८ हे ब्रह्माण्ड और वेदो के पालन करने वाले (परमात्मन्) स० प्र० ४२३, ९ ८३ १ [ब्रह्मन्-पतिपदयो समास । षष्ठ्या अलुक् । 'षष्ठ्या पतिपुत्र०' अ० ८ ३ ५३. सूत्रेण विसर्जनीयस्य सत्वम् । ब्रह्मणस्पति=ब्रह्मण पाता वा पालयिता वा नि० १० १२ ब्रह्मणस्पति पदनाम निघ० ५ ४ एष वै ब्रह्मणस्पतिर्य एष (सूर्य) तपति श० १४.१.२ १५]

ब्रह्मण्यन्तः आत्मनो ब्रह्मेच्छन्त (यतस्रुच= ऋत्विज) २ ३४ ११ ब्रह्म महद्धन कामयमाना. (नर= विद्वज्जना) २ १९ १ ब्रह्म धन कामयन्त (विद्वज्जना) २ १९ ८ धन प्राप्तुमिच्छत (ज्ञान-वृद्धाञ्जनान्) ६ २१ ८ **ब्रह्मण्यते**=आत्मनो धर्मेण धनमिच्छते (मर्त्याय=मनुष्याय) ४ २४.२ ['ब्रह्मन्' इति व्याख्यातम् । तत आत्मन इच्छाया क्यजन्ताच्छतृ]

ब्रह्मद्विषम् धनस्य द्वेष्टारम् (दुर्जनम्) ६ ५२ २ **ब्रह्मद्विषः**=ये ब्रह्म वेद परमात्मान वा द्विषन्ति तान् (नास्तिकाञ्जनान्) ५ ४२ ९ वेदेश्वरविरोधिन (पापाचारिणो जनस्य) २ २३ ४ **ब्रह्मद्विषे**=यो ब्रह्म परमात्मानं वेद वा द्वेष्टि तस्मै (दुष्टजनाय) ३ ३० १७ वेदविद्याद्वेष्ट्रे (दुर्जनाय) ६ ५२ ३ ['ब्रह्मन्' उपपदे द्विष अप्रीतौ (अदा०) धातो क्विप् कर्त्तरि । ब्रह्मद्विषे

ब्रवत् उपदिशेत् ६ ५४ १ ब्रूयात् ६ ५४ २ **ब्रवसि**=ब्रूया १ १३६ ७ **ब्रवः**=वद ७ ६० १ ब्रूया ४ ३ ६ **ब्रवाणि**=उपदिशानि ६ १६ १६ उपदिशेयम् २६ १३. **ब्रवाम**=अध्यापयेमोपदिशेम वा ३६ २४ वदेम ६ ५६ ४ **ब्रवामहै**=उपदिशेम ५ ५१ १२. **ब्रवावहै**=परस्परमुपदेशश्रवणे करवावहै १ ३० ६ **ब्रवीत्**=वदतु १ १६४ ७ **ब्रवीतु**=उपदिशतु १ ३५ ६ वदतु १ १६४ ७ **ब्रवीमि**=उपदिशामि ३ ५४ १० **ब्रवीषि**=उपदिशसि ४ ४२ ७ **ब्रवैते**=ब्रूयाताम् ६ २५ ४ [ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लेट्। 'वहुलं छन्दसी' ति शपो लुङ् न। अन्यत्र लोट् लट् लिङ् लङ् च]

ब्रवीतन उपदिशत १ ८४ ५ [ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लोट्। तप्रत्ययस्य तनवादेशः]

ब्रह्म बृहद्विद्यं वेदचतुष्टयम् १६ ४१ बृहत् सर्वेभ्यो महदनन्तम् (परमेश्वरम्) २३ ४८. ब्राह्मणं विद्वांसम् १८ ४२ सर्वेषां सत्योपदेशेन वर्धकं ब्राह्मणकुलम् १८ ४१ वेदो जगदीश्वरो ब्रह्मवित्कुलं वा १० १० चतुर्वेदाखिलराजप्रजासुखनिमित्तानां पदार्थानां निर्माता भा०—वेदप्रवीण (राजा) १० २८ पूर्णविद्यादिसद्गुणयुक्त ब्राह्मण आर्याभि० २ ३१, ३८ १४ विद्या विद्वांस वा ५ २७ विद्वत्कुलम् १८ ३६ वेदेश्वरविज्ञानं तद्वत्कुलम् ३२ १६. सर्वेभ्यो महत्त्वादीश्वरः ३२ १ बृहद्धनम् ३ २६ १५. असङ्ख्यं धनम् ४ १६ २१ वेदविद्याम् १ १०.४ धनं ब्रह्माण्डं वा ३ ५३ १२ सच्चिदानन्दादि लक्षण चेतनं वाच्यम् ४ ११ शब्द, अर्थ और सम्बन्ध के ज्ञानपूर्वक साङ्गोपाङ्ग चारों वेदों को स० वि० ८०, अथर्व० ११ ५ २४ वेदविज्ञानम् भा०—विद्या, योगवल, धर्माचरणम् ११ ८१ ब्राह्मणवर्णम् ऋ० भू० १५२, ३८ १४ सर्वोत्तमविद्यागुणकर्मवत्त्वं सद्गुणप्रचारकरणत्वञ्च ब्राह्मणलक्षणम् ऋ० भू० १०४, अथर्व० १२ ५ ८ सर्वव्यापकं चेतनम् (परमेश्वरम्) ६ ७५ १६ विद्याधनम् ४ २१ ११ धनादियुक्तमन्नम् १ १५२ ५ बृहद्व्यापकम् (ईश्वरम्) ११ ५ धनमन्नं वा ३३ ६६ वेदचतुष्टयम् १ ७५ २ वेदाध्यापनम् १ ८८ ४ वडो से भी वडा (महीय ईश्वर) आर्याभि० २ २८, १३ ३ सर्वेभ्यो गुणकर्मस्वरूपतो बृहत् (ईश्वर) ४० १७ पूर्णविद्यादि शुभगुण और सवके उपकारक शमदमादि गुणयुक्त ब्रह्मकुल स० वि० १४४ अथर्व० १२ ५ १० ८ **ब्रह्मणः**=परमेश्वरस्य १७ १४ धनस्य, वेदस्य ३४ ३४ ब्रह्मविद (भा०—विदुषो जनस्य) ३८ १६ ब्रह्माण्डस्य राज्यस्य वा २ २३ ६. धननिधे २ २६ ४ बृहत्या प्रजाया २ २४ २. सकलैश्वर्यस्य ७ ४१ १ विद्याधनस्य २ २४ ५ **ब्रह्मणा**=वेदेन धनेनाऽन्नेन वा ५ ४२ ४ बृहता वलेन २ २४ ३ अन्नादिमामाग्र्या सह १ ८४ ३ वेदविज्ञानेन २१ २ वेदेश्वरविज्ञानप्रदेन (प्रचारेण) ११ ८२ अधीतचतुर्वेदेन (विद्वज्जनेन) १६ ७५ जलेन धनेन वा ८ ३३ बृहता वेदज्ञानेन ८ १५ परमेश्वरेण वेदचतुष्टयेन वा १६ ३१ वेदार्थज्ञानेन ज्ञापनेनेवोपदेशकेन १० ३० **ब्रह्मणि**=ब्राह्मणसभायाम् १ १०८ ७ **ब्रह्मणे**=परमेश्वराय वेदाय वा १ ११३ १६ चतुर्वेदाध्ययनेन ब्रह्मत्वाधिकारं प्राप्ताय (विदुषे जनाय) २ १२ बृहत्तमाय परमात्मने ब्रह्मविदुषे वा भा०—ईश्वर विद्वांस च सेवितुम् ३६.१३. सत्य वेदविद्या के लिए आर्याभि० २ ३१, ३८ १४ वेदेश्वरविज्ञानप्रसाराय ३० ५ **ब्रह्माणि**=बृहन्ति धनानि ७ १ २० महान्ति अन्नानि धनानि वा ७ १८ ४ विज्ञातवेदार्थान् ब्राह्मणान् प्र०—ब्रह्म वै ब्राह्मणः शत० १३ १ ५ ३, १ ३ ५ धनधान्यानि ७ २३ १ वेदस्थानि स्तोत्राणि १.३ ६ अधीतानि वेदवचांसि ७ २६ २ धर्म्येण प्राप्तव्यानि (धनानि) ८० ८६ सुसंस्कृतानि बृहत्सुखकराण्यन्नानि धनानि वा १ ६११ बृहत्तमानि अन्नानि १ ५२ ७ महान्ति धनानि ५ २ ६ प्रकृष्टान्यन्नानि धनानि वा १.८० १६ बृहन्ति यानि धनान्यन्नानि वा तानि १ १६५ २ [ब्रह्मन्=बृहि वृद्धौ (भ्वा०) धातो 'बृंहेर्नोऽच्च' उ० ४ १४६ सूत्रेण मनिन् नकारस्य चाकारादेशः। ब्रह्म उदकनाम निघ १ १२ अन्ननाम निघ० २ ७ धननाम निघ० २.१० ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति। ब्रह्मा परिवृढः श्रुततो ब्रह्म परिवृढं सर्वत नि० १ ८ ब्रह्माणि कर्माणि नि० १२ ३४ (वागिति) एतदेषां (नाम्नां) ब्रह्मैतद्धि सर्वाणि नामानि बिभर्त्ति श० १४ ४ ४ १ वाग् ब्रह्म गो० पू० २ १० ब्रह्म वै वाच. परमं व्योम तै० ३ ६ ५ ५ तस्यै वाचः सत्यमेव ब्रह्म श० २ १ ४ १० सत्यं ब्रह्म श० १४ ८ ५ १ ब्रह्म वै ब्रह्मणस्पतिः कौ० ८ ५ ब्रह्म ब्रह्माऽभवत् स्वयम् तै० ३ १२ ६ ३ चन्द्रमा वै ब्रह्म ऐ० २ ४१. असौ वा आदित्यो ब्रह्म श० ७ ४ १ १४ अयमग्निर्ब्रह्म श० ६ २ १ १५ मुखं ह्येतदग्नेर्यद् ब्रह्म श० ६ १ १ १० अयं वै ब्रह्म योऽयं (वायु) पवते ऐ० ८ २८ प्राणो वै सम्राट् परमं ब्रह्म श० १४ ६ १० ३ प्राणापानौ ब्रह्म गो० पू० २ १०. ब्रह्म हि पूर्व्यं क्षत्रात् ता० ११ १ २ सैषा क्षत्रस्य योनिर्यद्ब्रह्म श० १४ ४ २ २३ अभिगन्तैव ब्रह्म कर्त्ता क्षत्रियः श० ४ १ ४ १ विद्युद् ह्येव ब्रह्म श० १४ ८.७ १ यदमृतं तद् ब्रह्म गो० पू० ३ ४ अभयं वै ब्रह्म श०

यो ब्रह्माणि धनानि वहति प्राप्नोति तस्मै (जनाय) ५ ३६ ५ [ब्रह्मन्-उपपदे वह प्रापणे (भ्वा०) धातोर्णिजन्ताद् औणा० असुन्]

ब्रह्मवाहः ये ब्रह्म धन धान्य प्रापयन्ति ते (विद्वासो जना) ६ २१ ६ अनन्तधनवेदविद्याप्रापक (विद्वज्जन) १ १०१ ६ धनप्रापिका (क्रिया) ३ ४१ ३ [ब्रह्मन्-उपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' अ० ३ २ ६४ सूत्रेण छान्दसो ण्वि । अन्यत्र 'कर्मण्यण्' इत्यण्]

ब्रह्मवाहस्तमम् अतिशयेन वेदेश्वरविद्याप्रापकम् (विद्वत्तम जनम्) ६ ४५ १६ [ब्रह्मवाहस्-प्राति० अतिशायने तमप्]

ब्रह्मसंशिते ब्रह्मणा वेदविदा सेनापतिना प्रशसिते (सेने) ६ ७५ १६ ब्रह्मभिश्चतुर्वेदविद्भि प्रशसिते शिक्षया सम्यक् तीक्ष्णीकृते (अ०—सेनानीपत्नि) १७ ४५ [ब्रह्मन्-सशितपदयो समास । सशित =सम्+शो तनूकरणे (दिवा०) धातो क्तप्रत्यये 'शाच्छोरन्यत०' इतीकारादेश]

ब्रह्महत्यायै ब्रह्मणो वेदस्येश्वरस्य विदुषो वा हनन-निवारणाय ३६ १३ ['ब्रह्मन्' उपपदे हन हिंसागत्यो (अदा०) धातो 'हनस्त च' अ० ३ १ १०८ सूत्रेण क्यप् तकारान्तादेशश्च । स्त्रिया टाप्]

ब्रह्मा धनानि प्र०—अत्राऽऽकारादेश २ २० ५. [ब्रह्मन् इति व्याख्यातम् । तत सु-स्थान आकारादेश-श्छान्दस]

ब्रह्माणेव यथा समग्रवेदविदौ (विद्वासौ पुरुषौ) २ ३६ १ [ब्रह्माणा० इवपदयो समास]

ब्राह्मणम् वेदेश्वरविदम् (विद्वज्जनम्) ३० ५ ब्रह्म-निष्ठात्वम् ऋ० भू० २०३, अथर्व० ७ ६ ६७ १ **ब्राह्मणः**= वेदोपवेदवित् भा०—विद्वत्तम (अ०—वैद्यो जन) १२ ६६ ब्रह्मणा वेदेन परमेश्वरस्योपासनेन च सह वर्त्त-मानो विद्याद्युत्तमगुणयुक्त पुरुष ऋ० भू० २२३, ६ ४० वेदेश्वरवित् (जन) २२ २२ वेदेश्वरविदनयो सेवक उपासको वा (पुरुष) ३१ ११ **ब्राह्मणात्**=ब्रह्मणो बृहतोऽवयवात् (राधस =पृथिव्यादिधनात्) प्र०—अत्र 'अनुदात्तादेश्च' अ० ४ ३ १४० इत्यवयवार्थेऽञ्प्रत्यय १ १५ ५ **ब्राह्मणानाम्**=ब्रह्मण परमेश्वरस्य वेदचतुष्ट-यस्य वा सेवकानाम् (जनानाम्) ६ ४०. ब्रह्मवेदभक्तानाम् (प्रजापुरुषाणाम्) १० १८. वेदविदा सभासदाम् ऋ० भू० २२२ **ब्राह्मणाः**=व्याकरणवेदेश्वरवेत्तार (विद्वासो जना) १ १६४ ४५ ब्रह्मविद (जना) २७ ३ [ब्रह्मन्प्राति० 'तदधीते तद्वेद' इत्यर्थेऽण् । 'अनुदात्तादेश्च' अ० ४ ३ १४० सूत्रेण वाऽवयवार्थेऽञ् । ब्राह्मण.—एते वै देवा अहुतादो यद् ब्राह्मणा गो० पू० १ ६ अथ हैते मनुष्यदेवा ये ब्राह्मणा. प० १ १. दैव्यो वै वर्णो ब्राह्मण तै० १ २ ६ ७. आग्नेयो ब्राह्मण ता० १५ ४ ८ सोमराजानो ब्राह्मणा तै० १ ७ ४ २ सोम्या हि ब्राह्मणा तै० २ ७ ३ १ तस्मा-दपि (दीक्षितम्) राजन्य वा वैश्य वा ब्राह्मण इत्येव ब्रूयाद्, ब्रह्मणो हि जायते यो यज्ञाज् जायते श० ३ २ १ ४०. स (क्षत्रिय) ह दीक्षमाण एव ब्राह्मणतामभ्युपैति ऐ० ७ २३ य उ वै कश्च यजते ब्राह्मणो भूयेवैव यजते श० १३ ४ १ ३ गायत्रो वै ब्राह्मण ऐ० १ २८. ब्राह्मणो मनुष्याणा (मुखम्) ता० १ ६ १ अस्य सर्वस्य ब्राह्मणो मुखम् श० ३ ६ १ १४ ब्राह्मणो हि रक्षसामपहन्ता श० १ १ ४ ६ वसन्तो वै ब्राह्मणस्यर्त्तु तै० १ १ २.६ सामवेदो ब्राह्मणाना प्रसूति. तै० ३ १२ ६ २ तस्माद् ब्राह्मणो वसन्तऽआदधीत ब्रह्म हि वसन्त (ऋतु) श० २ १ ३ ५ आग्नेयो हि ब्राह्मण काठ० २६ १० ब्राह्मणो व्रतभृत् तै० म० १ ६ ७ २]

ब्राह्मणासः वेदेश्वरवेत्तार (विद्वज्जना) ६ ७५ १० वेदेश्वरविद (अ०—विद्वासो जनाः) २६ ४७ [ब्राह्मण इति व्याख्यातम् । ततो जसोऽसुक्]

ब्राह्मम् ब्रह्मोपासकम् (विद्वज्जनम्) भा०—उपदेशना-ध्यापन-धार्मिकत्व-जितेन्द्रियत्व-शरीराऽऽत्मबलवर्द्धनम् ३१ २१ ब्रह्मण सकाशाज्जात ज्ञानम् ऋ० भू० १३३, [ब्रह्मन्-प्राति० जातार्थेऽण् । 'ब्राह्मोऽजातौ' इति टेर्लोप]

ब्राह्मये यो ब्रह्मण परमेश्वरस्याऽपत्यमिव तस्मात् (सूर्यात्) प्र०—अत्र पञ्चम्यर्थे चतुर्थी ३१ २० यो देवेभ्यो विद्वद्भ्यो ब्रह्मोपदेश प्राप्य वर्त्तमानस्तस्मै, ब्रह्मरुचिर्ब्राह्मि-स्तस्यै, ब्रह्मणोऽपत्यमिव वर्त्तमानो यस्तस्मै (ब्रह्मसेवकाय) ऋ० भू० १३३, ३१ २० [ब्रह्मन्प्राति० 'तस्येदम्' इत्यणि ब्राह्म, ततोऽपत्यार्थ इञ्]

ब्राह्मणवर्चसेन पूर्णविद्यया सह ऋ० भू० १६१, अथर्व० १६ ४.४६ [ब्राह्मण-वर्चस्पदयो समासे समा-सान्तोऽच्]

ब्रुवते परस्परमुपदिशन्ति १ ३७ १३ **ब्रुवन्ति**=उप-दिशन्ति ७ २६ ३ **ब्रुवन्तु**=उपदिशन्तु १ ७४ ३ उप-दिशन्त्वध्यापयन्तु वा १६ ५८ **ब्रुवाते**=वदत ३ ५४ ७ **ब्रुवीत**=उपदिशत ५ ४६ २ **ब्रुवे**=उपदिशामि ७ ३१ ६

ब्राह्मणद्वेष्ट्रे नि० ६ ११]

ब्रह्मन् चतुर्वेदविन् (शिक्षित-पुत्र) २३ २५ विद्यादिना सर्वेभ्यो महन् परमात्मन् २२ २२ ब्रह्मविद्विद्वन् २३ ५१ प्राप्तब्रह्मविद्य (राजन्) १० २८ विद्यया वृद्ध (विद्वज्जन) २२ ४. सकलवेदवित् (वसिष्ठ=पूर्णविद्वज्जन) ७ ३३ ११. **ब्रह्मा**=चतुर्वेदविद्विद्वान् (जन) १८ २६ महान् योगी विद्वान् २३ १४. चतुर्वेदज्ञाता यज्ञाऽनुष्ठानकर्त्ता (पुरुषार्थि-जन) ऋ० भू० १५४ १८ २६ अखिलवेदाऽध्येता (अलविद्यो जन) २ १ ३ चतुर्वेदविज्जनश्चतुर्णां वेदाना प्रकाशक परमात्मा वा १ १६४ ३५ चारो वेदो का जानने वाला विद्वान् (पुरुष) स० वि० १६६, ६ ११३ ६ अन्तरिक्षस्थ पवन २१ १६ **ब्रह्माणम्**=अधीतसाङ्गोपाङ्गचतुर्वेदम् (राजानम्) ६ २६ **ब्रह्माणः**=चतुर्वेदाऽध्ययनेन 'ब्रह्मा' इति सञ्ज्ञा प्राप्ता (विद्वासो जना) १२ ४४. वेदान् विदित्वा क्रियावन्त (ईश्वरोपासका जना) १ १० १ ['ब्रह्मन्' इति व्याख्यातम् । ब्रह्मा सर्वविद्य सर्वं वेदितुमर्हति । ब्रह्मा परिवृढ श्रुतत नि० १ ७ यमेवामु त्रय्यै विद्यायै तेजो रस प्रावृहत् तेन ब्रह्मा ब्रह्मा भवति कौ० ६ ११ अथ केन ब्रह्मत्व क्रियत इति त्रय्या विद्ययेति ऐ० ५ ३३ एष ह वै विद्वान्त्सर्वविद् ब्रह्मा यद् भृग्वङ्गिरोविद् (अथर्ववेदविद्) गो० पू० २ १८ यज्ञस्य हैष भिषग् यद् ब्रह्मा यज्ञायैव तद् भेषज कृत्वा हरति ऐ० ५ ३४. शरद् ब्रह्मा तस्मात् यदा सस्य पच्य[illegible] ब्रह्मण्वत्य प्रजा इत्याहु श० ११ २ ७ ३२ चन्द्रमा ब्रह्मा (आसीत्) गो० पू० १.१३ . चन्द्रमा वै ब्रह्माऽधिदेव मनोऽध्यात्मम् गो० पू० ४.२ मनो वै यज्ञस्य ब्रह्मा श० १४ ६ १ ७. हृदय वै (यज्ञस्य) ब्रह्मा श० १२ ८.२ २३. चक्षुर्ब्रह्मा तै० २ १ ५ ६. वल वै ब्रह्मा तै० ३ ८ ५ २ ब्रह्मा ब्रह्माऽभवत् स्वयम् तै० ३ १२.६ ३. प्रजापतिर्वै ब्रह्मा गो० उ० ५ ८. प्राणदेवत्यो वै ब्रह्मा प० २ ६]

ब्रह्मन् ब्रह्मणि धने ३ १३ ६ [ब्रह्मन् इति व्याख्यातम् तत 'सुपा सुलुक्०' इति सप्तम्या लुक्]

ब्रह्मपुत्र इव ब्रह्मणश्चतुर्वेदवेत्तु पुत्रस्तथा २ ४३ २ [ब्रह्मन्-पुत्रपदयो समासे कृते पुन इवपदेन समासः]

ब्रह्मप्रियम् ईश्वरो वेदो वा प्रियो यस्य तम्- (जनम्) १ ८३ २ ब्रह्म वेदाध्ययन प्रिय यस्य तम् (अपत्यम्) १ १५२.६ [ब्रह्मन्-प्रियपदयो समास]

ब्रह्मयुज. ब्रह्मणा युञ्जन्ति यैस्ते (अत्या =अश्वा) १ १७७ २. ['ब्रह्मन्' उपपदे युजिर् योगे (रुधा०) धातो क्विप्]

ब्रह्मयुजा यौ ब्रह्म धन योजयतस्तौ (हरी=जलाग्नी) ३ ३५.४ ['ब्रह्मयुज' इति व्याख्यातम् । ततो प्रथमाद्विवचनस्याकार]

ब्रह्मराजन्याभ्याम् ब्रह्म ब्राह्मणश्च राजन्य क्षत्रियश्च ताभ्याम् २६ २ ब्राह्मण और क्षत्रिय के लिए म० प्र० ६७, २६ २ [ब्रह्मन्-राजन्यपदयो समास । राजन्य.=राजन्प्राति० 'राज्ञोऽपत्ये जातिग्रहणम्' अ० ४ १.१३७ वा० सूत्रेण यत्]

ब्रह्मवनि यो ब्राह्मणान् विद्वास वनति तम् (परमेश्वरम्) प्र०—'छन्दसि वनसनरक्षिमथाम्' अ० ३ २ २७. अनेन ब्रह्मोपपदे वनधातोरिन् प्रत्यय 'सुपा सुलुक्०' इत्यमो लुक् च भा०—यो ब्रह्मभिर्वेदविद्भिर्ब्राह्मणैर्वन्यते संसेव्यते तम् (ईश्वरम्) १.१७. यो वेद वनयति तम् (परमेश्वर भौतिकमग्नि वा) १ १८ ब्रह्मणो वेत्तॄणा सविभक्तार तत्तथा (अ०—सभाध्यक्षम्) ६ ३ यथा वलविद्यासम्भाजितार तथा (परमविद्वज्जनम्) ५ २७. सर्वमनुष्यार्थं ब्रह्मणो वेदस्य विभाजितार ब्रह्माण्डस्य मूर्त्तद्रव्यस्य प्रकाशक वा (परमेश्वर भौतिकाग्नि वा) १ १८ ['ब्रह्मन्' उपपदे वन सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' अ० ३ २.२७ सूत्रेण इन् । विभक्तेश्च लुक्]

ब्रह्मवनिः यया ब्रह्मविदो मनुष्या ब्रह्म परमात्मान वेद वा वनन्ति सम्भजन्ति सा (स्वाहा=वाक्) ५ १२ [ब्रह्मन्-उपपदे वन सम्भक्तौ (भ्वा०) धातो 'कृतो बहुल वा' इति करणे इन्प्रत्यय]

ब्रह्मवर्चसाय वेदाऽध्ययनाय २० ३ पूर्णविद्याप्रचाराय ऋ० भू० २१८, २० ३ [ब्रह्मन्-वर्चस्पदयो. समासे 'ब्रह्महस्तिभ्या वर्चस' अ० ५ ४ ७८ सूत्रेण समासान्तोऽच् । गायत्री ब्रह्मवर्चसम् जै० १ ६३ तेजो ब्रह्मवर्चस गायत्री ऐ० आ० १ १ ३ ब्रह्मवर्चस वै रथन्तरम् तै० स० ३ ५ ६.३ सोमो वै शुक्रो ब्रह्मवर्चसम् मै० १ ६ ८ शुक्ला व्रीहय एवमिव वै ब्रह्मवर्चसम् काठ० ११ ५]

ब्रह्मवर्चसी वेदविद्या-प्रदीप्त (ब्राह्मण =वेदेश्वरविज्जन) २२ २२ [ब्रह्मन्-वर्चस्पदयो. समासे कृते गुस्थाने 'इयाडियाजीकाराणामुपसख्यानम्' अ० ७ १ ३६ वा० सूत्रेण ईकार । समासान्ताऽभावश्च]

ब्रह्मवाहसम् वेदाना शब्दार्थसम्बन्धस्वराणां प्रापकम् (आप्तं विद्वज्जनम्) ६ ४५ ७ **ब्रह्मवाहसे**=धनप्रापकाय (जनाय) ५ ३८ १ वेदेश्वरविज्ञानप्रापणाय ६ ४५ ४

सत्यभाषणयुक्ता वाणी, स० प्र० ४२०. [भग-प्राति० भूम्न्यर्थे मतुबन्तात् ङीप् । भग इति व्याख्यातम्]

भगवन् अत्यन्तैश्वर्यसम्पन्न (ईश्वर) ३६ २१. **भगवन्त:**=बहूत्तमैश्वर्ययुक्ता (जना) ७ ४१ ४ सकलैश्वर्ययुक्ता (जना) ३४ ३७ सकलशोभायुक्ता. (भा०—सिद्धा श्रीमन्तो जना.) ३४ ३८ **भगवान्**=सकलैश्वर्यसम्पन्न (ईश्वर) ७ ४१ ५ प्रशस्तैश्वर्ययुक्त. (परमेश्वर) ३४ ३८ पूजनीय देव (परमात्मा) स० वि० १५६, ७.४१ ५ [भग इति व्याख्यातम् । ततो भूम्न्यर्थे मतुप्]

भगव: भाग्यवन् (सेनापते) १६ ५३ ऐश्वर्यसम्पन्न (भा०—सभेश राजन्) १६ ५२ ऐश्वर्ययुक्त (अ०—सेनापते) १६ ६ [भगप्राति० भूम्न्यर्थे मतुप् । तत सम्बुद्धौ 'मतुवसो रु सम्बुद्धौ छन्दसि' अ० ८ ३ १ सूत्रेण रुत्वम्]

भङ्गुरावताम् कुत्सिता भङ्गुरा प्रहृता प्रकृतयो विद्यन्ते येषा तेषाम् (शत्रूणाम्) ११.२६ [भङ्गुराप्राति० निन्दाया मतुबन्तात् षष्ठ्या बहुवचनम् । भङ्गुरा= भञ्जो आमर्दने (रु०) धातो 'भञ्जभासमिदो घुरच्' अ० ३.२ १६१ सूत्रेण घुरच् । घित्त्वात् कुत्वम् । तत स्त्रिया टाप्]

भङ्गेन मर्दनेन ७ ३ [भञ्जो आमर्दने (रुधा०) धातोर्घञ् । घित्त्वात् कुत्वम्]

भज सेवस्व ७ ४६ ४ अभिलष १ १२१.१५. स्थापय ४ २८ **भजति**=भाग करोति ५ ३४ ७ **भजतु**= विभाग करोतु ६ ४५ **भजते**=सेवते १ १२३ ४ **भजन्त**=भजन्ते सेवन्ते १६ ५६ **भजन्तु**=सेवन्ताम् ऋ० भू० १६०, अथर्व० १६ १८.२ **भजस्व**=सेवस्व ४ ३२ ४१ **भजाति**=विभजेत् २ २६ १. **भजामहे**= सेवामहे १ १८७.६ **भजेमहि**=सेवेमहि १ १५७ २ [भज सेवायाम् (भ्वा०) धातोर्लोट् । अन्यत्र लटि लङि लोटि लेटि च रूपाणि]

भजतन सेवध्वम् ७ ५६ २१ [भज सेवायाम् (भ्वा०) धातोर्लोट् । तप्रत्ययस्य तनबादेशश्छान्दस]

भद्रजानय: ये भद्र कल्याण जानन्ति ते (विद्वासो जना) ५ ६१ ४

भद्रम् भन्दनीय धर्माचरण सुख वा ३० ३. कल्याणकरम् (मोक्षमार्गम्) ४ १० १ जननीय सुखम् १२ ३ भन्दनीय कल्याणयुक्तम् (विश्व =जगत्) २ २४ १६. कल्याण सर्वदु खरहित सत्यविद्याप्राप्त्याऽभ्युदयनि श्रेयससुखकरम् (धर्माचरणम्) ऋ० भू० ३, ३० ३ शरीराऽऽत्मसुखम् १ ८६ ८ कल्याण सर्वै शिष्टैर्विद्वद्भि सेवनीयम् (ऐहिकपारमार्थिक सुखम्) १ १ ६ वृष्ट्यादिद्वारा कल्याणकरम् (नाभ=जलम्) १ १०८ ३ कल्याणकारक शीलम् १.६४.१४ सेवनीयसुखप्रदम् (गृहम्) ५ १ १० भन्दनीय वच २ ४३ ३ भजनीय कल्याणकारकम् (शर्म=गृहम्) ७.६० ८ भन्दनीय कल्याणकर शुद्धवायूदकवृक्षम् (गृहम्) ६ २८ ६ सत्यलक्षणकर वच २५ २७ कल्याणकारक गुण-कर्म-स्वभाव और पदार्थ को स० वि० ४ ३० ३ व्यावहारिक और पारमार्थिक सुख आर्याभि० १ ६, ऋ० १ १ २ १ **भद्रस्य**=आनन्दकरस्य (पुरुषस्य) १५ ४५ **भद्र:**=कल्याणकारक सेवनीयो वा (परमेश्वर ओषधिराजो वा) १ ६१ ५ भजनीय (अग्नि =पावक) १५ ३८ सुखकारी (भुवस्पतिर्विद्वान्) ५. ३४. भद्रस्वरूप भद्र करने वाला (ईश्वर) आर्याभि० १ १६, १ ६ १६ ५ **भद्रा:**=कल्याणकारका (देवा =विद्वासो जना) १ ८६ १ कल्याणहेतव (विद्वासो जना) १ ११५ ३. भजनीया (गोपा =रक्षका जना) १ १६३ ५. कल्याणकरा (क्रतव =यज्ञा प्रज्ञा वा) २५ १४ **भद्रे**= कल्याणकरे व्यवहारे ऋ० भू० २५८, १६ ५० **भद्रेण**= भजनीयेन व्यवहारेण भा०—धर्माऽऽचरणेन १६ ११ सुखकारकेण (शवसा=शरीरात्मबलेन) १.६४ १५. [भदि कल्याणे सुखे च (भ्वा०) धातो 'ऋज्रेन्द्राग्र०' उ० २ २८ सूत्रेण रक् । अय वै लोको भद्र ऐ० १ १३ अन्न वै भद्रम् तै० १ ३ ३ ६. भद्रमेभ्योऽभूदिति कल्याणमेवैतन् मानुष्यै वाचो वदति श० ४ ६ ६ १६ भद्र भगेन व्याख्यात भजनीयम् भूतानामभिद्रवणीयम् भवद्रमयतीति वा भाजनवद्वा नि० ४ ६ श्रीर्वै भद्रम् जै० ३ १७२]

भद्रम्भद्रम् कल्याण-कल्याणकारकम् (क्रतु=कर्म) १ १२३ १३ [भद्रपदस्य वीप्साया द्वित्वम्]

भद्रया मङ्गलकारक रीति से स० वि० १४१, अथर्व० ३ ३० ३ **भद्रा**=कल्याणकारिणी (सन्दृक्=समानदृष्टि) ४ ६ ६ मङ्गलकारिणी (राति =दानक्रिया) ६ ४५ ३२ कल्याणकरी (सुमति =शोभना प्रज्ञा) २५ १५ कल्याणरूपा (सुमति) १ ११४ ६ सेवनीया (राति =दानम्) १५ ३८. **भद्रायाम्**=कल्याणकर्याम् (सन्दृष्टौ=सम्यग्दर्शने) ६.१ ४ **भद्रा:**=शुभकरी (रशना =रज्जव) २६ १६ भन्दनीया (प्रशस्तय =प्रशसनीया प्रजा) १५ ३६ कल्याणप्रतिपादिका (प्रशस्तय =प्रशसा) १५ ३८ कल्याणकर्य्य (सर्गा =सृष्टय) ४ ५२ ५. [भद्र व्याख्यातम् ।

कथयामि ३ ३७ ५ उपदिशेयम् १ १८५ ७. **ब्रूहि**=आज्ञापय १ ११४ १० कथय १ ६१ १३ उपदिश १ ३५ ११ [ब्रूञ् व्यक्ताया वाचि (अदा०) धातोर्लट्। अन्यत्र लोटि रूपाणि]

ब्रुवन् अधिक ब्रुवन्तु प्र०—लेट्-प्रयोगोऽयम् १७ ५२ [ब्रूञ् व्यक्ताया वाचि (अदा०) धातोर्लेट् लङ् वा]

ब्रुवन्तः उपदिशन्त (सखाय) ५ १२.५ [ब्रूञ् व्यक्ताया वाचि (अदा०) धातो शतृ]

ब्रुवाणः उपदिशन् (सज्जन) ६ ३८ २ उपदेशेन प्रेरयन् (मित्र =सुहृज्जन) ३ ५६ १ [ब्रूञ् व्यक्ताया वाचि (अदा०) धातो शानच्। ब्रुवाण =प्रब्रुवाण शब्द कुर्वन् नि० १० २२]

ब्रुवाणा उपदिशन्ती (माता) ५ ४७ १ [ब्रूञ् व्यक्ताया वाचि (अदा०) धातो शानजन्ताट् टाप् स्त्रियाम्]

ब्रूतात् उपदिशतु ब्रवीतु वा ४ २४ ब्रूहि ८ ४३ [ब्रूञ् व्यक्ताया वाचि (अदा०) धातोर्लोट्। 'तुह्योस्तातङ्०' इति तातङ्]

भक्तम् सेवितम् (आयु =जीवनम्) १ १२७ ५ [भज सेवायाम् (भ्वा०) धातो क्त]

भक्षणम् सूर्यप्रकाशस्याऽभ्यवहरणम् १ ११० ३ [भक्ष अदने (चुरा०) धातोर्ल्युट्]

भक्षत सेवध्वम् ३३ ४१ [भज सेवायाम् (भ्वा०) धातोर्लोट्। सिव् विकरण। भक्षत विभक्षमाणा नि० ६ ८]

भक्षम् भजन सेवनम् ८ ३७ **भक्ष** =सेवनीय (पदार्थ) ८ १२ भोज्यसमूह ८ ५८ **भक्षान्**=भक्षितुमर्हान् भोज्यान् पदार्थान् १९ २९ **भक्षाय**=भोजनाय १ १८७.७ [भज सेवायाम् (भ्वा०) धातोरौणादिक स। भक्ष अदने (चुरा०) धातोर्वा घञर्थे क। प्राणो वै भक्ष श० ४ २ १ २९]

भक्षयामि भुञ्जे भोजयामि वा १९ ३४ पालयामि ८ ३७ [भक्ष अदने (चुरा०) धातोर्लट्]

भक्षि सेवस्व ३४ ३५ भजेयम्, सेवेय ७ ४१ २ सेवन करता हूँ स० वि० १५६, ७ ४१ २ [भज सेवायाम् (भ्वा०) धातोर्लट्। 'बहुल छन्दसी' ति शपो लुक्]

भक्षीय सेवेय अ०—स्वीकुर्याम् ३ २०. सेवेय भुञ्जीय वा ४ २१ १०. अद्याम् ३ २० भजेयम् ५ ५७.७ [भज सेवायाम् (भ्वा०) धातोर्लिङ्। 'बहुल छन्दसी' ति शपो लुक्। व्यत्ययेनात्मनेपदम्]

भक्ष्यमाणः भुज्यमान (भक्ष =भोज्यसमूह) ८ ५८. [भक्ष अदने (चुरा०) धातो कर्मणि शानच्]

भग सकलैश्वर्यप्रद (ईश्वर) ३४ ३८ अखिलशोभायुक्त (ईश्वर) ३४ ३८ विद्यैश्वर्यप्रद (ईश्वर) ३४ ३६ भजमान (ईश्वर) ३४ ३६ भजनीय (ईश्वर) ३४ ३६ ऐश्वर्ययुक्त (ईश्वर) ३४ ३६ भजनीयतम (सवित =जगदीश्वर) ३ ५६ ६ भजनीयस्वरूप (ईश्वर) स० वि० १५६, ७ ४१ ३ भजनीयवस्तुप्रद (ईश्वर) ७ ४१ ५ सर्वसामग्रीप्रद (ईश्वर) ७ ४१ ३ सत्याचरण करने वालो को ऐश्वर्यदाता (परमेश्वर) स० वि० १५६, ७.४१ ३. सेवनीयतम (ईश्वर) ७ ४१ ३ **भगम्**=भजते सुखानि येन तच्चक्रवर्त्यादिराज्यधनम् प्र०—अत्र भजधातो 'पुसि सज्ञाया घ प्रायेण' अ० ३ ३ ११८ अनेन घ प्रत्यय १ १४ ३ धर्म सेवमानम् (अर्यमण=न्यायाधीशम्) १ १३६ ६ ऐश्वर्ययुक्तम् (व्यवहारम्) ३४ ३९ ऐश्वर्यवन्तम् (सोम =विद्वज्जनम्) १ ८९ ३ सेवनीयमैश्वर्यम् २८ ३३ ऐश्वर्य भजमानम् (धार्मिक जनम्) १ १४१ ११ विद्याश्रीसमूहम् १.६१ ७ सकलैश्वर्यप्रद व्यवहारम् ३ २० ५ भजनीयस्वरूप (ईश्वर) को स० वि० १५६, ७ ४१ २ ऐश्वर्यकारक राजानम् ३३ ४९ **भगस्य**=सूर्यस्येव १ १३६ २ सकलैश्वर्ययुक्तस्य (सवितु =जगदीश्वरस्य) ५ ८२ १ **भगः**=भजनीय पदार्थसमुदाय ४ ५५ १० सेवितुमर्हो धनसमूह १ २४ ४ ऐश्वर्यवान् (आप्तो जन) ३४ ५४ भजनीय सेवनीय (ईश्वर) ३४ ३८ ऐश्वर्यप्रद सूर्य ३ ५५ १७ सकलैश्वर्यसम्पन्न (परमेश्वर) ऋ० भू० २०८, ऋ० ८ ३ २७ १. ऐश्वर्यम् १ ६२ ७ प्रभावम् २ १९ ८ सौभाग्यवान् (विद्वज्जन) १ ९० ४ ऐश्वर्यकर्त्ता वायु ५ ५१ ११ ऐश्वर्ययोग (राजा) ५ ३३ ५ धनैश्वर्यम् ७ १५ १२ ऐश्वर्यभागी (सूर्य) २ ३१ ४ भगवान् ६ ४९ १४ ऐश्वर्यमिच्छु (सज्जन) ६ २८ ५ भजनीय प्राण ६ ५० १३ **भगाय**=धनाढ्याय सेवनीयैश्वर्याय ८ ७ ऐश्वर्ययुक्ताय धनाय ३० १ अखिलैश्वर्याय ११ ७ [भज सेवायाम् (भ्वा०) धातो 'पुसि सज्ञाया घ प्रायेणे' ति घ। भग धननाम निघ० २ १० भग पदनाम निघ० ५ ६ भगो भजते नि० १ ६ भगस्य भागधेयस्य नि० ९ ३१ स्त्रीभगस्तथा स्याद् भजते नि० ३ १६ यज्ञो भग श० ६ ३ १ १९ भगो व्याख्यात। तस्य काल प्रागुत्सर्पणात् नि० १२ १३ तस्य (भगस्य) चक्षु परापतन् तस्मादाहुरन्धो वै भग इति गो० २ १ २ श० १ ७ ४ ६]

भगवती बह्वैश्वर्ययुक्ता विदुषी (स्त्री) १ १६४ ४०.

धारय धारयति वा १ १२ ११ **भरत्**=पुष्यात् ४ २६ ५ धरति ४ २६ ६ धरेत् ५ ३१ ११ भरेत् १ १७३ ३ भरे १ १२११३ दधाति ४ २६ ४ **भरत**=धरत २ १४ ६ स्वीकुरुत १ १३६ १ पुष्णीत २ १४ ७ धरत हरत वा ६ १६ ४१ **भरतम्**=धारयतम् १ १०६ ७. **भरति**=धरति ४ १६ १६ दधाति २ १६ २ **भरते**= धरति २ २४ ६ धरते १ १७३ २ दधाति २ २६ ३. अन्यायेन स्वीकरोति १ १०४ ३ **भरथः**=धरतम् १ ११२ २१ धरथ १ १५१ ३ **भरध्वम्**=धरध्वम् १ ६२ २ पोषयत ७ १३ १ पालयत ७ ४ १ **भरध्वे**= धरत ५ ५६ ४ **भरन्त**=भरन्ति २ १३ २ धरन्तु १ ७० ५ **भरन्ति**=पुष्यन्ति १ १५१ ८ अन्यायेन परपदार्थान् धरन्ति भा०—सञ्चिन्वन्ति २ ३० **भरन्तु**= पुष्णन्तु १२ ३१ धरन्तु १७ ५३ **भरन्ते**=धरन्ति पुष्णन्ति वा ३ ५५ ७ पुष्यन्ति प्र०—अत्र पक्षेऽन्तर्गतो ण्यर्थ १ १०४ ४ दधति १ १७३ ४ **भरस्व**=धर १ ७६ १० **भरात्**=धरेत् ४ २ ७ **भरः**=धर ६ २६ ४ **भराति**=धरति ५ ३ ७ भरेत् १ १८० २ **भरामः**= धराम ११ ४७ **भरामहे**=पुष्येम २ २० १ धरामहे १ ५३ १ **भरामि**=धरामि १ ६१ ३ पुष्णामि १ ६१ २ धारयामि २ १७ **भरिष्यामः**=धरिष्याम ११ १६ **भरे**=बिभृयात २ १६ १. धरामि ५ १२ १ [डुभृञ् धारणपोषणयो (जु०) धातोर्लोट्। व्यत्ययेन शप्। अन्यत्र लेटि. लटि लङि लृटि च रूपाणि। भृञ् भरणे (भ्वा०) धातोर्वा रूपाणि। भर आहर नि० ६ ३२]

भरतम् धारकम् (अग्नि=परमेश्वरम्) १ ६६ ३ पृथिवी आदि जगत् रूप अन्न के पोषण और धारण करने वाले (परमेश्वर) को आर्याभि० १ ४०, ऋ० १ ७३ ३. **भरतस्य**=पालितव्यस्य राज्यस्य १२ ३४ सेनाया धर्त्तू रक्षकस्य (राजादिसज्जनस्य) ३ ५३ २४ **भरतः**=धर्त्ता पोषक (सज्जन) ६ १६ ४ **भरताय**=धारणपोषणाय ५ ५४ १४ **भरता**.=देहधारकपोषका (भा०—धीमन्तो बालका) ७ ३३ ६ सर्वेषा धर्त्तार पोषका (प्राज्ञा विद्वज्जना) ३ ३३ ११ **भरतेभ्यः**=धारणपोषणकृद्भ्यो मनुष्येभ्य ५ ११ १ आदित्येभ्य १५ २७ [डुभृञ् धारणपोषणयो (जु०) धातो 'भृमृदृशियजि०' उ० ३ ११० सूत्रेण अतच्। भरता ऋत्विड्नाम निघ० ३ १८ प्रजापतिर्वै भरत स हीद सर्व बिभर्त्ति श० ६ ८ १ १४ अग्निर्वै भरत स वै देवेभ्यो हव्य भरति कौ० ३ २ प्राणो भरत ऐ० २ २४ भरत आदित्य नि० ८.१४. एष वो भरतो राजा तै० सं० १ ८ १० २]

भरद्वाजम् विद्यासद्गुणान् भरता वाज विज्ञापयितारम् (विप्रम्=मेधाविजनम्) १ ११२ १३ **भरद्वाजः**= वाजोऽन्न विज्ञान वा बिभर्त्ति येन श्रोत्रेण तत् (ऋषि= विज्ञापक कर्णा) १३ ५५ धृतविज्ञान (यजमानो जन) ६ ५१ १२ **भरद्वाजान्**=ये वाजानन्नादीन् भरन्ति तान् (उत्तमपुरुषान्) ६.४७ २५ **भरद्वाजाय**=भरन्त पुष्यन्त पुष्टिमन्तो वाजा वेगवन्तो योद्धारो यस्य तस्मै (सेनाध्यक्षाय) १ ११६ १८ धृतविज्ञानाऽन्नाय ६ १६ ३३ विज्ञानवत्रे (महाविदुषे जनाय) ६ ३१ ४. धृतविज्ञानाय (सज्जनाय) ६ १५ ३ **भरद्वाजाः**=धृतशुद्धविज्ञाना (भा०—सुभटा वीरा) ६ २५ ६ **भरद्वाजे**=विज्ञानादिधारके (व्यवहारे) ६.४८ ७ राज्यस्य पोषके पालके वा व्यवहारे ६ १७ १४ **भरद्वाजेषु**=ये भरन्ति ते भरत वज्यन्ते ज्ञायन्ते यैरते वाजा भरतश्च ते वाजाश्च तेषु पृथिव्यादिषु १ ५६ ७ ये वाजानन्नादीन् भरन्ति तेषु (परोपकारकेषु जनेषु) ६ १० ६ धृतविज्ञानेषु (विद्वज्जनेषु) ६ २३ १०. [भरतवाजपदयो समास। पूर्वपदस्यान्त्याकारलोपश्छान्दस। भरणाद् भारद्वाज नि० ३ १७ भरतमिति व्याख्यातम्। वाज अन्ननाम निघ० २ ७. वाज बलनाम निघ० २ ६ मनो वै भरद्वाज ऋषिरन्न वाजो यो वै मनो बिभर्त्ति सोऽन्न वाज भरति तस्मान्मनो भरद्वाज ऋषि श० ८ १ १ ६. भरद्वाजो ह वा ऋषीणामनूचानतमो दीर्घजीवितमस्तपस्वितम आस ऐ० आ० १ २ २ भरद्वाजो बृहदाचक्रे अग्ने ऐ० आ० ३ १ २ एष उ एव बिभ्रद्वाज प्रजा वै वाजस्ता एष बिभर्त्ति यद् बिभर्त्ति तस्माद् भरद्वाजस् तस्माद् भरद्वाज इत्याचक्षत एतम् (प्राणम्) एव सन्तम् ऐ० आ० २.२ २]

भरद्वाजवत् श्रोत्रवत् ६ ६५ ६ [भरद्वाजमिति व्याख्यातम्। ततस्तुल्यार्थे वति]

भरध्यै भर्त्तुम् ६ ६६ ३ [डुभृञ् धारणपोषणयो (जु०) धातोस्तुमर्थे अध्यैप्रत्यय]

भरन् धरन् (होता=आदातृजन) २१.३०
भरन्तम्=धरन्तम् (अग्नि=प्रसिद्ध विद्युत वा) ११ १३ **भरन्तः**=धरन्त पुष्णन्त (सिद्धिमन्तो राजप्रजाजना) ३ ३६ ७ धारयन्त (क्रियाकाण्डाऽनुष्ठातारो जना) ३ २२ [भृञ् भरणे (भ्वा०) धातो शतृ]

भरन्त यो भरति सर्व विश्व सर्वान् गुणास्तत्सम्बुद्धौ (जगदीश्वर) १ ७० ५ [भृञ् भरणे (भ्वा०) धातोर्गौणादिको बाहु० झच्। झस्यान्तादेश]

तत्र स्त्रिया टाप् । भद्रे-भन्दनीये भाजनवति वा कल्याणे मनसि स्यामेति नि० ११ १७. भद्रा=भाजनवती नि० १२ १६]

भद्रवाचः या भद्रा कल्याणकर्य्य सत्यभाषणान्विता वाचश्च ता ६ २८.६ [भद्रा-वाच्पदयो समास पूर्वपदस्य ह्रस्व]

भद्रवाच्याय भद्र वाच्य यस्मै तस्मै (मनुष्याय) २१ ६१ [भद्र-वाच्यपदयो समास]

भद्रवादी भद्र कल्याण वदितु शील यस्य स (उपदेशक) २ ४२ २ [भद्रोपपदे वद व्यक्ताया वाचि (भ्वा०) धातोस्ताच्छील्ये णिनि]

भद्रशोचे भद्रा भजनीया शोचिर्दीप्तिर्यस्य तत्सम्बुद्धौ (अग्ने=विद्वन् पुरुष) १२ २६ कल्याणदीपक (अग्ने=वह्निरिव विद्वज्जन) ७ १४ २ कल्याणप्रकाशक (राजन्) ५ ४ ७ [भद्रा-शोचिपदयो समास । शोचि =ज्वलतो नाम निघ० १ १७]

भद्रहस्ता भद्रकरणहस्ताविव गुणा ययोस्तौ (इन्द्राग्नी=विद्युद्भौतिकाग्नी) १ १०९ ४ [भद्र-हस्तपदयो समासे 'सुपा सुलुक्०' इत्याकारादेश]

भद्रा कल्याणकर्मकरौ (पाणी=बाहू) ४ २१.९ [भद्रप्राति० प्रथमाद्विवचनस्याकारश्छान्दस]

भद्रा भजनीयमुखप्रदानि (द्रविणानि=धनानि यशासि वा) ४ ५८ १० सेवनीयानि कल्याणकराणि (वस्त्राणि) ३ ३९ २ भद्राणि (नामानि) १ १२३ १२ कल्याणकारकाणि (तविषाणि=बलानि) १ १६६ ९ [भद्रप्राति० शेर्लोपश्छन्दसि]

भद्राणि कल्याणकराणि कर्म्माणि ७ २६ ४ **भद्रे**=सुखप्रदे (रात्रिदिने) १ ९५ ६ [भद्र व्याख्यातम् । तस्य नपुसके रूपम्]

भद्रेभिः कल्याणकारकैर्गुणै १ ४९ १ [भद्रप्राति० भिसि 'बहुल छन्दसि' इति ऐसादेशो न भवति]

भनक्ति शत्रुसेना मर्दयति ६ ६८ ६ [भञ्जो आमर्दने (रु०) धातोर्लट्]

भनति वदति ६ ११ ३ **भनन्त**=वदन्ति ४ १८ ७ भनन्तूपदिशन्तु ७ १८ ७ **भनन्ति**=शब्दयन्ति ४ १८ ६ [भण शब्दार्थे (भ्वा०) धातोर्लट् । 'भनन्त' प्रयोगे लड् व्यत्ययेनात्मनेपदञ्च । भनति अर्चतिकर्मा नि० ३ १४.]

भन्त्स्यामि बद्ध करिष्यामि २२ ४ [बन्ध बन्धने (क्र्या०) धातोर्लृट्]

भन्दते सुखयति ३ ३ ४ [भदि कल्याणे सुखे च (भ्वा०) धातोर्लट् । भन्दते अर्चतिकर्मा नि० ३.१४. भन्दते इति ज्वलतिकर्मा निघ० १ १६]

भन्ददिष्टये कल्याणसुखसङ्गतये (धीमते जनाय) ५ ८७.१ [भन्दद्-इष्टिपदयो समास । भन्दन्=भदि कल्याणे सुखे च (भ्वा०) धातोरौणा० अति । इष्टि = यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो क्तिन्]

भन्दनानाम् कल्याणाऽऽचरणानाम् (पत्नीनाम्) ८ ४८ [भदि कल्याणे सुखे च (भ्वा०) धातोर्ल्युट् । भन्दना भन्दतेः स्तुतिकर्मण नि० ५ २]

भन्दमानः कल्याण कुर्वाण (वैश्वानर=पावक) ३ २ १२ [भदि कल्याणे सुखे च (भ्वा०) धातो शानच्]

भन्दमाने सुखकारके (उषसौ=रात्र्यहनी) ३ ४ ६ कल्याणकारके (नक्तोषासा=रात्रिदिने) १ १४२ ७ [भदि कल्याणे सुखे च (भ्वा०) धातो शानच्]

भन्दिष्ठस्य अतिशयेन कल्याणाऽऽचरणस्य (नरस्य) ५ १ १० अतिशयेन कल्याणकारक (अग्नि=सेनापति) १ ९७ ३ [भदि कल्याणे सुखे च (भ्वा०) धातो कर्त्तरि तृजन्ताद् अतिशायन इष्ठन् । 'तुरिष्ठेमेयस्सु' इति तृचो लोप]

भयते बिभेति ४ १७ १० भय करोति ७ ५८ २ भय जनयति प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् व्यत्ययेनाऽऽत्मनेपदञ्च १ ५८ ५ कम्पते १ १६६ ५ **भयन्ते**=कम्पन्ते १ १६६ ४ बिभ्यति ४ ६ ५ [ञिभी भये (जु०) धातोर्लट् । 'बहुल छन्दसी' ति शप श्लुर्न भवति । व्यत्ययेनात्मनेपदञ्च]

भयमानः भय प्राप्नुवन् (राजपुरुष) प्र०—अत्र व्यत्ययेन शप् ३३ ७१ भय प्राप्त (इन्द्र=राजा) प्र०—अत्र व्यत्ययेन शानच् ३ ३० १० अधर्माचरणाद् भीत्वा पृथग् वर्त्तमानो दुष्टाना भयङ्कर (विद्वान् जन) १ १०० १७ [ञिभी भये (जु०) धातो शानच् । व्यत्ययेन शप् आत्मनेपदञ्च]

भयस्थे भये तिष्ठतीति तस्मिन् (स्थाने) २ ३० ६ [भयोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क]

भया भयानि ६ ६ ६ [भय-प्राति० शेर्लोपश्छन्दसि]

भये बिभेति यस्मात् तस्मिन् १.४० ८ [ञिभी भये (जु०) धातो 'एरच्' इत्यच्]

भर धर ४ २ १३ धेहि ३ ४५.४ सम्यग् धारय प्रदेहि १ ४ ७ समन्तात् पुष्णीहि ५ १६ ५ प्रापय १ ८१

५.१५. इन्द्रिय वै वीर्य भर्ग श० ७ ३.३ १ तच्छ्रीर्वै भर्ग जै० ३ २५८ वसन्त एव भर्ग गो० १ ५ १५]

भर्त्ति बिभर्ति प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १ १७३ ६ दधाति ६ १३ ३ [डुभृञ् धारणपोषणयो (जु०) धातोर्लट् । 'बहुल छन्दसीति' शपो लुक्]

भर्वति हिनस्ति १ १४३ ५ [भर्व हिंसायाम् (भ्वा०) धातोर्लट् । भर्वति-अत्तिकर्मा निघ० २ ८]

भर्वन् भर्जन दहन कुर्वन् (अग्नि =पावक) ६.६.२ [भर्व हिसायाम् (भ्वा०) धातो शतृ]

भर्षत् बिभर्ति ६ ३८.१ [डुभृञ् धारणपोषणयो (जु०) धातोर्लेट् । सिप् विकरण]

भलानसः भला परिभाषणीया नासिका येषा ते (आर्या राजजना) ७ १८ ७. [भला-नासिकापदयो समासे नासिकाया नसादेश । भला=भल परिभाषणहिंसादानेषु (भ्वा०) धातो रूपम्]

भव भवसि प्र०—अत्र लडर्थे लोट् ३ २४ भवतु प्र०—अत्र पुरुषव्यत्यय ३६.१३. निवर्त्तस्व १ ५१ ८. भव भवति वा ११२८ सम्पद्यस्व ४ १३ निष्पद्यस्व ४ १७ होवे स० प्र० १८३, अथर्व० ६ १० ९८ १ **भवत**=स्त १ २३ १६ नित्य सम्पद्येरन् ४ १२ **भवतम्**=स्यातम् ५ ३ भवेतम् ५ ३ भवत, प्र०—अत्र लडर्थे लोट् १ ३४ १२ **भवति**=वर्त्तते १ १७ ५ होता है स० प्र० १०६, ३ ८४ **भवतु**=आप तत्पर होवो आर्याभि० १ ३२, ऋ० १ ७ १० १५ **भवथः**=भवतम् १ ११२ २० **भवन्तु**=भावयतु [प्रयच्छन्तु प० वि० **भवाति**=भवतु ६ २० भवेत् ४ १६ १७ **भवाथः**= तुम दोनो हूजिये स० वि० १३६, अथर्व० १४ २ ३७ **भवासि**=भवे २ ४२ १ [भू सत्तायाम् (भ्वा०) धातोर्लोटि लटि लेटि च रूपाणि]

भवतः वर्त्तमानस्य (कार्यकारणजगत) १.६६ ७ **भवन्तम्**=सन्त जगदीश्वर सभाद्यध्यक्ष वा १ ६७ ४ [भू सत्तायाम् (भ्वा०) धातो शतृ]

भवतात् भवेत् ३ २३ २ [भू सत्तायाम् (भ्वा०) धातोर्लोटि मध्यमपुरुषे 'तुह्योस्तातङ्०' इति तातङ्]

भवन्ती वर्त्तमाना (विद्युत्) १ १६४ २६ **भवन्तीः**= वर्त्तमाना (सुयमा प्रजा) ३ ७ ३ वर्त्तमाना होती हुई (युवतय.=स्त्रिया) स० प्र० ११०, ३ ५५ १६ [भू सत्तायाम् (भ्वा०) धातो शत्रन्तात् ङीप्]

भवम् य सर्वत्र भवति तम् (देव=परमात्मानम्) ३९.८ **भवस्य**=ससारस्य १६ १८ य प्रशसितो भवति तस्य (जनस्य) ३९.६ **भवाय**=यः शुभगुणादिषु भवति तस्मै (जनाय) १६ २८. **भवाः**=वर्त्तमाना (रुद्रा =जीवा वायवश्च) १६.५५ [भू सत्तायाम् (भ्वा०) धातोरच् । 'ऋदोरप्' इति वा अप् । पर्जन्यो वै भव पर्जन्याद्धीद सर्व भवति श० ६ १.३ १५ एतान्यष्टौ (रुद्र, सर्व (शर्व) पशुपति, उग्र, अशनि, भव, महान्देव, ईशान) अग्निरूपाणि । कुमारो नवम श० ६ १.३ १८. यद्भव आपस्तेन अग्निर्वै स देवस्तस्यैतानि नामानि, शर्व इति यथा प्राच्या आचक्षते भव इति यथा वाहीका पशूना पती रुद्राऽग्निरिति श० १.७ ३ ८]

भवित्रम् भवितव्यम् (शम्=आनन्दम्) ७ ३५.६ [भू सत्तायाम् (भ्वा०) धातोरौणादिको बहुलवचनाद् इत्र]

भविष्यत् यदुत्पत्स्यमान भावि (वस्तुजातम्) ३४४ आगामि (अनुष्ठानम्) १८ ११ [भू सत्तायाम (भ्वा०) धातोर्लृट शतृ । असौ (द्युलोक) भविष्यन् तै० ३ १८ ६ उदकनाम निघ० १ १२.]

भवीत्वा भव्यानि (भुवनानि) २ २४ ५

भवीयसा यदतिशयित भवति तेन (वसुना=धनेन) १ ८३ १. [भव-प्राति० अतिशायन ईयसुन्]

भव्यस्य आगामिसमयस्य १२ ११७ **भव्याय**=यो विद्याग्रहणेच्छुर्भवति, तस्मै (जनाय) १ १२९ ९ [भू सत्तायाम् (भ्वा०) धातोर्यत् । परिमित वै भूतमपरिमित भव्यम् ऐ० ४.६]

भषम् परिभाषकम् (पुरुषम्) भा०—सवादादिव्यवहारम् ३० १९ [भष भर्त्सने (भ्वा०) धातोरच्]

भसत् दीपनम् २५ ८ भगेन्द्रियम् २० ९ [भस भर्त्सनदीप्त्यो (जु०) धातोरौणादिकोऽति]

भसत् भासयति ६ ३ ४ प्रकाशेत ६ १४ १ [भस भर्त्सनदीप्त्यो (जु०) धातोर्लेट्]

भसथः व्यर्थ वाद वदत ६ ५९ ४ [भसथ इति अत्तिकर्मा निघ० २ ८ भसथ अत्तीथ नि० ५ २२]

भस्म प्रदीपक तेज १२ ३५ दग्धदोष (विद्वान् जन) १२ ४६ **भस्मना**=दग्धेन (शरीरेण) १२ ३८ दग्धशेषेण निस्सारेण (वस्तुना) २५ ८ [भस भर्त्सनदीप्त्यो (जु०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्]

भस्मन् भस्मन्यभ्रे प्र०—अत्र सप्तमी-लुक् १३ ५३ [भस्मन् -इति व्याख्यातम् ।- तत 'सुपा सुलुग्०' इति सप्तम्या लुक्]

भरन्ति हरन्ति ३ ३ ३८ **भराम**=हरेम प्र०—अत्र हस्य भत्वम् १ ६४ ४ [हृञ् हरणे (भ्वा०) धातोर्लट् अन्यत्र लोट्। 'हृग्रहोर्भश्छन्दसीति' हस्य भकार]

भरन्ती धरन्ती (गौ =पृथिवी) ३ ३१ ११ धरन्ती पोषयन्ती वा (रात्रि) ३ ६ १ [भृञ् भरणे (भ्वा०) धातो शत्रन्तान् ङीप्। भरन्ती हरन्ती नि० ११ ३६]

भरम् पालनम् ५ २६ ८ पोषणम् १ ११७ १८ **भराय**=धारकाय (राज्ञे) ४ २१ ७ पालनाय ६ २३ ६ भरणीयसङ्ग्रामाय ३ ५१ ८ **भरे**=देवाऽसुर-विद्वदविद्वत्सङ्ग्रामे ३ ४३ ८ पालनीये राज्ये ३ ३८ १० भरणीये ससारे ३ ३६ ६ बिभ्रति वनानि यस्मिँस्तस्मिन् (वाजसातौ=सङ्ग्रामे) ३ ३० २ भर्त्तव्ये राज्ये ३ ४८ ५ मूर्ख-विद्वदज्ञान-ज्ञानविषयविरोधरूपे युद्धे ३ ३४ ११ **भरेषु**=पालनपोषणनिमित्तेषु पदार्थेषु १ १०० १ [डुभृञ् धारणपोषणयो (जु०) धातोरप्। भर इति सग्रामनाम भरतेर्वा हरतेर्वा नि० ४ २४ भरे सग्रामनाम निघ० २ १७]

भरमाणाः विद्या धरन्त (विद्यार्थिजना) ७ २ ४ धरमाणा (गृहपतय) ८ १ - [भृञ् भरणे (भ्वा०) धातो शानच्]

भरहूतये भराणा पालकाना हूतये स्पर्द्धायै १ १२९ २ भरा पालिका धारिका हूत यस्यास्तस्यै (विशे=प्रजायै) ५ ४८ ४ **भरहूतौ**=भरे सङ्ग्रामे हूति राह्वान तत्र ३ ३ ५० [भर-हूतिपदयो समास । भरमिति व्याख्यातम्। हूति =ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो स्त्रिया क्तिन्]

भरामसि भरेम १२ १०४ भराम ६ १६.४७ स्वीकार करते है स० वि० १६६, अथर्व० ६ २ ३ [भृञ् भरणे (भ्वा०) धातोर्लट्। 'इदन्तो मसि' इति मस इदन्तत्वम्]

भरित्रैः धृतै पोषितै साधनै ३ ३६ ७. [डुभृञ् धारणपोषणयो (जु०) धातोरौणादिको बाहु० इत्र्। भरित्रे इति बाहुनाम नि० २ ४]

भरिभ्रत् भृश धरन् (अग्नि) २ ४ ४ अत्यन्त धरन् पुष्यन् (अग्नि =कारणाख्य ईश्वर) १२ २४ [डुभृञ् धारणपोषणयो (जु०) धातोर्यङ्लुगन्ताच्छतृ। दाधर्त्तिदर्द्धर्त्ति० अ० ७ ४ ६५ सूत्रेण 'भृञामिदि' तीत्त्वजश्त्वाऽभावोऽभ्यासस्य रिगागमश्च निपात्यते]

भरिषः धारणपोषणचतुर (राजा) ४ ४० २ [डुभृञ् धारणपोषणयो (जु०) धातोरौणादिको बाहु० इसन्]

भरिष्यन्ती सर्वान् पालयन्तौ (अ०—स्त्रीपुरुषौ) ११ ३१ [डुभृञ् धारणपोषणयो (जु०) धातोर्लृट शत्रन्तान् ङीप्]

भरीमभिः धारणपोषणाद्यै कर्म्मभि १३ ३२ धारणपोषणादिगुणयुक्तैर्व्यवहारैर्वा पदार्थै सह ८ ३२ धारणपोषणकरैर्गुणै प्र०—अत्र भृञ् धातोर्मनिन् प्रत्ययो 'बहुल छन्दसि' इतीडागम १ २२ १३ [डुभृञ् धारणपोषणयो. (जु०) धातोर्मनिन्। छन्दसीडागम]

भरे भरे धर्त्तव्ये धर्त्तव्ये पदार्थे युद्धे युद्धे वा ११०० २ सङ्ग्रामे सङ्ग्रामे ५ ४३.२ [भरे पदस्य वीप्साया द्वित्वम्। भरमिति व्याख्यातम्]

भरेषुजाम् बिभ्रति राज्य यैस्ते भरा, भराश्च ते इषवस्तान् भरेषून् जनयति तम् (सेनाद्यध्यक्षम्) प्र०—अत्र विट् प्रत्यय अनुनासिकस्याऽऽत्व च १ ६१.२१ भरेषु भरणीयेषु सङ्ग्रामेषु जेतारम् (राजान सेनापतिं वा) ३४ २० [भर-इषुपदयो समासे कृते तदुपपदे जनी प्रादुर्भावे (दिवा०) धातोर्विट्। 'विड्वनोरनुनासिकस्यादि' त्यात्त्वम्]

भर्गः भृज्जन्ति पापानि दु खमूलानि येन तत् (ईश्वरस्वरूपम्) प्र०—'अञ्च्यञ्जियुजि०' उ० ४ २१६ इति भ्रस्ज-धातोरसुन्प्रत्यय कवर्गादेशश्च ३ ३५ सर्वदु खप्रणाशक तेज स्वरूपम् ३६ ३ भृज्जन्ति दु खानि यस्मात्तत् (स्वरूपम्) ३० २ शुद्ध तेज ११४११ यन्निरुपद्रव, निष्पाप, निर्गुण, शुद्ध, सकलदोषरहित, पक्व, परमार्थविज्ञानस्वरूपम् प० वि० सर्वदोषप्रदाहकम् (ईश्वरस्वरूपम्) २२ ६ सब क्लेशो को भस्म करने वाला शुद्ध-स्वरूप स० वि० ७५, ३६ ३ पवित्र करने वाला चेतन ब्रह्म-स्वरूप स० प्र० ५१, ३६ ३ [भृजी पाके (भ्वा०) धातोर् 'अञ्च्यञ्जियुजिभृजिभ्य कुश्च' उ० ४२१६ सूत्रेण असुन् कुत्वञ्च। घञ्प्रत्यये वा कुत्वम्। अय वै (पृथिवी) लोको भर्ग श० १२ ३ ४ ७ ऋग्वेदो वै भर्ग श० १२ ३ ४ ६ होतैव भर्ग गो० पू० ५ १५ अग्निर्वै भर्ग श० १२ ३ ४ ८ वसव एव भर्ग गो० पू० ५ १५ वाग्वै भर्ग श० १२ ३ ४ १० वसन्तो भर्ग गो० पू० ५ १५ गायत्र्येव भर्ग गो० पू० ५ १५ प्राच्येव भर्ग गो० पू० ५ १५ आदित्यो वै भर्ग जै० उ० ४ २८ २ चन्द्रमा वै भर्ग जै० उ० ४ २८.२ भर्गो देवस्य कवयो अन्नमाहु गो० पू० १ ३२ वीर्यं वै भर्ग एष विष्णुर्यज्ञ श० ५ ४ ५ १ त्रिवृदेव भर्ग. गो० पू०

भान्तः प्रकोश १४ २३. [भा दीप्तौ (अदा०) धातो-रौणादिको बहुलवचनाद् झच् । भान्त पञ्चदश (यजु० १४ २३) वज्रो वै भान्तो वज्र पञ्चदशोऽथो चन्द्रमा वै भान्त पञ्चदश स च पञ्चदशाहान्यापूर्यते पञ्चदशा-पक्षीयते तद् यत्तमाह भान्त इति भाति इति चन्द्रमा. श० ८ ४ १ १०]

भामम् तेज ३ २६ ६ क्रोधम् २१ ३६ **भामः**=क्रोध १८ ४ भाति येन स (स्वराट्=वृद्धि) २० ६ [भाम क्रोधे (भ्वा०) धातोर्घञ् । अथवा भा दीप्तौ (अदा०) धातोरौणा० मन् । भाम क्रोधनाम निघ० २ १३]

भामासः क्रोधा ६ ६ ३ [भाममिति व्याख्यातम् । ततो जसोऽसुक्]

भामितः क्रुद्ध सन् (रुद्र =राजपुरुष) १ ११४ ८ पापाऽनुष्ठानेनाऽस्माभि क्रोधित (रुद्र =राजपुरुष) प० वि० [भाम क्रोधे (भ्वा०) धातो क्त । भामते क्रुध्यति-कर्मा निघ० २ १२.]

भामिनः क्रुद्धान् (वीरान् शत्रून्) १६ १६ शत्रूणा-मुपरि क्रोधकारिण (मयोभून्=सुवीरान् जनान्) १ ८४ १६ **भामिने**=प्रशस्तो भाम क्रोधो विद्यते यस्य तस्मै (विद्वज्जनाय) १.७७.१ [भामप्राति० भूम्न्यर्थे प्रशसाया वा। इन् भाम क्रोधनाम निघ० २ १३ भामिन = भानुमत नि० १३ ३८]

भायै दीप्त्यै ३० १२ [भाप्राति० चतुर्थी । भा दीप्तौ (अदा०) धातो क्विप्]

भारत धर्त्त (अग्ने=विद्वज्जन) ६ १६ ४५ धारक (अग्ने=विद्वज्जन) २ ७ १ **भारतम्**=भारत्या वाचोऽय वेत्ता धर्त्ता वा तम् (जन=प्रसिद्ध मनुष्या-दिकम्) ३ ५३ १२ **भारतः**=धारकस्याऽय धर्त्ता (अग्नि-रिवोत्तमजन) ४ २५ ४ धर्त्ता पोपको वा (अग्नि = सूर्य) ६ १६ १६ [डुभृञ् धारणपोषणयो (जु०) धातो-रौणा० अतच् णिच्च बहुलवचनात् । बिभर्त्तर्वाऽतच्-प्रत्यये भरत । तत इदमर्थेऽण् । भारतीप्राति० वा अध्येतृ-वेदित्रोरण् 'तस्येदम्' इत्यर्थे वा एष (अग्नि) उ वा ऽइमा प्रजा प्राणो भूत्वा बिभर्त्ति तस्माद्वेवाह भारतेति श० १ ४ २ २]

भारता धारकपोपकौ (शिल्पविद्याऽध्येत्रध्यापकौ) २ २३ २ [भारत इति व्याख्यातम् । ततो प्रथमाद्विवचन-स्याकार छान्दस]

भारति सकलविद्याधारिके (विदुपि कन्ये) १ ८८ ८. **भारती**=विद्याशिक्षायुता वाक् ३ ४ ८. सुष्ठु विद्याया धारिका पोपिका वा वाणी भा०—योगधारणायुक्ता वाक् २८ ८ सर्वविद्याधर्त्री सर्वथा पोपिका (भा०—वाणी) २६ ८. शिल्पविद्याधारिका क्रिया २६ ३३. नद्य शास्त्राणि धृत्वा सर्वस्य पालिका वागिव विदुषी (स्त्री) ७ २ ८ धारिका माता भा०—धी २०.६३ धारणपोपणकर्त्री (देवी=देदीप्यमाना शक्ति) २० ४३ शुभान् गुणान् धरन्ती (उपदेशिका स्त्री) २ ३ ८. सकलविद्या भरन्ती वाणी ३ ६२.३ धारणावती प्रज्ञा २१ ३७ सर्वशास्त्रधारिणी (भा०—सत्यव्यवहारधर्त्री वाणी २७ १६ धारणपोपण-कर्त्री (विद्यावाणी) १.१४२.६. **भारतीभिः**=सुशिक्षिताभि-र्वाणीभि ३.४ ८. **भारतीम्**=यो यया शुभैर्गुणैर्बिभर्त्ति पृथिव्यादिस्थान् प्राणिन स भरत. तस्येमा भारतीम् (धिषणा=वाचम्) प्र०—भरत आदित्यस्तस्य भा इळा नि० ८ १३, १ २२ १० **भारतीः**=धारिका. (देवी = वाच) २८.३१ [भारतीति वाङ्नाम निघ० १ ११ भरत आदित्यस्तस्य भा इळा नि० ८.१३ डुभृञ्धातो-रौणा० अतच्प्रत्यये भरत । तत इदमर्थेऽण् । तत स्त्रिया ङीप्]

भारद्वाजः धृतविज्ञान (होता=होतृजन) ६ ५१.१२ [भरणाद् भारद्वाज नि० ३ १७]

भारम् पोपम् १ १५२ ३ **भारान्**=पञ्चतत्त्वानि महत्तत्त्वञ्च ३.५६ २ [डुभृञ् धारणपोपणयो (जु०) धातोर्घञ् । राष्ट्रं वै भार तै० ३ ६ ७ १ श्रीर्वै राष्ट्रस्य भार श० १३ २ ६ ३]

भारहारः डाली पत्ते फल फूल अन्य पशु और धान्य आदि भार का उठाने वाला (स्थाणु =वृक्ष) स० प्र० समु० ३, नि० १ १८. [भारोपपदे हृञ् हरणे (भ्वा०) धातोरण्]

भारि ध्रियते प्र०—अत्र लडर्थे लुङ् भृञ् धातोश्चिणि परेऽडभावो 'बहुल छन्दस्यमाङ्योगेऽपि' इत्यनेन सूत्रेण ६ ३ [डुभृञ् धारणपोषणयो (जु०) धातो कर्मणि लुङि अडभावे च रूपम्]

भार्वरस्य प्रजाभर्त्तृ-राज्ञ ४ २१.७ [डुभृञ् धारण-पोपणयो (जु०) धातोरौणा० ष्वरच् । बहुलवचनाद् वृद्धिश्च]

भाव्यम् उत्पत्स्यमानम् (जगत्) ऋ० भू० १२०, ३१.२ **भाव्यस्य**=भवितु योग्यस्य (विदुषो जनस्य) १ १२६ १ [भू सत्तायाम् (भ्वा०) धातोर्ण्यत् । भाव्यस्य भावयव्यस्य नि० ६ १०]

भस्मसा कृत्स्नं भस्मेति भस्मसा प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति तलोप १ १ ८० [भस्मन्-प्राति० कात्स्न्र्ये साति । तलोपश्छान्दस]

भस्मान्तम् भस्म अन्ते यस्य तत् (शरीरम्) ४० १५. भस्म-करने पर्यन्त (शरीर) स० वि० २१८, ४० १५ [भस्म-अन्तपदयो समास]

भाऋजीकम् भासु दीप्तिसु सरलम् (अग्निं=पावकम्) ३ १ १४ भाति प्रकाशयति या सा भा सभाकान्तिर्वा, ता योऽर्जयते तम् (दूतम्) १ ४४ ३ **भाऋजीकः**=भाभिर्विद्या-दीप्तिभिर्ऋजु सरल (सुशिक्षको जन) ३ १ १२ [भा-ऋजीकपदयो समास । भा=भा दीप्तौ (अदा०) धातो क्विप् । ऋजीकम्=ऋज गतिस्थानार्जनोपार्जनेषु (भ्वा०) धातो 'ऋजेश्च' उ० ४ २२ सूत्रेण ईकन् किच्च । भाऋ-जीक =प्रसिद्धभा नि० ६ ४]

भाक् भजति ७ १८ १३ [भज सेवायाम् (भ्वा०) धातोर्लुङ् अडभावो लेर्लुक् च छान्दस]

भागदाः अशप्रदा (राजभृत्या) १७ ५१ [भागो-पपदे डुदाञ् दाने (जु०) धातो क]

भागदुघम् यो भागान् दोग्धि प्रपिपर्त्ति तम् (विद्वासम्) ३० १३. [भागोपपदे दुह प्रपूरणे (अदा०) धातो 'दुह कप् घश्च' अ० ३ २ ७० सूत्रेण कप् घकारश्चान्तादेश]

भागधेयम् भाग्यम् ३ २८ ४ [भागप्राति० स्वार्थे 'भागरूपनामभ्यो धेय' अ० ५ ४ २५ वा० सूत्रेण धेय]

भागधेयी विभागविज्ञानयुक्ता (ब्रह्मचारिण्य कन्या) प्र०—नामरूपभागेभ्य स्वार्थे धेय प्रत्यय अ० भा० वा० ५ ४ ३६ 'केवलमामकभागधेय०' अ० ४ १ ३० इत्यादिना ङीप् ६ २४ [भागधेयमिति व्याख्यातम् । तत 'केवलमामक०' इति स्त्रिया ङीप्]

भागम् भजनीयम् (स्थानम्) १ १२३ ३ सेवनीयम् (परमात्मानम्) १७ १३ भागाना धनाना ज्ञानाना वा भाज-नम् (ईश्वरम्) ११ शुभगुणभाजन यज्ञम् १ ४ सेवनम् ६ ६ भगानामिमम् (धनम्) ५ ८२ ३ भागसमूहम् १ ७३ ५ **भागस्य**=भजनीयस्य (सज्जनस्य) २ ३६ ४ **भागः**= सेवितु योग्य (भजनीयो न्याय) ६ ३५ सेवनीयोऽश, स्वीकर्त्तुमर्हो वा (होतव्य पदार्थ) ४ २४ ऐश्वर्यसङ्घात १८ ८ भजनीयोऽविस्तार १ १८३ ४ विभजनीय (सवत्सर) १४ २४ भा०—प्रिय (विद्वज्जन) १४ २५ **भागे**=सेवने १ १५६ ५ [भज सेवायाम् (भ्वा०) धातोर्घञ् । अथवा भग-प्राति० 'तस्येदम्' इत्यर्थे समूहार्थे वा अण्]

भाजयत सेवयत ३६ १५ [भज सेवायाम् (भ्वा०) धातोर्णिजन्ताल्लोट्]

भाजयुः अर्थिप्रत्यर्थिना न्यायव्यवस्थया विभाजयिता (अ०—राजा) २ १ ४ [भाज पृथक्कर्मणि (चु०) धातो-रौणादिके उप्रत्यये छान्दस रूपम् । भाज-प्राति० वा इच्छा-यामर्थे क्यजन्ताद् उ । भाज =भाज पृथक्कर्मणि (चु०) धातोर्घञर्थे क]

भाति प्रकाशते प्रकाशयति वा ५ ४४ १२ **भासि**= प्रकाशयसि ३३ ३६ **भाहि**=विविधतया प्रकाशते प्रकाश-यति वा १ ६५ ११ प्रकाशय १ ६६ ६ [भा दीप्तौ (अदा०) धातोर्लट् । अन्यत्र लोट् । आभाति आभासयति नि० ७ २३]

भात्वक्षसः भा विद्याप्रकाशस्त्वक्ष बल यासा ता (सिन्धव =प्रवाहरूपा विद्याप्रकाशा) प्र०—त्वक्ष इति बल-नाम निघ० २ ६, १ १४३ ३ [भा-त्वक्षस्पदयो समास । त्वक्ष बलनाम निघ० २ ६]

भानवः सूर्यस्य किरणा १ ६२ २ दीप्तय ५ १ १ प्रदीप्ता किरणा १ ६७ ५ किरणदीप्तय ३ १ १४ **भानवे**=विद्याप्रकाशाय ७ ४ १ प्रकाशाय ५ १६ १ **भानुना**=किरणेन ६ ४८ ६ दीप्त्या १७ १० तेजसा ३ २१ ४ प्रकाशेन २ ८ ४ किरणसमूहेन १२ २१ सूर्येण १ ४८ ६ प्रदीप्त्या २ १६ ४ सदर्थप्रकाशकत्वेन १ ४८ १५ धर्मप्रकाशेन १२ १०७ **भानुभिः**=दिवसै १ ८७ ६ विद्या-प्रकाशकैर्गुणै १२ ३२ **भानुम्**=कान्तम् (पेश =रूपम्) १ ६२ ५ सूर्यम् १ ६२ २ सूर्यदीप्तिम् १ ६२ १ प्रकाशकम् (सूर्यम्) ६ ६२ २ प्रकाशयुक्तम् (राजानम्) ७ ३ ६ विद्या-विनयदीप्तिमन्तम् (राजानम्) ७ ६ २ किरणम् ४ १३ २ कान्तिम् १ ६२ ५ **भानुः**=किरणयुक्त सूर्य ७ ३४ ७. दीप्ति ५ ५२ ६ प्रकाशमान (अ०—सूर्य) ४ १ १७ प्रभाकर (सूर्य) १२ ४८ दीप्तिमान् (अर्णव =समुद्र) ३ २२ २ [भा दीप्तौ (अदा०) धातो 'दाभाभ्या नु' उ० ३ ३२ सूत्रेण नु । भानुरिति अहर्नाम निघ० १ ६ भानुम्=भानुना निघ० १२ ७ अजस्रेण भानुना दीद्यत-मित्यजस्रेणार्चिषा दीप्यमानमित्येतत् श० ६ ४ १ २. भानुना भात्यन्त तै० स० ४ २ १ २]

भानुमद्भिः बहवो भानव किरणा विद्यन्ते येषु तै (अर्कै =वज्रवच्छेदकै किरणै) ६ ४ ६ **भानुमन्तम्**= दीप्तिमन्तम् (रथम्) ५ १ ११ **भानुमः**=भानुवन् (अग्ने=विद्वज्जन) ५ १ ११ [भानुप्राति० भूम्न्यर्थे मतुप् । 'भानुम' प्रयोगे 'मतुवसो रु छन्दसि' इति रुत्वम्]

भिषजा औषधानि २७.६. चिकित्सकौ २८.७. वैद्यकशास्त्रविदौ (जनौ) १६.८२. आयुर्वेदविदौ (विद्वज्जनौ) १६.१२. सद्वैद्यवद्रोगौ (अश्विना=सिद्धसाधकौ विद्वांसौ) १६.६३. सद्वैद्यौ (स्त्रीपुरुषौ) २०.५७. शरीरात्मरोगनिवारकौ (चिकित्सकोपदेशकौ) २०.७५ वैद्यकविद्यावेत्तारौ (अश्विना=स्त्रीपुरुषौ) २०.५६ वैद्यवद्रोगापहारकौ (अश्विना=अग्निवायू) २१.३६. रोगनिवारकौ (अश्विनौ=अध्यापकोपदेशकौ) १.१५७.६. (भिषज् चिकित्सायाम् (कण्ड्वा०) धातो क्विप्। ततः सेर्लोपश्छन्दसि। प्रथमाद्विवचनस्याकारादेशश्छन्दसि। अपूतो ह्येषोऽमेध्यो यो भिषक् तै० स० ६.४.९.१.]

भिषज्यतः चिकित्सा कुरुत भा०—रोगान् निवारयत २८.७. [भिषज् चिकित्सायाम् (कण्ड्वा०) धातोर्लट्]

भिषज्यन् चिकित्सां कुर्वन् (सविता=सद्वैद्य) १६.८५. चिकित्सन् सन् भा०—औषधानि दत्वाऽरोगयन् (वैद्यो जनः) १६.८० [भिषज् चिकित्सायाम् (कण्ड्वा०) धातो शतृ]

भीतः भय प्राप्त (कपोत) १.३२.१४ **भीताय**—प्राप्तभयाय (जनाय) ५.७८.६ [ञिभी भये (जु०) धातो क्त]

भीमम् भयङ्करम् (राजानम्) २१.३६ **भीमः**=दुष्टान् प्रति भयङ्कर, श्रेष्ठान् प्रति सुखकर (सभाध्यक्ष) १.५५.१. बिभेति यस्मात् स, भा०—भयप्रद, भय प्राप्त (मरण प्राप्तौ जीव) ३१.७. बिभेत्यस्मात् स (काल.) १.६५.७. बिभ्यति जीवा अस्मादिति व्याघ्र प्र०—'भीमादयोऽपादाने' इति निपातनात् ५.२०. न्याय-आज्ञा को छोडने वालों पर भय देने वाला (ईश्वर) आर्याभि० १.३४, ऋ० १.७.१०.१२. **भीमाय**=बिभेति यस्मात्तस्मै भयङ्कराय (जनाय) १६.४०. [ञिभी भये (जु०) धातोः 'भियः षुग् वा' उ० १.१४८. सूत्रेण मक्। 'भीमादयोऽपादाने' अ० ३.४.७४. सूत्रेणापादाने निपात्यते]

भीमयुः यो भीमं भयङ्कर योद्धार याति स (वीरजन) ५.५६.३. [भीमोपपदे या प्रापणे (अदा०) धातो. 'मृगय्वादयश्च' उ० १.३७. सूत्रेण कु]

भीमलम् यो भीमान् भयङ्करान् लात्याददाति तम् (दुर्जनम्) ३०.६. [भीमोपपदे ला आदाने (अदा०) धातो. कर्त्तरि क.]

भीमसंदृशः भीम भयङ्करं सन्दृग् दर्शनं येषा ते (जना.) ५.५६.२. [भीम-सदृशूपदयो समासः। सदृग्=सम्+दृशिर् प्रेक्षणे (भ्वा०) धातो क्विन्]

भीमा बिभेति यस्मात् सा (सेना) ६.१८.१० भयङ्करी (धी=प्रज्ञा) ६.३.३ [भीम-प्राति० स्त्रिया टाप्। भीममिति व्याख्यातम्]

भीमासः बिभ्यति येभ्यस्ते (दुर्जना) ७.५८.२ [भीममिति व्याख्यातम्। ततो जसोऽसुक्]

भीरवे भयस्वभावाय (प्रजाजनाय) २.२८.१० **भीरुभिः**—कातरै (मनुष्यै) १.१०१.६ [ञिभी भये (जु०) धातोरस्ताच्छील्ये 'भिय. क्रुक्लुकनौ' अ० ३.२.१७४ सूत्रेण क्रुः]

भीषा भयेन १.१३३.६. [ञिभी भये (जु०) धातो सम्पदादित्वात् क्विप्। षुगागमश्छान्दस]

भुज पालय १६.११ **भुजेम**=अभ्यवहरेम ४.३.१६ पालयेम ५.७०.४ [भुज पालनाभ्यवहारयो (रुधा०) धातोर्लोट्। अन्यत्र लिङ्। व्यत्ययेन श]

भुजन्ता पालकौ (विद्युत्पवनौ) ६.६२.६ [भुज पालनाभ्यवहारयो (रुधा०) धातो शतृ। व्यत्ययेन श]

भुजम् भोक्तव्या प्रजाम् १.१०४.६ यो भुनक्ति तम् (रयिम्) ५.२०.१ पालिकाम् (समिधम्) ३.२.६ **भुजः**=भोगक्रिया ५.७४.१०. **भुजे**=भोगाय ५.७३.२ पालनाय १.१२७.११ शरीर विद्यानन्दभोगाय १.१२७.८ भुज्यते य. स भुक् तस्मै (सुखाय) प्र०—अत्र 'कृतो बहुलम्०' इति कर्मणि क्विप् १.३०.२०. [भुज पालनाभ्यवहारयो (रुधा०) धातो 'कृतो बहुलमिति' वा० सूत्रेण क्विप्। प्राणो वै भुज. श० ७.५.१.२१]

भुज्म सुखाना भोजयिता (गिरि) १.६५.३ पालक सुखभोक्तार वा (पुरुषम्) १.११६.३. [भुज पालनाभ्यवहारयो (रुधा०) धातोरौणादिको मक्]

भुज्युम् भोक्तारम् (जनम्) ४.२७.४. भोगमर्हम् १.११६.४. भोक्तु योग्यमानन्दम् ६.६२.६ राज्यपालक सुखभोक्तार वा (नौयायिन जनम्) १.११६.३ शरीराऽऽत्मपालक पदार्थसमूहम् १.११७.१४. सुखस्य भोक्तार पालक वा (सभाध्यक्षादिराजपुरुषम्) १.११२.२० भोगसमूहम् १.११६.५. पालनभोगमय धनादिपदार्थभोगम् ऋ० भू० १८६, अथर्व० १.८.८.३ **भुज्युः**=भुज्यते सुखानि यस्मात् स (यज्ञ=भा०—अग्निहोत्रादि) १८.४२ [भुज पालनाभ्यवहारयो. (रुधा०) धातो 'भुजिमृङ्भ्या युक्त्युकौ' उ० ३.२१. सूत्रेण युक्। यज्ञो वै भुज्युर्यज्ञो हि सर्वाणि भूतानि भुनक्ति श० ६.४.१.११]

भासदौ यौ भास प्रकाश दद्याता तौ (कुञ्चौ=पक्षिविशेषौ) २५ ६. [भासोपपदे डुदाञ् दाने (जु०) धातो. क]

भासन् प्रकाशक सन् (ज्योतिष्मान् सूर्य) १२ ३२ [भासृ दीप्तौ (भ्वा०) धातो शतृ। व्यत्ययेन परस्मैपदम्]

भासः प्रकाशमानाया (विद्याया) ४ ३३.४. दीप्ती ६ १२ ५ **भासा**=प्रकाशेन ११ ४१. स्वकीयप्रकाशेन ७ ५ ४. दीप्त्या ६ १ ११ **भासे**=विज्ञानाय १३.३६ **भाः**=यो भाति प्रकाशयति स. (सूर्य) १ ४६ १० यो भाति प्रकाशते स (परमात्मा सभाध्यक्ष प्रजापुरुषो वा) ४ २५ या भान्ति प्रकाशयन्ति ता (क्रिया) १ ४५ ८ प्रकाशमान (अर्चि'=विद्युत्तेज.) ४.७ ६. प्रकाश १२.३४. [भासृ दीप्तौ (भ्वा०) धातो 'भ्राजभास०' अ० ३ २.१७७ सूत्रेण ताच्छीलिक कर्त्तरि क्विप्। श्रीर्वै भा जै० उ० १ १ ४ १]

भासांसि प्रकाशान् ६ ४ ३ [भास् इति व्याख्यानम्। तस्य नपुंसके रूपम्]

भाषथाः वदे. ४३.२३ [भाष व्यक्तायां वाचि (भ्वा०) धातोर्लङि अटोऽभावे रूपम्]

भास्वती दीप्तिमती (उषा) १ ६२ ७. प्रशस्ता भा कीर्तिर्विद्यते यस्या सा (उषा) १ ११३ ४ **भास्वतीम्**=देदीप्यमानाम् (स्त्रीम्) १५ ६३ [भास् इति व्याख्यातम्। तत प्रशंसायामर्थे मतुबन्तात् स्त्रिया ङीप्। भास्वतीति उषो नाम निघ० १ ८. भास्वत्य नदीनाम निघ० १ १३]

भिक्षते याचते ७ ३२ १७ **भिक्षन्त**=याचन्ते ३ ५६ ७ **भिक्षे**=याचे १ १७१ १ **भिक्षेत**=याचेत १ १५२ ६ [भिक्ष भिक्षायाम् अलाभे लाभे च (भ्वा०) धातोर्लट् अन्यत्र लङ् लिङ् च]

भिक्षमाणः याचमान (योगिजन) ३ ६१.६ **भिक्षमाणाः**=नित्य याचमाना उन्नतिशीला (जनास=उत्तमा धार्मिका विद्वज्जना) ७ ६ ६ लम्भमाना (यज्ञियास=यज्ञक्रिया कुशला विद्वास) १ ७३ ७ [भिक्ष भिक्षायाम् अलाभे लाभे च (भ्वा०) धातो शानच्]

भित्थाः भेद कुर्या ११ ६८ **भिनत्**=भिनत्ति प्र—अत्र लडर्थे लङ् अटभावश्च १ ६२ ३ अभिनत् १ ६२ ३ विदृणाति १ ५४ ४ भिनत्ति १ ६२ ३. **भिनदत्**=भिन्द्यात् १२ २७ **भिनद्मि**=पृथक् करोमि १ १६१ १५ **भिन्त**=भिनत्सि १८ ५५ **भिन्दन्**=विदृणन्ति ४ ५८ ७ [भिदिर् विदारणे (रुधा०) धातोर्लुङ् अडभावश्च। अन्यत्र लङ् लट् च]

भिदः भिन्ना (शत्रूणा नगरी) १ १७४ ८ [भिदिर् विदारणे (रुधा०) धातो सम्पदादित्वात् क्विप्]

भिन्दन् विदारयन् (वाजी=वेगवानश्व) १७ ६५ **भिन्दन्तः**=विदारयन्त (पितर=जनकादय) १६ ६६ विदृणन्त (पितर'=जनका) ४ २ १६ [भिदिर् विदारणे (रुधा०) धातो शतृ]

भिन्दानाः विदृणन्त वीरा राजपुरुषा) ६ २७ ६ [भिदिर् विदारणे (रुधा०) धातो शानच्]

भिन्दुः भेदक (इन्द्र=विद्वान् सेनापति सूर्यो वा) १ ११ ४ [भिदिर् विदारणे (रुधा०) धातो 'पृभिदि०' उ० १ २३. सूत्रेण कु। बहुलवचनान्नुम्]

भिन्नम् विदीर्णतटम् (नद=महाप्रवाहयुक्त नद्यादिकम्) १ ३२ ८ [भिदिर् विदारणे (रुधा०) धातो क्त]

भियसम् भयम् २ २८ ६ **भियसा**=भयेन ५ ५६ २ दुःखभयेन १ ५२ ६ धारणेन ५ ३२ ६ **भियसे**=भयाय ५ २६ ४ [ञिभी भये (जु०) धातोर् औणा० असुन्। बहुलवचनात् कित्वाद् इयङ्]

भियः रोगदोषादिका (भीतय) २७ ७ **भिया**=भयेन १ ६१ १४ **भीः**=भयम् १ ३२ १४ [ञिभी भये (जु०) धातो सम्पदादित्वात् क्विप्]

भियानाः भय प्राप्ता (देवा=विद्वासो जना) ६ ६ ७ [ञिभी भये (जु०) धातोम् 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति ताच्छील्ये चानश्। अथवा लट शानच्। व्यत्ययेनात्मनेपदम्]

भियाने भय प्राप्तौ (रोदसी=द्यावापृथिव्यौ) २.११ ६ [ञिभी भये (जु०) धातोः शानच्। व्यत्ययेनात्मनेपदम्]

भिषक् निदानादिविज्ञानेन रोगनिवारक (वैद्यो जन) १६ ५ यो भिषज्यति चिकित्सति स (वैद्य) प्र०—अत्र भिषज् धातो क्विप् १२ ८० चिकित्साद्यङ्गवित् (वैद्य) १६ १२ रोगनिवारक (वैद्य) २१ ३३ रोगविनाशक (वैद्य') २१ ५८ **भिषजम्**=वैद्यवरम् २१ ३८ **भिषजः**=सद्वैद्या ६ ५० ७ **भिषजाम्**=वैद्यानाम् २१ ४० **भिषजौ**=सद्वैद्यौ १ ११६ १६ [भिषज् चिकित्सायाम् (कण्ड्वा०) धातो कर्त्तरि क्विप्। अथवा ञिभी भये (जु०) धातो 'भिय पुग्घ्रस्वश्च' उ० १ १३८ सूत्रेण अजिः धातोर्ह्रस्व पुगागमश्च]

भिषक्तमम् वैद्यशिरोमणिम् २ ३३ ४. [भिषज् प्राति० अतिशायने तमप्]

जातानि ३१ १६ सर्वपदार्थाधिकरणानि १७ २७ निवासाऽधिकरणानि २६ ७ भा०—मूर्नद्रव्याणि ३३ ४३ लोकान् २६ ३४. माण्डलिकराजनिवासस्थानानि ६ २५ गृहाणि ६ २४ भवनाधिकरणानि वस्तूनि ३४ ३१ लोकजातानि भूताधिकरणानि ६ ५ २ भवन्ति येपु तानि वस्तूनि ११.२३ सव पदार्थो के निवासस्थान असंख्यात लोको को आर्याभि० २ १४, ८ ३६ लोक-लोकान्तरो को आर्याभि० २ ६, ३२ १० **भुवनाय**=जाताय लोकाय १ ६२.४ **भुवनेषु**=स्थित्यधिकरणेषु (लोकलोकान्तरेषु) ३ २ १० निवासाधिकरणेषु ११५.७ ५ [भू सत्तायाम् (भ्वा०) धातो 'भूसूधूभ्रस्जिभ्यश्छन्दसि' उ० २ ८० सूत्रेण क्युन्। भुवनम् उदकनाम निघ० १ १२ भुवनस्य=भूतानाम् नि० ३ १२ भुवन विचष्टे भूतान्यभिविपश्यति नि० १०.४६ भुवनानि भूतान्युदकानि नि० १० ३३ भुवनाय=भावनाय नि० ७ २५ यज्ञो वै भुवनम् तै० ३ ३ ७ ५]

भुवना भवन्ति भूतानि येपु तानि गृहाणि प्र०—अत्र 'शेश्छन्दसि वहुलम्' अ० ६ १ ७० इति लुक् ८ ३० भुवनानि लोका १ ८५ ८ लोकस्थपदार्थान् १७ २७ भूताधिकरणानि (स्थानानि) ४.६ ५ सर्वाणि भूतानि लोकान् वस्तूनि वा ३ ६२ ६ लोका प्राणिनश्च ११०१६ लोक-लोकान्तरान् ७ १३ ३ [भुवनमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि। इमे वै लोका भुवनम्। काठमक० १४१ ७ यज्ञो वै 'भुवनस्य नाभि तै० ३ ६ ५ ५]

भुवन्तये यो भवत्याचारवांस्तस्मै (भृत्याय) १६ १६ [भू सत्तायाम् (भ्वा०) धातोश्छान्दस रूपम्]

भुवपतये भवन्त्युत्पद्यन्ते भूतानि यस्मिन् ससारे तस्य पतिस्तस्मै जगदीश्वराय आहवनीयास्याऽग्नये वा प्र०—अत्र वाहुलकाद् भूधातोरौणादिक क प्रत्यय २ २ [भुवपतिपदयो समास। भुव=भू सत्तायाम् (भ्वा०) धातोरौणादिक क। एतानि वै तेपामग्नीना नामानि यद् भुवपतिर्भुवनपतिर्भूताना पति श० १ ३ ३ १७]

भुवस्पते! पृथिव्या स्वामिन् ४ ३४ [भुवस्पतिपदयो समास। भुवस्=भू सत्तायाम् (भ्वा०) धातो 'भूरञ्जिभ्या कित्' उ० ४ २१७ सूत्रेण असुन् किच्च]

भुवः अन्तरिक्षम् ३ ५ भुवरित्यपान. य सर्वं दुखमपनयति सोऽपान जो सब दुखो से रहित है जिसके सङ्ग मे जीव सब दुखो मे छूट जाते है वह (परमेश्वर) स० प्र० ५१, ३६ ३. उपासनाविद्याम् ३६ ३ वलनिमित्त उदान ३ ३७ यो भवति स (अ०—अग्नि) १३.५४ यो मुमुक्षूणा मुक्ताना स्वसेवकाना धर्मात्मना सर्व दुखमपनयति दूरी करोति सोऽपान ईश्वरो दयालुत्वात् प० वि०। वायु आदि पदार्थो को रचने वाला (ईश्वर) आर्याभि० २ ३५, ३ ३७ सब दुखो को दूर करने वाला (ईश्वर) स० वि० ११४, १० ८५ ४४ अन्तरिक्षवदवकाशरूपत्वाद् (ईश्वर) ऋ० भू० १६२, अथर्व० १३ ४ ५१ [भू सत्तायाम् (भ्वा०) धातो 'भूरञ्जिभ्या कित्' उ० ४.२१७ सूत्रेण असुन् किच्च। भुव इत्यन्तरिक्षलोक श० ८ ७ ४ ५ अग्निर्वै भुवोऽग्नेर्हीद सर्व भवति श० ८ १ १ ४ भुव इति व्याहृति जै० ३ ८७]

भुवः भवतीति तस्य (यज्ञस्य=व्यवहारस्य) १५ २३ भूमय १ ८६ ५ पृथिव्या मध्ये ४ १६ २ अन्तरिक्षस्य ७ २६ अन्तरिक्षस्थान् (लोकान्) २३ ८ भवतीति भूस्तस्या (भूम्या) १ ५२ १३ **भुवा**=पृथिव्या ३ ५५ १३ **भुवाम्**=पृथिवीनाम् ३७ १८ **भूः**=भूरिति वै प्राण य प्राणयति जीवयति सर्वान् प्राणिन स प्राण प्राणादपि प्रियस्वरूपो वा स ईश्वर प० वि०। प्रियस्वरूप प्राण ३ ३७ य प्राणयति चराचर जगत् स भू स्वयम्भूरीश्वर, जो सव जगत् के जीवन का आधार, प्राण से भी प्रिय और स्वयम्भू है वह प्राण का वाचक ईश्वर स० प्र० ५१, ३६ ३ प्राणदाता (परमात्मा) स० वि० ११४, १० ८५ ४४ भवतीति भू (भूमि) १३ १८ जो प्राणो का भी प्राण है वह ईश्वर स० वि० ७५, ३६ ३ हे सदा वर्त्तमान सर्वमङ्गलकारकेश्वर आर्याभि० २ ३५, ३ ३७ कर्मविद्याम् ३६ ३ इम लोकम् २३ ८ भूमि प्र०—भूरिति वै प्रजापतिरिमामजनयत श० २ १ ४ ११, ३ ५ सत्ताऽऽत्मिकाम् (प्रकृतिम्) २० २३ भूभे ७ २६ भूमौ भा०—पृथिव्यादिपदार्थविद्या २० १२ [भू० सत्तायाम् (भ्वा०) धातो क्विप्। भूर्हीय (पृथिवी) श० ७ ४ २ ७ भूरिति पृथिवीनाम निघ० १ १ भूरिति अन्तरिक्षनाम निघ० १ ३]

भूत् भवेत् प्र०—अत्र 'वहुल छन्दस्यमाङ्योगेऽपि' इत्यडभाव १ ३८ ५. वर्त्तते १ ७३ २ भवति प्र०—अत्र लडर्थे लुङ् अडभावश्च २ ६ भवतु ६ ६१ १० **भूत**=भवत प्र०—अत्र लेटि मध्यमवहुवचने 'वहुल छन्दसि' इति शपो लुक् ११०६ २ **भूतम्**=भवत प्र०—अत्र 'वहुल छन्दसि' इति शपो लुक् १ ६३ ७ भवेताम् ६ ६८ ४ भवेतम् ६ ७४ १ **भूतु**=भवतु प्र०—अत्र शपो लुग् 'भूसुवोस्तिडी' ति गुणाऽभाव १२ ५१ **भूथः**=भवथ ६ ६७ ५ **भूम**=भवेम प्र०—अत्र लुङ्यडभावश्च १ ८८ २ **भूयाः**=भवे

भुञ्जीथाः भोगमनुभवे ४०.१ अपने आत्मा से आनन्द को भोग स० प्र० २३८, ४० १ **भुनक्तु**=परमानन्द का भोग कर आर्याभि० २ १. तै० ब्रह्मा० १०.१ [भुज पालनाभ्यवहारयो (रुधा०) धातोर्लिङ् । अन्यत्र लोट्]

भुरजन्त प्राप्नुवन्ति ४ ४३ ५

भुरणा सुखं धरन्तौ (अश्विनौ=राजप्रजाजनौ) १ ११७ ११ [भुरण धारणपोषणयो (कण्ड्वा०) धातोरच् । ततो द्विवचनस्याकारश्छान्दस]

भुरण्यति धरति ५ ७३ ६ [भुरण धारणपोषणयो (कण्ड्वा०) धातोर्लट्]

भुरण्यन् धरन् पुष्यन् वा (राजा) ४ २७ ३ **भुरण्यन्तम्**=पालयन्तम् (मनुष्यम्) ३३ ३२ धरन्तम् (लोकम्) १ ५० ६ [भुरण धारणपोषणयो (कण्ड्वा०) धातो शतृ]

भुरण्यवः धर्त्तारो गतिमन्तश्च (अग्न्यादय पदार्था) ३३ १ **भुरण्युम्**=पोषकम् (अग्नि=विद्युतम्) प्र०—अत्र भुरण-धातोर्यु प्रत्यय १३ ४३ **भुरण्युः**=धर्त्ता पोषको वा (जगदीश्वरो विद्युद्वा) प्र०—अत्र भुरणवानो कण्ड्वादित्वाद् यक् तत उ १ ६८.१. भर्त्ता (विद्वान् सभेश) १८ ५३ **भुरण्यू**=धारणपोषणकर्त्तारौ (पितरौ) १ १२१ ५ पोषयितारौ धारकौ वा (अध्यापकोपदेशकौ) ६ ६२ ७ [भुरण धारणपोषणयो (कण्ड्वा०) धानोर्गौणादिको युक् । कण्ड्वादित्वाद् यगन्ताद्वा उ प्रत्यय । भुरण्युरिति भर्त्तेत्येतत् श० ८ ६ ३ २०. भुरण्यु क्षिप्रनाम निघ० २ १५ भुरण्युरिति क्षिप्रनाम । भुरण्यु शकुनिर् भूरिमध्वान नयति स्वर्गस्य लोकस्यापि वोळ्हा तत्सम्पाती भुरण्यु नि० १२ २२ भुरण्यति गतिकर्मा निघ० २ २४]

भुरन्त धरन्ति ५ ६ ७ [डुभृञ् धारणपोषणयो (जु०) धातोर्लङ् । विकरणव्यत्ययेन श । 'बहुल छन्दसी' त्युत्व रपरत्व च]

भुरमाणम् पुष्टिकारकम् (भुज्यु=भोगमर्ह पदार्थम्) प्र०—अत्र डुभृञ्धातो शानचि व्यत्ययेन शो 'बहुलं छन्दसि' इत्युत्व च १ ११६ ४ [डुभृञ् धारणपोषणयो (जु०) धातो शानच् । व्यत्ययेन श । धातो ऋकारस्योत्वे रपरत्वे च रूपम्]

भुरिजोः धारकपोषकयो (भा०—प्रजाराज्ययो) ४ २ १४ [भुरिजौ बाहुनाम निघ० २ ४]

भुर्वणि धारणवति पोषणवति वा (व्यवहारे) १ १३४ ५ [डुभृञ् धारणपोषणयो (जु०) धातोरौणा० बाहु० क्वणि । तत 'सुपा सुलुक्०' इति सप्तम्या लुक्]

भुर्वणिः बिभर्ति य स (अध्यापक) प्र०—अत्र भृञ्धातोर्बाहुलकादौणादिक क्वणि प्रत्यय १ ५६ १

भुवत् भवति प्र०—अत्र लडर्थे लेट् 'बहुल छन्दसि' इति शपो लुक् 'भूसुवोस्तिङि' अ० ७ ३.८८ अनेन गुणनिषेध १ २३ ६ भूयात् प्र०—भू धातोराशिषि लिङि प्रथमैकवचने 'लिङ्याशिष्यङ्' अ० ३.१ ८६. इत्यङि सति 'किदाशिषि' इति कित्त्वे, आगमानित्यत्वे प्रयोग १ ५ ३ भवेत् प्र०—अत्र गुणनिषेधादुवङ्डादेश १ ५२ ११. **भुवन्**=भवन्ति ६ ३५ १ भवेयु १ १८६ २ भवन्तु ५ ४६ ६ **भुवम्**=हूँ स० प्र० २३८, १०.४६ १ **भुवः**=भव प्र०—अत्र लुङि विकरणव्यत्ययेन श प्रत्ययोऽडभावश्च १.१३८ ४ भवे ५ १६ ५ [भू सत्तायाम् (भ्वा०) धातोर्लेट् । विकरणव्यत्ययेन श । अन्यत्र लिङ् लुङ् च]

भुवनच्यवानाम् य भुवनान्युत्तमानि गृहाणि च्यवन्ते प्राप्नुवन्ति तेषाम् (देवाना=विदुषा पुरुषाणाम्) १७ ४१ [भुवनोपपदे च्युङ् गतौ (भ्वा०) धातोरच्]

भुवनपतये भुवनाना सर्वेषा लोकाना पति पालक ईश्वर पालनहेतुर्भौतिक (अग्नि) वा तस्मै २ २ सर्वजगत्स्वामिने (ब्रह्मणे) २२ ३२ [भुवन-पतिपदयो समास । 'पति समास एव' इति घिसज्ञकत्वाद् गुण । एतानि वै तेषामग्नीना नामानि यद् भुवपतिर्भुवनपतिर्भूताना पति. श० १ ३.३ १७]

भुवनम् भवन्ति भूतानि यस्मिन् जगति तत् (जगत्) १ १०२ ८. लोकजातम् २६ ६ सर्वेषामधिकरणम् १ १०८ २ उदकम् भा०—जीवनमूल जलम् २२ ३. भवतीति भुवन वर्त्तमानकालस्य सम्बन्धि (व्यवहारम्) प्र०—अत्रौणादिक क्यु ३४ ४ **भुवनस्य**=सर्वससारस्य ऋ० भू० ६०, अथर्व० १० २३ ४ ३८ जलादेर्लोकसमूहस्य ७ ५१ २ गृहस्य १८.४४ भवन्ति भूतानि यस्मिन् राज्ये तस्य १३ १८ भूताऽधिकरणस्य ३ ४६ २ ब्रह्माण्डस्य ५ ८५.३. लोकजातस्य १.१४३ ४ निवासाऽधिकरणस्य स्थावरस्य जगत प्राणिसमुदायस्य च २ २७ ४ लोकमात्रस्य १२ २३ अनेकभूगोलाऽलङ्कृतस्य (ससारस्य) ७ २५ जगतो मध्ये ५ ६३ २. अखिलससारस्य ५ ६२ ६ **भुवनात्**=जगत्पदार्थसमूहात् १ १२३ २ **भुवनानाम्**=लोकलोकान्तराणाम् ३४ ४५. भवन्ति भूतानि येषु तेषा गृहाणाम् १४.५. सब भुवनो का आर्याभि० १.३१, ऋ० १७ ६ १ **भुवनानि**=स्थानानि ८ ३६ भवन्ति येषु तानि लोक-

प्रतिष्ठेति तद्भूमिरभवन् श० ६ १ १ १५ यदभवत्तद् भूमि काठ० ८ २ कर्णिनी वै भूमिरिति जै० १ १२६]

भूम्ना विभुना भा०—स्वव्याप्त्या ३ ५ **भूम्ने**= बहुत्वाय ३० १३ [बहुप्राति० भावे इमनिच्-प्रत्यये बहो. स्थाने भूरादेशे 'बहोर्लोपो भू च बहो' सूत्रेण रूपसिद्धि]

भूम्यस्य भूमौ भव य (रथस्य) ५ ४१ १० **भूम्याः**=भूमिषु साधव (व्यवहारा) १ ६२ ५ [भूमि-प्राति० भवार्थे साध्वर्थे वा यत्]

भूयसः बहून् ५ ३० ४ अधिकान् (सख्यानान्) १ १०२ ७ **भूयसा**=बहुना (राया=धनेन) ३ १६ ६ **भूय** =अधिक ((आनन्दम्) ५ ७६ १० बहु (वारम्) २ १४ १० अतिशयेन बहु (वसु) ४ १६ पुन ३ ३४ [बहुप्राति० अतिशायन ईयसुन् प्रत्यये 'बहोर्लोपो भू च बहो' सूत्रेण रूपसिद्धि]

भूयसीः अधिका (रातय =दानानि) प्र०—अत्र 'वाच्छन्दसि' इति जस पूर्वसवर्णत्वम् १ ११ ८ बह्वी (उषास =दिनानि) २ २८ ६ पुन -पुनरधिका (अ०—अण्व्यो मात्रा) १ १८८ ५ [बहुप्राति० अतिशायन ईयसुन् । तत स्त्रियां ङीप् । बहोर्लोपो भू च बहो' इति भूरादेश । विड् वै भूयसी मै० ४ २ ६]

भूयस्कर हे पुन पुनरनुष्ठात (राजन्) १० २८ [भूयमुपपदे डुकृञ् करणे (तना०) धातोस्ताच्छील्ये ट]

भूयामो भवेम प्र०—अत्र 'वाच्छन्दसि' इत्यस्योत्वम् ४ ३२ ६ [भू सत्तायाम् (भ्वा०) धातोर्लिङ् । अकारस्योत्व छान्दसम्]

भूयांसः तेभ्योऽप्यधिका (रुद्रा =प्राणजीवा) १६ ६३ [बहुप्राति० अतिशायन ईयसुन् । 'बहोर्लोप ०' इति रूपसिद्धि]

भूयिष्ठम् अतिशयेन बहु (अन्नम्) ५ ७७ ४ **भूयिष्ठः**=अधिक (अग्नि =पावक) १.१६१ ६ [बहुप्राति० अतिशायन इष्ठन् । 'इष्ठस्य यिट् च' इति भूरादेश]

भूयिष्ठाम् अधिकाम् (उक्ति=स्तुतिम्) १ १८९ १. बहुतमाम् (नम उक्ति=नमोभिरुक्तिम्) ५ ३६ भूयसीम् (नम-उक्तिम्) ७ ४३ बहुत प्रकार की प्रशसा को स० वि० २१४, ४० १६ **भूयिष्ठाः**=अधिका (आप) १ १६१ ६ [बहुप्राति० अतिशायन इष्ठन् । 'इष्ठस्य यिट् च' अ० ६ ४.१५९ सूत्रेण बहो स्थाने भूरादेश प्रत्ययस्य च यिट् । तत स्त्रियां टाप्]

भूयोभूयः वार वारम् ६ २८ २ ['भूयस्' पदस्य वीप्साया द्वित्वम् । भूयस् =बहुप्राति० अतिशायने ईयसुन्]

भूरय: बह्वच (क्रतव =प्रज्ञा) १.५५ ८ [भूरि इति बहुनाम निघ० ३ १ भूरि इति बहुनो नामधेय प्रभवतीति सत नि० २ ८ भूरि बहूनि नि० ११ २१ भू सत्तायाम् (भ्वा०) धातो 'अदिशदि०' इत्युणादिसूत्रेण क्रिन्]

भूरि बहु (अर्थं=गुण द्रव्य वा) प्र०—अत्र 'अदि-शदिभू० उ० ४ ६५ अनेन भू-धातो क्रिन् प्रत्यय १.१० २ बहूनि बलानि ५ २९ १४ **भूरीणि**=बहूनि (वृत्रा= मेघाऽवयवान्) ४ १७ १९ **भूरेः**=बहुपदार्थान्वितस्य (क्षयस्य=गृहस्य) ८ ६ बहुविधस्यैश्वर्यस्य १ ६१ १५ बहो (जलस्य) १ ८४ ३६ व्यापकस्य (सत =कारणस्य) १ ९६ ७ बहुविधस्य (कवे =विदुषो जनस्य) २ २८ १ बहुरूपस्य (जनस्य) २ ३३ ६ [भू सत्तायाम् (भ्वा०) धातो 'अदिशदिभूशुभिभ्य क्रिन्' उ० ४ ६५ सूत्रेण क्रिन्]

भूरिकर्मणे बहुकर्मकारिणे (इन्द्राय=सेनापतये) १ १०३ ६ [भूरि-कर्मन्पदयो समास]

भूरिदात्र भूरि बहुविध दात्र दान यस्य स (इन्द्र = राजपुरुष) ३ ३४ १ [भूरि-दात्रपदयो समास । दात्रम्= डुदाञ् दाने (जु०) धातोरौणादिक ष्ट्रन्]

भूरिदावत्तरा अतिशयेन बहुधन-दानप्राप्तिनिमित्तौ (इन्द्राग्नी=विद्युद्भौतिकाग्नी) १ १०९ २ [भूरि-दावन्-पदयो समासेऽतिशायने तरप् । तत 'सुपा सुलुग्०' इत्या-कारादेश । तरप्प्रत्यये 'नाद् घस्य' अ० ८ २ १७ सूत्र-स्थेन 'भूरिदाव्नस्तुड् वक्तव्य' वा० सूत्रेण तुट् । भूरिदाव-त्तरा=बहुदातृतरौ नि० ६ ९]

भूरिदाव्नः बहुदातु (सर्वव्यापकस्येश्वरस्य) २ २७ १७ [भूरि-दावन्पदयो समास । दावन्=डुदाञ् दाने (जु०) धातोर्वनिप्]

भूरिदाः बहुदा (प्रजाजन) ४ ३२ २० बहूना दाता (दानशीलो मनुष्य) ४ ३२ १९ ['भूरि' इत्युपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप्]

भूरिधारे भूरि बह्वचो धारा ययोस्ते (रोदसी=सूर्य-भूमी) ६ ७० २ (भूरि-धारापदयो समास । भूरिधारे बहुधारे नि० ५ २]

भूरिपोषिणः भूरि बहुविध पोष पुष्टिर्विद्यते येषा ते (विद्वज्जना) ३ ३ ९ (भूरि-पोषपदयो समासे मत्वर्थ इनि]

२ २७ भव नि० ६ ११ **भूयात्**=भवतु ५ ३३ भवेत् १ २३ **भूयाम**=समर्था भवेम प्र०—'शकि लिङ् च' अ० ३ ३ १७२ इति लिङ् 'बहुल छन्दसि' इति शपो लुक् च १ १७४ **भूयास्तम्**=भूयास्ताम् प्र०—अत्र व्यत्यय २७ **भूः**=भवे प्र०—अत्र लिङर्थे लुङ् ६ १२ भव प्र०—अत्राऽडभाव ७ १६ १० भवसि प्र०—अत्र लडर्थे लुङ् १ ६१ २ भव प्र०—अत्र लोडर्थे लुङ् 'न माङ्योगे' इत्यडभाव १ ३३ ३ [भू सत्तायाम् (भ्वा०) धातोर्लुङ्। अडभावश्छान्दस। 'गातिस्थाघु०' इति सिचो लुक्। अन्यत्र शपो लुकि लोटि लटि लिङि लुङि च रूपाणि]

भूतन भवत ७ ५६ १० [भू सत्तायाम् (भ्वा०) धातोर्लोट् 'बहुल छन्दसी' ति शपो लुक्। तप्रत्ययस्य तनप्। भूतन भवत नि० ६ २२]

भूतम् उत्पन्न सर्व जगत् ५ १६ अतीतम् (वस्तुजातम्) ३४४ निष्पन्नम् (जगत्) ११८५ ११ रूपम् १८ १४ पुष्कलम् (ऋत=प्राप्तु योग्य कारणम्) ३ ५४ ३ भूतस्थ (जगत्) को स० प्र० २८२, ३१ २ **भूतस्य**=उत्पन्नस्य कार्यरूपस्य (अ०—जगत) २३ १ उत्पन्न हुए सम्पूर्ण जगत् का स० वि० ४, १३ ४ **भूतानाम्**=पृथिव्यादीनाम् १४ २८ पृथिव्यादितत्त्वाना तत्कार्याणा लोकानाम् २० ३२ प्राण्यप्राणिनाम् १६ ५६ भूतान्युत्पन्नानि यावन्ति वस्तूनि तेषाम् २ २ **भूतानि**=पृथिव्यादीनि १४ २८ महान्ति तत्त्वानि १४ ३१ **भूताय**=उत्पन्नाना प्राणिना सुखाय १ ११ **भूतेभ्यः**=मनुष्यादिप्राणिभ्य ५ १२ [भू सत्तायाम् (भ्वा०) धातो क्त। भूतम् उदकनाम निघ० १ १२ अय वै (पृथिवी) लोको भूतम् तै० ३ ८ १८ ५ भूत ह प्रस्तोतैषा (विश्वसृजाम्) आसीत् तै० ३ १२ ६ ३ परिमित वै भूतमपरिमित भव्यम् ऐ० ४ ६ प्रजा वै भूतानि श० २ ४ २ १ तद् यानि तानि भूतानि ऋतवस्ते श० ६ १ ३ ८ देवा वै भूता मै० ३ ८ ५ भूत वाव रथन्तरम् तै० स० ३ १ ७ २]

भूतसाधनी भूताना साधिका (सत्क्रिया) २६ १ [भूत-साधनीपदयो समास। साधनी=साध समिद्धौ (स्वा०) धातोर्ल्युडन्तान् ङीप्]

भूतिम् ऐश्वर्यम् १ १६१ १ **भूति**=ऐश्वर्यम् १८ १४ **भूत्यै**=ऐश्वर्याय ३० १७ ऐश्वर्यकारिकायै (स्त्रियै) १२ ६५ [भू सत्तायाम् (भ्वा०) धातो स्त्रिया क्तिन्। भूति—(प्राण) प्राण वा अनुप्रजापशवो भवन्ति जै० उ० २ ४ ६ योऽयम् (अग्नि) इदानी स भूति मै० ३ ८ ६]

भूत्वा भावयित्वा प्र०—अत्राऽन्तर्गतो ण्यर्थ २ १६ होकर स० वि० १४१, अथर्व० ३ ३० १ ७ [भू सत्तायाम् (भ्वा०) धातो क्त्वा]

भूत्वी भूत्वा ७ १०४ १८ [भू सत्तायाम् (भ्वा०) धातो क्त्वाप्रत्यये 'स्नात्व्यादयश्च' अ० ७ १ ४६ सूत्रेणेदन्तत्व निपात्यते]

भूना भूमना प्र०—अत्र पृषोदरादित्वान्मकारलोप. १७ २८ [बहुप्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' इति इमनिच्प्रत्यये 'बहोर्लोपो भू च बहो' सूत्रेण भूमन् इति रूपम्। ततष्टाप्रत्यये मकारलोप]

भूमनः बहुरूपस्य (जगत) ६ ७१ २ **भूमना**=बहुत्वेन प्र०—अत्रोभयसंज्ञान्यपीति भसंज्ञाऽभावादल्लोपाऽभाव ११० २ [बहुप्राति० भावे इमनिच्। बहोश्च भूरादेश 'बहोर्लोपो भू च बहो' सूत्रेण। तत पष्ठ्येकवचनेऽल्लोपो न भवति छन्दसि]

भूमा भूमानि बहूनि (जन्मानि) १ ७० ३ भूमानि वस्तूनि ११७३ ६ भूमिम् प्र०—अत्र पृषोदरादिना रूपसिद्धि ४ २२ ३ प्र०—अत्र 'सुपा सुलुक्०' इति डादेश १ ६२ ८ पृथिव्या ७ ५७ भूमौ ६ ५० ५ बहुविधम् (त्रिधातु=सर्वजगत्) ४ ४२ ४ भूम्ना (व्यवहारेण) २४७ व्यापक (हेड=अनादर) ६ ६२ ८ बहुत्वेन २४.२ [भूमन् इति पूर्वपदे व्याख्यातम्। अथवा भूमिप्राति० 'सुपा सुलुक्०' इति डादेश। पुष्टिर्वै भूमा तै० ३ ९ ८ ३ भूमा वै प्रजापति जै० २ २१८ भूमा वै सहस्रम् श० ३ ३ ३ ८ भूमा सूक्तम् जै० ३ २४१ श्रीर्वै भूमा श० ३ १ १ १२]

भूमि प्र०—अत्र सुपा सुलुक्०' इति विभक्तेर्लुक् २६ १६ **भूमिम्**=भूगोलम् भा०—भूम्याद्युपलक्षितम् (जगत्) ३१ १ सर्वाऽऽधारा क्षितिम् १ ५२ १२ पृथिवीम् १ ६४ ५ बहव पदार्था भवन्ति यस्या ताम् ३ ३० ९ पृथिवीराज्यम् ४ २६ २ भूमिमारभ्य प्रकृतिपर्यन्त सर्वं जगत् ऋ० भू० ११६, ३१ १ **भूमिः**=पृथिवीवत् १३ १८ भवन्ति भूतानि यस्या सा पृथिवी २३ ४६ जिसमे सब भूत (प्राणी) होते हैं वह (परमात्मा) स० प्र० १५, १३ १८ **भूमीः**=अध-ऊर्ध्व-मध्यस्था उत्तमाऽधममध्यमा क्षिती १ १०२ ८ **भूम्याम्**=पृथिव्याम् १६ ५४ [भू सत्तायाम् (भ्वा०) धातो 'भुव कित्' उ० ४ ४५ सूत्रेण मि। भूमि पृथिवीनाम निघ० १ १ अभूद् इव वा इदमिति तद्भूमेर्भूमित्वम् ता० २० १४ २ अभूद्वाऽइय

धातोर्व्यत्ययेनाऽऽत्मनेपदे शानच् 'छन्दस्युभयथा' इति शानच आर्धधातुकत्वाद् गुण १ १२० ५

भृज्जाति भृज्जेत् ४ २४ ७ [भ्रस्ज पाके (तुदा०) धातोर्लेट्]

भृतम् धृतम् (हुत द्रव्यम्) २८ १२ [डुभृञ् धारणपोषणयो (जु०) धातो क्त]

भृत्याम् भृत्येषु साध्वी सेनाम् १ ८४ १६. [भृत्यप्राति० साध्वर्थे यत्। तत स्त्रियां टाप्। भृत्य =बिभर्त्ते क्यप्]

भृथे धारणे २ १४ ४ [डुभृञ् धारणपोषणयो (जु०) धातोरौणादिक क्थन् बहुलवचनात्]

भृमयः भ्रमणानि ३ ६२ १ **भृमिम्**=अनवस्थाम् भा०—अन्यायदशाम् २ ३४ १ भ्रमणशीलम् (विद्वज्जनम्) ७ ५६ २० **भृमि**.=यो नित्य भ्रमति स (विद्वान् मनुष्य) प्र०—'भ्रमे सम्प्रसारण च' उ० ४ १२६ अनेन भ्रमु-धातोरिन् प्रत्यय सम्प्रसारणञ्च, स च कित् १ ३१ १६ भ्रमणशील (इन्द्र =राजा) ४ ३२ २ [भ्रमु चलने (भ्वा०) धातो 'भ्रमे सम्प्रसारणञ्च' उ० ४ १२१ सूत्रेण इन् सम्प्रसारण च। भृमिर्भ्राम्यते नि० ६ २०]

भृमात् भ्रान्ते प्र०—अत्र वर्णव्यत्ययेन रेफस्य स्थाने ऋकारो 'वाच्छन्दसि' इति सम्प्रसारण वा ७ १ २२ [भ्रमु चलने (भ्वा०) धातोर्घञर्थे क। वर्णव्यत्ययेन रेफस्य ऋकार]

भृष्टिमता भृज्जन्ति यया सा भृष्टि कान्तिरिव नीति सा प्रशस्ता विद्यते यस्मिंस्तेन १ १५ [भ्रस्ज पाके (तुदा०) धातो स्त्रियां क्तिन्। भृष्टिप्राति० प्रशसायां मतुप्]

भृष्टिः भृज्जन्ति परिपचन्ति यस्या वृष्टौ सा १ ५६ ३ [भ्रस्ज पाके (तुदा०) धातो क्तिन् स्त्रियाम्]

भेकुरयः या भा दीप्ति कुर्वन्ति ता (अप्सरस =आकाशगता किरणा) प्र०—पृषोदरादिनाऽभीष्टसिद्धि १८ ४० [भेकुरयो नामेति भाकुरयो ह नामैते भाँ हि नक्षत्राणि कुर्वन्ति श० ९ ४ १ ९]

भेजाते भजत ७ ३९ १ **भेजिरे**=सेवन्ताम् ५ ५७ ५ सेवन्ते ७ १ ९ **भेजे**=भजति ७ १८ १६ [भज सेवायाम् (भ्वा०) धातोर्लिट्]

भेजानासः भजमाना (प्रजाजना) प्र०—अत्र वर्णव्यत्ययेनाऽस्यैत्वम् ४ २६ ५ [भज सेवायाम् (भ्वा०) धातो शानच्। वर्णव्यत्ययेन धातोरकारस्यैत्त्वम्]

भेत् भिनत्ति ७ १८ २० भिन्द्यात् १ ५९ ६ भिन्द्या प्र०—अत्र 'बहुल छन्दसि' इतीडभावो 'झलो झलि' इति सलोपो 'हल्ङ्याब्भ्यो०' इति सिज्लोपश्च १ १०४ ८ अलग कर, नष्ट कर आर्याभि० १४९, ऋ० १७ १९ ८ **भेदति**=भिनत्ति ५ ८६ १ [भिदिर् विदारणे (रुधा०) धातोर्लुङि छान्दस रूपम्। 'भेदति' प्रयोगे लटि व्यत्ययेन शप्। भेत्=अभिनत् नि० ७ २३]

भेत् बिभेति ७ १८ २० **भेम**=बिभयाम, भय करवाम प्र०—अत्र लोडर्थे लुङ् 'बहुल छन्दसि' इति च्लेर्लुक् 'छन्दस्युभयथा' इति लिङ आर्धधातुकसञ्ज्ञामाश्रित्य सलो ङित्वाऽभावाद् गुणश्च १ ११ २ **भेः**=बिभीहि प्र०—अत्र लोडर्थे लङ् 'बहुल छन्दसि' इति शपो लुक् १ २३ बिभीया, प्र०—अत्र लिङर्थे लुङ् ६ ३५ भय प्रापये १६ ४७ [ञिभी भये (जु०) धातोर्लुङि छान्दस रूपम्। अन्यत्र लङपि]

भेदम् विदारण भेदभाव वा ७ १८ १९ भेदनीय विदारणीयम् (शत्रुम्) ७ ३३ ३. **भेदस्य**=विदारणस्य द्वैधीभावस्य ७ १८ १८ [भिदिर् विदारणे (रुधा०) धातोर्घञ्]

भेदि भिद्यताम् ११ ६४ [भिदिर् विदारणे (रुधा०) धातोः कर्मणि लुङ्। अटोऽभावश्छान्दस]

भेषजम् शरीराऽन्तःकरणेन्द्रियाऽऽत्मना सर्वरोगाऽपहारकमौषधम् १ २३ २१ औषध-सेवनम् २१ ३२ रोगनिवारकम् (रुद्रम्=ईश्वरम्) ३ ५९ रोगनाशकव्यवहारम् १ २३ २१ रोगप्रणाशकमोषधिरूपम् (यज्ञ=सुखप्रद व्यवहारम्) भा०—पथ्यौषधिब्रह्मचर्य-सेवनम् १९ १२ अविद्यादिक्लेशनिवारकम् (ईश्वरम्) ३ ५९ चिकित्सकम् (जनम्) २१ ३१ चिकित्सनीयम् (जनम्) २१ ४० सर्वदुःखनिवारकमौषधम् १ ८९.४ उदकम् प्र०—भेषजमित्युदकनाम निघ० १ १२, २१ ३३ **भेषजः**=भिषग् जन २ ३३ ७ **भेषजाय**=सुखाय भा०—सुखप्राप्तये प्र०—भेषजमिति सुखनाम निघ० ३ ६, ३९ १२ **भेषजैः**=जलै २१ ३६ [भिषज् चिकित्सायाम् (कण्ड्वा०) धातोरच् कर्त्तरि। भेषजम्=भैषज्यानि नि० १० ३५ भेषजम् उदकनाम निघ० १ १२ भेषजम् सुखनाम निघ० ३ ६ यद् भेषज तदमृतम् गो० पू० ३ ४ शान्तिर्वै भेषजमाप कौ० ३ ६]

भेषजा भेषजानि २५ ४६ औषधानि प्र०—अत्र 'शेश्छन्दसि बहुलम्' इति लोप १.२३ २० रोगनिवारकाणि (वार्याणि=साधनानि) १.११४ ५ [भेषजमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

भूरिभार: भूरि बहुर्भारो यस्मिन् स (काल) १ १६४ १३ [भूरि-भारपदयो समास]

भूरिम् विपुलम् (अद्रि=मेघम्) ४ १६ ८ बहुविधम् (राशि=समूहम्) ४ २० ८ [व्याख्यातम्]

मन्दानः=स्तुवन् आनन्दन् (इन्द्र=वैद्यराज) ६ ४३.४. प्रकाशित (इन्द्र=दुष्टविदारको राजा) ६.४४ १७ आनन्द-यन् (इन्द्र=राजा) १ ८२ ५ कामयमानो हर्षयन् वा (राजा) १ ८० ६ प्राप्त (इन्द्र=सूर्य) २ १९ २ [मदि स्तुतिमोदमदादिषु (भ्वा०) धातो शानच्। आगमशासन-स्यानित्यत्वात् मुग् न]

मन्दाना आनन्दप्रदौ (सभासेनाध्यक्षौ अध्यापको-पदेशकौ) प्र०—अत्र विभक्तेर्डादेश ३३ ७६ [मन्दानमिति व्याख्यातम्। ततो द्विवचनस्याकारश्छान्दस]

मन्दिनम् कमनीयम् (हरि=हयम्) १ १२१ ८ स्तुत्य जनम् १ १२१ १२ **मन्दिनः**=स्तोतुमर्हा (ग्ना) २ ११ ११ सर्वस्याऽऽनन्दस्य जनयितु (राजजनस्य) २.११ २० सुख कामयमाना (मनुष्या) १ १३४ २ आनन्दयितार (हरास=अश्वा) ४ ४५ ४ **मन्दिना**= हर्षकारेण बलिना (परमेश्वरेण) १ ५४ ४. **मन्दिने**= आनन्दिन आनन्दप्रदाय (पुरुषाय) १ १० ११ मन्दितु मन्दयितु शीलवते (इन्द्राय=ऐश्वर्यमिच्छवे जीवाय) १.९ २. **मन्दिभिः**=तज्ज्ञापकैर्हर्षकरैश्च गुणै. (स्तो-मेभि=स्तोत्रै) १ ९ ३ [मदि स्तुतिमोदमदस्वप्नकान्ति-गतिषु (भ्वा०) धातोस्ताच्छील्ये णिनि। मन्दिने=मन्दी मन्दते स्तुतिकर्मण नि० ४ २४.]

मन्दिनिस्पृशः आनन्दस्य स्पर्शयितार (हसास= अश्वा) ४ ४५ ४ [मन्दिन्-उपपदे नि+स्पृश सस्पर्शने (तुदा०) धातो क्विप्]

मन्दिम् मन्दन्ति हर्षयन्त्यस्मिंस्तम् (वह्नि=यानशीघ्र-चालनस्वभावम्) १ ९ २ [मन्दप्राति० मत्वर्थ इनि। नकारलोपश्छान्दस]

मन्दिषीमहि शयीमहि ४ १४. [मदि स्तुत्यादिषु (भ्वा०) धातोर्लिङ्]

मन्दिष्ठ अतिशयेन मन्दिता तत्सम्बुद्धौ (सभाऽध्यक्ष) १ ५१ ११ [मदि स्तुतिमोदमदादिषु (भ्वा०) धातो तृजन्तादतिशायन इष्ठन्। तृचो लोप]

मन्दू आनन्दितावानन्दकारकौ (वायुसूर्यौ) प्र०—मन्दू इति पदनामसु पठितम् निघ० ४ १, १ ६ ७ [मदि स्तुति-मोदादिषु (भ्वा०) धातो उ। मन्दू मदिष्णू नि० ४ १२]

मन्दे आनन्देय आनन्दयामि वा ५ ४ १ [मदि स्तुति-मोदमदादिषु (भ्वा०) धातोर्लट्]

मन्द्रजिह्वम् मन्द्रा आनन्दजनिका जिह्वा वाणी यस्य तम् (अग्नि=परमविद्वज्जनम्) ४ ११ ५ मन्द्रा मोद

तस्या हि तेषा मनास्योतानि, अग्निर्वै देवाना मनोता तस्मिन्हि तेपा मनास्योतान्यग्नि' सर्वा मनोता, अग्नौ मनोता सगच्छन्ते ऐ० २ १०]

मनोधृतः मनो विज्ञान धृत यैस्ते (सत्पुरुषा) ३.३८ २ [मनस्-धृतपदयो समास]

मनोयुजः मनसा विज्ञानेन युज्यन्ते ते (वह्नय = विद्युदादय) प्र०—अत्र 'सत्सूद्विष०' अ० ३ २.६१ अनेन 'कृतो वहुल' इति कर्मणि क्विप् १ १४ ६ ये मनसा सदसद्विज्ञानेन युञ्जन्ति योजयन्ति वा ते (देवा =विद्वज्जना) ४ ११. ये मनसा युज्यन्ते ते भृत्या १ ५१ १० ये मनसा ब्रह्म युञ्जते ते (आप्तजना) ४ ४८ ४ ये मन इव युञ्जते ते वेगवत्तरा (अश्वास =वेगादयो गुणा) ५ ७५ ६ [मनसुपपदे युजिर् योगे (रुधा०) धातो 'सत्सूद्विष०' इति क्विप् । 'कृतो वहुलमि' ति कर्मणि क्विप्]

मनोवाताः मन इव वातो वेगो यासा ता (सतिस्त्रय) ३ ३८ २ [मनस्-वातपदयो समास]

मन्तवः ज्ञातु योग्या (वस्त्रादय पदार्था) १ १५२ १ [मन ज्ञाने (दिवा०) धातो 'कमिमनिजनि०' उ० १ ७३ सूत्रेण तु]

मन्तवे विज्ञातुम् १ ११२.२ [मन ज्ञाने (दिवा०) धातोस्तुमर्थे तवेन्]

मन्तवै मन्तु योग्य (अन्यगोत्रजोऽनौरसो वा पुत्र) ७ ४ ८ [मन ज्ञाने (दिवा०) धातोस्तुमर्थे तवै । मन्तवै मन्तव्य नि० ३ ३]

मन्तुमः प्रशस्तविज्ञानयुक्त (विद्वज्जन) ६ ५६ ४ मन्तु प्रशस्त ज्ञान विद्यते यस्य तत्सम्बुद्धौ (अ०—विद्वज्जन) १ ४२ ५ [मन्तुप्राति० प्रशसाया मत्वर्थे म प्रत्ययश्छान्दस । मन्तु =मन ज्ञाने (दिवा०) धातोस्तु]

मन्त्रम् उच्चार्यमाण वेदाऽवयव विचार वा १ ३१ १३ वेदस्थ विज्ञानहेतु (भा०—वेदमन्त्रम्) ३ ११ वेदाख्यम् (भा०—सर्वेपा जीवाना हितसाधक वेदोपदेशम्) ३४ ५७ वेदस्थमन्त्रसमूहम् १ ४० ५ मन्वते गुप्तान् पदार्थान् परिभाषन्ते येन तम् (श्रुतिसमूहम्) प्र०—मन्त्रा मननात् नि० ७.१२, १ ४०.६ **मन्त्रः**=ईश्वरमारभ्य पृथिवीपर्यन्ताना गुप्तप्रसिद्धसामर्थ्यगुणाना पदार्थाना भाषणमुपदेशन ज्ञान वा भवति यस्मिन् येन वा स (वेदोपदेश) ऋ० भू० ९३, ऋ० ८ ८४९ ३ विचार १ १५२ २ विचारवान् (गुरु) १ १४७ ४ **मन्त्रान्**=वेदाऽवयवान् विचारान् वा १ ६७ २ **मन्त्राः**=विचारसाधका (वेदोपदेशा) ३४ ५३. वेदस्य श्रुतयो विचारा वा ६ ५० १४ [मत्रि गुप्तभाषणे (चुरा०) धातोर्घञ् । मन्त्रा मननात् नि० ७ १२ वाग् वै मन्त्र . श० ६ ४ १ ७ ब्रह्म वै मन्त्र श० ७ १ १ ५]

मन्त्रयन्ते गुप्त भाषन्ते १ १६४.१० [मत्रि गुप्तभाषणे (चुरा०) धातोर्लट् । मन्त्रयते अर्चतिकर्मा निघ० ३ १४]

मन्त्रिणे विचारकर्त्रे राजपुरुषाय (अमात्याय) १६ १९. [मन्त्र-प्राति० मत्वर्थे इनि । अथवा मत्रि गुप्तभाषणे (चुरा०) धातो 'वा छन्दसि' नियमेन निरुपपदादपि ताच्छील्ये णिनि]

मन्त्रेभिः ज्ञानयुक्तैर्विचारै १ ६७ ३ [मन्त्र-प्राति० भिस ऐस् न छान्दसत्वात्]

मन्थत मन्थन कुरुत ३ २९ ५. **मन्थन्ति**=विलोडयन्ति ३ २९ ६ **मन्थामि**=विलोड्य निवारयामि, विलोडनादिक्रियया निष्पादयामि ५ २ [मन्थ विलोडने (भ्वा०) धातोर्लोट् । अन्यत्र लट्]

मन्थाम् घृतादि निस्सारण मन्थानम् प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति नकारलोप १ २८.४ [मन्थ विलोडने (भ्वा०) धातोर्बाहु० औणा० आनच् । न लोपश्छान्दस । अथवा मथिन्प्राति० द्वितीयैकवचनम्]

मन्थिनम् मन्थितु शील यस्य तम् (सोमम्=ऐश्वर्यकारक पेयम्) ३ ३२ २. **मन्थिनः**=न्यायकारिण (पुरुषस्य) ७ १८ **मन्थी**=मथितु शील (पदार्थ) १८ १९ मन्थितु शीलमस्य न्यायाधीशस्य स (राजा) ७ १८ पदार्थाना मन्थनसाधन १३ ५७ मथ्नातीति (पदार्थ) ८ ५७ [मन्थ विलोडने (भ्वा०) धातोस्ताच्छील्ये णिनि । मन्थी=असौ वै शुक्र आद्यो मन्थी श० ४ २ १ ३ चन्द्रमा एव मन्थी श० ४ २ १ १ मन्थी सक्तुश्री तै० स० ४ ४ ९ १]

मन्थिपाः ये मन्थन्ति शत्रून् तान् वीरान् पान्ति ते (देवा =विद्वासो जना) ७ १७ ['मन्थिन्' उपपदे पा रक्षणे (अदा०) धातो क]

मन्थिशोचिषा सूर्यदीप्त्येव ७ १८ [मन्थिन्-शोचिप्-पदयो समास]

मन्द प्रशसय ६ १८ ९ **मन्दतु**=आनन्दयतु ७ २२.१ प्रशसतु ६ १७ ३ **मन्दन्तु**=कामयन्तु १ १३४ २ **मन्दसे**=हर्षसि १ ५१ १२ सर्वत्राऽऽनन्दयसि ३६ ७ **मन्दस्व**=आनन्दय २ ३६ ३ आनन्द ६ २३ ८. **मन्दामहे**=स्तुम १.१२२ १३ [मदि स्तुतिमोदमदस्वप्न-

यति वा ५ ६ **मन्यते**=जानाति मन्यते वा २३.३१ **मन्यथाः**=जानीया १ १२६ ७ **मन्यसे**=जानासि १ १२६ ५ **मन्यासै**=मन्यस्व ३४ ८ **मन्ये**=जानीयाम् १ १२७.१ सत्करोमि १५ ४७ विजानीयाम् १ १०४.७ [मन ज्ञाने (दिवा०) धातोर्लड् । छन्दसि अटोऽभाव । अन्यत्र लोटि लटि च रूपाणि । मन्यते इति कान्तिकर्मा निघ० २ ६ मन्यते इति अर्चतिकर्मा निघ० ३ १४ मन्यासै मन्यस्व नि० ११ २७]

मन्यमानम् अभिमानिनम् (जनम्) ६ १६ १२ **मन्यमानस्य**=विज्ञातु (विदुषो जनस्य) ३ ३२ ४ **मन्यमानः**=विजानन् (ईश्वर) ३४ ३५ सत्याभिमानी (राजा) ४ २६ २ जानने वाला (ईश्वर) स० वि० १५६, ७ ४१.२ अभिमानी (राज्यशासक) २ २३ १२ **मन्यमानान्**=अभिमानिन (शूरान् जनान्) १ १७८ ५. **मन्यमानाः**=विजानन्त (जनास =युद्धवीरा जना) ३ ५३ २३ **मन्यमानैः**=विद्याऽऽर्जवयुक्तैर्दुराग्रहरहितैर्मनुष्यैर्ज्ञानसम्पादकै किरणैर्वा १ ३३ ६ [मन ज्ञाने (दिवा०) धातो शानच् । 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति शक्तौ चानश् वा]

मन्यव. क्रोधादयो व्यवहारा ४ ३१ ६ **मन्यवे**= आन्तर्यक्रोधाय ३०.१४ न्यायव्यवस्थापालनहेतवे १ ८० ११ शत्रूणामुपरि क्रोधाय १३.३६ क्रोधयुक्ताय वीराय १६.१ क्रोधात् प्र०—अत्र पञ्चम्यर्थे चतुर्थी ३३ ६७ मन्यन्तेऽभिमान कुर्वन्ति यस्मिन् स मन्यु क्रोधो दुष्टाचरणेषु दुष्टेषु तद्भावनाय प्र०—यजिमनि० उ० ३ २०. अनेन मन्यतेर्युच् प्रत्यय २ ३२ **मन्युना**=दुष्टाचारिण पाप च प्रति वर्त्तमानेन क्रोधेन ३६ ८ **मन्युभिः**=क्रोधादिभि ७ ५६ २२ **मन्युम्**=मननम् भा०—आज्ञाम् २१ ५७ **मन्युः**=अभिमान १८ ४ दुष्टकाम और दुष्टो पर क्रोधकारी (ईश्वर) स० प्र० २४६, १६ ६ दुष्टानामुपरि क्रोधकृत् (ईश्वर) आर्याभि० २ ६, १६ ६ दुष्टाचारोपरि क्रोधकृत् (मन) भा०—दुष्टेषु क्रोधाविष्करणम् २० ६ [मन ज्ञाने (दिवा०) धातो 'यजिमनिशुन्धि०' उ० ३ २० सूत्रेण युच् । मन्युरिति क्रोधनाम निघ० २ १३ मनधातोर्दीप्त्यर्थाद्वा युच् । मन्यते कान्तिकर्मा निघ० २ ६ मन्यु =मन्यतेर्दीप्तिकर्मण क्रोधकर्मणो वधकर्मणो वा मन्यन्त्यस्माद् इषव नि० १० २६ पशुना वा एष मन्युर्यद्वराह तै० १ ७ ६ ४]

मन्याभिः विज्ञानक्रियाभि २५ २ [मन ज्ञाने (दिवा०) धातो 'वा छन्दसि' इति स्त्रिया श । ततष्टाप्]

मन्युमत्तमः प्रशसितो मन्यु क्रोधो यस्य सोऽतिशयित (राजा) ४.३०.७. [मन्युप्राति० प्रशसाया मतुप् । ततोऽतिशायने तमप्]

मन्युमीः यो मन्यु मीनाति हिनस्ति स (इन्द्र =सेनापति.) १.१००.६. यो मन्यु मिनोति स (जगदीश्वरो विद्वान् वा) २.२३.४. ['मन्यु' इत्युपपदे मीञ् हिंसायाम् (क्र्या०) धातो. कर्त्तरि क्विप्]

मन्ये सत्करोमि १५.४७ विजानीयाम् १.१०४.७. **मन्येथाम्**=विजानीतम् ३ ५८ ४. [मन ज्ञाने (दिवा०) धातोर्लट् । मन्यते इति अर्चतिकर्मा निघ० ३ १४]

मन्वत मन्यन्ते ४१.१६ [मनु अवबोधने (तना०) धातोर्लड् । अडभावश्छान्दस]

मन्वानः मननशील (विद्वत्सङ्गप्रियो जन) ५ ५२ १५ [मनु अवबोधने (तना०) धातोस्ताच्छील्ये चानश्]

ममकस्य मादृशस्य (पितु =जनकस्य) प्र०—अत्र बाहुलकान्मन्धातोर्डमकन् प्रत्यय. १ ३१ ११. **ममकाय**= ममाऽयं ममकस्तस्मै (सूनवे=औरसाय विद्यापुत्राय वा) प्र०—अत्र 'सज्ञापूर्वको विधिरनित्य' अ० ६ ४ १४६. इति वृद्ध्यभाव १.३४ ६ [अस्मत्प्राति० शैषिकेऽण्-प्रत्यये 'तवकममकावेकवचने' अ० ४ ३ ३. सूत्रेण ममकादेश । वृद्ध्यभावश्छान्दस. । 'सज्ञापूर्वको विधिरनित्य' इति वा वृद्धिर्न । अन्यत्र मन ज्ञाने (दिवा०) धातोर्बाहु० औणा० उमकन्]

ममत् प्रमादयन्ती (युवति =प्रमदा) ४ १८ ८ हर्षन् (विरोधिजन) ४ १८ ६ [मदी हर्षे (दिवा०) धातो शतृ । विकरणव्यत्ययेन श्लु]

ममतुः परिमीयेते ३ ३२ ७ [माङ् माने (जु०) धातोर्लिट् । वचनव्यत्यय । परस्मैपद च व्यत्ययेन]

ममत्तु आनन्दतु ३ ५१ ११ आनन्दयतु ७ २२ २ हर्षयतु १.१२२ ३. आनन्द प्र०—अत्र विकरणस्य श्लु १ १२१ ६ **ममत्सि**=हर्षयसि ४ २१ ६ **ममदन्**=हर्षन्ति ४ ४२.६. **ममदः**=आनन्द ७ २४ १ **ममन्द**=मन्दते कामयते २ ३३ ६ **ममाद**=हृष्येत् २ २२ १ हर्षति ६ ४७.२ हर्षयति ७ २६ १. [मदी हर्षे (दिवा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु । शपोऽभावे तत्स्थानीयश्यनोऽप्यभाव । अन्यत्र लटि लङि लिटि च रूपाणि । 'ममन्द' प्रयोगे मदि स्तुतिमोदमदादिषु (भ्वा०) धातोर्लिटि व्यत्ययेन परस्मैपदम्]

ममन्दुषी प्रशंसनीयाऽऽनन्दकरी (स्त्री) ५ ६१ ६

कारिणी जिह्वा यस्य तम् (अतिथिम्) १ १९० १ मन्द्रा प्रशंसनीया जिह्वा यस्य तम् (राजानम्) ५ २५ २ मन्द्रा आनन्ददा कल्याणकारी जिह्वा यस्य त विद्वासम् ४ ५० १ **मन्द्रजिह्वः**=मन्द्रा आनन्दप्रदा कमनीया जिह्वा वाणी यस्य स (सविता=विद्वान्राजा) ६ ७१ ४ [मन्द्रा-जिह्वा-पदयो समास । मन्द्रा=मदि स्तुतिमोदमदादिषु (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । ततष्टाप् । मन्द्रजिह्व मन्दनजिह्व मोदमानजिह्वमिति वा नि० ६.२३]

मन्द्रजिह्वा मन्द्रा प्रशसिता जिह्वा ययोस्तौ (अध्यापकोपदेशकौ) १ १४२ ८ [मन्द्रा-जिह्वापदयो समास । ततो द्विवचनस्याकारादेश]

मन्द्रतमम् अतिशयेन प्र ासादिसत्कृतम् (विद्वज्जनम्) ३३ १३ अतिशयेनाऽऽनन्दकरम् (सज्जनम्) ६ ४ ७ **मन्द्रतमः**=अतिशयेनाऽऽनन्दयुक्त (विद्वज्जन) ५ २२ १ अतिशयेनाऽऽनन्दयिता (होता =दातृ-जन) ६ ११ २ [मन्द्रप्राति० अतिशायने तमप् । मन्द्र =मदि स्तुतिमोदादिषु (भ्वा०) धातोरौणा० रक्]

मन्द्रतरः अतिशयेनाऽऽह्लादक (विद्वान् जन) ३ ७ ६ [मन्द्रप्राति० अतिशायने तरप्]

मन्द्रम् प्रशसनीयम् (सोमम्=ऐश्वर्यम्) ४ २६ ६ आनन्दप्रदम् (अतिथि=सत्योपदेशक जनम्) ४ २ ७ **मन्द्रस्य**=आनन्दत आनन्दयत (वचनस्य) ६ ३९ १ आनन्दप्रदस्य (विदुष पुरुषस्य) ३ ६ ७ **मन्द्रः**= प्रशसित (होता=विद्यादाता जन) १.१४१ १२ आनन्दित (अग्नि =विद्यार्थिजन) ५ ११ ३ आनन्दप्रद आनन्दित (अग्नि =परमात्मा) ४ ६ ५ कमनीयो हर्षयिता (वेधा = मेधाविजनः) ३ १४ १ आह्लादक (अग्नि =विद्वज्जन) ३ १० ७ स्तुत आनन्दप्रद (राजा) ३३ ६४ स्तोतुमर्हो धार्मिक (सज्जन) प्र०—अत्र 'स्फायितञ्चिवञ्चि०' उ० २ १३ इति रक्प्रत्यय १ २६ ७ पदार्थप्रापकत्वेन हर्षहेतु (राजदूत) १ ३६ ६ **मन्द्राः**=आह्लादयितार (उपदेशका जना) १ १२२ ११ **मन्द्रैः**=प्रशसितै (हरिभि =अश्वै) २० ५३ आनन्दप्रदै (हरिभि = अश्वै किरणैर्वा) ३ ४५ १ [मदि स्तुत्यादिषु (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ इति रक्]

मन्द्रया विज्ञानानन्दप्रदया (वाण्या) ५ २६ १ प्रशसितयाऽऽनन्दप्रदया (जिह्वया=वाचा) ७ १६ ९ आह्लादकामना विज्ञानप्रदया स्तुत्या १ ७६ ५. आनन्दसाधिकया (जिह्वया=सत्यप्रियया वाचा) १७.८ **मन्द्रा**=आनन्दप्रदा (अग्नेर्ज्वाला) १ १०० १६ **मन्द्राभिः**=आनन्दकारिकाभि (जिह्वाभि =वाग्भि) ६ १६ २ [मन्द्रमिति व्याख्यातम् । तत स्त्रिया टाप् । मन्द्रा वाङ्नाम निघ० १.११]

मन्द्रा आनन्दप्रदानि हवीषि २७ १५ [मन्द्र-प्राति० शेर्लोपश्छन्दसि]

मन्धातारम् यानेन सद्यो दूरदेश गमयितार मेधाविनम् १ ११२ १३ [मन्धाता मेधाविनाम निघ० ३ १५]

मन्म मन्तव्य विज्ञानम् ७ १० २ विज्ञानजनक शास्त्रम् १ १३१ ६ मन्तु योग्य ज्ञानम् १.१२९ ६ ज्ञातु योग्यम् (ज्ञानम्) १ १२९ ६ ज्ञानोत्पादक कारणम् ५ १२ २ मन्तव्यम् (अनेकविध सुखम्) २ १९ ८ मन्तव्य वेदोक्त ज्ञानम् १ १२० ३ **मन्मना**=येन मन्यते विजानाति तेन (मनसा=विज्ञानेन) १८ ७५ मन्यते जानाति येन तेन (ज्ञानेन) १ १४० १ विज्ञानवता (मनसा=चित्तेन) ३ १४ ५ **मन्मभिः**=ज्ञानविशेषै सह ३ ११ ८ मन्यन्ते जानन्ति यैस्तै (भा०—गुणप्रकाशै विद्यासाक्षात्कारै) प्र०—अत्र सर्वधातुभ्यो मनिन् उ० ४ १४५ इति मनिन्-प्रत्यय. ३ ५३ विद्वद्भि ४ ३ १५ विज्ञानैर्मन्यमानैर्वा (विप्रेभि =विपश्चिद्भि) १ १२७ २ **मन्मानि**= विज्ञानानि १.१६५ १३ मन्तव्यानि विज्ञानानि ७ ६१ २ यानानि २९ २६ [मन ज्ञाने (दिवा०) धातोरौणादिको मनिन् । मन्म मन नि० ६ २२ मन्म मननानि नि० १० ४२ मन्मभि मननीयै नि० १० ५]

मन्मनः मम मन १ १४०.११ [अस्मद्-मनस्-पदयो समास । 'प्रत्ययोत्तरपदयोश्च' इति अस्मदो मादेश]

मन्मनाम् मन्यमानाम् (प्रज्ञाम्) १ १५१ ६

मन्मसाधनः यो मन्मानि विचारयुक्तानि कार्याणि साधयति स (परमेश्वर) १ ९६ ६. मन्म विज्ञान साधन यस्य स (विद्वज्जन) १.१५१ ७ [मन्म इति व्याख्यातम् । तदुपपदे साध ससिद्धौ (स्वा०) धातोर्ल्युट् । 'कृत्यल्युटो बहुलम्' इति कर्त्तर्यपि ल्युट्]

मन्महे विजानीम ५ ५८ ३ मन्यामहे याचामहे वा १ ६२ १ [मन ज्ञाने (दिवा०) धातोर्लट् । 'बहुल छन्दसि' सूत्रेण शपो लुकि श्यनोऽप्यभाव । मन्महे याञ्चाकर्मा निघ० ३ १९]

मन्यत मन्येत ४ १७ ४ मन्यसे ४.१७.१. **मन्यताम्**=विज्ञापयतु स्वीकुरुताम् ४ २० स्वीकरोतु स्वीकार-

कारिका (ऊतय =रक्षणादिक्रिया) १ ६१ ६ सुखस्य भावयितार (वैद्या) १ ८९ ४ या मय सुख भावयन्ति ता (आप =सत्स्त्रिय) प्र०—मय इति सुखनाम निघ० ३.६, ३६ १४ **मयोभुवा**=सुख भावुकेन (अवसा=अन्नादिना) ६ ७६ ५ सुखसाधकेन (अवसा=रक्षणादिना) ५ ७७ ५ या मय सुख भावयति तया सत्यप्रियमङ्गलकारिण्या (वाचा=वेदवाण्या) प्र०—अत्राऽन्तर्गतो ण्यर्थ 'क्विप् चे' ति क्विप् ३ ४७ **मयोभूः**=मय सुख भावयन् (स्वस्तिगव्यूति =राजा) ११ १५ यो मय आनन्द भावयति स भा०—सुखकारी (विद्वज्जन) १८.४५ सुख भावुक (विद्वज्जन) १८ ४५ मय सुख भावयति या सा (ऊति =नीति) १ ११७ १६. [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्। मयोभुव सुखभुव नि० ६ २५]

मयोभुवा सुख भावयितारौ (अश्विनौ=वाय्वग्नी) १ ६२ १८. सुख भावुकौ (अश्विनौ=अध्यापकोपदेशकौ) ५ ४२ १८ ['मयोभू' रिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

मयोभुः सुख भावुक (राजा) ६ ५२ ६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातोर्डु]

मयोभून् मय सुख भावुकान् (सुवीरान्) १ ८४ १६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्। मयोभून्=सुखभूनि नि० १३ ३६]

मराति म्रियते १ १६१ १० **मराम**=म्रियेमहि १ १६१ १० **मरामहे**=अकालमृत्यु क्षणभङ्गुर-देहे प्राग्नुयाम प्र०—अत्र विकरणव्यत्यय १ ६१ ६ [मृङ् प्राणत्यागे (तुदा०) धातोर्लेट्। विकरणव्यत्ययेन शप् परस्मैपद च। अन्यत्र लडपि। मरते=म्रियते नि० ११ ३८]

मरीचयः किरणा प्र०—'मृकणिभ्यामीचि' उ० ४७०, १६ ३६ **मरीचीः**=किरणान् २५ ६ [मृङ् प्राणत्यागे (तुदा०) धातो. 'मृकणिभ्यामीचि' उ० ४ ७० सूत्रेण ईचि। मरीचि एता वाऽआप स्वराजो यन्मरीचय श० ५ ३ ४.२१ सूर्यस्य मरीचि (पत्नी) तै० आ० ३ ६ २]

मरीचिपेभ्यः रश्मिभ्य ७ ६ किरणरक्षितृभ्य (देवेभ्य =वाय्वादिभ्य) ऊव ७ ३ ['मरीचि' इत्युपपदे पा रक्षणे (अदा०) धातो क। मरीचिपा. रश्मिनाम निघ० १ ५]

मरुतः वायव प्र०—'मृग्रोरुति' उ० १ ६४ इति मृङ्-धातोरुतिप्रत्यय मरुत इति पदनामसु पठितम् निघ० ५.५ अनेन गमनागमनक्रियाप्रापका वायवो गृह्यन्ते १.१५ २. सभाद्यध्यक्षादयो मनुष्या १ ८७ २ मरणधर्माण (मर्या.=मनुष्या) ३ ५४ १३ विद्वासो मनुष्या ५ ५८ ६ सुशिक्षिता मानवा ५ ५८ ४ मननशीला (मनुष्या) ५ ५६ ४ मरणधर्माणो मनुष्यास्तत्सम्बुद्धौ १ ८५ १२ पुरुषार्थिनो मनुष्या ५ ५४ १४ शिल्पिनो मनुष्या ५ ६३.५. विद्वत्तमा (जना) १ १६५ १५ मरुद्वत्सुचेष्टा (जना) १ १६६ ६. महाबलिष्ठा (जना) १ १६७ ६ ब्रह्माण्डस्था अन्ये वायव १८ १७ हिरण्यानि रूपाण्यृत्विजो विद्वासश्च (गृहस्था) ८ ३१. मरणधर्मयुक्ता (विद्वासो जना) २ ३४.१. मरणधर्मस्य (देवस्य=विदुषो जनस्य) ६ ४८ २० उत्तमा मनुष्या ६ ६६ ८ परीक्षका विपश्चित १ ८६.२. प्राणादय १ ५२ ६ प्राण इव प्रिया सभासद १ १७१ ४ प्राणवायुवत्प्रिया (विद्वज्जना) २ ३४ ७ वायव इव व्याप्तविद्या मनुष्या ७.५७ ७. वायव इव वेगबलयुक्ता (धार्मिका विद्वज्जना) ३ ३२.४ वायुवद् बलिष्ठा शूरवीरा १७ ४० पवना १ १०७ २ सूक्ष्माऽवयवा १ १६१ १४ वायव इव ज्ञानयोगेन शीघ्र गन्तारो मनुष्या १ ८५ ६ युक्त्या सेविता वायव १ ६४ १३ वायुवच्छीघ्रगमनकारिणो जना १ ३८ ३ योगाभ्यासिनो व्यवहारसाधका वा जना १.३८ ११ प्राण इव नेतार (मनुष्या) ७ ५६ १ शरीरत्यागहेतव (वायव) १ ६४ ६ वायुविद्यावेत्तार (जना) १ १६६ ५ प्राण इव प्रियाचरणा (मनुष्या) ५.५५ ४ मरणशीला (मनुष्या) ५ ५७ ८ ज्ञानक्रियानिमित्तेन शिल्पव्यवहारप्रापकान् (वायून्) प्र०—मरुत इति पदनामसु पठितम् निघ० ५ ५ अनेन प्राप्त्यर्थो गृह्यते १ २३ १० मननशीलान् मनुष्यान् ३३ ४६. विदुषाऽतिथीन् अ०—ऋत्विज भा०—यज्ञसम्पादका मनुष्या ३ ४४. **मरुताम्**=विदुषाम् (जनानाम्) १८ ४५. मनुष्याणा वायूना वा ५ ५३ १ पशूनाम् १४ २५ ऋतावृती यजता विदुषाम् १ ११४ ६ प्राणानामृत्विजा वा १० २३. पूर्णविद्याबलयुक्ताना पुरुषाणाम् १७ ४१ प्राणादि पवनो के ग्रार्याभि० १.२७, ऋ० ५ ३ २७ २५ **मरुत्सु**=मनुष्येषु ४ १३ स्तावकेषु (जनेषु) १ १४२ ८ **मरुद्भिः**=वायुभिरिव स्वमित्रै सह ३ ४७ ४ प्राणैरिव वर्त्तमानै श्रेष्ठैर्जनै सह १ १३६ ७ दिव्यगुणैर्देवै सह १ १६ ६ धनञ्जयाख्यै सूक्ष्मै १ १६ ८ अनेकविधैर्निमित्तभूतैर्वायुभि १ १६ ६ उपर्यधोगमनशीलैर्वायुभि १.१६ ७. प्राप्तहेतुभि सह १ १६ ५. विद्वद्भि पवनैर्वा १ १०७ २ **मरुद्भ्यः**= पश्वादिभ्य प्रजाभ्य ३० ५ वायुवद् वर्त्तमानेभ्यो मनुष्येभ्य २४.१६ वायूनामाधारबलाकर्षणेभ्य १ ८५ ८ मनुष्येभ्य

[मदि स्तुतिमोदादिषु (भ्वा०) धातोर्लिट क्वसु। ततो ङीप्]

ममहन्त सत्कुर्वन्तु प्र०—अत्र 'तुजादीनाम्०' इत्यभ्यासदैर्घ्यम् ७ ५२ २ **ममहन्ताम्**=वर्धन्ताम् प्र०—व्यत्ययेनाऽत्र शप श्लु १ ६४ १६ सत्कारेण वर्धयन्ताम् १ १०० १९ सत्कारहेतवो भवन्तु १ ६६ ६ **ममहस्व**=भृश सत्कुरु ३ ५२ ६ **ममहे**=मह्यति प्र०—अत्र 'मह पूजायाम्' इत्यस्माल्लटि 'वहुल छन्दसि' इति श्लुर्विकरणो व्यत्ययेनाऽऽत्मनेपद तुजादित्वाद् दीर्घ १ ६५ १३ सत्कुर्याम् ५ २७ १ **ममुः**=मान कुर्वन्ति १ ११०.५ [मह पूजायाम् (भ्वा०) धातोर्लङ्। व्यत्ययेन श्लुरात्मनेपदश्च। अन्यत्र लोटि लटि च रूपाणि]

ममाते मिमाते परिछिन्त प्र०—अत्र 'वहुल छन्दसि इत्यभ्यासेत्वप्रतिषेध ३ ३२ ७ **ममिरे**=निर्मिमते ७ २१ ७ मिमीते १ ५७ ५ व्याप्नुवन्ति ५ ५५ २ निर्मिमीरन् ३ ३८.३ मिनुयु २९ १९ **ममे**=सृजति ५ ८५ ५ मिमीते १ ५७ ५ मापयति १ १६० ४ [माङ् माने शब्दे च (जु०) धातोर्लट्। 'वा छन्दसी' त्यभ्यासेत्वप्रतिषेध। अन्यत्र लिट्]

ममृड्युः सुखयन्ति ४ १८ ८ [मृड सुखने (तुदा०) धातोर्लिटि छान्दस रूपम्]

ममृवान् मृत सन् १ ११६ ३ योगक्षेमविरह ऋ० भू० १८६, १ ११६ ३ [मृङ् प्राणत्यागे (तुदा०) धातोर्लिट क्वसु]

मम्नाते अभ्यासाते ७ ३१ ७ [म्ना अभ्यासे (भ्वा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्। कर्मणि वा रूपम्]

मम्रुषीः=म्रियमाणा (स्त्रिय) १ १४० ८ [मृङ् प्राणत्यागे (तुदा०) धातोर्लिट क्वसु। तत स्त्रिया ङीप्]

मय इव सुखमिव १ १७५ ६ [मय-इवपदयो समास]

मयः ऐहिक सुखम् १८.८ सुखकारी (अग्नि=भौतिक सूर्यरूप) २२ १९ सुख सुखविशेषो वा ७ ४७ [मय इति सुखनाम निघ० ३ ६ यद्वै शिव तन्मय तै० २ २ ५ ५]

मयन्दम् यन्नय सुख ददाति तम् (छन्दः=विद्याधर्मशमादिकर्म) १४ ९ ['मयम्' इत्युपपदे डुदाञ् दाने (जु०) धातो क। मयन्दम्=यद्वा अनिरुक्त तन्मयन्दम् श० ८ २ ३ १३]

मयस्कराय य सर्वेषा प्राणिना मय सुख करोति तस्मै (परमेश्वराय सेनाधीशाय वा) १६ ४१ मन, इन्द्रिय, प्राण और आत्मा को सुख करने वाले (ईश्वर) के लिए आर्याभि० २ २६, १६ ४१ सुखकारकाय प० वि० [मयस्-उपपदे डुकृञ् करणे (तना०) धातो 'कृञो हेतुताच्छील्यानुलोम्येषु' अ० ३ २ २० सूत्रेण ट। मयस् सुखनाम निघ० ३ ६]

मयुम् जाङ्गलम् (पशु=चतुष्पाद गवादिकम्) १३ ४७. शस्यादिहिंसकम् पशुम् १३ ४७ **मयुः**=किन्नर २४ ३१ [डुमिञ् प्रक्षेपणे (भ्वा०) धातो 'भृमृशीङ्तृ०' उ० १ ७ सूत्रेण उ]

मयूखैः ज्ञानप्रकाशादिगुणै रश्मिभिर्वा प्र०—मयूखा इति रश्मिनामसु पठितम् निघ० १ ५, ५ १६ [माङ् माने शब्दे च (जु०) धातो 'माङ ऊखो मय च' उ० ५ २५ सूत्रेण ऊखो मयादेशश्च। मयूखा रश्मिनाम निघ० १ ५]

मयूररोमभिः मयूराणा लोमानीव लोमानि येषान्तै (हरिभि=अश्वै किरणैर्वा) ३ ४५ १ मयूरस्य रोमाणीव रोमा येषान्तै (हरिभि=अश्वै) २० ५३ [मयूररोमन्-पदयो समास]

मयूर्यः मयूराणा स्त्रिय १ १९१ ४ [मयूरप्राति० स्त्रिया ङीप्। प्रथमाबहुवचने रूपम्। मयूर=मीञ् हिंसायाम् (क्र्या०) धातो 'मीनातेरूरन्' उ० १ ६७ सूत्रेण ऊरन्]

मयोभवाय मय सुख भवति यस्मात्तस्मै (परमेश्वराय सेनाधीशाय वा) १६ ४१ सर्वोत्तमसौख्यप्रदाय (ईश्वराय) प० वि० सासारिक सुख के करने वाले (ईश्वर) के लिए आर्याभि० २ २६, ३६ ४१ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो 'ऋदोरप्' इत्यप्]

मयोभु मय सुख भवति यस्मात्तत् (सज्ज्ञानम्) २ २७ ५ परमसुख भवति यस्मात्तत् (भेषजम्=औषधम्) १ ८९ ४ सुख भावुकम् (ब्रह्म=जगदीश्वरम्) ५ ४२ २ सुखकारि (भेषजम्=औषधम्) २५ १७ **मयोभुना**=यो मयासि सुखानि भावयति तेन (राया=धनेन) ३ १६.६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो 'डुप्रकरणे मितद्र्वादिभ्य उपसख्यानम्' अ० ३ २ १८० वा० सूत्रेण डु]

मयोभु सुख भावुकानि (भेषजा=रोगनिवारकौषधानि) २ ३३ १३. ['मयोभु' इति व्याख्यातम्। तत शे 'सुपा सुलुक्०' इति लुक्]

मयोभुवम् सुखकारकम् (देव=विद्वास जनम्) १ १३८ २. सुख भावुकम् (विदुष जनम्) १ १३८.१ **मयोभुव.**=सुख भावुका (मनुष्या) ५ ५८ २ सुख-

मरुद्वृधः मनुष्यैर्वर्द्धमानान् (भा०—धनैश्वर्योपायान्) ३.१३ ६ [मरुदुपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप्। मरुद्वृध =सर्वा नद्य, मरुत एना वर्धयन्ति नि० ६ २४]

मरुन्नेत्राः मरुति ब्रह्माण्डस्थे वायौ नेत्र नयन येषा ते (देवा =सर्वेभ्य सुखदातारो विद्वज्जना) ६ ३६ **मरुन्नेत्रेभ्यः**=मरुतामृत्विजा प्रजास्थाना सज्जनाना वा नेत्रमिव नायकत्व येषा तेभ्य (देवेभ्य =दिव्यन्याय-प्रकाशकेभ्यो विद्वद्भ्य) ६ ३५ [मरुत्-नेत्रपदयो समास। मरुत इति व्याख्यातम्। नेत्रम्=णीञ् प्रापणे (भ्वा०) धातोरौणा० ष्ट्रन्। ये देवा पश्चात्सदो मरुन्नेत्रा मैं० २ ६ ३]

मर्कटः वानर २४ ३० [मर्क इति सौत्रो धातु। ततो बाहु० औणा० अटन्]

मर्कः मृत्युनिमित्त खल्वन्यायकारी (दुर्जन) ७ १८ मरणदु खदो दुर्नय ७ १७ **मर्काय**=मृत्युनिमित्ताय वायवे अ०—दुष्टाना प्रशमनाय श्रेष्ठव्यवहारस्थापनाय ७ १६ [मर्च इति सौत्रो धातु चेष्टायामर्थे। तत 'इण्-भीकापा०' उ० ३ ४३ इति कन्]

मर्चयति शब्दयति १ १४७ ५ उच्चरति १ १४७ ४. बाधते ५ ३ ७ **मर्चयात्**=सुमार्गे नयेत् २ २३ ७ [मर्च शब्दार्थे (चुरा०) धातोर्लेट्। अन्यत्र लिङ्]

मर्जयध्वम् शोधयत ७.२४ **मर्जयन्त**=शोधयन्तु ५ ३.३ शोधयन्ति १ ६१ २. घर्षणादिना शोधयन्तु ७ ३.५ **मर्जयेम**=शोधयेम ४ ४ ८ [मृजू शौचालङ्क-रणयो (चुरा०) धातोर्लोट्। अन्यत्र लडि लिङि च रूपाणि। वृद्ध्यभावश्छान्दस]

मर्जयन्तः शोधयन्त (गोतमासो जना) १ ६० ५. [मृजू शौचालकरणयो (चुरा०) धातो शतृ। वृद्ध्यभाव। मर्जयन्त गमयन्त नि० १२ ४२]

मर्डिता सुखप्रदाता (धार्मिको मनुष्य) १ ८४ १६ सुखयिता (इन्द्र =ईश्वर) ४ १७ १७ **मर्डितारम्**= सुखकरम् (इन्द्र=राजानम्) ४ १८ १३ [मृड सुखने (तुदा०) धातो कर्त्तरि तृच्। मर्डिता सुखयिता नि० १३ २८]

मर्त्त मरणधर्मयुक्त (मनुष्य) ५ ६६ १ **मर्त्तम्**=मनुष्यम् १ १३६ ५ **मर्त्तस्य**=मरणधर्मसहितस्य प्राणि-जातस्य १ ६२ १०. मननशीलस्य नरस्य ६ २८ ४ **मर्त्ता**=मनुष्य ४ ८ **मर्त्ताः**=अविद्वासो मनुष्या ४ १७ १६ मरणधर्माणो मनुष्या ३ ६ ६. साधारण-मनुष्या १ १०० १५ **मर्त्तेषु**=मरणधर्मेषु कार्येषु ५ १८ १ [मर्त्त इति मनुष्यनाम निघ० २ ३ मृङ् प्राण-त्यागे (तुदा०) धातो 'हसिमृग्रिण्०' उ० ३ ८६ सूत्रेण तन्]

मर्त्तभोजनम् मर्त्तेभ्यो मनुष्येभ्यो भोजन मर्त्ताना पालन वा १ ८१ ६ मर्त्तेभ्य इद भोजनम् ७ ३८ २. मर्त्ताना मनुष्याणा भोज्य वस्तु १ ११४ ६. [मर्त्त-भोजन-पदयो समास। भोजनम्=भुज पालनाभ्यवहारयो (रुधा०) धातोर्ल्युट्]

मर्त्तभोजना मर्त्ताना मनुष्याणा भोजनानि पाल-नानि ७ १६ ४ [मर्त्त-भोजनपदयो समासे शेर्लोपश्छन्दसि]

मर्त्तासः शरीरयोगेन जन्म-मरणसहिता (मनुष्या) २ १.१४ मननशीला मनुष्या. ३ ६ १ मरणधर्माण (मनुष्या) १ १०५ १६ [मर्त्तप्राति० प्रथमाबहुवचने जसो ऽसुक्]

मर्त्यकृतम् साधारणमनुष्याऽऽचरितम् (एन = दुष्टाचरणम्) ८ २७ मर्त्यैराचरितम् (एन =पापम्) २० १८ अनित्यदेहेन निष्पादितम् भा०—अज्ञानादनुष्ठितम् (एन =पापम्) ३ ४८ [मर्त्य-कृतपदयो समास]

मर्त्यम् प्रजास्थ मनुष्यम् ६ ३७ पृथिव्यात्मक लोकम् ऋ० भू० १४२, ३३ ४३ मनुष्य-लोकम् ऋ० भू० १४२, ३३ ४३ मनुष्यशरीरधारिणम् (शत्रुम्) ५ ३५ ५ नाशसहित कार्य्यम् ३४ ३१ मनुष्यादिप्राणिजातम् ३३ ४३ विद्वास मनुष्यम् १.१८ ५ कर्म्म, प्रलयप्राप्तिव्यवस्थया कालव्यवस्थया वा मरणधर्मयुक्त प्राणिनम् १ ३५.२ **मर्त्यस्य**=साधारणमनुष्यस्य ६ ४८ २० मरणधर्मकस्य विश्वस्य मनुष्यस्य ऋ० भू० १३०, ३१ १७ अविदुष. (पुरुषस्य) २ ७ २ पीडितस्य मनुष्यस्य मर्त्तस्य ७ २५ ३. **मर्त्यः**=सुशिक्षितो धार्मिको भृत्यो मनुष्य १ ८३ १. अविद्वान् मनुष्य १ १६ २ **मर्त्यान्**=मरणधर्मान् मनुष्यादीन् ४ ५८ ३ **मर्त्यानाम्**=अविदुषाम् (जनानाम्) ४ १२ ५ मरणधर्माणा शत्रूणाम् ५.४ १ विद्याविज्ञानरहि-ताना मनुष्याणाम् ऋ० भू० २०५, १६ ४७ **मर्त्याय**= मरणधर्माय (मनुष्याय) ४ १२ ३ मनुष्यसुखाय ५ ४१ ७. नराय पतये १ १२४ १२ मनुष्य के लिए मं० वि० १०५, ५ ४१ ७ **मर्त्ये**=मर्त्यलोके ३ २ ६ **मर्त्येन**=मरण-धर्मेण शरीरेण १ १६४ ३० मरणधर्मसहितेन शरीरादिना १ १६४ ३८ **मर्त्येषु**=नश्यमानेषु पदार्थेषु १ ७७ १. मरणधर्मेषु मनुष्येषु कार्येषु वा ४ १६ **मर्त्यैः**=अविद्वद्भि-र्मनुष्यै २० १८ मृत्युधर्मै (मनुष्यै) ८ २७ मरणधर्मै

५ ५ ११ प्राण इव प्रियेभ्य (भा०—विद्वज्जनेभ्य) २४ १६ [मृङ् प्राणत्यागे (तुदा०) धातोः 'मृग्रोरुति' उ० १ ९४. सूत्रेण उति । मरुत ऋत्विङ्नाम निघ० ३ १८ पदनाम निघ० ५ ५ मरुत् हिरण्यनाम निघ० १ २ मरुत् रूपनाम निघ० ३.७ मरुतो मितराविणो वा मितरोचिनो वा महद् द्रवन्तीति वा नि० ११ १४ मरुतो रश्मय ता० १४.१२ ९ युञ्जन्तु त्वा मरुतो विश्ववेदस इति युञ्जतु त्वा देवा इत्येवैतदाह श० ५ १ ४ ९ गणशो हि मरुत ता० १९ १४ २ मरुतो गणाना पतय तै० ३ ११ ४ २ सप्त सप्त हि मारुता गणा श० ९ ३ १ २५ मारुत सप्त-कपाल (पुरोडाश) ता० २१ १० २३ मरुतो वै देवाना भूयिष्ठा ता० १४ १२ १. मरुतो ह वै देवविशो ऽन्तरिक्ष-भाजना ईश्वरा कौ० ७ ८. अहुतादो वै देवाना मरुतो विट् श० ४ ५ २ १६ मरुतो वै देवानामपराजितमायतनम् तै० १ ४ ६ २ अप्सु वै मरुत श्रित गो० उ० १ २२ आपो वै मरुत ऐ० ६ ३० पङ्क्तिश्छन्दो मरुतो देवताष्ठीवन्त श० १० ३ २ १० मरुत स्तोमो वा एष (षोडशस्तोम) ता० १७ १ ३ ओजो वै वीर्यं मरुत जै० ३ ३०९ कीनाश (कृषी कर्मकरा) आसन्मरुत सुदानव तै० २ ४ ८ ७ चत्वारिंशन्मरुतो देवा जै० १ ३४ मरुतो गणाना पतय तै० ३ ११ ४ २ वीर्यं मरुत जै० १ ३०३]

मरुत्तमा अतिशयेन विद्वद्युक्तौ (अश्विना=अध्यापकोपदेशकौ) १ १८२ २ [मरुत्प्राति० अतिशायने तमप् । ततो द्विवचनस्याकारश्छान्दस]

मरुत्वत: प्रशसितविद्वद्युक्तस्य (राज्ञ) ५ ४२ ६ **मरुत्वते**=मरुतो वहवो मनुष्या कार्यसाधका विद्यन्ते यस्य तस्मै (शिल्पिजनाय) ३ ३५ ७. प्रशस्तानि मरुदस्त्राणि विद्यन्ते यत्र तस्मै (इन्द्राय=रणाय) ७ ३८ प्रजासम्बन्धाय प्र०—अत्र सम्बन्धे मतुप् 'झय' इति मस्य वत्वम् ७ ३५ प्रशसितप्रजायुक्ताय (इन्द्राय=सभापतये) ७ ३६ प्रजापालन-सम्बद्धाय (राज्यैश्वर्याय) ७ ३८ प्रशसिता मनुष्या यस्मिन् तस्मै (विद्युद्रूपाग्नये) ५ ८७ १ **मरुत्वन्तम्**=प्रशस्त-प्रजायुक्तम् (इन्द=सम्राज प्रजापतिम्) ७ ३६ प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्य तम् (इन्द्र=परमैश्वर्यवन्त राजानम्) ३ ४७ ५ सर्वप्राणियुक्तमृत्विग्युवत वा (इन्द्र=जगदीश्वर सभाध्यक्ष वा) १ १०१ ३ प्रशस्ता मरुतो विद्यावन्त ऋत्विजोऽध्यापका विद्यन्ते यस्मिँस्तम् (अ०—अध्यापकम्) १ १०१ १ मरुत सम्बन्धिनो विद्यन्ते यस्य तम् (इन्द्र=विद्युतम्) प्र०—अत्र सम्बन्धार्थे मतुप् 'तसौ मत्वर्थे' अ० १ ४ १९ इति भत्वाज्जश्त्वाऽभाव १ २३ ७

मरुत्व:=प्रशस्तविद्यायुक्त (विद्वज्जन) १ १०१.८. प्रशसितवनयुक्त (इन्द्र=राजन्) ३ ५१ ७ मरुत प्रशस्ता धर्मसम्बद्धा. प्रजा यस्य तत्सम्बुद्धौ (इन्द्र=सम्राट्) ७.३५. **मरुत्वान्**=मरुतो वहवो वायवो विद्यन्ते यस्मिन् स (सूर्य) ६ ४७ ५ प्रशस्ता मरुत प्रजा सेना वा विद्यन्ते यस्य स (इन्द्र =शत्रुजित् सेनापति) ७ ३८ प्रशस्तवायु-मान् (इन्द्र =सूर्य) १ ८०.११ यस्य सृष्टौ सेनाया वा प्रशस्ता वायवो मनुष्या वा विद्यन्ते स (इन्द्र =परमेश्वर. सभाध्यक्षो वा) १ १०० २ प्रशस्तरूपवान् (इन्द्र =विद्यु-दादिरूपोऽग्नि) ३ ४ ६ मनुष्यादिवहुप्रजायुक्त (वैद्यो जन) २.३३ ६ अत्यन्त वलवान् (इन्द्र =परमात्मा) आर्याभि० १ ३२ ऋ० १ ७ १० १५. [मरुत्-प्राति० सम्बन्धार्थे प्रशसाया भूम्न्यर्थे वा मतुप् । 'झय' इति मतुपो मस्य वत्वम् । 'तसौ मत्वर्थे' इति भत्वाज्जश्त्व पदकार्यं न भवति । मरुत्वान्=मरुद्भिस्तद्वान् नि० ४ ८]

मरुत्वती प्रशस्तरूपयुक्ता (राज्ञी) २ ३० ८ प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्या सा (वाणी=सकलविद्या-युक्ता वाक्) ७ ३१ ८ **मरुत्वती:**=मनुष्यादिप्रजा-सम्बन्धिनी (अप =जलानि) १ ८० ४ [मरुत्-प्राति० मतुवन्तात् स्त्रिया ङीप्]

मरुत्वतीयम् वहवो मरुतो व्याख्यातारो मनुष्या विद्यन्ते यस्मिँस्तत्र भवम् (उक्थ=वाच्यम्) १५ १२ [मरुत्-प्राति० भूम्न्यर्थे=मतुप् । तत 'सास्य देवता' इत्यर्थे 'द्यावापृथिवी शुनासीर०' अ० ४ २ ३२ सूत्रेण छ । छस्येयादेश । छन्दसि भवार्थेऽपि]

मरुत्वतीया: मरुता सम्बन्धिनो व्यवहारा १८.२० [मरुत्वत्-प्राति० भवार्थे छ । मरुत्वतीयम्—(शस्त्रम्) पवमानोक्थ वा एतद् यत् मरुत्वतीयम् ऐ० ८ १ तदेतद् वार्त्रघ्नमेवोक्थ यन्मरुत्वतीयमेतेन इन्द्रो वृत्रमहन् । कौ० १५ २ तदेतत् पृतनाजिदेव सूक्त यन्मरुत्वतीयमेतेन ह इन्द्र पृतना अजयत् कौ० १५ ३ वज्रो वै मरुत्वतीया (ग्रहा.) मै० ४ ६ ८]

मरुत्स्तोत्रस्य मरुता वेगादिगुणै स्तुतस्य (वृजनस्य=व्यवहारस्य) १ १० ११ [मरुत्-स्तोत्रपदयो समास]

मरुद्गण मरुता मनुष्याणा वायुना वा गण समूहो वा यस्य तत्सम्बुद्धौ भा०—न्यायाधीश (इन्द्र=राजन्) ३३ ९५ **मरुद्गण:**=मरुतामुत्तमाना मनुष्याणा गण. समूहो यस्य स (इन्द्र =राजा) ६ ५२ ११ **मरुद्गणा:**=मरुता मनुष्याणा समूहा २ ४१ १५ [मरुत्-गणपदयो समास]

क्विप्-प्रत्यये पृषोदरादित्वाद् रूपसिद्धि]

मलिम्लुचाय स्तेनाय प्र०—मलिम्लुच इति स्तेननाम निघ० ३ २४, २२ ३० [मलिन्-उपपदे म्लुचु गत्यर्थे (भ्वा०) धातो क]

मशर्शारस्य यो मशान् दुष्टान् शब्दान् शृणाति हिनस्ति तस्य (राज) प्र०—अत्र पृषोदरादिना पूर्वपदस्य रुगागम १ १२२ १५ [मशोपपदे शॄ हिंसायाम् (क्र्या०) धातोरण्]

मस्तिष्केण शिरस्थमज्जातन्तुसमूहेन २५ २ [मस्त मस्तकम् इष्यति स्वाधारत्वेन प्राप्नोतीति विग्रहे मस्तोपपदे इषु गतौ (दिवा०) धातो क । पृषोदरादित्वाद् रूपसिद्धि]

महत् पुष्कलम् (वीर्यं=पराक्रमम्) २ १७ ३. सर्वेभ्यो बृहत् (चेतनमात्रस्वरूप ब्रह्म) ३ ५५ ५ -पूज्य बृहत् (यश) ३२ ३ विस्तीर्णम् (आवपन=क्षेत्रम्) २३ ६ बडे (असुरत्वम्=चेतनमात्र ब्रह्म) स० प्र० ११०, ३ ५५ १६ बडा (यश =धर्मयुक्त कामो का करना) स० प्र० ४५५, ३२ ३ महोत्तमगुणविशिष्टम् (पौंस्य=पुरुषार्थयुक्त बलम्) १ १०१ ३ **महान्ति**=विज्ञानादीनि ५ ५९ ४ [महत् उदकनाम निघ० १ १२ महत् महन्नाम निघ० ३ ३ महति पूजयति पूज्यते वा तन्महदिति विग्रहे मह पूजायाम् (भ्वा०) धातो 'वर्त्तमाने पृषद्बृहन्महत्'० उ० २ ८४ सूत्रेण अति । महान् कस्मान् मानेनान्याञ्जहानीति शाकपूणि । महनीयो भवतीति वा नि० ३ १३ महद्वा अन्तरिक्षम् ऐ० ५ १८,१६ अन्तो वै महत् ऐ० ५ २, १२ एष ह वै महान् देवा यद्यज्ञ गो० १ २ १६.]

महत पूज्यस्य व्यापकस्य वा (सत्यस्य=जगदीश्वरस्य) २ १५ १ पूजनीयस्य (राज्ञ) ४ २२ ५ प्रबलान् (शत्रून्) १ १७८ ५ आकाशादे २० ३२ **महति**=विशाले (सधस्थे=सहस्थाने) ११ १८ व्यापकत्वादिमहागुणविशिष्टे (अन्तरिक्षे=अन्तरिक्षस्य आकाशे) १६ ५५ **महते**=बृहते पूजिताय वा (इन्द्रियाय=धनाय) १ १०४ ६ बहुविधाय (धनाय) १.१०४ ७ बडे (क्षत्राय=चक्रवर्त्ति राज्य के लिए) स० प्र० १८३, ६ ४० विशिष्टाय पूज्यतमाय (सौभगाय=सुष्ठु ऐश्वर्याणा भावाय) ५ ४३ सत्कर्त्तव्याय (क्षत्राय=क्षत्रियकुलाय) १० १८ **महत्सु**=महाप्रबलेषु (आजिषु=सङ्ग्रामेषु) १.८१ १ **महद्भिः**=महाशयै (राजप्रजाजनै) ४ ४१ २ महासुखकारकैर्गुणै १.७२ ६ महागुणविशिष्टै (वाजेभि =मन्यै) ४ २२ ३. **महद्भ्यः**=महाशयेभ्यो विद्यावयोभ्या वृद्धेभ्य पूज्येभ्यः (राजपुरुषेभ्य) १६ २६ **महद्भ्याम्**=पूज्याभ्याम् (पित्राचार्यादिभ्याम्) ३ ७ ६ **महान्**=सर्वोत्कृष्ट पूज्यतमश्च (इन्द्र.=भगवान् जगदीश्वर) ७ ३६ महागुणकर्मस्वभाव (इन्द्र =ईश्वर) ७ ४० महाशय. (इन्द्र =राजा) ६ ४५ १३ सर्वेभ्यो ज्येष्ठ (विद्युद्रूपोऽग्नि) ३८.२२ सर्वेभ्यो वरीयान् सर्वै पूज्यश्च (ईश्वर) १३.२ गुणैर्महत्त्वयुक्त (वर) १ ५६ ३ पूज्यतमो महाशय (इन्द्र=ऐश्वर्यवान् विद्वज्जन) ३ ३६ ५ सर्वोत्कृष्ट (सेनापति) १ ८१ ४ सर्वेभ्यो महत्तम (इन्द्र =परमेश्वर) १४.१० सर्वोत्कृष्ट ईश्वर सूर्यलोको वा परिमाणेन महत्तम १ ६ १ सर्वथाऽनन्तगुणकर्मस्वभावसामर्थ्येन युक्त (इन्द्र =सर्वजगद्राज) १ ८ ५ महत्त्वपरिमाणत सर्वेभ्योऽधिक (वेदविद् आप्तो विद्वज्जन) ३ ५३ ६. महत्त्वादिगुणविशिष्ट (ईश्वर) ३३ ३६ पूजनीयतम (राजा) ३३ ६५ व्याप्त सन् (परमात्मा) ३ ५५ ६ अतिविस्तीर्ण. (अग्नि =विद्युत्) ४ ७ ७ व्याप्त्यादिमहागुणविशिष्ट (कवि =काल) १ ६५ ४ महत्त्वपरिमाण (अग्नि=सूर्यलोक) ३ ६ ४ **महान्तम्**=विद्यावयोवृद्ध जनम् प० वि० । १ ११४ ७ वृद्धतमम् (परमेश्वरम्) ऋ० भू० १३१, ३१ १८ महागुणविशिष्ट पूज्य जनम् १६ १५ महत्परिमाणम् (कोश=मेघम्) ५ ८३ ८ बडो से भी बडे (ईश्वर) को आर्याभि० २ ८, ३१ १८ **महान्तः**=परिमाणेनाऽधिका (विद्वासो=जना) १ १६६ ११ [महदिति व्याख्यातम् । 'महान्' इत्येवमादौ 'सान्तमहत सयोगस्ये' ति दीर्घ । प्रजापतिर्वाव महान् ता० ४ १०.२ अग्निर्वै महान् जै० उ० ३ ४ ७ प्राण एव महान् श० १० ४ १ २३]

महय पूजयोपकुरु वा १ ५२ १ **महयसे**=सत्क्रियसे ६ १५ २ **महयन्**=सत्कुर्वन्ति ७ ४२ ३ **महयन्तः**=पूजयेयु ३ ३ ३ **महेत्**=पूजयेत् १.१११ ३ **महेम**=सत्कुर्याम ७ २ ३ [मह पूजायाम् (भ्वा०) धातोर्णिजन्ताल्लोट् । अन्यत्र लट् लङ् च । 'महेत्' इत्यादौ लिङ् मह पूजायाम् इति चुरादावपि । महयति अर्चतिकर्मा निघ० ३ १४]

महयते महते (राये=धनाय) ७ ३२ १६ **महयन्**=सत्कुर्वन् (प्रजाजन) १ ५४ २ **महयन्तम्**=सत्कर्त्तव्यम् (कामम्) १ १७८ १ **महयन्तः**=महानिवाऽऽचरन्त (प्रजाजना) ४ १७ १८ पूजयन्त (विद्वासो जना) ५ ३१ ४ [मह पूजायाम् (चुरा०) धातो शतृ । महत्-प्राति० वा 'उपमानादाचारे' सूत्रेणाचारे क्यजन्ताच्छतृ]

शरीरे ३ ४८ [मर्त्य इति मनुष्यनाम निघ० २.३ अनात्मा हि मर्त्य श० २ २ २ ८ मर्त्यान्=मनुष्यान् नि० १३ ७]

मर्त्यत्रा मर्त्येपूपदेशका (जना) ७ ५२ १ मर्त्येपु मनुष्येपु ६ ६२ ८ [मर्त्यप्राति० 'देवमनुष्यपुरुषपुरुमर्त्येभ्य ०' अ० ५ ४ ५६ सूत्रेण सप्तम्यन्तात् त्रा प्रत्यय]

मर्त्यासः मनुष्या १.११३ ११ [मर्त्यप्राति० प्रथमा बहुवचने जसोऽसुक्]

मर्त्येषितः मर्त्यै सेनास्थैरितरैश्चेपितो विजय १.३९ ८. [मर्त्य-इपितपदयो समास । इपित =इपु इच्छायाम् (तुदा०) धातो क्त]

मर्धतः हिंसत ६ ६० ४ **मर्धति**=हिंसति ७ ५९ ४ **मर्धन्ति**=योधयन्ति १ १६६ २ हिंसन्ति ३.५४ १४ **मर्धिषत्**=अभिकाङ्क्षेत् ७ ३२ ५ **मर्धिष्टम्**=हिंस्तम् ३३ ८८ **मर्धीः**=अभिकाङ्क्षे ७ २५ ४ उन्दितान् कुरु ४.२० १० [मृधु उन्दने (भ्वा०) धातोर्लेट् । धातूनामनेकार्थकत्वादत्र हिंसने । अन्यत्र लेट् लुङ् च]

मर्म जीवननिमित्तम् १ ६१ ६ गुह्याऽवयवम् ५ ३२ ५. यस्मिन् प्रहते म्रियते तत् ३ ३२ ४ **मर्माणि**=शरीरस्थान् जीवनहेतूनवयवान् ६ ७५.१८ यानि ताडितानि सन्ति सद्यो मरणजनकान्यङ्गानि १७ ४९ [मृङ् प्राणत्यागे (तुदा०) धातोर्मनिन् । 'कृतो वहुल वे' ति वार्तिकेन कर्त्तृभिन्ने कारकेऽपि मनिन्]

मर्मर्त्तु भृश प्राप्नोतु २ २३ ६ मृङ् प्राणत्यागे (तुदा०) धातोर्यङ्लुगन्ताल्लोट्]

मर्मृजत शुद्धा भूत्वा शोधयन्ति ४ ११४ **मर्मृजतः**=भृश शोधयत ४ २ १६ **मर्मृजन्त**=अत्यन्त मार्जयन्तु शोधयन्तु १.१३५ ५ [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्ताल्लोट् । अन्यत्र लटि लडि च रूपाणि]

मर्मृजेन्यः अत्यन्तमलङ्करणीय (विद्वान् राजा) १ १८९ ७ भृश शोधक (अग्नि) २ १० १. [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्तात् कृत्यार्थे केन्य]

मर्मृज्मा भृश शुद्ध शोधयिता (अग्निः=वैद्यराजो विद्वान्) ३ १८ ४ [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्तान् मनिन्]

मर्मृज्यते अतिशयेन शुद्ध्यते १ ९५ ८ **मर्मृज्यन्ते**=शोधयन्ति ४ १५ ६ [मृजू शौचालकरणयो (चुरा०) धातो क्रियासमभिहारे यडन्ताल् लट्]

मर्मृज्यमानाः भृश शुद्धा (युवतय =स्त्रिय) २ ३५ ४. उत्तम ब्रह्मचर्यव्रत और सद्विद्याओ से अत्यन्त युक्त (युवतिया) स० वि० १०४, २.३५ ४ [मृजू शौचालकरणयो (चुरा०) धातोर्यडन्ताच्छानच् । तत स्त्रिया टाप्]

मर्मृशत् अतिशयेन सहमान (मज्जन) ११४० ५ भृश विचारयन् (विद्वज्जन) ३.३८ १ [मृश आमर्शने (तुदा०) धातोर्यङ्लुगन्ताच्छतृ]

मर्य इव यथा मनुष्य १ ६११३ प्राप्त होने वाले पति के समान स० वि० १३६, अथर्व० १४ २ ३७ **मर्या इव**=यथा विद्वासो मनुष्या ५ ५९ ३. [मर्य-इव-पदयो. समास]

मर्यः मनुष्य ४ २० ५. मरणधर्मा मनुष्य १.१६३ ८. पतिर्मनुष्य १ ११५ २ **मर्याः**=मरणधर्माण (नर =नेतारो जना) ५ ५३ ३ मरणधर्मशीला मनुष्यास्तत्सम्बोधने प्र०—मर्या इति मनुष्यनामसु पठितम् निघ० २ ३, १.६ ३ मरणधर्मका (वायव) १ ६४ २ [मर्य इति मनुष्यनाम निघ० २ ३ मर्यो मनुष्यो मरणधर्मा नि० ३ १४ मर्या इति मनुष्यनाम । मर्यादाभिधान वा स्यात् नि० ४ २]

मर्यकम् मर्यम् (अपत्यम्) ५ २ ५ [मर्य-प्राति० स्वार्थे कन्]

मर्यश्रीः मर्याणा श्री शोभा यस्मात् स (अग्नि =पावक) २ १० ५ मर्याणा मनुष्याणा श्रीरिव ११ २४ (मर्य-श्रीपदयो समास]

मर्यादायै न्यायाऽन्यायव्यवस्थायै भा०—प्रश्नोत्तरकरणसामर्थ्याय ३० १० [मर्यादा=मर्यैरादीयते । मर्यादामर्यादिनोर्विभाग नि० ४ २]

मर्यासः मनुष्या ५ ६१ ४ [मर्यप्राति० जसोऽसुक्]

मर्षिष्ठाः विनाशये १ ७१ १० [मृङ् प्राणत्यागे (तुदा०) धातोर्लिङ्]

मलम् अशुद्धिकरम् अ०—अविद्यारूपम् ६ १७ [यत् मृज्यते शोध्यत इति विग्रहे मृजू शौचालकरणयो (चुरा०) धातो 'मृजेष्टिलोपश्च' उ० १११० सूत्रेण कल धातोष्टिलोपश्च]

मलादिव यथा मलिनताया २० २० [मलाद्-इव पदयो समास]

मलिम्लवः ये मलिना सन्तो म्लोचन्ति गच्छन्ति ते (स्तेनास =गुप्ताश्चौरा) ११ ७९ **मलिम्लून्**=मलिनाचारान् सिंहादीन् भा०=गवादिहिंसकान् पशून् पुरुषान् वा ११ ७८ [मलिन्-उपपदे म्लुचु गत्यर्थे (भ्वा०) धातो

बलादिगुणविशिष्टमनीकम्) १ ५७ ६ महत्तमम् (सिन्धु=समुद्रम्) २ ११ ६ महान्त महाशय सर्वाऽव्यक्षम्) ६ २६.१ [महत्-प्राति० षष्ठ्या बहुवचने 'छान्दसो वर्णलोपो वे' ति तलोपे रूपम्]

महामनसाम् महान्ति मनासि विज्ञानानि येषा तेषाम् (देवाना=विद्वत्पुरुषाणाम्) १७ ४१ [महत्-मनस्पदयो समास]

महारथः महान्तो रथा वीरा वा यस्य स (राजन्य=राजपुत्र) २२ २२ [महत-रथपदयो. समास]

महावद्वरिणा महावर्णयुक्तेन (पदा=पादेन) १.१३३.२. [महत्-बद्वरिपदयो समास]

महावधः महान् वधो नाशन येन स (महारोग) ५.३४ २ **महावधात्**=महतो हननात ५ ८३ २. [महत्-वधपदयो समास । वध=हन हिंसागत्यो (अदा०) धातो 'हनश्च वध' अ० ३ ३ ७६. सूत्रेणाप् वधादेशश्च । महावधात्=महान् ह्वस्य वध नि० १० ११ वध. बलनाम निघ० २ ९ वज्रनाम निघ० २ २०]

महावीरम् महांश्चासौ वीरश्च तमिव महाकर्षण-प्रकाशादिना युक्त सूर्यलोकम् १ ३२ ६ **महावीरस्य**=महांश्चासौ वीरश्च तस्य (सेनापते) १९ १४. [महत्-वीरपदयो. समास]

महावैलस्थे महागर्त्तयुक्ते (स्थाने) १ १३३.३. [महत्-वैलपदयो समास । ततो महावैलोपपदे तिष्ठते क । वैलम्=विल-प्राति० स्वार्थेऽण्]

महावैश्वदेवः महता विश्वेषा सर्वेषामय व्यवहार १८ २० [महत्-वैश्वदेवपदयो समासः। वैश्वदेव=विश्व-देव-प्राति० स्वार्थेऽण् । देव=दिवु क्रीडाविजिगीषाव्यव-हारादिषु (दिवा०) धातोर्घञ्]

महाव्रातः महान्तो व्राता व्रतेषु कुशला जना सखायो यस्य स (इन्द्र=परमैश्वर्ययुक्तो जन) ३ ३०.३ [महत्-व्रातपदयो समास । व्रात=व्रतप्राति० कुशलार्थेऽण् । व्रतमिति कर्मनाम वृणोतीति सत नि० २ १३]

महासेनासः महती सेना येषान्ते (वीरजना.) ७ ३४ १९ [महतीसेनापदयो. समास । ततो जसोऽसुक्]

महि पूज्य महत् (श्रव=श्रवणम्) १२ १०६ महत् पूजितम् (जात=विज्ञानम्) १ १५६ २. महत्तम पूजनीयम् (शर्म=सुख गृह वा) १ ९३ ८. महासुखप्रद पूज्यतमम् (क्षत्रम्) १ ५४ ११ महागुणविशिष्टम् (क्षत्रम्=राज्यम्) १ ५४ ८ महत् (नम=अन्नम्) १ ६२ २ महान्तम् (श्रेष्ठ-जनम्) ४ ३ १४ महान् (वृद्धो जन) ५ ६० ३ महते पूजिताय (पूरवे=मनुष्याय) १.१३० ७ महान्त. (अर्चय=दीप्तय) ५.६ ७ [महि महत् नि० ११ ९ महि=मह पूजायाम् (भ्वा०) धातोरौणा० इन्]

महिकेरवः महयो महान्त केरव. कारव शिल्पविद्या-साधका येषान्ते (प्रियमेधा=महाविद्वासो जना) प्र०—अत्र कृञ्-धातोरुण् प्रत्ययो वर्णव्यत्ययेनाकारस्य एकारश्च १ ४५.४ [महि-केरुपदयो समास । 'महि' व्याख्यातम् । केरु.=करोतेरुण्, वर्णव्यत्ययेनाकारस्य एकार]

महिक्षत्रौ महत्क्षत्र ययोस्तौ (अध्यापकोपदेशकौ) ५ ६८ १ [महि-क्षत्रपदयो समास । क्षत्रम् धननाम निघ० २ १०]

महित्वनम् महिमानम् ५ ५५.४. महत्वम् (वीर्यं=सामर्थ्यम्) ५ ५४.५ महत्त्वम् ४ ३६ ३ महिमा २ २३.४ **महित्वना**=महिम्ना प्र०—महित्वनेनेति प्राप्ते 'वा छन्दसि सर्वे विधयो भवन्ति' इति विभक्तेराकारादेश । समीक्षा—अत्र सायणाचार्येण व्यत्ययेन नाभाव कृत सोऽशुद्ध. १ ८५ ७ महत्त्वेन ५ २ ९ स्वमहिम्ना प्र०—अत्र बाहुलकादौणादिक इत्वनि प्रत्यय ११ ६ [मह पूजायाम् (भ्वा०) धातोर्बाहु० औणा० इत्वनि । 'महित्वना' प्रयोगे महित्वन्-प्राति० टास्थान आकारादेश]

महित्वम् महेर्महतो भावम् १ ११६ १ महत्वम् १ ५९ ६ महागुणस्वभावम् (प्रभावम्) १ ५६ ४ महत्त्वम् ७.४० ५ मह्यते पूज्यते सर्वैर्जनैरिति महिस्तस्य भाव प्र०—अत्रौणादिक 'सर्वधातुभ्य इन्' इति इन्प्रत्यय ततो भावार्थे त्व-प्रत्यय. १ ८ ५ महिमानम् ३३.३७ महिमा १ १३८ १ पूज्यत्व महागुणविशिष्टत्व परिमाणेनाधिक-त्वञ्च १ ६१ ९ [महि-प्राति० भावे त्व । महि=मह-पूजायाम् (भ्वा०) धातोरौणा० इन् । महित्वम्=माहा-भाग्यम् नि० ७ २३]

महित्वा महत्त्व प्राप्य ५ ५८ ३ प्रशसय्य १.१०९ ६. सत्कृत्य १ ६७ ५ पूजितो भूत्वा १ ६८ १ सत्कार को प्राप्त होकर स० वि० १३९, अथर्व० १४ २ ३२ पूजयित्वा ४४२ ३ सत्कार प्राप्य ७ २०.४ महत्या व्याप्त्याऽभिव्याप्य १ ५२.१३ [मह पूजायाम् (भ्वा०) धातो क्त्वा]

महित्वा स्वमहिम्ना २३ ३ महागुणवत्त्वेन प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश १ ९१ २ महत्त्वेन पूज्येन १ १६४.२५ अपनी अनन्त महिमा से स० वि० ५, २३ ३. ['महित्वम्' इति व्याख्यातम् । ततो विभक्तेराकारादेश]

महयमानः पूज्यमान (अग्नि=आप्तो विद्वज्जन) ३ २५ ५ [मह पूजायाम् (चुरा०) धातो शानच्]

महयामसि पूजयाम ३ ३७ ४ [मह पूजायाम् (चुरा०) धातोर्लट्। 'इदन्तो मसि' रितीदन्तता मस्प्रत्ययस्य]

महसा महता (बलेन) १ १६२ १७ महत्त्वेन २५ ४०. बड़े प्रेम से स० वि० १४०, अथर्व० १४ २ ४३ **महसे**= महते (व्यवहाराय) ३० १९ पूजनाय ३० २० **महः**= महस्त्वयुक्त पूज्य वस्तु १८ ५ महत्सुखम् २ ३२ १ महद्विज्ञानम् ६ २६ १ महिमा १ १९.२ महान्तम् भा०—सत्यम् (धर्माणाम्) ३४ ७ महत् (अनीक=विजयमान सैन्यम्) ४ १२ २ महसे (सूर्याय=परमेश्वराय) सूर्यलोकाय वा) प्र०—अत्र 'सुपा सुलुक्०' इति डेर्लुक् ४ ३५ महता (शर्मणा=गृहसम्बन्धिमुखेन) प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेर्लुक् १ २२ ११ महान्ति पूजनीयानि (वपूषि= रूपवन्ति शरीराणि) ३ ५७ ३ महते (सख्याय=मित्रत्वाय) ४ ३१ ११ पूज्यवेदशास्त्रबोधयुक्ता (वाङ्) २० ६ महतीम् (धियं=प्रज्ञाम्) १ १० २ १ महान् पूजनीय (देव =परमात्मा) ४ ५८ ३ महत्तरम् (भा०—महान्तमानन्दम्) ३ ४६ कीर्त्तियोगान्महत् (नाम=प्रख्यातिम्) ६ ४४ ८ महत्तत्वात् अ०—अव्यक्तात् ५ १९ महत् (अर्ण =शब्दसमुद्रम्) प्र०—अत्र 'सर्वधातुभ्योऽसुन्' इत्यसुन् प्रत्यय १ ३ १२ अ०—महासि क्रियासिद्धिकराणि (वस्तूनि) ३ २० महति (बुध्ने=अन्तरिक्षे) ४ १ ११ महागुणसमूहम् ३ २० महान् (अध्यापक) १ १६० ८. महागुणविशिष्टस्य (नृम्णस्य=धनस्य) १ ५५ ३ **महांसि**=महान्ति सैन्यानि ५ २८ ३ तेजासि ३३ १२ **महोभिः**=महद्भिर्गुणकर्मस्वभावै ३ ४६ बृहद्भिर्गुणै ५ ६२ ३ सुपूजितैर्गुणै २० ४० सत्कारै ७.३७ १. [मह पूजायाम् (भ्वा०) धातोरौणादिकोऽसुन्। मह उदकनाम निघ० १ १२. महन्नाम निघ० ३ ३ महो महत नि० ६ २५ पशवो वै महस्तस्माद् यस्यैते बहवो भवन्ति भूयिष्ठमस्यकुले महीयन्ते श० ११ ८ १ ३ यज्ञो वै देवाना मह श० १ ६ १ ११ अध्वर्युरेव मह गो० पू० ५ १५ यजुर्वेदो मह श० १२ ३ ४ ६ वायुर्मह श० १२ ३ ४ ८ प्राणो मह श० १२ ३ ४ १० प्रतीच्येव मह गो० पू० ५ १५ सुवर्गो वै लोको मह तै० ३ ८ १८.५ रुद्रा एव मह गो० पू० ५ १५ ग्रीष्म एव मह गो० पू० ५ १५ त्रिष्टुबेव मह गो० पू० ५ १५ पचदश एव मह गो० पू० ५ १५]

महस्वन्तः महासि पूजनानि सत्करणानि विद्यन्ते येषा ते (सोमा=सभासद पुरुषा) २१ ४२ [महस् इति व्याख्यातम्। तत प्रशसायां मतुप्]

महाकुलः महत्कुल यस्य स (विद्वज्जन) १.१६१.१ [महत्-कुलपदयो समास]

महागयम् महान्तो गया गृहाणि, प्रजा धन वा यस्य तम् (विद्वास जनम्) प्र०—गयमिति गृहनाम निघ० ३ ४ 'अपत्यनाम' निघ० २ २. धननाम च निघ० २ १०, २६ ६. [महत्-गयपदयो समास]

महाञ्जिः महागति २४.४ [महत्-अञ्जिपदयो समास.। अञ्जि =अञ्जू (गत्यर्थे) धातोरौणा० इन्]

महादेवम् महांश्चाऽसौ देवश्च त परमात्मानम् ३६ ८ **महादेवस्य**=महतो विदुष (पुरुषस्य) ३६ ६. [महत्-देवपदयो समास। 'आन्महत समानाधिकरणजातीययो' अ० ६ ३ ४६. सूत्रेणाकारादेशो महत। देवाश्च महादेवा' तै० आ० १ ६ ३]

महाधने महान्ति धनानि प्राप्नुवन्ति यस्मिँस्तस्मिन् सङ्ग्रामे ७ ३२ २५ महान्ति धनानि यस्मात्तस्मिन् सङ्ग्रामे प्र०—महाधन इति सङ्ग्रामनामसु पठितम् निघ० २ १७, १७५ युद्ध मे आर्याभि० १ २४, ऋ० ५ ३ २१ २५ [महत्-धनपदयो समास। महाधने सग्राम नाम निघ० २ १७]

महानाम् महता पूज्यानाम् (देवाना=विदुषा जनानाम्) १.१८७ ६ [महत्-प्राति० षष्ठ्या बहुवचनम्। छान्दसो वर्णलोपो वे' ति तलोप]

महानाम्न्यः महन्नाम यासा ता भा०—महाकीर्त्तय (वाच) २३ ३५ [महत्-नामन्पदयो समासे स्त्रिया ङीबन्तात् प्रथमाबहुवचनम्]

महानि पूजनीयानि बृहत्तमानि (कृतानि=कर्माणि) २.११ ६ महान्ति (व्रता=शीलानि) ३ ६ ५ महान्ति पूज्यानि (करणानि=कर्माणि) २ १५ १ [महत्-प्राति० नपुसके प्रथमाबहुवचने रूपम्। तलोपश्छान्दस]

महान्ता महागुणौ (इन्द्राग्नी=वाय्वग्नी) प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश १ २१ ५ महान्तौ पूजनीयौ (अश्वा=तुरगौ महान्तौ जनौ वा) ६ ६७ ४ [महत्-प्राति० द्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश]

महाम् महताम् (पुरुषाणाम्) प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति तलोप ४ ५ ६ महान्तम् (अग्निम्) प्र०—अत्र 'वाच्छन्दसि' इति नकारतकारलोप सवर्णदीर्घत्वेनाऽस्य सिद्धि ३ २ ३ पूज्यं (तिनापतिम्) १ ११२ १४ पूजनीयम् (इन्द्र=राजानम्) ३ ४६ १ पूज्यतमम् (उग्र =

सूत्रेण तृच् । स्वस्रादित्वाट्टाप्न । मातर नदीनाम निघ० १ १३ माता अन्तरिक्षम्, निर्मीयन्तेऽस्मिन् भूतानि नि० २ ८]

मातरा जलाऽग्नी ३ ७ १ मातृवन्मान्यकर्त्र्यौ (रोदसी=भूमिसूर्यलोकौ) ६ १७ ७ मानकारकौ (अध्यापकोपदेशकौ) १ १२२ ४ मातरौ धातृजनन्यौ १ १४० ३. मातापितरौ १२ १०७ मान्यप्रदे (रात्रिदिने) ५ ५ ६ मानयित्र्यौ (नक्तोपासा=रात्रिदिने) १ १४२ ७ मान्यकर्त्तारौ मातापितरौ १ ५५ ३ जनकजनन्यौ ३ १ ७ जनकौ ७ ७.३ मातापितृरूपौ राजप्रजाजनौ अ०—द्यावाभूमी ४ २२ ४ मातृवद्वर्त्तमाने (धेनू=दुग्धदात्र्यौ गावौ) २८ ६ [मातृ-प्राति० द्विवचनस्याकारादेश 'सुपा सुलुक्०' इति सूत्रेण]

मातरापितरा जनकजनन्यौ ४ ६ ७ [मातृ-पितृपदयो समासे द्विवचनस्याकारादेश । पूर्वपदस्य च अराङ् आदेशश्छान्दस]

मातरिश्वा यो मातर्यन्तरिक्षे श्वसिति स वायु १ ७१ ४ प्राण १ १४१ ३ अन्तरिक्षशयान (अग्नि) ३ ५ १० आकाशे शयिता वायु १ ६० १ अन्तरिक्षे शयानो वायु १ १४८ १ यो वायौ श्वसिति स (भौतिकोऽग्नि) ३ २६ ११ अन्तरिक्षस्थ वायु स० वि० १२२, अथर्व० १४ १ ५४ मातर्यन्तरिक्षे श्वसिति प्राणान् धरति वायुस्तद्वद्वर्त्तमानो जीव ४० ४ **मातरिश्वनः**=मातर्यन्तरिक्षे श्वसिति आश्वनिति वा तस्य वायो प्र०—'श्वन्नुक्षन्०' उ० १ १५७ अनेनाऽस्य शब्दो निपातित १ २ **मातरिश्वने**=अन्तरिक्षस्थाय वायवे १ १४३ २ **मातरिश्वानम्**=मातरिश्वा वायुस्तल्लक्षणम् (ईश्वरम्) १ १६४ ४६ यो मातरिश्वा वायुरिव बलवान् तम् जो वायु के समान अत्यन्त बलवान् है उस (ईश्वर) को स० प्र० १५, १ १६४ ४६ यो मातरि वायौ श्वसिति तम् (अग्निं=विद्युदादिरूप वह्निम्) ३ २६ २ [मातरि अन्तरिक्षे श्वयति गच्छति वर्धते वेति विग्रहे 'मातरि' इति सप्तम्यन्तोपपदे टुओश्वि वृद्धौ (भ्वा०) धातो 'श्वन्नुक्षन्पूषन्०' उ० १ १५६ सूत्रेण कनिन् । अथवा मातरि श्वसिति जीवयति शेते वेति विग्रहे 'मातृ' इत्युपपदे श्वस प्राणने (अदा०) धातो कनिन्-प्रत्यये निपातनाद्रूपसिद्धि । शीङ् शये (अदा०) धातोर्वा कनिन् । मातरिश्वा वायुर्मातर्यन्तरिक्षे श्वसिति मातर्याशु अनितीति वा नि० ७ २६ प्राणो मातरिश्वा ऐ० २ ३८ अय वै वायुर्मातरिश्वा योऽय पवते श० ६ ४ ३ ४]

मातवै मानाय १ १६४ २८ [माङ् माने (जु०) धातोस्तुमर्थे तवैप्रत्यय.]

मातृतमाम् अतिशयेन मातरो मातृवत्पालिका नद्य प्र०—मातर इति नदीनाम निघ० १.१३, अत्र 'सुपा व्यत्यय ३ ३३.३. **मातृतमासु**=अतिशयेन शास्त्रोक्तशिक्षया मानकर्त्रीषु धात्रीषु १० ७ **मातृतमाः**=अतिशयेन मातर इव वर्त्तमाना (नद्य) १ १५८ ५. अतिशयेन मातृवत् कृपालव' (जनित्री=जनन्य.) ६.५०.७. [मातृ-प्राति० अतिशायने तमबन्तात् स्त्रिया टाप्]

मातृमृष्टेव विदुष्या मात्रा सत्यशिक्षाप्रदानेन शोधितेव (युवति) १ १२३ ११ [मातृमृष्टा-इवपदयो समास । मातृमृष्टा='मातृ' उपपदे मृजू शौचे (चुरा०) धातो क्तान्ताद् टाप्]

मात्या मतेर्भाव कर्म वा (वाक्=वक्ति यया सा) १३ ५८ [मतिप्राति० भावे कर्मणि वा ष्यञ् । तत. स्त्रियां टाप्]

मात्रया यया सर्वं मिमीते तया (बुद्ध्या) १३ २ भागेन १५ ११ लेशविशेषेण १५ १० **मात्रा**=मीयते यया सा भा०—परिमाणम् २३ ४७ भा०—व्यवहारसाधक वस्तु २३ ४८ **मात्राभिः**=शब्दादिभि सूक्ष्मैर्व्यवहाराऽवयवै ३ ४६ ३. सूक्ष्माऽवयवै ३ ३८ ३ [माङ् माने (जु०) धातो 'हुयामाश्रुभसिभ्यस् त्रन्' ४ १६८ सूत्रेण त्रन् । तत स्त्रिया टाप् । मात्रा मानात् नि० ४ २५ यद्वेव मिमीते तस्मान्मात्रा श० ३ १ ४ ८]

मादनम् आनन्दनम् ७ ३१ १ [मदी हर्षे (दिवा०) धातोर्णिजन्ताल् ल्युट्]

मादयध्यै मोदयितुम् प्र०—अत्र 'मदी हर्षग्लेपनयो इति' णिजन्तादध्यै प्रत्यय ३ १३ मादयितुमानन्दयितुम् ६ २२ ३.

मादयध्वम् सुखयत ६ ५२ १७ परस्परानानन्दयत ४ ३४ ८. आनन्द प्रापयत १ ८५ ६ हर्षयत ३३ ५३ हर्षयध्वम् २ १८ **मादयन्ताम्**=आनन्दयन्तु ७ ३६ ५ आनन्दयन्ताम् ७ ५१ २. तृप्ता भूत्वाऽस्मानानन्दयन्तु २० ४६ हृष्यन्तु भा०—सुखिनो भवन्तु भावयन्तु वा २ १३ **हर्षयन्तु**=३ ४ ११ **मादयन्तु**=हर्षयन्तु ७ ३३ ५ **मादयन्ते**=हर्षयन्ति १ ५६ १ **मादयस्व**=आनन्द प्रापय १ ८१ ८ हर्षयस्व १७ ८८ आनन्दयस्व २७ २८ आनन्दय हर्षितो वा भव १ १०१ ६ आनन्दानन्दय वा ६ ४१ ५ **मादयाते**=मादये हर्षयेत् ७ ४७ २ **मादयाध्वै**=आनन्दत १ १६१ ८. मादयध्वम् प्र०—लेट्

महिन महत्तम (इन्द्र=सर्वसुखप्रद राजन्) ६ २६ ८. **महिनस्य**=महत (राज्ञ) ६ ३३ ५ [मह पूजायाम् (भ्वा०) धातो 'महेरिनण् च' उ० २ ५६ सूत्रेण चकारेणानुवृत्त इनन्]

महिनः महान्त (देवा=दिव्यगुणा विद्वासो जना) ६ ५२ १५ [महिन्-प्राति० जस् महिन्=महिनि महत्युदकवतीति वा नि० ११ ३७ महिन्=मह पूजायाम् (भ्वा०) धातोरौणा० इन्]

महिना महिम्ना प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति मकारलोप १ ३२.८ महत्त्वेन १ १२२ ११ स्वस्य महिम्ना व्यापकत्वेन २७ २६. अपनी महिमा से आर्याभि० २.३२, १७ १८ **महिने**=सत्कर्त्तव्याय (राज्ञे) ७ ३१.११. [महिमन्-प्राति० टा-प्रत्यये मकारलोपश्छान्दस । महिमन्=महत्-प्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच्]

महिना महती (सरस्वती=वाक्) ६ ६१ १३ [महिन-प्राति० स्त्रिया टाप् । महिनः=मह पूजाया धातोरौणा० इनन्]

महिनि पूज्ये (पृथिवि=भूमे) ५ ८४ १ [मह पूजायाम् (भ्वा०) धातोरौणा० इन् । तत स्त्रिया ङीपि सम्बुद्धौ रूपम्]

महिनी महत्यौ (द्यावापृथिवी) १ १६० २. [महिनीति व्याख्यातम् । ततो द्विवचनस्य पूर्वसवर्णदीर्घ]

महिमघस्य महन्मघ पूज्य धन यस्य तस्य (पुरुपार्थिनो जनस्य) १ १२२ ८ महि-मघपदयो समास । 'महि' इति व्याख्यातम् । मघम्=धननाम निघ० २ १०]

महिमनः महिम्न ६ २७ ३ [महत्-प्राति० भावे पृथ्वादित्वाद् इमनिच् । तत षष्ठ्यादौ विभक्तौ अकारलोपाऽभावश्छान्दस]

महिमा महतो भाव १८ ४ महती प्रशसा ७ ४५ २ माहात्म्यम् भा०—महत्त्वम् ३१ ३ प्रशसासमूह. ७ २८ २ प्रताप ६ ५९ २ **महिमानम्**=स्तुत्यस्य, पूज्यस्य, व्यवहारस्य भावम् १ ६१ ८ उत्तमप्रतिष्ठाम् १ ८५ २ स्तुतिविषयम् (प्रयाण=प्रकृष्ट प्राणम्) ११ ६ पूज्य ब्रह्मचर्यजितेन्द्रियत्वादिशुभकर्म सत्कारजन्यम् (अपत्यम्) ८ ३० स्वप्रभावम् २ १७ २ महत्त्वम् २९ २७ **महिमानः**=महत्त्वयुक्ता (देवा=विद्वासो जना) ३१ १६ पूज्यमाना (मनुष्या) ३३ ७४ पूज्या सन्त (देवा=देवगणा) ऋ० भू० १२९, ३१ १६ पूज्यता प्राप्नुवन्त (देवा=विद्वासो जना) १ १६४ ५० **महिम्नः**=महतो भावस्य सकाशात् २३ ६४ **महिम्ने**=महतो भावाय २३ २ [मह पूजायाम् (भ्वा०) धातोरौणा० अतिप्रत्यये महत् । महत्-प्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच् । प्राणा हि महिमान काठ० ३७ १६ यज्ञो वै महिमा श० ६ ३ १ १८ राजा महिमा तै० ३ ९ १० १. श० १३ २ ११ २]

महिरत्न पूज्यैर्गुणै रमणीय (विद्वज्जन) १ १४१ १० [महि-रत्नपदयो समास । 'महि' इति व्याख्यातम् । रत्नम्=रमु क्रीडायाम् (भ्वा०) धातो 'रमेस्त च' उ० ३ १४ सूत्रेण न तकारश्चान्तादेश]

महिवृधे महता वर्धकाय (महाराजाय) ७.३१ १०. ['महि' इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप्]

महिव्रतः महान्ति व्रतानि धर्म्याणि कर्माणि यस्य स. (महाराज) ६ ६८ ९ **महिव्रत**=महि महद्व्रत शील यस्य तत्सम्बुद्धौ (विद्वज्जन) १ ४५.३ [महि-व्रतपदयो समास । व्रतमिति कर्मनाम वृणोतीति सत नि० २ १३]

महिष पूजनीयतम (महाराज) ३.४६ २ **महिषम्**=महान्तम् (पुत्र=सन्तानम्) ४ १८ ११ **महिषस्य**=महतो लोकसमूहस्य १ ९५ ९ **महिषः**=महान् (सूर्य) १ १२१ २ सर्वगुणैर्महान् (अग्नि) ३ ७ **महिषाणाम्**=महता पदार्थानाम् ५ २९ ८ **महिषान्**=महत (पदार्थान्) ६ १७ ११. **महिषाः**=महान्त (असूरा=विद्वासो जना) ७ ४४ ५ महान्त पूजनीया (यजमाना) १९ ३२. [मह पूजायाम् (भ्वा०) धातो 'अविमह्योष्टिपच्' उ० १ ४५ सूत्रेण टिषच् । महिष महन्नाम निघ० ३.३ महिषा महान्त नि० ७ २६ अग्निर्वै महिष स हीद जातो महान्त्सर्वमैक्षत् श० ७ ३ १ २३ प्राणा वै महिषा श० ६ ७ ४ ५ ऋत्विजो वै महिषा श० १२ ८ १ २]

महिषा महिषाणा महता पशूनाम् ५ २९ ७ [महिष इति व्याख्यातम् । तत षष्ठ्या स्थाने आकारादेशश्छान्दस]

महिषासः पूजितगुणा महान्त (गिरय=मेघा) १ ६४ ७ [महिषप्राति० जसोऽसुक्]

महिषी महारूप-बल-शीलादियोगेन पूजनीया (युवति) ५ २ २ **महिषीम्**=महाशुभगुणाम् (पत्नीम्) ५ ३७ २ उत्तम कुल मे उत्पन्न हुई विद्या-शुभगुण-रूप-सुशीलतादियुक्त (विदुषी स्त्री) स० वि० १०५, ५ ३७ ३ [महिष इति व्याख्यातम् । तत स्त्रिया टित्त्वात् ङीप् । महिषी-यैव प्रथमा वित्ता (भार्या) सा महिषी श० ६ ५ ३ १.

मनुष्य २१ ६१ मनुष्याऽऽकृति (पुरोहित.) १ ४४ १० सभापतिर्मनुज १.३७ ४ **मानुषात्**=मानवात् २ ३.३. **मानुषाणाम्**=नराणाम् १ १२७.८ मानुषेषु भवानाम् (जनाना=मनुष्याणाम्) ४ ६ ५ मनुष्यजातिस्थानाम् (राज्यपालनाऽर्हगुणानाम्) ६ १६ ६ **मानुषाय**=मनुष्याणामस्मै (क्षयाय=गृहाय) १ १२३ १ **मानुषे**=मनुष्याणामस्मिन् सग्रामे ७ १८.६ **मानुषेषु**=मनुष्यसम्बन्धिषु (यज्ञेषु=सत्सु कर्मसु) ७ २ ७ युवत्याऽऽहारविहारकर्तृ पु (विक्षु=प्रजासु) १ ६० ४. अविद्वत्सु (जनेषु) ४ ५४ ३ **मानुषान्**=मनुष्यादीन् १ ४८ ७ [मनुप्राति० 'मनोर्जाता-वञ्यतो पुक् च' अ० ४ १ १६१ सूत्रेण अञ् पुगागमश्च । मनुष्यप्राति० वा भवार्थेऽण् । मानुषम्=यदत्रुवन्मेद प्रजापते रेतो दुषदिति तन्मादुषमभवत् तन्मादुषस्य मादुषत्व मादुष ह वै नामैतद् यन् मानुष तन्मादुष सन् मानुषम् इत्याचक्षते । (इद मे मादुषत्) ता० ८ २ १० पशवो मानुषा क० ४१ ६. यन्मन्द्र मानुष तत् तै० स० २ ५ ११ १]

मानुषप्रधना. मनुष्याणा प्रकृष्टानि धनानि याभ्यस्ता (मरुत) १ ५२ ६ [मानुष-प्रधनपदयो समास]

मानुषा मनुष्याणामिमानि (युगा=वर्षाणि) ५ ५२ ४ मनुष्यसम्बन्धीनि (युगा=वर्षाणि वर्षसमुदितानि वा) ६ १६ २३ मनुष्येषु भवानि (युगानि=वर्षाणि) १ १०३ ४ मनुष्याणा हिंनकारकाणि (वस्तूनि) १ ५१.१ मनुष्यैर्निर्मितानि (कर्माणि) ७ ४ १ [मानुषप्राति० शेर्लोपश्छन्दसि । मानुषमिति व्याख्यातम्]

मानुषास. मननशीला मानवा १ ६० ३ मनुष्या ७ ७ ४ [मानुषप्राति० जसोऽसुक्]

मानुषी मानुषाणामियम् (प्रजा) १ ७२ ८ **मानुषीणाम्**=मनुष्यसम्बन्धिनीनाम् (विशा=प्रजानाम्) ३ ११ ५ मनुष्यादिरूपाणाम् (प्रजानाम्) ५.१ ६ **मानुषीभ्य.**=मनुष्यादिभ्य (प्रजाभ्य) ११ ४५ **मानुषीषु**=मनुष्याणामिमासु (विक्षु=प्रजासु) ३ ५ ३. **मानुषीः**=मनुष्याणामिमा प्रजा ६ ६५ १ मनुष्यसम्बन्धिन्य (प्रजा) ५ ८ ३ मानुषाणामविदुषामिमा (विश =प्रजा) १७ ८६ [मानुषप्राति० स्त्रिया ङीप् । मानुषम्=मनुष्यप्राति० 'तस्येदमि' त्यण्]

मानुषेभिः मनुष्यै ७ ३८ १ [मानुषप्राति० भिस ऐस् न 'बहुल छन्दसि' सूत्रेण]

मानेभिः ये मन्यन्ते तैर्विद्वद्भि १ १८४.५ [मानप्राति० भिस् । ऐस् न भवति छान्दसत्वात्]

मान्थालः जन्तुविशेष २४ ३८.

मान्दार्यस्य मान्दस्य स्तोतुर्मनुष्योत्तमगुणकर्मस्वभावस्य च (कारो.=शिल्पिनो जनस्य) १.१६५ १५. प्रशसितस्तुत्यस्य शिल्पिन ३४ ४८. सर्वेभ्य आनन्दप्रदस्योत्तमस्य (कारो=क्रियाकुशलजनस्य) १.१६८ १० आनन्दिनो धार्मिकस्य (कारो.) १ १६६.१५ [मान्द-आर्यपदयो समास. । मान्द.=मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु (भ्वा०) धातो-रच्प्रत्यये मन्द । तत स्वार्थिकेऽणि मान्द. । आर्य.=ऋ गतिप्रापणयो (भ्वा०) धातो 'ऋहलोर्ण्यत्' इति ण्यत्]

मान्दाः ये जनान् मदन्त्यानन्दयन्ति त एव मान्दा (राजपुरुषा) १० ४ [मान्द इति पूर्वपदे व्याख्यातम्]

मान्यमानम् मान्याना मान सत्कारो यस्मात्तम् (धार्मिक ब्राह्मण) ७ १८ २०. [मान्य-मानपदयो. समास । मान्य =मान पूजायाम् (चुरा०) धातोर्ण्यत् । मान = मान+घञ्]

मान्यस्य प्रशसितु योग्यस्य (कारो =शिल्पिजनस्य) १.१८४ ४. सत्कर्त्तव्यस्य (कारो =शिल्पिनो जनस्य) ३४ ४८ माननीयस्य योग्यस्य (शिल्पिन) १.१६५ १४ सत्कर्त्तु योग्यस्य (कारो =शिल्पिन) १ १६७ ११ मातु योग्यस्य (कारो) १.१६८ १० [मान पूजायाम् (चुरा०) धातोर्ण्यत्]

मामकाः मदीया (जीवा) १६.४६ **मामकानाम्**=मदीयाना वीराणाम् (सत्वनाम्=प्राणिनाम्) १७ ४२ [अस्मद्-प्राति० शैषिकेऽण्प्रत्यये 'तवकममकावेकवचने' इति ममकादेश]

मामतेयम् ममताया प्रजाया अपत्यम् १ १४७ ३ मम भावो ममता, तस्या इदम् (कार्यम्) ४ ४ १३ **मामतेयः**=ममताया कुशल (लोभातुरो जन) १ १५८ ६ [ममताप्राति० अपत्यार्थे 'तस्येदमि' त्यर्थे कुशलार्थे वा ढक् । ममता=मम+तल् । मम=अस्मद्+ङस्]

मामहन्त सत्कुर्वन्तु प्र०—अत्र 'तुजादिना०' इत्यभ्यासदैर्घ्यम् ७ ५२ २ **मामहन्ताम्**=सत्कारेण वर्धयन्ताम् १.१००.१६ सत्कारहेतवो भवन्तु १ ६६.६ वर्धन्ताम् प्र०—व्यत्ययेनाऽत्र शप श्लु १ ६४ १६ सत्कुर्वन्तु भा०—भूपका सन्ति ३३ ४२ **मामहे**=सत्कुर्याम् ५ २७ १ महयति प्र०—अत्र 'मह पूजायाम्' इत्यस्माल्लटि 'बहुल छन्दसि' इति शप्श्लुविकरणो व्यत्ययेनात्मनेपद तुजादित्वाद् दीर्घ १ १६५ १३ [मह पूजायाम् (भ्वा०) धातोर्लङ् । अडभाव । 'बहुल छन्दसि' इति शप श्लु । तुजादित्वादभ्यासस्य दीर्घ ।

प्रयोगोऽयम् १ ३७ १४ **मादयासे**=हर्षयसे १.१०१ ८ **मादयेथाम्**=हर्षयेतम् ४.४६.६ आनन्दयतम् ४ १४४. आनन्दयेथाम् १ १८४ २ मादयेते हर्षयत. १ १०६ ५ **मादयेथे**=हर्षयत १ १०८ १२ **मादयैते**=सुखयेताम् ४.४१ ३ [मदी हर्षे (दिवा०) धातोर्णिजन्ताल्लोट्। अन्यत्र लट् लेट् चापि]

मादयिष्णवः हर्षनिमित्ता (इन्दव =सोमाद्योषधिगणा) प्र०—अत्र 'णेश्छन्दसि' अ० ३ २ १३७ अनेन ण्यन्तान्मदेरिष्णुच् प्रत्यय १ १४४ [मदी हर्षे (दिवा०) धातोर्णिजन्तात् 'णेश्छन्दसि' सूत्रेण इष्णुच् तच्छीलादिषु]

माद्भिः मासै २ २४ ५ [मासप्राति० भिम्प्रत्यये 'पदन्नोमास्०' अ० ६ १ ६३ सूत्रेण मास् आदेश। 'स्वव-स्वतवसोर्मास उषसश्च तकारादेश इष्यते छन्दसि भकारादौ' इत्युपसख्यानात् तकारादेश]

माधवः मधुरादिफलनिमित्तो वैशाख १३ २५ **माधवाय**=वैशाखमासाय ७ ३०. [मधुप्राति० मत्वर्थे 'मधोर्ञ व' अ० ४ ४ १२६. सूत्रेण ञ.]

माधूचीभ्याम् यौ मधुविद्यामञ्चतस्ताभ्याम् (अध्यापकोपदेशकाभ्याम्) ३७ १८ [मधूपपदे अञ्चु गतिपूजनयो. (भ्वा०) धातो 'ऋत्विग्दधृग्०' इति क्विन्। 'अनिदिताम्' इति नकारलोपे 'अञ्चतेश्चोपसख्यानम्' इति स्त्रिया ङीपि भसज्ञाया सत्याम् 'अच' इत्यकारलोपे 'चौ' सूत्रेण पूर्वस्य दीर्घत्वे रूपम्। पूर्वस्य दीर्घश्च छान्दस]

माध्यन्दिनम् मध्ये भवम् (सवन=भोजनम्) प्र०—अत्र 'मध्योमध्य दिनण् चाऽस्मात्' इति वार्त्तिकेन मध्यशब्दो मध्यमिति मान्तमापद्यते भवेऽर्थे दिनण् च प्रत्यय ३ ३२ १ मध्ये दिने भव भोजनादिकम् ४ ३५ ७. मध्याह्ने भवम् (सवनं=आरोग्यकर होमादिकम्) १६ २६ **माध्यन्दिने**=मध्य दिने भवे (सवने=प्रेरणे) ६ ४७ ६ मध्याह्ने ५ ४० ४ [मध्यप्राति० भवार्थे 'मध्यो मध्य दिनण् चास्मात्' इति वार्त्ति० सूत्रेण दिनण्। मध्यस्य च मध्य भाव। इद (अन्तरिक्षम्) माध्यन्दिन सवनम् जै० ३ ५७ त्रैष्टुभवार्हतो वै माध्यन्दिन जै० २ ३८३ त्रिच्छन्दा माध्यन्दिन पवमान ष० १ ३ मरुत्वद्धि माध्यन्दिन सवनम् ता० ६ ७ २ माध्यन्दिन सवनाना तपस्वितमम् काठ० २३ १०. रुद्राणा माध्यन्दिन सवनम् कौ० १६ १ श० ४ ३ ५.१ वाजवन्माध्यन्दिन सवनम् ता० १८ ६ ७ स्वर्गो वै लोको माध्यन्दिन सवनम् मै० ४ ८ ३ गो० २ ३ १७]

माध्वी मधुरादिगुणयुक्ता (राति =दानम्) १ १८४ ४ मधुरा नीति ४.४३ ५ **माध्वीभ्याम्**=सुनीति-योगरीतिभ्याम् ७.११२ मधुरादिगुणयुक्ताभ्या विद्यासुशिक्षाभ्याम् ३७ १८ **माध्वीः**=माध्व्य (गाव = किरणा) १ ६० ८ मधुविज्ञाननिमित्त विद्यते यासु ता. (ओषधी) प्र०—'मधोर्ञ च' अ० ४ ४ १२८ अनेन मधुशब्दाञ्ञ 'ऋत्व्यवास्त्व्य०' इति यणादेशनिपातनम् 'वाच्छन्दसि' इति पूर्वसवर्णादेश १ ६० ६. माध्व्यो मधुरगुणयुक्ता (ओषधी =ओषधय) प्र०—अत्र 'ऋत्व्यवास्त्वय०' इति मधुशब्दादण् यणादेशनिपात: १३ २७. [मधुप्राति० 'मधोर्ञ च' इति मत्वर्थे ञप्रत्यये भवार्थे वा अण्-प्रत्यये स्त्रिया ङीपि 'ऋत्व्यवास्त्व्य०' अ० ६ ४ १७५ सूत्रेण यणादेशो निपात्यते]

माध्वी माधुर्यादिगुणोपेतौ (अश्विना =अध्यापकोपदेशकौ) ४ ४३ ४ मधुरगतिमन्तौ (अश्विना =शिल्पकार्यविदौ) ५ ७५ २ मधुरादिगुणप्रापकौ (अश्विनौ =अध्यापकपरीक्षकौ) ५ ७५ १ [माध्वीति व्याख्यातम्। ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

मानम् सत्कारम् १ १०० १४ **मानस्य**=विज्ञानवतो जनस्य १ १८६ ८. परिमाण के योग मे बनाई हुई का स० वि० १६८, अथर्व० ६ २ ३ २१. **मानः**=यो मन्यते स (विद्वज्जन) ७ ३३ १३ **मानैः**=परिमाणै २ १५ ३ [माङ् माने (जु०) धातोर्ल्युट्। माने निर्माणे-नि० २ २२]

मानवस्यते मानवानात्मन इच्छते (विदुषे जनाय) १ १४० ४ [मानवपदाद् आत्मन इच्छाया क्यचि सुगागमे शतरि च रूपम्]

मानवेभ्यः मननशीलेभ्य (जनेभ्य.) ४ ५४ १ [मनुप्राति० अपत्यार्थेऽण्]

मानसः मनस ऊष्मेव वर्त्तमान (ग्रीष्म) १३ ५५ [मनस्प्राति० भवार्थेऽण्]

मानस्कृतम् मनस्कृतेषु विचारेषु कुशलम् (पुरुषम्) ३० १४ [मनस्-कृतपदयो समासे कुशलार्थेऽण्]

मानासः विचारवन्त (विद्वासो जना) १ १७१ ५ [मानप्राति० जसोऽसुक्]

मानुष मननशील (विद्वन्नुपदेशक) ३ ६ ६ मनुष्यस्वभावयुक्त (धार्मिक जन) १ ८४ २० **मानुषम्**=मनुष्याणामिदम् (स्व =सुखम्) ५ ६६ २ **मानुषस्य**=मनुष्यजातस्य १ १२१ ४ मनुष्यजातौ भवस्य (जनस्य) १ ७० १ **मानुषः**=सर्वशास्त्रमननशील (अध्यापको गुरु) ६ ८

मध्ये वर्त्तमान (विष्णु=प्रधानपुरुष) ३३४८ **मारुताय**=मरुता मनुष्याणामस्मै (स्वभानवे=स्वप्रज्ञा प्रदीप्तये) ६ ४८ १२ **मारुता:**=मनुष्यदेवताका (पृश्नय पशव) २४ १४ मरुद्देवताका (भा०—वायुगुणा पशव पक्षिणो वा) २४ ४ **मारुतेन**=मनुष्याणामनेन (शर्द्धेन=बलेन) २ ३१ ३ हिरण्यादिसम्बन्धेन (गणेन=समूहेन) प्र०—मरुदिति हिरण्यनाम निघ० १ २, ३ ३२ २ [मरुत्-प्राति० समूहार्थे 'अनुदात्तादेरञ्' अ० ४ २ ४४ सूत्रेण अञ्। विकारार्थे 'तस्येदमि' त्यर्थे, 'सास्य देवते' त्यर्थे वा अञ्। मरुत्=हिरण्यनाम निघ० १ २ रूपनाम निघ० ३ ७ मरुत्=मृङ् प्राणत्यागे (तुदा) धातो 'मृग्रोरुति.' उ० १ ९५ सूत्रेण उति। अन्तरिक्षलोको वै मारुतो मरुता गण: श० ९ ४ २ ६ मारुतम्=मेघम् नि० ११ ५० सप्त हि मारुतो गण श० ५ ४ ३ १७ सप्त सप्त मारुता गणा मै० ३ ३ १०, श० ९ ३ १.२५ विण्मारुता मै० ३ ३ १० ये ते मारुता (पुरोडाशा) रश्मयस्ते श० ९ ३ १ २५ मारुतो हि वैश्य (वायु) मै० ३ ४ ३ काठ० ३७ ३ तै० २ ७ २ २ मारुतस्सप्तकपाल मै० ११० १ मारुत कल्माष काठ० ४८ १ मारुत सप्तकपालम् तै० स० १ ८ २ १ एकविंशतिर्वै मारुता गणा काठ० ११ १]

मारुताश्वस्य (मरुतामिवाश्वानामय तस्य (भृत्यजनस्य) ५ ३३ ६ [मारुत-आश्वपदयो समास। मरुत् प्राति० अश्वाच्चेदमर्थेऽण्]

मारुती: मारुत्यो मरणधर्माणो मरुत्प्रधाना वा (प्रजा) ऋ० भू० १४०, ऋ० ६ १ ६ ४ [मरुत्प्राति० समूहार्थेऽञ्प्रत्ययान्तात् स्त्रिया ङीप्]

मार्गारम् यो मृगाणामरिर्व्याधस्तस्याऽपत्यम् ३० १६ [मृग-अरिपदयो समासेऽपत्यार्थेऽण्]

मार्जालीय. शोधक (भगवान्) प्र०—'स्याचतिमृजेरालज्वालञालीयच' उ० १ ११६ अनेन सूत्रेणाऽत्र मृजूष् शुद्धौ इत्यस्मादीयच्-प्रत्यय ५ ३२ पाप का मार्जन=निवारण करने वाला (ईश्वर) आर्याभि० २ १७, ५ ३२ [मृजूष् शुद्धौ (अदा०) धातो 'स्याचतिमृजेरालज्वालञ्-आलीयच' उ० १ ११६ सूत्रेण आलीयच्]

मार्जाल्य: सशोधक (अतिथिर्जन) ५ १ ८. [मृजूष् शुद्धौ (अदा०) धातोर्बाहु० औणा० आल्यञ्]

मार्ज्मि शुद्धो भवामि शोधयामि वा २.१४ मार्ष्टि वा प्र०—अत्र पक्षे पुरुषव्यत्यय २ ७. [मृजूष् शुद्धौ (अदा०) धातोर्लट्]

मार्डीकम् मृडीकाना सुखानामिम साधकम् (रयिम्) १ ७९ ९ **मार्डीके**=सुखकरे (व्यवहारे) ४ १८.१२ [मृडीकप्राति० 'तस्येदम्' इत्यर्थेऽण्। मृडीकम्=मृड सुखने (तुदा०) धातो 'मृड कीकच्कङ्कणौ' उ० ४ २४ सूत्रेण कीकच्]

मार्त्तण्ड: मार्त्तण्डे सूर्ये भव (वरुण=वरो जीव) प्र०—अत्र 'अन्येषामपि०' इति दीर्घ २ ३८ ८ [मार्त्तण्ड-प्राति० भवार्थेऽण्। 'अन्येषामि' ति सूत्रेण दीर्घ मार्त्तण्ड। स (मार्त्तण्ड) वाव विवस्वान् आदित्य मै० १ ६ १२]

मार्ष्टु पुन पुन शुन्धन्तु ८ १४ [मृजूष् शुद्धौ (अदा०) धातोर्लोट्]

मावत: मद्विधस्य (विप्रस्य=मेधाविन पण्डितस्य) प्र०—'अत्र वतुप्प्रकरणे युष्मदस्मद्भ्या छन्दसि सादृश्य उपसङ्ख्यानम्' अ० ५.२ ३९ अनेन वार्त्तिकेनाऽस्मच्छब्दात् सादृश्ये वतुप् प्रत्यय 'आ सर्वनाम्न' अ० ६ ३ ९१ इत्याकारादेशश्च १ १७ २ मत्सदृशाय (विप्रस्य=मेधाविजनस्य) ११२९.११ **मावते**=मत्सदृशाय (दाशुषे=विदुषे जनाय) १ ८ ९ [अस्मद्-प्राति० सादृश्ये 'वतुप्प्रकरणे युष्मदस्मद्भ्या छन्दसि सादृश्य उपसख्यानम्' अ० ५ २ ३९ वा० सूत्रेण वतुप्। 'प्रत्ययोत्तरपदयोश्चे' ति मादेश.। 'आ सर्वनाम्न' इत्याकारान्तादेश]

मासकृत् मासेकवारम्, अथवैकपद्य—मासाना चाऽर्द्धमासादीना च कर्त्ता (अरुण=विद्याप्रकाशकरणो विद्वान्) अत्र मासकृदित्येक पद निरुक्तप्रामाण्यादनुमीयते। अथ शाकल्यस्तु 'मा सकृत्' इति पदद्वयमभिजानीते १ १०५ १८ [मासोपपदे करोते कर्त्तरि क्विप् मासकृत्=मासाना चार्द्धमासाना च कर्त्ता नि० ५ २१]

मासरम् येनाऽतिथयो मासेषु रमन्ते तत् (आतिथ्यरूप=अतिथीना भाव कर्म वाऽऽतिथ्य तद्रूप च तत्) १९ १४ ओदनम् उपलक्षणमेतत् तेन सुसस्कृतमन्नमात्र गृह्यते २१ ३५ सस्कृतभोज्यमन्नम् २१.३८ **मासरेण**=प्रमितेन मण्डेन प्र० अत्र माङ्-धातोरौणादिक सरन् प्रत्यय २० ६६ **मासरं.**=परिपक्वौषधिसस्रावै १९ ८२ [माङ् माने (जु०) धातोरौणा० सरन्। अथवा मासोपपदे रमु क्रीडायाम् (भ्वा०) धातोर्ड]

मास: चैत्राऽऽदि ५ ४५ ७ **मासान्**=मासानाम् प्र०—अत्र विभक्ति-व्यत्यय २४ ३७ [माङ् माने (जु०) धातोर्बाहु० औणा० स। मासा मानात् नि० ४.२७ मासा (सवत्सरस्य) कर्मकारा तै० ३ ११ १० ३ मासा

अन्यत्र लोट् लट् च । व्यत्ययेनात्मनेपदश्च]

मामहः पूज्यान् (सज्जनान्) २ १७ ७ [मह पूजायाम् (भ्वा०) धातोर्यङ्लुगन्तादच्]

मामहानम् दत्तवन्तम् (प्रजाजनम्) १ ११७.१७ **मामहानः**=अतिशयेन महान् पूजनीय (धर्म =अग्निहोत्रादिको यज्ञ) १७ ५५ [मह पूजायाम् (भ्वा०) धातो 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति चानश् । विकरणव्यत्ययेन शप श्लु । तुजादित्वादभ्यासस्य दीर्घ. । यजमानो वै मामहान श० ६ २ ३ ६]

मामृजे मृजति शोधयति प्र० —अत्र 'तुजादीनाम्०' इत्यभ्यासदीर्घ ७ २६ ३ [मृजूष् शुद्धौ (अदा०) धातोर्लिट् । तुजादित्वादभ्यासस्य दीर्घ]

मायया प्रज्ञया २३ ५२ आडम्वरेण ५ ६३ ७ आच्छादनादिना प्रज्ञया वा ५ ६३ ३ कपटयुक्तया (वाचा) ऋ० भू० ३१७, १० ७१ ५. **माया**=प्रज्ञा ३ ६१ ७ **मायाभिः**=प्रज्ञा-विशेषव्यवहारै १ ११ ७ प्रज्ञानोपायै १ ५१ ५ गर्जनाऽन्धकारविद्युदादिवत् कपटधूर्त्ततादिधर्म्मादिभि १ ३३.१० **मायायै**=प्रज्ञावृद्धये ३० ७ **मायाः**=छलयुक्ता प्रज्ञा २ ११ १० कपटानि ६ ४५ ६ कपटादियुक्ता क्रिया १ ११७ ३ अन्धकाराद्या इव १ ३२ ४ **मायाम्**=प्रज्ञापिका विद्युतम् १३ ४४ मेधाम् ५ ८५ ६ [मा माने (मानमिहान्तर्भाव) (अदा०) धातो 'मा छाशसिभ्यो य ' उ० ४ १०६ सूत्रेण य । तत स्त्रिया टाप् । माया प्रज्ञानाम निघ० ३ ६ मायया वाक्प्रतिरूपया नि० १ २० मायाम्=प्रज्ञाम् निघ० ७ २७ माया प्रज्ञानानि नि० १२ १७]

मायावान् कुत्सितप्रज्ञायुक्त (दस्यु =दुष्टस्वभावो जन) ४ १६ ६ [मायाप्राति० निन्दायामर्थे मतुप्]

मायाविनम् दुष्टप्रज्ञम् (दुष्टाचारिणं जनम्) २ ११ ६ [मायाप्राति० निन्दायामर्थे 'अस्मायामेधास्रजो विनि ' अ० ५ २ १२१ सूत्रेण विनि]

मायिनम् प्रशस्ता माया प्रज्ञा विद्यते यस्य तम् (विद्वास जनम्) ५ ५८ २ कुत्सिता माया प्रज्ञा विद्यते यस्य तम् (अहि=मेघम्) ५ ३० ६ छलादिदोषयुक्तम् (मृग=परस्वापहर्त्तार जनम्) १ ८० ७ छलकपटयुक्त दुष्टकर्मकारिण मनुष्यम् १ ५३ ७ माया निन्दिता प्रज्ञा विद्यते यस्य तम् (दुष्टस्वभाव प्राणिनम्) प्र०—अत्र निन्दाऽर्थे इनि १११ ७ **मायिनः**=प्रशंसिता माया प्रज्ञा विद्यन्ते येषान्ते (कवय =विद्वासो जना) १ १५६ ४ कुत्सिता माया प्रज्ञा विद्यते यस्य तस्य (दानवस्य=दुष्टकर्मकर्त्तुर्जनस्य) २ ११ १० प्रशस्तप्रज्ञा (राजादयो जना) ३.३८ ६ अन्यायकारिण (मनुष्यस्य) ऋ० भू० १५१, ऋ० १ ३ १८ २. कपटादिदोषयुक्ताँश्छत्रून् १ ५४ ४ कपटाद्यधर्माचरणयुक्तस्य (दुर्जनस्य) प्र०—अत्र निन्दार्थे इनि १ ३६ २ **मायिनाम्**=येषा मायानिर्माणं घनाकार सूर्यप्रकाशाच्छादक वा बहुविध कर्म विद्यते तेषाम् (मेघानाम्) प्र०—अत्र भूम्न्यर्थे इनि १.३२ ४ माया कुत्सिता प्रज्ञा विद्यते येषान्तान् (दुष्टाश्छत्रून्) प्र०—अत्र कर्मणि षष्ठी ३३ ५६ **मायी**=उत्तमा प्रज्ञा विद्यते यस्य स (इन्द्र = सत्पुरुष) ७ २८ ४ [मायाप्राति० प्रशसाया निन्दार्थे वा (मत्वर्थे) इनि]

मायिना प्राज्ञौ (राजसभासेनेशौ) ६ ६३ ५ [माया प्रज्ञा नाम निघ० ३ ६ ततो मत्वर्थ इनि । ततो द्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश]

मायिनी माया प्रज्ञा विद्यते यस्या सा (विदुषी स्त्री) ५ ४८ १ [मायाप्राति० मत्वर्थे इनिप्रत्ययान्तात् स्त्रिया ङीप्]

मायुम् परिमित मार्गम् १ १६४ २६ वाणीम् प्र०—मायुरिति वाङ्नाम निघ० १ ११, १ १६४ २८ **मायोः**=शृगालविशेषस्य २४ ३२ [डुमिञ् प्रक्षेपणे (स्वा०) धातो 'कृवापाजिमिस्वदि०' उ० १ १ सूत्रेण उण् । 'मिनातिमिनोतिदीङा ल्यपि च' त्यात्त्वम् । मायु वाङ्नाम निघ १ ११ मायुमिवादित्यमिति वा, वागेषा माध्यमिका नि० २ ६]

मारुत मरुता मनुष्याणा मध्ये विदित (विद्वज्जन) ५ ४६ २ मनुष्याणा मध्ये वर्त्तमान (विद्वज्जन) ३३ ४८ **मारुतम्**=मरुता मनुष्याणामिद कर्म्म २२ ११ १४ मरुता वायूनामिमम् (गणम्) १ ६४ १२ महद्विषयम् (शर्ध =वलम्) २ १ ६ मरुत्सम्वन्धिनम् (गणम्) ३३ ४५ मरुता समूहस्तम् प्र०—अत्र 'मृग्रोरुति ' उ० १ ६५ इति मृङ्धातोरुति प्रत्यय 'अनुदात्तादेरञ्' अ० ४ २ ४४ इत्यञ् प्रत्यय । समी०—इद पद सायणाचार्येण मरुता सम्वन्धि तस्येदमित्यण् व्यत्ययेनाऽऽद्युदात्तत्वम् इत्यशुद्ध व्याख्यातम् १ ३७ १ मरुतो विकारो मारुतस्तम् १ ३७ ५ **मारुतस्य**=कलायन्त्रवायो. प्राणस्य वा १ ८७ ६ मरुतामय तस्य (वेधस =विधातु) १ १५६ ४ **मारुतः**=मरुद्देवताक (कल्माष. पशु) २६ ५८ वायूना समूह ५ ६१.१३ मरुता पवनानामय सम्बन्धी ज्ञाता (विद्वज्जन) १८ ४५. मनुष्यदेहानामयम् (प्रजापति.=जीव) ३६ ५ मनुष्याणा

['मित' इति व्याख्यातम् । तत्र शेर्लोपश्छन्दसि]

मिता परिमाणयुक्त (शाला) स वि० १६७, अथर्व० ९ २ ३ १६ **मिताम्**=प्रमाणयुक्त अर्थात् माप से ठीक=जैसी चाहिये वैसी (शाला) को स० वि० १६७, अथर्व० ९ २ ३ १६ [मितप्राति० स्त्रिया टाप्]

मिता इव विद्यया सकलपदार्थवेदित्र्य (कन्या) इव ४ ५१ २ [मिता-इवपदयो समास]

मितासः परिमितविज्ञाना (मनुष्या) १७ ८४ [मितप्राति० जसोऽसुक्]

मित्र ! सुहृत् (उपदेशक जन) १ १२२ ७ सखे (वरुण=राजन्) ४ १ १८ सर्वसुहृदुपदेशक ४ ५५ १ **मित्रम्**=सर्वव्यवहारसुखहेतु ब्रह्माण्डस्य सूर्य्य शरीरस्य प्राण वा । प्र०—मित्र इति पदनामसु पठितम् निघ० ५ ४ अत्र प्राप्त्यर्थ "मित्रो जनान् यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् । मित्र कृष्टिरनिमिषाभिष्टे मित्राय हव्य घृतवज्जुहोत" ऋ० ३ ५९ १ अत्र मित्रशब्देन सूर्य्यस्य ग्रहणम् 'प्राणो वै मित्रोऽपानो वरुण' शत० ८ २ ५ ६ अत्र मित्रवरुणशब्दाभ्या प्राणाऽपानयोर्ग्रहणम् १ २.७ प्राण इव प्रियम् (अग्नि=पावकम्) ६ ५० १ सर्वप्राण सर्वसुहृद वा (इन्द्र=सभाध्यक्षम्) १ १०९.१. वाह्याऽभ्यन्तरस्थ जीवनहेतु प्राणम् १ २३ ४ **मित्रयोः**=सुहृदोरध्यापकाऽध्येत्रोर्वाह्याभ्यन्तरस्थयो प्राणयोर्वा ६ ५१ १ **मित्रस्य**=सर्वजगत्सुहृद. प्रकाशकस्य वा (दिव=परमेश्वरस्य सूर्यलोकस्य वा) ४ ३५ द्रोहरहितस्य मनुष्यस्य, सूर्यलोकस्य, प्राणस्य वा प० वि० । सर्वगतस्य सर्वप्राणिभूतस्य (वायो) १ १४.१० सुहृद्भाव की स० वि० २१४, ३६ १८ **मित्रः**=सूर्य, प्र०—अत्र 'अमिचिमिदिश०' उ० ४ १३८ अनेन क्त्र प्रत्यय १ २३ ६ सर्वसुखकारी (ईश्वरो विद्वज्जनो वा) १.९० ९ प्राण इव प्रिय (ईश्वर) ५ ४६ ५ वायु ४ १३.२ प्राणवद्वर्त्तमान (देव=विद्वज्जन) १ १८६ २ सखेव प्रियाचार (दार) ७ ४० ७ सुखप्रद (उपदेशक) १० १६ सर्वथा सवका निश्चित मङ्गलप्रद (ईश्वर) आर्याभि० १ १, ऋ० १ ६ १८ ९ पक्षपातरहित सर्वेषा सुहृत् (राजा) ३ ३ १५ सर्वहि[illegible]री (अर्यमा=न्यायाधीश) १ ४४ १३ वहुसुखकारी, सर्वदु खविनाशक (ईश्वर सभाध्यक्षो वा) १ ९४ १३ सर्वोपकारी (ईश्वर आप्तमनुष्यो वा) १ ९० १ ब्रह्मचर्येण प्राप्तवल प्राण १ ६६ ९ सूर्य इव परमात्मा, सर्वस्य सुहृद्राजा वा ३ ५९ १ यो मेद्यति स्निह्यति स्निह्यते वा स मित्र 'जो सब से स्नेह करके सबको प्रीति करने योग्य सब का सुहृत् अविरोधी है वह (ईश्वर) प्र०—'ञिमिदा स्नेहने इस धातु से औणादिक क्त्र प्रत्यय के होने से मित्र शब्द सिद्ध होता है स० प्र० २०, ३६ ९ शत्रुतारहित (परमात्मा) आर्याभि० १ १८, ऋ० १ ६ १७ १ **मित्राय**=सर्वोपकारकाय [सेनेशाय सभाध्यक्षाय वा] १ १३६ ५ सख्ये ४ ३ ५ वह्नये ३ ५९ १ सर्वसुहृदे (वरुणाय=विद्वज्जनाय) १ १३६.४ **मित्रे**=प्राणे ५ ४२ २ **मित्रेण**=धार्मिकेण विदुषा सह भा०—सत्यधर्मप्रियेणाऽमात्येन सह २७ ५ [ञिमिदा स्नेहने (भ्वा०) धातो 'अमिचिमिशसिभ्य क्त्र' उ० ४ १६४ सूत्रेण क्त्र । मित्र पदनाम निघ० ५ ४ मित्र=मित्र प्रमीतेस्त्रायते । सम्मिन्वानो द्रवतीति वा । मेदयतेर्वा नि० १० २१ सर्वस्य ह्येव मित्रो मित्रम् श० ५ ३ २ ७ मित्र ! सत्यानामधिपतये । तै० ३ ११.४ १ ब्रह्मैव मित्र श० ४ १ ४ १. मित्र क्षत्र क्षत्रपति श० ११ ४ ३ ११ प्राणो वै मित्र श० ६ ५ १ ५ अय वै वायुर्मित्रो योऽय पवते श० ६ ५. ७ १४ अहर्मित्र ता० २५ १० १० य (अर्द्धमास) आपूर्य्यते स मित्र. ता० २५ १० १० यो (अर्धमास) ऽपक्षीयते स मित्र श० २४.१८ मित्रेणैव यज्ञस्य स्विष्ट शमयति तै० १.२ ५ ३. प्राणो मित्रम् जै० उ० ३.३ ६ मित्र क्षीरश्री (सोम) तै० स० ४ ४ ९ १. मित्रमह मै० १ ८ ६ मित्रो वै यज्ञस्य शान्ति काठ० ३५ १९ मित्रो वै शिवो देवानाम् तै० स० ५ १ ६ १. य (अर्द्धमास) आपूर्यते स मित्र ता० २५ १०.१० यो (अर्धमास) ऽपक्षीयते स मित्र श० २ ४.४ १८. सत्य वै मित्र. मै० ४ ३ ९]

मित्र इव सखेव २ ४ १ [सखा-इवपदयो समास]

मित्रधितये मित्राणा धितिर्धारण यस्मात्तस्मै (राये=धनाय) १ १२० ९ [मित्र-धितिपदयो समासः । धिति=धि धारणे (तुदा०) धातो स्त्रिया क्तिन्]

मित्रधेये मित्रैर्वर्त्तव्ये व्यवहारे भा०—सन्त्रे सुसन्धौ २७ ५ [मित्र-धेयपदयो समास । धेयम्=दधातेर्यत्]

मित्रपते मित्राणा पालक (ईश्वर) १ १७० ५ [मित्र-पतिपदयो समास]

मित्रमह य सर्वमित्रै पूज्यते तत्सम्बुद्धौ (विद्वज्जन) १ ५० ११ मित्र सखा मह पूजनीयो यस्य तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ६ २ ११ यो मित्रेपु महाँस्तत्सम्बुद्धौ (अग्ने=परमेश्वर) ७ ५ ६ मित्राणा मह सत्कारस्य

वै रश्मय ता० १४.१२ ६ मासा हवीषि श० ११ २ ७ ३ यव्या मासा. श० १ ७ २ २६ मासा देवा अभिप्लव गो० पू० ५ २३ मासा उपसद श० १० २ ५६ एष (चन्द्रमा) मास जै० २ ३ त्रिंशन्मासो रात्रय काठ० ३४ ६ त्रिंशिनो मासा तै० स० ७ ५ २० १ दक्षिणावृतो मासा तै० स० ५ ३ २ ४. मासा वै वाजा तै० स० २ ५ ७ ४. मासा सन्धानानि तै० स० ७ ५ २५ १.]

मासि मासे २ १७ ७ [मासप्राति० सप्तम्याम् 'पदन्नोमास्०' इत्यादिना 'मास्' आदेश । मासि=मासे नि० ६ ३५]

मासि परिमिमीषे १ ४२ प्रापयसि १ ६२ ७

माहि=सत्कुरु ७.२६ ५ मन्यस्व ४ २२ १० [मा माने (अदा०) धातोर्लट् । अन्यत्र लोट्]

माहिनम् महत् (श्रव=श्रवणमन्न वा) ४ १७ २ अत्यन्त पूज्य महच्च (रेवत्=प्रशस्तधनवदैश्वर्यम्) १ १५१ ६ महत्तमम् (दत्रम्=दानम्) ३ ३६ ६ [मह पूजायाम् (भ्वा०) धातो 'महेरिनण् च' उ० २ ५६ सूत्रेण इनन्]

माहिनः महिमायुक्त (विद्वज्जन) प्र०—अत्र महेरिनण् च इत्युणादौ सिद्ध १ १६५ ३ महान् (इन्द्र=विद्युत्) २ १९ ३ पूज्यमानो महत्त्वेन युक्त (इन्द्र=सभेश) ३३ २७ **माहिनाय**=उत्कृष्टयोगान्महते (इन्द्राय=सभाद्यध्यक्षाय) १ ६१ १ [माहिन इति व्याख्यातम् । माहिन महन्नाम निघ० ३ ३ इय पृथिवी वै माहिनम् ऐ० ३ ३८]

माहिनः पूज्या महत्त्वगुणविशिष्टा (दिव=दिव्यगुणसमूहा) १ ५६ ६ **माहिना**=महत्त्वेन १ १८० ५ **माहिने**=महिम्ने ३ ६ ४ [मह पूजायाम् (भ्वा०) धातोस् ताच्छील्ये णिनि]

माहिना सत्कर्त्तव्या (गी=वाणी) ३ ७ ५ **माहिनायाः**=महत्त्वयुक्ताया (उषस) ५ ४५ ८ [माहिनमिति व्याख्यातम् । तत स्त्रिया टाप्]

माहिनावान् बहूनि माहिनानि सत्करणानि विद्यन्ते यस्य स (परमात्मा) ३ ५६ ३ प्रशस्तानि माहिनानि पूजनानि विद्यन्ते यस्य स (सज्जन) ३ ३६ ४ [माहिनप्राति० भूम्न्यर्थे प्रशसाया वा मतुप् । मतुप्-प्रत्यये पूर्वस्य दीर्घ]

माहेन्द्राः=महेन्द्रदेवताका (सञ्चरा=मार्गा) २४ १७ [महेन्द्रप्राति० 'सास्य देवते' त्यर्थेऽण् । माहेन्द्रे सर्वे कामा मै० ४ ६ ८ माहेन्द्र दधिवास क्षौम दक्षिणा मै० २ ६ १]

माः रचये ५ २९ ८ [मा माने (अदा०) धातोर्लुङ् । अटोऽभाव. सिचो लुक् च छान्दसम्]

मांसभिक्षाम् मासस्य भिक्षामलाभम् १.१६२ १२ मासयाचनाम् भा०—मासमत्तुमिच्छान् २५ ३५ [मास-भिक्षापदयो समास । माससमिति व्याख्यास्यते । भिक्षा=भिक्ष भिक्षायामलाभे लाभे च (भ्वा०) धातो 'गुरोश्च हल' इति अकार । तत स्त्रिया टाप्]

मांसम् मृतकशरीराऽवयवम् १ १६१.१ **मांसेभ्यः**=शरीराऽन्तर्गतेभ्य (शरीरावयवेभ्य) ३९ १० वहि स्थेभ्य (शरीरावयवेभ्य) ३९ १० [मन ज्ञाने (दिवा०) धातो. 'मनेर्दीर्घश्च' उ० ३.६४ सूत्रेण स । धातोर्दीर्घश्च । मास=मास मानन वा मानस वा मनोऽस्मिन् सीदतीति वा नि० ४ ३. मास वै पुरीषम् श० ८ ६ २ १४ मास सादनम् श० ८ १ ४ ५]

मांसपचन्याः मासानि पचन्ति यस्या तस्या (उखाया=पाकसाधिकाया) प्र०—अत्र 'मासस्य पचियुड्घञो' इत्यन्तलोप १ १६२ १३ मास पचन्ति यस्या तस्या (उखाया=स्थाल्या) २५ ३६ [मास-पचनीपदयो समासे मासस्यान्त्यलोप 'मासस्य पचियुड्घञो' अ० ६.१ १४४ वा० सूत्रेण । पचनी=डुपचष् पाके (भ्वा०) धातोरधिकरणे ल्युट्]

मितज्ञवः मितानि जानूनि येषान्ते (ब्रह्मचारिणो जना) ३ ५९ ३ **मितज्ञुभिः**=सङ्कुचितजानुभिरासीनैर्विद्वद्भि ६ ३२ ३ [मित-जानुपदयो समासे जानुशब्दस्य ज्ञुरादेशश्छान्दस]

मितद्रवः ये मित द्रवन्ति गच्छन्ति ते (अश्वा योद्धारो वा) ७ ३८ ७ ये मित शास्त्रप्रमित विषय द्रवन्ति ते (राजपुरुषा) ६ १७ **मितद्रुः**=यो मित द्रवति गच्छति स (अग्नि=परमेश्वर) ४ ६ ५ यो मित शास्त्रसम्मित द्रवति प्राप्नोति स (विद्वज्जन) ७ ७ १ [मितोपपदे द्रु गतौ (भ्वा०) धातो 'द्रुप्रकरणे मितद्रवादिभ्य उपसंख्यानम्' अ० ३ २ १८० वा०सूत्रेण डु । मितद्रव सुमितद्रव नि० १२ ४४ अथवा मितोपपदे द्रु गतौ (भ्वा०) धातो 'हरिमितयोर्द्रुव' उ० १ ३४ सूत्रेण कु, डिच्च]

मितः मान प्राप्त (अ०—पुरुष) १७ ८१ [माङ् माने (जु०) धातो. क्त । 'द्यतिस्यतिमास्थाम्०' इतीकारादेश]

मिता मितानि (सद्म=स्थानानि) १ १७३ ३

मिथती: शत्रुसेना हिंसन्ती (स्पृध =सङ्ग्रामान्) ६.२५ २. **मिथत्या**=हिंसया ७ ४८ ३ [मिथृ मेथृ मेधाहिंसनयो (भ्वा०) धातो शत्रन्तान् ङीप्]

मिथस्तुर: या मिथस्त्वरयन्ति ता (ऊतय =रक्षा) ७.२६ ४ [मिथस् उपपदे ञित्वरा सम्भ्रमे (भ्वा०) धातो क्विप्प्रत्यये 'ज्वरत्वर०' इति वकारस्य उपधायाश्च स्थाने ऊठ्। ऊकारस्य ह्रस्वश्छान्दस । अथवा तुर्वी हिंसायाम् (भ्वा०) धातो क्विपि 'राल्लोप' इति वलोपे रूपम्]

मिथस्तुरा मिथो हिंसके (अहोरात्रे) ६ ४६ ३. [मिथस्तुर इति व्याख्यातम्। ततो द्विवचनस्याकारश्छान्दस]

मिथस्पृध्येव यथा परस्पर पृत्सु सङ्ग्रामेषु भवा सेना तद्वत् १ १६६ ६ [मिथस्पृध्या-इवपदयो समास. । मिथस्पृध्या=मिथस्पृध्प्राति० भवार्थे यत्, ततष्टाप् । मिथस्पृध्=मिथस्-पृध्पदयो समास । पृत्सु सग्रामनाम निघ० २.१७]

मिथ: परस्परम् ७ ३८ ५ अन्योऽन्यम् ७ ५६ ३ [मिथस् इति स्वरादिपाठादव्ययम्]

मिथुना मिथुनौ परस्परसङ्गतौ (सूर्याचन्द्रमसौ) ३ ३९ ३ दम्पती १ १४८ ४. द्वौ (अध्यापकोपदेशकौ) १ १५९ ४ विरोध विहाय मिलितौ (विद्वांसौ) १ ८३ ३. [मिथुनप्राति० 'सुपा सुलुक्०' इति द्विवचनस्याकार । मिथुनम्=मिथृ मेधाहिंसनयो (भ्वा०) धातो 'क्षुधिपिशिमिथिभ्य कित्' उ० ३ ५५ सूत्रेण उनन् । मिथुनौ सरण्यू मध्यम च माध्यमिका च वाचमिति नैरुक्ता । यम च यमी चेत्यैतिहासिका नि० १२ १० मिथुनौ कस्मात् ? मिनोति श्रयतिकर्मा, थु इति नामकरणस्थकारो वा नयति परो वनिर्वा, समाश्रितावन्योन्य नयत, वनुतो वा । मनुष्यमिथुनावप्येतस्मादेव, मेथन्तावन्योन्य वनुत इति वा नि० ७ २९ मिथुन वा अग्नीच्च पत्नीश्च मै० ४ ७ ४ मिथुन वा आपश्च पयश्च मै० १ ८ ३ मिथुन वै घृत च सोमश्च मै० ४ ७ ४. मिथुन वै पशव ऐ० ४ २१ मिथुन चक्षु (प्राणापानौ) काठ० १० १]

मिथुना मिथुनानि स्त्रीपुरुषाख्यद्वन्द्वानि १ १३१ ३ [मिथुनप्राति० शेर्लोपश्छन्दसि]

मिथुनानि युग्मानि ३ ५४ ७ [मिथुनमिति व्याख्यातम्]

मिथुनास: सयोगेनोत्पन्ना (पुत्रा =तनय इव तत्त्वानि) १ १६४ ११ सपत्नीका (विद्वांसो जना) ५ ४३ १५ [मिथुनप्राति० जसोऽसुक्]

मिथुना: द्वन्द्वा द्वौ द्वौ मिलिता (वायुजलविद्युत) ४ ४५ १ **मिथुनौ**=स्त्रीपुरुषौ १.१०६.३ [मिथुनमिति व्याख्यातम् । द्वन्द्व वै मिथुनम् ऐ० ३ ५०]

मिथू परस्परम् १.१६२.२०. मिथ २५ ४३ ['मिथू' इत्यव्ययम् । अथवा मिथृ मेधाहिंसनयो (भ्वा०) धातो कु]

मिथूदृशा परस्परदर्शयितारौ (उपासानक्ता=प्रत्यूषरात्र्यौ) २ ३१.५. यौ मिथू विषयासक्तिप्रमादौ हिंसन च दर्शयतस्तौ (अ०—शरीर-मनसी) प्र०—अत्र 'मिथृ मेथृ मेधाहिंसनयो , इत्यस्मादौणादिक कु प्रत्यय: । तदुपपदाद् दृशे कर्त्तरि क्विप् 'सुपा सुलुग्०' इत्याकारादेशो 'अन्येषामपि दृश्यते' इति दीर्घश्च १ २९ ३. [स्पष्टम्]

मिनत् हिंस्यात् ४ ३०.२३ **मिनन्ति**=हिंसन्ति ७.३१.११ **मिनवाम**=हिंसेम ५ ४५ ५ **मिनाति**=त्यजति १ १२४ ३ हिनस्ति १ १२३ ९ हन्ति १ ७१ १० दूर कर देता है स० प्र० ११०, १ १७९ १ **मिनीमसि**=हिंस्म प्र०—अत्र 'इदन्तो मसि' इति मसेरिदागम १ २५ १ [मिनाति वधकर्मा निघ० २ १९ गतिकर्मा निघ० २ १४ ततो लेटि लटि लोटि च रूपाणि]

मिनत् हिंसत् (अनीक=बल सैन्यम्) ५ २ १ [मिनाति वधकर्मा (निघ० २ १९) धातो शतृ]

मिनन् हिंसन् (जगदीश्वर) २ १३ ३ [मिनाति वधकर्मा निघ० २ १९) धातो शतृ]

मिनन्ता हिंसन्तौ (नरौ=विद्यानेतारौ) १ ११७ ३ [मिनाति वधकर्मा (निघ० २ १९) धातो शतरि द्विवचनस्याकारादेश]

मिनान: मान कुर्वाण (अ०—मनुष्य) ५ ४२ १३. [माङ् माने (जु०) धातो शानच् । विकरणव्यत्ययेन श्ना]

मिनोति प्रक्षिपति ५ २७ **मिन्वन्**=विशेषेण प्रक्षिपन्ति ३ ३१ १२ **मिमाय**=प्रक्षिपेयम् २ २९ ५. [डुमिञ् प्रक्षेपणे (स्वा०) धातोर्लट् । अन्यत्र लङ् लिट् च]

मिमाति मिमीते प्र०—अत्र व्यत्ययेन परस्मैपदम् १ १६४ २८. गच्छति १ १६४ २९ मिमीते जनयति १ ३८ ८ **मिमाथाम्**=रचयेतम् ४ ४१ ४ विधत्तम् ४ ४४ ६ **मिमाय**=मिमीते २ १५ ३ शब्दायते १ १६४ ४१ [माङ् माने शब्दे च (जु०) धातोर्लट् । व्यत्ययेन परस्मैपदम् । 'भृञामित्' इत्यभ्यासस्येत्त्वम् । अन्यत्र लोटि लिटि च रूपाणि]

मिमानम् धर्त्तारम् (कुमारम्) ५.२.३. **मिमान:**=प्रक्षिपन् विभजन् (सविता=सूर्य) १.५० ७ योऽनेकानुत्त-

कारयित (अग्ने=विद्वन्) १ ५८ ८ यो मित्राणि महति सत्करोति तत्सम्बुद्धौ (राजन् शिष्यजन वा) २ १ ५ यो मित्राणि महयति पूजयति तत्सम्बुद्धौ (विद्वज्जन) २६ २५ **मित्रमहः**=यो मित्राणां मह पूज्य (विद्वान् जन) १.४४ १२ [मित्र-महपदयो समास । मह=मह पूजायाम् (भ्वा०) धातोर्घञर्थे क । कर्त्तरि अच् वा]

मित्रमहः ये मित्राणि महन्ति सत्कुर्वन्ति ते (राजाऽमात्या) ४ ४ १५ [मित्रोपपदे मह पूजायाम् (भ्वा०) धातो कर्त्तरि क्विप्]

मित्रमहाः यो मित्राणि पूजयति स (विद्वान् जन) ६ ३ ६ [मित्रमह इति व्याख्यातम्]

मित्रयुजः ये मित्रै सह युञ्जन्ति ते (देवा=विद्वज्जना) १ १८६ ८ [मित्रोपपदे युजिर् योगे (रुधा०) धातो 'सत्सूद्विषद्रुहयुज०' अ० ३ २ ६१ सूत्रेण क्विप्]

मित्रराजाना प्राणविद्युतौ ५ ६२ ३ [मित्र-राजन्-पदयो समासे द्विवचनस्याकारादेशश्छान्दस]

मित्रा मित्र प्राणम् प्र०—अत्र विभक्तेराकारादेश ३३ ४५ सखायौ ५ ६६ ६ [मित्रप्राति० विभक्तेराकारादेश]

मित्रायुवः य आत्मनो मित्राणीच्छन्त (विद्वासो जना) १.१७३ १० [मित्रपदाद् इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसी' ति उ']

मित्रावरुणनेत्रा प्राणोदानवन् सर्वान् धर्म्मं नयन्त (देवा=सर्वेभ्य सुखदातारो विद्वास) ९ ३६ **मित्रावरुणनेत्रेभ्यः**=प्राणाऽपानतुल्येभ्य (देवेभ्य=दिव्यन्यायप्रकाशकेभ्यो विद्वज्जनेभ्य) ९ ३५ [मित्र-वरुणयो समासे ततो नेत्रेण सह समास । नेत्रम्=णीञ् प्रापणे (भ्वा०) धातोरौणा० ष्ट्रन्]

मित्रावरुण मित्रश्च वरुणश्च तौ प्राणोदानौ प्र०—अत्र 'सुपा सुलुक्' इति विभक्तेराकारादेशो व्यत्ययेन ह्रस्वत्व च १ १५ ६ [मित्र-वरुणपदयो समासे पूर्वपदस्यानङ्, विभक्तेश्च लुक्]

मित्रावरुणयोः सभासेनेशयो १० २१ प्राणोदानयो ६ २४ **मित्रावरुणाभ्याम्**=सख्युत्कृष्टाभ्याम् (पुरुषाभ्याम्) ७ २३ **मित्रावरुणौ**=प्राणोदानवद्वर्त्तमानौ (विद्युत्पवनौ) १ १३९ २ बलपराक्रमकारकौ प्राणोदानौ १ ७५ ५ य सर्वप्राणो वहिस्थो वायुर्वरुणोऽन्तस्थमुदानो वायुश्च तौ २ १६ प्राणोदानाविवाध्यापकाध्येतारौ ५ ४१ १ सूर्यवायू प्र०—अत्र 'देवताद्वन्द्वे च' अ० ६ ३ २६ अनेनाऽऽनङादेश १.२८. **मित्रावरुणा**=मित्रश्च वरुणश्च द्वौ सूर्यवायू प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश. १ २३ ५ प्राणोदानौ २८ १९ सुहृद्वरावध्यापकोपदेशकौ १ १५२ ३ प्राणोदानवद्राजप्रधानाऽमात्यौ ४ ३९ ५ य सर्वमित्र सर्वेश्वरश्च तौ १ ७१ ९ अध्यापकोपदेशकौ ७ ३३ १० प्राणोदानाविव सखिराजानौ ७ ४१ ४ वायुसवितारौ ५ ६३ ३ यज्ञशिल्पकारिणौ ५ ६३ ५ वायुसूर्याविव (राजामात्यौ) ५ ६३ २ मातापितरौ ५ ४७ ७ सर्वसुहृदुत्कृष्टौ (अश्विना=अध्यापकाऽध्येतारौ) १ १११ ४ सखायावुत्तमौ जनौ ७ १० स्त्रीपुरुषौ ७ ४२ ५ सत्योपदेशकौ (विद्वज्जनौ) १ ५३ ३ मित्र सर्वेषा सखा वरुण श्रेष्ठश्च तौ (सज्जनौ) ५ ६७ ३ प्राण उदान के समान प्रिय और सर्वशक्तिमान् (ईश्वर) स० वि० १५५, ७ ४१ १ प्राण और उदान, स० वि० १२२, अथर्व० १४ १ ५४ [मित्र-वरुणपदयो समासे 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेणानङ् । मित्रावरुणा=मित्रावरुणौ नि० ११ २३ प्राणापानौ मित्रावरुणौ ता० ६ १० ५ प्राणो वै मित्रोऽपानो वरुण श० ८ ४ २ ६. प्राणोदानौ वै मित्रावरुणौ श० १ ८ ३ १२ अहोरात्रौ वै मित्रावरुणौ ता० २५ १० १० अहर्वै मित्रो रात्रिर्वरुण ऐ० ४ १० अर्द्धमासौ (शुक्लकृष्णपक्षौ) वै मित्रावरुणौ ता० २५ १० १० अथैतावेवार्धमासौ मित्रावरुणौ, य एवापूर्यते स वरुणो योऽपक्षीयते स मित्र श० २ ४ ४ १८ वाहू वै मित्रावरुणौ श० ५ ४ १ ३५ द्यावापृथिवी वै मित्रावरुणयो प्रिय धाम ता० १४ २ ४० गोसस्तवौ वै मित्रावरुणौ कौ० १८ १३ चक्षुश्च मनश्च मैत्रावरुण काठ० २७ ५ मनो मैत्रावरुण श० १२ ८ २ २३ यज्ञो वै मैत्रावरुण कौ० १३ २]

मित्रासः सर्वस्य सुहृद. (सम्राज=राजान) ७ ३८ ४ सखाय ३ ५८ ४ [मित्रप्राति० जसोऽसुक्]

मित्रिणः मित्राणि यस्य सन्ति तस्य (राज्ञ) १ १७८ ४ [मित्रप्राति० भूम्न्यर्थे इनि]

मित्रियात् मित्रात् ४ ५५ ५ [मित्रप्राति० पचमी । वर्णव्यत्ययेनाकारस्येयादेश]

मित्रेरुन् मित्रहिंसकान् शत्रून् प्र०—अत्र मित्रोपपदाद् रुषधातोर्वाहुलकादौणादिको डु प्रत्यय १ १७४ ६ [मित्रोपपदे रुष हिंसार्थे (भ्वा०) धातोर्वाहु० औणा० डु]

मित्र्यम् मित्रेषु भवम् (प्रमादम्) ५ ८५ ७ **मित्र्यः**=मित्रेषु साधु (अग्नि=जगदीश्वर) २ ६ ७ [मित्रप्राति० भवार्थे यत्]

घञर्थे को वा । अन्यत्र क्विप् अपि]

मीढुषः वीर्यसेचकस्य (पूर्णब्रह्मचारिजनस्य) ६ ६६ ३. विद्यादिसद्गुणसेचकान् (मरुत =ऋत्विजो जनान्) ३ ४६ जलेनेव सुखसेचकस्य (विष्णो =ईश्वरस्य) ७ ४० ५ वीर्यवत (सेनापते) ४ १५ ५ **मीढुषे**=सुख सिञ्चते (रुद्राय=राज्ञे) ५ ४१ २ वारिणेव सत्योपदेशै सेचकाय (यतिरूपायाऽतिथये) ७ १५ १ वीर्यवते (सेनापतये) १६.८ सज्जनान् प्रति सुखसेचकाय (रुद्राय=सेनाध्यक्षाय) १ १२२ १ स्निग्धाय सेचनसमर्थाय (राज्ञे) २८ ५ सुखवर्धकाय (विदुषे जनाय) ४ ३ ५ **मीढ्वः**=सुखसेचक (वैद्यराज) २ ३३ १४ सुखै सिञ्चन् (रुद्र=सभाध्यक्ष १ ११४ ३ सुखाना सेचक (अग्ने=राजन्) ३ १६ ३ वीर्यदानकर्त्त (इन्द्र=विवाहितपते) ऋ० भू० २१३, ऋ० ८ ३ २८ ५ वीर्यसेचन मे समर्थ (इन्द्र=ऐश्वर्ययुक्त पुरुष) स० प्र० १४८, १० ८५ ४५ हे सत्य से सब के अन्त करण को सीचने वाले (सन्यासिन्) स० वि० १६५, ६ ११३ २ **मीढ्वान्**=विद्याया सेचक (सखा=सुहृज्जन) २ २४ १ वृष्टिद्वारा सेचक (सूनु =कार्यकारी सन्तान) प्र०—अत्र 'दाश्वान्साह्वान्०' अ० ६ १ १२. इति निपातनात् द्वित्व न १ २७ २ [मिह सेचने (भ्वा०) धातोर्लिट क्वसु । 'दाश्वान्साह्वान्मीढ्वाश्च' अ० ६ १.१२ सूत्रेणाद्वित्वमनिट्त्वमुपधादीर्घत्व ढत्व च निपात्यते]

मीढुषी सेचनकर्त्री (भा०—कृतब्रह्मचर्या स्त्री) ५ ५६ ६ [मिह-सेचने (भ्वा०) +लिट क्वसु+स्त्रिया ङीप्]

मीढुष्टम योऽतिशयेन मीढ्वान् वीर्यवाँस्तत्सम्बुद्धौ (सभासेनेश) १६ ५१ अतिशयेन वीर्यस्य सेचक सेनापते १६ ११ **मीढुष्टमाय**=अतिशयेन वृक्षोद्यानक्षेत्रादिसेचकाय कृपीवलाद्याय १६ २६ प्रसेक्तुतमाय (रुद्राय=परमेश्वराय जीवाय वा) १४३ १ [मीढुष्प्राति० अतिशायने तमप् । मीढुष् इति व्याख्यातम्]

मीढुष्मतीव मीढु सेक्ता वीर्यप्रद प्रशस्त पतिर्विद्यते यस्या (पृथिवी=भूमि) तद्वत् (पृथिवी) ५ ५६ ३ [मीढुष्मती-इवपदयो समास । मीढुष्मती=मिह सेचने (भ्वा०)+लिट क्वसु +मतुप्+स्त्रिया ङीप्]

मीढुष्मन्तः मीढुषो बहवो वीर्यसेचकादयो गुणा येषान्ते पृथिव्यादय पदार्था प्राणिनश्च) ६ ५० १२ [मिह सेचने (भ्वा०) धातोर्लिट क्वसु । ततो भूम्न्यर्थे मतुप्]

मीढे सङ्ग्रामे ६.४६.४ [मीळ्ढे=सग्रामनाम निघ० २ १७]

मीयते हिंस्यते २ ८.३ [मीञ् हिंसायाम् (क्र्या०) धातो कर्मणि लट्]

मीयमानः सत्क्रियमाण (पुरुषार्थिजन) ३ ८ ३. [माङ् माने (जु०) धातो कर्मणि शानच्]

मीवता हिंसता (कुमारेण=अकृतविवाहजनेन) २८ १३ [मीव स्थौल्ये (भ्वा०) धातो शत्रन्तात् तृतीया]

मुक्षीजयेव मुक्ष्या मुञ्जाया जायते सा मुक्षीजा तयेव १ १२५.२. [मुक्षीजया-इवपदयो समास । मुक्षीजया=मुक्षीजाप्राति० तृतीया । मुक्षीजा='मुक्षी' इत्युपपदे जायतेर्ड । मुक्षीजा मोचनाच्च सयनाच्च ततनाच्च नि० ५.१९]

मुक्षीय मुक्तो भवेयम् ७ ५९ १२ पृथग् भूयासम् अ०— श्रद्धारहितो भूयासम्, मुक्तो भूयासम् ३ ६० [मुच्लृ मोचने (तुदा०) धातोर्लिङ् । मुक्षीय=मुञ्चस्व नि० १३ ३५.]

मुखतः अग्रत २५ २५ [मुखप्राति० तसि]

मुखम् मुखस्थानीय श्रेष्ठम् (भा०—उत्तमाङ्गम्) ३१ १० मुखमिवोत्तम. (ब्राह्मण =वेदेश्वरविदनयोरुपासको जन) ३१ ११ आस्यम् २० ५ मुख्यगुणेभ्य उत्पन्नम् (पुरुषाऽङ्गम्) ऋ० भू० १२५, ३१ १० सृष्टि मे मुख के सदृश सबसे मुख्य उत्तम (ब्राह्मण =वेदेश्वरवित्) स० प्र० ११४, ३१ ११ **मुखात्**=मुख्यज्योतिर्मयाद्भक्षणरूपात् ३१ १२ [खनु अवदारणे (भ्वा०) धातो 'डित् खनेर्मुट् चोदात्त' उ० ५ २० सूत्रेण अल् अच् वा डित्वाट्टेर्लोपो मुडागमश्च । मुख प्रतीकम् श० १४४ ३ ७]

मुखा मुखेन सहचरितानि श्रोत्रादीनीन्द्रियाणि प्रति ४.३९ ६ मुखानि २३ ३२ [मुखप्राति० शेर्लोपश्छन्दसि]

मुग्धः मूढ (अविद्वज्जन) ५ ४० ५ **मुग्धाय**=प्रापितमोहाय मोह प्राप्ताय वा (जनाय) प्राप्तमोहनिमित्ताय (अह्ने) मूर्खाय वा ६ २० [मुह वैचित्ये (दिवा०) धातो क्त]

मुच त्यज प्र०—अत्र 'वाच्छन्दसि' इत्युपधानकारलोप १ १७७ ४ **मुचध्वम्**=त्यजत १ १७१ १ **मुचाति**=मुच्यात् प्र०—अत्र लेटि 'छान्दसी वर्णलोपो०' इति नलोप २ ३८.३ **मुचीष्ट**=मुञ्चत ७ ५९ ८. **मुच्यध्वम्**=मुक्ता भवत प्र०—अत्र विकरणव्यत्ययेन श्यन् ६ १२ त्यजत १२ ७३ **मुच्यन्ताम्**=त्यजन्ताम् ३५ ३ **मुच्यसे**=मुक्तो भवसि १ ३१४ **मुच्ये**=मुक्तो

मान् पदर्थान् मिमीते स (विद्वज्जन) २० ३७ निर्माता सन् (जगदीश्वर) २ १७ २ मान कुर्वाण (मनुष्य) ५ ४२ १३ **मिमाना:**=शत्रून् प्रक्षेपमाणा (जना) ६ १३ उत्पादयन्त (दुर्मित्रास=शत्रुसेना) ७ १८ १५ [डुमिञ् प्रक्षेपणे (स्वा०) धातो शानच् । व्यत्ययेन शप श्लु । माङ् माने (जु०) धातोर्वा शानच् । धातूनामनेकार्थकत्वादत्र प्रक्षेपणेऽपि]

मिमाना विदधतौ (कारू=शिल्पनौ) २६ ३२ निर्मातारौ ६ ६२ २ निश्चेतारौ (देवौ=विद्वासौ जनौ) २६ ७ [मिमाना=निर्मिमानौ नि० ८ १२ मिमानमिति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छन्दसि]

मिमाने निर्माणकर्तृणी द्यावापृथिव्यौ १ १४६.३ [मिमानमिति व्याख्यातम्]

मिमिक्षतम् सेक्तुमिच्छतम् १ २२ ३ प्रापयितुमिच्छतम् १ १५७ ४ मेढु सेक्तुमिच्छतम् १ ४७ ४ **मिमिक्षताम्**=सुखै सेक्तुमिच्छताम् १ २२ १३ मेढुमिच्छताम् ६ ७० ५ सेक्तुमिच्छेताम् १३ ३२ **मिमिक्षति**=मेढु सिञ्चितुमलङ्कर्तुमिच्छति १ १४२ ३ **मिमिक्ष:**=ससिश्च ६ ३४ ४ **मिमिक्षिरे**=मेढुमिच्छन्ति १ ८७ ६ **मिमिक्षु:**=सिञ्चन्ति १ १६५ १ आसिञ्चन्ति ६ २६ ३ सम्बध्नन्ति ६ २६ २ **मिमिक्षे**=मेढु सेक्तुमिच्छेयम् २ ३ ११ सिञ्चितुमिच्छ १७ ८८ **मिमिक्ष्व**=मेढुमिच्छ १ ४८ १६ [मिह सेचने (भ्वा०) धातोरिच्छायामर्थे सन्नन्ताल्लोट् अन्यत्र लट् लिट् च । इम यज्ञ मिमिक्षतामितीम यज्ञमवतामित्येतत् श० ७ ५ १ १०]

मिमिक्षन् सुखै सेक्तुमिच्छन् (इन्द्र=सूर्यवद्राजन्) ७ २० ४ [मिह सेचने (भ्वा०) धातोरिच्छायामर्थे सन्नन्ताच्छतृ]

मिमिक्षुम् सेक्तुमिच्छम् (इन्द्र=विद्वास जनम्) ३ ५० ३ [मिह सेचने (भ्वा०) धातोरिच्छायामर्थे सन्नन्तात् 'सनाशसभिक्ष उ' इति ताच्छील्य उ]

मिमीतन् मन्येथाम् १ १२० ६ **मिमीत**=जनयत ५ ७६ २ **मिमीताम्**=मृजेथाम् ५ ५१ ११ **मिमीते**=रचयति १ १६४ २४ जनयति ३ १ ५ **मिमीहि**=मन्यस्व ६ १६ ३ मान्य कुरु ७ १६ ११ निर्मिमीहि प्र०—माङ् माने शब्दे च इत्यस्य रूपम्, व्यत्ययेन परस्मैपदम् १ ३८ १४ **मिमीहे**=सम्पादय ३ १ १५ [माङ् माने शब्दे च (जु०) धातोर्लोट् । अन्यत्र लट् लोट् च । व्यत्ययेन परस्मैपदम् । मिमीहि याच्ञाकर्मा निघ० ३ १६]

मिमृक्षु. सहन्ते प्र०—अत्र 'बहुल छन्दसि' इत्यभ्यासस्येत्वम् १ ६४ ४ [मृष तितिक्षायाम् (भ्वा०) धातोश्छान्दस रूपम् । मृक्ष सघाते (भ्वा०) धातोर्वा लिट्]

मिम्यक्ष तूर्ण गच्छ ६ ५० ५ प्राप्नुहि १.१६७ ३ [म्यक्षति गतिकर्मा (निघ० २ १४) धातोर्लोट् । द्वित्वमित्व च छान्दसम्]

मियेध: येन मिनोति दु ख प्रक्षिपति स (यज्ञ=सङ्गतो व्यवहार) प्र०—अत्र बाहुलकादौणादिक एधप्रत्यय ३ ३२ १२ मियेन प्रक्षेपणेनैध प्रदीपन यस्य स (यज्ञ) १ १७७ ४ **मियेधे**=घृतादि-प्रक्षेपणेन प्रशसनीये यज्ञे ३ १६ १ प्रापणीये यज्ञे ३ १६ ५ परिमाणयुक्ते यज्ञे ७ १ १७ **मियेधै:**=प्रेरकै (ऋत्विग्भि) ६ ५१ १२. [डुमिञ् प्रक्षेपणे (स्वा०) धातोर्बाहु० औणा० एधप्रत्यय किच्च । अथवा मिय-एधपदयो समास । मिय=मिनोतेर्घञर्थे क । एध=इन्धे रूपम्]

मियेध्य मिनोति प्रक्षिपति अन्तरिक्ष प्रत्यग्निद्वारा पदार्थास्तत्सम्बुद्धौ (अ०—होतर्यजमान वा) प्र०—अत्र डुमिञ्धातोरौणादिको बाहुलकात् केध्यच्प्रत्यय १ २६ १ दु खाना प्रक्षेप्त (ईश्वर) १ ४४ ५ दुष्टाना क्षेपणशील (अग्ने=विद्वज्जन) ३८ १७ यो मिनोति प्रक्षिपति दुष्टान् तत्सम्बुद्धौ (अग्ने=तेजस्विन् विद्वन्) प्र०—अत्र बाहुलकात् औणादिक एध्यच्प्रत्यय किच्च ११ ३७ [डुमिञ् प्रक्षेपणे (स्वा०) धातोर्बाहु० औणा० केध्यच्]

मिश्रा: मिलिता (वीरा जना) १७ ६५. [मिश्र सम्पर्के (चुरा०) धातोर्घञर्थे क]

मिषत: सहजस्वभावेन प० वि० । ऋ० ८ ८.४८.२]

मिषति सिञ्चति ३ २६ १४ [मिषु सेचने (भ्वा०) धातोर्लट् । विकरणव्यत्ययेन श]

मिषन्तम् शब्दयन्तम् (वत्सम्) १ १६४ २८ [मिष स्पर्द्धायाम् (तुदा०) धातो शतृ]

मिहम् वृष्टिम् २ ३० २ **मिह**=वृष्ट्य १ ७६ २ वृष्टे ५ ३२ ४ सेचका (पावका=पवित्रा पवित्रकरा जना) ३ ३१ २०' सेचनकर्त्तार (अ०—मरुत) प्र०—अत्र इगुपधलक्षण क प्रत्यय, 'सुपा सुलुग्०' इति जस सु १ ३७ ११ **मिहे**=वीर्यसेचनाय वेगाय वा १ ६४.६ [मिह सेचने (भ्वा०) धातोरिगुपधलक्षण कर्त्तरि क ।

धातो 'मुहे' किच्च' उ० २ १२० सूत्रेण उसि । पौन पुन्ये वार्थेऽव्ययम् । मूढ इव कालो यावदभीक्ष्ण चेति नि० २ २५]

मुहूर्त्तम् कालाऽवयवम् ३ ३३ ५ घटिकाद्वयम् ३ ५३ ८ [हृर्च्छति कुटिल भवतीति विग्रहे हुर्च्छा कौटिल्ये (भ्वा०) धातोर् बाहु० औणा० (उ० ३ ८६) क्त । धातोर्मुडागम । 'रात्लोप' अ० ६ ४ २१ सूत्रेण छलोप । मुहूर्त्ता न (प्रजापति) पञ्चदशाह्नो रूपाण्यपश्यदात्मन-स्तन्वो मुहूर्त्तां लोकम्पृणा पञ्चदशैव रात्रेस्तद्यन् मुहु त्रायन्ते तस्मान्मुहूर्त्ता श० १०.४ २ १८ चित्र' केतुर्दाता प्रदाता सविता प्रसविताभिशस्तानुमन्तेति एतेऽनुवाका मुहूर्त्तानां नामधेयानि तै० ३ १०.१० ३ मुहूर्त्तो मुहुर्ऋतु नि० २ २५]

मुहे मुग्धो भवति ६ १८ ८ [मुहे वैचित्ये (दिवा०) धातोर्लट् । विकरणव्यत्ययेन श, आत्मनेपदञ्च]

मूकम् अवाचम् (जनम्) ३० १६ [मूर्व्यते बध्यतेऽसौ मूक इति विग्रहे मूर्वी बन्धने (भ्वा०) धातोर्बाहु० औणा० (३ ४१) कक् । रेफवकारयोर्लोप]

मूजवतः बहवो मूजा घासादयो विद्यन्ते यस्मिन् तस्मात् पर्वतात् प्र०—मूजवान् पर्वत नि ६ ८, ३ ६१ [मूजवान् पर्वतो मुञ्जवान् नि० ६ ८]

मूत्रम् प्रस्राव १६ ७६ **मूत्रात्**=मूत्राऽऽधारेन्द्रियात् १६ ८४ [मुच्यते यत्तद् इति विग्रहे मुचॢ मोचने (तुदा०) धातो 'सिविमुच्योष्टेर' च' उ० ४ १६३ सूत्रेण ष्ट्रन् । मूत्र प्रस्रवणे (चुरा०) धातोर्वा घञ्]

मूराः मूढा (शत्रुजना) ४ २६ ७ [मुह वैचित्ये (दिवा०) धातो क्त । वर्णव्यत्ययेन ढकारस्य रेफ । मूरा मूढा निघ० ६ ८]

मूर्द्धन् मूर्द्धनि २० ४४ उत्तमाङ्गे २ ३ २ ['मूर्द्धन्' इति व्याख्यास्यते । तत सप्तम्या लुक्]

मूर्द्धनि उत्तमाङ्गे १ ५४ ५ **मूर्द्धा**=शिर इव सूर्य-रूपेण वर्त्तमान (अग्नि =प्रसिद्ध पावक) १५ २० मूर्द्धावदुत्तम ब्राह्मणकुलम् १४ ९. उत्तम (सभाद्यध्यक्ष) १.४३ ६ सर्वेषा शिर इव (अग्नि =सूर्य) १३ १४ उत्कृष्ट (वैश्वानर =जगदीश्वर) १ ५९ २ सर्वोपरि विराजमान' (अग्नि =सर्वस्वामीश्वर, प्रकाशादिगुणवान् भौतिको वा) ३ १२ **मूर्द्धानम्**=शिरोवदुन्नतप्रदेशे सूर्यरूपेण वर्त्तमानम् (अग्नि=विद्युतम्) ३ ३ ८ मूर्द्धेव वर्त्तमान सूर्यम् १५ २३. आकर्षेण बद्धारम् (अग्नि=वह्निम्) ३ २ १४ सर्वोपरि विराजमानम् (अग्निम्) ६ ७.१ मस्तकम् १ १६४.२८ शिर १३ १५ **मूर्द्ध्नः** =उपरि वर्त्तमानस्य (विश्वस्य= सर्वस्य जगत) ६ १६ १३ **मूर्द्ध्ना**=मस्तकेन २५.२. **मूर्द्ध्ने**=मस्तकशुद्धये भा०—मूर्द्धशोधनाय २२.३२ [मूर्वति बध्नाति स मूर्द्धेति विग्रहे मूर्वी बन्धने (भ्वा०) धातो 'श्वन्नुक्षन्पूषन्०' उ० १ १५९ सूत्रेण कनिन्-प्रत्यये वकारस्य धकारो निपात्यते । मूर्द्धनि प्रधानाङ्गे नि० ९ ३१ मूर्धा मूर्तमस्मिन् धीयते नि० ७ २७ प्रजापतिर्वै मूर्द्धा श० ८ २ ३ १०. एष वै मूर्धा य एष (सूर्य.) तपति श० १३ ४ १ १३]

मूलम् वृद्धिहेतुकम् अ०—वृद्धिहेतुम् १ २५ [मव बन्धने (भ्वा०) धातो 'मूशक्यबिभ्य क्ल' उ० ४.१०८ सूत्रेण क्ल । मूल मोचनाद्वा मोषणाद्वा मोहनाद्वा नि० ६ ३.]

मूषः आखव प्र०—अत्र जातिपक्षमाश्रित्यैकवचनम् १ १०५.८ [मुष स्तेये (क्र्या०) धातोरिगुपधलक्षण क । वर्णव्यत्ययेनोकारस्य दीर्घः । मूषो मूषिका''''''मूषोऽप्येत-स्मादेव नि० ४.६.]

मृक्तवाहसे शुद्धविज्ञानप्रापकाय (आप्तायाऽतिथये) ५ १८ २ [मृक्त वाहस्पदयो समास । मृक्त =मृजूष् शुद्धौ (अदा०) धातो क्त । वाहस्=वह प्रापणे (भ्वा०) धातोर्णिजन्ताद् असुन्]

मृक्षतम् मार्जयतम् ३ ४४ ७ शोधयतम् १ १५७ ४ **मृक्षः**=निश्चय ४ ३० १३ **मृक्षीष्ट**=शोधयतु १ १४७ ४ [मृजूष् शुद्धौ (अदा०) धातोर्लुट्, क्सो विकरणश्छान्दस । अटोऽभावश्च । अन्यत्र लिट् । मृक्ष सघाते (भ्वा०) धातोर्वा रूपाणि]

मृगम् परस्वाऽपहर्त्तारम् (मायिन जनम्) १ ८०.७ सिहम् २ ३३ ११ **मृगस्य**=मार्जयितु योग्यस्य (अर्णवस्य) १ १८२ ७ सद्योगामिन (मेघस्य) ५ ३२ ३. **मृगः**=यो मार्ष्ट्यन्विच्छति वधाय जीवानिति स (अ०—सिह) ईश्वरपक्षे तु यो मार्ष्टि व्यवस्थापनाय जीवानिति स ५ २० मृगेन्द्र सिह १८ ७१ यो मार्ष्टि कस्तूर्या स (कुरङ्ग) २९ ४८ हरिण १ ३८ ५ [मृजूष् शुद्धौ (अदा०) धातो 'पुसि सज्ञाया घ ०' इति घ । मृगो मार्ष्टेर्गतिकर्मण नि० १ २०. मार्ष्टि गतिकर्मा निघ० २.१४ मृगाणा मार्गण-कर्मणामादित्यरश्मीनाम् नि० १३ ७२ मृग अन्वेषणे (चुरा०)+क' प्रत्ययो वा । मृग =मृगमय नि० ९ १९]

मृगयम् मृगमाचक्षाणम् (शत्रुजनम्) ४.१६.१३

भवामि ५ ३६ **मुञ्च**=पृथक्कुरु २० १८. त्यज १६ ६ **मुञ्चत**=त्यजत ४ १२ ६ **मुञ्चतम्**=मुञ्चेतम् ६ ७४ ३ **मुञ्चति**=त्यजति प्रक्षिपति वा २ २३. **मुञ्चतु**=निवारयतु २० १६ पृथक्करोतु ६ १७. **मुञ्चते**=त्यजति ४ ५३ २ **मुञ्चन्ति**=उपरमन्ति २ २८ ४ **मुञ्चन्तु**=मोचयन्तु १२ ८६ **मुञ्चामि**=प्रक्षिपामि अ०—परित्यजामि ४.१३ [मुच्लृ मोचने (तुदा०) धातोर्लोट्। आगमशासनस्यानित्यत्वान्नुमोऽभाव । नकारलोपो वा छान्दस । अन्यत्र लेट्, लिङ्, लट् च]

मुचा यौ दुःख विमुञ्चतस्तौ (सखाया=सुहृदौ) ६ ४० १ [मुच्लृ मोचने (तुदा०) धातोरिगुपधलक्षण क । ततो द्विवचनस्य आकारादेश]

मुञ्जनेजनम् मुञ्जैर्नेजन शुद्धीकृतम् (उदकम्) १ १६१ ८ [मुञ्ज-नेजनपदयो समास । मुञ्ज =मुच्लृ मोचने (तुदा०) धातोरिगुपधलक्षणे क-प्रत्यये धातो स्थाने मुञ्जादेशश्छान्दस । मुञ्जो विमुच्यत इषीकया नि० ९ ६ नेजनम्=णिजिर् शौचपोषणयो (जुहो०) धातोर्ल्युट्]

मुद: मोदन्ते यासु ता (ओषधय) १८ ३८ सम्पूर्ण प्रसन्नताए स० वि० १६७, ९ ११३ ११ **मुदे**=हर्षाय ५ ४३ ५ मोदनाय १ १४५ ४ [मुद हर्षे (भ्वा०) धातो क्विप्। ओषधयो वै मुद ओषधिभिर्हीद सर्वं मोदते श० ६ ४.१ ७]

मुनिरिव यथा मननशीलो विद्वाँस्तथा ७ ५६ ८ [मुनि-इवपदयो समास]

मुमुक्ष्व: मोक्तुमिच्छन्त (जना) प्र०—अत्र 'जसादिषु वा वचनम्' इति गुणाऽभाव १ १४० ४ [मुच्लृ मोचने (तुदा०) धातोरिच्छायामर्थे सन्नन्ताद् उ प्रत्यय । गुणाऽभावश्छान्दस]

मुमुग्धि त्यज मोचय वा प्र०—अत्र 'बहुल छन्दसि' इति शप श्लु १ २४ ६ **मुमुच:**=मोचये ३ ४१ ८ **मुमोक्तु**=मुञ्चतु मोचयतु वा १ २४ १३ मोचयति प्र०—अत्राऽन्त्यपक्षे लडर्थे लोट् 'बहुल छन्दसि' इति शप श्लु । अन्तर्गतो ण्यर्थश्च १ २४ १२ [मुच्लृ मोचने (तुदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु]

मुमुचान: पृथग्भूत (फलादिपदार्थ) २० २० [मुच्लृ मोचने (तुदा०) धातोर्लिट कानच्]

मुषायत् आत्मनो मुष स्तेयमिच्छत् (विष्णु = सेनाध्यक्ष) प्र०—अत्र 'घञर्थे कविधानम्०' इति क प्रत्यय । तत 'सुप आत्मन क्यच्' इति क्यच्प्रत्यय 'न छन्दस्यपुत्रस्य' अ० ७ ४ ३५ इतीत्वप्रतिषेध १ ६१ ७ **मुषाय:**=यो मुष इवाऽऽचरति (चोर-जन) ४ ३० ४. [मुषप्राति० आत्मन इच्छायामर्थे क्यजन्ताच्छतृ । अन्यत्र कर्त्तरि अच् । मुष =मुष स्तेये (क्र्या०) धातोर्घञर्थे क]

मुषायत् मुष्णाति ७.१८ १६ **मुषायति**=मुष खण्डक इवाचरति १ १३०.९ चोरयति ५.४४ ४. **मुषाय:**=चोरय ६ ३१ ३ [मुष स्तेये (क्र्या०) धातोर्घञर्थे कप्रत्यये मुष । तत आचारेऽर्थे क्यजन्ताल् लट्]

मुषीवाणम् स्तेयकर्मणा भित्ति भित्त्वा दृष्टिमावृत्य परपदार्थापहर्त्तारम् (स्तेनम्) प्र०—मुषीवानिति स्तेयनामधेयम्, निघ० ३ २४, १ ४२ ३

मुषे चोराय ५ ३४ ७ [मुष स्तेये (क्र्या०) धातो. कर्त्तरि क्विप्]

मुष्कौ मूषकौ २३ २८ [मुष स्तेये (क्र्या०) धातो 'सृवृभूशुषिमुषिभ्य कक्' इति कक्]

मुष्टिम् मुष्ट्या धनग्राहक राज्यम् प्र०—राष्ट्र मुष्टि० शत० १३ २ ९ ७, २३ २४ **मुष्टि:**=मुष्टिवद् दुष्टाना हन्ता (राजा) ६ ४७ ३० मुष्टिरिव (गर्जितसेनो वीरपुरुष) २९ ५६ [मुष स्तेये (क्र्या०) धातो क्तिच् । मुच्लृ मोचने (तुदा०) धातोर्वा क्तिच् । मुष्टिर्मोचनाद्वा मोषणाद्वा मोहनाद्वा नि० ६ १ राष्ट्र मुष्टि तै० ३ ९ ७ ५ श० १३ २.९ ७]

मुष्टिहत्यया हनन हत्या मुष्टिभिर्हत्या मुष्टिहत्या तया १ ८ २ [मुष्टि-हत्यापदयो समास । मुष्टीति व्याख्यातम् । हत्या=हन्ते 'हनस्त चे' ति क्यप् तकारश्चादेश]

मुष्टिहा यो मुष्टिना हन्ति स (वीरपुरुष) ५ ५८ ४ यो मुष्ट्या हन्ति स (इन्द्र =राजा) ६ २६ २ [मुष्टि इत्युपपदे हन हिंसागत्यो (अदा०) धातो कर्त्तरि क्विप्]

मुष्णताम् स्तेयकर्मकारिणाम् (प्रजापुरुषाणाम्) १६ २१ **मुष्णन्**=चोरयन् (इन्द्र =पुरुषार्थी सेनेश) २ २०.५ [मुष स्तेये (क्र्या०) धातो शतृ]

मुहुके मोहप्रापके महुर्मुहु करणीये सङ्ग्रामे ४ १६ १७ **मुहुकै:**=मुहुर्मुहु कुर्वद्भि (जनै) ४ १७ १२ [मुह वैचित्ये (दिवा०) धातोर् बाहु० औणा० (उ० ५ ५४) कुकन्]

मुहुर्गी: मुहुर्मुहु गिर प्राप्त (विद्वज्जन) १ १२८ ३ [मुहुस्-उपपदे गॄ निगरणे (तुदा०) धातो क्विप्]

मुहु: वार वारम् ४ २० ९ [मुह वैचित्ये (दिवा०)

११ ५५. [मृद क्षोदे (क्र्या०) धातो सम्पदादित्वात् क्विप्]

मृद्वीम् मृदुगुणस्वभावाम् (कन्याम्) ११ ५५. [मृदु-प्राति० स्त्रियाम् 'वोतो गुणवचनात्' इति ङीप्। मृदु=म्रद मर्दने (भ्वा०) धातो 'प्रथिम्रदि०' उ० १ २८ सूत्रेण कु। सम्प्रसारण च]

मृधः सङ्ग्रामान् १ १८२ ४ मर्द्धन्ति उन्दन्ति परसुखं म्वमनासि येपु तान् सङ्ग्रामान् ७ ३७ हिंस्रान् (पुत्रान्) ७ ४३ १३ सङ्ग्रामेपु प्रवृत्तान् दुष्टान् ६ ५३ ४ मर्द्धन्त्याद्रीभवन्ति येपु तान् सङ्ग्रामान् प्र०—मृध इति सङ्ग्रामनाम निघ० २ १७, १८ ७० सङ्ग्रामस्थान् शत्रून् १ १३१ ६ परपदार्थाऽभिकाङ्क्षिण शत्रून् ११ ७२ कुत्सितान् (शत्रून्=अरीन्) ५ ३७ हिंसकान् (शत्रून्) ३३ ६१ **मृधि**=युद्धे १ १७४ ७ [मृध सग्रामनाम निघ० २ १७ मृधु उन्दने (भ्वा०) धातोरधिकरणे क्विप्। गृधु अभिकाक्षायाम् (दिवा०) धातोर्वा कर्त्तरि क्विप्। वर्णव्यत्ययेन गकारस्य मकार। पाप्मा वै मृध श० ६ ३ ३ ८ अग्ने त्व तरा मृध इत्यग्रे त्व तर सर्वान् पाप्मन इत्येतत् श० ६ ६ ३ ४]

मृधाति हिंस्यात् ६ २३ ६ **मृध्याः**=हिंस्या ३ ५४ २१ [मृधु उन्दने (भ्वा०) धातोर्लेट्। अन्यत्र लिङ्। धातूनामनेकार्थकत्वादत्र हिंसने]

मृध्रवाचम् हिंसितवाचम् (मेघम्) ५ ३२.८ मृध्रा हिंसिका वाग् यस्य तम् (पूर्णप्रज्ञ मनुष्यम्) ७ १८ १३ **मृध्रवाचः**=हिंस्रवाचो जनान् ५.२९ १० मृध्रा हिंस्राऽनृता वाग् येपा ते (दुर्जना) ७ ६ ३ **मृध्राः**=प्रवृद्धा वाणी १ १७४ २ [मृध्रा-वाच्पदयो समास। मृध्र-वाच=मृदुवाच नि० ६ ३१]

मृन्मयीम् मृद्विकाराम् (उखा=पाकस्थालीम्) ११ ५९ [मृदमिनि व्याख्यातम्। ततो विकारे 'नित्य वृद्धशरादिभ्य' इति मयट्। तत स्त्रिया ङीप्]

मृश विचारय १ १२६ ७ [मृश आमर्शने (तुदा०) धातोर्लोट्]

मृषन्त सहन्ते ७ १८ २१ **मृष्ठाः**=सहे प्र०—अत्र व्यत्ययेनात्मनेपदम् ३ ३३ ८ [मृप तितिक्षायाम् (दिवा०) धातोर्लङ्। अडभावश्छान्दस। 'बहुल छन्दसी' ति श्नो लुक्]

मृषा मिथ्या १.१७९ ३. [स्वरादिपाठाद् अव्ययम्]

मृष्ट मार्जय १ १४० २ [मृजूप् शुद्धौ (अदा०) धातोर्लोटि मध्यमबहुवचनम्]

मृष्ट शत्रुबल सह (इन्द्र=सेनेश) १ १९४ ४ **मृष्टः**=यो मर्पति मर्षयति वा सः (भगवान् विद्वान् वा) ५ ३२ शुद्धस्वरूप सब पापो का मार्जक शोधक (ईश्वर) आर्याभि० २ १७, ५ ३२ [मृप तितिक्षायाम् (दिवा०) धातो मृजूप् शुद्धौ (अदा०) धातोर्वा औणा० बहुलवचनात् क्त]

मृष्यते सगय्यते १ १४५ २ सहते ६ ५४ ४. **मृष्यन्ते**=सहन्ते ६ ६७ ७ **मृष्ये**=विचारये ७ २२ ५ [मृष तितिक्षायाम् (दिवा०) धातोर्लट्]

मेखलया ब्रह्मचर्यचिह्नधारणेन ऋ० भू० २३५, अथर्व० ११ ३ ५ ४ [मीयते प्रक्षिप्यते कायमध्यभाग इति विग्रहे डुमिञ् प्रक्षेपणे (स्वा०) धातोर्बाहु० औणा० खल। तत स्त्रिया टाप्। ऊर्ग् वै मेखला क० ३६ १ मेखला पुसो भवति, योक्त्र स्त्रिया काठ० २३.४ वज्रो वै मेखला काठ० २३ ४ सा (मेखला) वै शाणी भवति श० ३.२ १ ११.]

मेघाय यो मेहति सिञ्चति तस्मै २२ २६ [मिह सेचने (भ्वा०) धातो कर्त्तरि अच्। न्यङ्क्वादित्वात् कुत्वम्। मेघ कस्मान् मेहतीति सत नि० २ २१ अथाप्यन्तव्यापत्तिर्भवति ओघो मेघ नि० २१ मेघ मेघनाम निघ० १ १० मेघो हविर्धान यज्ञस्य तै० आ० २ १४.१]

मेडिम् सङ्गमम् ४ ७ ११ सुशिक्षिता वाचम् ३ २६ ६ मेळि वाङ्नाम निघ० १ ११]

मेढ्रम् मेहत्यनेन तदुपस्थेन्द्रियम् ६ १४ [मिह सेचने (भ्वा०) धातो. करणे 'दाम्नीशस०' अ० ३ २ १८२ सूत्रेण ष्ट्रन्]

मेतेव प्रमातेव (चन्द्र इव) ४ ६ २ [मेता-इवपदयो समास। मेता=माङ् माने (जु०) धातो कर्त्तरि तृच्। आकारस्यैकारश्छान्दस]

मेथामसि हिंस्म १ ४२ १० (मेथृ मेधाहिंसनयोरित्येके (भ्वा०) धातोर्लट्। 'इदन्तो मसि' रितीदन्तता मस]

मेथेते हिंस्त १ ११३ ३ (मेथृ मेधाहिसनयोरित्येके (भ्वा०) धातोर्लट्]

मेदयथ स्नेहयथ स्निग्धा मधुरा कुरुत ६ २८ ६ ञिमिदा स्नेहने (भ्वा०) धातोर्णिजन्ताल्लोट्]

मेदसः स्निग्धा (कुल्या) ३५ २० स्निग्धस्य (शरीरस्य) २८ ११ स्नेहयुक्तस्य पदार्थस्य २१ ४१ स्नेहस्य २१ ४१ **मेदोभ्यः**=स्निग्धेभ्यो धातुविशेषेभ्य ३९ १० सर्वशरीरावयवाऽऽर्द्रीकरेभ्य (अवयवेभ्य) ३९ १०

[मृगोपपदे या प्रापणे (अदा०) धातो क]

मृगयसः मृगादय २ ३८ ७

मृगयुभ्यः य आत्मनो मृगान् कामयन्ते तेभ्य (जनेभ्य) १६ २७ **मृगयुम्**=य आत्मनो मृगान् हन्तुमिच्छति त व्याधम् ३० ७ [मृगपदाद् आत्मन इच्छाया क्यजन्ताद् उ। अथवा मृगोपपदे या प्रापणे (अदा०) धातो 'मृगय्वादयश्च' उ० १ ३७ सूत्रेण कु]

मृगासः श्वापदादय १ १९१ ४ [मृगप्राति० जसोऽसुक्। मृगमिति व्याख्यातम्]

मृजन्ति शुन्धन्ति ३ ४६ ५ शोधयन्ति ५ ४३ १४ **मृजे**=शुन्धामि ५ ५२.१७ [मृजूष् शुद्धौ (अदा०) धातोर्लट्। 'मृजेरजादौ सक्रमे विभाषा वृद्धिरि' ति वा० सूत्रेण वृद्धिर्न। 'मृजे' प्रयोगे व्यत्ययेनात्मनेपदम्]

मृज्यते शुद्ध्यते ५ १ ८ [मृजूष् शुद्धौ (अदा०) धातो कर्मणि लट्]

मृड मृडय प्र०—अत्राऽन्तर्गतो ण्यर्थ. १ ११४ १० आनन्दय १ ९४ १२ सुखय भा०—रञ्जय १६ ४९ सुखय सुखयति वा १ १२ ६ **मृडन्तु**=सुखयन्तु ७ ५६ १७ **मृडयन्तु**=सुखयन्तु १५ १६ आनन्दयन्तु १५ १५ **मृडयाति**=सुखयतु १६ ७ सुखयेत २ ४१ ११ **मृडातः**=सुखयत भा०—सुखप्रदौ भवत ३३ ६१ **मृडाति**=सुखयति ४ ४३ २ [मृड सुखने (तुदा०) धातोर्लोट्। अन्यत्र णिजन्ताल्लोट्। अन्यत्र लेट् चापि]

मृडयत्तमः अतिशयेन सुखयिता (ईश्वरोऽग्निर्वा) १ ९४ १४ मृड सुखने (तुदा०)+णिच्+शतृ+तमप्। गुणाऽभावश्छान्दस]

मृडयत्तमा अतिशयेन सुखकर्त्री (सुमति) १ ११४ ९. [मृड सुखने (तुदा०) धातोर्णिजन्ताच्छतरि अतिशायने तमप्। ततष्टाप्]

मृडयद्भ्याम् सुखयद्भ्याम् (मातापितृभ्याम्) १ १३६ १ **मृडयन्तः**=आनन्दयन्त (विद्वासो जना) १ १०७ १ सुखयन्त (पूर्णविद्याराजपुरुषा) ३३ ६८ [मृड सुखने (तुदा०) धातोर्णिजन्ताच् छतृ गुणाऽभावश्छान्दस। मृड शब्दाद्वा क्यजन्ताच्छतृ]

मृडयन्ती सुखयन्ती (देवी=विदुषी स्त्री) ५ ४१ १८. [मृड सुखने (तुदा०) धातोर्णिजन्ताच् छतरि स्त्रिया डीप्। गुणाऽभावश्छान्दस। मृड शब्दाद्वा क्यजन्ताच् शतरि डीप्]

मृडयाकुः सुखयिता (अध्यापको वैद्य) २ ३३ ७ [मृड सुखने (तुदा०) धातोर्णिजन्ताद् बाहु० औणा० आकु। गुणाऽभावश्च]

मृडयत्तमः अत्यन्त सुखकारकौ (अश्विना=अध्यापकोपदेशकौ) ५ ७३ ९ [मृड सुखने (तुदा०) धातो कप्रत्यये मृड। ततो मतुवन्तादतिशायने तमप्]

मृडीकम् सुखप्रदम् (ज्ञानम्) २१ ४ सुखकरम् (श्रेष्ठमार्गम्) ४ १ ३. **मृडीकः**=सुखकर्त्ता (इन्द्र=राजा) ६ ३३ ५ **मृडीकाय**=उत्तमसुखाय प्र०—अत्र 'मृड कीकच् कङ्कणौ' उ० ४ २५ अनेन कीकच्प्रत्यय १ २५ ३ **मृडीके**=सुखकारके व्यवहारे ६ ४८ १२ [मृड सुखने (तुदा०) धातो 'मृड कीकच्०' उ० ४ २४ सूत्रेण कीकच्]

मृण हिंसय प्र०—अत्राऽन्तर्गतो ण्यर्थ १ २९ ५ **मृणीहि**=हिन्धि ४ ४ ५ [मृण हिंसायाम् (तुदा०) धातोर्लोट्। अन्यत्र विकरणव्यत्ययेन श्ना]

मृतम् मृतमिव सुप्तम् (जीवम्) १ ११३ ८ **मृतस्य**=मरणस्वभावस्य (जगत) १ १६४ ३० [मृङ् प्राणत्यागे (तुदा०) धातो 'तनिमृङ्भ्या किच्च' उ० ३ ८८ सूत्रेण तन्]

मृत्तिका प्रशसिता मृत् १८ १३ [मृद्प्राति० 'मृदस्तिकन्' अ० ५ ४ ३९ सूत्रेण तिकन्। ततष्टाप्]

मृत्यवे प्राणत्यागकारिणे समयाय ३९ १३ मृत्युकरणाय ३०.७ मारणाय ३० १८ **मृत्युम्**=मृत्यु को आर्याभि० २ ८, ३१ १८ दुखप्रद मरणम् भा०—मरणाद्यगमाधदुखसागरम् ३१ १८ जन्ममृत्युप्रभव-दुखम् ऋ० भू० २३८, अथर्व० ११ ३ १९ शरीरवियोगजन्य दुखम् ४० ११ मरणदुखमयम् ४० १४ **मृत्युः**=भा०—आयुक्षय अ०—ईश्वराज्ञा-भङ्ग २५ १३ महाक्लेशदायक (मरण) आर्याभि० २ ४८, २५ १३ **मृत्योः**=मृत्यु प्र०—अत्र व्यत्यय ३५ ७ **मृत्योः**=प्राण-शरीराऽऽत्मवियोगात् ३ ६० मरणात् १०.१५ अल्पमृत्युना प्राणत्यागात् २० २ [मृङ् प्राणत्यागे (तुदा०) धातो 'भुजिमृङ्भ्या युक्त्युकौ' उ० ३ २१ सूत्रेण त्युक्। मृत्यु=मृत्युर्मारयतीति सत। मृत च्यावयतीति वा शतवलाक्षो मौद्गल्य नि० ११ ६ एष वै मृत्युर्यत् सवत्सर श० १० ४ ३ १ मृत्युरग्नि. काठ० २१ ७ मृत्युर्वै यम मै० २ ५ ६ मृत्योर्वा एतद्रूप यद् व्याघ्र मै० ४ ४ ४ एष एव मृत्यु। य एष (सूर्य) तपति श० २ ३ ३ ७ अपानान्मृत्यु. ऐ० आ० २ ४.१]

मृदम् मृत्तिकाम् २५ १ कोमलाऽङ्गीम् (कन्याम्)

यस्य तम् (गिरिपजनम्) १ ३६ १७ **मेध्यातिथिः**=मेध्यैरतिथिभिर्युक्तोऽध्यापक १ ३६ १० पवित्रै पूजकैः शिष्यवर्गैर्युक्तो विद्वान् १ ३६ ११ [मेध्य-अतिथिपदयो समास । मेध्य.=मेधृ सगमे (भ्वा०) धातोर्ण्यत् । अतिथि=अत सातत्यगमने (भ्वा०) धातो 'ऋतन्यञ्जि०' उ० ४ २ सूत्रेण इथिन्]

मेध्यासः पवित्रा सन्त (देवा=विद्वासो जना) १३ ५१ [मेध्य-इति व्याख्यातम् । ततो जसोऽसुक्]

मेनका यया मन्यते सा (अप्सरा) १५ १६. [मेना-प्राति० स्वार्थे कन् । मेनका (यजु० १५ १६) (वायो) मेनका च सहजन्या चाप्सरसाविति दिक् चोपदिशा चेति ह स्माह माहित्थिरिमे तु ते द्यावापृथिवी श० ८ ६ १ १७]

मेना वाणी १ ५१ १३ **मेनाम्**=विद्यासुशिक्षाभ्या लब्धा वाचम् १ १२१ २ **मेने**=वर्त्तते स्त्रियाविव (रात्रिदिने) १ ९५ ६ प्रक्षेप्ये (भा०—न्यायविद्ये) प्र०—अत्र बाहुलकाद् डुमिञ्धातोर्न प्रत्यय आत्वनिषेधश्च १ ६२.७ [मेना वाङ्नाम निघ० १ ११ मेना उत्तराणि पदानि निघ० ३ २९ मेना ग्ना इति स्त्रीणाम् ।······मेना मानयन्त्येना नि० ३ २१ मान पूजायाम् (चुरा०) धातो 'गुरोश्च हल' इत्यङ् । पुनटाप् स्त्रियाम् । धातोरुपधाया एकारादेशश्छान्दस]

मेने इव यथा मेने पक्षिण्यौ २ ३९ २. [मेने इव-पदयो समास । मेने=मेनाप्राति० प्रथमा-द्विवचनम्]

मेम्यत् भृश हिंसन् (विद्वान् जन) १ १६२ २ प्राप्नुवन् (अज=जन्मादिरहितो जीव) २५ १५ [मीञ् हिंसायाम् (क्रया०) धातोर्यङन्ताच्छतृ । व्यत्ययेन परस्मैपदम् । मी गतौ (चुरा०) धातोर्वा यङन्ताच्छतृ]

मेषम् सेचनकर्त्तारम् (जनम्) २१ ४०. वृष्टिद्वारा सेक्तारम् (इन्द्र=राजानम्) १ ५१ १ अविम् २१ ५९ सुख-जलाभ्या मर्त्तान् सेक्तारम् (इन्द्र=सेनाध्यक्षम्) १ ५२.१ **मेषस्य**=उपदिष्टस्य (अवे) २१.४४. **मेष**.=पशु-विशेष २४ ३८ यो मिषति स्पर्द्धते स (पशु) १६ ६०. अविजातिविशेष (पशु) २४ ३० उपदेष्टा (जन) २१ ३१ **मेषान्**=स्पर्द्धकान् (भा०—लम्पटान् जनान्) १ ११६ १६ **मेषाय**=मेषजातये १ ४३ ६ [मिष स्पर्द्धायाम् (तुदा०) धातो कर्त्तर्यच् । मिषु सेचने (भ्वा०) धातोर्वाच् प्रत्यय. । मेष इति भूतोपमा,······मेषो मेषते. नि० ३ १६ एष वै प्रत्यक्ष वरुण्य पशुर्यन्मेष श० २ ५ २ १६ मारुत्वत मेषम् (आलभते) तै० १ ८ ५ ६]

मेषी सेचककर्त्री मेषस्य स्त्री २४ १. [मिषु सेचने (भ्वा०) धातो पचाद्यच् । ततो मेषस्य स्त्री मेषीति स्त्रिया जातिवाचकत्वान् ङीष्]

मेहना वर्षणेन ५ ३८.३ [मिह सेचने (भ्वा०) धातोर्ल्युट् । तत 'सुपा सुलुक्०' इति तृतीयास्थान आकारादेश]

मेहना वृष्टि ५ ३९ १ धनादिसेचका (राजजना) प्र०—अत्राऽऽकारादेश ३३.४० [मेहना धननाम निघ० ४ १. मेहना मंहनीय धनम् । यन्म इह नास्तीति वा त्रीणि मध्यमानि पदानि नि० ४ ४. मिह सेचने (भ्वा०) धातो 'कृत्यल्युटो बहुलमि' ति ल्युट् । विभक्तेश्चाकारादेश]

मेहनावन्तः प्रशस्तानि मेहनानि वर्षणानि यस्मात्तस्य (बृहस्पते=सूर्यस्य) ७ २४ १० **मेहनावान्**=मेहनानि सेचनानि बहूनि विद्यन्ते यस्य स (सुन्वतो सूपते.) ३.४९ ३. [मेहनप्राति० प्रशसाया मतुप् । मह्रिनाया दीर्घ । मेहनम्=मिह सेचने (भ्वा०) धातोर्ल्युट्]

मैघी: मेघानामिमा. भा०—मेघस्था (विद्युत) २३ ३५ [मेघप्राति० 'तस्येदमि' त्यर्थेऽण् । तत स्त्रिया ङीप्]

मैत्र: मित्रस्यायम् सम्बन्धी (प्रजापति=जीव) ३९.५. **मैत्राः**=प्राणदेवताका (पक्षिविशेषा) २४ ३३ [मित्रप्राति० 'तस्येदम्' इत्यर्थेऽण् । 'सास्य देवता' इत्यर्थे वा अण्]

मैत्रावरुण. प्राणोदानयोरय सहचारी (वायु) १८ १९ मित्रावरुणयो प्राणोदानयोरय वेत्ता (वनिष्ठ=पूर्णविद्वान्) ७ ३३ ११ [मित्रावरुणप्राति० 'तस्येदम्' इत्यर्थेऽण् । मित्रावरुण=मित्र-वरुणपदयो समासे 'देवताद्वन्द्वे चे' ति पूर्वपदस्यानङ् । (ऋत्विग् विशेष) प्रणेता वा एष होत्रकाणा यन्मैत्रावरुण ऐ० ६.६ यज्ञो वै मैत्रावरुण कौ० १३ २ मनो वै यज्ञस्य मैत्रावरुण. ऐ० २ ५ चक्षुश्च मनश्च मैत्रावरुण ऐ० २ २६ चक्षुर्मैत्रावरुण कौ० १३ ५ गायत्री मैत्रावरुण ता० ५ १ १५ वामदेव्य मैत्रावरुणसाम भवति श० १३ ३ ३ ४]

मैत्रावरुण्यः प्राणोदानदेवताका (चन्द्रगुणयुक्ता पशव) २४ २ [मित्रावरुणप्राति० 'सास्य देवता' इत्यर्थे छान्दसो ण्य]

मैत्र्यः मित्रस्य प्रिये वर्त्तमाना (वशा=वन्ध्या गाव) २४ ८ [मित्रप्राति० भवार्थेऽणन्तात् स्त्रिया ङीप्]

मैनालम् यो मैन कामदेवमलति वारयति त जितेन्द्रि-

[ञिमिदा स्नेहने (दिवा०) धातोरौणा० असुन्। मेदो मेद्यते नि० ४ ३ मेदो वै मेध श० ३ ८ ४ ६]

मेदस्तः मेदस स्निग्धान् (खाद्यपदार्थान्) २१ ६० मेदस स्निग्धान् (पदार्थात्) २८ २३ [मेदस् इति व्याख्यातम्। तत 'आद्यादिभ्य उपसख्यानम्' इति तसि सार्वविभक्तिक]

रेवान् विद्याद्यनन्तधनवान् (ब्रह्मणस्पति =जगदीश्वर) प्र०—अत्र भूम्न्यर्थे मतुप् 'रयेर्मतौ बहुल सम्प्रसारणम्' अ० ६ १ ३७ इति वार्त्तिकेन सम्प्रसारणम् 'छन्दसीर' अ० ८ २.१५ इति मकारस्य वकार १ १८ २ बहुधनवान् (मर्त्त =विद्वज्जन) ७ १ २३ प्रशस्ता रायो विद्यन्ते यस्य स (न्यायाधीशो जन) २ २७ १२ [रयिप्राति० प्रशसाया मतुपि रेवदिति व्याख्यातम्। तत. पुंसि सौ 'रेवान्' इति रूपम्]

रेषणाः हिंसका (शत्रव) १ १४८ ५ [रिष हिंसायाम् (भ्वा०) धातो 'कृत्यल्युटो बहुलमि' ति कर्त्तरि ल्युट्]

रेषत् हिनस्ति ७ २० ६ [रिष हिंसार्थे (भ्वा०) धातोर्लेट्]

रेषयन्ति हिंसयन्ति १ १४८ ५ [रिष हिंसार्थे (भ्वा०) धातोर्णिजन्ताल् लट्]

रेष्माणम् हिंसकम् अ०—अविद्यादिरोगम् २५ २ [रिष हिंसार्थे (भ्वा०) धातो कर्त्तरि मनिन्]

रेष्म्याय रेष्मेषु हिंसकेषु भवाय (जनाय) १६ ३६. [रेष्मप्राति० भवार्थे यत्। रेष्म =रिष हिंसार्थे (भ्वा०) धातोरौणा० बहुलवचनान् मन्]

रैवताय धनसम्बन्धिने (व्यवहाराय) २६ ६० [रेवदिति व्याख्यातम्। तत 'तस्येदम्' इत्यर्थेऽण्। रैवत मेघनाम निघ० १ १०]

रैवतासः रेवतीषु पशुषु भवा (मनुष्या) ५ ६० ४ [रेवतीप्राति० भवार्थेऽण्। ततो जसोऽसुक्। पशवो वै रेवत्य ता० १३ १० ११]

रोक् रोग कुर्य्या १६ ४७ [रुजो भङ्गे (तुदा०) धातोर्लुङि लेर्लुकि अटोऽभावे च रूपम्]

रोकः शब्दायमान (तेजस्विजन) ६ ६६ ६ **रोकाः**=रुचिकरा प्रकाशा ३ ६ ७ [रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोरौणा० बहुलवचनात् क]

रोचत रोचन्ते ४ १० ६ प्रकाशते ४ १ १७ **रोचते**=प्रकाशते ४ १० ५ दीप्यते १ १८८ ११ प्रदीप्यते ३ २६ ७ रुचिकारी वर्त्तते १ ४३ ५ प्रकाशमान होता है स० वि० ६३, अथर्व० ११ ५ २६ **रोचन्ते**=परमानन्देन प्रकाशन्ते ऋ० भू० १६३, रुचिहेतवो भवन्ति १ ६ १ **रोचसे**=प्रकाशसे २ ७४ **रोचस्व**=प्राप्तो भव, अभित प्रीतो भव ३८ १७ [रोचते ज्वलतिकर्मा निघ० १ १६ रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लङ्। अडभाव.। अन्यत्र लट् लोट् च। रोचते ज्वलतिकर्मण नि० २ २०]

रोचनम् रोचन्ते यस्मिँस्तत् (विश्वम्) ३.४४ ४ रुचिकरम् (विश्व=सर्वराज्यम्) ३३ ३६ अभिप्रीतम्

रोहित् अधस्ताद्रक्तवर्णा (अग्नेर्ज्वाला) १ १०० १६ रक्तगुणविशिष्टो मृगविशेष २४ ३० **रोहितः**=नद्य ७ ४२ २. रोहयन्त्यारोहयन्ति यानानि यास्ता (अरुपी = गमनहेतवो ज्वाला) प्र०—अत्र 'हृसृरुहियुषिभ्य इति.' उ० १ ६७. अनेन रुहधातोरिति प्रत्यय १ १४.१२ रक्त-गुणविशिष्टा (ज्वाला) ५ ५६ ६. [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो 'हृसृरुहियुषिभ्य इति' उ० १.६७ सूत्रेण इति । रोहित =नदीनाम निघ० १ १३ रोहित =अगुलिनाम निघ० २ ५]

रोहितम् प्रादुर्भूतम् (रसम्=आनन्दम्) १६ ८३. **रोहितः**=रक्तवर्ण (पशु) २४ २ रक्तगुणविशिष्टस्याग्ने-र्वेगादिगुणसमूह प्र०—रोहितोऽग्नेरित्यादिष्टोपयोजननामसु पठितम् निघ० १ १५, १ ३६ ६ **रोहिताय**=वृद्धिकराय (सेनापतये) १६ १६ **रोहिताः**=रक्तवर्णा. (पशव पक्षिणो वा) २४ ६ **रोहितौ**=विद्युत्प्रसिद्धवह्नी ५ ३६ ६ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो 'रुहेरश्च लो वा' उ० ३ ६४ सूत्रेण इतन्प्रत्यय । रोहितम् (छन्द) रोहित वै नामैतच्छन्दो यत् पारुच्छेपमेतेन वा इन्द्र सप्त स्वर्गाल्लोकानरोहत् ऐ० ५ १० एतद्वा आसा (गवाम्) बीज यद्रोहित रूपम् मै० ४ २ १४]

रोहिता रोहितानि रक्तगुणविशिष्टान्यग्न्यादीनि द्रव्याणि १.१३४ ३ रक्तादिगुणविशिष्टौ (अश्विनौ= धारणाकर्षणा-ख्यौ गुणौ) २ १० २ रोहितेन वह्निगुणेन सहितौ (वाय्व-ग्नी) ४ २.३ दृढबलादिगुणोपेतौ (अश्वौ) प्र०—अत्र द्विवचनस्याकारादेश १ ६४ १० रत्नगुणविशिष्टावश्वौ ३ ६.६ [रोहितमिति व्याख्यातम् । ततो द्विवचनस्याकारा-देश]

रोहिता रोहणकर्त्री (युवति स्त्री) ५ ६१ ६ **रोहिताः**=रक्तवर्णा (भा०—पृथिव्यादीना धारणक्रिया २४ ६ [रोहितमिति व्याख्यातम् । तत स्त्रिया टाप्]

रोहिताञ्जिः रोहिता रक्ता अञ्जयो लक्षणानि यस्य स (अनड्वान्=वृषभ) २६ ५६ [रोहित-अञ्जि-पदयो. समास]

रोहितासः वर्द्धिका (हरित =अङ्गुलय) ४ ६ ६ [रोहितप्राति० जसोऽसुक्]

रोहिदश्व रोहितोऽश्वा वेगादयो गुणा यस्य तत्सम्बुद्धौ (अग्ने) १ ४५.२. **रोहिदश्वः**=रोहितोऽग्न्यादयोऽश्वा वाहनानि यस्य स (अग्नि =पति) ११ ७२ रोहिता रक्तादिगुणविशिष्टा अग्न्यादयोऽश्वा आशुगामिनो यस्य स (अग्नि =राजा) ४.१.८ [रोहित्-अश्वपदयो समास । रोहिदिनि व्याख्यातम्]

रौद्रः रुद्रदेवताक. (रुरु =मृगविशेष) २४.३६ **रौद्राः**=प्राणादिदेवताका. (पशव) २४ ३ **रौद्रेण**= शत्रुरोदयितॄणामिद तेन (अनीकेन=सैन्येन) ५ ३४. [रुद्रप्राति० 'सास्य देवते' त्यर्थेऽण् 'तस्येदमि' त्यर्थे वाऽण्]

रौहिणम् रोहणशील मेघम् २ १२ १२ रोहिण्या प्रादुर्भूतम् (मेघम्) १ १०३.२ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोस्ताच्छील्ये णिनि । वर्णव्यत्ययेनोकार-स्यौकार । अथवा 'रोहिणी' शब्दाद् भवार्थेऽण् । रोहिणीति व्याख्यातम् । रौहिण मेघनाम निघ० १ १० (पुरोडाशौ) अग्निश्च ह वा आदित्यश्च रौहिणावेताभ्या हि देवताभ्या यजमाना स्वर्ग लोकम् आरोहन्ति श० १४ २.१ २ अहो-रात्रे वै रौहिणौ श० १४.२ १.३ इमौ वै लोकौ (द्यावा-पृथिव्यौ) रौहिणौ श० १४ २ १ ४ चक्षुषी वै रौहिणौ श० १४.२.१ १५]

लक्षम् लक्षितु योग्यम् (भा०—कर्म्म) २ १२ ४. [लक्ष दर्शनाङ्कनयो (चुरा०) धातोर्बाहु० औणा० अन्]

लक्ष्मण्यस्य सुलक्षणेषु भवस्य (विदुषो जनस्य) ५ ३३ १०. [लक्षण-लक्ष्मणशब्दौ समानार्थौ । लक्ष्मणप्राति० भवार्थे यत् । लक्ष्मणम्=लक्ष दर्शनाकनयो (चु०) धातो 'लक्षेरट् मुट् च' उ० ३ ७ सूत्रेण न प्रत्ययो मुडागमश्च]

लक्ष्मीः सर्वमैश्वर्य्यम् ३१ २२ विद्या शोभा और चक्रवर्त्ती राज्यश्री प० वि०। शुभलक्षणवती धनादिश्च ऋ० भू० १३४, ३१ २२ [लक्ष दर्शनाकनयो (चु०) धातो 'लक्षेर्मुट् च' उ० ३ १६० सूत्रेण ई प्रत्ययो मुडागमश्च । लक्ष्मी =लाभाद्वा लक्षणाद्वा (लप्स्यनाद्वा) लाञ्छनाद्वा लषते-र्वा स्यात् प्रेप्साकर्मणो लग्यतेर्वा स्यादाश्लेषकर्मणो लज्जते-र्वा स्यादश्लाघाकर्मण नि० ४ ६ तस्माद् यस्य मुखे लक्ष्म भवति त पुण्यलक्ष्मीक इत्याचक्षते श० ८ ४.४ ११ तस्माद् यस्य दक्षिणतो लक्ष्म भवति त पुण्यलक्ष्मीक इत्याचक्षते श० ८.४.४ ११ तस्माद् यस्य सर्वतो लक्ष्म भवति त पुण्य-लक्ष्मीक इत्याचक्षते श० ८ ५.४ ३]

लघुः छोटा (भार =भार) स० वि० १६६, अथर्व० ६ २ ३ २४ [लघि गत्यर्थे (भ्वा०) धातो 'लङ्घिबह्योर्न-लोपश्च' उ० १ २६ सूत्रेण कु । धातोर्नकारस्य च लोप]

लभते प्राप्नोति २४ ११. [डुलभष् प्राप्तौ (भ्वा०) धातोर्लट्]

नदीना नाडीना वा ता रोधस्वत्य १ ३८ ११ [रोधस्-प्राति० मतुबन्तान् स्त्रिया डीप्। रोधस्वत्य =नदीनाम निघ० १ १३]

रोधः रोधनम् ४ ५.१ **रोधांसि**=आवरणानि २ १५ ८ रोधनानि ४ २२ ४ [रुधिर् आवरणे (रुधा०) धातोरौणा० असुन्। रोध कूल निरुणद्धि स्रोत नि० ६ १]

रोपणाकासु रोपण समन्तात् कामयन्ति तासु क्रियासु लिप्तास्वोपीषु १ ५० १२ [रोपणोपपदे कमु कान्तौ (भ्वा०) धातोर्ड । तत स्त्रिया टाप्। **रोपणम्**=रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्णिजन्ताल् ल्युट्। 'रुहे पोऽन्यतरस्याम्' इति धातोर्हस्य पकारादेश]

रोपुषीणाम् विमोहयन्तीनाम् (विपसम्बन्धिपीडातरङ्गानाम्) १ १९१ १३ [रुप विमोहने (दिवा०) धातोर्लिट क्वसु । तत स्त्रिया डीप्। 'वा छन्दसी' ति धातोर्द्वित्व न]

रोमशा प्रशस्ता लोमा (राज्ञी) १.१२६.७. [लोमन्-प्राति० प्रशसायाम् मत्वर्थे 'लोमादिपामादि०' सूत्रेण श. तत स्त्रिया टाप्। वर्णव्यत्ययेन लकारस्य रेफ । कपिलकादित्वाद्वा लत्वम्]

रोमा रोमाणि ओषध्यादीनि १.६५.४. [लोमन्-प्राति० शेर्लोपश्छन्दसि । कपिलकादित्वाद् वा लत्वम्]

रोमाणि लोमानि १ १३५ ६ [लोमन्प्राति० प्रथमा बहुवच०। कपिलकादित्वाद् वा लत्वम्। लोमन्=लूञ् छेदने (क्र्या०) धातो नामन्सीमन्०' उ० ४ १५१ सूत्रेण मनिन्]

रोरवीति ऋग्वेदादिना सवनक्रमेण वा शब्दायते १७ ९१ भृशमुपदिशति ४ ५८ ३ भृश शब्दायते ३ ५५ १७ विद्युदादिना भृश शब्द करोति ६ ७३ १ [रु शब्दे (अदा०) धातोर्यङ्लुगन्ताल् लट्]

रोराभ्याम् कथनश्रवणाभ्याम् २५ ३ [रु शब्दे (अदा०) धातोर्विट्, प्रत्यये रो शब्द रीङ् श्रवणे (दिवा०) धातोश्च क्विपि रा शब्दश्छान्दस । तयो समास]

रोरुचानः भृश देदीप्यमान (विद्वान् राजा) ४ १ ७ [रुच दीप्तौ (भ्वा०) धातोर्यङ्लुगन्तादौणा० युच्]

रोरुवत् पुन पुनरारोह १ ५४ १ भृश रौति शब्द करोति ६ ६१ ८ [रु शब्दे (अदा०) धातोर्यङ्लुगन्ताच्छतृ]

रोरुवत् अतिशयेन शब्दयन् (जन) १ १४०.६ पुन पुना रोदन कारयन् सन् (सभाध्यक्षा विद्वान्) १ ५४ ५ [रु शब्दे (अदा०) धातोर्यङ्लुगन्ताच्छतृ। रोरुवन् रोरूयमाण नि० ५ १६]

रोह उन्नति गमय गमयति वा ३ १४ आरूढो भव १२.५ वर्धयस्व ३ ८ ११ दर्शयसि दर्शयति वा ४ ३२ प्रादुर्भव ५ ४३ . प्रसिद्धो भव १० १०. **रोहति**=वर्धते १.१४१४. **रोहते**=वर्द्धते २ ५ ४ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लोट्। अन्यत्र लट्। रोहते प्रयोगे व्यत्ययेनात्मनेपदम्]

रोहणम् आरोहन्ति येन तत् (भा०—विद्याधनम्) १.५२.६ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो करणे ल्युट्]

रोहम् प्रादुर्भावम् १३ ५१ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्घञ्। स्वर्गो वै लोको रोह श० ७.५.२.३६]

रोहय सन्तानो से बढा स० वि० १७० वेदार्पे अथर्व० १४ २.३७ **रोहयत्**=उपरि स्थापितवान् १.७ ३ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्णिजन्ताल्लोट्। अन्यत्र लङ् अटोऽभाव]

रोहांसि आरोहणानि ६ ७१ ५ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोरौणा० असुन्]

रोहिणीषु रोहणशीलासु (ओषधीषु) १ ६२ ६ **रोहिण्यः**=आरोढुमर्हा (त्र्यवय) २४ ५ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो. 'रुहेश्च' उ० २ ५५ सूत्रेण इनन् जातिवाचकत्वात् स्त्रिया डीप्। अथवा रुह-धातोस्ताच्छील्ये णिनि । तत स्त्रिया डीप्। रोहिणी (नक्षत्रम्) सा (विराट्) तत ऊर्ध्वारोहत्। सो रोहिण्यभवत्। तद्रोहिण्यै रोहिणीत्वम् तै० १ १ १० ६ विराट् सृष्टा प्रजापते । ऊर्ध्वारोहद्रोहिणी । योनिरग्ने प्रतिष्ठिति तै० १ २ १ २७ प्रजापती रोहिण्यामग्निमसृजत त देवा रोहिण्यामादधत ततो वै ते सर्वान् रोहानरोहन् तद्रोहिण्यै रोहिणीत्वम् तै० १ १ २ २ ता अस्य (प्रजापते) प्रजा सृष्टा एकरूपा उपलब्धास्तस्थू रोहिण्य इवैव तद्वै रोहिण्यै रोहिणीत्वम् श० २ १ २ ६ या (प्रजापतेर्दुहिता) रोहित् सा रोहिणी (अभूत्) ऐ० ३ ३३ प्रजापते रोहिणी तै० १ ५ १ १ रोहिणी देव्युदगात् पुरस्तात्'' प्रजापति हविषा वर्धयन्ती तै० ३ १ १ २ इन्द्रस्य रोहिणी तै० १ ५ १ ४ आत्मा वै प्रजा पशवो रोहिणी श० ११.१.१ ७ यद् ब्राह्मण (ब्राह्मणनक्षत्रम्) एव रोहिणी। तस्मादेव तै० २ ७ ६ ४]

'नामन्सीमन्व्योमन्०' उ० ४ १५१ सूत्रेण मनिन्-प्रत्ययान्तो निपात्यते । लोम लुनातेर्वा लीयतेर्वा नि० ३ ५ लोमानि हृदये (श्रितानि) तै० ३.१०८८ छन्दांसि वै लोमानि श० ६ ४ १ ६ ओषधिवनस्पतयो मे लोमसु श्रिता तै० ३ १० ८ ७ लोमैव हिंकार जै० उ० १ ३६.६ भरद्वाजस्य लोम (साम) भवति ता० १३ ११ ११ तदु (लोमसाम) दीर्घमित्याहु ता० १३ ११ १२ पशवो वै लोम (साम) ता० १३ ११ ११]

लोमशसक्थौ लोमानि विद्यन्ते यस्य तल्लोमश सक्थि ययोस्तौ (पशू) २४.१. [लोमश-सक्थिपदयो. समास । लोमश =लोमन्प्राति० मत्वर्थे 'लोमादिपामादि०' इति शः]

लोहम् सुवर्णम् प्र०—लोहमिति सुवर्णनाम निघ० १ २, १८ १३ [लोहम्=हिरण्यनाम निघ० १ २ रजतेन लोहम् (सन्दध्यात्) गो० पू० १ ४४ लोहेन सीसम् (सन्दध्यात्) गो० पू० १ १४ दिशो वै लोहमय्य (सूच्य) श० १३ २ १० ३]

लोहिताय रक्ताय हृदयस्थाय लोहितपिण्डाय ३९.१० **लोहितेन**=शुद्धेन रक्तेन भा०—रुधिरेण ३९.६ [रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो 'रुहेरश्च लो वा' उ० ३.९४. सूत्रेण इतन् । रेफस्य च लकारादेश]

लोहिताहिः लोहितश्चासावहिश्च २४ ३१ [लोहित-अहिपदयो समास]

लोहितोर्णी लोहिता ऊर्णा यस्या सा (भा०—सूर्यगुणा पशू) २४४ [लोहिता-ऊर्णापदयो समासे मत्वर्थे 'छन्दसीवनिपौ' इति वा०सूत्रेण ईकार]

वक्तवे वक्तव्याय ७ ३१.५. [वच परिभाषणे (अदा०) धातोस्तुमर्थे तवेन्]

वक्त्वानाम् वक्तु समुचिताना वाक्यानाम् ३ २६ ९. **वक्त्वानि**=वक्तु योग्यानि (वचनानि) ६.६ २ [वच परिभाषणे (अदा०) धातोर्बाहु० औणा० त्वन्]

वक्मनि उपदेशे १ १३२.२ [वच परिभाषणे (अदा०) धातोर्बाहु० औणा० मनिन्]

वक्मराजसत्याः वक्मेषु वक्तृषु राजसु सत्यप्रतिपादका (महाविद्वज्जना) ६ ५१ १० [वक्मराज-सत्य-पदयो समास । वक्मराज =वक्मन्-राजन्पदयो समासे समासान्तष्टच् । वक्मन् इति व्याख्यातम्]

वक्म्यः वक्तु योग्य (सत्यो महिमा) १ १६७ ७.]

वक्वरी प्रशसिते (द्यावापृथिव्यौ) १.१४४ ६. [वच परिभाषणे (अदा०) धातोरौणा० वनिप् । बहुलवचनात् कुत्वम् । 'वनो र च' ति ङीप् रेफश्च । द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस.]

वक्वरी वचन-शक्तिमती (कन्या) ६.२२.५. [वच परिभाषणे (अदा०) धातोर्वनिप् । ततः स्त्रिया 'वनो र च' ति ङीप् रेफश्च]

वक्वा वक्ता (विद्वज्जन) १ १४१ ७ [वच परिभाषणे (अदा०) धातोर्बाहु० औणा० वनिप् । बहुलवचनात् कुत्वम्]

वक्वाः वक्रा. (ध्वस्रा =ध्वसिका सेना) ४ १९ ७. [वच परिभाषणे (अदा०) धातोर्बाहु० औणा० वन्]

वक्षणा वहनेन ५.५२.१५. [वह प्रापणे (भ्वा०) धातोर्ल्युट् सुडागमश्छान्दसः । 'सुपा सुलुक्०' इति टास्थाने डादेश]

वक्षणानि प्रापकाणि (आचरणानि) ६ २३ ६ [वह प्रापणे (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट् । सुडागमश्छान्दस]

वक्षणाभ्यः वोढ्रीभ्यो नदीभ्य १ १३४ ४ वहमानाभ्य. (नदीभ्य) १ १३४ ४ **वक्षणाः**=नदी २५ २८ वहन्ति जलानि यास्ता. (नद्य) १ ३२ १ [वक्षणा = नदीनाम निघ० १ १३ वक्षणप्राति० स्त्रिया टाप् । वक्षणम्=वह प्रापणे (भ्वा०) धातो कर्त्तरि 'कृत्यल्युटो बहुलमि' ति ल्युट् । सुडागमश्च छान्दस]

वक्षणेस्थाः या वाहने तिष्ठन्ति ता (रश्मय) ५ १९ ५. [वक्षणोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क । ततष्टाप् स्त्रियाम्]

वक्षत् वहेत् प्रापयेत् ६ २२ ७ प्रापयति २८ १६ **वक्षतः**=वहत प्र०—अत्र लिडर्थे लेट् १ १९ २ **वक्षति**= प्राप्ता भवतु १ १२९ ८ उच्यात् १.१२९ ८ प्राप्नोति प्रापयति वा १ १४ ६ **वक्षन्**=वहन्तु प्रापयन्तु १ १०४ २ **वक्षः**=प्राप्नुहि ५ ३३ २ **वक्षि**=वह ६ १५ १८. वहसि प्रापयसि ५ ४४ कामयसे प्राप्नोषि वा १७.८८ वदसि ३ ११ प्रापय ३ ७ ९ आवह ५ ४३ १० उपदिशति १७ ८. **वक्ष्व**=प्रापय, वह ८ २६ [वह प्रापणे (भ्वा०) धातोर्लेटि सिपि च रूपम् । अन्यत्र लोटि विकरणव्यत्ययेन सिपि च रूपम् । वक्षि =वह नि० ८ ९]

वक्षथः रोष ७ ३३ ८ **वक्षथेन**=रोषेण ४ ५ १. [वक्ष रोषे (भ्वा०) धातोर्बाहु० औणा० अथ प्रत्यय]

वक्षस्सु उरस्सु १ १६६ १० हृदयदेशेषु ७ ५६ १३.

लयः लीयन्ते यस्मिन् स (विषयो विद्यादिगुणो वा) १८ ७ [लीङ् श्लेषणे (दिवा०) धातो 'एरच्' इत्यच्]

ललामगुम् येन न्यायेनेप्सा गच्छन्ति प्राप्नुवन्ति तम् अ०—न्यायम्, भा०—प्राप्तव्य सुखम् २३ २६. [ललामोपपदे गम्लृ गतौ (भ्वा०) धातो 'डुप्रकरणे मितद्र्वादिभ्य उपसख्यानम्' अ० ३ २ १८ वा०सूत्रेण डु । ललाम = लल ईप्सायाम् (चुरा०) धातोर्बाहु० औणा० आमन्]

ललामीः शिरोवदुपरिभाग प्रशस्तो यस्या सा (अग्नेर्ज्वाला) १ १०० १६ ['ललाम इति पूर्वपदे व्याख्यातम् । तत प्रशसाया मत्वर्थे 'छन्दसीवनिपौ' इति वा०सूत्रेण ई प्रत्यय]

लाङ्गलम् सीरापश्चाद्भागे दार्ढ्याय सयोज्य काष्ठम् १२.७१ हलाऽवयव ४ ५७.४ [लगि गत्यर्थे (भ्वा०) धातो 'लङ्गेर्वृद्धिश्च' उ० १ १०८ सूत्रेण कल' प्रत्ययो वृद्धिश्च । लाङ्गल लङ्गतेर्लाङ्गूलवद्वा । लाङ्गल लगतेर्लङ्गतेर्लम्बतेर्वा नि० ६ २६]

लाजाः प्रफुल्लिता व्रीहय १९ १३ लाजै =प्रफुल्लितैरन्नै २१ ३२ भर्जितै (अन्नै) २१ ४२ [लाज भर्जने (भ्वा०) धातोर्घञ्। लाजा-लाजते नि० ६ ९. लाजा =आदित्याना वा एतद्रूप यल्लाजा' तै० ३ ८ १४.४ नक्षत्राणा वा ऽएतद्रूप यल्लाजा श० १३ २ १ ५]

लाजीन् स्वस्वकक्षाया चलितान् (लोकान्) २३.८ [लजति गतिकर्मा (निघ० २ १४) धातोर्बाहु० औणा० इण्प्रत्यये लाजि]

लिप्यते लिप्यमान होता है स० वि० १४५, ४०.२ [लिप उपदेहे (तुदा०) धातो कर्मणि लट्]

लेखीः लिखे ५ ४३ [लिख अक्षर विन्यासे (तुदा०) धातोर्लुङ् । अटोऽभावश्च]

लोकम् दृश्यमान भुवनसमूहम् १ ९३.६ द्रष्टव्यसुख लोक वा ६ ७३ २ सर्वस्य द्रष्टारम् (ईश्वरम्) २० २६ दर्शनीयम् (भा०—विद्याप्रकाशम्) २३ ४३ द्रष्टु योग्यम् (राज्यम्) २ ३० ६ द्रष्टव्यमानन्दम् भा०—ब्रह्म १८.५२ दर्शनसुखसङ्घात मोक्षपद वा १८ ५८ दर्शनमभ्युदय वा ६ ४७ ८ कर्मानुकूल सुखदु खप्रापकम् (लोकलोकान्तरम्) ३५ २ सम्प्रेक्षितव्यम् (भा०—समावर्त्तनानन्तर स्वयवर (विवाहम्) १२.५४ आर्षं दर्शनम् १२ ४५ जीवात्मानम् ३४ ५५ द्रष्टव्य जन्मान्तरे लोकान्तर वा ७ २० २ देखने योग्य वानप्रस्थाश्रम को स० वि० १८९, अथर्व० ९ ५ १ **लोकः**=निवासस्थानम् ३ ३७ ११ लोक्यते सर्वैर्जनैर्लोकयति सर्वान् वा (ईश्वर) ऋ० भू० १६२, सभा दर्शन वा १९.४५ लोकनीय पुत्रपत्यादिसम्बन्धसुखकरो गृहाश्रम ८ २६ राष्ट्र राज्यस्थानम् ६ ६. दर्शनीय (यम =परमेश्वर) ३५ १ मनुष्यलोक अथर्व० १२ ५ ३, स० वि० १७५, **लोकात्**=स्थानादस्मद्दर्शनाद्वा २.३० **लोकान्**=द्रष्टव्यान् सृष्टिस्थान् भूगोलान् ३२ १२ दर्शनीयान् (भूगोलान्) ९.३२. सर्वान् प्राणिन ऋ० भू० २३५, अथर्व० ११ ३ ५ ४ **लोकाय**=दर्शनाय सङ्घाताय वा ३० १३. **लोकाः**=न्यायदृष्ट्या समीक्षणीया (विद्वासो जना.) ६.१. **लोके**=द्रष्टव्ये स्थाने १५ ५० विज्ञातव्ये (देशे) १५ ११. दर्शने ३ २९ ८ ससारे ३ २१ द्रष्टव्य अपने स्वरूप मे स० वि० १९६, ९ ११३ ७ ज्ञान से देखने योग्य (ईश्वर) मे स० वि० १९६, ९ ११३ ७ **लोकेभ्यः**=सहतेभ्य (स्थानेभ्य) ३० १२ [लोकृ दर्शने (भ्वा०) धातोर्घञ् । छन्दासि वै सर्वे लोका जै० १ ३३२ त्रयो वाव लोका । मनुष्यलोक पितृलोको देवलोक इति श० १४ ४ ३ २४. इमे वै लोका (पृथिवी, अन्तरिक्षम्, द्यौ) देवास्साध्या मै० ३ ७ १० इमे वै लोका विश्वा सद्मानि श० ६ ७ ३.१० इमे वै लोका विष्णोर्विक्रमण विष्णोर्विक्रान्त विष्णो. क्रान्तम् श० ५ ४ २ ६ इमे वै लोकास्सतनय. ऐ० ४ १९ इमे वै लोका सरिरम् तै० ३.३ १ २ श० ७ ५ २ ३४. इमे वै लोका सर्पास्ते ह्यनेन सर्वेण सर्पन्ति यदिद किं च ७ ४ १ २५]

लोकसनि लोकान् सनति सम्भजति येन तत् (अपत्यम्) १९ ४८ [लोकोपपदे षण सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' अ० ३ २ २७ सूत्रेण इनि]

लोधम् लोभ्धारम् (दुर्जनम्) प्र०—अत्र वर्णव्यत्ययेन भस्य घ ३ ५३ २३ [लुभ विमोहने (तुदा०) धातो पचादिलक्षणोऽच् । भस्य धश्छान्दस]

लोपामुद्रा लोप एव आमुद्रा समन्तात्प्रत्ययकारिणी यस्या सा (स्त्री) १ १७९.४ [लोप-आमुद्रापदयो समास]

लोपाशः वनचरपशुविशेष २४ ३६ [अर्यम्णो लोपाश काठ० ४७ ११]

लोप्याय लोपेषु छेदनेषु साधवे (पुरुषाय) १६ ४५ [लोप-प्राति० 'तत्र साधु ' इत्यर्थे यत् । लोप =लुप्लृ छेदने (तुदा०) धातोर्घञ्]

लोम अनुकूल वचनम् २३ ३६ **लोमभ्यः**=त्वगुपरिस्थेभ्यो वालेभ्य ३९ १० नखादिभ्य ३९ १०. **लोमानि**=रोमाणि १९ ८१, [लूञ् छेदने (क्र्या०) धातो

धातो कर्मणि शानजन्तात् टाप् स्त्रियाम् । सम्प्रसारणाऽभावश्छान्दस]

वज्रदक्षिणम् वज्रा अविद्याच्छेदका दक्षिणा यस्मात्तम् (अध्यापकम्) १ १०१ १ [वज्रा-दक्षिणापदयो समास]

वज्रबाहुम् वज्रा शस्त्राणि बाह्वोर्यस्य तम् (इन्द्र= सेनापतिम्) १७ ३८ वज्रवद्भुजम् (इन्द्र=शत्रुविदारक राजानम्) २० ५४ शस्त्राऽस्त्रभुजम् (राजपुरुषम्) ४ ३६ ४ वज्र प्राणो बल बाहुर्यस्य तम् (राजानम्) ऋ० भू० २२४, अथर्व० ६ १० ६७ ३ **वज्रबाहुः**=वज्रमिव दृढौ बाहू यस्य स (इन्द्र =राजा) २० ४८ वज्रो बाहौ यस्य स (इन्द्र = सूर्य) २० ३६ वज्र शस्त्रसमूहो बाहौ यस्य स (इन्द्र = सभासेनापति) १ ३२ १५ बाहुवत् किरणबल (इन्द्र = सूर्य) २ १२ १३ शस्त्रहस्त (राजा) ४ २६ ४ बाहुरिव वज्र किरणसमूहो यस्य स (इन्द्र =सूर्यलोक) २ १२ १२ शस्त्रपाणि (राजपुरुष) ७ १८ १२ शस्त्रभुज (इन्द्र = राजा) ३ ३३ ६ **वज्रबाहू**=वज्रौ बलवीर्य्ये बाहू ययोस्तौ (इन्द्राग्नी=अध्येत्रध्यापकौ) १ १०६ ७ **वज्रबाहो**= वज्रवदौषध बाहौ यस्य तत्सम्बुद्धौ (सद्वैद्य) २ ३३ ३ [वज्र-बाहुपदयो समास । वज्र इति व्याख्यास्यते]

वज्रभृत् यो वज्र शस्त्रास्त्र बिभर्ति स (इन्द्र = सेनाद्यधिपति) १ १०० १२ जो अच्छेद्य अर्थात् दुष्टों के छेदक सामर्थ्य से सर्वशिष्टहितकारक, दुष्टविनाशक न्याय को धारण कर रहा है वह (ईश्वर) आर्याभि० १ ३४, ऋ० १ ७ १० १२ [वज्रोपपदे डुभृञ् धारणपोषणयो (जु०) धातो कर्त्तरि क्विप्]

वज्रम् शस्त्राऽस्त्रम् ४ २२ ३ विद्युद्रूपम् ४ २० ६ छेदक शस्त्रम् २ १६ ३ तापसमूह किरणसमूह वा १ ८४ ११ किरणरूपम् ४ १६ ७ शस्त्रसमूहम् १ ६१ १२ शस्त्रमिवाऽज्ञानच्छेदकमुपदेशकम् १ ५५ ५ स्वकिरणजन्य विद्युतम् ऋ० भू० २७३, ४ २० ६ तीव्र शस्त्रम् १ १३० ४ प्रकाशसमूहम् १ ५२ ७ मेघम् १ ५२ ८ दुष्टाना वज्रमिव दण्डप्रदम् (परमेश्वरम्) १ १३१ ३ शत्रूणा बलच्छेदकमाग्नेयादिशस्त्रास्त्रसमूहम् १ ८ ३ कुलिशमिव (रथ=यानम्) २६ ५३ शस्त्रविशेषम् ६ १७ १० प्रहारम् ६ ४७ २७ आज्ञापनम् १ ६३ २ **वज्रस्य**=शस्त्रप्रहारस्य ५ ३२ ७ **वज्रः**=किरणनिपात २ ११ १० किरणसमूह १ ८०.३ प्रहार शब्दो वा ६ ४७.२८ किरण इव शस्त्रसमूह ३ ३० ६ विज्ञापक (राजा) १० २१ प्रापक. (राजा) १० २८ ऊष्मसमूह १ ५७ २. वज्र इव शत्रुच्छेदक (वीरसेनापति) ६ ५ **वज्रात्**=विद्युत्पातशब्दात् २ ११ ६ विद्युत्प्रहारात् ६.१७ ६ **वज्रेण**=शस्त्रास्त्रविद्याबलेन ८ ५३. तीव्रेण तेजसा १ ८०.५. प्रापणेन १ ८० १३ शस्त्रेणेवोपदेशेन १ १३० ७ विज्ञानेन २ १५ ३ किरणाख्येन वज्रेण २ १५.६ शस्त्रसमूहेन तेजोवेगेन वा १.६१ १० गतिमता तेजसा १ ३३ १३. [वज गतौ (भ्वा०) धातो 'ऋज्रेन्द्राग्रवज्रविप्र०' उ० २ २८ सूत्रेण रन्। वज्र =वर्जयतीति सत नि० ३ ११ वृजी वर्जने (भ्वा०, रुधा०, चुरा०) धातोर्वा 'ऋज्रेन्द्राग्र०' सूत्रेण रन्-प्रत्ययान्तो निपात्यते। वज्रो वा ऽअश्रि' श० ३ ५.४ २ वज्रो वै परशु श० ३ ६ ४.१० वज्र शास श० ३ ८ १५ निवृद्वै वज्र कौ० ३ २ वज्रो वा ऽआप. श० ११ ११७. तै० ३ २ ४ २ पञ्चदश (स्तोम.) वै वज्र. श० १ ३ ५.७ कौ० ७ २ ष० ३ ४. तै० २ २ ७ २ ता० २ ४ २ वज्रो वै भास्न (यजु० १४ २३.) वज्र पञ्चदश श० ८ ४ १.१०. वज्रो वै स्फ्य तै० १ ७ १० ५ श० १.२ ५ २० वज्रो वै शर. श० ३ १ ३.१३. वज्रो यूप श० ३ ६ ४ १६ वज्रो वा एष यद् यूप कौ० १० १. ऐ० २.१ ष० ४.४ वज्रो वै यूपशकल श० ३ ८ १ ५ वज्रो वै रथ तै० १ ३ ६ १ श० ५ १ ४ ३ वज्रो वै विकंकत श० ५ २ ४ १८ वज्रो वै पशव श० ६ ४ ४ ६ वज्रो वा ऽअश्व श० ४ ३ ४ २७ वज्रो वै चक्रम् तै० १ ४ ४ १०. वज्रो वै ग्रावा श० ११ ५ ६ ७ वज्रो वा ऽआज्यम् श० १ ४ ४ ४ वज्रो वै त्रिष्टुप् श० ७ ४ २ २४ वज्र एव वाक् ऐ० २ २१ वाग्घि वज्र ऐ० ४ १ वज्रो वै वषट्कार ऐ० ३ ८ कौ० ३ ५ श० १ ३ ३.१४ गो० उ० ३ १ ५ वज्रो वा एष यद् वषट्कार ऐ० ३ ६ वज्रो वै हिंकार कौ० ३ २ वज्रो वै महानाम्न्य (ऋच) ष० ३ ११ वज्रो वै सामिधेन्य कौ० ३ २ वज्रो वै वैश्वानरीयम् (सूक्तम्) ऐ० ३ १४ वज्रो वै यौधाजयम् (साम) ता० ७ ५ १२ शाक्वरो वज्र तै० २ १ ५ ११ वज्रा वा ऽउपसद. श० १० २ ५ २. वज्रो वै त्रिणव (स्तोभ) ता० ३ १.२. आनुष्टुभो वा एष वज्रो यत् षोडशी (शस्त्रम्) कौ० १७ १ वज्रो वा एष यत्षोडशी ऐ० ४ १ वज्र षोडशी ष० ३ ११. वज्रो वै षोडशी गो० उ० २ १३ ता० १२ १३ १४ सवत्सरो वज्र श० ३.६ ४ १६ सवत्सरो हि वज्र श० ३ ४.४ १५ वीर्यं वज्र श० १ ३.५ ७ वीर्यं वै वज्र श० ७ ३.१ १६ वज्रो वा ओज श० ८ ४.१ २०. अष्टाश्रिर्वै वज्र ऐ० २ १ पुरो गुरुरिव हि वज्र ता०

हृदयेषु १ ६४.४ **वक्षः**=वक्षस्थलम् १ ६२.४. प्राप्त **वक्षांसि**=उरासि १ १२३.१० [वच परिभाषणे (अदा०) धातो 'पचिवचिभ्या सुट् च' उ० ४.२२०. सूत्रेणासुन् सुट् च। वक्षो भासोऽध्यूढमिदमपीतरद् वक्ष एतस्मादेवाध्यूढं काये नि० ४.१६]

वक्षः प्राप्त वस्तु प्र०—वक्ष इति पदनामसु पठितम् निघ० ४ २, १.१२४.४. [वह प्रापणे (भ्वा०) धातोरौणा० स । लिङ्गव्यत्यय]

वक्ष्यः वोढ्व्य (रश्मय) ५ १६ ५.

वक्ष्यन्तीव यथा वदिष्यन्ती विदुषी स्त्री तथा २६ ४० यथा कथयिष्यन्ती विदुषी स्त्री ६ ७५ ३ [वक्ष्यन्ती-इव-पदयो समास । वक्ष्यन्ती=वह प्रापणे (भ्वा०) धातोर्लृट. शतृप्रत्यये स्यविकरणे च रूपम् । तत स्त्रियां ङीप्]

वग्नुना वाण्या १.८४ ३. अ०—वेदवाचा ८ ३३ [वच परिभाषणे (अदा०) धातो 'वचेर्गश्च' उ० ३ ३३ सूत्रेण नु । गश्चान्तादेश । वग्नु वाङ्नाम निघ० १ ११]

वङ्कुतरा अतिशयेन कुटिलौ (अ०—शत्रूदासीनौ मनुष्यौ) १.५१.११ [वङ्कुप्राति० अतिशायने तरप् । ततो द्विवचनस्याकारादेश]

वङ्कुम् 'दुष्टशत्रून् प्रति कुटिलम् (सभाध्यक्षम्) १ ११४ **वङ्कुः**=धनेच्छु (वणिक्=व्यापारी) ५ ४५ ६ **वङ्कू**=कुटिलौ शत्रूदासीनौ १.५१.११ [वकि कौटिल्ये (भ्वा०) धातोर्बाहु० औणा० उ]

वङ्क्रीः कुटिला गती २५ ४१ [वकि कौटिल्ये (भ्वा०) धातो 'वङ्क्र्यादयश्च' उ० ४.६६ सूत्रेण क्रिन्]

वङ्गृदस्य यो वङ्गृन् वक्रान् विषादीन् पदार्थान् व्यवहारान् ददात्युपदिशति वा तस्य दुष्टस्य १ ५३ ८ [वङ्गृ इत्युपपदे डुदाञ् दाने (जु०) धातो क । वङ्गृ=वगि गतौ (भ्वा०) धातोर्बाहु० औणा० ऋ]

वचसम् सर्वै स्तुत्या परिभाषित मनुष्यम् १ ११२ २ [वचस्प्राति० मत्वर्थेऽर्शआदित्वादच्]

वचसः वचनात् ५ १२ ४ वचनस्य ४.५ ८ **वचसा**=परिभाषणीयौ (वायुविद्युतौ) ६ ६२ ५ भाषणेन २ १८ ३ वेदोक्तन्यायोपदेशकवचनेन ६ ५ **वचसे**=गृहाश्रमवाग्व्यवहाराय ८ ५ **वचः**=उपदेशकारक वेदवचनम् १ ५७ ४ विद्या-शिक्षा-सत्यप्रापक वचनम् १ ५४ ३ परिभाषणम् (वचनम्) ५ ८ वचसा प्र०—अत्र 'सुपा सुलुक्०' इति टालोप २.३१ ५. विद्यायुक्त स्तुतिसम्पादक वचनम् १ २६.१० **वचोभिः**=स्तुतिवाक्यै १.१८७ ११. [वच परिभाषणे (अदा०) धातोरौणा० असुन् । वच: वचनानि नि० २ २७]

वचस्यते परिभाष्यते सर्वत: स्तूयते १.५५.४. [वचस्-शब्दाद् आचारे क्यङ्]

वचस्यया अतिशयितया प्रशसया ४ ३६ ६ **वचस्या**=वचसा वचनेन प्र०—अत्र 'सुपा सुलुक्०' इति सूत्रेण विभक्तेर्यादेश ३४ ४२ वचसि भवा (विभूति=ऐश्वर्यम्) ६ २१ १ वचनै सुसाध्या (जुह्वा=ग्रहणसाधनया क्रियया) २ १० ६. **वचस्याम्**=वचसि उदके ,भवाम् (क्रियाम्) २ ३५.१. [वचस्-शब्दादाचारे क्यङ् । तत 'अ-प्रत्ययाद्' इत्यप्रत्यये स्त्रिया टाप् । अन्यत्र वचस्प्राति० भवार्थे यत् । ततष्टाप् । वचस्या वचनेन नि० १२ १८]

वचस्यवे आत्मनो वच शास्त्रोपदेशमिच्छवे (जनाय) १.५१ १३ आत्मनो वच इच्छवे (विप्राय=मेधाविजनाय) १ १८२ ३ **वचस्युभिः**=आत्मनो वचनमिच्छुभि (जनै) ५ १४ ६ **वचस्युवम्**=आत्मनो वच इच्छन्तम् (शिल्पिनम्) २.१६ ७ [वचस्-पदादात्मन इच्छाया क्यजन्तात् 'क्याच्छन्दसि' सूत्रेण ताच्छील्य उ]

वचस्या वचसि साधूनि (प्रवचनानि) ६ ४६ ८. [वचस्प्राति० साध्वर्थे यत् । तत शेर्लोपश्छन्दसि]

वचोयुजा वचोभिर्युक्तौ (हरी=गमनधारणगुणौ) १ २० २ वाणीर्योजयितो (इन्द्रयो=वायुसूर्ययो.) प्र०—अत्र 'सुपा सुलुक्०' इति षष्ठीद्विवचनस्याऽऽकारादेश १ ७ २ यौ वचसा युङ्क्तस्तौ (हरी=अश्वौ) ६ २० ६ [वचस्-उपपदे युजिर् योगे (रुधा०) धातो कर्त्तरि क्विप् । ततो द्विवचनस्याकारादेशश्छान्दस]

वचोविदः विदितवेदितव्या (विद्वासो जना) १ ६१ ११. शास्त्रवित् (विद्वान् लोग) आर्याभि० १ ३६, ऋ० १.६ २१ ११ ['वचस्' उपपदे विद ज्ञाने (अदा०) धातो. कर्त्तरि क्विप्]

वच्यते उच्यते १ १४२ ४ **वच्यन्ताम्**=उच्यन्ताम् ३ ६ ३ **वच्यन्ते**=स्तुवन्ति प्र०—अत्र व्यत्ययेन श्यँश्च १ १८४ ३ उच्येरन् प्र०—'सम्प्रसारणाच्च' इत्यत्र 'वाच्छन्दसि' इत्यनुवृत्ते पूर्वरूपाऽभावाद्यणादेश १ ४६ ३. [वच परिभाषणे (अदा०) धातो कर्मणि लट् । अन्यत्र लोट् । 'वा छन्दसी' ति नियमेन पूर्वरूपाऽभावे यणादेश]

वच्यमाना उच्यमाना प्र०—अत्र 'वाच्छन्दसि' इति सम्प्रसारणाऽभाव ३ ३९ १ [वच परिभाषणे (अदा०)

जनाय) १६ २१ [वञ्चु प्रलम्भने (चुरा०) धातोर्णिचो ऽभावे शत्रन्ताच्चतुर्थी]

वट्टरिणा वेष्टितेन (पदा=पादेन) प्र०—अत्र वट वेष्टने इति धातोर्बाहुलकादौणादिक ऊरि प्रत्यय १.१३३ २ [वट वेष्टने (भ्वा०) धातोर्बाहु० औणा० ऊरि]

वणिक् व्यापारी, वैश्य ५ ४५ ६ **वणिजे**=व्यवहर्त्तु शीलाय (मेधाविपुत्राय) १ ११२ ११ [वणिक्= पण्या नेनेक्ति नि० २ १७]

वतन्त: वनन्त सम्भजन्त (जना) प्र०—अत्र वर्णव्यत्ययेन नस्य त ७ ६० ६ [वन सम्भक्तौ (भ्वा०) धातो शतृ । वर्णव्यत्ययेन धातोर्नस्य त]

वतेम सम्भजेम ७ ३ १० [वन सम्भक्तौ (भ्वा०) धातोर्लिङ् । वर्णव्यत्ययेन धातोर्नस्य त]

वत्सतर्य्यः अतिशयेन वत्सा अल्पवयस. (गाव) २४ ५ ह्रस्वा वत्सा यासा ता (गाव) २४ १४ [वत्सप्राति० तनुत्वे द्योत्ये 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' अ० ५ ३ ९१ सूत्रेण ष्टरच् । तत स्त्रिया ङीप्]

वत्सम् वसन्ति भूतानि यस्मिँस्त ससार, वदति सततमिति वत्सो वालस्त वा ३३ ५ महत्तत्त्वादिकम् ३ ५५ ४ जात ससारम् १ ६५ १ प्रसूत मनुष्यादिक समारम् १ १६४ १७ वत्सवद्वर्त्तमानोऽहोरात्र १ १४६ ३ सुखेषु निवासयन्त व्यक्तवाच प्रसिद्ध वेदचतुष्टयम् प्र०—अत्र 'वृत०' उ० ३ ६१ इति सूत्रेणास्य सिद्धि १ ७२.२ वत्सवत्पालनीयम् (भा०—पृथिवीस्थपदार्थम्) ३ ५५ १३. स्वाऽपत्यम् १ ३८ ८ **वत्सस्य**=यो वदति तस्य (स्तोतु) ७ ४० **वत्सः**=स्वव्याप्त्या सर्वाऽऽच्छादक (कवि.=काल) १ ६५ ४. **वत्साय**=सन्तानाय १ १११.१ **वत्से**=अपत्ये १ १६४ ५ **वत्सेन**=वालेन १.११० ८ वत्सवद्वर्त्तमानेन (कुमारेण=अकृतविवाहजनेन) २८ १३ [वद व्यक्ताया वाचि (भ्वा०) वस निवासे (अदा०) धातोर्वा 'वृतृवदिवचि०' उ० सूत्रेण स । वत्सा वै दैव्या अध्वर्य्यव श० १ ८ १ २७ मन एव वत्स श० ११ ३ १ १ अयमेव वत्सो योऽय (वायु) पवते श० १२ ४ १ ११ अग्निर्हं वै ब्रह्मणो वत्स जै० उ० २ १३ १ वत्सा उ वै यज्ञपति वर्धन्ति यस्य ह्येते भूयिष्ठा भवन्ति स हि यज्ञपतिर्वर्धते श० १ ८ १ २८]

वत्समिव यथा गोर्वत्सम् ३ ३३ ३ [वत्सम्-इवपदयो समास]

वत्सरः वर्ष २७ ४५ **वत्सराय**=सामान्याय (सवत्सराय) ३०.१५. [वस निवासे (भ्वा०) धातो 'वसेश्च' उ० ३ ७१ सूत्रेण सरन्]

वत्सास. सद्यो जाता वत्सा. ७ ५६.१६ [वत्समिति व्याख्यातम् । ततो जसोऽसुक्]

वद सत्यमुपदिश ६ २८. वद वादय वा प्र०—अत्र पक्षेऽन्तर्गतो ण्यर्थ १ २८ ५ **वदत्**=वदेत् १ ११६ ६. बोला करो स० वि० १४१, अथर्व० ३ ३० ३. **वदत**=अध्यापयतोपदिशत वा ६.११ **वदतम्**=उपदिशत ५ १७ **वदति**=उपदिशति १ १३५.७ **वदन्ति**=उच्चारयन्ति १ १६४.४५ **वदः**=वदे २३ २५ **वदाति**=वदेत् ६ ६ २. **वदान्**=वदेयु १ ३७ ३ **वदामि**=उपदिशामि १ १०५ ७ **वदेम**=उपदिशेम ३४ ५८. अध्यापयेम २.३६ ८ [वद व्यक्ताया वाचि (भ्वा०) धातोर्लोट् । अन्यत्र लेट् लट् लिङ् च । वदति गतिकर्मा निघ० २ १४. यद्वै वदति ग्रसतीति वै तदाहु श० १ ८ २ १२]

वदन् उपदिशन् (इन्द्र =ऐश्वर्यवान्नर) ५ ३१.१२ उपदेश करता हुआ (सन्यासी) स० वि० १६५, ६.११३.४. **वदन्तः**=उच्चरन्त (शिल्पिन) १ १६१ ६ कहते हुए (गृहस्थादि मनुष्यो) स० वि० १४२, अथर्व० ३ ३०.५ [वद व्यक्ताया वाचि (भ्वा०) धातो शतृ]

वदामसि वदेम १६ ४ वदाम १ ८७ ५ [वद व्यक्ताया वाचि (भ्वा०) धातोर्लट् । 'इदन्तो मसि' रिति मस इदन्तता]

वद्मा सत्यहितोपदेष्टा (अग्नि =विद्वज्जन) ६.१३ ६ यो वदति स. (अग्नि =ईश्वर) ६ ४४ [वद व्यक्ताया वाचि (भ्वा०) धातोर् मनिन् । इटोऽभावश्छान्दस]

वधत्रैः वधै ४ २८ ४. [हन हिंसागत्यो (अदा०) धातो 'अमिनक्षियजिवधिपतिभ्योऽत्रन्' उ० ३ १०५. सूत्रेणात्रन् । हन स्थाने वधादेशश्च निपात्यते]

वधनम् हननम् १ ५.१० ताडनम् २ ३०.३. [हन हिंसागत्यो (अदा०) धातोर्ल्युट् । 'बहुल सज्ञाछन्दसोरिति वक्तव्यम्' अ० २ ४ ५४ वा०सूत्रेण हन्तेर्वधादेश]

वधः वधम् प्र०—अत्र हन्तेर्बाहुलकादौणादिकेऽमुनि वधादेश १.३२ ६ नाश २ २१ ४ घ्नन्ति यस्मिन् स (राजव्यवहार.) ५ ३२ ३ वध्यन्ते शत्रवो यस्मात्तच्छस्त्रम् २.१६ ७ वज्र इव प्र०—वध इति वज्रनामसु पठितम् निघ० २ २०, १.१०१ ४ वध-साधनम् ४ २२ ६ हन्ति येन स (दण्ड) ७ ५६ १७ **वधाय**=विनाशाय ६ ३८

८.५.२ दक्षिणत उद्यामो हि वज्र श० ८.५.१.१३. वज्रेणैवैतद्रक्षांसि नाष्ट्रा अपहन्ति श० ७ ४ १ ३४]

वज्रवाहः शस्त्राऽस्त्रविद्यावोढार (राज्यकर्माधिकारिजना) ६ ४४ १६ [वज्रोपपदे वह प्रापणे (भ्वा०) धातो 'वहश्चे' ति ण्वि]

वज्रहस्त शस्त्राऽस्त्रपाणे (इन्द्र=शिल्पिजन) ६ ४६ २ वज्रतुल्यानि शस्त्राणि हस्तयोर्यस्य तत्सम्बुद्धौ [इन्द्र=सभेश राजन्] १० २२ शस्त्रास्त्रवाहो (राजन्) ५ ३३ ३. **वज्रहस्तम्**=शस्त्रास्त्रपाणिम् (इन्द्र=हृद्यपतिम्) ६ २२ ५ **वज्रहस्तः**=किरणपाणि (इन्द्र = सूर्य) २ १६ २ वज्रा किरणा हस्ता यस्य स (सूर्य) २ १२ १३. वज्राणि शस्त्रास्त्राणि हस्ते यस्य स (देव = विद्वान् राजा) २८ ३ वज्रो हस्तयोर्यस्य स (राजा) २६ १० शस्त्राऽस्त्रशासनपाणि (इन्द्र =सभेश) १ १७३ १० [वज्र-हस्तपदयो समास । वज्र इति व्याख्यातम्]

वज्रहस्ता वज्रहस्तौ वज्र विद्यारूप वीर्य हस्त इव ययोस्तौ (इन्द्राग्नी=उपदेश्योपदेष्टारौ) प्र०—वज्रो वै वीर्यम् शत० ७ ४ २ २४ अत्र 'सुपा सुलुक्०' इत्याकारादेश १ १०६ ८ [वज्र-हस्तपदयो समासे कृते द्विवचनस्याकारश्छान्दस]

वज्रासः शस्त्रकलासमूहा १ ८० ८. [वज्रप्राति० जसोऽसुक्]

वज्रिन् वज्र सर्वदु खनाशनो बहुविधो दृढो बोधो यस्याऽस्तीति तत्सम्बुद्धौ (सभाध्यक्ष) १ ३० १२ वज्रोऽविद्यानिवारक प्रशस्तो बोधो यस्य तत्सम्बुद्धौ (सभासेनाध्यक्ष) प्र०—अत्र वजेर्गत्यर्थाद् ज्ञानार्थे औणादिको रन्, तत प्रशसाया मतुबर्थे इनि १ ३० ११ शस्त्रास्त्रभृत् (इन्द्र=राजन्) ६ २२ १० बहुशस्त्रास्त्रयुक्त (राजन्) ५.४० ३ शस्त्रास्त्रसम्पन्न (सभाध्यक्ष) १ ६३ ७ प्रशस्तो वज्र शस्त्रसमूहो विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) १ ६३ ५ प्रशमितशस्त्रास्त्र (राजन्) ४ १६ १ शस्त्रास्त्रधारिन् (राजन्) १ ५७ ६ शस्त्राऽस्त्रविन् (राजन्) ५ ३६ ५ प्रशस्तवज्रवन् (राजन्) ५ ३२ २ **वज्रिणम्**= किरणवन्त जलवन्त वा (इन्द्र=सूर्य वायु वा) प्र०—वज्रो वै भास्न शत० ८ २ ४ १० अनेन प्रकाशरूपा किरणा गृह्यन्ते । वज्रो वा आप शत० ७ ४ २ ४१, १.७ ५ **वज्रिणः**—वज्र बहुविध शस्त्र विद्यते यस्य तस्य (राज) ३ ४८ १ वज्रोऽनन्त प्रशस्त वीर्यमस्यास्तीति तस्य (इन्द्रस्य=ईश्वरस्य) प्र०—अत्र भूमार्थे प्रशसार्थे च मतुप् वीर्यं वै वज्र । शत० ७.४ २ १४, १.७ ७. वनिन. (सर्वसभाध्यक्षस्य) ४० ८ **वज्रिणे**=धनुर्वेदविदे (इन्द्राय=राज्ञे) ३ ५३ १३ वज्रो न्यायाख्यो दण्डोऽस्यास्तीति तस्मै (इन्द्राय=ईश्वराय) प्र०—वज्रो वै दण्ड शत० ३ १ ५ ३२, १ ८ ५ **वज्री**=प्रशस्तशस्त्राऽस्त्रयुक्त (वीरसेनेश) ५ ३२ ४ प्रशस्तशस्त्रविद्याशिक्षित (इन्द्र = सेनाधीश) २० ४६ वज्र प्रकाश प्राणो वाऽस्यास्तीति (सूर्य) ऋ० भू० २८३, १ ३२.१. वज्रो दण्ड शासनार्थो यस्य स (इन्द्र =ईश्वर) १.१३० ३ वज्रा प्राप्तिच्छेदनहेतवो वहव शस्त्रसमूहा किरणा वा विद्यन्ते यस्य स (इन्द्र =सेनापति सूर्यो वा) प्र०—अत्र भूम्यर्थे इनि १ ११ ४ प्रशस्तो वज्र शत्रुच्छेदक शस्त्रसमूहो विद्यते यस्य स (इन्द्र =राजा) १ ५२ ५ वज्र सवत्सरस्तापो वाऽस्यास्तीति स (इन्द्र =सूर्यलोक) प्र०—सवत्सरो हि वज्र शत० ३ ३ ५ १५, १ ७ २ शस्त्रवाहु (राजकर्मचारी) ६.१८ ६ प्रशस्तशस्त्रविद्याशिक्षक (सेनाधीश) २० ४६ सर्वपदार्थविच्छेदक किरणवानिव शत्रुच्छेदी (सेनापति) १ ३२ १ [वज्र इति व्याख्यातम् । तत प्रशसाया भूम्यर्थे वा मत्वर्थ इनि । अश्वेन च रथेन च वज्री (इन्द्र) तै० स० ४४ ८ ६]

वज्रिणा प्रशस्तशस्त्राऽस्त्रयुक्तौ (इन्द्राग्नी=वायुविद्युतौ) ६ ५६ ३ [वज्रप्राति० प्रशसायाम् इन्नन्ताद् द्विवचनस्याकारादेश]

वज्रिवः प्रशस्ता वज्रयो विज्ञानयुक्ता नीतयो विद्यन्तेऽस्य तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) प्र०—वज धातोरौणादिक इ' प्रत्ययो रडागमश्च ततो मतुप् च १ १२१ १४ प्रशस्तैश्शस्त्रास्त्रप्रयोगकुशल (इन्द्र=राजन्) ६ ४५ १८ प्रशस्तशस्त्रास्त्रयुक्त (राजन्) ६ ३८ ४ [वज गतौ (भ्वा०) धातोर् इ 'प्रत्ययो रट् च । ततो वज्रिप्राति० प्रशसाया मतुबन्तात् सम्बुद्धौ 'मतुवसो रु.०' इति रुत्वे रूपम् । वज्रिन्प्राति० वा 'छन्दसीवनिपौ च वक्तव्यौ' इति मत्वर्थ वानुकृष्टो व]

वञ्चति प्रलम्भते २३.२२ वञ्चितो भवति २३ २३ [वञ्चु गतौ (भ्वा०) धातोर्लट् । वञ्चु प्रलम्भने (चुरा०) धातोर्वा लट् । णिचोऽभाव वञ्चति गतिकर्मा निघ० २ १४]

वञ्चते छलेन परपदार्थाना हर्त्रे भा०—छलाय (प्रजाजनाय) १६ २१ तापट्येन वर्तमानाय (अधर्मिजन-

वनधितिः वनाना धृति. १.१२१ ७ [वन-धितिपदयो समास । धिति =दधाते. स्त्रिया क्तिन्]

वनपम् जङ्गल-रक्षकम् (पुरुषम्) ३० १९. [वनोपपदे पा रक्षणे (अदा०) धातो. कर्त्तरि क]

वनम् सम्भजनीय कारणवनम् १७ २० जङ्गलम् ५ ७८ ८ **वनस्य**=वननीयस्य समारम्भस्य १.२४ ७ **वनानाम्**=सम्भजनीयाना पदार्थाना रश्मीना वा १ ७० २. **वनानि**=वनन्ति सम्भजन्ति सुखानि यैस्तानि ३ ५१ ५ भजनीयानि (दिनानि) १ १७१ ३ सूर्यकिरणानिव वनानि ७ ७ २ अरण्यानि १.६५ ४ **वने**=एकान्ते १ ५५ ४ **वनेषु**=सम्यग् विभाजकेषु किरणेषु १ ७०.५. वननीयेषु जङ्गलेषु ४ ७ १ रश्मिषु वृक्षसमूहेषु वा, प्र०—वनमिति रश्मिनामसु पठितम् निघ० १ ५, ४ ३१. [वन शब्दे (भ्वा०) वन सम्भक्तौ (भ्वा०) वनु याचने (तना०) धातोर्वा बञर्थे क । वनम् रश्मिनाम निघ० १.५ उदकनाम निघ० १ १२ वन वनोति. नि० ८.३ वनानाम्=रश्मीनाम् नि० १३ ७२]

वनर्गुः वनगामी (मृगः) प्र०—अत्र वनोपपदादृजुधातोरौणादिक उ-प्रत्ययो बाहुलकात् कुत्व च १.१४५.५. [वनोपपदे ऋज गतिस्थानार्जनोपार्जनेषु (भ्वा०) धातोर्बाहु० औणा० उ । बहुलवचनादेव च कुत्वम् । अथवा वनोपपदे गम्लृ गतौ (भ्वा०) धातोर्मितद्र्वादित्वाट् डु । रुडागमश्छान्दस । वनर्गु स्तेननाम निघ० ३ २४. वनर्गू वनगामिनौ नि० ३ १४]

वनर्षदः ये वनेषु रश्मिषु सीदन्ति ते (वायव = पवना) प्र०—अत्र 'बाच्छन्दसि' इति रुडागम ३३ १. ये वने सीदन्ति ते (वय =पक्षिण) २ ३१ १ [वनोपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्] रुडागमश्छान्दस]

वनवत् किरणवत् २ २६ १ वनेन जङ्गलेन तुल्यम् (रयि=श्रियम्) २ २५ २ [वनप्राति० तुल्यार्थे वति । वनमिति रश्मिनाम निघ० १ ५]

वनवत् याचते ६ ३३ १ सम्भजते ५ ३७ २ सेवयसि ५ ३ ५ सम्भजसे ५ ३७ २ सविभाजयेत ५ ४४ ७ **वनवसे**=सम्भज ६ १६ १८ [वनु याचने (तना०) धातोर्लेटि अडागमे च रूपम् । अथवा 'व्यत्ययो बहुलम्' इति द्विविकरणता उ, शप च]

वनसदे यो वनेषु सीदति तस्मै भा०—अरण्यस्थाय (विद्वज्जनाय) १७ १२ [वनोपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) कर्त्तरि क्विप्]

वनस्पतयः वनस्य किरणसमूहस्येव न्यायस्य पालका (इन्द्रा =राजान) प्र०—वनमिति रश्मिनाम निघ० १ ५, ६.१२ अश्वत्थादय १४ ३१ वटादय ३६ १७ वनाना जङ्गलाना पालका (इन्द्रा =राजान) ६ १२ **वनस्पतये**=वनाना पालकायाऽश्वत्थप्रभृतये १० २३ **वनस्पतिम्**=वनाना पालकम् (प्रजाद् खल्वमका मनुष्या) २१ ४० वनाना किरणाना पालक स्वामिन सूर्यम् २८ १० **वनस्पतिः**=सम्भक्तस्य पदार्थसमूहस्य जङ्गलस्य वा पालक श्रेष्ठतमो वा (परमेश्वर ओषविराजो वा) १ ९१ ६ वनाना पालयिताऽग्निसञ्ज्ञक (ब्रह्म, सूर्य) ४ ११ अश्वत्यादि १३.२६. वनस्य वृक्षसमूहस्य पति पालक (आज्ञप्त: पुरुष.) २०.४५ रश्मिपालक (सूर्य) २१ ५६ वनस्य किरणसमूहस्य पालक सूर्य २८ २३ पिप्पलादि २१ ५८ वनाना मध्ये रक्षणीयो वटादिवृक्षसमूहो मेघो वा १ ९० ८ **वनस्पती**=काष्ठमयौ (भा०—मुसलोखलौ) १ २८.८. **वृक्षस्पतीन्**=वटाश्वत्थादीन् ... **वनस्पतीनाम्**=पिप्पल्यादीनाम् ९ ३९ **वनस्पते**=किरणाना रक्षक सूर्य इव वनादीना पालक विद्वन् राजन् २९ ५२ यो वनाना वृक्षौषध्यादिसमूहानामधिकवृद्धिहेतुत्वेन पालयिताऽस्ति सोऽपुष्पफलवान् (अ०—वनस्पति), प्र०—अपुष्पा फलवन्तो ये ते वनस्पतय स्मृता मनु० १ ४७, १ १३ ११ वनस्य सम्भजनीयस्य शास्त्रस्य पालक (जिज्ञासु-विद्वन्) २७.२१ वननीयस्य धनस्य रक्षक (पुरुषार्थिजन) ३ ८ ३ वनस्य रश्मिसमूहस्य पालक सूर्यस्तद्वद्वर्त्तमान (विद्वज्जन) ३ ८ १ वनाना विद्याप्रकाशकाना पति पालयिता तत्सम्बुद्धौ (अ०—विद्वज्जन) ४ १० [वन-पतिपदयो समासे 'पारस्करप्रभृतीनि च सञ्ज्ञायाम्' अ० ६ १ १५७ सूत्रेण सुडागम वनस्पति पदनाम निघ० ५ २ वनस्पति =वनाना पाता वा पालयिता वा नि० ८ ३ अग्निर्वै वनस्पति कौ० १० ६ प्राणो वनस्पति कौ० १२ ७ प्राणो वै वनस्पति ऐ० २ ४ स (वनस्पति) उ वै पयोभाजन कौ० १० ६ वनस्पतयो वै द्रु तै० १ ३.९ १ यद्रुग्रो देव ओषधयो वनस्पतयस्तेन कौ० ६ ५. भोज्य वा एतद् वनस्पतीना (यदुदुम्बर) ऐ० ७ ३२ अथो एव ऽएते वनस्पतयो यदुदुम्बर श० ७ ५ १ १५ तेजो ह वा ऽएतद् वनस्पतीना यद् बाह्या शकलम् तस्माद् यदा बाह्या शकलमपतक्ष्णुवन्त्यथ शुष्यन्ति श० ३ ७ १ ८ वनस्पतयो हि यज्ञिया , नहि मनुष्या यजेरन् यद् वनस्पतयो न स्यु श० ३ २ २ ९ सोमो वै वनस्पति मै० १ १० ९ श० ३ ८.३ ३३ वायुर्गोपा वै वनस्पतय मै० ३ ९ ४ ओषधयो

वधै=गोहिंस्राणा मारणोपायै १ १२१ ९. [हन हिंसा-गत्यो (अदा०) धातोरौणा०असुन्-प्रत्यये बहुलवचनाद् वधादेश अथवा=हनधातो 'हनश्च वध.' अ० ३.३ ७६ सूत्रेणाप् वधादेशश्च वध बलनाम निघ० २ ९ वज्रनाम निघं० २ २०]

वधर्यन्तीम् भूमिम् १ १६१.९ [वृधु वृद्धौ (भ्वा० धातोर्णिजन्ताच्छत्रन्तात् स्त्रिया ङीप्]

वधस्नैः यानि वधेन स्नापयन्ति शस्त्राणि तै. १ १६५ ६. वधेन शोधकैर्भृत्यैर्न्यायाधीशै ७ ६ ५ ये वधेन स्नान्ति पवित्रा भवन्ति तै (क्षुब्धैर्मनुष्यै.) ५ ४१.१३. [वधोपपदे ष्णा शौचे (अदा०) धातो क]

वधिष: हन्या ६ १७ १. **वधिष्टम्**=हन्यातम् ४ ४. **वधीत्**=हन्ति ४.१७ ३ नाशयतु, प्र०—अत्र लोडर्थे लुङन्तर्गतो ण्यर्थश्च १ ३८ ६ हन्यात् २ ४२.२ **वधीम्**=हन्मि १ १६५ ८ **वधी:**=हिन्धि प्र०—अत्र लोडर्थे लुङ्ङ-भावश्च १ ३३ ४ हन्या ६ ३३ ३ हसि ४ ३०.८. हिंस्या १६ १५ दूर प्रक्षिप प० वि० । नष्ट करो आर्याभि० १.१८, ऋ० १ ८ ६ ७ वध कर आर्याभि० १ ४६, ऋ० १ ७ १९ ८ वियोजय प० वि० । हिंसा अर्थात् ताडना कर स० प्र० ४३६, १६ १५ हिंसय प० वि० । **वधेत्**=हन्यात् १० ८ **वध्यासम्**=हन्याम् १ २६ [हन हिंसागत्यो. (अदा०) धातोर्लुङ् 'लुङि च' इति हन्तेर्वधादेश । अन्यत्र लिङ्]

वधूमन्त: प्रशस्ता वध्वो विद्यन्ते येषान्ते (योद्धृजना) ६ २७ ८ प्रशस्ता वध्व स्त्रियो विद्यन्ते येषु ते (रथास = यानानि) १ १२६ ३ [वधू-प्राति० प्रशसाया मत्वर्थे मतुप्]

वधूमन्ता प्रशस्ते वध्वौ विद्येते ययोस्तौ (रथौ) ७ १८ २२ [वधूप्राति० प्रशसाया मतुप् । ततो द्विवचन-स्याकारादेश]

वधूमिव स्त्री के समान स० वि० १६६, अथर्व० ६ २ ३ २४ [वधूम्-इवपदयो. समास.]

वधूयुरिव यथाऽऽत्मनो वधूमिच्छु (जन) ३ ५२ ३ पतिरिव ४ ३२ १६ आत्मनो वधूमिच्छन्निव (स्त्रीकाम पतिरिव) ३ ६२ ८ [वधूयु -इवपदयो समास । वधूयु = वधूपपदादात्मन इच्छाया क्यजन्ताद् उ]

वधूयु: वधू की कामना करने वाला पति स० वि० १३७, अथर्व० १४ १ ९ [वधूपपदादात्मन इच्छाया क्यज-न्तात् 'क्याच्छन्दसी' ति सूत्रेण उ]

वधू: भार्य्या ५.३७ ३ स्त्री स० वि० १०५, ५.३७.३. **वध्व:**=युवत्य स्त्रिय. ५ ४७.६ [वह प्रापणे (भ्वा०) धातो. 'वहेर्धश्च' उ० १.८३ सूत्रेण ऊ । वध्व. नदीनाम निघं० १ १३]

वध्यमाने ताड्यमाने (दुर्जने) ४ ४२ ८ [हन हिंसा-गत्यो (अदा०) धातो कर्मणि शानच् । वधादेशश्छान्दस]

वध्रिमत्या: वर्धिकाया विद्याया १.११७ २४ वध्रय प्रशस्ता वृद्धयो विद्यन्ते यस्यास्तस्या सन्स्त्रिय प्र०—अत्र वृधु-धातोरौणादिको रिक्-प्रत्ययो बाहुलकाद् रेफ लोप. १ ११६.१३ बहवो वध्रयो वर्धनानि विद्यन्ते यस्या तस्या भूमेरन्तरिक्षस्य वा ६ ६२ ७ [वध्रिप्राति० प्रशसाया (मत्वर्थे) मतुप् । तत पष्ठी । वध्रि =वृधु वृद्धौ (भ्वा०) धातोर्बाहु० औणा० रिक् रेफलोपश्च]

वध्रिवाच: वध्रयो वर्धिका वाचो येषान्ते (विद्वज्जना) ७ १८ ९ [वध्रि-वाच्पदयो. समास]

वध्रि: वध्यते स वध्रि निर्वीर्यो नपुंसक इव प्र०—अत्र वन्ध-धातोर्बाहुलकादौणादिक क्रिन्-प्रत्यय. १ ३२ ७ **वध्रीन्**=वृद्धान् वृषभान् २.२५ ३ [वन्ध वन्धने (क्र्या०) वृधु वृद्धौ (भ्वा०) धातोर्बौणा० रिक् । वृधुधातो रेफ-लोपश्च]

वध्र्यश्वाय वध्रयो वर्द्धिका अश्वा यस्य तस्मै (जनाय) ६ ६१.१ [वध्रि-अश्वपदयो. समास । वध्रिरिति व्याख्यात वध्रिमत्या पदे]

वनतम् यौ सम्यक् वाणीसेविनौ स्त , प्र०—अत्र व्यत्यय १ ३ २ **वनते**=सम्भजमानाय (राये=धनप्राप्तये) ३ १९ १ [वन सम्भक्तौ (भ्वा०) धातो शतृ । अमि नुमो ऽभावश्छान्दस]

वनतम् सम्भजत १.९३ ९. **वनताम्**=सम्भजताम् २५.४५. सेवताम् १ १६२ २ **वनते**=सम्भजति ६.१५ ६ सम्भजसि ५.४१ १७ **वनथ:**=समेवेथाम् ४ ४४ २. सवि-भजथ ७ २ ७. सम्भजेथाम् १.४६ १४ **वनन्ति**=समे-वन्ते ६ ६ ३ **वनसे**=सम्भजसि १ १४० ११ **वनाति**=सम्भजेत् ७ १५ ४ **वनामहे**=सम्भजामहे प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १.१५ ८ याचामहे २६.१८ सम्भ-जाम ५ ७ ३ **वनेम**=विभज्य दद्याम, सम्भजेम १ १२९ ७ सविभागेनानुतिष्ठेम १ ७० १ [वन सम्भक्तौ (भ्वा०) धातोर्लोट् । अन्यत्र लट् लिङ् च । वनु याचने (तना०) धातो-र्वा रूपम् । विकरणव्यत्ययेन शप्]

वनद: प्रशसितार (विद्वासो जना) २ ४.५]

वनेराट् या वने सेवनीये किरणे वा राजते सा (दीप्ति) ६ १२ ३ [वनोपपदे राजृ दीप्तौ (भ्वा०) धातोः क्विप्। सप्तम्या अलुक्]

वनेव रश्मय इव, प्र०—वनमिति रश्मिनाम निघ० १ ५, १ १२७ ४ यथा वनानि तथा १ १२७ ३ [वन-इव-पदयो समास]

वने वने जङ्गले जङ्गले अग्नाविव जीवे जीवे ५.११ ६ रश्मौ रश्मौ पदार्थे पदार्थे वा १५ २८ [वने-पदस्य वीप्साया द्वित्वम्]

वन्त सम्भजत, प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १ १३९ १०. [वन सम्भक्तौ (भ्वा०) धातोर्लोट्। शपो लुक् 'बहुल छन्दसि' सूत्रेण]

वन्तारः सम्भाजका. (प्रजाजना) ७ ८ ३ विभाजका (राय =धनानि) ३ ३० १८ [वन सम्भक्तौ (भ्वा०) धातो कर्त्तरि तृच्। इटोऽभावश्छान्दस]

वन्दते कामयते ४ ५० ७ स्तौति तद्गुणान् प्रकाशयति ३ ४६ **वन्दस्व**=कामय १ ३८ १५ **वन्दामहे**=कामयामहे ४ ५७.६ **वन्दे**=प्रशसामि सत्करोमि वा ५ २८ ४ नमस्करोमि ७ ६ १ स्तौमि २.३५ १२ अभिवादये १ ४७ २ स्तुवे १२ ४२ [वदि अभिवादन-स्तुत्यो (भ्वा०) धातोर्लट्। अन्यत्र लोट् चापि। वन्दते अर्चतिकर्मा निघ० ३ १४]

वन्दयध्यै अभिवन्दितु स्तोतुम् १ ६१.५ वन्दितुम्, प्र०—अत्र 'तुमर्थे सेसेनसे०' इति कध्यै प्रत्यय १ २७ १ [वदि अभिवादनस्तुत्यो (भ्वा०) धातोर्णिजन्तात् तुमर्थे कध्यै प्रत्यय]

वन्दनम् स्तुत्य यानम् १ ११८ ६ वन्दनीयम् (विप्र=मेधाविजनम्) १ ११९.७ गुणकीर्त्तनम् १ ११२ ५ **वन्दनः**=स्तोतुमर्हः. (विद्वज्जन) १ ११९.६ **वन्दनानि**=अभिवादनानि स्तवनानि वा ३ ४३ ४ **वन्दनाय**=अभित सत्काराऽर्हायाऽपत्याय प्रशसायै वा १ ११६ ११ स्तवनाय १ ११७ ५ [वदि अभिवादनस्तुत्यो (भ्वा०) धातोर्ल्युट्]

वन्दनश्रुत् येन वायुना वन्दन स्तवन शृणोति श्रावयति वा तत्सम्बुद्धौ (इन्द्र=सभाद्यध्यक्ष) १ ५५ ७ [वन्दनोपपदे श्रु श्रवणे (भ्वा०) धातो क्विप्]

वन्दना वन्दनानि स्तुत्यानि कर्म्माणि ७ २१ ५ [वन्दनमिति व्याख्यातम्। ततश्शेर्लोपश्छन्दसि]

वन्दनेष्ठा. स्तवने तिष्ठति य (इन्द्र =मित्र) १ १७३ ९ [वन्दनोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्विप्। सप्तम्या अलुक्]

वन्दमानम् स्तूयमानम् (अध्यापकम्), प्र०—अत्र कर्मणि शानच् २.३३ १२. **वन्दमानः**=स्तुवन्नभिगायन् (मनुष्य) १ २४.११. [वदि अभिवादनस्तुत्यो (भ्वा०) धातो शानच्]

वन्दारु वन्दनशीलम् (स्वभावम्) ४ ४३ १. प्रशसनीय धर्म्यम् (वच) ५ १ १२ प्रशसनीयवचनम् १५ २५. [वदि अभिवादनस्तुत्यो (भ्वा०) धातो. 'शृवन्द्योरारु' अ० ३ २ १७३ सूत्रेण ताच्छील्य आरु.]

वन्दारुः अभिवादनशील. (अध्यापको जन) १२ ४२. [पूर्वपदे व्याख्यातम्। वन्दारुष्टे तन्व वन्देऽग्नऽइति वन्दिता तेऽह तन्व वन्देऽग्नऽइत्येतत् श० ९ ८ २ ९]

वन्दितारम् स्तावकम् (सज्जनम्) २ ३४ १५ [वदि अभिवादनस्तुत्यो. (भ्वा०) धातो कर्त्तरि तृच्]

वन्दिषीमहि नमस्कुर्म १ ८२ ३ नमेम स्तुवीमहि ३.५२ [वदि अभिवादनस्तुत्यो (भ्वा०) धातोर्लिङ्]

वन्द्य अभिवदितु प्रशसितु योग्य (सभाध्यक्ष) १ ७९.७ वन्दितु स्तोतु योग्य (राजसूर्य्यश्वर वा) ३४ १३ **वन्द्यः**=स्तोतुमर्ह (अग्नि =विद्वज्जन) २.७ ४ पूजनीय (परमेश्वर) ऋ० भू० २२२, अथर्व० ६.१०.९८ १ प्रशसनीय (सविता=परमात्मा) ४ ५४ १ नमस्कर्त्तु योग्य, भा०—मान्य (सप्ति =शिल्पिजन) २९ ३ सत्करणीय (सभापति राजा) स० प्र० १८३, अथर्व० ६ १० ९८ १ नमस्करणीय, भा०—धर्मात्मा सन् सर्वत्र सत्कृत (अग्नि =पावकवत्पवित्रो विद्वान्) २९ २८ [वदि अभिवादनस्तुत्यो (भ्वा०) धातोर्ण्यत्। वन्द्य =वन्दितव्य नि० ८ ८]

वन्द्यासः वन्दितु कामयितुमर्हा (गाव =धेनव) १ १६८ २ स्तोतव्या सत्कर्त्तव्याश्च (मरुत =मनुष्या) १ ६० ४ [वन्द्य इति व्याख्यातम्। ततो जसोऽसुक्]

वन्द्येभिः वन्दितु स्तोतु योग्यै (शूपै =वलै.) ५ ४१ ७ कामना के योग्यो (विद्यायुक्त सन्तानो) से स० वि० १०५, ५ ४१ ७ [वन्द्यमिति व्याख्यातम्। 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

वन्धुरः बन्धनविशेषा, प्र०—अत्र 'सुपा सुलुक्०' इति जस स्थाने सु १ ३४ ९ **वन्धुरे**=प्रेमबन्धने ६ ४७ ९ दृढबन्धनयुक्ते (रथे) १ १३९ ४ **वन्धुरेषु**=यन्त्राणा बन्धनेपु १ ६४ ९ [बन्ध बन्धने (क्र्या०) धातो.

वै वनस्पतय. काठ० २६ ३ चराचरा हि वनस्पतय मै० २ ३ २ वनस्पतयो वाला तै० स० ७ ५ २५ १.]

वना सम्भक्तानि वस्तूनि १ ५४ १. सम्भजनीयानि (सुखानि) ६ ६.३ अरण्यानि किरणान् वा १ ६६ १ जङ्गलानि ५ ५७ ३ वनानि याचनीयानि (ज्ञानानि) ३ ६.२ जलानि १ ६४ ७ [वनमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि। वना वनानि नि० ४ १५.]

वनाः किरणा ६ ४८ ५ [वनमिति रश्मिनाम निघ० १ ५ लिङ्गव्यत्यय]

वनिता याचक (जन) ३ १३ ३. [वनु याचने (तना०) धातो कर्त्तरि तृच्]

वनिनम् वनानि किरणा विद्यन्ते यस्मिँस्तत् (किरण-सयुक्त मेघम्) ६ ८.५ वन वहूदक विद्यते यस्मिँस्तम् (रथ=यानम्), प्र०—वनमित्युदकनाम निघं० १.१२, १ ११६ १ सम्भक्तारम् (मारुत गणम्) १ ६४.१२ **वनिनः**=रश्मिमत (सूर्यस्य) १ १८०.३ वनसम्वन्धो विद्यते येषान्ते (गृहस्था जना.) ७ ४३ १ वनस्य सविभाग-स्य रश्मीना वा प्रशस्त सम्वन्धो विद्यते यस्य तस्य (विदुष शिल्पिजनस्य), प्र०—अत्र सम्वन्धार्थे इनि १ ६४ १० याच्त्रावन्त (सज्जना) ३ ४० ७ वनानि सन्ति येषु ते वृक्षा ७ ३५ ५ किरणवन्त (विद्युदादय पदार्था) ७ ३४ २५ वनानि वहव किरणा विद्यन्ते येषु तान् (धर्म-प्रकाशकानाचारान्) ७ ४ ५ वहुकिरणयुक्ता वनस्था वृक्षा-दय ७ ५६ २५ वनसम्वन्धिन (वया=पक्षिण) ६ १३ १ वनानि जलानि १ १४० २ वनानि प्रशस्तविद्यारश्मयो विद्यन्ते येषान्ते (अध्यापका जना) १ १३६ १० प्रशस्ता रश्मयो वनानि वा येषा येषु वा तान् (प्राणान्) १ ५८ ४ वन रश्मिसम्वन्धो विद्यते येषा ते वायव, प्र०—अत्र सम्वन्धार्थे इनि १ ३६ ३ [वनप्राति० सम्वन्धार्थे भूम्न्यर्थे प्रशसायामर्थे वा मत्वर्थ इनि। वनमिति व्याख्यातम्]

वनिषीष्ट याचेत १ १२७ ७ [वनु याचने (तना०) धातोराशिषि लिङ्]

वनिष्ठः अतिशयेन वनिता सविभाजक (इन्द्र=राजा) ७ १८ १ [वन सम्भक्तौ (भ्वा०) धातो कर्त्तरि तृजन्ताद् अतिशायन इष्ठन्-प्रत्यये तृचो लोप]

वनिष्ठुना याचनेन २५ ७ आन्त्रविशेषेण ३६ ८ **वनिष्ठुः**=सम्भाजी (भा०—वीर्यवान् पुरुष), प्र०—अत्र वन सम्भवतौ इत्यस्मादौणादिक इष्ठुप् प्रत्यय १६ ८७ आन्त्रविशेष, प्र०—अत्र 'सुपा सुलुक्०' इत्यम स्थाने सुरा-देश ३६ ६ [वनु याचने (तना०) वन सभक्तौ (भ्वा०) धातोर्वा औणा० इष्ठुप् वाहुलकात्]

वनीयान् अतिशयेन विभाजक. (सज्जन) ५ ७७ २. [वन सम्भक्तौ (भ्वा०) धातोस्तृजन्तादतिशायन ईयसुन्। तृचो लोप। वनीयान् वनयितृतम नि० १२.७]

वनुथः याचेथाम् २ ३० ६ कामयेथे ७ १७ **वनु-याम**=सम्भजेम १ १३२ १ याचेमहि ५ ३ ६ इच्छेम याचेम १ ७३ ६ **वनुषे**=याचसे ४ ४४ ३ **वनुष्यात्**= याचेत-६ ५ ४ **वनुष्व**=प्रयच्छ १ १६६ १. **वनोति**= याचते, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ १३३ ७. **वनोषि**=याचसे सम्भजसि वा १ ३१ १३ [वनु याचने (तना०) धातोर्लट्। व्यत्ययेन परस्मैपदम्। अन्यत्र लिङ् लोट् च। वनोति कान्तिकर्मा निघ० २ ६]

वनुषः याचमानस्य (पाखण्डिजनस्य) ७ २५ ३ याचका (विप्रा=मेधाविजना) ३ २७ ११ सविभाज-कस्य (विदुषो जनस्य) १ १५० ३ सेवमानस्य (मर्त्यस्य= मनुष्यस्य) ४ २२ ६ सेवनीयान् (सज्जनान्) ६ ६ ६ सविभाजकान् (गुप्तचरान् जनान्) ६ २५ ३ **वनुषाम्**= राज्यस्य, याचकाना शत्रूणा जनानाम् ६ ६८ ६ [वनु याचने (तना०) वन सम्भक्तौ (भ्वा०) धातोर्वा वाहु० औणा० उसि]

वनुष्यतः याचमानान् (मनुष्यान्) ६ १५ १२ हिंसन्तम् (अग्निं=विद्युतम्), प्र०—अत्र विभक्तिव्यत्यय वनुष्यतिर्हन्तिकर्मेति निरुक्ते २ २५ १ हिंसत (दुर्जनात्) २ २६ १ सम्भक्तान् (जनान्) १ १३१ १ क्रुध्यत (उत्तम-जनस्य), प्र०—वनुष्यतीति क्रुध्यतिकर्मा निघ० २ १२, ७ ५६ १६ **वनुष्यताम्**=क्रुध्यता वाधमानाना वा (दुष्टाना शत्रूणाम्) ६ ६२ १० **वनुष्यन्**=सेवयन् (विद्वान् राजा) ६ ६ ६ [वनु याचने (तना०) वन सम्भक्तौ (भ्वा०) धातोर्वा शतृ। 'व्यत्ययेन उ-स्य-विकरणौ परस्मैपदञ्च। वनुष्यति क्रुध्यतिकर्मा निघ० २ १२ वनुष्यति पदनाम निघ० ४ २ वनुष्यतिर्हन्तिकर्मानिवगतमस्कारो भवति नि० ५ २]

वनून् अधर्मसेविन (जनान्) ४ ३० ५ [वन सम्भक्तौ (भ्वा०) धातोर्वाहु० औणा० उ। ततो द्वितीयावहु० रूपम्]

वनेजाः किरणसमुदाये जायते स (विद्वान् जन) ६ ३ ३. [वनोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड। सप्तम्या अलुक्। वनमिति रश्मिनाम निघ० १ ५]

गत्यर्थे (भ्वा०) धातोरच्]

वम्रम् रोगनिवृत्तये वमनकर्त्तारम् (सद्वैद्यम्) १.११२ १५ **वम्रः**=उद्गिरकस्त्यक्ता (धार्मिको जन) १ ५१ ६. [टुवम उद्गिरणे (भ्वा०) धातोर्बाहु० औणा० रक्]

वम्रीभि उद्गीर्णाभि (वर्पाभि) ४.१६.६. **वम्रय.**=अल्पवयस्य: (देव्य =स्त्रिय) ३७.४ [वम्रमिति व्याख्यातम्। तत स्त्रिया डीप् छान्दस। वम्रयो वमनात् नि० ३ २० वम्रीभिरुपजिह्विका इति सीमिकानाम् नि० ३ २०]

वय इव यया पक्षिणस्तथा १.८७ २. [वयस्-इव-पदयो समास]

वयत: प्राप्नुवत (विद्यार्गिजनस्य) २ २८.५. **वयन्त:**=व्याप्नुवन्त (वसिष्ठा =विद्वज्जना) ७ ३३ ६ [वय गतौ (भ्वा०) धातो शतृ। व्यत्ययेन परस्मैपदम्]

वयति सन्तनोति १६ ८२ विस्तृणाति १६.८३ **वयन्ति**=व्याप्नुवन्ति ६ ९ २. निर्मिमते १६ ८०. [वेञ् तन्तुसन्ताने (भ्वा०) धातोर्लट्। अथवा वी गतिव्याप्ति-प्रजनादिषु (अदा०) धातोर्लट् 'बहुलं छन्दसी' ति शपो न लुक्]

वयन्ती गच्छन्ती (पृथिवी) २ ३८ ४ [वय गतौ (भ्वा०) धातो शत्रन्तात् डीप्। व्यत्ययेन परस्मैपदम्]

वयसा व्याप्त्या १८ ५१.जीवनेन ११ २३ कमनीयेन (जीवनेन) २ १० ४ **वय:**=प्रजननात्मकम् (अश्व = महत्तत्त्वम्) २३.५३ कमनीय जीवन विज्ञान वा ६ ४५ २ यो वेति गच्छति स पक्षी २३ ११ कामम् २ ४ ६. आयु १११२ कमनीय धनम् ४ १७ १८ प्रदीपक तेज ५ १६ १ अवस्थात्रये सुखभोग जीवनम्, चिरञ्जीवसुख वा ७ ४७ प्रजनन प्रापण वा १४ १० तृप्तिम् २१ १४ येन व्येति व्याप्नोति तत् (तर्पणम्) २१ १५ गमनम् २८ २८. विद्या कामयमाना, प्राप्तविद्या वा (राजप्रजाजना) १ १२७ ८ व्यापिन (पदार्थां) ४ ४३ ६ पक्षिण इव गायत्र्यादीनि छन्दासि २ १६ ज्ञानिन (जना) १ १० ३ ७ पराक्रमम्, कमनीय कर्म, विविधव्यवहारव्यापी (छन्द = स्वाधीन्यम्), सुखप्रापकम् (छन्द), कमिता (छन्द) बलवान् (पुरुप), प्रजनक (छन्द =स्वाधीन पुरुप), न्याय-विनयपराक्रमव्याप्तम् (छन्द =विद्याधर्मशमादिकर्म), बलिष्ठ (पुरुष) १४ ९ बलम्, इच्छाम्, कामनाम् १४ १० व्याप्तिशीला (अश्वास =वेगादयो गुणा) ५ ७५ ६ शत्रु-बलव्यापकम् (रूप=बलम्) २८ ४१ व्याप्तव्यम् (चिर-जीवनम्) २१ २१ आयुर्वर्धकम् (भा०—वासन्तिक गुणम्) २१.२३. प्राप्तव्य वस्तु २१.१९. कालविज्ञानम् २१.२५. प्राणधारणम् २८ ३७. कमितार (जना) १ १३६ २. **वयांसि**=कमनीयान्यन्नानि ३ ३ ७ **वयोभि:**=व्यापकै-र्गुणै. १२.२५. यावज्जीवनं १२ १ [वी गतिव्याप्ति-प्रजनकान्त्यसनखादनेषु (अदा०) धातोरौणा० असुन्। वय.=अन्ननाम निघ० २.७ वयो वेर्बहुवचनम् नि० ४ ३. वय =अन्नम् नि० ६ ४. एतद्वै वयसाम्ओजिष्ठ बलिष्ठ यच्छ्येन श० ३ ३ ४.१५ स (श्येन) हि वयसामाशिष्ठ ता० १३ १०.१४ श्येनो वै वयसा क्षेपिष्ठ. प० ३ ८. पशवो वै वयासि श० ९.३ ३.७ निर्ऋतेर्वा एतन्मुख यद्वयासि यच्छकुनय. ऐ० २ १५ देवानन्नु वयान्योपधयो वनस्पतय श० १ ५ २ ४ प्राणो वै वय ऐ० १ २८ पृथु तिरश्चा वयसा बृहन्तम् (यजु० ११ २३) इति पृथुर्वाऽएष (अग्नि) तिर्यङ् वयसो बृहन्धूमेन (वय =धूम) श० ६ ३. ३.१९ धूमो वाऽअस्य (अग्ने) श्रवो वय श० ७ ३ १.२९. दिव्य सुपर्णं वयसा बृहन्तम् (यजु० १८ ५१.) इति दिव्यो वाऽएष (अग्नि) सुपर्णो वयसो बृहन्धूमेन,(वय.=धूम) श० ९ ४ ४ ३. अथ यदश्रु सक्षरितमासीत्तानि वयास्यभवन् श० ६ १ २ २ तार्क्ष्यो वै पश्यत राजेत्याह तस्य वयासि विश श० १३ ४ ३ १३ उरस एवास्य (इन्द्रस्य) हृदयात्त्विपिर-स्रवत् स श्येनोऽपाष्ठिहाभवद् वयसा राजा श० १२ ७ १.६]

वयस्कृत् यद्वयस्करोति तज्जीवनसाधनम् १५ ५ यो वयो वृद्धावस्थापर्यन्त विद्यासुखयुक्तमायु करोति स (सभाध्यक्ष) १ ३१ १० **वयस्कृतम्**=यो वय करोति तम् (जगदीश्वर भौतिकमग्नि वा) ३ १८ [वयस् इति व्याख्यातम्। तदुपपदे डुकृञ् करणे (तना०) धातो कर्त्तरि क्विप्]

वयस्वन्त: प्रशस्तं वयो जीवन विद्यते यस्य तस्य राय =धनस्य) ५ ५४ १३ प्रशस्त वयो जीवन विद्यते यस्मिँस्तस्य (राय =धनस्य) २ २४ १५ प्रशस्त पूर्णमायु-विद्यते येषान्ते (जना), प्र०—अत्र प्रशसार्थे मतुप् ३ १८. **वयस्वते**=बहुजीवन विद्यते यस्य तस्मै (इन्द्राय=सेना-पतये) ७.२२. [वयस्प्राति० मतुप्। तत प्रथमाबहुवचनम्]

वया इव यथा विस्तीर्णा शाखा. २ ५ ४ **वया-मिव**=यथा वृक्षस्य सुदृढा विस्तीर्णा शाखाम् ६ ५७ ५. [वयस्-इवपदयो समास]

'मद्गुरादयश्च' उ० १४१ सूत्रेण उरच् । वर्णव्यत्ययेन वस्य वकार]

वन्धुरायुः वन्धुरमायुर्यस्य स. (सज्जन) ४४४.१. [वन्धुर-आयुपदयो समास]

वन्धुरेष्ठाः यो वन्धुरे बन्धने तिष्ठति सः (रथ) ३.४३.१ [वन्धुरोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो. क्विप्]

वन्याय वने जङ्गले भवाय (पुरुषाय) १६.३४ [वनप्राति० भवार्थे यत्]

वन्वन् याचन्ते ७ ४८ ३ **वन्वन्तु**=याचन्ताम् ७ २१ ६ [वनु याचने (तना०) धातोर्लङ् । अटोऽभाव. । अन्यत्र लोट्]

वन्वन् सम्भजन् (जन.) ६ १२ ४ धर्म्मं सेवमान (विद्वत्सन्तान) १६ ५३. सम्भजमान (सूर्य=प्रजापालक) १ १२१ ६ **वन्वते**=सत्याऽसत्ययोर्विभाजकाय (इन्द्राय=सभासेनेशाय) २ २१ २ **वन्वन्तः**=विभजन्त (दुर्जना) ६ १६ २७ [वन सम्भक्तौ (भ्वा०) धातोः शतृ । विकरणव्यत्ययेन उ]

वन्वानः सम्भजमान (सज्जन) ३ ८ २ याचमान (राजा) ५ २९ ८ **वन्वानाः**=याचमाना (सज्जना) १० ४ [वनु याचने (तना०) धातो शानच्]

वप निक्षिप १६ ६ **वपतु**=स्थापयतु ३५ ५ **वपते**=बीजानि सन्तनुते १ १६४ ४४ **वपन्त**=वपन्ति ७ ५६ ३ **वपन्ति**=बोते हैं स० वि० १३६, अथर्व० १४ २ ३८ **वपन्तु**=छिन्दन्तु १६ ५२ विस्तारयन्तु २ ३३ ११ **वप**=सन्तनुहि ४ १६ १३. **वपामि**=विस्तारयामि १ २१ [डुवप् बीजसन्ताने (भ्वा०) धातोर्लोट् । अन्यत्र लट् चापि]

वपन्ता वपन्तौ (अश्विना=सभासेनाधीशौ) १ ११७ २१ [डुवप् बीजसन्ताने (भ्वा०) धातो शतृ । ततो द्विवचनस्याकारादेश वपन्ता निवपन्तौ नि० ६ २६]

वपस् यो वपनि क्षेत्राणि कृपीवल इव विद्यादिशुभान् गुणास्तम् (अहिंमक जनम्) ३० ७. [डुवप् बीजसन्ताने (भ्वा०) धातो कर्त्तरि पचाद्यच्]

वपाम् वपन्ति यस्या भूमौ ताम् ३५ २० वपनम् १२ १०३ **वपायाः**=वर्द्धिकाया रीत्या २१.४१ बीजतन्तुसन्तानिकाया क्रियाया बीजवर्द्धिकाया क्रियाया वा २१ ४१ **वपाः**=वपन्ति याभि क्रियाभिस्ता. २१ ३१. [डुवप् बीजसन्ताने (भ्वा०) धातोर्घञर्थे क । तत स्त्रिया टाप् । शुक्ला वपा ऐ० २ १४ आत्मा वपा कौ० १०.५ यजमानदेवत्या वै वपा तै० ३.९ १०.१. हुत्वा वपामेवाग्रे ऽभिघारयति श० ३ ८.२.२४ प्रात पशुमालभन्ते तस्य वपया प्रचरन्ति ता० ५ १० ६]

वपावन्तम् विद्याबीज विस्तारयन्तम् (विद्यार्थिजनम्) ५ ४३ ७ बहूनि वपनाधिकरणानि विद्यन्ते यस्मिँस्तम् (अग्नि=विद्यादिरूपम्) ६ १ ३ **वपावान्**=वपन्ति यया क्रियया सा वपा सा प्रशस्ता विद्यते यस्य स (विद्वज्जन) २० ३७ [वपेति व्याख्यातम् तत प्रशसायामर्थे भूम्न्यर्थे वा मतुवन्ताद् द्वितीयैकवचनम्]

वपुर्भिः स्वाऽऽकृत्यादिभि शरीरै १ ६२ ८ **वपुषः**=सुरूपस्य १ ११८ ५ **वपुषाम्**=रूपवता शरीराणाम् ४ ७ ६ **वपुषे**=शरीरधारणपोषणाऽग्निरूपप्रकाशाय १ ६४.४ रूपाय १ १४८ १ शरीरहिताय ३० १४ **वपुः**=सुरूप शरीरम् ६ ४४ ८ शरीरमुदक वा १६ ८३ **वपूंषि**=रूपवन्ति शरीराणि ३ १ ८ रूपाणि ४ २३ ६ [डुवप् बीजसन्ताने (भ्वा०) धातो 'अर्त्तिपृवपियजि०' उ० २ ११७ सूत्रेण उसि । वपु उदकनाम निघ० १ १२ रूपनाम निघ० ३ ७ वपुर्हि पशव ऐ० ५ ६]

वपुषाय वपूंषि रूपाणि विद्यन्ते यस्मिँस्तस्मै व्यवहाराय, प्र०—अत्र 'अर्श आदिभ्योऽच्' इति वेद्यम् ३ २ १५. [वपुष्प्राति० मत्वर्थे 'अर्श आदिभ्योऽच्' इत्यच्]

वपुष्टरा अतिशयेन रूपलावण्ययुक्तौ (स्त्रीपुरुषौ) २ ३ ७ [वपुष्प्राति० अतिशायने तरप् । ततो द्विवचनस्याकारश्छान्दसः]

वपुष्यन् आत्मनो वपू रूपमिच्छन् (विद्वज्जन) ३ १ ४ [वपुष्पदा॰त्मन इच्छाया क्यजन्ताच्छतृ]

वपुष्यः वपुष्षु रूपेषु भव (अग्नि=राजा) ४ १ ८ वपुषि सुन्दरे रूपे भव (अतिथि) ५ १ ६ वपुष्षु साधु (अग्नि=विद्वज्जन) ४ ११ १२ [वपुष् इति व्याख्यातम् । ततो भवार्थे साध्वर्थे वा यत्]

वपुष्या वपुषि भवानि (सुरूपाणि यानानि) १ १८३ २ [वपुष्य इति व्याख्यातम् । ततश्शेर्लोपश्छन्दसि]

वपुष्ये वपुषि रूपे भवे (भूमिसूर्यौ) १ १६० २ [वपुष्प्राति० भवार्थे यत् । ततो द्विवचने रूपम्]

वप्ससः सुरूपस्य (विद्वज्जनस्य) १ १८१ ८ [वप्स=रूपनाम निघ० ३ ७]

वभ्रः उद्गलितोदान (प्राणवायु) ११ ७४ [वभ्र

काय (जनाय) २.१३ १२. प्राप्तव्याय मुखाय ४ १६ ६.
वय्येव पदसाधिका नलिकेव २ ३ ६ [वय्या-इवपदयो. समास]

वरत् वृणुयात् ६ ४५ २४. **वरते**=स्वीकरोति ४ ४२ ६ **वरथः**=स्वीकुरुथ ५ ३१ ६ **वरन्त**=वारयन्ति ३ ३२ ६ वृण्वन्तु, प्र०—अत्र विकरणव्यत्ययेन शप् १ १२१ १५ निवारयन्ति ४ ६ ६. वरयन्ति २ २४ ५. स्वीकुर्यु १ १४० १३ **वरन्ते**=स्वीकुर्वन्ति ४ ३२ ८ **वराते**=वृणुयाताम् ५ ३२ ६ वृणुते १ ६५ ३ [वृञ् वरणे (स्वा०) धातोर्लेट् । व्यत्ययेन शप् । अन्यत्र लट् लङ् चापि वरन्ते=वारयन्ति नि० १० २६]

वरत्राः रज्जुमय ४ ५७ ४. [वृञ् वरणे (स्वा०) धातो. 'वृञश्चित्' उ० ३ १०७ सूत्रेणात्रन्]

वरम् अतिश्रेष्ठम् (सूरि=युद्धविद्याकुशल जनम्) १.११६ ३. परमोत्तम विज्ञानधनम् १ ४ ४ वरणीय बन्धुसमुदायम् २ ५ ५ रत्नादिकम् १ १४० १३ **वराय**=स्वीकरणाय १ १४३ ५ श्रैष्ठ्याय १ ७६ १ श्रेष्ठत्वाय ७ ५६.२ [वृञ् वरणे (स्वा०) धातोरच् । अथवा वृणोतेः 'ग्रहवृदृनिश्चिगमश्च' अ० ३ ३ ५८ सूत्रेण घञोपवादोऽप् । वरो वरयितव्यो भवति नि० १ ७ वर इव वै स्वर्गो लोक जै० २ ६६ वरो न प्रतिगृह्य तै० म० ७ १ ६ ५ सर्वं वै वर श० २.२.१ ४]

वरशिखस्य वरा श्रेष्ठा शिखा यस्य तस्य (सूर्य इव राज्ञ) ६ २७ ४ वरा शिखा यस्य तद्वत् मेघस्य ६ २७.५ [वरा-शिखापदयो समास]

वरसत् यो वरेषूत्तमेषु पदार्थेषु सीदति स (परमेश्वर) १० २४ यो वरेषु श्रेष्ठेषु सीदति स (जीवात्मा) ४ ४० ५. य उत्तमेषु विद्वत्सु सीदति स (ईश्वरो जीवो वा) १२ १४ [वरोपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप् । एष (सूर्य) वै वरसद् वर वा एतत् सद्मना यस्मिन्नेष आसन्नस्तपति ऐ० ४ २०]

वरस्या अतिशयेन वरौ (भा०—स्त्रीपुरुषौ) ५ ७३ २. [वरपदाद् इच्छायामर्थे क्यच्प्रत्ययान्तात् कर्त्तर्यच् । ततो द्विवचनस्याकार । क्यचि च 'सुग् वक्तव्य ' अ० ७ १ ५१ वा०सूत्रेण सुगागम]

वरस्याम् स्वीकर्त्तव्या प्रशसाम् ६ ४६ ११ [वरस्येति पूर्वपदे व्याख्यातम् । तत स्त्रियाम् । 'अ प्रत्ययादि' त्यकार । ततष्टाप्]

वरा श्रेष्ठ तुल्य गुण कर्म स्वभाव वाले (स्त्रीपुरुष) स० वि० १३७, अथर्व० १४.१ ६ श्रेष्ठौ श्रोतृश्रावकौ ५ ४४.१२. [वरप्राति० 'सुपा सुलुक्०' इति द्विवचनस्याकारादेश]

वरा इव यथा प्रशस्तविद्याधर्मकर्मस्वभावा (विद्वांसो जना.) १.८३.२ वरैस्तुल्या (मनुष्या) ५ ६०.४ [वरा-इवपदयो. समास]

वराहम् मेघम् १ ६१.७. [वराहो मेघो भवति वराहार , 'वरमाहारमाहार्षी ' इति च ब्राह्मणम् नि० ५.४ अङ्गिरसोऽपि वराहा उच्यन्ते नि० ५.४ वराह मेघनाम निघ० १ १०. पशूना वा एष मन्युर्यद् वराह तै० १.७ ६ ४ ता (पृथिवी प्रजापति) वराहो भूत्वाऽहरन् तै० म० ७ १. ५ १ अग्नौ ह वै देवा घृतकुम्भ प्रवेशयाचक्रुस्ततो वराह सम्बभूव श० ५ ४ ३ १६ आण्डाभ्या वराहौ (अजायेताम्) जै० २.२६७]

वराहुम् वराणा धर्म्याणा व्यवहाराणा धार्मिकाणा जनानाञ्च हन्तार दस्यु शत्रुम् १ १२१ ११. **वराहून्**=वरमाह्वयत शब्दायमानान् (रथान्) १ ८८ ५ [वरोपपदे हन हिंसागत्यो (अदा०) धातो 'कुप्रकरणे मितद्र्वादिभ्य उपसख्यानम्' अ० ३ २ १८० वा०सूत्रेण डु । वरोपपदे ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्वा डु । अथाप्येते माध्यमिका देवगणा वराहव उच्यन्ते नि० ५ ४]

वरांसि वरणीयानि धर्म्याणि कर्माणि ४ २१ ८ वराणि (कर्म्माणि) १ १६० २ उत्तमानि वस्तूनि ६ ६२.१. [वृञ् वरणे (स्वा०) धातोरसुन् । वरस्प्राति० प्रथमा-बहुवचने रूपम्]

वरिमता बहुस्थूलत्वेन सह १ १०८ २ [उरु बहुनाम निघ० ३ १ ततो भाव इमनिच्-प्रत्यये वरादेशे च छान्दस रूपम्]

वरिमन् बहुगुणयुक्त (विद्वज्जन) ४ ५४-४ अतिशयेन श्रेष्ठे (सुम्ने=सुखे) ६ ६३ ११ बहुशीलसत्ययुक्तम् (व्रत=स्वीकृतक्षमादिगुणम्) ३ ५६ ३ **वरिमा**=वरस्य श्रेष्ठस्य भाव. १८.४ **वरिम्णा**=श्रेष्ठगुणसमूहेन ३ ५ बहोर्भावेन १५ ११ अतिशयेनोरुर्वहुस्तेन व्यापकत्वेन १३ २. महापुरुषार्थेन १५ १० [उरु बहुनाम (निघ० ३ १) उरुप्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' अ० ५ १ १२२. सूत्रेणेमनिच् । ततश्च 'प्रियस्थिर०' इत्यादिना वर्-आदेश]

वरिवस्यन् सेवमान (इन्द्र.=विद्वान् राजा) ६ २०.११ **वरिवस्यन्तः**=परिचरन्त (मरुत =उत्तम-

वयाकिनम् व्यापिनम् (विद्वज्जनम्) ५ ४४ ५ [वी गतिव्यप्तिप्रजनादिषु (अदा०) धातोर्बाहु० औणा० आकिन् प्रत्यय]

वयाम् वयसामवस्थावता प्राणिनाम्, प्र०—अत्रा-ऽऽमि टिलोपश्छान्दस ३४ ४८ व्यापिका सुखनीतिम् १५ २४ शाखाम् ५ १ १ **वयाः**=शाखा २ ३५ प्रापक (रुद्र = शूरवीरजन) ७ ४०.५ पक्षिण ६ १३ १ [वयस् इति व्याख्यातम् । तत आमि टिलोपश्छान्दस. । वया. शाखा वेतेर्वातायना भवन्ति नि० १ ४]

वयावन्तम् वहुपदार्थयुक्तम् (क्षय=गृहम्) ६ २ ५

वयिष्यन् व्यय करिष्यन् (वसिष्ठ =पूर्णविद्वज्जन) ७ ३३ १२ [वय गतौ (भ्वा०) धातोर्लृट शतृ । व्यत्ययेन परस्मैपदम्]

वयुनम् कर्म्म प्रज्ञान वा ५ ४८ २ प्रज्ञाम् ३ ३ ४ **वयुनानि**=विज्ञानानि, भा०—विद्या २९ ५१ ज्ञानानि ६ ७५ १४ प्रशस्तानि कर्माणि प्रज्ञाश्च ५ ३६. प्रज्ञान और उत्तम कर्म स० वि० ७, ४० १६ **वयुनेषु**=पृथिवी-मारभ्य परमेश्वरपर्यन्ताना विज्ञानेषु ६_७ ५ प्रज्ञापनेषु २ ३४ ४ [अज गतिक्षेपणयो (भ्वा०) धातो 'अजियमि-शीङ्भ्यश्च' उ० ३ ६१ सूत्रेण उनन् । 'अजेर्व्यघञपो ' अ० २ ४ ५६ सूत्रेणाजेर्वीत्ययमादेश । वयुनम्=प्रशस्यनाम निघ० ३ ८ प्रज्ञानाम निघ० ३ ९ पदनाम निघ० ४ २. वयुन वेते कान्तिर्वा प्रज्ञा वा नि० ५ १५ वयुनानि प्रज्ञा-नानि नि० ८ २०]

वयुनवत् प्रज्ञावत् ६ २१ ३ [वयुनमिति व्याख्यातम् । ततो मतुप्]

वयुनशः प्रज्ञानेन ६ ५२ १२ [वयुनप्राति० 'वह्वल्पार्था-च्छस्०' अ० ५ ४ ४२ सूत्रेण शस्]

वयुना प्रज्ञानानि कर्माणि वा १ १६२ १८ वयुनानि प्रशस्यानि कमनीयानि वा कर्म्माणि १ ९२ ६ [वयुनप्राति० शेर्लोपश्छन्दसि]

वयुनावत् प्रज्ञानवत् ४ ५१ १ [वयुनप्राति० मतुप् । सहिताया दीर्घ । वयुनावत् प्रज्ञानवत् नि० ५ १५]

वयुनावित् यो वयुनानि प्रज्ञानानि वेत्ति स , भा०— सर्वज्ञ. (अ०—जगदीश्वर) ३७ २ यो वयुनानि प्रशस्तानि कर्म्माणि वेत्ति स '(योगिजन), प्र०—वयुनमिति प्रशस्य-नामसु पठितम् निघ० ३ ८ अत्र 'अन्येषामपि दृश्यते' इति दीर्घ ५ १४ सर्वेषा जीवाना शुभाऽशुभानि यानि प्रज्ञानानि प्रजाश्च तानि यो वेद स (परमेश्वर) ऋ० भू० १५६ [वयुनोपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप् । 'अन्येषामपि दृश्यते' इति दीर्घ । वयुनाविदित्येष (प्रजा-पति) हीद वयुनमविन्दत् श० ६ ३ १.१६]

वयोधसम् चिरायुर्धारकम् (इन्द्र=राजानम्) २८.३१. चिरञ्जीविनम् (इन्द्रम्) २८.४२ प्राणधारिणम् (इन्द्र= जीवम्) २८ ३९ आयुषो धर्त्तारम् (इन्द्रम्) २८.४५ वहु-वयो धारकम् (इन्द्र=राजानम्) २८ ४४ जीवनधारकम् (इन्द्रम्) २८ ४१ कमनीयसुखधारकम् (इन्द्र=परमैश्वर्यम्) २८ ३० वयोवर्धकम् (इन्द्र=सूर्यम्) २८ ३५ कमनीयाना विद्यावोधादीना धातारम् (इन्द्र=विद्वज्जनम्) २८ २८ कामनाधारकम् (इन्द्र=परमैश्वर्यम्) २८ २९ त्रय कर्मो-पासनाज्ञानानि वत्सा इव यस्य तम् (जीवस्वरूपम्) २८ २७ **वयोधसा**=वयो जीवन दधाति येन तेन (आधीतेन= अध्ययनेन) १५ ७ **वयोधाः**=यो वय प्रजनन दधाति स (मनुष्य) २ ३ ९ यो वय कमनीयमायुर्दधाति स (वैद्य) ५ ४३ १३ अ०—जितेन्द्रियत्वेन जीवनवर्धयिता (अग्नि = पावक इव सेनापति) १५ ५२ यो वयो जीवन कमनीय वस्तु दधाति स (इन्द्र =ईश्वर) ४ १७.१७ य कमनी-यानि वयासि जीवनधनादीनि दधाति स (अग्नि =विद्युदिव राजा) ४ ३ १० [वयस् इति व्याख्यातम् । तदुपपदे डुधाञ् धारणपोषणयो (जु०) धातो 'वयसि धाञ ' उ० ४ २२९ सूत्रेण असि । वयोधा इति श्रोत्रम् तै० स० ५ ३ ६ २]

वयोनाधैः वयासि विज्ञानानि नह्यन्ति यैर्विद्वद्भि, वेदादिशास्त्रप्रज्ञापनप्रवन्धकै (देवै =विद्वद्भि), वयासि जीवनादीनि गायत्र्यादिछन्दासि वा नह्यन्ति यै प्राणैस्तै , पूर्णविद्याविज्ञानप्रचारप्रवन्धकै (देवै), ये वय कामयमान जीवन नह्यन्ति तै (देवै) १४ ७ [वयस् इति व्याख्या-तम् । तदुपपदे णह वन्धने (दिवा०) धातो 'कर्मण्यण्' इत्यण् 'नहो ध ' इति हस्य ध]

वयोवयः कमनीय जीवन जीवनम् ५ १५.४ [वयस्-पदस्य वीप्साया द्विर्वचनम्]

वयोवृधः ये वयसा वर्धन्ते, वयो वर्धयन्ति वा (विद्वज्जना) ५ ५४ २ [वयस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

वयोवृधा ये वय कमनीय जीवन वर्धयनस्ते (रात्रि-दिने) ५ ५ ६ [वयस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप् । ततो द्विवचनस्याकारश्छान्दसम्]

वय्यम् यो वयते जानाति तम् (विद्वज्जनम्), प्र०— अत्र वयधातोर्बाहुलकादौणादिको यत्प्रत्यय १ ५४ ६ ज्ञाता-रम् (विद्वास जनम्) १ ११२ ६ **वय्याय**=तन्तुसन्तान-

३.३१. आह्लादकस्य जलचन्द्रादे १ ११५ १. वरस्य (परमेश्वरस्य विदुषो वा) १ ६१ ३ सर्वोत्कृष्टस्य (राज्ञ) १७.४१. सर्वेभ्यो वरस्य श्रेष्ठस्य जगदीश्वरस्य ३४ ४५ वरेषु श्रेष्ठेषु कर्मसु गुणेषु वर्त्तमानस्य (ईश्वरस्य) प० वि० मेघस्य, प्र०—वरुण इति पदनाम निघ० ५ ६, २ २८ ४ वीरगुणोपेतस्य (राज्ञ) ८ २३. उदानस्येव बलवतो रोगस्य ६ ७४ ४ सूर्यस्य वायोर्वा ६ ७० १ दु खेनाच्छादकस्य तिरस्कर्त्तु (सभाध्यक्षस्य राज्ञ) ५ ३६ वरितु प्राप्तु योग्यस्य श्रेष्ठस्य जगत वरपदार्थसमूहस्य उत्कृष्टगुणसमूहस्य, वायो, प्र०—अनेन ज्ञानप्राप्तिर्गमधातोरर्थस्य ग्रहणम् ४ ३६ वरस्य प्राप्तव्यस्य सुखस्य १३ ५० सम्बन्धस्योत्तमस्य (कृष्टे =मनुष्यस्य) ४ ४२ २ उत्कृष्ट व्यवहार के स० वि० १२२ अथर्व० १४ १.५७ अग्नेर्विद्युतो वा ७ ४२ **वरुणः**=जल वायुश्चन्द्रो वा १ १७ ५ बाह्याऽभ्यन्तरस्थो वायु १ २३ ६ श्रेष्ठतम उत्तमव्यवहारहेतुर्वा (राजा=परमेश्वर सूर्यो वा) १ २४ १३ उदान इव श्रेष्ठ (इन्द्र =राजा) २५ २४ शमादिगुणान्वित (महाविद्वज्जन) ६ ६२ ६ आप २ ३८ ६ वरणीय (विद्वज्जन) ५ ६८ २ दुष्टाना बन्धकृच्छ्रेष्ठ (राजा) ५ ३ १ सर्वोत्तमोऽधिपति परमेश्वर प० वि०। जलाधिपति (राजपुरुष) ७ ५६ २५ जलमिव शान्तिप्रद (दार) ७ ४० ७ वरो विद्वान् ७ ३८ ४ वरस्वभाव (राजा) १० २८ धर्माचरणेन श्रेष्ठ (मित्र =सर्वस्य सुहृज्जन) ६.३६ पुरुषोत्तम (सम्राट्) १० २७ जलसमूह ८ ५६ श्रेष्ठाचार (ऋभुक्षा =महाविद्वज्जन) ५ ४१ २ सर्वोत्कृष्ट स्वीकरणीय, परमोत्तम (ईश्वर) आर्याभि० ११ ऋ० १ ६ १८ ६ वरगुणाढ्योऽर्थ १४ २० सर्वोत्तमप्रबन्धकर्ता (जगदीश्वर) ४ ४२ २ विविधपाशै शत्रूणा बन्धक (राजा) १ २५ १३ सकलविद्यासु वर (मनुष्य) १ २६ ४ चन्द्रसमुद्रतारकादिसमूह १ ४० ५ उत्तमगुणयोगेन श्रेष्ठत्वात् सर्वाध्यक्षत्वार्ह (भा०—सभासेनाध्यक्ष) १,४१ १ वरो जीव २ ३८.८. वरगुणप्रद वर, सर्वोत्तम, प्रशस्तविद्योऽनूचानो विद्वानध्यापक, सत्योपदेष्टाऽऽप्ता ७.४७ जल यस्याऽवयव. स (मेघ) २६ १ य सर्वान् शिष्टान् मुमुक्षून् धर्मात्मनो वृणोति, अथवा य शिष्टैर्मुमुक्षुभिर्धर्मात्मभिर्व्रियते वर्य्यते वा स वरुण परमेश्वर, जो आत्मयोगी, विद्वान्, मुक्ति की इच्छा करने वाले, मुक्त और धर्मात्माओ से ग्रहण किया जाता है, वह ईश्वर, अथवा 'वरुणो नाम वर श्रेष्ठ' जिसलिए परमेश्वर सबसे श्रेष्ठ, सर्वोत्तम है इसलिए उसका नाम वरुण है, प्र०—वृञ् वरणे, वर ईप्सायाम् इन धातुओ से औणादिक उनन्-प्रत्यय होने से वरुण शब्द सिद्ध होता है स० प्र० २०, ३६ ६ **वरुणाय**=समुद्रादिषु गमनाय ३६ २ उत्तमाय व्यवहाराय ५ ६६ १ प्रशस्तैश्वर्याय ८ २३ **वरुणे**=स्वीकर्त्तव्ये जने ३३ १७ **वरुणेन**=वरेण पुरुषार्थेन ४ ३४.७. [वृञ् वरणे (स्वा०) धातो 'कृवृदारिभ्य उनन्' उ० ३ ५३ सूत्रेण उनन्। वरुणो वृणोतीति सत नि० १० ३ वरुण पदनाम निघ० ५ ४ (आप) यच्च वृत्वाऽतिष्ठस्तद्वरुणोऽभवत्त वा एत वरण सन्त वरुण इत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विष गो० पू० १.७ वरुणो वै जुम्बक (यजु० २५ ६) श० १३ ३ ६५ तै० ३.६.१५ ३ रात्रिर्वरुण ऐ० ४ १० ता० २५.१० १० वारुणी रात्रि तै० १ ७ १०.१. य प्राण स वरुण गो० उ० ४ ११ यो वै वरुण सोऽग्नि श० ५ २ ४ १३. यो वा ऽग्नि स वरुणस्तदप्येतद् ऋषिणोक्त त्वमग्ने वरुणो जायसे यदिति ऐ० ६ २६ अथ यत्रैतत् प्रदीप्ततरो भवति तर्हि हैष (अग्नि) भवति वरुण श० २ ३ २ १० स यदग्निर्घोरसस्पर्शस्तदस्य वारुण रूपम् ऐ० ३ ४ वरुण्यो वाऽएष योऽग्निना शृतोऽथैष मित्रो य ऊष्मणा शृत श० ५ ३ २.८ य (अर्द्धमास) अपक्षीयते स वरुण ता० २५ १० १० य. (अर्द्धमास) एवापूर्यते स वरुण श० २ ४.४ १८ क्लोमा वरुण श० १२ ६.१ १५ श्रीर्वै वरुण कौ० १८ ६ वरुण (श्रिय) साम्राज्यम् (आदत्त) श० ११ ४ ३ ३ द्यावापृथिवी वै मित्रावरुणयो प्रिय धाम ता० १४ २.४ अय वै (पृथिवी) लोको मित्रोऽसौ (द्युलोक) वरुण श० १२ ६ २ १२ व्यानो वरुण श० १२ ६ १.१६ अपानो वरुण श० ८ ४ २ ६. योनिरेव वरुण श० १२.६ १ १७ वरुणो दक्ष श० ४.१ ४ १ वरुण एव सविता जै० उ० ४.२७ ३ स वा एषो (सूर्य) ऽप प्रविश्य वरुणो भवति कौ० १८ ६. वरुण आदित्यै (उदक्रामत्) ऐ० १.२४ वरुण आदित्यै (व्यद्रवत्) श० ३ ४ २ १ सवत्सरो वरुण श० ४ ४ ५ १८ सवत्सरो हि वरुण श० ४.१ ४.१० क्षत्र वरुण श० ४ १ ४ १ गो० उ० ६ ७ क्षत्र वै वरुण श० २ ५.२ ६ कौ० ७ १० क्षत्रस्य राजा वरुणोऽधिराज तै० ३ १ २ ७ इन्द्र उ वै वरुण स उ वै पयोभाजन कौ० ५ ४ इन्द्रो वै वरुण स उ वै पयोभाजन गो० उ० १ २२ तद् यदेवात्र पयस्तन्मित्रस्य सोम एव वरुणस्य श० ४ १ ४ ६ वारुण यवमय चरु निर्वपति तै० १ ७ २ ६ वारुणो यवमयश्चरु श० ५ २ ४.११. वरुण्यो ह वा ऽअग्रे यव श० २ ५ २.१ वरुण्यो यव श० ४ २ १ ११ निर्वरुणत्वाय एव यवा ता० १८ ६.१७

राजजना) ७ ५६ १७. [वरिवस्प्राति० परिचर्यायामर्थे 'नमोवरिवश्चित्रङ क्यच्' अ० ३ १ १९ सूत्रेण क्यच् । तत शतृ]

वरिवस्यन्तु सेवन्ताम् ६ ५२ १५ परिचरन्तु १ १२२ ३ [वरिवस्प्राति० परिचर्याया क्यच् ततो लोट्]

वरिवस्या वरिवसि परिचर्याया भवानि सेवनकर्माणि १ १८१ १ [वरिवस्प्राति० भवार्थे यत् । तत शेर्लोप-श्छन्दसि]

वरिवः विद्वत्परिचरणम् १५ ५ सुखकारक सेवनम् ७ ४४ सत्यसेवनम् १५ ४. भृश रक्षणम् ५ ३७ चक्रवर्त्ती राज्य और साम्राज्य धन को आर्याभि० १ ४३ [वरिव धननाम । निघ० २ १०]

वरिवोदाः सत्यधर्मविद्वत्सेवाप्रापिका हेतय = शस्त्रास्त्रोन्नतय) १७ १५ [वरिवस् इत्युपपदे डुदाञ् दाने (जु०) धातो क । तत स्त्रिया टाप्]

वरिवोधाम् वरिव परिचरण सुखसेवन दधाति येन तम् (रथ=यानम्) १.११९ १ [वरिवस् उपपदे डुधाञ् धारणपोषणयो (जु०) धातो करणे क्विप्]

वरिवोवित् परिचरणवेत्ता (विद्वज्जन) २६ १७ **वरिवोविदम्**=येन वरिव परिचरण विन्दति तम् (रयिं=धनम्) २० ८३ वरिव सेवन विन्दति येन तम् (रयिम्) २.४१ ९ **वरिवोविदः**=ये वरिव परिचरण विन्दन्ति जानन्ति यद्वा वरिवो धन वेदयन्ति प्रापयन्ति ते (भा०—समर्था विद्वासो जना) ३३.९४ **वरिवोविदा**—परिचरण विन्दति प्राप्नोति येन तेन पराक्रमेण १ १७५ ५ [वरिवस् उपपदे विद् ज्ञाने (अदा०) धातो क्विप् कर्त्तरि। विद्लृ लाभे (तुदा०) धातोर्वा क्विप्]

वरिवोवित्तरा याऽतिशयेन परिचरणलब्ध्री (सुमति =शोभना प्रज्ञा) ३३ ६८ वरिव सेवन विद्वद्वन्दन वा यया सुमत्या साऽतिशयिता ६ १०७.१ वरिव' सत्य व्यवहार वेत्त्यनया साऽतिशयिता (सुमति) ८ ४ [वरिवो-विदिति व्याख्यातम् । ततोऽतिशायने तरबन्ताट् टाप्]

वरिष्ठम् अतिश्रेष्ठम् (वज्र =शस्त्रविशेषम्) ५ ४८ ३ **वरिष्ठः**=अतिशयेन वरिता (इन्द्र =राजा) ६ ३७ ४ **वरिष्ठे**=अतिशयेन वरे (बन्धुरे=प्रेमबन्धने) ६ ४७ ९ [वरप्राति० अतिशायन इष्ठन् । वृञ् वरणे (स्वा०) धातोस्तृजन्तादतिशायन इष्ठनि तृचो लोप । वरिष्ठ वर्षिष्ठम् । नि० ५ १]

वरिष्ठया अतिशयेन स्वीकर्त्तव्यया (सुमत्या) ५.२५ ३. **वरिष्ठा**=अतिशयेनोत्तमा (काकुत्=सुशिक्षिता वाक्) ६ ४१ २ **वरिष्ठाम्**=अतिशयेन वरा गतिम् ११ १२ [वरिष्ठमिति व्याख्यातम् । तत स्त्रिया टाप् । इय (पृथिवी) वै वरिष्ठा सवत् । श० ६ ३ २ २]

वरीमन् अतिशयेन वरे (सुखे) ६ ६३ ३ [वृञ् वरणे (स्वा०) धातोर्बाहु० औणा० ईमनिन्]

वरीमभिः वृण्वन्ति ये तै. शिल्पिभि १ ५५ २ स्वीकर्त्तुमर्हैं (गुणै) १ १५९ २. वरणीयै (ऐश्वर्यै) १ १३१ १ [वृञ् वरणे (स्वा०) धातोर्बाहु० औणा० ईमनिन्]

वरीयसी अतिशयेन वरा (गातु =भूमि) १ १३६ २ [वरप्राति० अतिशायन ईयसुन् । तत स्त्रिया ङीप्]

वरीयः अतिशयेन वरणीय वरम् (स्योन=सुखम्) २९ २९ अत्युत्तम धनादिकम् ५ ४९ ५ अतिशयित बह्वैश्वर्य्यम् १७ ४९ अतिशयेन बहु (अन्तरिक्षम्=आकाशम्) २ १२ २ [वरप्राति० अतिशायन ईयसुन् । बहु-वाचिन उरुशब्दाद्वातिशायन ईयसुन् । प्राति० वरादेश । वरीयः वरतरम् उरुतर वा नि० ८ ९]

वरीवर्त्ति समन्ताद् भृशमावृणोति समन्ताद्वर्त्तते वा ३७ १७ [वृञ् वरणे (स्वा०) धातोर्यङ्लुगन्ताल्लट्]

वरीवृजत् भृश वर्जय ७ २४ ४ [वृजी वर्जने (अदा०) धातो शतरि 'दार्धर्त्तिदर्धर्त्ति०' अ० ७ ४ ६५ सूत्रेण श्लौ रीगागमोऽभ्यासस्य निपात्यते]

वरुण सर्वोत्कृष्ट जगदीश्वर १ ५० ६ शत्रुच्छेदक उत्कृष्टसेनापते १० १६. वरतम (राजन्) २.२७ १० प्रशस्त (राजन्) ६ २२ न्यायकारिन् (राजन्) ६.२[illegible] उत्तमकर्मकारिन् (मित्र) ५ ६९ २ उदान इवोत्तम विद्वन् (जन) ३३ ४६ अतिश्रेष्ठ (विद्वज्जन) ३३ ४८ अत्युत्तम (अ०—विद्वज्जन) २१ २. वायुरिव वर्त्तमान (सत्पुरुष) २ २८ ७ शत्रूणा बन्धक (भा०—धार्मिक जन) १२ १२ वरप्रापक (विद्वज्जन) २० १८ श्रेष्ठ सचिव ४ ४१ ६ **वरुणम्**=वहि स्थ प्राण शरीरस्थमपान वा १ २ ७ ऊर्ध्वगमनबलहेतुमुदान वायुम् १ २३ ४ ईप्सितव्यम् (अर्यमण=न्यायेशम्) ६ ५१ ३ जलमिव शान्त्यादिगुणम् (राजपुरुषम्) ४ ३९ ४ श्रेष्ठगुणम् (मित्र=सखायम्) ४ २ ४ क्रियाहेतुमुदान वरगुणयुक्त विद्वास वा १ १०६ १ **वरुणयोः**=उदान इव वर्त्तमानयो (अध्यापकाध्येत्रो) ६ ५१ १ **वरुणस्य**=वायोर्जलस्य वा, प्र०—वरुण इति पदनामसु पठितम् निघ० ५ ४. अनेन प्राप्तिसाधनो गृह्यते

वृतम् श० ६ ५ ४ ६]

वरूथम् गृहम् ७ ३० ४ स्वीकर्त्तुमर्हम् (पदार्थम्) १ १८९ ६ प्रशस्त गृहम् ७ ३२ ७ वरणीयमुत्तमम् (कर्म्म) १ ११६ ११ वर श्रेष्ठम् (भेपज=रोगनाशक-व्यवहारम्) प्र०—अत्र 'जॄवृभ्यामूथन्' उ० २.६ अनेन वृन्-धातोरूथन् प्रत्यय १ २३ २१ वर्त्तुमर्ह गृहम् ५ ३५ [वृञ् वरणे (स्वा०) धातो 'जॄवृञ्भ्यामूथन्' उ० २ ६ सूत्रेण ऊथन्। वरूथम्=गृहनाम निघ० ३ ४]

वरूथिने प्रशस्तानि वरूथानि गृहाणि विद्यन्ते यस्य तस्मै (जनाय) १६ ३५ [वरूथप्राति० प्रशसाया मत्वर्थे इनि । ततश्चतुर्थी । वरूथमिति व्याख्यातम्]

वरूथ्यम् वरूथे गृहे भवम् (छर्दि) ६ ६७ २ गृहेषु साधु (शर्म=गृहम्) ५ ४६ ५ [वरूथमिति व्याख्यातम्। ततो भवार्थे साध्वर्थे वा यत्]

वरूथ्य उत्तमेषु गृहेषु भव (राजा) ५ २४ १२ वर (विद्वान्) १५ ४८ यो वरूथ्येषु श्रेष्ठेषु गुणकर्मस्वभावेषु भव. (अग्नि=सर्वाभिरक्षकेश्वर:) ३ २५ वरूथ्येषु गृहेषु साधु (अग्नि=वेदविदध्यापकोपदेशक) २५ ४७ [पूर्वपदे व्याख्यातम्]

वरेण्यम् अतिश्रेष्ठम् (भर्ग=सकलदोषनाशक परमात्मस्वरूपम्) प्र०—अत्र 'वृञ एण्य' उ० ३ ९८ अनेन वृञ्-धातोरेण्य प्रत्यय ३ ३५ वर्त्तुमर्हमत्युत्तमम् (भर्ग शुद्धस्वरूपम्) ३० २ स्वीकर्त्तव्यम् (भर्ग=सर्वदु खप्रणाशक तेज स्वरूपम्) ३६ ३ अतिशयेन वर्त्तव्यम् (गृहपतिम्) ५ ८ १ सर्वेभ्य उत्कृष्ट प्राप्तु योग्यम् (भर्ग=दु खमूल-भर्जक-परमात्मस्वरूपम्) ३ ६२ १० स्वीकर्त्तुमर्हम् (वसु=द्रव्यम्) ६ १६ ३३ प्रशस्तगुणकर्मस्वभावकारकम् (रयिम्) १.७९ ८ स्वीकार करने योग्य, अतिश्रेष्ठ (भर्ग=शुद्धस्वरूप) स० प्र० ५१, ३६ ३ अतीवोत्तमम् (अव=रक्षणादिक कर्म्म) ५ ३५ ३ यद्वर वर्त्तुमर्हमतिश्रेष्ठम् (भर्ग=परमात्मस्वरूपम्) प० वि० । वरितु स्वीकर्त्तुमर्हम् (सुत=पुत्र विद्यार्थिन वा) ३ १२ १ स्वीकर्त्तु भोक्तुमर्हम् (सोम=महौषधिविशिष्टमन्नम्) ३ ४० ५. वरीतुमर्ह श्रेष्ठम् (शेव=सुखस्वरूप जीवम्) १ ५८ ६ अतिश्रेष्ठ, ग्रहण और ध्यान करने योग्य (भर्ग=परमात्मस्वरूप) स० वि० ७५, ३६ ३ **वरेण्य:**=वर्त्तु स्वीकर्त्तुमर्ह (ओपविसार) १ १७५ २ वरणीयो जन २१ १२ वरितुमर्होऽतिश्रेष्ठ (विद्वज्जन) ३ २७ ६ सर्वत उत्कृष्टतम (परमेश्वर) १.२५ ३ स्वीकर्त्तु योग्य (विश्पति=सभापती राजा) १ २६ ७. [वृञ् वरणे (स्वा०) धातो 'वृञ एण्य' उ० ३ ९८ सूत्रेण एण्य. वरेण्य=वरणीय नि० १२.१३. अग्निर्वै वरेण्यम् जै० उ० ४ २८ १ आपो वै वरेण्यम् जै० उ० ४ २८ १ चन्द्रमा वै वरेण्यम् जै० उ० ४ २८ १]

वर्क् वर्जयसि, प्र०—अत्र 'मन्त्रे घसह्वर०' इति च्लेर्लुक् १ ६३ ७ छिनत्सि ६ २६ ३ **वर्क्तम्**=त्यजेताम् ६ ५९ ७. त्यजतम् ११८३ ४ [वृजी वर्जने (अदा०) धातोर्लुङि 'मन्त्रे घसह्वर०' अ० २ ४ ८० सूत्रेण च्लेर्लुक्। अडभावश्छान्दस]

वर्चसा वर्चन्ते दीप्यन्ते सर्वे पदार्था यस्मिन् वेदाध्ययने तेन २ २४ तेजसा ८ १६ प्रकाशेन ३५ ३ विद्यादीप्त्या १३ ४०. साङ्गोपाङ्गवेदाध्ययनेन २० २२ अन्नाऽध्ययनादिना १२.७ **वर्चसे**=अध्यापनाय २६ ९ स्वप्रकाशाय वेदप्रवर्त्तकाय (अग्नये=विज्ञानमयाय न्यायव्यवहाराय) ८ ३८ निजात्मप्रकाशाय, योगबलप्रकाशाय, सद्गुणप्रकाशाय, रोगाऽपहारकायौषधाय ७ २८ शब्दार्थसम्बन्धविज्ञानाय, शुद्धसिद्धान्तप्रकाशाय, प्रागल्भ्याय, अध्ययनदीप्त्यै, पराक्रमाय, अन्नाय ७ २७ **वर्च:**=वर्चन्ते दीप्यन्तेऽनेन तद्वर्चो विद्याप्रापणम्, अ०—वेदचतुष्टयम्, विद्याव्यवहारप्रापकम्, अ०—शरीरात्मबलम्, प्रकाशक विद्युत्सूर्यप्रसिद्धाग्न्याख्य तेज ३ ९ अध्यापनतेज ३ ८ ३ अन्नम् ३ २४ १ विद्याप्राप्ति दीप्ति वा ३ १७ विज्ञान तेजो वा ४ १७ विज्ञानप्रकाश १२ ४८ य सर्वविदा ज्योतिषा, ज्ञानवता जीवाना वर्चोऽन्तर्यामितया सत्योपदेष्टा (परमेश्वर), ऋ० भू० २४८, ३ ९ सद्विद्याप्रचार सम्यगध्ययनाऽध्यापनप्रबन्ध कर्म ऋ० भू० १०४, अथर्व० १२ ५ ८ विद्याबलन्यायदीपनम् ९ ३७ पढी हुई विद्या का विचार स० वि० १४४, अथर्व० १२ ५ ८ **वर्चांसि**=प्रकाशमानाऽध्ययनानि ९ २२ [वर्च दीप्तौ (भ्वा०) धातोरौणादिकोऽसुन्। वर्च अन्ननाम निघं० २ ७ सूर्यस्य वर्चसा ता० १ ३ ५ सूर्यस्य वर्चसा (त्वाभिषिञ्चामीति) श० ५ ४ २ २. ततोऽस्मिन् (अग्नौ) एतद् वर्च आस श० ४ ५ ४ ३ वर्च्चो वा ऽएतद् हिरण्यम् श० ३ २ ४ ९ वर्चो वै हिरण्यम् तै० १ ८ ९ १ यद् वै वर्चस्वी कर्म चिकीर्षति शक्नोति वै तत् कर्त्तुम् श० ५.२. ५ १२ वर्चो द्वाविंश (यजु० १४ २३) सवत्सरो वाव वर्चो द्वाविंशस्तस्य द्वादश मासा सप्तर्त्तवो द्वेऽहोरात्रे सवत्सर एव वर्चो द्वाविंशस्तद् यत् तमाह वर्च इति सवत्सरो हि सर्वेषा भूताना वर्चस्वितम श० ८ ४ १ १६]

वर्चस्यम् वर्चसेऽध्ययनाय हितम् (हिरण्य=तेजोमय

वरुण पर्णानि ऐ० १ २५ यन् पञ्चाद्वासि वरुणो राजा भूतो वासि जै० उ० ३ २१ २ एषा (उत्तरा) वै वरुणस्य दिक् तै० ३ ८ २० ४ यद्वै यज्ञस्य दुरिष्ट तद्वरुणो गृह्णाति तां० १३ २४ यद्वस्य (ईजानस्य) दुरिष्ट भवति वरुणोऽस्य तद् गृह्णाति श० ४ ५ १.६ वरुणेन (यज्ञस्य) दुरिष्ट (शमयति) तै० १ २ ५ ३ वरुण (यज्ञस्य) स्विष्टम् (पाति) ऐ० ३ ३८ सत्यानृते वरुण तै० १ ७ १०.४ अनृते खलु वै क्रियमाणे वरुणो गृह्णाति तै० १ ७ २ ६ वरुणो वा एत गृह्णाति य पाप्मना गृहीतो भवति श० १२ ७ २ १७ वरुण धर्मणा पते तै० ३ ११ ४ १ वरुण (एवैन) धर्मपत्तीना (सुवते) तै० १ ७ ४ २ वरुणो वा ऽआर्पयिता श० श० ५ ५ ४.३१ सवो वै देवाना वरुण श० ५ ३ १ ५ वरुणोऽन्नपति श० १२ ७ २ २० वरुण सम्राट् सम्राट्पति तै० २ ५ ७ ३ श० ११ ४ ३ १० वरुणो वै देवाना राजा श० १२ ८ ३ १० विराड् वरुणस्य पत्नी गो० उ० २ ६ अथ यदप्सु वरुण यजति स्व एवैन तदायतने प्रीणाति कौ० ५ ४ अप्सु वै वरुण तै० १ ६ ५ ६ वरुण्यो वा अवभृथ श० ४ ४ ५ १० वरुण्या वाऽएता आपो भवन्ति या स्यन्दमानाना न स्यन्दन्ते श० ५ ३ ४ १२. वरुणस्य वा अभिषिच्यमानस्याप इन्द्रिय वीर्य निरघ्नन्। तत् सुवर्णं हिरण्यमभवत् तै० १ ८ ९.१ वरुण्यो वै ग्रन्थि श० १ ३ १ १६ वरुण्यो हि ग्रन्थि श० ५ २ २ १७ वरुण्या वा ऽएषा यद्रज्जु श० ३ २ ४ १८ वरुण्या वै यज्ञे रज्जु श० ६ ४ ३ ८ वरुण्या रज्जु श० १ ३ १ १४ वारुणो वै पाश तै० ३ ३ १० १ श० ६ ७.३ ८ वारुणम् एककपाल पुरोडाशो भवति श० ४ ४ ५ १५ वारुणो दशकपाल (पुरोडाश) तां० २१.१० २३ तद्धि वारुण यत्कृष्ण (वास) श० ५ २ ५ १७. वरुणस्य सायम् (काल) आमवोऽपान तै० १ ५ ३ १ खलतेर्विक्लिधस्य शुक्लस्य पिङ्गाक्षस्य मूर्द्धन् जुहोति। एतद्वै वरुणस्य रूपम् तै० ३ ९ १५ ३. वारुणो वा अश्व तै० २ २ ५ ३ (प्रजापति) वारुणमश्वम् (आलिप्सत) श० ६ २ १ ५ स हि वारुणो यदश्व श० ५ ३ १.५ एष वै प्रत्यक्ष वरुणस्य पशुर्यन्मेष श० २ ५.२.१६. वारुणी च हि त्वाष्ट्री चावि श० ७ ५ २.२० यज्ञो वै वैष्णुवारुण कौ० १६ ८ वरुणसवो वा ऽएप यद् राजसूयम् श० ५ ३ ४.१२ यो राजसूय स वरुणसव तै० २ ७ ६ १ मैत्रो वै दक्षिण वारुण सव्य तै० १ ७ १० वरुण्या वा ऽएता ओषधयो या कृष्टे जायन्ते श० ५ ३ ३ ८ वरुण्या वा ऽएषा (शाखा) या परशुवृक्णाथैषा मैत्री (शाखा) या स्वयम्प्रशीर्णा श० ५ ३ २ ५ वरुण्य वा ऽएतद् यन् मथितम् (आज्यम्) अथैतन् मैत्र यत् स्वयमुदितम् श० ५ ३ २ ६]

वरुणध्रुतः वरुणेन ध्रुत स्थिरीकृत (अर्यमा=न्यायाधीश) ७ ६० ९ [वरुण-ध्रुतपदयो समास। ध्रुत = ध्रु गतिस्थैर्ययो (तुदा०) धातो क्त]

वरुणमिव पाशैर्बन्धक व्याधमिव ६.४८ १४ प्राणोदानाविव वर्त्तमानौ राजाऽमात्यौ ५ ६२ ८ [वरुणम्-इवपदयो समास]

वरुणशेषसः वरुण उत्तमो जन शेषो येषान्ते (मनुष्या) ५ ६५ ५ [वरुण-शेषपदयो समास]

वरुणा श्रेष्ठौ (होतृयजमानौ) ८ ५९ उत्तमौ (अध्यापकोपदेशकौ) ५ ६४ ६ [वरुण इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

वरुणानी वरस्य भार्य्या ५ ४६ ८ **वरुणानीम्**=श्रेष्ठस्य स्त्रियम् २ ३२ ८ यथा वरुणस्य जलस्येव शान्तिमाधुर्यादिगुणयुक्ता शक्तिरतद्भाभूतम् (स्त्रियम्) १ २२ १२ [वरुणप्राति० स्त्रियाम् 'इन्द्रवरुणभव०' अ० ४ १ ४९ सूत्रेण स्त्रिया ङीप् आनुक् च। वरुण इति व्याख्यातम्। वरुणानी वरुणस्य पत्नी नि० १२ ४६]

वरुणानी जलादिपदार्थयुक्ते (रोदसी=द्यावापृथिव्यौ) ७ ३४ २२. [वरुणानीति व्याख्यातम्। ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

वरुण्यात् वरुणेषु वरेषु भवादपराधात्, भा० श्रेष्ठापराधात् १२ ९०. [वरुणप्राति० भवार्थे यत्]

वरूता वरिता स्वीकर्त्ता (इन्द्र=विद्वज्जन), प्र०—'असित०' इत्यादिषु निपात १ १६९ १ श्रेष्ठ (इन्द्र=परमैश्वर्यप्रदो राजा) ६ २५.७ वारयिता (इन्द्र=विद्वज्जन) २ २० २ [वृञ् वरणे (स्वा०) धातो 'असितस्कभित०' अ० ७.२ ३४ सूत्रेण तृच्-प्रत्यय ऊडागमो निपात्यते]

वरूत्री वर्त्तुमर्हा (वरणीया विद्या) ७ ४० ६ वरणीया नीतियुक्ता माता ७ ३८ ५ वरसुखप्रदा (माता) ५ ४१ ५ **वरूत्रीभिः**=वरणीयाभिर्विद्याभि ७ ३४ २२ **वरूत्रीम्**=वरयित्रीम्, भा०—आकर्षणसम्बन्धनीम् (माया=प्रज्ञापिका विद्युतम्) १३ ४४ वरितु स्वीकर्त्तुमर्हाम् (धिषणा=वाचम्) १ २२ १० **वरूत्रीः**=अत्यन्त वरा (श्रीमन्तो विद्वास) ३ ६२ ३ वरा (देवी=कमनीया स्त्रिय) ११.६१ [वृञ् वरणे (स्वा०) धातो कर्त्तरि तृजन्तात् स्त्रिया ङीप्। 'असितस्कभित०' अ० ७ २ ३४. सूत्रेणोडागम। अहोरात्राणि वै वरूत्रयोऽहोरात्रैर्हीद सर्वं

(गन्नुजन) ५ २९ १४ निवारक (प्रतिरोविजन.) ४ २० ७ विपरिवर्तयिता (भा०—राजपुरुप), प्र०—अत्र वृणोतेस्तृच् 'छन्दस्युभयया' इति सार्वधातुकत्वादिडभाव १ ४० ८ [वृतु वर्त्तने (भ्वा०) वृतु वरणे (दिवा०) धातो. कर्त्तरि तृच्। वृणोतेर्वा कर्त्तरि तृच्। 'छन्दस्युभयथे' ति सार्वधातुकत्वाद् इटोऽभाव]

वर्तिका सङ्ग्रामे प्रवर्त्तमाना (सेना) १ ११७ १६ 'वत्तख' इति भाषायाम् २४ ३० **वर्तिकाम्**=विनयादिसहिता नीतिम् १.११८ ८ चटकापक्षिणीम् १ ११६.१४. शकुनि-स्त्रियम् १ ११२.८ **वर्तिकाः**=पक्षिविशेषा २४ २० [वृतु वर्त्तने (भ्वा०) धातो कर्त्तरि ण्वुल्। तत स्त्रिया टापि 'वर्त्तका शकुनौ प्राचामुपसङ्ख्यानम्' अ० ७ ३ ४५ वा०सूत्रेण वेत्वम्]

वर्ति. वर्त्तन्ते व्यवहरन्ति यस्मिन्मार्गे तम्, प्र०—'हृपिषिरुहिवृति०' उ० ४ ११९ इत्यधिकरणे इ-प्रत्यय 'सुपा सुलुक्०' इति द्वितीयैकवचनस्य स्थाने सुरादेश १ ३४.४ वर्तन्ते यस्मिन् गमनाऽऽगमनकर्मणि तत् (रय=रमणयानम्) १ ९२ १६ मार्ग ६ ४९ ५ वर्त्तमान (मार्गम्) २० ८१ सन्मार्गम् १ १८४ ५ [वृतु वर्त्तने (भ्वा०) धातो 'हृपिषिरुहिवृति०' उ० ४.११९ सूत्रेणाधिकरण इ]

वर्तोभ्याम् गमनाऽऽगमनाभ्याम् २५ १ [वृतु वर्त्तने (भ्वा०) धातोरौणा० असुन्। ततस्तृतीयाया द्विवचने रूपम्]

वर्त्मानि मार्गान् १ ८५ ३. [वर्त्मन्प्राति० प्रथमाबहुवचनम्। वर्त्मन्=वृतु वर्त्तने (भ्वा०) धातोरौणा० बाहु० मनिन्]

वर्ध वर्धस्व, प्र०—अत्र व्यत्ययेन परस्मैपदम् ६ १८ १ वर्धय ५ ५६ २ **वर्धत्**=वर्धते ५.६२ ५ वर्धयेत् ५ ६२ ५ **वर्धतम्**=वर्धेयाम् ४ ५० ११ **वर्धतु**=वर्द्धताम् ४ ५३ ७ **वर्धन्**=वर्धयन्तु ६ ५१ ११ **वर्धन्त**=वर्धन्ते ५.१९ ३. **वर्धन्ति**=वर्धन्ते ५ ३९ ५ वर्धयन्ति ६ १ ५ **वर्धन्तु**=वर्धयन्तु, प्र०—अत्र व्यत्ययेन परस्मैपद णिजर्थोऽन्तर्गत ३ १० ६ वर्धन्ताम् ३ ५२ ८ [वृधु वृद्धौ (भ्वा०) धातोर्लोट्। व्यत्ययेन परस्मैपदम्। अन्यत्र लेट्, लोट्, लङ्, लट् च। वर्धन्तु वर्धयन्तु नि० १ ११]

वर्धत. यो गुणैर्दोषैर्वा वर्धते तस्य (वृद्धस्य सज्जनस्य) १ ५१ ९ [वृधु वृद्धौ (भ्वा०) धातो शतृ। तत षष्ठ्या एकवचनम्]

वर्धनम् विद्यादिगुणाना वर्धकम् (उक्थ=स्तोत्रम्) १ १० ५ येन वर्धयन्ति तत् (सुखोन्नयनम्) १ ८० १ वर्धते येन तत् (ब्रह्म=धनम्) ६ २३ ५ वृद्धिकरम् (वच=वचनम्) १ ११४ ६ वर्द्धयितारम् (शिशु=बालकम्) १ १४० ३ सब का ज्ञान बढाने वाले (ईश्वर) को स० प्र० २३८, १०.४९ १. **वर्धनः**=उन्नेता (यज्ञ=सङ्गतो ससार) ३ ३२ १२ **वर्धनेन**=वृद्धिनिमित्तेन न्यायेन सह ८.४६ [वृधु वृद्धौ (भ्वा०) धातो 'नन्दिग्रहिपचादिभ्य०' अ० ३ १ १३४ सूत्रेण ल्यु। करणे ल्युट् वा। 'अनुदात्तेतश्च हलादे' अ० ३ २ १४९ सूत्रेण वा तच्छीलादिषु युच्]

वर्धना सुखाना वर्द्धनानि १.५२ ७. यानि वर्धन्ते तानि (ब्रह्माणि=धनान्यन्नानि वा) ५ ७३ १० उन्नतिकराणि कर्माणि ७ २२.७ [वर्धन इति व्याख्यातम् तत प्रथमाबहुवचने शेर्लोप]

वर्धनानि वृद्धिकराणि (ब्रह्माणि=धनानि) ६ २३ ६ [वृधु वृद्धौ (भ्वा०) धातोर्ल्युट् करणे]

वर्धनेभिः वर्धकै साधनै ३ ३६ १ [वृधु वृद्धौ (भ्वा०) धातोर्ल्युट्। वर्धनप्राति० 'बहुल छन्दसी' ति भिस ऐस् न भवति]

वर्धमानम् हानिरहितम् (जगदीश्वर भौतिकमग्नि वा) ३ २३ ह्रासरहितम् (अग्नि=परमेश्वरम्) १ १ ८ अत्यन्त वृद्धिमन्तम् (अग्नि=परमेश्वरम्) वे० भा० न० **वर्धमानः**=यो वर्धते स (जीव.) ६ ९ ४ सर्वथोत्कृष्ट (ईश्वर) १३ २ यो विद्यया क्रियाकौशलेन नित्य वर्धते स (विद्वज्जन) ११.२९ [वृधु वृद्धौ (भ्वा०) धातो शानच्]

वर्धमानाः वृद्धिशीला (सत्स्त्रिय) ३ ३८ २ [वर्धमानमिति व्याख्यातम्। ताच्छील्ये चानश् वा]

वर्धय उन्नय १ १२५ ३ सर्वोत्कृष्टता सम्पादय सम्पादयति वा, अ०—वर्द्धयति ३ १४ उत्कृष्ट सम्पादय १ १० ४ **वर्धयन्ति**=उन्नयन्ति १ ५४ ८ **वर्धयन्तु**=बढाया करो स० वि० १२२, अथर्व० १४.१ ५४ **वर्धयाति**=वर्द्धयेत् १८ ३४ [वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताल् लोट्। अन्यत्र लट् लेट् चापि]

वर्धयन् उन्नयन् (सोम=सखा) ३ ६२ १५ [वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताच्छतृ]

वर्धयन्तीः उन्नयन्त्य (कुमार्य्य) १ ७१ ३ [वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताच्छतृ। तत स्त्रिया ङीप्]

वर्धयमानः विद्यासुशिक्षयोन्नयमान (जन) १ १२५ १

सुवर्णम्) ३४ ५० [वर्चस्प्राति० हितार्थे यत्]

वर्चस्वत् प्रशस्तानि वर्चांस्यन्नानि यस्मात्तत् (हिरण्य=तेजोमय सुवर्णम्) ३४ ५० [वर्चस्प्राति० प्रशसाया मत्वर्थे मतुप्। मतुप्सूत्र 'इतिकरणस्ततश्चेद् विवक्षा' इति नियमेन पञ्चम्यर्थेऽपि मतुप्]

वर्चस्वान् विद्याविज्ञानवान् (विद्वज्जन.) १३ ४० सर्वविद्याऽध्ययनयुक्त (सभापती राजा) प्रशस्तविद्याध्ययन (प्रजासभासेनाजन) ८ ३८ [वर्चस्प्राति० प्रशसाया भूम्न्यर्थे वा मतुप्]

वर्चस्विन् बहु वर्चोऽध्ययन विद्यते यस्मिन् तत्सम्बुद्धौ (अग्ने=तेजोमय सभापते) ८ ३८. [वर्चस्-प्राति० भूम्न्यर्थे (मत्वर्थे) 'अस्मायामेधास्रजो विनि' अ० ५ २ १२१ सूत्रेण विनि]

र्वाचनम् देदीप्यमानम् (शम्बर=मेघम्) ६.४७ २१. **र्वाचनः**=वह्वधीतस्य (दासस्य=सेवकस्य) ४ ३० १५ प्रदीप्तस्य (सर्वबलस्य राज्ञ) २ १४ ६ [वर्च दीप्तौ (भ्वा०) धातोस्ताच्छील्ये णिनि]

वर्चोदसौ सूर्याचन्द्रमसाविवाऽतिथ्याध्यापकौ ७ २७ न्यायप्रकाशकौ सर्वाधिष्ठातारौ सभापतिन्यायाधीशाविव योगाऽऽरूढ-योगजिज्ञासू ७ २८ **वर्चोदाः**=योगब्रह्मविद्या-प्रद, विद्याप्रद, वर्चो वल ददातीति तत्सम्बुद्धौ भा०—पूर्णविद्य (अ०—विद्वज्जन) ७ २८ दीप्ति ददातीति (सूर्य) ४ ३. सकलविद्याध्ययनप्रदा (हेतय =शस्त्रा-स्त्रोन्नतय) १७ १५ यो वर्चो विज्ञान ददातीति, तत्प्राप्ति-हेतुर्वा (अग्नि =सर्वविद्यामयेश्वरो विद्याहेतुर्भौतिकोऽग्निर्वा) ३ १७ वर्चो विद्या दीप्ति वा ददातीति, भा०—प्रकाश-हेतुर्विद्याप्रदो वा (सूर्य =जगदीश्वरो विद्वान् जीवो वा) २ २६ यथायोग्य प्रकाश ददाति तत्सम्बुद्धौ, दीप्तिप्रदो जाठराग्निरिव, वर्चो विद्यावल ददातीति, सत्यवक्तृत्वप्रद, तज्ज्ञानद, विज्ञानप्रद (अध्येताऽध्यापको वा) ७ २७ विद्यादि तेज अर्थात् विज्ञान देने वाला (ईश्वर) आर्याभि० २.३३, ३ १७ [वर्चस् इत्युपपदे डुदाञ् दाने (जु०) धातो-रौणा० असुन्]

वर्चोधाम् या वर्चो विद्या दीप्ति दधाति ताम् (धियम्) ४ ११ [वर्चस् इत्युपपदे डुधाञ् धारणपोषणयो (जु०) धातो क । तत स्त्रिया टाप्]

वर्णम् रूपम् २ १२ ४ स्वीकर्त्तव्यम् (आर्य= धार्मिक जनम्) ३ ३४ ९ आज्ञापालन-स्वीकरणम् १.१०४ २ स्वीकर्त्तुमर्हमतिसुन्दरम् (रूपम्) ४.२ स्वीकर-णीयम् (इद=जलम्) २ ५ ५ स्वीकारम् ३ ३४ ५ चक्षु-विषयम् (वस्तुस्वरूपम्) १ ७३ ७. स्वस्वरूपम् १ ११३ २ **वर्णः**=वरीतु योग्य (सूर्य-प्रकाश) ४.२६ **वर्णाय**= स्वीकरणाय ३० ९. सुरूपसम्पादनाय ३० १७ **वर्णे**= शुक्लादिगुणे २.१ १२ **वर्णेन**=तेजसा ४ ५ १३. **वर्णौ**=परस्परेण व्रियमाणौ सुन्दरस्वरूपौ (स्त्रीपुरुषौ) १.१७२ ६. [वृञ् वरणे (स्वा०) धातो 'कृवृजृ०' उ० ३ १०. सूत्रेण न प्रत्यय । वर्ण वृणोते नि० २ ३ चत्वारो वै वर्णा । ब्राह्मणो राजन्यो वैश्य शूद्र श० ५ ५ ४ ९]

वर्त वर्त्तते १.१०५ १४. **वर्तस्व**=वर्तस्व वर्त्तते वा १२.१०३. **वर्ते**=वर्त्तमानो भवेयम् २ २७ [वृतु वर्त्तने (भ्वा०) धातोर्लोट्। पुरुषव्यत्यय । परस्मैपदञ्च व्यत्ययेन। अन्यत्र लोट् लट् च]

वर्तनिम् वर्त्तन्ते यस्मिँस्त मार्गम् ३ ७ २ स्वकीय-मार्गम् ऋ० भू० १३८, ऋ० ८.२ १० १ वर्त्तन्ते यस्मिँस्त न्यायमार्गम् ७ १८ १६ **वर्तनिः**=वर्त्तमान (श्येनी) १ १४० ९. [वृतु वर्त्तने (भ्वा०) धातोरधिकरणे 'वृतेश्च' उ० २.१०६. सूत्रेणानि]

वर्तनी गमनागमनसत्क्रिया १ ५३ ८ वर्त्तते यया क्रियया सा १ ५३ ८ **वर्तनीम्**=मार्गम् ५ ६१ ९ **वर्तनीः**=मार्गान् ४ १९ २ [वृतु वर्त्तने (भ्वा०) धातो करणे ल्युट् । ततो ङीप् स्त्रियाम्]

वर्तम् वर्त्तयतम् ६ ६२ ११ **वर्तयतु**=प्रवृत्त कारयतु ४ २०. **वर्तयथ**=निष्पादयथ १ ३९ ३ **वर्तया**=दूरीकुरु २ २३ ७ **वर्तयाते**=वर्तयेत, प्र०—प्रथमैकवचनस्य आडा-गमे णिजन्तस्य वर्ते प्रयोग. ५ ३७ ३ **वर्तयासि**=वर्तये २३.७. [वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल् लोट् । 'छन्दस्युभयथेति' आर्धधातुकत्वान् णेर्लोप । अन्यत्र लट् लेट् च]

वर्तमानः वर्ततेऽसौ वर्त्तमान (पदार्थ) १ ३५ २. [वृतु वर्त्तने (भ्वा०) धातो शानच्]

वर्तयध्यै वर्तयितुम् ५ ४३ २ [वृतु वर्त्तने (भ्वा०) धातोर्णिजन्तात् तुमर्थेऽध्यै प्रत्यय]

वर्तयामसि प्रवर्तयाम १८ ६८ [वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लट् । 'इदन्तो मसि' रिति मस इदन्तता]

वर्तवै वरितु स्वीकर्त्तुम् ३.३३ ४ [वृञ् वरणे (स्वा०) धातोस्तुमर्थे तवेन् प्रत्यय.]

वर्ता वर्तयिता (असाधुजन) ६.६६ ८. स्वीकर्त्ता

[वर्षोपपदे ह्वेञ् स्पर्धायां शब्दे च (भ्वा०) धातो क्विप्]

वर्षिमा वृद्धस्य भाव १८४ [वृद्धप्राति० भाव इमनिच् प्रत्यये 'प्रियस्थिर०' अ० ६ ४ १५७ सूत्रेण वर्षिरादेश]

वर्षिष्ठम् अतिशयेन वृद्धम् (ऋत=सत्य कारणम्) ३ ५६ २ वृद्धिकारकम् (रयिं=धनम्), प्र०—अत्र वृद्धशब्दादिष्ठन् वर्षिरादेशश्च १ ८ १ **वर्षिष्ठाय**=अतिवृद्धाय श्रेष्ठाय (नाकाय=अविद्यमानदुःखाय मोक्षाय) ३०.१२ अतिशयेन वृष्टिकराय (विदुषे जनाय) ५ ७ १. **वर्षिष्ठे**=अतिशयेन वृद्धो वर्षिष्ठस्तस्मिन् विशाले सुखस्वरूपे (नाके=मोक्षे) १ २२ [वृद्धप्राति० अतिशायन इष्ठन्-प्रत्यये 'प्रियस्थिर०' अ० ६ ४ १५७ सूत्रेण वर्षिरादेश. । वृषु सेचने (भ्वा०) धातोर्वा तृजन्ताद् इष्ठन्प्रत्यये तृचो लोप]

वर्षिष्ठया अतिशयेन वृद्धया (इषा=उत्तमान्नादिसमूहेन) १ ८८ १. **वर्षिष्ठा**=अतिशयेन वृद्धा (तनू) ५.८ [वर्षिष्ठमिति व्याख्यातम् । तत स्त्रियां टाप्]

वर्षिष्ठा अतिशयेन वृद्धानि (नृम्णानि=धनानि) ४ २२ ६ [वर्षिष्ठप्राति० प्रथमाबहुवचने शेर्लोपश्छन्दसि]

वर्षीयसि सर्वसुखमभिवर्षति (यज्ञे) ६ ११ **वर्षीयसे**=अतिशयेन विद्यावृद्धाय (विदुषे जनाय) १६ ३० **वर्षीयान्**=अतिशयेन वृद्धो महान् (इन्द्र=सूर्य) २३ ४८ [वृद्धप्राति० अतिशायन ईयसुन्प्रत्यये 'प्रियस्थिर०' अ० ६ ४ १५७ सूत्रेण वर्षिरादेश]

वर्षीय: अतिशयेन श्रेष्ठम् (वय=कमनीयमायु) ६ ४४ ६ वृद्धम् (इन्द्र=सूर्य) २३ ४७. [वृद्धप्राति० अतिशायन ईयसुन्प्रत्यये 'प्रियस्थिर०' इति वर्षिरादेश]

वर्ष: यज्ञकर्मणा सर्वसुखसेचक (यजमान वातो वा) ६ ११. [वृषु सेचने (भ्वा०) धातोरौणा० असुन्]

वर्ष्मन् यो वर्षति तत्सम्बुद्धौ (विद्वज्जन) ४ ५४ ४ सद्गुणाना सेचक (पुरुषार्थिजन) ३ ८ ३ **वर्ष्माणम्**=वर्षकम् (सूर्यकिरणसमूहम्) ६ ४७ ४ वर्ष के मेघमण्डले २८ १ सेचने ३ ५ ६ सुखवृष्टिनिमित्ते (अ०—जगति) ५.१७ [वृषु सेचने (भ्वा०) धातो कर्त्तरि मनिन्]

वर्ष्यम् वर्षासु भवम् (नभ=अन्तरिक्षम्) ५ ८३ ३ **वर्ष्यान्**=वर्षासु साधून् (मेघान्) ५ ८३.३ [वर्षाप्राति० भवार्थे यत्]

वर्हि उत्सन्नाऽभूत् ३ ५३ १७]

वलम् वक्रगतिम् ४ ५० ५ मेघम् ६ १८ ५ वलयुक्तम् (मेघम्) १ ६२ ४ वलम् २ १४ ३. **वलस्य**=वलवत. शत्रो १ ५२ ५ **वल:**=वल, वलवान् (इन्द्र=विद्वज्जन) ३ ३० १० [वल मेघनाम निघ० १.१०. वलम्=वृञ् वरणे (स्वा०) धातो कर्त्तर्यच् । छान्दस लत्वम् । वलो वृणोते नि० ६ २]

वलंरुज: यो वल मेघ रुजति स (इन्द्र=सूर्य) ३.४५ २ [वलोपपदे रुजो भङ्गे (तुदा०) धातोश्छान्दस खश्]

वल्गते गच्छते (जनाय) २२ ७ [वल्गू गत्यर्थे (भ्वा०) धातो शतृ]

वल्गू अत्युत्तमौ (वायुविद्युतौ) ६.६२ ५ शोभनवाचौ (सभासेनेशौ), प्र०—वल्गु इति वाङ्नाम निघ० १.११, ६.६३.१ [वल सवरणे सञ्चरणे च (भ्वा०) धातो 'वलेर्गुक्' च उ० १.१६ सूत्रेण उ । गुणागमश्च । वल्गु वाङ्नाम निघ० १.११.]

वल्गूयति सत्करोति ४ ५० ७ [वल्गूयति गतिकर्मा निघ २ १४ अर्चतिकर्मा निघ० ३ १४]

वल्मीकान् मार्गान् २५ ८. [वल सवरणे सञ्चरणे च (भ्वा०) धातो: 'अलीकादयश्च' उ० ४ २५ सूत्रेण कीकन् । बहुलवचनात् मुडागमश्च । श्रोत्र ह्येतत् पृथिव्या यद् वल्मीक तै० १ १ ३ ४ ऊर्जं वा एत रस पृथिव्या उपदीका उद्दिहन्ति यद् वल्मीकम् तै० १ १ ३.४ प्राजापत्यो वै वल्मीक । तै० ३ ७ २ १ सर्पाणा वल्मीको गृहा मै० ४ १.१३.]

वल्हामसि प्रधाना भवाम भा०—प्रधानपुरुषा भवेम २३ ५१ [वल्ह प्राधान्ये (भ्वा०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

ववक्ष वहतु, प्र०—अत्र वर्त्तमाने लिटि 'वाच्छन्दसि' इति सुडागम ३ ७ ६ वहति ४.७ ११. **ववक्षिथ**=वोढु प्राप्तुमिच्छथ २ २४ ११. वोढुमिच्छ ३ ६ ३ वहति, प्र०—अत्र पुरुषव्यत्यय २ २२ ३. वोढुमिच्छसि, प्र०—अत्र लडर्थे लिट्, सन्नन्तस्य वहधातोरस्य प्रयोग 'बहुल छन्दसि' इत्यनेनाऽभ्यासस्येत्त्वाऽभाव १ १०२ ८ **ववक्षिरे**=रुष्टा स्यु २ ३४ ४ **ववक्षे**=रुष इव विरुध्यति ३ ५ ८ वक्षति रोष सङ्घात करोति १ ६१.६ सहन्ति, प्र०—अत्र वक्ष सङ्घाते इत्यस्य प्रयोग १ १४६ २ वहति ७ ८ २ **ववक्षु:**=वक्षयन्ति रोपयन्ति १ ६४ ३. [वह प्रापणे (भ्वा०) धातोर्लिटि छान्दस सुट् । अथवा वक्ष रोषे सघाते च (भ्वा०) धातोर्लिट् । ववक्षिथ महन्नाम निघ० ३ ३ ववक्षे प्रब्रूपे नि० ५ ८]

[वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताच्छानच्]

वर्धयामसि वर्द्धयाम, अ०—प्रदीपयाम, प्र०—अत्र 'इदन्तो मसि' इनीकारादेश ३.३ [वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताल्लट् 'इदन्तो मसि' इति मस इदन्तत्वम्]

वर्धसे शमादिषु स्वात्मानमुन्नयसि ७ १२ **वर्धस्व**= वर्धस्व वर्धते वा, अ०—वर्धय, प्र०—अत्राऽन्त्यपक्षे व्यत्ययो लडर्थे लोट् च २ १४ **वर्धान्**=वर्द्धयेत् ६ ३८ ४ **वर्धान्**= वर्धयेयु, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ७० ४ वर्धयेरन् ६ ३८ ४ **वर्धासे**=वर्धसे ६ १६ १६ वृद्धो भव २६ १३ **वर्धिषीमहि**=पूर्णां वृद्धिं प्राप्नुयाम ३८ २१. [वृधु वृद्धौ (भ्वा०) धातोर्लेट्। अन्यत्र लोट्, लेट्, लङ्, लिङ् च]

वर्ध: यो वर्धयति तत्सम्बुद्धौ (अग्ने=विज्ञानप्रद जन) १ ७१ ६. [वृधु वृद्धौ (भ्वा०) धातोरौणा० असुन्]

वर्पणीति: वर्पस्य रूपस्य नीतिर्नायक (इन्द्र =राजा), प्र०—अत्र नीतौ कर्त्तरि क्तिच् ३ ३४ ३ वर्पाणि नाना-विधाना रूपाणि नीति प्राप्तिर्यस्य स (सभेशो राजा) ३३.२६ [वर्प-नीतिपदयो समास। वर्प रूपनाम निघ० ३ ७ नीति =णीञ् प्रापणे (भ्वा०) धातो क्तिन् कर्त्तरि क्तिच् वा]

वर्पस: रूपस्य, प्र०—वर्प इति रूपनाम निघ० ३ ७, १ १४१ ३ **वर्प:**=रूपयुक्त (राजसेनाधीशरथ.) ३ ५८.६ रूपम् १ १४० ५ **वर्पांसि**=सुन्दराणि रूपाणि ६ ४४ १४ [वृङ् सम्भक्तौ (क्र्या०) धातो 'वृङ्शीङभ्या रूपस्वाङ्गयो पुट् च' उ० ४ २०१ सूत्रेणामुन्। वर्प इति रूपनाम वृणोतीति सत नि० ५ ८.]

वर्म कवचम् २६ ४५ रक्षकम् (कवचम्) १८ ३ सर्वतो रक्षणम् ११ ३० वर्म इव रक्षकम् (ईश्वरम्) ६ ७५ १६ [वर्म गृहनाम निघ० ३ ४ वृञ् वरणे (स्वा०) धातोर्मनिन्]

वर्मिण: कवचिन (वीरराजपुरुषा) ६ २७ ६ **वर्मिणे**=बहूनि वर्माणि शरीररक्षासाधनानि विद्यन्ते यस्य तस्मै (पुरुषाय) १६ ३५ **वर्मी**=कवचवान् (योद्धृजन) २६.३८ कवचधारी (सैनिक) ६ ७५ १ [वर्मन्-प्राति० मत्वर्थे इनिश्छान्दस]

वर्मेव कवचमिव १ १४१ १० [वर्मन्=इवपदयो समास]

वर्वर्त्ति भृश वर्तते १ १६४ ११ [वृतु वर्त्तने (भ्वा०) धातोर्यङ्लुगन्तात्लट्]

वर्वृतति भृश गच्छति ६ ४६ १४ [वृतु वर्त्तने (भ्वा०) धातोर्यङ्लुगन्तात् लट्। व्यत्ययेन श]

वर्षतु शब्दविद्याया वृष्टिं करोतु १ २६ सिञ्चतु १ २६ [वृषु सेचने (भ्वा०) धातोर्लोट्]

वर्षते यो वर्षति तस्मै (मेघाय) २२ २६. [वृषु सेचने (भ्वा०) धातो शतृ]

वर्षनिर्णिज: वर्षस्य वृष्टे शोधका पोषका वा (वाय्वादिपदार्था.) ३ २६ ५ ये वर्ष निर्णेनिजन्ति ते (मरुत =मनुष्या) ५ ५७ ४ [वर्षोपपदे निरुपसृष्टान् णिजिर् शौचपोषणयो (जु०) धातो क्विप्]

वर्षम् वृष्टिरिव १६ ६४ [वृषु सेचने (भ्वा०) धातो 'अज्विधौ भयादिभ्य उपसख्यानम्०' इति वा०सूत्रेण अच्]

वर्षवृद्धम् शस्त्राऽस्त्राणा वर्धयितारम् वृष्टेर्वर्द्धक यज्ञम् १ १६ [वर्षोपपदे वृधु वृद्धौ (भ्वा०) धातोर्बाहु० औणा० क्त]

वर्षाभि: वर्षन्ति मेघा यासु ताभि (वृष्टिभि) २१ २५ **वर्षाभ्य:**=वर्षर्तौ कार्यसाधनाय २४.११. **वर्षा:**=यासु मेघा वर्षन्ति ता (वृष्टय) १३ ५६ [वृषु सेचने (भ्वा०) धातो 'अज्विधौ भयादिभ्य उपसख्यानम्०' इत्यच्। तत स्त्रिया टाप्। वर्षा वर्षत्यासु पर्जन्य नि० ४ २७ (ऋतु) यद् वर्षति तद् वर्षाणाम् (रूपम्) श० २ २ ३ ८ यदा वै वर्षा पिन्वन्ते ऽथैना सर्वे देवा सर्वाणि भूतान्युपजीवन्ति श० १४ ३ २ २२ मरुतो वै वर्षस्येशते श० ६ १ २ ५ षड्भि पार्जन्यैर्वा मारुतैर्वा (पशुभि) वर्षासु (यजते) श० १३ ५ ४ २८ वर्षं सावित्री गो० पू० १ १३ वर्षा वै सर्व ऽऋतव श० २ २ ३ ७ वर्षा ह त्वेव सर्वेषामृतूना रूपम् श० २ २ ३ ७ वर्षा पुच्छम् (सवत्सर-स्य) तै० ३ ११.१० ४ वर्षा उत्तर (पक्ष सवत्सर) तै० ३ ११ १० ३ वर्षा एव यश गो० पू० ५ १५ वर्षा उद्-गाता तस्माद् यदा बलवद् वर्षति साम्न इवोपब्दि क्रियते श० ११ २ ७ ३२ (प्रजापति:) वर्षामुद्गीथम् (अकरोत्) जै० उ० १.१२ ७ वर्षा उद्गीथ प० ३ १ वर्षाशरदौ सारस्वताभ्याम् (अवरुन्धे) श० १२ ८ २ ३४ वर्षाभि-र्ऋतुनादित्या स्तोमे सप्तदशे स्तुत वैरूपेण विशौजसा तै० २ ६ १९ १ वर्षा ह्यस्य (वैश्यस्य) ऋतु, ता० ६ १ १० तस्माद् वैश्यो वर्षास्वादधीत विड्ढि वर्षा श० २ १ ३ ५ तस्य (आदित्यस्य) रथप्रोतश्चासमरथश्च (यजु० १५ १७ सेनानीग्रामण्याविति वार्षिकौ तावृतू श० ८ ६ १ १८]

वर्षाहू: या वर्षा आह्वयति सा भेकी २४ ३८

४४२२ स्वीकर्त्तु (मनुष्यस्य) ६ २०.२. [वृञ् वरणे (स्वा०) धातो 'आदृगमहन०' अ० ३.२ १७१. सूत्रेण कि । लिड्वद्भावेन द्वित्वञ्च । वव्रि =रूपनाम निघ० ३.७ वव्रिरिति रूपनाम वृणोतीति सत नि० २ ८]

वव्रिवांसम् विभजन्तम् (अहिं=मेघम्) ६ २० २. आवरकम् (वृत्र=मेघम्) २ १४ २ विवृतम् (वृत्रम्) ४ १६ ७. व्रियमाणम् (शत्रुम्) ३.३२ ६ [वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्वा लिट क्वसु]

वव्रु: विवृण्वति ४ १ १५ वृणुयु १२ २८ **वव्रे**= वृणोति ३ ३८ ८ व्रियते १ ६२ ७ [वृञ् वरणे (स्वा०) धातोर्लिट्]

वशम् स्वाधीनताम् १ ११६ २१. कमनीयम् (अश्व्यम्=अश्वेषु साधुम्) १ ११२.१० **वशस्य**= वशवर्त्तिन (प्रजाजनस्य) ६ २४ ५ **वश:**=कामयमान (विद्वज्जन) १ १२९ १ वशित्वगुणप्रापक (परमेश्वर ओषधिराजो वा) १ ९१ ६ **वशान्**=शमदमादियुक्तान् धार्मिकाञ्जनान् १ ८२ १३ कामयमानान् पदार्थान्, अ०—उत्कृष्टव्यवहारसाधकान् कामान् ३ ५२ वशवर्त्तिन (जनान्) १ १८१ ५ **वशानाम्**=कमनीयानाम् (विद्वज्जनानाम्) ३ ६० ४ **वशा:**=देदीप्यमाना (पशव.) २४ १४ **वशे**=प्रकान्ते यस्मिँस्तस्मिन्, प्र०—अत्र बाहुलकादौणादिकोऽन् प्रत्यय ४ ११. वश मे स० प्र० १६, अथर्व० ११ २४ २ [वश कान्तौ (अदा०) धातो 'वशिरण्योरुपसख्यानम्' अ० ३ ३ ५८ वा०सूत्रेण भावेअप् । बाहु० औणा० वा अन् । वष्टि कान्तिकर्मा निघ० २ ६.]

वशा कमनीयानि (धना=धनानि) २ २४ १३. [वशमिति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

वशा वन्ध्या गौ १८ २७ अप्रसूता (गौ) २१ २१ कमिताऽऽहुति २ १६ **वशाभि:**=कमनीयाभिर्गोभि २ ७ ५ **वशा:**=देदीप्यमाना (द्यावापृथिवीया पशव.) २४ १४ [वश कान्तौ (अदा०) धातोरच् । ततष्टाप् । यद् वशमस्रवत्सा वशाऽभवत् तस्मात्सा हविरिव ऐ० ३ २६ यदा न कश्चन रस पर्यशिष्यत तत एषा मैत्रावरुणी वशा समभवत्तस्मादेषा न प्रजायते श० ४ ५ १ ६ सा हि मैत्रावरुणी यद् वशा श० ५ ५ १ ११ वशामनूबन्ध्यामालभते श० २ ४ ४ १४ इय (पृथिवी) वै वशा पृश्नि श० १ ८ ३ १५ इय (पृथिवी) वै वशा पृश्निर्यदिदमस्या मूल चामूल चान्नाद्य प्रतिष्ठित तेनेय वशा पृश्नि श० ५ १ ३ ३.]

वशाम कामयेमहि १ १६५ ७ **वश्मि**=कामये २ ३१ ७. [वश कान्तौ (अदा०) धातोर्लेट् । अन्यत्र लट्]

वशास: ये वश प्राप्ता (महाख्या जना) ६ ६३.६ [वशमिति व्याख्यातम् । ततो जसोऽसुक्]

वशिम् वशकर्तारम् (इन्द्र=जीवम्) २८ ३३. [वश कान्तौ (अदा०) धातोर्बाहु० औणा० इन्]

वशी वश कर्त्तु शील (इन्द्र=सभाध्यक्ष) १ १०१ ४ जितेन्द्रिय (राजा) ८.५० वशीकर्त्तु समर्थ (सविता=परमेश्वर) ४ ५३ ६ वश कर्त्तु शीलमस्य स (ईश्वर) प० वि० । जितेन्द्रियाऽन्त करण (इन्द्र.=सेनापति) १७.३५ [वश कान्तौ (अदा०) धातोरस्माच्छीलार्थे णिनि]

वषट् क्रियाकौशलम् ११ ३६.

वषट्कारान् ये वषट् धर्म्या क्रिया कुर्वन्ति तान् (भा०—सत्क्रियान् मनुष्यान्) १९ २०. **वषट्कारा:**= उत्तमा क्रिया. २० १२ **वषट्कारेण**=होम क्रिया के तुल्य स० वि० २०९, अथर्व० ९ ६ ? ५ **वषट्कारै:**= श्रेष्ठै कर्म्मभि २१ ५३. उत्तमकर्म्मभि २० १२ [वषट् इत्युपपदे डुकृञ् करणे (तना०) धातोरण् । स वै वौगिति करोति । वाग्वै वषट्कारो वाग्रेतो रेत एवैतत् सिञ्चति षडित्यृतवो वै षट् तद् ऋतुष्वेवैतद् रेत सिच्यते तद् ऋतवो रेत सिक्तमिमा. प्रजा प्रजनयन्ति तस्मादेव वषट् करोति श० १ ७ २ २१ वाक् च वै प्राणापानौ च वषट्कार ऐ० ३ ८ वाक् च ह वै प्राणापानौ च वषट्कार गो० उ० ३ ६ तस्यै (वाचे) द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकार च वषट्कार च श० १४ ८ ९ १ प्राणो वै वषट्कार श०, ४ २.१.२९ एष एव वषट्कारो य एष (सूर्य) तपति श० १.७ २ ११ एष वै वषट्कारो य एष (सूर्य.) तपति श० ११.२ २ ५ य. सूर्य स धाता स उ एव वषट्कार ऐ० ३.४८ यो धाता स वषट्कार ३ ४७. निमेषो वषट्कार तै० ३.१.५ ९. त्रयो वै वषट्कारा वज्रो धामच्छद् रिक्त ऐ० ३ ७ त्रयो वै वषट्कारा वज्रो धामच्छद् रिक्त । स यदेवोच्चैर्बलवषट्करोति स वज्र ··· । अथ य सम सन्ततो निर्हाणच्छत्स्व धामच्छत् ······ । अथ येनैव षट् पराप्नोति स रिक्त गो० उ० ३ ३ वज्रो वै वषट्कार ऐ० ३ ८ कौ० ३ ५ गो० उ० ३ ५ वज्रो वषट्कार श० १ ३.३ १४ वज्रो वा एष यद् वषट्कारो य द्विष्यात्त ध्यायेद् वषट्करिष्यस्तस्मिन्नेव त वज्रमास्थापयति ऐ० ३ ६ देवेपुर्वा एषा यद् वषट्कार ता० ८ १ २ देवपात्र वाऽएष यद् वषट्कार श० १ ७ २ १३ देवपात्र वा एतद्

ववन्द वन्दति नमस्करोति ६ ६३ ३ प्रशसति ६ ५१ १२ **ववन्दिम**=प्रणमेम ५ २५ ६ **ववन्दिरे**= प्रणमन्तु ३ ५४ ४ आनन्दन्तु ३ ५४ ४ [वदि अभिवादन-स्तुत्यो (भ्वा०) धातोर्लिट् , व्यत्ययेन परस्मैपदम्]

ववन्म याचामहे ७ ३७ ५ [वनु याचने (तना०) धातोर्लिट् । व्यत्ययेन परस्मैपदम्]

ववर्जुषीणाम् भृश दोषान् वर्जयन्तीनाम् (विशा= प्रजानाम्), प्र०—अत्र यङ्नुगन्ताद् व्रजे क्विवन्त रूपम् १ १३४ ६ [वृजी वर्जने (अदा०) धातोर्लिट क्वसु । तत स्त्रिया ङीप्]

ववर्त वर्त्तने, प्र०—अत्र शप श्लुस्तस्य स्थाने तप् च १ १६५ २ **ववर्तत्**=वर्तने ४ ४४ ३ वर्तयेत् ४ २४ १ **ववर्थ**=वर्तते ३ ४३ ७ [वृतु वर्त्तने (भ्वा०) धातोर्लट् । 'बहुल छन्दसी' ति शप श्लु । तप्रत्ययस्य च स्थाने तवादेशश्छान्दस । अन्यत्र लडि छान्दस द्वित्वम् । ववर्थ प्रयोगे लिटि वृतुधातोर्तलोपश्छान्दस]

ववर्थ वृणोषि, प्र०—अत्र वर्तमाने लिट् १ ६१ २२ [वृञ् वरणे (स्वा०) धातोर्लिटि 'बभूथाततन्थ०' अ० ७ २.६४ सूत्रेण निपातनाद् इडभावे रूपम्]

ववर्ध वर्धते ५ २.२ [वृधु वृद्धौ (भ्वा०) धातोर्लिट् व्यत्ययेन परस्मैपदम्]

ववर्ह वर्धयति २ २३ १३ [वृह वृद्धौ (भ्वा०) धातोर्लिट्]

ववव्रुषः रूपवत (तमसः=अन्धकारस्य), प्र०— अत्र वव्रिरिति रूपनाम धातोर्लिट क्वसु १ १७३.५]

ववाच उक्तवान् प्र०—'सम्प्रसारणाच्च' इत्यत्र 'वाच्छन्दसि' इत्यनुवर्त्तनाद् यजादेश १ ६७ ४ [वच परि-भाषणे (अदा०) धातोर्लिट् । 'वा छन्दसी' ति पूर्वरूपाऽभावे यणादेशे च रूपम्]

ववार वृणात्युद्घाऽटयति, प्र०—अत्र वर्त्तमाने लिट् १ ३२ ११ [वृञ् वरणे (स्वा०) धातोर्लिट्]

ववाशिरे शब्दायन्ते २ २ २ [वाशृ शब्दे (दिवा०) धातोर्लिट्]

ववृक्तम् छिनत्तम् ६ ६२ १० [वृजी वर्जने (अदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु । व्यत्ययेन परस्मैपदञ्च]

ववृजु. त्यक्तवन्त १ ३३ ५. [वृजी वर्जने (अदा०) धातोर्लिट् । व्यत्ययेन परस्मैपदम्]

ववृतत् वर्त्तते ६ १७ १० **ववृतीमहि**=भृश वर्त्तेमहि १ १३८ ४ **ववृतीय**=वर्त्तेयम् १ १८६ १० वर्त्तेयामि, प्र०—अत्र 'बहुल छन्दसि' इति साऽभ्यासत्वम् १ १८० ५. **ववृत्यात्**=वर्त्तेत, प्र० —अत्र व्यत्ययेन, परस्मैपदम्, शप स्थाने श्लुश्च १ १०७ १ वर्त्तयेत् ६ १७ १३ वर्त्तताम् ८ ४ वर्त्तेत, १ १०७ १ आवर्त्तताम् प्र०—वृतुधातोर्लिङि विकरणाऽऽत्मनेपद व्यत्ययेन श्लुर्द्वित्वञ्च ३३ ३८ **ववृत्याम्**=वर्त्तयेयम् लिङ्-प्रयोगोऽय 'बहुल छन्दसि' इत्यादिभिर्द्वित्वादिकम् १ ५२ १ **ववृत्याम**=वर्त्तयेम ७ २७ ५ **ववृत्याः**=वर्त्तये ६ १११ वर्त्तेथा १ १७३ १३ प्रवर्त्तये ६ ५० ६ प्रवर्त्तय ७ ४२ ३ **ववृत्युः**=वर्त्तेरन् १ १३५ ५ **ववृत्स्व**=वर्त्तस्व ३ ६१ ३ वर्त्तते ३ ३२ ५ वर्त्तताम् २ १६ ८ [वृतु वर्त्तने (भ्वा०) धातोर्लुङ् । अटोऽभाव । 'वा छन्दसी' ति द्वित्वम् । 'वृद्भ्य स्यसनो' इति परस्मैपदम् । अन्यत्र लिङ् लोट् च]

ववृतन वर्त्तन्ते ५ ६१.१६ [वृतु वर्त्तने (भ्वा०) धातोर्लोट् व्यत्ययेन परस्मैपदम् । शप स्थाने श्लु, तस्य च तनप्]

ववृधन्त वर्धयन्ति ४ २ १७ [वृधु वृद्धौ (भ्वा०) धातोर्लङ् । 'बहुल छन्दसी' ति शप श्लु]

ववृधध्यु: वर्धयितुम्, प्र०—अत्र 'बहुल छन्दसि' इति शप. श्लुस्तुजादित्वाद् दीर्घश्च १ १२२ १

ववृमहे वृणुयाम ३ ६ १ स्वीकुर्महे ६ ४ ७ [वृञ् वरणे (स्वा०) धातोर्लिट्]

वव्ने सम्भजति ५ ७४ ७ याचते, प्र०—वनु याचने इत्यस्माल्लडर्थे लिट्, वन सम्भक्तौ इत्यस्माद् वा 'छान्दसो वर्णलोपो वा' इत्यनेनोपधालोप १ ३६ १७

वव्रम् वरणीयम् (मेघम्) ५ ३२ ८ **वव्रः**=कूप १ ५२ ३ [वव्र कूपनाम निघ० ३ २३]

वव्राज व्रजति प्राप्नोति ३ १ ६ [व्रज गतौ (भ्वा०) धातोर्लिट्]

वव्रासः सद्यो गन्तार (भा०—धन्या मनुष्या), प्र०—अत्र व्रजधातोर्बाहुलकादौणादिको ड प्रत्ययो द्वित्वञ्च १ १६८.२ [व्रज गतौ (भ्वा०) धातोर्बाहु० औणा० डो द्वित्वञ्च । ततो जसोऽसुक्]

वव्रिणा रूपेण १ ५४ १० **वव्रिम्**=सविभक्तारम् (दातृजनम्) १ १११ १० रूपयुक्त पदार्थसमूहम् १.४६ ६ वर्त्तुमर्हम् (पदम्) १ १६४ ७ स्वकीय रूपम् १ १६४ २९. रूपम् ५ ७४ ५ **वव्रिः**=अङ्गीकर्त्ता (भा०— प्राणी) ५ १९ १ **वव्रे**:=स्वीकर्त्तव्यस्य (कृष्टे =मनुष्यस्य)

यद् वषट्कार ऐ० ३ ५. देवपात्र वै वषट्कार गो० उ० ३ १. एत् एव वषट्कारस्य प्रियतमे तनूर्यदोजश्च सहश्च कौ० ३ ५ ओजश्च ह वै सहश्च वषट्कारस्य प्रियतमे तन्वौ ऐ० ३ ८ तस्य वाऽएतस्य ब्रह्मयज्ञस्य चत्वारो वषट्कारा यद् वातो वाति यद् विद्योतते यत् स्तनयति यदवस्फूर्जति तस्मादेव विद्वान् वाति विद्योतमाने स्तनयत्यवस्फूर्जत्यधीयीतैव वषट्काराणामच्छम्वट्काराय श० ११ ५ ६ ६ वषट्कारो हैष परोक्ष यद् वेट्कार श० १ ३ ३ १४]

वषट्कारेभिः भा०—श्रेष्ठकार्य्यै, कर्म्मभि १ ६ १६ [वषट्कारप्राति० 'वहुल छन्दसी' ति भिस ऐस् न भवति]

वषट्कृतम् क्रियया निष्पादितम् (सोम=सदोषधिरसम्) २ ३६ १ सङ्कल्पितमिव (यज्ञपदार्थसमूहम्) ७ २६ क्रियासिद्धम् (अश्वम्) २५ ३७ **वषट्कृतस्य**=क्रियानिष्पादितस्य शिल्पविद्याजन्यस्य (विज्ञानस्य) १ १२० ४ [वषट्-कृतपदयो समास]

वषट्कृति वषट् करोति येन यज्ञेन तस्मिन्, प्र०—अत्र 'कृतो वहुलम्' इति वार्त्तिकमाश्रित्य करणे क्विप् १ १४ ८ [वषट् इत्युपपदे डुकृञ् करणे (तना०) धातो करणे क्विप् तत सप्तमी]

वषट्कृतिम् सत्यक्रियाम् ७ १४ ३ सत्क्रियाम् ७ १५ ६ वषट् क्रिया क्रियते यया रीत्या ताम् १ ३१ ५ [वषट् इत्युपपदे करोते क्तिन्]

वष्टयः कामयमाना (किरणसमूहा) ५ ७६ ५ [वश कान्ती (अदा०) धातो क्तिन्]

वष्टि कामयते २ ३७ १ प्रकाशते १ ३३ ३ **वष्टु**=प्रकाशयतु २० ८४ कामयताम् २६ ८ कामसिद्धिप्रकाशिका भवतु १ ३ १० कामना-युक्त हो आर्याभि० १ ८, ऋ० १ १ ६ १० [वश कान्तौ (अदा०) धातोर्लट्। अन्यत्र लोट्। वष्टि कान्तिकर्मा निघ० २ ६]

वसतः निवसत ६ ३८ २ **वसः**=निवासय ७ ८ ३ **वसाते**=वसेताम् १६ ८६ **वसाथाम्**=आच्छादयतम् ११ ३० **वसाथे**=आच्छादयथ १ १५२ १ [वस निवासे (भ्वा०) धातोर्लट्। अन्यत्र लङ् लेट् च। वस आच्छादने (अदा०) धातोर्वा रूपम्]

वसतिम् निवासम् ५ २ ९ **वसतिः**=निवसति ३५ ४ यत्र वसन्ति सा १८ १५ यो निवसति स (विद्वान् जन) ६ ३ ३ **वसत्या**=वसन्ति यस्या तया १ ६६ ५ [वस निवासे (भ्वा०) धातो 'वहिवस्यर्तिभ्यश्चित्' उ० ४ ६० सूत्रेणाति]

वसना आच्छादनानि १ ९५ ७ [वस आच्छादने (अदा०) धातोर्ल्युट्। तत प्रथमावहुवचने शेर्लोपश्छन्दसि]

वसन्तः य सुगन्धादिभिर्वासयति स (ऋतु) १३ ५४ **वसन्ताय**=वसन्तर्त्तौ सुखाय २४ ११ **वसन्तेन**=वसन्ति सुखेन यस्मिँस्तेन (ऋतुना) २१ २३ [वस निवासे (भ्वा०) धातो 'तृभूवहिवसिभासि०' उ० ३ १२८ सूत्रेण झच्। एतौ (मधुश्च माधवश्च) एव वासन्तिकौ (मासौ) स यद् वसन्तऽओषधयो जायन्ते वन-पतय पच्यन्ते ते नो हेतौ मधुश्च माधवश्च श० ४ ३ १ १४ तस्य (अग्ने) रथगृत्सश्च रथौजाश्च (यजु० १५ १५) सेनानीग्रामण्याविति वासन्तिकौ तावृतू श० ८.६ १ १६ यदेव पुरस्ताद् वाति तद् वसन्तस्य रूपम् श० २ २ ३ ८ तस्य (सवत्सरस्य) वसन्त एव द्वार हेमन्तो द्वार त वाऽएत सवत्सर स्वर्गं लोक प्रपद्यते श० १ ६ १ १९ मुख वा एतद् ऋतूना यद् वसन्त तै० १ १ २ ६ तस्य (सवत्सरस्य) वसन्त शिर तै० ३ ११ १० २ ऊर्ग् वै वसन्त ऐ० ४ २६ वसन्त आग्नीध्रस्तस्माद् वसन्ते दावाश्चरन्ति तद् ह्यग्निरूपम् श० ११ २ ७ ३२ वसन्त समिद्धोऽन्यानृतून् समिन्धे श० १ ३ ४ ७ वसन्तो वै समित् श० १ ५.३ ९ समिधो यजति वसन्तमेव वसन्ते वा इद सर्व समिध्यते कौ० ३ ४ वसन्तो हिंकार। प० ३ १ स (प्रजापति) वसन्तमेव हिकारमकरोत् जै० उ० १ १२ ७ षड्भिराग्नेयै (पशुभि) वसन्ते (यजते) श० १३ ५ ४ २८ वसन्तेनर्त्तुना देवा वसवस्त्रिवृता स्तुतम्। रथन्तरेण तेजसा। हविरिन्द्रे वयो दधु तै० २ ६ १९ १ वसन्त एव भर्ग गो० पू० ५ १५ वसन्तो वै ब्राह्मणस्यर्त्तु तै० १ १. २ ६ श० १३ ४ १ ३ तस्माद् ब्राह्मणो वसन्तऽआदधीत ब्रह्म हि वसन्त श० २ १ ३ ५]

वसया निवासहेतुना जीवनेन २५ ९ **वसाम्**=वीररसनीतिम् ६ १६ [वस निवासे (भ्वा०) धातोरौणा० अन्। ततष्टाप् स्त्रियाम्]

वसर्हा वसाना वासहेतूनामर्हक (परिज्मा=अग्नि), प्र०—अत्र शकन्ध्वादिना पररूपम् १ १२२ ३ [वस-अर्हन्-पदयो समासे शकन्ध्वादिना पररूपम्। वस=वस निवासे (भ्वा०) धातोरौणा० अन्। अर्हन्=अर्ह पूजायाम् (भ्वा०)+शतृ]

वसवः ये वसन्ति तत्सम्बुद्धौ (देवा=विद्वासो जना) ४ ५५ १ पृथिव्यादय इव प्रथमविद्याकल्पा, (अ०—विद्वासो जना) ३८ ६ वसु-सज्ञका (मरुत=विद्वज्जना) २ ३४ ९. सुखवासप्रदा (पिता, माता, भ्राता च) ६ ५१ ५

१.५३ ३ दस्तु १८ १५ धनप्रदम् (भौतिकमग्निम्) १५ ४७ विद्यादिधनसमूहम् १ ४७ ६ कार्यकारणद्रव्यम् १ ४७ ६ वस्तुजातम् १ ८१ ६ जलाख्य द्रव्यम् ६ ४७ २२ **वसुना**=प्रशस्तेन धनेन १ ८३ १ **वसूनाम्**=पृथिव्यादि-तत्त्वाना धनाना वा ७ ७ ७ पृथिव्यादिपदार्थानाम् १२ ६६ **वसूनि**=विज्ञानादिधनानि १ ८४ २० विद्याचक्रवर्त्तिराज्य-प्राप्याणि उत्तमानि धनानि १ १५ ८. [वसुरिति वसव पदे व्याख्यातम्]

वसु वसूनि धनानि ६ ७ द्रव्याणि २७ ४० विज्ञा-नानि धनानि वा ६ ४८ १५. वासस्थानानि १ ८१ ७ [वसुरिति व्याख्यातम् । तत 'सुपा सुलुक्०' इति जसो लुक्]

वसुता वसूना द्रव्याणा भाव ६ १ १३ [वसुप्राति० भावे तल् । ततष्टाप् स्त्रियाम्]

वसुतातिम् धनमेव १ १२२ ५ **वसुतातिः**=धना-द्यैश्वर्ययुक्त (सभाध्यक्ष) १ १२२ १२ [वसुप्राति० स्वार्थे तातिल् छान्दस]

वसुदानः उत्तमोत्तमपदार्थस्य दाता (परमेश्वर) ऋ० भू० २४६, [वसूपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि ल्युट् 'कृत्यल्युटो बहुलम्' इति सूत्रेण]

वसुदावन् यो वसूनि द्रव्याणि ददाति तत्सम्बुद्धौ (विद्वज्जन) २ ६ ४ यो वसूनि धनानि सुपात्रेभ्यो ददाति तत्सम्बुद्धौ (सूरे=विद्वज्जन) १२ ४३ **वसुदावा**=यो वसूनि ददाति स (न्यायाधीशो जन) २ २७ १२ [वसूपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि वनिप्]

वसुदेयाय वसूनि द्रव्याणि देयानि येन तस्मै (विद्वज्ज-नाय) ६ ३६ ५ देय वस्तु यस्य तस्मै (विदुषे जनाय) २ ३५ ७ दातव्यधनाय १ ५४ ६ [वसु-देयपदयो समास । वसुरिति व्याख्यानम् । देयम्=डुदाञ् दाने (जु०) धातोर्यत्]

वसुधातम योऽतिशयेन वसूनि दधाति स, भा०—अतिधनी (अग्नि=पावक) २७ १५ [वसूपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप् । ततोऽतिशायने तमप्]

वसुधितिम् पृथिव्यादिवसूना धितिर्यस्मात्तम् (वायुम्) २७ २४ वसूना द्रव्याणा धारकम् (अग्नि=विद्युदग्निम्) ४ ८ २ वसूना धितयो यस्य तम् (विद्वास जनम्) १ १२८ ८ **वसुधिती**=यौ वसूनि धरतस्तौ (अध्यापकोपदेशकौ) १ १८१ १ वसूना पदार्थाना धर्त्र्यौ द्यावापृथिव्यौ ३ ३१ १७ विद्याधारिके (भा०—अध्यापिकोपदेशिके स्त्रियौ) २८ ३८ वसूना धितिर्ययोर्द्यावापृथिव्योस्ते (द्यावापृथिवी) ४ ४८ ३ द्रव्यधारिके (उपासानक्ता) २८ १५ [वसु-धितिपदयो समास । वसुरिति व्याख्यातम् । धिति=डुधाञ् धारण-पोषणयो (जु०) धातो क्तिन् । औणादिको वा नि. । 'दधातेर्हि' रिति न भवति छन्दसि सर्वविधीना विकल्पनात् । धातोरित्त्वमपि छान्दसम् । वसुधिती वसुधान्यौ नि० ६ ४१]

वसुधेयस्य वसुधेय यस्मिँस्तस्य (विदुषो जनस्य) २१ ४८ कोषस्य २८ १४ ससारस्य २१ ५८ पृथिव्याद्या-धारस्य (भा०—ससारस्य) २१ ५७ द्रव्याधारस्य (ससारस्य) २८.३५ धनाऽऽधारस्य कोषस्य २८ ३६. वसूनि धेयानि यस्मिँस्तस्य जगत २८ १२ अन्तरिक्षस्य मध्ये २८ १५ वस्वैश्वर्यं धेय यत्र तस्येश्वरस्य २८ १६ सर्वपदार्थाधारस्य ससारस्य २१ ५६ धनकोशस्य २१.४६ [वसु-धेयपदयो समास । धेयम्=डुधाञ् धारणपोषणयो (जु०) धातो-र्यत् । वसुधेयस्य वसुधानाय नि० ६ ४१ इन्द्रो वसुधेय श० १ ८ २ १६]

वसुनीथ वेदादिशास्त्र-बोधाख्य सुवर्णादिधनञ्च यो नयति तत्सम्बुद्धौ (अध्यापक श्रोतर्वा) १२ ४४ [वसूपपदे णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि 'हनिकुषिनीरमि-काशिभ्य क्थन्' उ० २ २ सूत्रेण क्थन्]

वसुपतिम् वसूनामग्निपृथिव्यादीना पति पालक स्वामिनम् (इन्द्र=धारकमीश्वरम्), प्र०—कतमे वसव इति ? अग्निश्च पृथिवी च वायुश्चान्तरिक्ष चाऽऽदित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव, एतेषु हीद सर्वं वसु हितम्, एते हीद सर्व वासयन्ते, तद्यदिद सर्व वासयन्ते तस्माद्वसव इति श० १४ ५ ७ ४, १ ६ ६ धनस्वामिनम् (विद्वज्जनम्) ३.३६ ६ **वसुपतिः**=धनपालक (विद्वज्जन) ७ ४५ ३ वसूना पदार्थाना पालक (विद्वान् जन) ६ ५२ ५ पृथिवी आदि वासहेतु भूतो का पति (ईश्वर) आर्याभि० १ ३०, ऋ० ६ ३ ४० २४.

वसुपत्नी वसूना पालिका (पृथिवी) १ १६४ २७ [वसु-पत्नीपदयो समास । पत्नी=पतिप्राति० स्त्रिया 'पत्युर्नो यज्ञसयोगे' अ० ४ १ ३३ सूत्रेण ङीप् नकारादेशश्च]

वसुमता प्रशस्तानि सुवर्णादीनि विद्यन्ते यस्मिँस्तेन (रथेन) १ ११८ १० प्रशसितधनयुक्तेन (रथेन) १ १२५ ३ बहुधनयुक्तेन (रथेन=यानेन) ४ ४ १० **वसुमते**=बहवो वसवश्चतुर्विंशतिवर्षब्रह्मचर्यसम्पन्ना विद्वासो विद्यन्ते यत्र तस्मै कर्मणे ६ ३२ **वसुमन्तम्**=बह्वैश्वर्यम् (जनम्) ६ ६८ ६ बहुविधद्रव्यसहितम् (रयि=धनम्) ४ ३४ १०.

वाना:=स्वगुणैं सर्वानाच्छादयन्त (विद्वासो जना), प्र०—अत्र 'बहुल छन्दसि' इति शपो लुड् न शानचि व्यत्ययेन मकारस्य वकार १ ६० २ [वस निवासे (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्। मकारस्य वकारो वर्णव्यत्ययेन। वस आच्छादने (अदा०) धातोर्वा शानचि छान्दस रूपम्। अन्यत्र वसु आनपदयो समासे छान्दस रूपम्]

वसव्यम् वसुषु द्रव्येषु भवम् (राध=धनम्) २ १३ १३ वसुषु पृथिव्यादिषु भवम् (राध) २ १४ १२. **वसव्यस्य**=वसुषु धनेषु साधो (सौभगस्य=महदैश्वर्यस्य) ४ ५५ ८ [वसुप्राति० भवार्थे साध्वर्थे वा यत्]

वसव्या वसुषु धनेषु साध्वी (सूनृता=सत्यप्रियवाणी) ७ ३७ ३ [वसव्यम् इति व्याख्यातम्। तत स्त्रिया टाप्]

वसानम् आच्छादयतम् (सूर्यम्) १ १५२ ४ **वसान:**=प्राप्त (वैश्वानर=राजा) ४ ५ १५ वासयन् (सूर्य) १३ ३१ शरीरमाच्छादयन् (सभासेनेश) १६ ५१ आच्छादित (विद्वज्जन) ३ १ ५ धारयन् (राजा) ६.२६ ३. स्वीकुर्वाण (विश्वरूपोऽग्नि) ३३ २२ धरन् (राजा) ५.४८ ५ आच्छादक (अग्नि) २ १० १ गृह्णन् (सूर्य) ३ ३८ ४ [वस आच्छादने (अदा०) धातो शानच्]

वसाना परिदधती (पत्नी) १ १२२ २ स्वीकुर्वती (उषा) १ १२४ ३ धारयन्ती (सुन्दरी स्त्री) ३ ३६ २ **वसाना:**=वस्त्राभूषणैराच्छादिना (विदुष्य स्त्रिय) १०,७ [वस आच्छादने (अदा०) धातो शानजन्तात् स्त्रिया टाप्]

वसापावान वसा निवास पान्ति ते (वीरजना) ६ १६ [वसोपपदे पा रक्षणे (अदा०) धातो कर्त्तरि वनिप्। वसा=वस निवासे (भ्वा०) धातोरच्। ततष्टाप्]

वसाम् वसता प्राणिनाम् ५ २ ६ [वस निवासे (भ्वा०) धातो क्विप्। तत षष्ठी विभक्ति].

वसिष्ट वसेत् २ ३६ १ **वसिष्व**=धर, प्र०—अत्र 'छन्दस्युभयथा' इत्यार्धधातुकमाश्रित्य लोट्यपि वलादिलक्षण इट् १ २६ १ [वस निवासे (भ्वा० धातोर्लुड्। अटोऽभाव। व्यत्ययेनात्मनेपदम् इडागमश्च छान्दस। अन्यत्र लोट्]

वसिष्ठ अतिशयेन वसो (अग्ने=वह्निरिव राजन्) ७ १ ८ प्रशस्तविद्वन् (जन) ७ ३३ १० **वसिष्ठम्**=यो वसति धर्मादिकर्मसु सोऽतिशयितस्तम् (नर्यं=नृषु साधु सत्पुरुषम्) १ ११२ ९ उत्तम विद्वासम् ७ ३३ १३

वसिष्ठस्य=अतिशयेन विदुष ७ ३३ ५ **वसिष्ठ**=अतिशयेन वसुमान् (पूर्णविद्वज्जन) ७ ३३ १२ अतिशयेन विद्यादिधनयुक्त (आप्तो विद्वान्) ७ ३३ १४ अतिशयेन वसु. (विद्वज्जन) ७ ४२ ६ अतिशयेन विद्यासु कृतवास (विद्वज्जन) ७ २६ ५ अतिशयेन धनाढ्य (मनुष्य:) ७ ६ ६ अतिशयेन वासयिता (ऋषि) १३ ५४ **वसिष्ठा:**=धनेऽत्यन्त वास कुर्वन्त (नर=नेतारो जना) ७ ३३ ४ अतिशयेन सद्गुणकर्मसु निवासिन (सज्जना) ७ ३७ ४ येऽतिशयेन धनिन (पितर=ज्ञानिनो जनका) १६ ५१ अतिशयेन वसव (विद्वास पितर) ७ ७ ७ अतिशयेन ब्रह्मचर्ये कृतवासा (विद्वज्जना) ७ ३३ ३ सर्वविद्यायुक्तमगुणेष्वतिशयेन रममाणा (पितर) ऋ० भू० २६०, [वस निवासे (भ्वा०) धातो कर्त्तरि तृजन्तादतिशायन इष्ठन्। 'तुरिष्ठेमेयस्सु' इति तृचो लोप। यद्वै नु श्रेष्ठस्तेन वसिष्ठोऽथो यद् वस्तृतमो वसति तेनोऽएव वसिष्ठ श०, ८ १ १ ६ येन वै श्रेष्ठस्तेन वसिष्ठ (हिंकार) गो० उ० ३ ६ एष (प्रजापति) वै वसिष्ठ श० २ ४ ४ २ प्रजापतिर्वै वसिष्ठ कौ० २५ २ प्राणा वै वसिष्ठ ऋषि श० ८ १ १ ६ सा ह वागुवाच। (हे प्राण) यद्वा ऽह वसिष्ठाऽस्मि त्व तद् वसिष्ठोऽसीति श० १४ ६ २ १४ अग्निर्वै देवाना वसिष्ठ ऐ० १ २८ वसिष्ठस्य जनित्रे (सामनी) भवतो वसिष्ठो वा एते पुत्रहत सामनी अपश्यत् स प्रजया पशुभि प्राजायत ता० १६ ३ ८ ततो वै वसिष्ठपुरोहिता भरता प्राजायन्त ता० १५ ५ २४ ये वै ब्राह्मणा शुश्रुवासस्ते वसिष्ठा जै० २ २,४२ रथन्तरमाजभार वसिष्ठ ऐ० आ० ३ १ ६]

वसिष्ठहनु: वसिष्ठस्याऽतिशयेन वासहेतोर्हनुरिव हनुर्यस्य तम् (राजतुल्य जनम्), प्र०—अत्र 'सुपा सुलुक्०' इत्यम स्थाने सु ३६ ८ [वसिष्ठ-हनुपदयो समास]

वसिष्ठास: अतिशयेन वासयितार (सेनाजना) ७ २३ ६ अतिशयेन वसव (प्रजाजना) २० ५४ [वसिष्ठ इति व्याख्यातम्। ततो जसोऽसुगागम]

वसीय: अतिशयेन वस्तृ वसीय (प्राण) १८ ८ [वस निवासे (भ्वा०) धातो तृजन्तादतिशायन ईयसुन्। तृचो लोप]

वसु सुखेषु वसन्ति येन तद्धन विद्याऽऽरोग्यादिसुवर्णादिक वा, प्र०—वस्विति धननामसु पठितम् निघ० २ १०, १ १० ६ वसन्ति सुखेन यत्र तद् विज्ञानम् १ ५५ ८ सुखेषु वासयितृ (राध.=धनम्) २ २२ ३ पर प्रकृष्ट द्रव्यम्

सा (भार्या) ७ १ ६ [वसु सुवन्ताद् आत्मन इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसि' सूत्रेण उ.। अथवा वसूपपदे यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्विप्। 'अन्येपामपि०' इति दीर्घः। वसूयव वसुकामा नि० ६ ५.]

वस्त वस्ते आच्छादयति, प्र०—अत्र वर्त्तमाने लडडभावश्च १ २५ १३ **वस्तम्**=निवास कुर्याताम् ऋ० भू० २०६, ऋ० ८ ३ २८ २ **वस्ताम्**=आच्छादयताम् १७ ४६ छादयतु ६ ७५ १८ **वस्ते**=आच्छादयति ३ ५५ १४ कामयते ४ २५ २ धरति २६ ४८ [वस आच्छादने (अदा०) धातोर्लट् अटोऽभावश्च। अन्यत्र लोट् लट् च। व्यत्ययेन परस्मैपदञ्च]

वस्तवे निवस्तुम् १ ४८ २ [वस निवासे (भ्वा०) धातोस्तुमर्थे तवेन्]

वस्तः व्यवहारैराच्छादितो युक्त (पुरुष) १४.६ आच्छादक (प्राज्ञो जन) १ १६१ १३ दिन मे म० प्र० १५१, १० ४० २ [वस आच्छादने (अदा०) धातो क्त औणादिको बहुलवचनात्]

वस्ता आच्छादयिता (परमात्मेव राजा) ३ ४९ ४ [वस आच्छादने (अदा०) धातोस्तृच्। उडभावश्छान्दस]

वस्तिना नाभेरधोभागेन २५ ७ **वस्तिः**=वासहेतु (पुरुष) १९ ८८ [वस आच्छादने (अदा०) वस निवासे (भ्वा०) धातोर्वा 'वसेस्ति' उ० ४ १८० सूत्रेण ति]

वस्तो. दिनम् ६ ४ २ दिनात् २९ २९ दिने २८ १२ दिवसस्य मध्ये ६ २५ ६ प्रतिदिनम् १ १७७ ५ दिन दिनम् ३ ८ [वस्तो अहर्नाम निघ० १ ९ वस्तो दिवा नि० ३ १५]

वस्तोः वासयितुम् १ १७४ ३. [वस निवासे (भ्वा०) धातोस्तुमर्थे तोसुन्]

वस्तोः वसथ ऋ० भू० २१०, [वस निवासे (भ्वा०) धातोर्लट्। शपो लुक्। वर्णव्यत्ययेनाकारस्योकार]

वस्त्रदाः ये वस्त्राणि ददति ते (धनाढ्या जना) ५ ४२ ८ [वस्त्रोपपदे डुदाञ् दाने (जु०) धातो क]

वस्त्रमथिम् यो वस्त्राणि मथ्नाति तम् (तायु=तस्करम्) ४ ३८ ५ [वस्त्रोपपदे मथे विलोडने (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' इति इन्। वस्त्रमथिम्=वस्त्रमाथिनम् नि० ४ २४]

वस्त्रा वस्त्राणि ५ ४७ ६ आच्छादनानि १ १३४ ४ [वस्त्रप्राति० शेर्लोपश्छन्दसि]

वस्त्राणि शरीराच्छादकानि १.१५२ १ कार्पासौर्णकौषेयकादीनि १.२६ १. **वस्त्रैः**=वासोभि ७ १४ ३ [वस आच्छादने (अदा०) धातोरौणा० ष्ट्रन्। वस्त्र वस्ते नि० ४ २४]

वस्त्रेणेव यथा पटेन १.१४० १ [वस्त्रेण-इवपदयो समास]

वस्त्रेव यथा वस्त्राणि प्राप्यन्ते तथा ५ २९.१५ [वस्त्रा-इवपदयो समास। वस्त्रा=वस्त्रप्राति० शेर्लोपश्छन्दसि]

वस्नम् हट्टव्यवहारम् (विविधव्यापारम्) ४.२४ ६. [वस निवासे (भ्वा०) धातो 'धापृवस्य०' उ० ३ ६ सूत्रेण न.]

वस्नयन्ता वस्नमिवाचरन्तौ राजप्रजाजनौ ६ ४७ २१ [वस्नप्राति० आचारेऽर्थे क्यच्। तत सन्नन्ताद् द्विवचनस्याकारादेश]

वस्नेव पण्यक्रियेव ३ ४९ [वस्ना-इवपदयो समास]

वस्म निवास-स्थानम् ४.१३ ४ **वस्मनः**=निवसन्त (वय=पक्षिण) २.३१ १. [वस निवासे (भ्वा०) धातोर्बाहु० औणा० मनिन्]

वस्यःइष्टये वसीयसोऽतिशयितस्य धनस्य सङ्गमनाय १ १७६ १ वसीयस इष्टये सङ्गतये, प्र०—अत्र वसु-शब्दान्मतुप् ततोऽतिशय ईयसुनि 'विन्मतोर्लुक्' अ० ५ ३ ६५ इति मतोर्लुक् 'टे.' अ० ६ ४ १५५ इति टेर्लोपस्तत 'छान्दसो वर्णलोपो वा' इतीकारस्य लोपश्च १.२५ ४ [वस्यस्-इष्टिपदयो समास। इष्टि=यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो स्त्रिया क्तिन्। यजादित्वात् किति सम्प्रसारणम्]

वस्यसः येऽतिशयेन वसन्ति ते वसीयासस्तान् (भा०—सुखनिवासान्), प्र०—अत्र 'छान्दसो वर्णलोपो वा' इतीकारलोप ३ ५८ अतिशयेन वसीयसो वसुमत (जनान्) २ १७ ८ [वसुप्राति० प्रशसाया मतुवन्तादतिशायन ईयसुन्। अन्यत् पूर्वपदे व्याख्यातम्]

वस्यसी अतिशयेन वसुमती (स्त्री) ५ ६१ ६ [वस्यस् इति व्याख्यातम्। तत स्त्रिया ङीप्]

वस्यः अतिशयेन वासहेतुम् (धनधान्यादिकम्) ६ ४४ ७ अतिशयेन धनम्, प्र०—अत्र वसुशब्दादीयसुन् प्रत्यय 'छान्दसो वर्णलोपो वा' इतीकारलोप १ ३१ १८ वसुषु साधु (विद्वज्जन) १.१०९ १ वशीय (स्वस्वामिन राजानम्) ७ ३२ १९ अत्युत्तम धनम् २ ३९ ५ वसीयसो-

प्रशस्तधनप्रापक देशम् २ २४ २ [वसुप्राति० प्रशंसायां मतुप् । भूम्यर्थे वा]

वसुमती बहूनि वसूनि द्रव्याणि विद्यन्ते यस्या सा (इडा=प्रशसनीया वाणी) २८ १८ **वसुमतीम्**=वसूनि बहूनि वस्तूनि भवन्ति यस्या ताम्, भा०—बहु-सुखप्रापिकाम् (छायाम्=आश्रयम्), प्र०—अत्र भूम्यर्थे मतुप् २.८ [वसु-प्राति० भूम्यर्थे मतुप् । तत स्त्रिया ङीप्]

वसुमती बहवो वसवो विद्यन्ते ययोस्ते (द्यावापृथिवी) ३ ३० ११ [वसुमतीति व्याख्यातम् । ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

वसुवनिम् धनाना सम्भाजनम् ७ १ २३ [वसूपपदे वन सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' इति सूत्रेण इन् । अग्निर्वै वसुवनि श० १ ८ २ १६]

वसुवने ऐश्वर्यसेवकाय (जनाय) २१ ५८ धनसेविने (पुरुषाय) २८ ३६ द्रव्ययाचिने (पुरुषाय) २८ ३६ धन-विभाजकाय (मनुष्याय) २८ ३५ धनसेवनाय २१ ४६ वसुप्रदाय जीवाय २८ २० पदार्थविद्यायाचिने (भा०—सुपात्राय याचमानाय) २८ २१ यो वसूनि वनुते याचते तस्मै (पुरुषाय) २८ १६ धनेच्छुकाय (नृपाय जनाय वा) २१ ५६. पृथिव्यादिसेवकाय (जीवाय) २१ ५७ धनप्रापणाय २१.४८ [वसूपपदे वन सम्भक्तौ (भ्वा०) धातो कर्त्तरि क्विप् । वनु याचने धातोर्वा क्विप् । वसुवने वसुवननाय नि० ६ ४१]

वसुवने पृथिव्यादीना सविभागे जगति २८ १५ धनदानाधिकरणे (जगति) २८ १६ [वसूपपदे वन सम्भक्तौ (भ्वा०) धातोर्घञर्थे क]

वसुवाहनम् वसूना द्रव्याणा वाहनम् (रथ=विमाना-दियानम्) ५ ७५ १ [वसु-वाहनपदयो समास । वाहनम्=वह प्रापणे (भ्वा०) धातोर्णिजन्लाल् ल्युट्]

वसुवित् यो वसूनि धनानि विन्दति प्राप्नोति स (पुरुष पतिर्वा) ३८ ५ वसूनि सर्वाणि द्रव्याणि विदन्ति ये येन वा (ईश्वरो विद्वान्वा) १ ६१ १२ यो वसूनि सर्वाणि वस्तूनि यथावद्वेत्ति वेदयति वा स (परमात्मा) ३ २६ सब पृथिवी आदि वसुओं का जानने वाला, सर्वज्ञ और विद्यादि धन का दाता (ईश्वर) आर्याभि० १ ३८, ऋ० १ ६ २१ १२ [वसूपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप्]

वसुवित्तमम् वसून् पृथिव्यादिलोकान् वेत्ति सोऽति-शयितस्तम्, पृथिव्यादिलोकान् वेदयति सूर्यरूपेणाग्निरेतान् प्रकाश्य प्रापयति स वसुवित्, अतिशयेन वसुविदिति वसु-वित्तमो वा तम् (परमेश्वर भौतिकमग्नि वा) ३ ३८ योऽतिशयेन वसु वेत्ति तम् (देव=दातार जनम्) ६ १६.४१ यो वसूनि विन्दति स वसुवित्, सोऽतिशयितस्तम् (अग्नि=बहुश्रुत सज्जनम्) १ ४५ ७ **वसुवित्तमः**=यो वसूनि द्रव्याणि वेदयति प्रापयति सोऽतिशयित, भा०—पदार्थ-प्राप्तये साधकतम' (अग्नि=ईश्वरो भौतिकोऽग्निर्वा) ३ ३६ [वसुविदिति व्याख्यातम् । ततोऽतिशायने तमप्]

वसुविदा बहुधनप्रदौ (अ०—अध्यापकोपदेशकौ) १ ४६ २ वसुविदावग्निजलवद् वर्त्तमानावध्यापकोपदेशकौ १ ४६ २ [वसुविद्प्राति० प्रथमाद्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश । वसुविद्=वसूपपदे विदॢ लाभे (तुदा०) विद सत्तायाम् (दिवा०) धातोर्वा क्विप्]

वसुश्रवाः वसूनि सर्वाणि श्रवासि श्रवणानि यस्य स (अग्नि=सर्वाभिरक्षकेश्वर) ३.२५ वसूनि धनानि श्रवणे यस्य स (अग्नि=वेदविदध्यापकोपदेशक) २५ ४७ धनधान्ययुक्त (राजा) ५ २४ २ वसूनि धनानि श्रवास्य-न्नानि च यस्मात् स (अग्नि=भौतिक) १५ ४८ [वसु-श्रवस्पदयो समास । वसु धननाम निघ० २ १० श्रव अन्ननाम निघ० २.७]

वसूयन्तः आत्मनो वसूनि विज्ञानादीनि धनानीच्छन्त: (आयव=विद्वासो जना) १ १३० ६ [वसु सुबन्ताद् आत्मन इच्छाया क्यजन्ताच्छतृ]

वसूया आत्मनो वसूना धनानामिच्छया १ १६५ १ आत्मनो वसूनीच्छन्ति तया (सुक्षेत्रिया=सुनीत्या) १ ६७ २ [वसुसुबन्ताद् आत्मन इच्छायामर्थे क्यच् । तत स्त्रिया 'अ प्रत्ययाद्' इत्यकार । ततष्टाप्]

वसूयवः आत्मनो वसूनि विद्याधनानीच्छन्त (मतय=विद्वज्जना) १ ६२.११ ये वसून् पृथिव्यादीन् युवन्ति मिश्रयन्त्यमिश्रयन्ति ते विद्वास १ ४६ ४ आत्मनो वस्विच्छव (मनुष्या) ५ २५ ६ वसूनि धनानि कामय-माना (धार्मिका मनुष्या) ७ ३२ २ य आत्मनो वसूनि द्रव्याणीच्छन्ति ते (मनुष्या), प्र०—अत्र वसु-शब्दात् 'सुप आत्मन क्यच्' इति क्यच् प्रत्यय 'क्याच्छन्दसि' उयु प्रत्यय 'अन्येषामपि०' इति दीर्घ १ १२८ ८ ये वसूनि युवन्ति मिश्रयन्ति ते (विद्वासो जना) ३.२६ १ **वसूयुम्**= आत्मनो वसु द्रव्यमिच्छुम् (सज्जनम्) ४ ४४ १ **वसूयु** = आत्मनो धनमिच्छु (जन) ५ २६.१५ वसूनि धनानि कामयमान (राजा) ७ ३४.२१ या वसूनि द्रव्याणि कामयति

वहमानाः प्राप्नुवत्य (उषस) १.१२३ १२. [वह प्रापणे (भ्वा०) धातो शानच् । तत स्त्रिया टाप्]

वहिष्ठयोः अतिशयेन वोढ्रो (अश्वयो) ६ ४७.६ **वहिष्ठान्**=अतिशयेन वोढॄन् विद्याधर्मप्रापकान् (नॄन्) १ १२१ १२ **वहिष्ठाः**=अतिशयेन वोढार (अग्न्यादिपदार्था) ५ ५६ ६ [वह प्रापणे (भ्वा०) धातो कर्त्तरि तृजन्तादतिशायन इष्ठन् । 'तुरिष्ठेमेयस्सु' इति तृचो लोप.]

वहिष्ठा अतिशयेन वोढा (वायु =पवन), प्र०—अत्राऽऽकारादेश १ १३४ ३ [वहिष्ठ इति पूर्वपदे द्रष्टव्यम्, नत 'सुपा सुलुक्०' इति सोराकारादेश]

वहिष्ठेभिः अतिशयेन वोढृभि. (किरणाकर्षणादिभि) ४ १३ ४ [वहिष्ठ इति व्याख्यातम् । ततो भिस ऐस् न भवति छन्दसि]

वहीयसः सद्यो देशान्तरे प्रापकानग्न्यादीन् १ १०४ १. [वह प्रापणे (भ्वा०) धातो कर्त्तरि तृजन्तादतिशायन ईयसुन् । तृचो लोप]

वहेन प्रापणेन २५ ३ [वह प्रापणे (भ्वा०) धातोर्घञर्थे क]

वह्नयः वहन्ति प्रापयन्ति वार्त्ता पदार्थान् यानानि च यैस्ते (अ०—विद्युदादय), प्र०—अत्र वहिश्रिश्रुयु०' उ० ४.५१ अनेन करणे नि प्रत्यय १ १४ ६ सुखस्य वोढार (विश्वेदेवास =समस्ता वेदपारगा विद्वास) १ ३.६ शुभकर्मगुणाना वोढार (ऋभव =मेधाविजना) १ २० ८ विद्वासो जितेन्द्रिया सुशीला मनुष्या) १ ४८ ११ वोढारोऽश्वा २ २४.१३ अग्नय इव वर्त्तमाना (विद्वज्जना) ५ ७६ ४ **वह्नये**=राज्यभार वोढ्रे (वेधसे =विवेकिजनाय) २ २१ २ **वह्निभिः**=वोढृभिर्मरुद्भिस्सह १ ६ ५ वहनसमर्थै (देवै =विद्वद्भि) १ ४४ १३ कार्यनिर्वाहकै (देवै =विद्वज्जनै) ३३ १५ **वह्निम्**=प्रापकम् (अपत्यम्) ३ ३१ २ वाहकम् (मनुष्यम्) ३ १ १ पदार्थाना वोढारम् (अग्निम्) १ ६० १ **वह्निः**=पावकवद् वोढा विद्वान् १ ११३ १७ वोढा वायु ३ २० १ विद्याया वोढा (विद्वज्जन) २७ १४ सद्यो वोढाऽग्नि ३५ १३ वोढा विद्यासुखप्रापक (अग्नि =राजा) ७ १६ ६ सुखाना प्रापक (परमेश्वरो विद्वान् वा) १ ७६ ४ स्वप्रकाशक, सर्वरसवाहक (ईश्वर) आर्याभि० २ १६, ५ ३१ [वह प्रापणे (भ्वा०) धातो 'वहि श्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' उ० ४ ५१ सूत्रेण नि । वह्नि अश्वनाम निघ० १ १४ वह्नि वोळ्हा नि० ३ ४ वह्निम् पुत्रम् नि० ३ ६ वह्नय =वोढार नि० ८ ३ वह्निर्वा अनड्वान् तै० १ १ ६.१० वह्निर्होता तै० म० २ २ १० ५ वह्निरग्नि हव्यवाहन मै० १ २ १२ काठ० २ १३ वह्निना हि तत्र गच्छति यत्र जिगमिषति जै० २ ६६]

वह्नितमम् वहनि प्रापयति यथायोग्य सुखानि स वह्नि सोऽतिशयितस्तम् (ईश्वर भौतिकमग्नि वा) १ ८ **वह्नितमः**=अतिशयेन वोढा (विद्वज्जन) २१.३. **वह्नितमान्**=अतिशयिता वह्नयो वोढारस्तान् (विदुषो जनान्) ६.७. [वह्निरिति व्याख्यानम् । ततोऽतिशायने तमप्]

वह्येशयाः या वह्ये प्रापणीये शेरते ता (नारी.=स्त्रिय ७ ५५ ८ [वह्योपपदे शीङ् शये (अदा०) धातो 'अधिकरणे शेते.' सूत्रेणाच् । सप्तम्या अलुक् । वह्यम्=वह प्रापणे (भ्वा०) धातो 'वह्य करणम्' अ० ३ १ १०२ सूत्रेण करणे यत् । वहधातोर्वा बाहु० 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक्]

वशनर्तिनम् वशे नर्त्तितु शील यस्य तम् (शैलूष नट वा) ३० २१ [वशोपपदे नृती गात्रविक्षेपे (दिवा०) धातोस्ताच्छील्ये णिनि]

वंशमिव यथोत्कृष्टैर्गुणै शिक्षणैश्च स्वकीय वशमुद्यमवन्त कुर्वन्ति तथा १ १० १. [वशम्-इवपदयो समास]

वंसगः यो वस सम्भजनीय गच्छति गमयति वा स वृषभ १ ५५ १ यो वसान् सत्यासत्यविभाजकान् गच्छति स (राजा) ५ ३६ १ सम्भक्ता (इन्द्र =सभेश) १.१३०.२२ वस धर्मसेविन, सविभक्तपदार्थान् गच्छतीति (इन्द्र =ईश्वर सूर्यो वा) १ ७ ८ यो वस सम्भजनीय व्यवहार गच्छति स (उग्र =तेजस्विजन) ६ १६ ३६ [वसोपपदे गम्लृ गतौ (भ्वा०) धातोर्ड प्रत्यय 'अन्येष्वपि दृश्यते' सूत्रेण । वसा =वन सम्भक्तौ (भ्वा०) धातोरौणा० बाहु० स]

वंसत् विभजेत् ६ ६८ ५ **वंसाम**=विभजेम ६.१६.८ **वंसि**=सम्भजसि ५ ७० १ **वंसीमहि**=विभजेम ६ १६ १० **वंस्व**=सम्भज १ ४८ ११ [वन सम्भक्तौ (भ्वा०) धातोर्लेट् । सिब् विकरणश्छन्दसि । 'व्यत्ययो बहुलम्' इति द्विविकरणता । अन्यत्र लटि शपो लुक् । लोटि चाप्यग्रे शपो लुक् । व्यत्ययेनात्मनेपदश्च]

वा पक्षान्तरे १ ८ ६ चाऽर्थे १८ ३२ अथवा ५ ८५ ७ यद्वा आर्याभि० २ ३६, ३६ २ व्यवहाराऽन्तरे

ऽतिधनाढ्यान् (जनान्) ५ ५५ १० वसीयोऽतिशयेन सुष्ठु धनम् ६ ४७ ७ वसीयान् (राजा) ५ ३१ २ अतिशयेन वासयितृ (महद्वस्तु ब्रह्म) २ २ १३ अत्युत्तम वास स्थानम् २ १ १६ वस्तु योग्य (विद्वान् जन) १ १४१ १२ अतिशयेन वसु तत् (अपूप=भोज्य पदार्थम्) १२ २६ अतिशयेन श्रेष्ठ धनम् ४ २१ ४ [वसुप्राति० अतिशायन ईयसुन्। ईकारलोपश्छान्दस। अथवा वसुप्राति० 'तत्र साधु' रिति यत्]

वस्यान् अतिशयेन वासकर्त्ता (सोम=महैश्वर्ययोग) ६ ४१ ४ [वस निवासे (भ्वा०) धातो कर्त्तरि तृजन्ताद् अतिशायन ईयसुन्। 'तुरिष्ठेमेयस्सु' इति तृचो लोप 'छान्दसो वर्णलोपो वे' ति प्रत्ययस्येकारस्य लोप]

वस्वः धनानि ४ १७ ११ वसुनो धनस्य १९ ६३ वसुना सुखेन वासहेतोर्धनस्य ३ १९ ३ वसोर्धनस्य १ ५१.१ वसूनि १ ७१ ६ द्रव्याणि, प्र०—'वाच्छन्दसि सर्वे विधयो भवन्ति' इति नुमभावे 'जसादिषु छन्दसि वा वचनम्' इति गुणाभावे च यणाऽऽदेश १ ६० २ पृथिव्यादे ५ १५ १

वस्वी याऽग्न्यादिपदार्थाख्यवसुविद्यासम्बन्धिनी वसुभिश्चतुर्विंशतिवर्षकृतब्रह्मचर्यै प्राप्ता सा (वाग् विद्युद्वा) ४ २१ पृथिव्यादिवसुसम्बन्धिनी (सन्दृष्टि=विद्यादर्शनम्) ६ १६ ७५ वसूनामियम् (दक्षिणा) ६ ६४ १ धनसम्बन्धिनी (शक्ति=सामर्थ्यम्) ७ २० १० धनकारिणी (शक्ति) ७ २१ १० **वस्वीभिः**=धनप्रापिकाभि क्रियाभि ३ १३ ५ **वस्वीः**=बहुपदार्थयुक्ता (पुरन्धी=द्यावापृथिव्य) ५ ४१ ६ [वसुरिति वसव पदे द्रष्टव्यम्। तत स्त्रियाम् 'वसुशब्दाद् गुणवचनाद् ङीबाद्युदात्तार्थम्' अ० ४ १ ४४ वा०सूत्रेण ङीप्। वस्वी रात्रिनाम निघ० १.७]

वह प्राप्नुहि ३५ २० प्रापय ३३ ७० प्राप्नोतु ६ ६४ ५ गमय ६ ६४ ४ वहसि प्रापयसि, वहति प्रापयति वा, प्र०—अत्र पक्षान्तरे पुरुषव्यत्यय १ १३ १ **वहत**=वहन्ति, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २३ २२ **वहतम्**=प्रापयतम् १ ४७ ६ प्राप्नुतम् ३ ५३ १ प्राप्नुत १ ३४ १२ **वहताम्**=प्रापयताम् ३ ४१ ६ **वहति**=प्राप्नोति प्रापयति वा ३ ५८ १ **वहतु**=प्राप्नोतु १३ ३४ **वहते**=प्राप्नोति प्रापयति वा ५ ३० ३ **वहथ**=प्राप्नुथ ६ ६५ ४ **वहथः**=प्राप्नुथ १ ११६ ३ **वहध्वे**= प्राप्नुत ५ ६० ७ वहत ५ ५२ १३ **वहन्ति**=चालयन्ति १ १६४ ३ प्रापयन्ति १ १६४ १४ प्राप्नुवन्ति १ ५० १ **वहन्तु**=प्राप्नुवन्तु प्रापयन्तु वा ६ ४४ १९ गमयन्तु ५ ३१ ६ **वहन्ते**=प्राप्नुवन्ति ५ ५८ १ **वहसि**=धारण करता है स० वि० २०८, अथर्व० ६ ५ १७ प्राप्नोषि १८ ६२ **वहसे**=प्राप्नोषि प्रापयसि वा ५ ३६ ५ **वहातः**=प्राप्नुत ३ ४३ ४ वहेताम् ३ ३५ २ **वहाते**=वहेताम् ५ ३७ ३ उठा सकते है स० वि० १०५, ५ ३७ ३ **वहान्**=वहन्तु प्राप्नुवन्तु २० ५६. समन्तात् प्राप्नुयु १ ८४ १८ **वहामि**=प्राप्नोमि प्रापयामि वा ५ ४६ १ **वहासि**=प्राप्नुया १ ७४ ६ **वहेथे**=प्राप्नुथ १ १८० ६ प्रापयत १ १३५ ८ प्रापयेताम्, प्र०—अत्र पुरुषव्यत्यय ४ ४५ ३ **वहेयुः**=प्राप्नुवन्तु ६ ३७ ३ **वहतः**=प्रापयत ३३ ७८ प्राप्नुत १ ८४ २ धरत ५ ४१ ७ [वह प्रापणे (भ्वा०) धातोर्लोट्। अन्यत्र लट्, लेट्, लिङ, लङ् च। वहते गतिकर्मा निघ० २ २४]

वहतः वहनशीला (शक्तय) ३ ७ ४ [वह प्रापणे (भ्वा०) धातो शतृ। विभक्तिव्यत्यय]

वहतुम् वहति प्राप्नोति स्त्रियमिति वहतुर्भर्त्ता तम्, भा०—स्वाभीष्ट पतिम् १७ ६७ वोढारम् (भा०—स्वसदृश पतिम्) ४ ५८ ६ प्रापकम् (जनम्) १ १८४ ३ **वहतू**=प्रापकौ (यजमानपुरोहितौ (७ १ १७ [वह प्रापणे (भ्वा०) धातो 'एधिवह्योश्चतु' उ० १ ७७ सूत्रेण चतु। वहतुम्=वहनम् नि० १२ ११]

वहन् प्राप्नुवन् प्रापयन्वा (रथ=विमानादियानम्) ५ ७७ ३ **वहन्तः**=उपदेशेन प्राप्नुवन्त (मनुष्या) १ ६६ ५ ब्रह्मचर्यादि तप का आचरण करते हुए (मनुष्य लोग) स० प्र० ४२३, ६ ८३ १ [वह प्रापणे (भ्वा०) धातो शतृ]

वहन्ता प्रापयन्तौ (वायुविद्युतौ) ६ ६२ ४ प्राप्नुवन्तौ (अश्विनौ=सभासेनेशौ) १ ११६ १६ [वह प्रापणे (भ्वा०) धातो शत्रन्ताद् द्विवचनस्याकारादेश]

वहन्ती प्रवाह प्रापयन्त्य (नद्य) २ ३५ ६ प्रापयन्ती स्वादिष्ठा आप २ ३४ [वह प्रापणे (भ्वा०) धातो शत्रन्तान् ङीप् स्त्रियाम्]

वहमानः प्राप्नुवन् प्रापयन् वा (सूर्य) ७ ४५ १ **वहमाना**=नयन्तो धूर्त्ता (शत्रव) १ १७४ ६ [वह प्रापणे (भ्वा०) धातो शानच्]

वहमाना प्रापयन्तौ (विद्युदाघातौ) ५ ३१ ६ [वह प्रापणे (भ्वा०) धातो शानच्। ततो द्विवचनस्याकारादेशश्छान्दस]

त्वष्टा वाग्वीद सर्व ताष्टीव ऐ० २ ४ वाग्वै दध्यङ्ङाथर्वणः (यजु० ११ ३३) श० ६ ४ २ ३ वाग्वा अर्बुदम् तै० ३ ८ १६ ३ वाग्वै भर्ग श० १२ ३ ४ १० वागेव भर्ग गो० पू० ५ १५ वाग्वा उत्तरनाभि श० १४ ३ १ १६ वागुदयनीयम् कौ० ७ ६ वाग् वामभृत् श० ७ ४ २.३५ वाग्वै शर्म (ऋ० ३ १३ ४) ऐ० २ ४० वाग्वै स्रक् श० ६ ३ १ ८ वागेवादाभ्य (ग्रह) श० ११ ५ ६ १ वाग्वै सीतामसर श० ७ २ ३ ३ वागिति श्रोत्रम् जै० उ० ४ २२ ११ वाग्वा इन्द्र कौ० २ ७ वाग्घ्यैन्द्री ऐ० २ २६ एतद्ध वा इन्द्राग्न्यो प्रिय धाम यद् वागिति ऐ० ६ ७ गो० उ० ५ १३ अग्निर्मे वाचि श्रित तै० ३० १० ८ ४ सा या सा वागग्निस्स जै० उ० १ २८ ३ सा या सा वाग् आसीत् सोऽग्निरभवत् जै० उ० २ २ १ या वाक् सोऽग्नि गो० उ० ४ ११ वागेवाऽग्नि श० ३ २ २ १३ वाग्वाऽअग्नि श० ६ १ २ २८ जै० उ० ३ २ ५ तपो मे तेजो मेऽन्नम् मे वाङ् मे । तन्मे त्वयि (अग्नौ) जै० उ० ३ २० १६ वाग्वाऽअग्न्य (अग्ने) स्वो महिमा श० १४ २ १७ वाग्वाऽअस्य (प्रजापते) स्वो महिमा श० २ २ ४ ४ प्रजापतिर्वा इदमेक आसीत्तस्य वागेव स्वमासीद् वाग् द्वितीया स ऐक्षते मामेव वाच विसृजा इय वा इद सर्व विभवन्त्येष्यतीति स वाच व्यसृजत काठकसहितायाम् १२ ५ प्रजापतिर्हि वाक् तै० १ ३ ४ ५ वाग्वि प्रजापति श० १ ६ ३ २७ वाग्वै प्रजापति श० ५ १ ५ ६ प्रजापतिर्वै वाक्पति श० ३ १ ३ २२ तदेता वा ऽअस्य (प्रजापते) ता पञ्च मर्त्यास्तिन्व आसन् लोम त्वङ् मासमस्थि मज्जाथैता अमृता मनो वाक् प्राणश्चक्षु श्रोत्रम् श० १० १ ३ ४ वाग्वाऽइद कर्म प्राणो वाचस्पति श० ६ ३ १ १६ नमो वाचे प्राणपत्न्यै स्वाहा प० २ ६ वाक् च वै प्राणश्च मिथुनम् श० १ ४ १ २ सा ह वागुवाच हे प्राण यद्वा ऽअह वसिष्ठाऽस्मि त्व तद् वसिष्ठोऽसीति श० १४ ६.२.१४ वाग्वातस्य पत्नी गो० उ० २ ६ वाग्वै वायु तै० १ ८ ८ १ ता० १८ ८ ७ तस्मात् सर्वे प्राणा वाचि प्रतिष्ठिता श० १२ ८ २ २५ तस्या (वाच) उ प्राण एव रस जै० उ० १ १ ७ यावद्वै प्राणोऽपापो भवन्ति तावद्वाचा वदति श० ५ ३.५.१६ वाक् च वै मनश्च देवाना मिथुनम् ऐ० ५ २३ तस्य (मनस) एषा कुल्या यद्वाक् जै० उ० १ ५८ ३ वाग्दैवत्य साम वाचो मनो देवता जै० उ० १ ५६ १४ वाग्वै मनसो ह्रसीयसी श० १ ४ ४ ७ अपरिमिततरमिव हि मन परिमिततरेव हि वाक् श० १.४ ४ ७ मनो ह पूर्वं वाचो यद्धि मनसाभिगच्छति तद्वाचा वदति ता० १ १ १ ३ वागिति मन जै० उ० ४ २२ ११ वाक् च वै मनश्च हविर्धाने कौ० ६ ३ सा या सा वागसौ स आदित्य श० १० ५ १ ४ वागिति चन्द्रमा जै० उ० ३ १३ १२ वाग्घ चन्द्रमा भूत्वोपरिष्टात् तस्थौ श० ८.१.२ ७. वाग् वै देवाना मनाना ऐ० २ १०. कौ० १० ६ वाग्यज्ञस्य (रूपम्) श० १२ ८ २.४. वाग्घि यज्ञ श० १ ५ २ ७ वाग्वै यज्ञ ऐ० ५ २४ श० १.१.२ २. वागु वै यज्ञ श० ११.४ ११ वाचो रसो यज्ञायज्ञीयम् (साम) ता० १८ ५.२१. वाग् यज्ञायज्ञीयम् (साम) ता० ५.३ ७ वाग्वै रूपम् (साम) ता० १६.५ १६ वाग्यज्ञस्य होता ऐ० २ ५ २८ वाग्वै यज्ञस्य होता श० १२.८.२ २३ वाग्घोता श० १ ५ १ २१ गो० उ० ५.४. वागेव होता गो० पू० २ १०. गो० उ० ३.८ वाग् वै होता (यजु० १३ ७) कौ० १३ ६ वाग्घोता षड् होतृणाम् तै० ३ १२ ५ २ अग्निर्वै होताधिदेवत वागध्यात्मम् श० १२ १ १ ४ गो० पू० ४.४ वाग्वै हविष्कृत् श० १ १ ४ ११. उद्गातारो वै वाचे भागधेय कुर्वन्ति ता० ६.७ ५ वाक् सर्वे ऋत्विज. गो० उ० ३.८ वाचा पशून् दाधार तस्माद् वाचा सिद्धा वाचाहूता आयन्ति तस्माद्‌ नाम जानते ता० १०.३ १३ त्र्यावृद् वै० वाक् ता० १० ४ ६.६ त्रेधा विहिता हि वाग्-ऋचो यजूँषि सामानि श० ६ ५ ३.४ सा वाऽएषा वाक् त्रेधा विहिता ऋचो यजूँषि सामानि श० १० ४ ५ २ वागिति सर्वे देवा जै० उ० १.६ २ वागेव देवा श० १४ ४ ३.१३ वाग् देव. गो० पू० २ १० वज्र एव वाक् ऐ० २ २१ वाग्घि वज्र ऐ० ४ १ वज्रस्तेन यद् वाक् ऐ० २ १६ वाक् च ह वै प्राणापानौ च वषट्कार गो० उ० ३ ६ वाक् च वै प्राणापानौ च वषट्कार ऐ० ३ ८ वाग्वै वषट्कारो वाग्रेत श० १ ७ २ २१ वागु हि रेत श० १ ५ २ ७ शीर्ष्णो हीयमधि वाग् वदति श० १४ ४ ११ वाग्घृदये (श्रिता) तै० ३ १० ८ ४ तदेतत् तुरीय वाचो निरुक्त यन्मनुष्या वदन्ति श० ४ १ ३ १६ वाग्वै देवाना (पुरान्नमास) तै० १ ३ ५ १ वाग् वै वाजस्य प्रसव तै० १ ३ २ ५ वाग् योनि ऐ० २ ३८ उदीचीमेव दिशम् । पथ्यया स्वस्त्या प्राजानस्तस्मादत्रोत्तरा हि वाग् वदति कुरु पचालत्रा श० ३ २ ३ १५ तस्मादुदीच्या दिशि प्रज्ञाततरा वागुद्यत उदञ्च उ एव यन्ति वाच वाच शिक्षितु यो वा तत आगच्छति तस्य वा शुश्रूषन्त इति कौ० ७ ६. अयातयाम्नी वा ऽइय वाक् श० ४ ५ ८ ३ वागु सर्वं भेषजम् श० ७ २ ४ २८ प्रादेशमात्र हीदमभिवाग्

१ ८ ६ समुच्चये ७ २६ विकल्पे १ ७१ ६ अन्यत्र ११०८७ विचारणे १ ८३ ६. [वा विचारणार्थे समुच्चयार्थे नि० १ ५]

वाक् वक्ति यया सा वाणी १८ २६ उच्यते यया सा ३ ८. यो वदति स (प्रजापति =जीव) ३६ ५ कर्मेन्द्रियाणामुपलक्षणम् २२ ३३ सब शास्त्र के उपदेशक, अनन्तविद्यास्वरूप (ईश्वर) आर्याभि० २ १८, ५ ३३ सत्य प्रिय वाणी अथर्व० १२ ५ ७, स० वि० १४४ **वाचम्**= वचन्ति वाचयन्ति सर्वा विद्या यया ताम्, सत्यलक्षणा वेदचतुष्टयीम् २ १८ वक्त्यनया ता वाणीम् ६ १४ विद्याधर्मसत्यान्विता वाणीम् ११३० ६ उत्तम वाणी को स० वि० ८०, अथर्व० ११ ५ २४ उपदेशम् ६ २१ ११ ऋग्वेदादि चारो वेदो की वाणी को स० प्र० ६७, २६ २ सुखदायक वाणी को स० वि० १४१, अथर्व० ३ ३० ३ **वाचा**=वेदवाण्या स्वकीयया वा ३ ४७ **वाचे**= वागिन्द्रियहोमाय ३६ ३ वेदार्थसुशिक्षायुक्तवाणीविज्ञानाय ६ ३६ [वच परिभाषणे (अदा०) धातो 'क्विव् वचिप्रच्छिश्रि०' उ० २.५७ सूत्रेण क्विप् धातोर्दीर्घत्व सम्प्रसारणाऽभावश्च। वाक् कस्माद् वचे नि० २ २३ वाचि आस्ये नि० ८ २१ वाक् वाङ्नाम निघ० १ ११. वाक् पदनाम निघ० ५.५ वाग्वै गी (यजु० १२ ६८ श० ७ २ २ ५ वाग्वै धेनु गो० पू० २ २१ ता० १८ ६ २१ वाच धेनुमुपासीत। तस्याश्चत्वार स्तना स्वाहाकारो वषट्कारो हन्तकार स्वधाकारस् तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकार च वषट्कार च हन्तकार मनुष्या स्वधाकार पितरस्तस्या प्राण ऋषभो मनो वत्स श० १४ ८ ९ १. वाग्वै शबली ता० २१ ३ १ वाक् तु सरस्वती ऐ० ३ १ वागेव सरस्वती ऐ० २ २४ वाग्घि सरस्वती ऐ० ३ २ वाग्वै सरस्वती कौ० ५ २ ता० ६ ७ ७ श० २ ५ ४ ६. तै० १ ३ ४ ५ गो० उ० १ २० ऐ० ६ ७ वाग्वै सरस्वती पावीरवी ऐ० ३ ३७ सरस्वती वाचमदधात् तै० १ ६ २ २. अथ यत् स्फूर्जयन् वाचमिव वदन् दहति तदस्य (अग्ने) सारस्वत रूपम् ऐ० ३ ४. सा (वाक्) ऊर्ध्वा दातनोद् यथापा धारा सततैवम् (सरस्वती= वाक्) ता० २० १४ २ वाग्वै समुद्र ता० ७ ७ ९ वाग्वै समुद्रो मन =समुद्रस्य चक्षु ता० ६ ४.७ वाग्वै समुद्रो (ऋ० ४ ५८ १) न वै वाक् क्षीयते न समुद्र क्षीयते ऐ० ५ १६ वाग्वै सरिर छन्द (यजु० १५ ४) श० ८ ५ २ ४ वाग्वै सरिरम् (यजु० १३ ५३) श० ७ ५ २ ५३. वाग्वै सोमक्रयणी (गौ) निदानेन श० ३ २ ४.१० वाग्वाऽएषा निदानेन यत्साहस्री (गौ) तस्य। एतत् सहस्र वाच प्रजातम् श० ४ ५ ८ ४ तदाहु कि तत् सहस्रम् (ऋ० ६ ६९ ८) इतीमे लोका इमे वेदा अथो वागिति ब्रूयात् ऐ० ६.१५ वाग्वै सिनीवाली (यजु० ११ ५५) श० ६ ५ १ ९ वाक् सावित्री गो० पू० १ ३३ जै० उ० ४ २७ १५ वाग्वै सार्पराज्ञी कौ० २७ ४ वागेव सुपर्णी (माया) श० ३ ६ २ २ वाग्वाव शतपदी ष० १ ४ वाग्वै रेवती श० ३ ८ १ १२ वागषाढा श० ६ ५ ३ ४ वाग्वाऽअषाढा श० ७ ४ २ ३४ वाग्वै पथ्या स्वस्ति कौ० ७ ६ श० ३ २ ३ ८ वाग्घ्येषा (पथ्या स्वस्ति) श० ३ २ ३ १५ जूरसि (यजु० ४ १७) (जू) इत्येतत् ह वा अस्या (वाच) एक नाम श० ३ २ ४ ११ तस्यै (वाचे) जुहुयाद् वेकुरा नामासि ता० ६ ७ ६ वाग्वै धिषणा (यजु० ११ ६१) श० ६ ५ ४ ५ वाग्वै मति (यजु० १३ ५८) वाचा हीद सर्व मनुते श० ८ १ २ ७ वाग्वै बृहती श० १४ ४ १ २२ यदस्यै वाचो बृहत्यै पतिस्तस्माद् बृहस्पति जै० उ० २ २ ५ बृहस्पति (एवैन) वाचा (सुवते) तै० १ ७ ४ १ अथ बृहस्पतये वाचे नैवार चरु निर्वपति श० ५ ३.३ ५ वाग्वै राष्ट्री ऐ० १ १९ इय (पृथिवी) वै वागदो (अन्तरिक्षम्) मन ऐ० ५ ३३ इय (पृथिवी) वै वाक् श० ४ ६ ९ १६ वागिति पृथिवी जै० उ० ४ २२ ११ वागेवाय (पृथिवी) लोक श० १४ ४ ३ ११ वागित्यन्तरिक्षम् जै० उ० ४ २२ ११ वागिति द्यौ जै० उ० ४ २२ ११ वाग्वै लोकम्पृणा (इष्टका) श० ८ ७ २ ७ वाग्वै विराट् श० ३ ५ १ ३४ वाग्वै विश्वामित्र कौ० १० ५ वाग्वै विश्वकर्मऽर्षि (यजु० १३ ५८) वाचा हीद सर्वं कृतम् श० ८ १ २ ९ वागेव सस्तुत् छन्द (यजु० १५ ५) श० ८ ५ २ ५ वाग्वा अनुष्टुप् ऐ० १ २८ श० १ ३ २ १६ गो० उ० ६ १६ वागनुष्टुप् कौ० ५ ६ श० १० ३ १ १ तै० १ ८ ८ २ ता० ५ ७ १ महिषी हि वाक् श० ६ ५ ३ ४ वागित्यृक् जै० उ० १ ९ २ वागृक् जै० उ० ४ २३ ४ सा या सा वागृक् सा जै० उ० १ २५ ८ वागेवऽर्ग्वेद श० १४ ४ ३ १२ वागेवऽर्चश्च सामानि च मन एव यजूꣳषि श० ४ ६.७ ५ वाग् ब्रह्म गो० पू० २ १०, वाग्घि ब्रह्म ऐ० २ १५ वाग्वै ब्रह्म ऐ० ६ ३. श० २ १ ४ १० वागिति तद् ब्रह्म जै० उ० २ ९ ६ सा या सा वाग् ब्रह्मैव तत् जै० उ० २ १३ २ ब्रह्मैव वाच परम व्योम तै० ३ ९ ५.५ वाग्वै ब्रह्म च सुब्रह्म चेति ऐ० ६ ३ वाग्वै सुब्रह्मण्या ऐ० ६ ३ वागुक्थम् ष० १ ५ वाग्घि शस्त्रम् ऐ० ३ ४४ वाक् शस ऐ० २ ४ गो० उ० ६ ८ वाग्वै रथन्तरम् ऐ० ४ २८. वाग्वै

वदति श० ६ ३ १ ३३ सेय वागृतुपु प्रतिष्ठिना वदति श० ७ ४ २ ३७ तस्मात् सवत्सरवेलाया प्रजा (शिशव) वाच प्रवदन्ति श० ७ ४ २ ३८ स (प्रजापति) वाचमयच्छत् स सवत्सरस्य परस्ताद् व्याहरद् द्वादशकृत्व ऐ० २ ३३ वाक् सवत्सर ता० १० १२ ७ सर्वा वाच पुरुषो वदति ता० १३ १२ ३ ता वनस्पतयश्चतुर्द्धा वाच विन्यदधुर्दुन्दुभौ वीणायामक्षे तूणवे तस्मादेषा वदिष्ठैषा वल्गुतमा वाग्या वनस्पतीना देवाना ह्येषा वागासीत् ता० ६ ५ १३. परमा वा एषा वाग्या दुन्दुभौ ता० १ ३ ६ २ एषा वै परमा वाग् या सप्तदशाना दुन्दुभीनाम् श० ५ १.५ ६ एतद् वाचश्छिद्र यदनृतम् ता० ८.६ १३ वाचो वा एतौ स्तनौ सत्यानृते वाव ते गो० उ० ४ १६ वाचो वाव तौ स्तनौ सत्यानृते वाव ते ऐ० ४ १ एतद्वै वाचो जित यद् ददामीत्याह ऐ० ८ ६ एकाक्षरा वै वाक् ता० ४ ३ ३ योषा हि वाक् श० १ ४ ४ ४ योषा वा ऽइय वाग् यदेन'न युविता श० ३ २ १ २२ वागिति स्त्री जै० उ० ४ २२ ११]

वाकम् अथर्ववेदम् यजु १ १६४ २४ **वाकाः**= उच्यन्ते यास्ता (आशिष =इच्छासिद्धय) १७ ५७ **वाकेन**=यजुषा १ १६४.२४ [वच परिभाषणे (अदा०) धातोर्घञ्। 'चजो कु ०' इति कुत्वम्]

वाक्पतिः यो वाचो वेदविद्याया पति स्वामी पालयिता स (परमात्मा) ४ ४ [वाच्-पतिपदयो. समास । प्रजापतिर्वै वाक्पति श० ३ १ ३ २२ वाक्पतिर्होता तै० आ० ३ १ १ अय वाव वाक्पतिर्योऽय (वायु) पवते श० ४ १ ३ १५]

वाघतः यज्ञविद्यानुष्ठानेन सुखसम्पादिन ऋत्विज १ ३ ५ मेधावी (सज्जन), प्र०—वाघत इति मेधाविनाम निघ० ३ १५, ३ २ १ ये वाचा दोषान् घ्नन्ति ते मेधाविन (ऋत्विजो जना) ३ ३७ २ सुशिक्षिताभिर्वाग्भिरविद्या हन्यते येन स मेधावी (अ०—विद्वान् जन) १५ २२ यश्शिक्षितया वाचा हन्ति जानाति स (इन्द्र =विद्वान् जन) २० ८२ वाग्विद्यायुक्ता (ऋभव =मेधाविनो जना) १ १११० ४ **वाघते**=वाक् हन्यते ज्ञायते येन तस्मै विदुष ऋत्विजे मनुष्याय १ ३१ १४ [वाघत मेधाविनाम निघ० ३ १५ ऋत्विङ्नाम निघ० ३ १८ वाघत वोढारो मेधाविनो वा नि० ११ १६]

वाचस्पतिम् वाचो वेदवाण्या पालकम् (राजानम्) १७ २३ [वाच्-पतिपदयो समासे षष्ठ्या अलुक्। वाचस्पति =वाच पाता वा पालयिता वा नि० १० १७ वाचस्पतिर्होता मै० १ ६ १ यो वै वाचो ऽध्यक्ष स वाचस्पति मै० २ २ ५.]

वाच्यः वाचो भाव कर्म्म वा १३ ५८ [वाच्प्राति० भावे कर्म्मणि वा ब्राह्मणादित्वात् ष्यञ्। ब्राह्मणादिराकृतिगण]

वाजजठरः वाजो क्षुद्रवेगो जठरे यस्मात् स (घर्म = प्रताप) ५.१६.४. [वाज-जठरपदयो समास । वाज इति व्याख्यास्यते]

वाजजित् वाजमन्न जयति येन स. (अग्नि), प्र०—वाज इत्यन्ननामसु पठितम् निघ० २ ७. अत्र 'कृतो बहुलम्०' इति करणे क्विप् २ ७ वाज सर्वस्य वेग जयति स ईश्वर. वाज जयति येन वा स भौतिक (अग्नि) २ १४ सङ्ग्राम विजयमान (सेनाध्यक्षो राजा) ६ ६ **वाजजितम्**= वाज युद्ध जयति येन तम् (भौतिकमग्निम्) २ ७ यो येन वा वाज सङ्ग्राम जयति तम् (ईश्वर भौतिकमग्नि वा) २ १४ **वाजजितः**=सङ्ग्राम जेतु शीला (जना) ६ ६ सङ्ग्राम जयन्त (वाजिन =योद्धृजना) ६ ६ विजितसङ्ग्रामा (विद्वासो राजपुरुषा) ६ १६ [वाजोपपदे जि जये (भ्वा०) धातो क्विप्। वाजजिद् (साम) भवति सर्वस्याप्त्यै सर्वस्य जित्यै ता० १३ ६ २०]

वाजदा विज्ञानप्रदौ (अध्यापकोपदेशकौ) १ १३५ ५ [वाजोपपदे डुदाञ् दाने (जु०) धातो क । ततो द्विवचनस्याकार]

वाजदाव्नाम् वाजस्य विज्ञानस्याऽन्नस्य दातृणामुपदेशकाना वा १ १७ ४ [वाजोपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि वनिप्। तत षष्ठी]

वाजदाः यो वाजमन्नादिक ददाति स (इन्द्र = ऐश्वर्यवान् विद्वान्) ३ ३६ ५ [वाजोपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप्]

वाजपतिः अन्नाद्यधिष्ठाता, भा०—अन्नवान् (भा०—पुरुष) १८ ३३ अन्नादिरक्षक (जन) १८ ३४ अन्नादीना स्वामी (अग्नि) ४ १५ ३ अन्नादिरक्षको गृहस्थ इव ११ २५. [वाज-पतिपदयो समास । वाज इति व्याख्यास्यते एष (अग्निः) हि वाजाना पति ऐ० २ ५]

वाजपस्त्यः वाजानि अन्नानि पस्त्ये गृहे यस्य स (देव =विद्वज्जन) ६ ५८ २ [वाज-पस्त्यपदयो समास । पस्त्य गृहनाम निघ० ३.४ वाजपस्त्यम्=वाजपतनम् नि० ५ १५]

वाजपेशसम् वाजस्य विज्ञानस्य पेशो रूप यस्या ताम्

अन्नाना सम्भक्ततमे नि० ६ ३५]

वाजसातये वाजस्य वेगस्य सम्भजनाय ३३ ७५ युद्धविभागाय पदार्थविभागाय वा १ १३०.१ वाजस्य सङ्ग्रामस्य सम्यक् सेवनाय २ ३१.३ धनादिसविभागाय ३ ३७ ५ सङ्ग्रामान्नादीना विभागाय वा ५ ३५ ६ विज्ञानस्य धनस्य वा प्राप्तायाऽथवा सङ्ग्रामाय ६ ५३ ४ अन्नादीना विभागो यस्मिँस्तस्मै (न्यायव्यवहाराय) ६ ५७ १ सङ्ग्रामविभाजिकायै (धिये=प्रज्ञायै) ६ ५३ १ वाजाना वेगादीना सम्भागाय ३३ ६१ परोपकार के अर्थ विज्ञान और अन्न आदि के दान के लिए स० वि० १४०, अथर्व० १४ २ ७२ **वाजसातौ**=वाजान् धनाद्यान् पदार्थान् सनन्ति विभजन्ति यस्मिँस्तस्मिन् सङ्ग्रामे ३ ३० २२ विज्ञानाविज्ञान-सत्यासत्यविभाजके (भरे=युद्धे) ३ ३४ ११ पदार्थाना विभागविद्यायाम् ३ ३६ ६ वाजानामन्नादीना विभागो यस्मिँस्तस्मिन् (भरे=पोषणे) ३ ३६ ११ वाजान्यन्नानि सम्भजन्ति यया तस्या युधि ३६ ११ स्वस्य स्वस्याऽशस्य दानमये व्यवहारे ३ ४६ ५ [वाज-साति-पदयो समास । वाज इति व्याख्यातम् । साति=षण सम्भक्तौ (भ्वा०) धातो स्त्रिया क्तिन् । 'जनसनखना सञ्झलो' अ० ६ ४ ४२ सूत्रेणाकारादेश । वाजसातौ सग्रामनाम निघ० २ १७ वाजसातये अपत्यजननाय चान्नससननाय च नि० १२ ४५]

वाजसाम् वाजस्याऽन्नादेर्विभाजिकाम् (धिय=प्रज्ञाम्) ६ ५३ १० [वाजोपपदे षण सम्भक्तौ (भ्वा०) धातोर्विट् । 'विड्वनोरि' त्याकारादेश । स्त्रिया टाप्]

वाजसाः वाजान् सङ्ग्रामान् सनन्ति सम्भजन्ति येन स (पराक्रम) ६ ६ यो वाजान् सग्रामान् विभजनि स (वीरसेनापति) ६ ५ [वाजोपपदे षण, सम्भक्तौ (भ्वा०) धातो कर्त्तरि विट् । 'विड्वनोरि' त्याकारादेश']

वाजा अन्नानि ६ ४८ ४ [वाज इति व्याख्यातम् । ततश्शेर्लोपश्छन्दसि]

वाजासः अन्नाद्यैश्वर्ययोगा ४ ८ ७ वेगवन्त (विद्वज्जना) ५ ६ २ विज्ञानवन्त (ऋभव=प्राज्ञा) ४ ३५ ६ [वाजप्राति० जसोऽसुक्]

वाजिन् जिज्ञासो (विद्या पिपठिषुछात्र) २३ १५ वेगवन् (अ०—सेनाध्यक्ष राजन्) ६ ६ शास्त्रोक्तक्रिया-कुशलताबोधयुक्त (राजन्) ६ ८ प्रशस्तज्ञानयुक्त विद्वन् ११ १२ प्रशस्तविज्ञानवन् (अ०=विद्वन्सभेश राजन्) ११ १६ प्राप्तैश्वर्य (अ०—विद्वज्जन) ११ २१ अश्व इव वेगादिगुण सेनाधीश २६ १६. प्रशस्तशास्त्रयोगाभ्यासकृत्य-सहित (अ०—सेनाध्यक्ष राजन्) ६ ६. **वाजिनम्**=वाजिना विज्ञानवतामिदमवयवभूत विज्ञानम् १३ ३६ ज्ञानबल-प्रदम् (आदित्यम्) ६ ५५ ४ विज्ञानयुद्धविद्याकुशलम् (सेनाध्यक्षम्) १.१०६ ४ बहूनि वाजा अन्नादीनि यस्मिँस्त-माहारम् १ १६२ १२ बहुवेगवन्तम् (राजजनम्) ४ ३८ २ अश्वम् १ १२६ २ धार्मिक शूरवीर मनुष्य प्राप्तिनिमित्त सूर्यलोक वा. प्र०—वाजिन इति पदनाम निघ० ५ ६ अनेन युद्धेषु प्राप्तवेगहर्षा शूरा सूर्यलोका वा गृह्यन्ते १ ४ ८ प्रशस्तज्ञानवन्तम् (जनम्) १ १२६ १ वेगवन्तमश्वम् २५ ३५ विजयप्रापकम् (इन्द्र=ईश्वरम्), प्र०—वाजिन इति पदनामसु पठितत्वात् प्राप्त्यर्थोऽत्र गृह्यते १ ४ ६. प्रशस्तो वाजो वेगो यस्यास्ति तम् (पुरुषम्) १ ६४ ६ बलवन्तम् (सेनेशम्) १ १७६ ५ वाजा प्रशस्तानि अन्नानि विद्यन्ते येषु तेषामिद सार वस्तु १६ २१ बह्वन्नसाररूपम् १६ २३. वाजिन=गन्तु योग्यस्य (सूर्यस्य) २ २४ १० वेगगुणवतो जलादय १ १६२ १८ प्रकृष्टविज्ञानवन्त (सूरय=विद्वासो जना) २ २ ११ वाज प्रशस्त. परा-क्रमो बल वा येषा ते (अश्वा=अश्व इव वेगवन्तो जना) ६ ६ बहुविज्ञानाऽन्नबलवेगयुक्ता (विप्रा=मेधावि-जना) ७ ३८ ८ तुरङ्गा ३४ ३६ वाज परमोत्कृष्ट-विद्याबलाभ्यामात्मनो देहस्य प्रशस्तो बलसमूहो येपामस्ति ते विजानन्त (भा०—मनुष्या) १ ११ २ प्रशस्तो बोधो येपामस्ति ते (देवा=विद्वज्जना), प्र०—अत्र प्रशसार्थे इनि, गत्यर्थाद् विज्ञान गृह्यते १ २३ १६ प्रशस्तयुद्ध-विद्याविद सुशिक्षितास्तुरङ्गा ६ १६ प्रशस्तप्रज्ञा (राजपुरुषा) ६ १७ अश्वानग्न्यादीन्वा २६ ४३ ज्ञानवन्तो योद्धार ७ ३८ ७ **वाजी**=वेगवानश्व ११ १८ विज्ञान-वान् (औरस स्वगोत्रजो वा पुत्र) ७.४ ८ वेगबलादि-युक्त (तनय=पुत्र) ७ १ १४ बलवानश्व इव (अग्नि=विद्वज्जन) ४ १५ १ प्रशस्तविज्ञान (ब्रह्मणस्पति=राजपुरुष) २ २४ १३ विज्ञापको दिवस ५ १ ४ प्राप्त-नीति (अर्वा=विज्ञानयुक्त पुत्र) ११ ४४ बह्वन्नवान् (धार्मिको जन) ४ ३ १२ प्रशस्तो वेगोऽस्याऽस्तीति (अग्नि) १ ७४ ८ महाबलवान् और वेगवान् (ईश्वर) आर्याभि० १ ५२ ऋ० २ ८ १२ २ प्रशस्तो वाजो शास्त्र-बोधो यस्य स (इन्द्र=सेनापति) १७ ३७ वेग १ १६२ २१ [वाज इति व्याख्यातम् । ततो भूम्न्यर्थे प्रशसायामर्थे वा इनि । वाजिनम्=अन्नवन्तम् । नि० १० २८ वाजी अश्वनाम निघ० १ १४ वाजी वेजनवान्

वाजयन्ता वाजमन्नादिकमिच्छन्तौ (इन्द्राग्नी=वायुविद्युतौ) ६ ६० १. गमयन्तौ (हरी=किरणौ) २ ११ ७ [वज गतौ (भ्वा०) धातोर्णिजन्ताच्छतृ । ततोद्विवचनस्याकारश्छान्दस । अथवा वाज अन्ननाम निघ० २ ७ बलनाम निघ० २ ६ तत इच्छायामर्थे क्यजन्ताच्छतृ]

वाजयन्ती प्रापयन्ती (विदुषी स्त्री) ५ १ ३ **वाजयन्तीम्**=सबलाना विद्याना प्रज्ञापिकाम् (धियं=प्रज्ञाम्) १ १०६ १ सत्याऽसत्यविज्ञापयन्तीम् (गिर=वाचम्) ३ ६२ ८ **वाजयन्तीः**=ज्ञापयन्त्य (धिय =प्रज्ञा कर्माणि वा) ४ ४१ ८ [वज गतौ (भ्वा०) धातोर्णिजन्ताच्छतृ । तत. स्त्रिया ङीप्]

वाजयन्ती प्रज्ञापयन्त्यौ (उषसा=प्रात साय सन्धिवेले) ३ १४ ३ [वाजयन्तीति व्याख्यातम् । ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

वाजयन्निव यथा गमयन् (अग्नि =विद्वज्जन) २ ८ १ [वाजयन्-इवपदयो समास]

वाजयुम् यो वाजयति वेगेन गच्छति तम् (रथम्) २ ३१ २ **वाजयुः**=यो वाज वेग कामयते स (सज्जन) २ २० १ य आत्मनो वाजमिच्छु (अपान्नपात्=सूर्याख्योऽग्नि) २ ३५ १ वाजमन्न कामयमान (मनुष्य) ५ १६ ३ वाज प्रशस्तमन्न धन वाऽऽत्मन इच्छति (धर्मात्माऽऽप्तो-विद्वान् राजाऽध्यापक परीक्षको वा) ७ ३१.३ [वज गतौ (भ्वा०) धातोर्णिजन्तादौणा० बाहु० उ । अथवा वाजशब्दाद् इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसी' त्यु प्रत्यय.]

वाजरत्ना वाजो बोधो रत्न धन ययोस्तौ (अध्यापकोपदेशकौ) ४ ४३ ७ [वाज रत्नपदयो समासे द्विवचनस्याकारादेशश्छान्दस]

वाजरत्ना विज्ञानधनप्राप्तिसाधिका (सुमति) ४ ४४ ७ **वाजरत्नाः**=धनधान्योन्नतिकरी (धिय =प्रज्ञा उत्तमानि कर्माणि वा) ६ ३५ १ [वाज-रत्नपदयो समासे स्त्रिया टाप्]

वाजरत्नाः विज्ञानादीनि रत्नानि येषान्ते (ऋभव = मेधाविजना) ४ ३४ २ वाजा अन्नादयो रत्नानि सुवर्णादीनि च येषान्ते (ऋभव) ४ ३५ ५ विज्ञानधनवन्त (पतय = स्वामिन) ५ ४९ ४ [वाज-रत्नपदयो समास । वाज अन्ननाम निघ० २ ७ वाज बलनाम निघ० २ ६]

वाजवत् वाजो बहुविध भोक्तव्यमन्नमस्त्यस्मिन् तत् (श्रव =विद्यासुवर्णादिधन च), प्र०—वाज इत्यन्ननाम निघ० २ ७ अत्र-भूम्न्यर्थे मतुप् १ ६ ७ [वाजप्राति० भूम्न्यर्थे मतुप्]

वाजवतीः प्रशस्ता वाजा वेगादयो गुणा विद्यन्ते यासु नौकादिषु ता , प्र०—अत्र प्रशसार्थे मतुप् १ ३४ ३ प्रशस्तविज्ञानयुक्तान् (इष =अन्नादीन्) ६ ६० १२ **वाजवत्या**=वाज प्रशस्तमन्न युद्ध वा विद्यते यस्या तया (शक्ती=शक्त्या) १ ३१ १८ **वाजवत्यै**=वाज प्रशस्त ज्ञान विद्यते यस्यै तस्यै (इषे=इच्छायै) १ १२० ६ [वाजप्राति० प्रशसायामर्थे मतुवन्तात् स्त्रिया ङीप्]

वाजवन्तम् बह्वन्नविज्ञानसाधकम् (रयिं=धनम्) ४ ३४ १० वाजा शुष्कान्नविशेषा विद्यन्ते यस्य तम् (विद्वासमध्यापकम्) ३ ५२ ६ [वाजप्राति० भूम्न्यर्थे मतुप्]

वाजश्रवसम् वाजो वेग श्रवोऽन्न यस्मात्तम् (अग्नि=पावकम्) ३ २ ५ **वाजश्रवसः**=वाजोऽन्न विद्या श्रवण च पूर्ण येषान्ते (प्रजाजना) ६ ३५ ४ [वाज-श्रवस्पदयो समास । श्रव अन्ननाम निघ० २ ७ धननाम निघ० २ १०]

वाजश्रुतासः वाज विज्ञान श्रुत यैस्ते (नर =नायका विद्यार्थिजना) ४ ३६ ५ [वाज-श्रुतपदयो समासे जसोऽसुक्]

वाजसनिम् वाजस्य सनिर्विभागो यस्य तम् (रयिं=राज्यश्रियम्) २० ७६ अन्नविज्ञानविभाजकम् (इन्द्र=राजानम्) ३ ५१ २ [वाजोपपदे षण सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' अ० ३ २ २७ सूत्रेण इन् । अथवा वाज-सनिपदयो समास । सनि =षण सम्भक्तौ (भ्वा०) धातोरौणा० इन्]

वाजसातम अतिशयेन वाजाना विज्ञानादिपदार्थाना विभाजक (विद्वज्जन) ५ २० १ **वाजसातमम्**=यो वाजान् प्रशस्तान् बोधान् सम्भजते सोऽतिशयितस्तम् (विद्वज्जनम्) १ ७८ ३ वाजाना विज्ञानाना वेगानामतिशयेन विभाजकम् (विद्वास जनम्) ५ १३ ५ [वाजसाप्राति० अतिशायने तमप् । वाजसा =वाजोपपदे षण सभक्तौ (भ्वा०) धातो 'जनसनखनक्रमगमो विट्' अ० ३ २ ६७ सूत्रेण विट् । 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१ सूत्रेणाकारादेश]

वाजसातमा वाजस्य विज्ञानस्य धनस्य वाऽतिशयेन विभक्तारौ (इन्द्राग्नी=सभासेनेशौ) ३ १२ ४ वाजान् युद्धसमूहान् सनन्ति सम्भज्य विजयन्ते याभ्या तावतिशयितौ (अ०—स्त्रीपुरुषौ) १ २८ ७ [वाजसातम इति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छन्दसि । वाजसातमा=.

वाजेध्यायै वाजेनान्नेन युद्धेन वा इध्या दीपनीया सेना यज्ञपात्रे वा यया क्रिया तस्यै (सेनायै) वाजेन बहुसाधनसमूहेन सङ्ग्रामेण सेनया यज्ञेन वा प्रकाशनीयायै सत्यनीत्यै १ २६. [वाज-इध्यापदयो समास । इध्या= ञिइन्धी दीप्तौ (रुधा०) धातोर्बाहु० औणा० यक् । स्त्रियां टाप्]

वाजेभिः वाजैरन्नादिसामग्रीभि १ ११० ६ विज्ञानैरन्नै सङ्ग्रामैर्वा १ ११० ७ सर्वविद्याप्राप्तिनिमित्तैरन्नादिभि सह, प्र०—वाज इत्यन्ननाम निघ० २ ७, १ ३ १० विमानादियानै सह १ ५ ३. वेगविज्ञानादिगुणवद्भि. (महाशयै) ६ ३२ ४ [वाज इति व्याख्यातम् । ततो 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

वाजे वाजे सङ्ग्रामे सङ्ग्रामे ७.३८ ८ युद्धे-युद्धे २१ ११ व्यवहारे व्यवहारे ६ ६१ १२ [वाजे पदस्य वीप्साया द्वित्वम् । वाजे सग्रामनाम निघ० २ १७]

वाञ्छन्तु अभिलषन्तु, भा०—अनुकूला स्यु १२ ११ [-ाञ्छि इच्छायाम् (भ्वा०) धातोर्लोट् वाञ्छति कान्तिकर्मा निघ० २ ६]

वाट् वहन्ति सुखानि यया क्रियया सा वाट्, प्र०— निपातोऽयम् २ १८ क्रियायै २ २० सुष्ठु ३८ ६ [वाट् निपातोऽय चादिषु पाठात्]

वाट् येन वहति स (अग्नि) १८ ३८ वहनम् १८ ३९ अ०—धर्मप्रापणम् १८ ४३ **वाहः**=ये वहन्ति ते (विप्रा =मेधाविजना) ३ ३० २० [वह प्रापणे (भ्वा०) धातो 'वहश्च' सूत्रेण निरुपपदादपि ण्वि]

वाढे प्रापणे १ १८१ ७]

वाणम् वाणादिशस्त्राऽस्त्रसमूहम् १ ८५ १० वाणीम् ४ २४ ९ [वण शब्दार्थे (भ्वा०) धातो 'हलश्च' इति सज्ञाया घञ् । वाण वाङ्नाम निघ० १ २१ (वाण) शततन्त्रीको भवति ता० ५ ६ १३ अन्तो वै वाण. (वाद्या नाम) ता० ५ ६ १२ वाण. शततन्तुर्भवति तै० स० ७ ५ ९ २]

वाणिजम् वणिगपत्यम् ३० १७ **वाणिजाय**= वणिजा व्यवहारेषु कुशलाय (पुरुषाय) १६ १९ [वणिज्प्राति० अपत्यार्थे कुशलार्थे वाऽण् । वणिक् पण्य नेनेक्ति नि० २ १७]

वाणी वाक् ७ ३१ ८ वेदवाक् ६ ६३.६ **वाणीः**= सप्तद्वाराबकीर्णा वाच ३ ७ १ वेदचतुष्टयी १ ७ १ वेदवाच १ १६४ २४ [वण शब्दार्थे (भ्वा०) धातो 'इण् अजादिभ्य' अ० ३ ३ १०८ वा०सूत्रेण इञ् । तत स्त्रिया 'कृदिकारादक्तिन' इति ङीप् । वाणी वाङ्नाम निघ० १.११ वाणी =वहनाद् वाचो वा वदनात् नि० ६.२]

वाणी उपदेशकाविव, प्र०—इञ् वपादिभ्य इति शब्दार्थाद् वणधातोरिञ् १.११९ ५. [वाणीनि व्याख्यातम्]

वाणीची वाक् ५ ७५ ४ [वाणीची वाङ्नाम नि० १ ११]

वात इव वायुवत् २९ २२ [वात-इवपदयो समास]

वातचोदितः वायुना प्राणेन वा प्रेरित (विद्वज्जन) १ १४१ ७ [वात-चोदितपदयो समास. । चोदित = चुद सञ्चोदने (चुरा०) धातो क्त]

वातजूतः वायुना वेग प्राप्त (अग्नि) १ ६५ ४ वायुना प्राप्तवेग (अ०—सूर्य) ३३ ३० वातेन वायुना जूत. प्राप्तवेग (अग्नि =विद्युद्वद्वर्त्तमानो जीव) १.५८.४ **वातजूताः**=वात इव जूत शीघ्रगमन येषान्ते (कृषीवला) १ १४० ४ वायुना प्राप्ततेजस्का, भा०—येषा वायु प्रदीपकस्ते (अग्नय =पावका) ३३ २ वायुप्रेरितास्त्रसरेण्वादिपदार्था ४ ३३ १ [वात-जूतपदयो समास. । जूत =जवति गतिकर्मा (निघ० २ १४.) धातो क्त]

वातजूता वायुवद्वेगौ (अश्वौ) १ ९४ १० [वात-जूतपदयो समासे द्विवचनस्याकारादेशश्छान्दस]

वातजूतासः वायुरिव वेगवन्त (भामास =क्रोधा) ६ ६ ३ [वातजूत इति व्याख्यातम् । ततो जसोऽसुक्]

वातत्विषः वातस्य त्विट् कान्तिर्येषान्ते (मरुत = मनुष्या) ५ ५७ ४ वातविद्यया त्विष कान्तयो येषान्ते (मरुत) ५ ५.४३ [वात त्विष्पदयो समास । त्विष्= त्विष दीप्तौ (भ्वा०) धातो सम्पदादित्वात् क्विप्]

वातप्रमियः वातेन प्रमातु ज्ञातु योग्या (तरङ्गा) १७ ९५ या वात वायु प्रमिन्वन्ति ता (नदीप्रवाहा) ४ ५८.७ [वातोपपदे प्रोपसृष्टात् माङ् माने (जु०) धातो क्विप् । धातोरीकारादेशश्छान्दस । अथवा 'वातप्रमी' उ० ४ १ सूत्रेण वातोपपदे डुमिञ् प्रक्षेपणे (क्र्या०) धातोर्निपातनाद् रूपसिद्धि]

वातम् वायुम् २५ २ प्राप्तम् (रेत =वीर्यम्) १९ ८४ **वातस्य**=प्राणस्य १ १८१ १२ **वातः**=वाति गच्छतीति (वायु) १८ ४१ पवन १४ २० गन्ता (भृत्य) १५ ६२ वाह्यो वायु ८ ५८ मध्यो वायु १ १६१ १४ **वातान्**=वायुवद् वेगयुक्तान् (अराती =शत्रून्) ४ २७ २

नि० २ २८ यत् सद्यो वाजान्त्समजयत् तस्माद् वाजीनाम तै० ३ ६ २१ २ (हे ऽश्व त्व) वाज्यसि ता० १ ७ १ वाजिनो ह्यश्वा श० ५ १ ४ १५ (अश्वो) वाजी (भूत्वा) गन्धर्वान् (अवहत्) १० ६ ४ देवाश्वा वै वाजिन कौ० ५ २ देवाश्वा वै वाजिनो ऽत्र देवा साश्वा अभीष्टा प्रीता भवन्ति गो० उ० १ २० अग्निर्वायु सूर्य । ते वै वाजिन तै० १ ६ ३ ६ आदित्यो वाजी तै० १ ३ ६ ४ इन्द्रो वै वाजी ऐ० ३ १८ पशवो वै वाजिन गो० उ० १ २० ऋतवो वै वाजिन कौ० ५ २ श० २ ४ ४ २२ गो० उ० १ २० छन्दांसि वै वाजिन गो० उ० १ २० तै० १ ६ ३ ६ उक्थ्या वाजिन गो० उ० १ २२ इन्द्रिय वै वीर्यं वाजिनम् ऐ० १ १३ योषा पयस्या रेतो वाजिनम् श० २ ४ ४ २१ रेतो वाजिनम् तै० १ ६ ३ १० पशवो वै वाजिनम् तै० १ ६ ३ १० एष (तार्क्ष्य) वै वाजी देवजूत ऐ० ४ २०]

वाजिन इव सुशिक्षितानश्वानिव ३ ४ ६ [वाजिन-इवपदयो समास । वाजी अश्वनाम निघ० १ १४]

वाजिना ज्ञान-गमन-प्राप्तिरूपाणि (भा०—ब्रह्म-चर्याध्ययनमननानि) ३ २० २ बहुवेगविज्ञानयुक्तौ (तुरङ्गौ, अध्यापकोपदेशकौ वा) ६ ६७ ४ वेगवन्तावश्वौ २ २४ १२ [वाजप्राति० मत्वर्थ इनि. ततस्तृतीया । विभक्तिव्यत्यय । अथवा वाजिन्प्राति० द्विवचनस्याकारादेश]

वाजिनानि शीघ्रगमनानि १७ ४२ **वाजिनेषु**= वाजिनाना सङ्ग्रामाणामवयवेषु कर्मसु १३ ४८ [वाजिन्-प्राति० 'तस्येदम्' इत्यर्थेऽण् । तत प्रथमाबहुवचनम् । वाजिन पदनाम निघ० ५ ६ वाजिनेषु वाग्ज्ञेयेषु बलवत्स्वपि नि० १ २०]

वाजिनि प्रशस्तविज्ञानयुक्ते (सरस्वति=विदुषि स्त्रि) ६ ६१ ६ विज्ञानवति (उषर्वद्वर्त्तमाने स्त्रि) ३ ६१ १. **वाजिनी**=वजितु प्राप्तु शील यस्या सा (प्राची=पूर्वा दिक्) ३ ६ १ **वाजिनीम्**=बलवेगवतीम् (अ०—सेनाम्) १.२६ [वाजप्राति० प्रशसायामर्थे इनि । तत स्त्रिया डीपि सम्बुद्धौ रूपम् । अथवा वज गतौ (भ्वा०) धातो-स्ताच्छील्ये णिनि । ततो डीप् । वाजिनी उषोनाम निघ० १ ८]

वाजिनीवति बहवो वाजिन्य क्रिया विद्यन्ते यस्या-स्तत्सम्बुद्धौ (विदुषि स्त्रि) १ ४८ १६ वाजयन्ति ज्ञापयन्ति गमयन्ति वा यासु क्रियासु ता प्रशस्ता वाजिन्यो विद्यन्ते ऽस्या तत्सम्बुद्धौ (उष) १.६२.१५. विज्ञानक्रियायुक्ते सरस्वति=विद्यायुक्ते स्त्रि) ६ ६१ ४ बह्वन्नाद्यैश्वर्ययुक्ते (उष=प्रभातवेले) ३४ ३३ **वाजिनीवती**=प्रशस्त-विद्यायुक्ता (सरस्वती=सुसस्कृता वाक्) २० ८४ सर्वोत्तम क्रिया, विज्ञानयुक्त (वाणी) आर्याभि० १ १८ ऋ० १ १ ६ १० प्रशस्तविज्ञानक्रियासहिता (देवी= विदुषी माता) ६ ६१ ४ सर्वविद्यासिद्धक्रियायुक्ता, वाजिन क्रियाप्राप्तिहेतवो व्यवहारास्तद्वती (सरस्वती=सर्वविद्या-प्रापिका वाक्), प्र०—वाजिन इति पदनाम निघ० ५ ६ अनेन वाजिनी इति गमनार्था प्राप्त्यर्था च क्रिया गृह्यते १ ३ १० [वाजनीति पूर्वपदे व्याख्यातम् । ततो भूम्न्यर्थे प्रशसाया वा मतुवन्तात् स्त्रिया डीप् । तत सम्बुद्धौ रूपम् । वाजिनीवती उषो नाम निघ० १ ८ वाजिनीवती अन्नवनि नि० १२ ६ वाजिनीवती अन्नवती नि० ११ २६]

वाजिनीवतो: प्रशस्ता विज्ञानादियुक्ता सभा सेना च विद्यते ययोस्तयो (सभासेनेशयो) १ १२० १० **वाजिनी-वान्**=प्रशस्तवेगक्रियायुक्त (शिल्पिजन) १ १२२ ८ वेगक्रियाज्ञानयुक्त: (शिल्पी जन) ५ ३६ ६ [वाजिनी-शब्दात् प्रशसायामर्थे मतुप् । वाजिनीति व्याख्यानम्]

वाजिनीवसू यौ वाजिनीमन्नादियुक्ता सामग्री वास-यतस्तौ (अश्विना=विद्यायुक्तौ महाविद्वासौ) ५ ७५ ३ धनधान्यप्रापकौ (सज्जनौ ५ ७४ ७ यौ विज्ञानक्रिया वास-यतस्तौ (अश्विना=अध्यापकोपदेशकौ) ५ ७८ ३ यौ वाजिनी वेगवती क्रिया वासयतस्तौ (शिल्पिजनौ) २ ३७ ५ उषोवत्प्रकाशवेगयोर्वसत (इन्द्रवायू=सूर्यपवनौ), प्र०— वाजिनीत्युषसो नामसु पठितम् निघ० १ ८, १ २ ५ यौ वाजिनी बह्वन्नादिक्रिया वासयतस्तौ (अध्यापकोपदेशकौ) ५ ७४ ६ वाजिनीवसो=यो वाजिनीमुषस वासयति तत्सम्बुद्धौ (इन्द्र=विद्वन् जन) ३ ४२ ५ [वाजिनीति व्याख्यानम् । तदुपपदे वस निवासे (भ्वा०) धातोर् औणा० उ]

वाजिनेय. वाजिन्या ज्ञानवत्या अपत्यम् (वाजी= ज्ञानी जन) ६ २६ २ [वाजिनीति व्याख्यातम् । ततोऽप-त्यार्थे 'स्त्रीभ्यो ढक्' अ० ४ १ १२० सूत्रेण ढक् । ढस्य स्थान एयादेश]

वाजिन्तमम् प्रशसिता बहवोऽतिशयिता वाजिनो विद्यन्ते यस्मिँस्तम् (रयि=धनम्) ४ ३७ ५ [वाजी अश्वनाम निघ० १ १४ वाजिन्प्राति० अतिशायने तमप् । 'नाद्घस्ये' ति नुडागम]

१ ३ ३ ४. प्राणो वै वामदेव्यम् श० ६ १ २.३८ पशवो वै वामदेव्यम् ता० ४ ८ १५ इद वा वामदेव्य यजमानलोको ऽमृतलोक स्वर्गो लोक ऐ० ३ ४६. उपहूत वामदेव्य सहान्तरिक्षेण श० १.८ १.१९ अन्तरिक्ष वै वामदेव्यम् तै० १.१ ८ २ ता० १५ १२ ५ अन्तरिक्ष वामदेव्यम् श० २.१ ५ ७]

वामनम् ह्रस्वाङ्गम् ३० १० **वामनः**=वक्राङ्ग (पशु) २४ ७ **वामनाय**=वाम प्रशस्त विज्ञान विद्यते यस्य तस्मै पुरुषाय, प्र०—वाम इति प्रशस्यनाम निघ० ३ ८ अत्र 'पामादित्वान्न' अ०—५ २ १ १०, १६ ३० **वामनाः**=वक्राऽवयवा (पशव पक्षिणो वा) २४ ८ [वाम प्रशस्यनाम निघ० ३ ८ ततो मत्वर्थे 'लोमादि-पामादि०' अ० ५ २ १०० सूत्रेण न । वामनो ह विष्णु-रास श० १ २ ५ ५ स हि वैष्णवो यद् वामन (गौ) श० ५ २ ५ ४ वैष्णवो वामन (पशु) श० १३ २ २ ६ वैष्णव वामनम् (पशुम्) आलभन्ते तै० १ २ ५ १]

वामनीतिः वामा प्रशसिता नीतिर्यस्य स (इन्द्र = राजा) ६ ४७ ७ [वामा-नीतिपदयो समास । वामा= वामप्रशस्यनाम निघ० ३ ८ तत स्त्रिया टाप्]

वामभाजः प्रशस्यकर्मसेविन, भा०—माङ्गलिका सन्त (गृहपतय) ८ ६ ये वाम भजन्ति ते (प्रजाजना) ६ ७१ ६ प्रशस्तकर्मसेविनश्श्रेष्ठभोगा वा (सखाय = सुहृज्जना (३ ५५ २२ [वामोपपदे भज सेवायाम् (भ्वा०) धातो 'भजो ण्वि अ० ३ २ ६२ सूत्रेण ण्वि । वाम प्रशस्यनाम निघ० ३ ८]

वामम् वमत्युद्गिरति येन तम् (भा०—वायुम्), प्र०—'टुवम उद्गिरणे' अस्माद्धातो 'हलश्च' इति घञ् उपधा-वृद्धिनिषेधे प्राप्ते 'अनाचमिकमिवमीनामिति वक्तव्यम्' अ० ७ ३ ३४ इति वार्त्तिकेन वृद्धि १ ३३ ३ प्रशस्य गृहाश्रम धर्म्मम् ८ ५ प्रशस्त-वस्तु ४ ५ १३ अत्युत्कृष्टम् (सुखम्) ६.३१ ६ श्रेष्ठ विज्ञानम्, भजनीय धनम्, प्राप्तव्यम् (न्यायम्) ४ ३० २४ प्रशस्त गुणकर्मसमूहम् ४ ५ सुरूपम् (प्रकाशात्मानम्) १ १४१ १२ अत्युत्कृष्टम् प्रशसनीयम्, प्रशस्यसुखम् (भा०—सुखम्) ६ ७१ ६ **वामस्य**=शिल्पगुणै प्रशस्तस्य (विदुषो जनस्य) १ १६४ १ **वामानि**=वननीयानि सम्भजनीयानि धनानि ५ ८२ ६. **वामेन**=प्रशसितेन प्रकाशेन १ ४८.१ [टुवम उद्गिरणे (भ्वा०) धातो हलश्चे' ति घञ् । वाम प्रशस्यनाम निघ० ३ ८ वामम्=वननीयम् नि० ६ २२ वामम् वसूनि वननीयानि नि० ११ ४६. प्राणा वै वामम् श० ७.४.२.३५ वाम हि पशव ऐ० ५ ६ य वै गा यमश्व य पुरुष प्रश-मन्ति वाम इति त प्रशमन्ति ता० १३ ३ १६]

वामं वामम् प्रशस्य प्रशस्यम् (सत्यमुपदेशम्) ४ ३० २४. [वामम् पदस्य वीप्साया द्वित्वम् । वाम प्रशस्यनाम निघ० ३ ८]

वामा प्रशस्ता वाक् १ ४०.६ [वाम. प्रशस्यनाम निघ० ३ ८ तत स्त्रिया टाप्]

वामा प्रशस्यानि कर्म्माणि ६ १.९ [वाम प्रशस्य-नाम निघ० ३ ८ तत. शेर्लोपश्छन्दसि]

वामी बहुप्रशस्तकर्म्मा (आप्तो राजा) ६ ४८ २० **वामी.**=प्रशस्ता (इष =अन्नाद्या) ३ ५३ १ [वाम प्रशस्यनाम निघ० ३ ८ ततो भूम्न्यर्थे (मत्वर्थे) इनि]

वायतस्य विज्ञानवत (उत्तमजनस्य) ७ ३३.२.

वायवः सर्वक्रियाप्राप्तिहेतव स्पर्शगुणा भौतिका प्राणादय, अ०—प्राणाऽन्त करणेन्द्रियाणि, प्र०—वायुरिति पदनाम निघ० ५ ४ अनेन प्राप्तिसाधका वायवो गृह्यन्ते वा गतिगन्धनयो इत्यस्मात् 'कृवापा०' उ० १ १ अनेना-ऽप्युक्तार्थो गृह्यते ११ विज्ञानबलयुक्ता (जना) २.११ १० **वायवे**=वायुवद् गत्यादिसिद्धये यद्वा वाति प्रापयति योगबलेन व्यवहारानिति वायुर्योगविचक्षणस्तस्मै तादृश-सम्पन्नाय ७ ८ बलवते (इन्द्राय=पुरुषाय) ५ ५१ ४ वायुवद्बलाय ५ ५१ ७. प्राप्तु योग्याय (इन्द्राय=धनाय) १ १४२ १२. वायुस्पर्शाय ३० २१ वायुविद्यायै २७.२३. पवनाय २२ ५ **वायुना**=स्पर्शवता गतिमता पवनेन सह १ १४ १० **वायुम्**=प्राणादिलक्षणम् ३३ ५५ वातम् ३३ १३ प्राणादिकम् ६ ४ ७ वेगवन्तम् (पवनम्) ५.४१ ६. **वायुः**=यो वाति स (पवन) ६ ४ ५ पवन इव बलवान् (परमात्मेव राजा) ३ ४९ ४ गमनागमनशील पवन १ २४ विज्ञानवान् अनन्तबल (ईश्वर) आर्याभि० २ ५४, ३२ १५ प्राण इव प्रिय. (अधिपति =स्वामीश्वरः) १४.१४ सूक्ष्म पवन, स्थूल पवन १ १३४ ३ बलिष्ठो बलप्रद. (ईश्वर) ३२ १५ अनन्तबलवत्त्वसर्वधातृत्वाभ्या परमेश्वरो वायुशब्दवाच्य (ईश्वर) ३२ १ धनञ्जयादि-स्वरूप पवन २०.२६ सब जगत् का धारण करने वाला, अनन्त बलवान्, प्राणो से भी प्रियस्वरूप (ईश्वर) आर्याभि० २४, ३२.१ **वायो**=वाति जानाति सूचयति सदसत्-पदार्थानिति वा वायुस्तत्सम्बुद्धौ, अ०—हे गुणग्राहक सद-सद्विवेचनशील शिष्य ६ १६ ज्ञानस्वरूपेश्वर १.२.५

वाताय=विज्ञानाय ४ ३ ६ यो वाति तस्मै (वायवे) २२ २६ वायो शुद्धये सुखवृद्धये वा १ ६. गृहस्थाय वायवे ओषधिस्थवायुविज्ञानाय, वायुवेगगतिविज्ञानाय, वायुविद्यायै वायो शोधनाय वा, उदानाय, प्राणशक्तिविज्ञानाय ३८ ७ **वाते**=विज्ञातव्ये व्यवहारे, प्र०—वात इति पदनामसु पठितम् निघ० ५ ४, ८ २१. वायाविव ६ ६ [वात =वा गतिगन्धनयो (अदा०) धातो क्त । 'निर्वाणोऽवाते' इति प्रतिषेधात् निष्ठानत्व न भवति अथवा 'हसिमृ०' उ० ३ ८६ सूत्रेण तन् । वात पदनाम निघ० ५ ४ वात =वातीति सत नि० १० ३४ वातो हि वायु श० ८ ७ ३ १२ यो वै प्राण स वात श० ५ २ ४ ६ प्राणो वै वात श० ११ २ १४ एष (वात.) हीद सर्वं व्यच करोति श० ६ ४.१ १० न वै वातात् किञ्चनाशीयोऽस्ति न मनस किञ्चनाशीयोऽस्ति तस्मादाह वाता वा मनो वेति श० ५ १ ४ ८ वातो वै यज्ञ श० ३ १ ३ २६ युक्तो वातोऽन्तरिक्षेण ते सह ता० १ २ १ वाग् वातस्य पत्नी गो० उ० २ ६ तस्मादेषोऽर्वाचीनमेव वात पवते श० ८ ७ ३ ६ मनसा सकल्पयति तत् प्राणमभिपद्यते, प्राणो वात वातो देवेभ्य आचष्टे श० ३ ४ २ ६. वातो हि वायु श० ८ ७ ३ १२]

वातयामसि वात इव प्रेरयेम १ १२८ २ [वात-प्राति० 'तत्करोति तदाचष्टे' वा० सूत्रेण णिजन्ताल्लट् । 'इदन्तो मसि' इतीदन्तत्वम् । वात सुखसेवनयो (चुरा०) धातोर्वा लट्]

वातरंहस: वातस्य रहो गमनमिव गमन येषान्ते (विद्युदादय.) १ १८ २ **वातरंहा**:=वात इव रहो गमन यस्य स (रथ) १ ११८ १ वायुवद्वेगवन्तोऽग्न्यादय ५ ७७ ३ [वात-रहस्पदयो समास । रहस्=रहि गतौ (भ्वा०) धातोरौणा० असुन् । वातरहा क्षिप्रनाम निघ० २ १५]

वातस्वनस. वातस्य स्वन शब्द इव शब्दो येषान्ते (गृहस्था) ७ ५६ ३ [वात-स्वनस्पदयो समास । स्वनस्=स्वन शब्दे (भ्वा०) धातोरौणा० असुन्]

वातापे वात इव सर्वान् पदार्थान् व्याप्नोति यस्तत्-सम्बुद्धौ (परमेश्वर) १ १८७ ८ वातवत्सर्वव्यापिन् (ईश्वर) १ १८७ ६ [वातोपपदे आप्लृ व्याप्तौ (स्वा०) धातोरौणा० इन् । तत सम्बुद्धि । इन्द्र उ वै वातापि स हि वातमाप्त्वा शरीराण्यर्हन् प्रति प्रैति कौ० २७ ४ वातापयो हवनश्रुत मै० १ ६ १]

वाताप्यम् वातेन शुद्धेन वायुनाऽऽप्तु योग्यम् (गोरभस=गवा महत्त्वम्) १ १२१ ८, [वात-आप्यपदयो समास । आप्यम्=आप्लृ व्याप्तौ (स्वा०) धातोर्ण्यत् । वाताप्य पदनाम निघ ४ ३ वाताप्यमुदक भवति वात एतदाप्याययति नि० ६ २८]

वाति गच्छति ६ २५ **वातु**=प्रापयतु १ ८९ ४ गच्छतु ७ ३५ ४ **वान्ति**=गच्छन्ति ५ ८३ ४ [वा गति-गन्धनयो (अदा०) धातोर्लट् । अन्यत्र लोडपि । वाति गतिकर्मा निघ० २ १४]

वात्याय वायुविद्याया भवाय (जनाय) १६ ३६ [वातप्राति० भवार्थे यत्]

वादिष्टम् वदतम् ५ १७ [वद व्यक्ताया वाचि (भ्वा०) धातोर्लुङ् । अटोऽभावश्छान्दस]

वानस्पत्य: वनस्पतेर्विकारो रसमय (अद्रि =मेघ) १ १४ यो वनस्पतेर्विकारस्त हवि सस्कारार्थम् (मूसलादि) १ १५ [वनस्पतिप्राति० विकारेऽर्थे 'दित्यदित्यादित्यपत्युत्तर-पदाण्ण्य' अ० ४ १ ८५ सूत्रेण ण्य]

वापुष: वपुषि भव (पृक्ष =अन्नम्) ४ ३५ ४ [वपुष्प्राति० भवार्थेऽण् । वपुष् रूपनाम निघ० ३ ७ उदकनाम निघ० १ १२]

वामजाता: वामेषु प्रशस्येषु कर्मसु वा जाता प्रसिद्धा (गात्रादय.), प्र०—वाम इति प्रशस्यनाम निघ० ३ ८, १२ १०८ [वाम-जातपदयो समास । वाम प्रशस्यनाम निघ० ३ ८]

वामदेवस्य गुरुणयुक्तस्य विदुष ४ १६ १८ [वाम-देवपदयो समास । वाम प्रशस्यनाम निघ० ३ ८]

व्योमसत् यो व्योमनि सीदति स (परमेश्वर) १० २४ यो व्योमवद् व्यापके परमेश्वरे सीदति स (जीव) १२ १४ **व्योमसदम्**=विमानैर्व्योमनि गच्छन्तम् (इन्द्र=सम्राजम्) ९ २ [व्योमन् इत्युपपदे पद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातो क्विप् । व्योमसद् एप (सूर्य) वै व्योमसद् व्योम वा एतत् सद्मना यस्मिन्नेप आसन्नस्तपति ऐ० ४ २०]

व्योमा व्योमवद् विस्तृत (भान्त =प्रकाश) १४ २३ [व्योमन् इति व्याख्यातम् । व्योमा (यजु० १४ २३) व्योमा हि सवत्सर श० ८ ४ १ ११ प्रजापतिर्वै व्योमा श० ८.४ १ ११]

व्रजनम् गमनम् ७ ३ २ [व्रज गतौ (भ्वा०) धातोर् भावे ल्युट्]

व्रजन्तीः गच्छन्ती (आप =प्राणा) ३ ५६ ४ [व्रज गतौ (भ्वा०) धातो शत्रन्तात् ङीप्]

व्रजम् व्रजन्ति जानन्ति जना येन त सत्सङ्गम्, व्रजन्ति विद्वासो यस्मिन् सन्मार्गे तम् १ २६ व्रजन्ति गच्छन्ति प्राप्नुवन्त्यापो यस्माद् यस्मिन् वा त व्रज मेघम् १ २५ निवासस्थानम् १ ९२ ४ गोस्थानम् १२ ८४ व्रजन्ति यस्मिन्स्तम् (गोष्ठम्) ६ ४५ २४ यो व्रजति तम् (अद्रि=मेघम्) ४ १ १५ प्राप्त देशम् १ १५६ ४ ज्ञातव्यम् (जनम्) १ १३२ ४ अधर्ममार्गम् १ १३२ ४ समूह ज्ञान वा १ १० ७ गोष्ठानम् २ ३८ ८ शस्त्राऽस्त्रम् ४ २० ८ **व्रजस्य**=व्रजितु गन्तु योग्यस्य (गव्यस्य) १ १३१ ३ व्रजन्ति घना यस्मिँस्तस्य मेघस्य ६ १० ३ **व्रज.**=यो व्रजति गच्छति स (इन्द्र =विद्वज्जन) ३ ३० १० **व्रजे**=गवा स्थित्यधिकरणे ५ ३४ ५ [व्रज गतौ (भ्वा०) धातो 'गोचरसचर०' अ० ३ ३ ११९ सूत्रेण करणाधिकरणयोर्घ । व्रज मेघनाम निघ० १ १० व्रज =व्रजत्यन्तरिक्षे नि० ६ २]

व्रजश्रितः व्रजान् गवादिस्थित्यर्थान् देशान् श्रियन्ति निवासयन्ति ते (राजपुरुषा) १० ४ [व्रजोपपदे श्रिञ् सेवायाम् (भ्वा०) धातो क्त]

व्रजा वेगान् ५ ६ ७ [व्रज गतौ (भ्वा०) धातो-र्घञर्थे क । तत 'सुपा सुलुक्०' इति शस आकारादेश]

व्रजिनीः वर्जनक्रिया ५ ४५ १ [व्रज गतौ (भ्वा०) धातोर्बाहु० औणा० इनि तत स्त्रिया ङीप्] •

व्रजेव व्रजन्ति यया गत्या तद्वत् ५ ६४ १ [व्रजा-इव-पदयो समास]

व्रतपते व्रत नियत यन्न्याय कर्म्म तत्पतिस्तत्सम्बुद्धौ (अग्ने=सत्यस्वरूपेश्वर) २ २८ सत्यपते (परमेश्वर) ऋ० भू० ९९, १५ सत्यभाषणादीना व्रताना कर्मणा

शकुन्ते=शक्तिमन् (सदुपदेशक जन) २ ४२ ३ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तोन्त्युनय.' उ० ३ ४६ सूत्रेण उन्ति]

शकुन्तिका अल्पा पक्षिणीव निर्बला, भा०—क्षीणा (प्रजा) २३ २२ कपिञ्जली १ १६१ ११ [शकुन्तिप्राति० अल्पार्थे क, तत स्त्रिया टाप् । शकुन्तिरिनि पूर्वपदे व्याख्यातम्]

शकुलाविव ह्रस्वौ मत्स्याविव २३ २८ [शकुलौ-इवपदयो समास । शकुल=शक्नोति तरितुमिति विग्रहे शक्लृ शक्तौ (स्वा०) धातोर् 'मद्गुरादयश्च' उ० १ ४१ सूत्रेण उरच् । प्रत्ययरेफस्य लत्वम्]

शकृत् विष्ठेव १ १६१ १० **शक्ना**=शकृता दुर्गन्धादिनिवारणसामर्थ्येन धूमादिना ३७ ९ [शक्लृ शक्तौ (स्वा०) धातो 'शकेर्ऋतिन्' उ० ४ ५८ सूत्रेण ऋतिन् । शक्ना' प्रयोगे शकृन्प्राति० तृतीयैकवचने 'पद्दन्नोमास्०' अ० ६ १ ६३ सूत्रेण शकन् आदेश]

शक्तम् समर्थम् (क्षत्र=राज्य धन वा) ५ ६८.३ [शक्लृ शक्तौ (स्वा०) धातो क्त]

शक्तिम् तीक्ष्णाग्राम् २ ३९ ७ **शक्ति**=सामर्थ्यम् ४ २२ ८ समर्थता १ ८३ ३ **शक्ती:**=सामर्थ्यानि ३ ३१ १४ **शक्त्या**=पाकविद्यासामर्थ्येन ११ ५७ योगबलोन्नत्या ऋ० भू० १५६, ११ ३ [शक्लृ शक्तौ (स्वा०) धातो स्त्रिया क्तिन् । शक्ति कर्मनाम निघ० २ १]

शक्तिवन्त: सामर्थ्ययुक्ता (पितर=पालनक्षमा राजपुरुषा), प्र०—अत्र 'छन्दसीर' इति वत्वम् २९ ४६. प्रशस्ता बह्वी शक्ति सामर्थ्य विद्यते येषान्ते (राजपुरुषा) ६ ७५ ९ [शक्तिप्राति० भूम्न्यर्थे मतुप् । 'छन्दसीर' इति मतोर्मस्य वकार । शक्तिभि कर्मभि नि० ७ २८]

शक्ती आत्मसामर्थ्येन, प्र०—अत्र 'सुपा सुलुक्०' इति तृतीयैकवचनस्य पूर्वसवर्णादेश १ ३१ १८ [शक्लृ शक्तौ (स्वा०) धातो स्त्रिया क्तिन् । तत सुपा सुलुक्०' इति पूर्वसवर्णदीर्घादेश]

शक्तीव: शक्तिर्बहुविध सामर्थ्य विद्यते यस्य तत्सम्बुद्धौ (राजन्) ५ ३१ ६ [शक्तिप्राति० भूम्न्यर्थे मतुप् । 'छन्दसीर' अ० ८ २ १४ सूत्रेण मतोर्मस्य वकार । शक्तिवत्प्राति० सम्बुद्धौ 'मतुवसो०' अ० ८ ३ १ सूत्रेण रुत्वम् । पूर्वस्य दीर्घ सहितायाम्]

शक्म शक्यं कर्म्म २ ३८ ४ **शक्मना**=कर्मणा २२ १८ [शक्लृ शक्तौ (स्वा०) धातो 'अतिशकिभ्या छन्दसि' ४ १४७ सूत्रेण मनिन् । शक्म कर्मनाम निघ० २ १.]

शक्र शक्नोति सर्वं व्यवहार कर्त्तु तत्सम्बुद्धौ (इन्द्र=सभापते) १.१०४ ८, शक्तिमन् (इन्द्र) ६ ३५ ५ समर्थ (पुत्र), आर्याभि० १ ४६, ऋ० १ ७ १६ ८ **शक्रम्**=शक्तिमन्तम् (राजानम्) ऋ० भू० २२०, २० ५०. सद्य सर्वजगत्कर्त्ताऽनन्तवीर्यवान् (ईश्वर) प० वि० । आयुकर्त्तारम् (इन्द्र=राजानम्) २० ५०. **शक्र:**=समर्थ शक्तिमान् कृपायमाण सन् (जगदीश्वर) १ १० ५ दातु समर्थ (इन्द्र=परमात्मा) १ १० ६ [शक्लृ शक्तौ (स्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक्]

शक्रा शक्तिनिमित्ता (मात्रा) ५ ४१ १५ [शक्रप्राति० स्त्रिया टाप् । शक्र=शक्लृ शक्तौ (स्वा०) धातोरौणा० रक्]

शक्रा शक्तिमन्तौ (अग्निवायू) २ ३९ ३ [शक्र इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शक्वने शक्तिमद्वीरसैन्यप्राप्तये ५ ५ [शक्लृ शक्तौ (स्वा०) धातोर्मत्वर्थे 'छन्दसीवनिपौ' इति वा०सूत्रेण वनिप्]

शक्वरय: शक्तय १८ २२ **शक्वरीषु**=शक्तिमतीषु सेनासु ७ ३३ ४ **शक्वरी**=शक्तिनिमित्ता गा २१ २७ शक्तिमत्य (राजपुरुषाणा स्त्रिय) १० ४ [शक्लृ शक्तौ (स्वा०) धातोर्मत्वर्थे 'छन्दसीवनिपौ' इति वनिप् । तत स्त्रिया 'वनो र च' सूत्रेण ङीप् रेफश्चान्तादेश । 'शक्वरय' प्रयोगे छान्दसो ह्रस्व । शक्वरी बाहुनाम निघ० २ ४ गोनाम निघ० २ ११ शक्वर्य ऋच शक्नोते । तद् यद् आभिर्वृत्रमशकद् हन्तु तच्छक्वरीणा शक्वरीत्वमिति विज्ञायते नि० १ ८ शक्लृ धातोर्वा 'स्नामदिपद्यर्त्तिपॄशकिभ्यो वनिप्' उ० ४ ११३ सूत्रेण वनिप् । शक्वर्य (ऋच) यदिमाँल्लोकान् प्रजापति सृष्ट्वेद सर्वमशक्नोद् यदिद किं च तच्छक्वर्योऽभवँस्तच्छक्वरीणा शक्वरीत्वम् ऐ० ५ ७ इन्द्र प्रजापतिमुपाधावद् वृत्र हनानीति तस्मा एतच्छन्दोभ्य इन्द्रिय वीर्यं निर्माय प्रायच्छदेतेन शक्नुहीति तच्छक्वरीणा शक्वरीत्वम् ता० १३ ४ १ एताभिर्वा इन्द्रो वृत्रमशकद् हन्तु तद् यदाभिर्वृत्रमशकद् हन्तु तस्माच्छक्वर्य कौ० २३ २. एताभि (भूरिभि शक्वरीभि) वा इन्द्रो वृत्रमहन् क्षिप्र वा एताभि पाप्मान हन्ति क्षिप्र वसीयान् भवति ता० १२ १३ २३ पशव शक्वर्य ता० १३ १ ३ पशवो वै

व्रातासः व्रतेषु सत्याचारेषु भवा (विद्वांसो जना) १ १६३ ८ मनुष्या २६ १६ वेगवन्ति यानानि ऋ० भू० १६६, ऋ० १ ६ ६ ४ [व्रातप्राति० जसोऽसुक्। व्रात = व्रतप्राति० भवार्थेऽण्। व्राता मनुष्यनाम निघ २ ३ विषम इव वै व्रात ता० १७ १ ५ ११]

व्रात्यम् असम्कृतम् (दुष्टजनम्) ३० ८ [व्रातात् समूहात् च्यवतीति विग्रहे व्रातप्राति० यत्। सावित्रीपतिता व्रात्या इति स्मृति]

व्रात्यः महोत्तमगुणविशिष्ट सेवनीयोऽतिथि ऋ० भू० २७१ [व्रातप्राति० 'तत्र साधु' रिति यत्]

व्राधतः अतिवृद्धान् शत्रून् १ १०० ६ विरोधिन (जनान्) १ १२२ १० [व्राधत् महन्नाम निघ० ३ ३]

व्राधन्त वर्धन्ते ५ ६ ७ [वृधु वृद्धौ (भ्वा०) धातोर्लट्। पृषोदरादिना ऋकारस्य रेफोऽकारस्य चाऽऽकारादेश]

व्राधन्तम् व्याधमिव प्रजाहिंसकम् (शत्रुम्) ४ ३२ ३ **व्राधन्तः**=वर्धमाना, (जना) प्र०—अत्र पृषोदरादिना पूर्वस्याऽऽकारादेशो व्यत्ययेन परस्मैपदश्च १ १३५ ६ [वृधु वृद्धौ (भ्वा०) धातो शतृ। व्यत्ययेन परस्मैपदम्। पृषोदरादिना रूपम्। व्राधत् महन्नाम निघ० ३ ३]

व्राधन्तमः अतिशयेन वर्द्धमान (विद्वज्जन) १ १५० ३ [व्राधन् महन्नाम (निघ० ३ ३) ततोऽतिशायने तमप्। अथवा व्राधम् महन्नाम निघ० ३ ३ ततोऽतिशायने तमप्। नुडागमश्छान्दस]

व्राम् वरीतुमर्हाम् (मेना=वाचम्), प्र०—वृञ् धातोर्घञर्थे क १ १२१ २ **व्राः**=या वृणोति सा (उषा) १ १२४ ८ ये व्रजन्ति ते (पज्रा=धनसम्पन्ना जना), प्र०—अत्र व्रजधातोर्बाहुलकादौणादिको ड प्रत्यय व्रा इति पदनाम निघ० ४ २, १ १२६ ५, या व्रियन्ते ता (वाणी) ४ १ १६ [वृञ् वरणे (स्वा०) धातोर्घञर्थे क। व्रज गतौ (भ्वा०) धातोर्वा बाहु० औणा० ड। व्रा व्रात्या नि० ५ ३]

व्रिशः प्रजा, प्र०—अत्र वर्णव्यत्ययेन वस्य स्थाने व्र १ १४४ ५ [विश मनुष्यनाम निघ० २ ३ वकारस्य आदेशो वर्णव्यत्ययेन। व्रिश अङ्गुलिनाम निघ० २ ५]

व्रीहयः तण्डुला १८ १२ [व्री वरणे (क्र्या०) धातोर्बाहु० औणा० हि। व्रीहय शक्वर्य जै० १ ३३३]

व्रेशीनाम् दिव्यानामपामिव निर्मलविद्या सुशीलव्याप्तानाम् (अ०—पत्नीनाम्), प्र०—एता वै दैवीरापस्तद्याश्चैव दैवीरापो याश्चेमा मानुष्यस्ताभिरेवास्मिन्नेतदुभयीभी रस दधाति श० ११ ५ ६ ८, ८ ४८

शकत् शक्नोति, प्र०—अत्र लडर्थे लुङडभावश्च १ १० ६ **शकः**=समन्ताच्छक्नुहि ७ २० ६ **शकेम**=समर्थयेम २ ५ १ शक्नुयाम, प्र०—अत्र विकरणव्यत्ययेन श ३ २७ ३ **शकेयम्**=शक्नुयाम ४ ४ यथा समर्थो भवेयम् १ ५ **शकवाम**=समर्था भवेम १ २७ १३ [शक्लृ शक्तौ (स्वा०) धातोर्लुङ्। 'अडभावश्छान्दस। लृदित्त्वादङ्। अन्यत्र लिङ् लेट् च। 'लिङ्याशिष्यङ्' अ० ३ १ ८६ सूत्रेण लिङ्यङ्]

शकपिण्डैः शक्ते सङ्घातै २५ ७ [शक-पिण्डपदयो समास। शक =शक्लृ शक्तौ (स्वा०) धातोर्घञर्थे क। शक उदकनाम निघ० १ १२]

शकमयम् शक्तिमयम् (धूमम्) १ १६४ ४३ [शकप्राति०—'तत्प्रकृतवचने मयट्' अ० ५ ४ २१ सूत्रेण मयट्]

शका शक शक्तिमान् (पशुविशेष), प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश २४ ३२ [शक्लृ शक्तौ (स्वा०) धातोर्घञर्थे क। तत 'सुपा सुलुक्०' इति सोराकारादेश]

शकुनः पक्षी ४ २६ ६ शक्तिमान् (विद्वान् सभेश) १८ ५३ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तोन्त्युनय' उ० ३ ४६ सूत्रेण उन प्रत्यय]

शकुनिसादेन येन शकुनीन् सादयन्ति तेन (व्यवहारेण) २५ ३ [शकुन्युपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्णिजन्तात् 'कृतो बहुल वे' ति वार्तिकेन करणे मूलविभुजादित्वात् क]

शकुनिः पक्षी २४ ४० **शकुने**=पक्षिवच्छक्तिमन् (वेदपाठिजन) २ ४३ २ शकुनिवद्वर्त्तमान (उपदेशक जन) २ ४२ १ वक्तृत्वशक्तियुक्त उपदेशक जन) २ ४३ २ सर्वशक्तिमन्नीश्वर आर्याभि० १ ५२, ऋ० २ ८ १२ २ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तोन्त्युनय' उ० ३ ४६ सूत्रेण उनि। शकुनि शक्नोत्युन्नेतुमात्मान, शक्नोति नदितुम् इति वा, शक्नोति तकितुमिति वा, सर्वत शकरोऽस्त्विति वा शक्नोतेर्वा नि० ६ ३]

शकुन्तकः निर्बल पक्षी (अध्वर्यु =राजा) २३ २३ [शकुन्तप्राति० अल्पार्थे ह्रस्वार्थे वा क। शकुन्त =शक्लृ शक्तौ (स्वा०) धातो शकेरुनोन्तोन्त्युनय' उ० ३ ४६ सूत्रेण उन्त]

शकुन्तयः शक्तिमन्त (वय =पक्षिण) २ ४३ १

सभाद्यध्यक्षाय) १ ५४ २ **शचीवः**=शची प्रशस्ता वाक्प्रज्ञा कर्म वा विद्यतेऽस्मिन् तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) १ ६२ १२ शची बहुविध कर्म वह्वी प्रज्ञा वा विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=न्यायाधीश), प्र०—शचीति प्रज्ञानामसु पठितम् निघ० ३ ६ कर्मनामसु च निघ० २ १ अत्र 'छन्दसीर' इति मतुपो मस्य व 'मतुवसो रु०' अ० ८ ३ १ इति रुत्वञ्च १ २९ २ **शचीवान्**=बहुप्रजावान् (राजा) ४ २२ २ [शचीति व्याख्यातम् । तत प्रशसायामर्थे मतुप् । 'छन्दसीर' इति वत्व मतोर्मस्य । शचीव कर्मवन् नि० ५ ११]

शचीवसू शची प्रज्ञा वासयितारौ (अध्यापकोपदेशकौ) १ १३९ ५ [शची-वसुपदयो समास । शचीति व्याख्यातम्]

शण्डः शमादिसहित (योगिजन) ७ १३ शमाऽन्वित, भा०—शमादिगुणप्रसक्त पुरुष ७ १२ [शमु उपशमने (दिवा०) धातोर्बाहु० औणा० ड]

शण्डिकानाम् शत्रूणा तस्याऽवयवभूतानाम् २ ३० ८

शतक्रतुम् असङ्ख्यप्रज्ञ बहुकर्माण वा (राजानम्) २१ ३६ अनेककर्मप्रज्ञायुक्तम् (इन्द्र=सेनेशम्) १ ५१ २ अमितप्रज्ञम् (इन्द्र=राजानम्) ३ ५१ २ **शतक्रतुः**=शतमसङ्ख्याता क्रतव प्रज्ञा कर्माणि वा यस्य स (सेनापति) ३३ ६६ अतुलप्रज्ञ (विद्वज्जन) २० ७५ **शतक्रतो**=शतान्यसङ्ख्याता क्रतव कर्माणि यस्य शूरवीरस्य सूर्यलोकस्य वा तत्सम्बुद्धौ, प्र०—शतमिति बहुनाम निघ० ३ १ क्रतुरिति कर्मनाम निघ० २ १, १ ४ ८ शत बहूनि कर्माणि प्रज्ञानानि वा यस्य तत्सम्बुद्धौ (इन्द्र=परमेश्वर) १ १० १ शतेष्वसख्यातेषु वस्तुषु क्रतु. प्रज्ञा यस्य तत्सम्बुद्धौ (इन्द्र), प्र०—क्रतुरिति प्रज्ञानाम निघ० ३ ६, १ ४ ६ असङ्ख्यप्रज्ञोत्तमकर्मन्त्रा (इन्द्र=रक्षक राजन्) ६ ४१ ५ शतविधप्रज्ञाकर्मयुक्त सभेश राजन् १ ३० १५ अमितवृद्धे (इन्द्र=राजन्) ३ ३७ ६ बहुप्रज्ञान (इन्द्र=राजन्) ३ ३७ ३ असङ्ख्यातोत्तमप्रज्ञ बहूत्तमकर्मन्वा न्यायाध्यक्ष १ १०५ ८ हे अनन्तक्रियेश्वर आर्याभि० १ ३५, ऋ० १ १ ३१ ९ शतमसख्यातानि क्रतव कर्माण्यनन्ता प्रज्ञा वा यस्य तत्सम्बुद्धौ सर्वकामप्रदेश्वर १ १६ ९ [शत-क्रतुपदयो समास । शत दशदशत नि० ३ १० शतम् बहुनाम निघ० ३ १ क्रतु कर्मनाम निघ० २ १ प्रज्ञानाम निघ० ३ ९ शतक्रतु इन्द्र आसीत् सीरपति शतक्रतु तै० २४८७]

शतग्विनम् शतग्वोऽसङ्ख्याता गावो विद्यन्ते यस्मिँस्तम् (रयि=धनम्) ४ ४९ ४ शतानि गावो विद्यन्ते यस्मिँस्तम् (रयिम्) १ ५९ ५ [शतगुप्राति० भूम्न्यर्थे इनि । शतगु =शत-गोपदयो समास]

शततमम् अतिशयेनाऽसङ्ख्यातम् (वेश्य=सर्वहित पदार्थम्) ४ २६ ३ [शतप्राति० अतिशायने तमप् । शतम् बहुनाम निघ० ३ १]

शततमा अतिशयेन शतानि (अब्दलानि) ७ १९ ५ [शततमम् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शततेजाः शतानि बहूनि तेजासि यस्मिन्त्स सूर्य, प्र०—शतमिति बहुनाम निघ० ३ १ १ २४ [शत-तेजस् पदयो समास]

शतदायम् असङ्ख्यदायभागिनम् (जनम्) २ ३२ ४ [शत-दायपदयो समास । दाय =डुदाञ् दाने (जु०) धातो 'ददातिदधात्योर्विभाषा' अ० ३ १ १३९ सूत्रेण ण । आतो युगागम]

शतदाव्नि असङ्ख्यदाने (राज्यपालनाख्ये व्यवहारे) ५ २७ ६ [शतोपपदे डुदाञ् दाने (जु०) धातो 'क्वनो बहुल वे' नि भावे वनिप्]

शतदुरेषु शतावरेषु मेधाऽवयवेषु घनेषु १ ५१ ३

शतद्वसुम् शतान्यसङ्ख्यातानि वसूनि यस्मिँस्तम् (रथ=यानम्), प्र०—अत्र पृषोदरादित्वात् पूर्वपदस्य तुगागम १ ११९ १ [शत-वसुपदयो समास । पूर्वपदस्य तुगागमश्छान्दस]

शतधन्यम् असङ्ख्ये धने साधुम् (सोमम्=ओषधिसारम्) ४ १८ ३ [शत-धनयो समासात् साध्वर्थे यत्]

शतधन्वने धनुर्विद्याद्यसङ्ख्यशास्त्रविद्याशिक्षकाय (विद्वज्जनाय) १६ २९ [शत-धन्वन्पदयो समास । धन्वन् धनुषि नि० ९ १८ धन्वान्तरिक्ष धन्वन्त्यस्मादाप नि० ५ ५]

शतधारम् शत बहुविधमसङ्ख्यात विश्व धरतीति तम्, अ०—शतधा (वसो =यज्ञ), प्र०—शतमिति बहुनाम निघ० ३ १, १ ३ शतधा धारा सुशिक्षिता वाग् यस्य तम् (विपश्चित=विद्वज्जनम्) ३ २६ ९ शतमसङ्ख्याता दुग्धधारा यस्मात्तम् (गवादिक वीर्यसेचक वृषभ वा) १३ ४९ **शतधारः**=शतशो धारा वाचो यस्य स (वीर्यवान् पुरुष) १९ ८७ **शतधारेण**=बहुविद्याधारकेण परमेश्वरेण वेदेन वा १ ३ [शतोपपदे धृञ् धारणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण् । अथवा शतधारापदयो समास ।

शक्वर्य ता० १३ ४ १३ पशवो वै शक्वरी तै० १ ७ ५ ४ पशव शक्वरी ता० १९ ७ ६ श्री शक्वर्य ता० १३ २ २ शाक्वरो वज्र तै० २ १ ५ ११ वज्र शक्वर्य ता० १२ १३ १४ रथन्तरमेतत् परोक्ष यच्छक्वर्य ता० १३ २ ८ ब्रह्म शक्वर्य ता० १६ ५ १८ सप्तपदा वै तेपा (छन्दसा) पराध्या शक्वरी श० ३ ९ २ १७ सप्तपदा शक्वरी तै० २ १ ५ ११ ता० १९ ७ ६ स (प्रजापति) शक्वरीरसृजत तदपाङ्घोषोऽन्वसृज्यत ता० ७ ८ १२ व्रीहय =शक्वर्य जै० १ १३३ आपो वै शक्वर्य जै० ३ ९२]

शग्धि दातु शक्नुहि, प्र०—अत्र 'वाच्छन्दसि' इति विकरणलुक् २ २ १२ देहि ४ २१ १०. समर्थो भव ५ १७ ५ सुखदानाय समर्थोऽसि, प्र०—अत्र 'वहुल छन्दसि' इति श्नोर्लुक् १ ४२ ९ [शक्लृ शक्तौ (स्वा०) धातोर्लोट्। 'वहुल छन्दसि' सूत्रेण शपो लुकि तत्स्थानभूतस्य श्नोरपि लुक्]

शग्मम् सुखम्, भा०—चक्रवर्त्तिराज्यादिकमैहिक सुखम् ३ ४३ सासारिकमाभ्युदयिकम् (सुखम्) ऋ० भू० २४०, ३ ४३ [शग्मम् सुखनाम निघ० ३ ६ शग्म कर्मनाम निघ० २ १]

शग्मः शग्म सुख विद्यते यस्य स (सोम =ऐश्वर्यसमूह) प्र०—अत्र 'अर्श आदिभ्योऽच्' इत्यनेन मत्वर्थीयोऽच्प्रत्यय ६ ४४ २ **शग्मैः**=सुखप्रापकै (विद्वज्जनै) १ १४३ ८ [शग्मम् सुखनाम (निघ० ३ ६) । ततो मत्वर्थे 'अर्श आदिभ्योऽच्' इति सूत्रेणाच्]

शग्मया सुखरूपया (गातुमत्या=प्रशस्तवाग्भूमियुक्तया सभया) ७ ५४ ३ **शग्माम्**=सुखरूपाम् (तनू = शरीरम्) ४ २ सुखमयीम् (वाच=वाणीम्) ५ ४३ ११ [शग्मम् सुखनाम निघ० ३ ६ तत स्त्रिया टाप्]

शग्मानि सुखकारकाणि (इन्द्रियादीनि अष्टविंशानि) ऋ० भू० १६०, अथर्व० १९ १ ८ २ [शग्मम् सुखनाम निघ० ३ ६ ततो नपुसके प्रथमावहुवचनम्]

शग्मासः वहुसुखयुक्ता (पुत्रा) ७ ६० ५ [शग्मप्राति० जसोऽसुक् । शग्म =शग्मम् सुखनाम निघ० ३ ६ ततो मत्वर्थेऽच्]

शग्म्येन शग्मेपु सुखेपु भवेन (मनसा=अन्त करणेन) ३ ३१ १ [शग्ममिति व्याख्यातम् । ततो भवार्थे यत् । शग्म्यम् सुखनाम निघ० ३ ६]

शङ्कराय य सर्वेपा सुख करोति तस्मै (परमेश्वराय) सेनाधीशाय वा) १६ ४१ कल्याणकारकाय (ईश्वराय) प० वि० [शम् इत्युपपदे डुकृञ् करणे (तना०) धातो 'कृञो हेतुताच्छील्यानुलोम्येपु' अ० ३ २ २० सूत्रेण ताच्छील्ये ट । शम् सुखनाम निघ० ३ ६]

शङ्कवः कीला १ १६४ ४८ यन्त्रकला ऋ० भू० १९८ [शकि शङ्कायाम् (भ्वा०) धातो 'खरुशङ्कुपीयु०' उ० १ ३६ सूत्रेण कु-प्रत्ययान्तो निपात्यते । शङ्कु (साम) तद् (शकुमाम) उ सीदन्तीयमित्याहु ता० ११ १० १२ शकु भवत्यह्नो धृत्यै यद्वा अधृत शकुना तद् दाधार ता० ११ १० ११]

शङ्खध्मम् य शङ्खान् धमति तम् (पुरुषम्) ३० १९ [शखोपपदे ध्मा शब्दाग्निसयोगयो (भ्वा०) धातो क । शख =शमु उपशमने (दिवा०) धातो 'शमे ख' उ० १ १०२ सूत्रेण ख]

शङ्गयः श सुख गमयति स (राजा शिष्यो वा) २ १ ६ [शम् इत्युपपदे गम्लृ गतौ (भ्वा०) धातोर्वाहु० औणा० डि प्रत्यय । अन्तर्भावितो ण्यर्थ]

शङ्गवे श सुख गच्छति प्राप्नोति तस्मै (जनाय) १६ ४० [शम् इत्युपपदे गम्लृ गतौ (भ्वा०) धातो 'मितद्र्वादिभ्य उपसख्यानम्, अ० ३ २ १८० वा०सूत्रेण कर्त्तरि डु]

शचिष्ठया अतिशयितया क्रियया २७ ३९ अतिशयेन श्रेष्ठया वाचा प्रज्ञया कर्मणा वा ४ ३१ १ अतिशयेन शची प्रज्ञा तया वृता वर्त्तमानया (युक्तया) ३६ ४ [शचीति व्याख्यास्यते । ततोऽतिशायन इष्ठन् । तत स्त्रिया टाप्]

शचिष्ठः अतिशयेन प्राज्ञ (विद्वज्जन) ४ २० ९ [शचीप्राति० अतिशायन इष्ठन्]

शचीनाम् वाणीना सत्कर्म्मणा वा १ १७४ प्रज्ञाना वाचा वा ४ ४३ ३ **शचीभिः**=कर्मभि प्रज्ञाभिर्वा २७ ९ **शच्या**=प्रज्ञया प्रजया वा ६ १७ ६ [शच व्यक्ताया वाचि (भ्वा०) धातोरौणा० इन् । तत स्त्रिया 'कृदिकारादक्तिन' इति ङीष् । शची वाङ्नाम निघ० १ ११ कर्मनाम निघ० २.१ प्रज्ञानाम निघ० ३ ९ शचीभि =कर्मभि नि० १२ २७]

शचीपतिम् वेदवाच पालकम् (इन्द्र =शालाध्यक्षम्) १ १०६ ६ **शचीपतिः**=प्रजापतिर्वाक्पतिर्वा (इन्द्र = राजा) ४ ३० १७ **शचीपते**=प्रजास्वामिन् (उत्तमराजन्) ६ ४५ ९ वाच प्रज्ञाया पालक (राजन्) ४ ३१.७ [शची-पतिपदयो समास । शचीति व्याख्यातम्]

शचीवते प्रशस्ता प्रज्ञा विद्यते यस्य तस्मै (शक्राय=

शतविचक्षणाः शतमराङख्या विचक्षणा गुणा यासु ता (ओषधी =सोमाद्या) १२ ९२ [शत-विचक्षणपदयो समास । विचक्षण =वि+चक्षिङ् व्यक्ताया वाचि (अदा०) धातोर्युच् । 'असनयोश्च प्रतिषेध' इति ख्याञ् न भवति]

शतव्रजा अपरिमितगतय (धारा) ४ ५८ ५ शतमसख्याता व्रजा मार्गा यासा ता, भा०—अनेकमार्गा (वाच) १७ ९३ [शत-व्रजपदयो समास । व्रज =व्रज गतौ (भ्वा०) धातो 'गोचरसञ्चर०' इति घ]

शतशारदाय शत शरदो जीवनाय ३४ ५२ शत वर्ष पर्यन्त जीवन के लिए स० वि० १४०, अथर्व० १४ २ ७५ [शत-शारदपदयो समास । शारदम् =शरच्छब्दाद् भवार्थेऽण्]

शतसाः य शतानि सनति विभजति स (सभेशो राजा) ७ ८ ६. [शतोपपदे षण सम्भक्तौ (भ्वा०) धातो 'जनसनखन०' अ० ३ २ ६७ सूत्रेण विट् । 'विड्वनोरनुनासिकस्यात' इत्याकारादेश । शतसा शतसानिनी नि० १० २९]

शतसेयाय शतादिसङ्ख्यापरिमितधनावसानाय ३.१८ ३ [शत-सेयपदयो समास । सेयम् =षोऽन्त-कर्मणि (दिवा०) धातोर्यत्]

शतस्वी शतमसङ्ख्य स्व धन विद्यते यस्य स (विप्र =मेधाविजन) ७ ५८ ४ [शत-स्वपदयो समासान् मत्वर्थ इनि]

शतहिमा शत हिमानि यस्या आयुषि सा (इडा =शास्त्रपारङ्गता वाणी) २ १ ११ **शतहिमाः** =यावच्छत वर्षाणि तावत् ६ ४ ८ शत हिमानि येषान्ते (सुवीरा जना) ६ १२ ६ शतवर्षजीविन (वीरपुरुषा) ६ १७ १५ शत हिमानि यासु समासु ता १ ७३ ९ शत हिमा हेमन्तर्त्तवो गच्छन्ति येषु सवत्सरेषु ते ऋ० भू० २४७, अथर्व० १९ ७ ४ [शत-हिमपदयो समासे स्त्रिया टाप् । हिमम् =हन हिमागत्यो (अदा०) धातो 'हन्तेर्हि च' उ० १ १४७ सूत्रेण मक् । धातोश्च हिर देश]

शता शतान्यसङ्ख्यातानि वस्तूनि १ १२९ ६ [शत-प्राति० शेर्लोपश्छन्दसि]

शताऽऽत्मा शतेष्वसङ्ख्यातेषु पदार्थेष्वात्मा विज्ञान यस्य स (विद्वज्जन) १ १४९ ३ [शत-आत्मन्पदयो समास । आत्मन् =आत्माऽततेर्वाप्तेर्वा, अपि वाप्त इव स्याद् यावद् व्याप्तिभूत इति नि० ३ १५]

शतानीकाय शतान्यनीकानि सैनिकानि यस्य तस्मै (राज्ञे) ३४ ५२ [शत-अनीकपदयो समास । अनीकम् =अन प्राणने (अदा०) धातो 'अनिहृषिभ्या किच्च' उ० ४ १७ इति सूत्रेण ईकन्]

शतायुषम् शतवर्षजीविनम् (मनुष्यम्) ६ २.५ शतवर्षपरिमितजीवनम् (तनयम्) १३ ४१ **शतायुषा** =शत वर्षाणि यस्मिन्नायुषि तेन १९ ३० [शत-आयुष्पदयो समास]

शतारित्राम् शतसङ्ख्याकान्यरित्राणि जलपरिमाणग्रहणार्थानि स्तम्भनानि वा यस्या ताम् (नावम्) १ ११६ ५ शतान्यरित्राणि लोहमयानि समुद्रस्थलान्तरिक्ष-मध्येस्तम्भनार्थानि गाधग्रहणार्थानि च भवन्ति यस्या ताम् (नावम्) ऋ० भू० १३३, १ ११६ ५ [शत-अरित्रपदयो समास । अरित्रम् =ऋ गतिप्रापणयो (भ्वा०) धातो करणे कारके 'अर्तिलूधू०' अ० ३ २ १८४ सूत्रेण इत्र प्रत्यय]

शतावयम् शतान्यवयवा यस्मिँस्तम् (पशुम्) ५ ६१ ५ [शत-अवयवपदयो समास । वलोपश्छान्दस]

शताश्रिम् य शतान्याश्रयति तम् (वज्रम्) ६ १७ १० [शतोपपदे आङ्पूर्वात् श्रिञ् सेवायाम् (भ्वा०) धातो कर्त्तरि क्विप्]

शतिनम् शतशो विद्यायुक्तम् (वाज =बोधम्) १ १२४ १३ अपरिमितमसङ्ख्यम् • (पदार्थविज्ञानम्) २ २ ९ शतधा योद्धृसेनासहितम् (वाज =सङ्ग्रामम्) ६ ८ ६ **शतिनः** =प्रशस्तगुणै सह शतधा वर्त्तमानस्य (वाजस्य =अन्नस्य) १५ २१ शतमसङ्ख्यात वल येषामस्ति ते (मरुत =व्याप्तविद्या जना) ७ ५७ ७ शतमसङ्ख्याता प्रशसिता विद्याकर्माणि वा विद्यन्ते येषा ते (विद्वासो मनुष्या), प्र०—अत्र प्रशसाऽर्थे इनि १ ३१ १० [शतम् बहुनाम निघ० ३ १ ततो भूम्न्यर्थे प्रशसाया वा मत्वर्थ इनि]

शतिनीभिः शतानि बहवो वीरा विद्यन्ते यासु सेनासु ताभि १ १३५ १ प्रशस्तसङ्ख्यातसेनाङ्गयुक्ताभि चमूभि १ १३५ ३ शतसख्याता प्रशस्ता गतयो यासु क्रियासु ताभि १ ५९ ७ शत बहूनि कर्माणि विद्यन्ते यासु ताभि (गतिभि) २७ २८ [शतप्राति० भूम्न्यर्थे मत्वर्थ इनि । तत स्त्रिया ङीप्]

शतेषुधे शतमसख्या शस्त्रास्त्रप्रकाशा यस्य तत्सम्बुद्धौ (अ०—सेनाध्यक्ष) १६ १३ [शत-इषुधिपदयो समास । इषुधि =इषूपपदे दधाते 'कर्मण्यधिकरणे चे' ति कि]

धारा वाङ्नाम निघ० १ ११]

शतनीथम् शतं प्राप्तव्यम् (आजिं=सङ्ग्रामम्) १ १७६ ३ **शतनीथः**=शतानि नीथानि यस्य स (इन्द्र= सेनाद्यधिपति) १ १०० १२ सैंकडो असङ्ख्यात पदार्थों की प्राप्ति कराने वाला (ईश्वर) आर्याभि० १ ३४, ऋ० १ ७ १० १२ [शत-नीथपदयो समास: । नीथ =णीञ् प्रापणे (भ्वा०) धातो 'हनिकुषिनीरमि०' उ० २ २ सूत्रेण क्थन्]

शतपद्भिः शतैर्गमनशीलै पादवेगै (रथै) १ ११६ ४ शतेनाऽसङ्ख्यातेन वेगेन पद्भ्या यथा गच्छेत् तादृशैरत्यन्त-वेगवद्भि (यानै) ऋ० भू० १९०, १ ११६ ४. [शत-पादपदयो समासे 'पद्दन्नोमास्०' अ० ६ १ ६३ सूत्रेण पदादेश]

शतपयाः शतानि पयासि दुग्धादीनि वस्तूनि यस्य स (अ०—यजमान) १७ ५६ [शत-पयस्पदयो समास]

शतपर्वणा शतान्यसङ्ख्यातानि पर्वाण्यलङ्कर्माणि वा यस्मात्तेन (वज्रेण) १ ८० ६ शतस्याऽसङ्ख्यातस्य जीवजातस्य पर्व पालन यस्मात्तेन (वज्रेण) ३३ ९६ [शत-पर्वन्पदयो समास । पर्वन्=पृ पालनपूरणयो. (जु०) धातो 'स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्' उ० ४ ११३ सूत्रेण वनिप्]

शतपवित्राः शतैरुपायैर्ये शुद्धा (देवी=विदुष्य स्त्रिय) ७ ४७ ३ [शत-पवित्रपदयो समास । शतपवित्रा बहूदका नि० ५ ६]

शतभुजिः शतमसङ्ख्याता भुजय पालनानि यस्या सा (मही=राज्ञी) ७ १५ १४ **शतभुजिभिः**=शतम-सङ्ख्य सुख भोक्तु शील येषा तै (पूर्भि=नगरै) १ १६६ ८ [शत-भुजिपदयो समास । भुजि=भुज पालनाभ्यवहारयो (रुधा०) धातो 'इक् कृष्यादिभ्य' इति इक्]

शतम् शतसङ्ख्याकान् (हिमा=वर्षाणि) १ ६४ १४ शतवार्षिकम्, भा०—यदा शतवार्षिकमायुर्व्यतीत तदा शरी-राणा जराऽवस्था भवेत् २५ २२ असङ्ख्याता (प्राणा) १७ ७१ शतादधिकानि वा (हिमा=हेमन्तर्त्तव) २ २७ सो (माल) ग० वि० १२१, अथर्व० १४ १ ५२ असङ्ख्यम् (राध=धनम्) ४ ३१ ९ अनेकानि (धामानि=मर्मस्था-नानि) १२ ७५ भा०-शतश (आवृत=क्रिया) १२ ८ **शतस्य**=शतेकेषाम् (यक्ष्माणा=महारोगाणाम्) १२ ९७ **शतानि**=बहूनि (आशून्=अश्वान्) ४ २९ ४ **शतैः**= शतमङ्ख्याकैरसङ्ख्यैर्वा (वधै=हननै) ६ २० ४ [शतम् बहुनाम निघ० ३ १ । एषा वाव यज्ञस्य मात्रा यच्छतम् ता० २० १५ १२]

शतमन्युः शतधा मन्यु क्रोधो यस्य स (इन्द्र= सेनापति) १७ ३९ [शत-मन्युपदयो समास । मन्यु क्रोधनाम निघ० २ १३.]

शतमानम् शतमसङ्ख्य मान यस्य तत् (आयु= जीवनम्) १९ ९३ [शत-मानपदयो समास । मानम्= माङ् माने शब्दे च (जु०) धातोर्ल्युट्]

शतमूतिः शतमसङ्ख्याता ऊतयो रक्षणादिका-क्रिया यस्य स (सेनापति), प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति सुपो लुगभाव १ १०२ ६. शतमसङ्ख्याता, ऊतयो रक्षा यस्मात् स (इन्द्र=राजा) १ १३०.८ **शतमूते**=असख्यरक्षाकर्त्त (इन्द्र=शूरवीर राजन्) ७ २१ ८ [शत-ऊतिपदयो समास । ऊति=अव रक्षणा-दिषु (भ्वा०) धातोः स्त्रियाम् 'ऊतियूतिजूति०' इति क्तिन् उदात्तश्च]

शतमूर्द्धन् शतेष्वसङ्ख्यातेषु मूर्द्धा मस्तक यस्य तत्सम्बुद्धौ (अ०—अग्ने=योगिराज) १७.७१ [शत-मूर्द्धन्पदयो समास । मूर्द्धन्=मूर्धा मूर्त्तमस्मिन् धीयते नि० ७ २७]

शतयातुः य शतं सह याति स (वीरसैनिक) ७.१८ २१ [शतोपपदे या प्रापणे (अदा०) धातो 'कमि-मनि०' उ० १ ७३ सूत्रेण तु]

शतरुद्रियाणाम् शताना रुद्राणा दुष्टरोदकानाम् (अवत्तानाम्=उदारचेतोजनानाम्) २१ ४५ बहूना मध्ये विद्वदधिष्ठातॄणाम् (जनानाम्) २१ ४४ शत रुद्रा शतरुद्रा, शतरुद्रा देवता येषा तेषाम् (अग्निष्वात्ताना=गृहीताऽग्नि-जनानाम्) २१ ४३ [शत-रुद्रपदयो समासे 'सास्य देवते' त्यर्थे 'शतरुद्राच्छश्च घश्च' अ० ४ २ २८ वा० सूत्रेण छ । अहोरात्रे (सवत्सरस्य) शतरुद्रीयम् तै० ३ ११ १० ३]

शतवन् शतानि बलानि विद्यन्ते यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) ६ ४७ ९ [शतप्राति० मतुप्]

शतवल्शः शतानि वल्शा अङ्कुरा यस्य स (वटादि-वृक्षविशेष) ३ ८ ११ यथा बह्वङ्कुरो वृक्षस्तथा ५ ४३ [शत-वल्शपदयो समास]

शतवल्शा शतमसङ्ख्याता वल्शा अङ्कुरा यस्या सा (ओषधी) १२ १०० [शतवल्श इति व्याख्यातम् । तत स्त्रिया टाप्]

कारिणी (स्त्री) १२.६२. सुखकारी, आरोग्यसुखद, शान्तिप्रद, ऐश्वर्यसौम्यप्रद, विद्याव्याप्तिप्रद (ईश्वरो विद्वज्जनो वा) १.९०.९ सुखकारक, सुखस्वरूप, सुखप्रचारक, सकल ऐश्वर्यदायक, विद्याप्रद, कल्याणकारक (परमात्मा) म० प्र० १६, ३६ ६ सुखरूपम् (राज्यम्) ७ ६ २ सुखकारिणौ, सुखकर्त्तारौ (सोमारुद्रौ=राजवैद्यौ) ६ ७४ १ सुखकारकौ (इन्द्राग्नी=विद्युत्पावकौ) ७ ३५ १ [शम् सुखनाम निघ० ३ ६ शम् सुखम् नि० ११.३०]

शमम् शाम्यन्ति येन तम् (शान्तिव्यवहारम्) १ ३३ १५ **शमस्य**=शाम्यन्ति येन तस्य शान्तियुक्तस्य मनुष्यस्य १ ३२ १५ [शमु उपशमने (दिवा०) धातोर्घञ् 'नोदात्तोपदेशस्य मान्तस्य०' अ० ७ ३ ३४ इति वृद्धिनिषेध]

शमाये शममिवाचरामि ३ ११ [शममिति व्याख्यातम्। आचारेऽर्थे क्यङन्ताल्लट्]

शमि कर्म्माणि ३ ५५ ३ कर्म्मणि, प्र०—अत्र वर्णव्यत्ययेन ह्रस्व 'सुपा सुलुक्०' इति सुलोप २ ३१ ६ **शमी**=उत्तम कर्म्म ४.२२ ८ [शमी कर्मनाम निघ० २ १ शमी=कर्माणि नि० ११ १६ शमी (वृक्ष) प्रजापतिरग्निमसृजत सो ऽबिभेत्प्र मा धक्ष्यतीति त शम्याशमयत्। तच्छम्यै शमीत्वम् तै० १ १ ३ ११ तद् यदेत शम्याशमयँस्तस्माच्छमी श० ९ २ ३ ३७ शमीमय (शकु) उत्तरत, श मेऽसदिति श० १३ ८ ४ १. श वै प्रजापति प्रजाभ्य शमीपलाशैरकुरुत श० २.५ २ १२ यया ते सृष्टस्याग्ने हेतिमशमयत्प्रजापति तामिमामप्रदाहाय शमी शान्त्यै हराम्यहम् तै० १ २ १ ६]

शमितम् उपशान्तम् (हवि) १७ ५७ [शमु उपशमने (दिवा०) धातोर्णिजन्तात् क्त। 'निष्ठाया सेटि' सूत्रेण णेर्लोप]

शमिता यज्ञ २० ४५ यज्ञस्य कर्त्ता (यजमान) २३ ३९ उपशमादिगुणयुक्त (गृहाश्रमी जन) १७ ५७ उपशमक (विद्वज्जन) २ ३ १० शान्तिप्रद, भा०—सर्वरोगप्रणाशक (सविता=सूर्य) २१ २१ यज्ञसम्बन्धी (अग्नि=पावक) २७ २१ शान्तिकर (देव=मेघ) २९ ३५ **शमितारम्**=शान्तिकरम् (वनस्पतिं=किरणपालक सूर्यम्) २८ ३३ यजमानम् २८ १०. **शमितारः**=अध्ययनाऽध्यापनाख्ये यज्ञे शमादिगुणाना प्रापका (भा०—ब्राह्मणा, क्षत्रिया, वैश्या) २३ ४० सद्गुताऽन्नस्य निष्पादिता(?) (विद्वासो जना) १ १६२ १० **शमितुः**=यज्ञाऽनुष्ठातु (जनस्य) १.१६२ ९ [शमु उपशमने (दिवा०) धातो कर्त्तरि तृच्। शमिता अध्रिगुश्चापापश्च। उभौ देवाना शमितारौ तै० ३ ६ ६ ४ मृत्युस्तदभवद्धाता शमितोग्रो विशा पति तै० ३ १२ ९ ६ मृत्यु शमिता ता० २५ १८ ४]

शमितारा शान्त्या यज्ञकर्मकर्त्तारौ (बाहू) ५.४३ ४ [शमु उपशमने (दिवा०)+तृच्। ततो द्विवचनस्याकारादेश]

शमितेव यथा यज्ञमय (यजमान) ५ ८५.१ [शमिता-इवपदयो समास]

शमी उत्तम कर्म्म ४.२२ ८ कर्माणि १ ११० ४ **शमीभिः**=क्रियाभि ४ १७ १८ श्रेष्ठै कर्म्मभि ४.३३ ४ **शमीम्**=कर्म्म ५ ४२ १० **शम्या**=शान्तियुक्तक्रियया १ ८३ ४ [शमी कर्मनाम निघ० २ १ शमी कर्माणि नि० ११ १६]

शमीष्व दुःखनिवृत्तये सुखसम्पादनार्थं कुरुष्व, प्र०—शमु उपशमे इत्यस्माद् 'बहुल छन्दसि' इति श्यनो लुक् 'तुरुस्तुशम्यम' सार्वधातुके अ० ७ ३ ९५. इतीडागमः। समीक्षा—महीधरेणाऽत्र शपो लुगित्यशुद्ध व्याख्यातम् १ १५ [शमु उपशमने (दिवा०) धातोर्लोट्। श्यनो लुक् छन्दसि। 'तुरुस्तु०' इतीडागम]

शम्बरम् श सुख वृणोति यस्मात्त मेघम् ४ ३० १४ बलम् १ ५१ ६ शङ्करम् (दास=सेवकम्) ६ २६ ५. अधर्मसम्बन्धिनम् (शत्रुम्), प्र०—अत्र शम्बधातोरौणादिकोऽरन् प्रत्यय १ १०१.२ श सुख वृणोति येन त मेघमिव शत्रुम् १ ५४ ४ **शम्बरस्य**=मेघस्य बलवत शत्रोर्वा, प्र०—शम्बर इति मेघनाम निघ० १ १० बलनामसु च निघ० २ ९, १ १०३ ८ **शम्बराणि**=शम्बरस्य मेघस्य सम्बन्धीनि अभ्राणि २ २४ २ [शम्बर मेघनाम निघ० १ १० शम्बरम् उदकनाम निघ० १ १२ बलनाम निघ० २ ९ शम् सुखनाम निघ० ३ ६ शम्-वरशब्दयो समास। वर=वृञ् वरणे (स्वा०) धातो 'ग्रहवृदृनिश्चिगमश्च' अ० ३ ३ ५८ सूत्रेणाप्। वकारस्य बकारो वर्णव्यत्ययेन। शम्ब सबन्धने (चुरा०) धातोर्वा बाहु० औणा० रन्। शम्बर मेघम् नि० ७ २३]

शम्बरहत्ये शम्बरस्य बलस्य हत्या हनन यस्मिन् युद्धादिव्यवहारे तस्मिन् १ ११२ १४. [शम्बर-हत्या-पदयो समास। हत्या=हन हिंसागत्यो (अदा०) धातोर्भावे 'हनस्त च' अ० ३ १.१०८ सूत्रेण क्यप्]

शम्भवाय श सुख भावयति तस्मै परमेश्वराय

शतोतिम् शतान्यूतयो येन तम् (रथ=किरणम्) ६ ६३ ५ [शत-ऊतिपदयो समास । ऊति=अव रक्षण-गत्यादिषु (भ्वा०) धातो स्त्रियाम् 'ऊतियूति०' इति क्तिन् । स चोदात्त]

शत्रव: अमित्रा (जना) १ ५ ४ **शत्रुम्**=विरोधिनम् (जनम्) १ १२६ ४ शातयितारम् (दुर्जनम्) २ २३ ११ वैरिणम् (दुर्जनम्) २ ३० ३ **शत्रून्**=सत्य-न्यायविरोधे प्रवर्त्तमानान् (कुपुरुषान्) ७ ३७ धर्मविरोधिन (असज्जनान्) ६ ४४ १७ अरीन् १३ १३ दुष्टकर्मकर्त्तॄन् (जनान्) ३ ३० ६ अस्माक शातकान् सुख-विच्छेदकान् (जनान्) २ ३० ८ मेघाऽवयवान् १ ३३ १३ [शद्लृ शातने (भ्वा०) धातो 'रु-शातिभ्या क्रुन्' उ० ४ १०३ सूत्रेण क्रुन् । शत्रु=शमयिता शातयिता वा नि० २ १६]

शत्रिम् दु खविच्छेदकम् (केतु=प्रज्ञाम्) ५ ३४ ६. [शद्लृ शातने (भ्वा०) धातो 'राशदिभ्या त्रिप्' उ० ४ ६७ सूत्रेण त्रिप्]

शत्रुतूर्याय शत्रूणा हिंसनाय ६.२२.१० [शत्रु-तूर्य-पदयो समास । तूर्यम्=तूरी गतित्वरणहिंसनयो (दिवा०) धातोर्ण्यत्]

शत्रूयत: आत्मन शत्रुमाचरत (पुरुपस्य) १२ ५ **शत्रूयताम्**=शत्रूणामिवाचरताम् (सैनिकानाम्) ५ ४ ५ शत्रुत्वमिच्छताम् (जनानाम्) ३३ १२ **शत्रूयन्तम्**=शत्रून् कामयमानम् (राजद्रोहिजनम्) ७ २० ३ [शत्रु-पदादाचारेऽर्थे, आत्मन इच्छायामर्थे वा क्यच्]

शन्तमम् अतिशयित सुखम् १ ४३ १ **शन्तमानि**=अतिशयेन कल्याणकराणि (वचासि) ६ ३२ १ अतिशयेन सुखकराणि (आचरणानि) ६ २३ ६ [शम् सुखनाम निघ० ३ ६ ततोऽतिशायने तमप्]

शन्तमया अतिशयेन सुखप्रापिकया, भा०—धर्म्यया (नीत्या) १६ २ **शन्तमा**=अतिशयेन सुखप्रापिका (प्रज्ञा) १ ७६ १. अतिशयेन सुखकरी (गी=वाक्) ५ ४२ १ अतिशयेन कल्याणकारिणी (गी) ५ ४३ ८. [शन्तमम् इति व्याख्यातम् । तत स्त्रिया टाप्]

शन्तम: अतिशयेन सुखकारी (जन) १ १३६ ४ अतिशयेनाऽऽनन्दप्रद (विद्वज्जन) १ ७७ २ श सुखमतिशयित यस्मिन्त्स (स्तोम) प्र०—शमिति सुखनाम निघ० ३ ६, १ १६ ७ **शन्तमेन**=अतिशयित श सुख तेन (अवसा=रक्षाद्येन) १६ ५५ अत्यन्तसुखरूपेण कर्म्मणा १३ १६. अतिशयसुखेन १५ ६४. अतिशयेन सुखकारकेण (विज्ञानेन) १४ १२ [शम् सुखनाम निघ० ३ ६ ततोऽतिशायने तमप् । ततो मत्वर्थ अर्श आदित्वाद् अच्]

शन्तमा अतिशयेन शङ्कराणि (शर्माणि), सुखकराणि (औषधानि) ३ १३ ४, २ ३३.१३ [शन्तमम् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शन्तमेभि: अतिशयेन सुखकारकै. (भेषजेभि=औषधै) २ ३३ २ [शन्तममिति व्याख्यातम् । ततो भिस ऐसादेशो न भवति छन्दसि]

शन्ताती श सुखस्य कर्त्तारौ (अश्विना=सभासेनेशौ), प्र०—अत्र 'शिवशमरिष्टस्य करे' अ० ४.४ १४३ इति तातिल्-प्रत्यय १ ११२ २० [शम् सुखनाम निघ० ३ ६ तत करोत्यर्थे 'शिवशमरिष्टस्य करे' सूत्रेण तातिल्]

शपथ्यात् शपथे भवात् कर्मण १२ ६० [शपथ-प्राति० भवार्थे यत् । शपथ=शप आक्रोशे (दिवा०) धातो 'शीङ्शपिरुगमि०' उ० ३ ११३ सूत्रेण अथ]

शपन्तम् आक्रोशन्तम् (मनुष्यम्) १ ४१ ८ [शप आक्रोशे (भ्वा०) धातो शतृ]

शपामहे उपालम्भामहे २० १८ शपामहे ६ २२ [शप आक्रोशे (भ्वा०) धातोर्लट्]

शफच्युत: शफेषु गवादिखुरचिह्नेषु च्युत पतित आसिक्तो य स (रेणु=धूलि) १ ३३ १४ [शफ-च्युत-पदयो समास]

शफवत् शफा विद्यन्ते यस्मिन् पदे तत् ३ ३६ ६ शफेन तुल्यम् ५ ८३ ५ [शफप्राति० मतुप् । शफप्राति० वा तुल्यार्थे वति]

शफात् खुरात्, श फणति प्रापयतीति शफो वेगस्त-स्माद्वा, प्र०—अत्र 'अन्येभ्योऽपि दृश्यते' इति ड, पृषोदरादि-त्वान्मलोपश्च १ ११७ ६ खुरादिव जलसेकस्थानात् १ ११६ ७ **शफानाम्**=श फणन्ति तेषाम् (वेगानाम्) १ १६३.५ [शम् उपपदे फण गतौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यते' इति ड । पृषोदरादिना पूर्वस्य मलोप]

शफाविव यथा खुरौ परस्परेण सम्बद्धौ २ ३६ ३. [शफौ-इव-पदयो समास]

शबला: किञ्चिच्छ्वेता (पश्वादय) २४ १० [शप आक्रोशे (भ्वा० दिवा०) धातो 'शमेर्बश्च' उ० १ १०५. सूत्रेण कल बकारश्चान्तादेश]

शम् कल्याणकारक ज्ञानम् ८ २६ रोगनिवारणम् ८ २६ सुख कल्याण वा ५ ७४ ६ सुखकर (भग=ऐश्वर्य्यम्) ७ ३५ २ सुखकरम् (वच) ५ ११ ५ कल्याण-

दिषु) ३.५५ ४ [शीङ् स्वप्ने (अदा०) धातो 'सञ्ज्ञाया समजनिषदनिपत०' अ० ३ ३ ६६ सूत्रेण क्यप्। तत स्त्रिया टाप्। 'अयङ् यि क्ङिती' ति अयङ्। यलोपश्छान्दस। शीङ् स्वप्ने (अदा०) धातो 'एरच्' इत्यच्। ततष्टाप्]

शयुत्रा यौ शयून् शयानान् त्रायतस्तौ (अश्विनौ= शिल्पिजनौ) १ ११७ १२ [शयुत्रप्राति० द्विवचनस्याकारादेश शयुत्र =शयूपपदे त्रैङ् पालने (भ्वा०) धातोर्ड। शयुरिति व्याख्यातम्]

शयुत्रा शयनस्थानम् ऋ० भू० २१०, ऋ० ७ ८ १८ २ [शयुत्रा शयने नि० ३ १५]

शये शयन कुर्याम् ४ ३० ११ [शीङ् स्वप्ने (अदा०) धातोर्लटि उत्तमैकवचनम्]

शये शेते, प्र०—अत्र 'लोपस्त आत्मनेपदेषु' अ० ७ १ ४१ इति तलोप १ ३२ ६ गर्भाशय मे ठहरता है अथर्व० ६ ३ ६ स० वि० २०४, [शीङ् स्वप्ने (अदा०) धातोर्लट्। 'लोपस्त आत्मनेप्रदेपु' इति तलोप शये आशेते नि० ११ ४८]

शरणम् आश्रयितु योग्यम् (छर्दि गृहम्) ६ ४६ ६ आश्रयम् २ ३ ८ **शरणे**=शरणागतपालने कर्म्मणि ७ १६ ८ गृहे ११५० १ **शरणैः**=दुःखादीना हिसनै ३.६२ ३ [शरणम् गृहनाम निघ० ३ ४ शरणा शरणम् नि० ५ २२]

शरणा शरणौ शत्रूणा हिंसकौ (वाहू=भुजौ) ६ ४७ ८. [शरणप्राति० द्विवचनस्याकारादेश। शरण = शॄ हिंसायाम् (क्र्या०) धातोर्बाहु० औणा० युच्]

शरणिम् अविद्यादिदोषहिंसिका विद्याम्, प्र०—अत्र शॄधातोर्वाहुलकादौणादिकोऽणि प्रत्यय १ ३१ १६ [शॄ हिंसायाम् (क्र्या०) धातोर्वाहु० औणा० अनि]

शरत् शृणाति येन सा (ऋतु) १३ ५७ शरदृतु १० १३ अर्द्धरात्र ३१ १४ **शरदः**=शरदृत्वन्तान् सवत्सरान् १ ७२ ३ शरदाद्यृतून् २ ४७ १७ शरदृतूपलक्षितान् सवत्सरान् १ ८६ ६ शरदृतव २ २७ १० शत वर्षाणि ३ ३६ १० शत वर्ष पर्यन्त स० वि० १२१. अथर्व० १४ १ ४२ **शरदे**=शरदृतौ सुखाय २४ ११ **शरद्भिः**=शरदादिभि ऋतुभि १ ८६ ६ [शॄ हिंसायाम् (क्र्या०) धातो 'शॄदृभसोऽदि उ० ११३० सूत्रेणादि। शरद =शरच्छ्रना अस्यामोपधयो भवन्ति शीर्णा आप इति वा नि० ४ २५ शरद् वै बर्हिरिति हि शरद् बर्हिर्या इमा ओषधयो ग्रीष्महेमन्ताभ्या नित्यक्ता भवन्ति ता वर्षा वर्धन्ते ता शरदि बर्हिषो रूप प्रस्तीर्णा शेरे तस्माच्छरद् बर्हि श० १५ ३ १२ बर्हिर्यजति शरदमेव शरदि हि बर्हिष्ठा ओपधयो भवन्ति कौ० ३ ४ शरदि ह खलु वै भूयिष्ठा ओपधय पच्यन्ते जै० उ० १ ३५.५ तस्माच्छरदमोषधयो ऽभिसपच्यन्ते ता० २१ १५ ३ स्वधा वै शरद् श० १३ ८ १ ४ शरत् प्रतिहार प० ३ १ (प्रजापति) शरदम् प्रतिहारम् (अकरोत्) जै० उ० ११२ ७ शरद् वै वैश्यस्यर्त्तु तै० ११ २ ७ शरद्वा अस्य (रुद्रस्य) अम्बिका स्वसा तै० १ ६ १० ४ शरदुत्तर पक्ष (सवत्सरस्य) तै० ३ ११ १० ४ शरत्पुच्छम् (सवत्सरस्य) तै० ३ ११ १० ३ यद् विद्योतते तच्छरद (रूपम्) श० २ २ ३ ८ षड्भिर्मैत्रावरुणै (पशुभि) शरदि (यजते) श० १३ ५ ४ २८ वर्षा शरदौ सारस्वताभ्याम् (अवरुन्धे) श० १२ ८ २ ३४ शरद्ब्रह्मा तस्माद् यदा सस्य पच्यते ब्रह्मण्वत्य प्रजा इत्याहु श० ११ २ ७ ३२ शरदेव सर्वम् गो० पू० ५ १५. अन्न वै शरद् मै० १ ६ ६]

शरद्वान् शरदो या ऋतवस्ता विद्यन्ते यस्मिन् स (वृषभ =सूर्य) १ १८१ ६ [शरद्प्राति० मतुप्]

शरभम् शल्यकम्, अ०—शल्यकीम् १३ ५१ [शॄ हिंसायाम् (क्र्या०) धातो 'कॄशॄशलिकलिगर्दिभ्योऽभच्' ३ १२२ सूत्रेणाभच्]

शरवे हिसनाय ६ २७.६ दुष्टाना हिसकाय (सेनापतये) ४ ३ ७ **शरुः**=दुष्टाना हिंसका ऋष्टि १ १७२ २ हिंसक (सैनिकजन) १ १८६ ६ [शॄ हिंसायाम् (क्र्या०) धातो 'शॄस्वृस्निहित्रपि०' उ० ११० सूत्रेण उ]

शरव्यायै शराणा निर्माणाय ३० ७ शरवीषु कुशलायै (स्त्रियै) २४ ४० **शरव्ये**=ये शरान् व्याप्नुवन्ति तत्र साध्वि (सेने) ६ ७५ १६ शरेपु बाणेषु साध्वी स्त्री तत्सम्बुद्धौ (सेनानीपत्नि) १७ ४५ [शरवीप्राति० 'तत्र साधु' रित्यर्थे कुशलार्थे वा यत्। तत स्त्रिया टाप् शरवी =शरोपपदे वी गतिव्याप्त्यादिषु (अदा०) धातो क्विप् शरुप्राति० वा कुशलार्थे छान्दसो यत्। ततष्टाप् स्त्रियाम्]

शरसि तडागे ३६ ५ [शरस्प्राति०, सप्तमी। सरस्-शॄ हिंसायाम् (क्र्या०) धातोरौणा० असुन्। सरस्प्राति० वा सप्तमी। वर्णव्यत्ययेन सकारस्य शकार]

शरसे हिंसकाय (पुरुषाय) ३८ १५ [शॄ हिसायाम् (क्र्या०) धातोरौणा० असुन्]

शरस्य हिंसकस्य (दुष्टजनस्य) सकाशात् १ ११६ २२ [शॄ हिसायाम् (क्र्या०) धातो पचाद्यच् कर्त्तरि]

सेनाधीशाय वा, प्र०—अत्राऽन्तर्भावितो ण्यर्थ १६ ४१ सुखस्वरूपाय (परमेश्वराय) प० वि०, १६ ४१ कल्याणस्वरूप, कल्याणकर, मोक्षसुखस्वरूप, मोक्षसुख के करने वाले (ईश्वर) के लिए आर्याभि० २ २६, १६ ४१ [शम् इत्युपपदे भू सत्तायाम् (भ्वा०) धातो कर्त्तरि पचाद्यच् । अन्तर्भावितो ण्यर्थ]

शम्भविष्ठः योऽतिशयेन श भावयति स (जन) ५ ४२.७. सुखस्य भावयितृतम (विद्वज्जन) १ १७१ ३ अतिशयेन कल्याणकारक (परमेश्वर) ४ ४३ २ [शम्-भविष्ठपदयो समास । भविष्ठ + भू सत्तायाम् (भ्वा०) धातोम्तृजन्तादतिशायन इष्ठन् । अन्तर्भावितो ण्यर्थ]

शम्भविष्ठा अतिशयेन सुख भावुकौ (जलाग्नी) २.३९ ५ अतिशयेन सुखस्य भावयितारौ (अश्विना + स्त्रीपुरुषौ) ५ ७६ २ [शम्भविष्ठ इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शम्भु य श सुख भावयति स (पति स्वामीश्वरो राजा वा) ७ ३५ १० सुखसम्पादकम् (क्षोद = जलम्) १ ६५ ३ [शम्-उपपदे भू सत्तायाम् (भ्वा०) धातो 'मितद्रवादिभ्य उपसख्यानम्' अ० ३ २ १८० वा०सूत्रेण डु । शम्भु सुखभू नि० ५ ३]

शम्भुवः ये श सुख भावयन्ति ते (आदित्या देवा) १ १०६ २ सुख भवति यस्मात्तस्य (विदुष), प्र०—अत्र 'कृतो बहुलम्०' इत्यपादाने क्विप् १ १०५ ३ [शम् उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्]

शम्भुवा यौ श सुख सम्भावयतस्तौ (स्त्रीपुरुषौ) २ ४१ १९. यौ सुख भावयतस्तौ (इन्द्राग्नी = सभासेनेशौ) ६ ६० ७. [शम्भूरिति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शम्भू श सुख भावुकौ (राजामात्यौ) ४ ४७ ७ [शम्भुरिति व्याख्यातम् । ततो द्विवचने रूपम्]

शम्भूः य श सुख भावयति स, श कल्याण भावयति स (विद्वज्जन) १८ ४५ सुख भावुक (छन्द = आनन्दकरोऽनुभव) १५ ४ सुखकर्त्ता (वरानना स्त्री) स० वि० १३८, अथर्व० १४ २ २६ [शम् उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप् । अन्तर्भावितो ण्यर्थ]

शम्यति शाम्यति शम प्रापयति, प्र०—अत्र 'वाच्छन्दसि' इति दीर्घत्वाऽभाव २३ ३९ **शम्यन्तु** = भा०—शान्त्या जितेन्द्रियत्व प्रापयन्तु २३ ३५ अ०—शम प्रापयन्तु २३ ३४ आनन्दन्तु २३ ३७ [शमु उपशमने (दिवा०) धातोर्लट् । अन्यत्र लोट् । 'शमामष्टानाम्०' इति दीर्घत्व न भवति छान्दसत्वात्]

शम्यन्तः शान्ति प्रापयन्त (मरुत = मनुष्या.) २३ ४१ [शमु उपशमने (दिवा०) धातो शत्रन्ताज्जस् । दीर्घत्वाऽभावश्छान्दस]

शम्यन्तीः दुष्टस्वभाव निवारयन्त्य (मातर) २३ ४२ शम प्राप्नुवती प्रापयन्त्यो वा (स्त्रिय) २३ ३७ [शमु उपशमने (दिवा०) धातो शत्रन्तान् ङीप् । दीर्घत्वाऽभावश्छान्दस]

शम्याः शम्या कर्मणि भवा (आप = जलानि) ३ ३३ १३ [शमी कर्मनाम निघ० २ १ ततो भवार्थे यत् । ततष्टाप् । जिह्वेव शम्या श० १ २ १ १७]

शयते शेते, प्र०—अत्र 'बहुल छन्दसि' इति शपो लुङ् न १ ३२ ५ **शयथे** = शयन करोति ६ १७ ९ [शीङ् स्वप्ने (अदा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुग् न भवति । शयथे प्रयोगे तकारस्य थकारो वर्णव्यत्ययेन]

शयथाय शयनाय ६ १८ ८ 'शीङ्शपि०' उ० ३ ११३ सूत्रेण [शीङ् शये (अदा०) धातोर् अथ प्रत्यय]

शयध्यै शयितुम् ६ ६२.३. [शीङ् स्वप्ने (अदा०) धातोस्तुमर्थेऽध्यैप्रत्यय]

शयवे शयानाय (जसुरये = हिंसकाय जनाय) १ ११६ २२ सुखेन शयनशीलाय (मनवे = राज्ञे) १ ११२ १६ **शयुम्** = य शेते तम् (पुत्रम्) ४ १८ १२ **शयुः** = योऽभिव्याप्य शेते (वरुण = परमात्मा) ३ ५५ ६ य प्रलये सर्वाणि भूतानि शाययति स (ईश्वर) [शीङ् स्वप्ने (अदा०) धातो 'भृमृशीङ्तृचरि०' उ० १ ७ सूत्रेण उ]

शयाण्यकः पक्षिविशेष २४ ३३ [शीङ् स्वप्ने (अदा०) धातोर्बाहु० औणा० अण्डन् । अकारस्याकारश्छान्दस]

शयानम् कृतशयनमिव वर्त्तमानम् (अहि = मेघम्) २ १२ ११ शयानमिवाचरन्तम् (मेघम्) ५ ३२ २ **शयानाय** = यो शेते तस्मै (जनाय) २२ ७ **शयानेभ्यः** = प्राप्तनिद्रेभ्य (राजपुरुषेभ्य) १६ २३ [शीङ् स्वप्ने (अदा०) धातो शानच् । अथवा शयानप्राति० वा आचारे क्विप्]

शयाना यौ शयाते तौ (पितरा = पितरौ) ४ ३३ ३. [शयानमिति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शयासु शेरते यासु विद्युदादय पदार्थास्तासु (प्रकृत्या-

शर्यातम् शरो हिंसकान् प्राप्तम् (सेनाध्यक्षम्) १ ११२ १७ [शर्-यातपदयो समास । शर्=शॄ हिंसायाम् (क्र्या०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति विट् । यातम्=या प्रापणे (अदा०) धातो कर्त्तरि क्त]

शर्याभिः गतिभि ७ १७ **शर्याम्**=वायुताडनाऽऽख्या क्रियाम् १ १४८ ४ [शॄ हिंसायाम् (क्र्या०) धातोर्यत् तत. स्त्रिया टाप् । औणा० वा यत् । शर्या अङ्गुलिनाम निघ० २ ५ शर्या अङ्गुलयो भवन्ति । सृजन्ति कर्माणि । शर्या इषव शरमय्य नि० ५ ४]

शर्यैः हिंसतु ताडितुमर्हैर्यन्त्रै १ ११९ १० पुन पुनर्हननप्रेरणगुणै ऋ० भू० १९९, ऋ० १.८.२१.१०. [शॄ हिंसायाम् (क्र्या०) धातोर्यत्]

शर्वम् विज्ञातारम् (परमेश्वरम्) ३९ ८ **शर्वस्य**=सुखप्रापकस्य (जनस्य) ३९ ९ **शर्वाय**=दुष्टाना हिंसकाय (राजपुरुषाय) १६ २८ **शर्वाः**=हिंसका (जना) १६ ५७ [शॄ हिंसायाम् (क्र्या०) धातोर्बाहु० औणा० वन् प्रत्यय]

शर्वरीः रात्री ५ ५२ ३ [शॄ हिंसायाम् (क्र्या०) धातो 'कॄगॄशॄ०' उ० २ १२१ सूत्रेण ष्वरच् । पित्त्वान् ङीप् स्त्रियाम् । शर्वरी रात्रिनाम निघ० १ ७]

शर्वा शासनवज्रेण २ १२ १० [शॄ हिंसायाम् (क्र्या०) धातो. कर्त्तरि वनिप् । 'सुपा सुलुक्०' सूत्रेण टास्थाने सु]

शर्वा सर्वदु खहिंसक (सभाद्यध्यक्ष) १ १०० १८ [पूर्वपदे व्याख्यातम्]

शर्वा शर्वाणि हिंसनानि ४ २८ ३ [शर्वन् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शर्वाः हिंसका १६ ५७ [शॄ हिंसायाम् (क्र्या०) धातोर्बाहु० औणा० वन् । यच्छर्वोऽग्निस्तेन कौ० ६ ३ अग्निर्वै स देवस्तस्यैतानि नामानि । शर्व इति यथा प्राच्या आचक्षते भव इति यथा वाहीका, पशूना पती रुद्रोऽग्नि-रिति श० १ ७ ३ ८ आपो वै शर्व, अद्भ्यो हीद सर्व जायते श० ६ १ ३ ११ एतान्यष्टौ (रुद्र, शर्व, पशुपति, उग्र, अशनि, भव, महान्देव, ईशान) अग्निरूपाणि । कुमारो नवम श० ६ १ ३ १८]

शल्मलिः वृक्षविशेष २३ १३ **शल्मलौ**=शल्मलि-वृक्षादौ ७ ५० ३ [शल्मलि सुशरो भवति शरवान् वा नि० १२ ८ शल्मलिर्वनस्पतीना वर्षिष्ठ वर्धते श० १३ २ ७ ४]

शल्यकः कण्टकपक्षयुक्त श्वावत् (पशु) २४ ३५. [शल्यप्राति० सज्ञाया कन् । शल्य =शल चलनसवरणयो. (भ्वा०) धातो 'सानसिवर्णसि०' उ० ४.१०७ सूत्रेण यत् निपात्यते । शल्यक तस्या (गायत्र्या) अनु विसृज्य कृशानु सोमपाल सव्यस्य पदो नखमच्छिदत् तच्छल्यकोऽभवत् तस्मात् स नखमिव ऐ० ३ २६]

शल्यानाम् शस्त्राणाम् १६ १३ [पूर्वपदे व्याख्यातम्]

शवसः अनन्तबलस्य प्रमितबलस्य वा १ ११ २. बलस्य सैन्यस्य ६.४४.४ बलवन्त (सूरय =विद्वज्जना) ४ ३४.६ **शवसा**=विद्यासुशिक्षाबलेन १ ११० ७. शरीरात्मबलेन १.१०० १४ बलेन परिचरणेन वा, प्र०—शवतीति परि-चरणकर्मा निघ० ३ ५ अस्मादसुनि कृति रूपसिद्धि ५ ११ ५ बलयुक्तेन सैन्येन १ १०० १२ **शवसे**=सैन्य-बलाय १ ५७ १ **शवः**=बलमुदक वा ३३ ९७ बलहेतुम् (रसमन्न वा) ६ ४३ ४ गमनम् ५ ५८ ७ **शवोभिः**=सेनाद्यैर्बलै १ १३० ४ [शव गतौ (भ्वा०) शवति गतिकर्मा निघ० २ १४ परिचरणकर्मा निघ० ३ ५ तत औणा० असुन् । शव उदकनाम निघ० १ १२ धननाम निघ० २ १० बलनाम निघ० २ ९ शवसा बलेन नि० १० २९ शवसो महतो बलस्य । नि० १२ २१ (यजु० १२ १०६) बल वै शव श० ७ ३ १.२९]

शवलाः किञ्चिच्छ्वेता (पशव) २४ १० [शप आक्रोशे (भ्वा०) धातो 'शमेर्बश्च' उ० १ १०५ सूत्रेण कल । वकारश्चान्तादेश]

शवसान बलयुक्त (इन्द्र=सभाध्यक्ष) १ ६२ १३ **शवसानम्**=बलवन्तम् (इन्द्र=राजानम्) ६ ३७ ३ **शवसानाय**=विज्ञानाय ३४ १६ ज्ञानवते (सभाद्यध्यक्षाय) १ ६२ २ ज्ञानबलयुक्ताय(सभाद्यध्यक्षाय)१ ६२ १ ब्रह्मचर्य-सुशिक्षाभ्या शरीरात्मबलयुक्ताय (पुरुषाय) ३४ १७ [शवस् बलनाम निघ० २ ९ ततस्तत्करोति इत्यर्थे क्विप् । तत क्विबन्तात् शवस्धातो शानच् । शवसानम् अभिबलाय-मानम् नि० १० ३ शव गतौ (भ्वा०) धातोर्वा 'छन्दस्य मानच् शुजूभ्याम्' उ० २ ८६ सूत्रेणासानच्]

शवसावन् बलयुक्त (सभापते) १ ६२ ११ [शवस् बलनाम निघ० २ ९ ततो मतुप्-प्रत्यये छान्दस रूपम्]

शवसिन् बहुविध शवो बल विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) ७ २८ २ [शवस् बलनाम निघ० २ ९. ततो मत्वर्थ इनि]

शवस्यानि शवसु धनेषु साधूनि वीरसैन्यानि

शरासः वेणुदण्डसदृशा अन्तश्छिद्रास्तृणविशेषस्था (दर्भास =कुशा) १ १९१ ३ [शरप्राति० जसोऽसुक्। शॄ हिंसायाम् (क्र्या०) धातो 'ऋदोरप्' त्यप्। कर्त्तरि वाऽच्। शर शृणाते नि० ५ ४]

शरिरस्य अन्तरिक्षस्य १३ ४९ [शॄ हिंसायाम् (क्र्या०) धातोर्बाहु० औणा० इरच्]

शरीतोः शरीतु दुष्टस्वभाव हिंसितु शक्नोति य (इन्द्र =ऐश्वर्यवान् राजा) ३ ५३ १७ [शॄ हिंसायाम् (क्र्या०) धातो- 'कृतो बहुल वा' इति कर्त्तरि तोसुन्। इटो दीर्घश्च छान्दस]

शरीरम् शीर्यते हिंस्यते यत्तत् (वपु) १ ३२ १० **शरीराणि**=आश्रयान् ३५ ५. देहा १८.३ [शॄ हिंसायाम् (क्र्या०) धातो 'कॄशॄपॄकटि०' उ० ४ ३० सूत्रेण ईरन्। शरीर शृणाते शम्नातेर्वा नि० २ १६ शरीरे आदित्ये नि० १२ ३७ अथ यत्सर्वमस्मिन्नश्रयन्त तस्माद् शरीरम् श० ६ १ १ ४ अशरीर वै रेतोऽशरीरा वपा यद्वै लोहित यन्मास तच्छरीरम् ऐ० २ १४ शरीर हृदये (श्रितम्) तै० ३ १० ८ ७]

शर्ध प्रशंसितबलयुक्त (विद्वज्जन) ५.२८ ३. दुष्टगुण-शत्रुनाशक बलम्, प्र०—अत्र 'सुपा सुलुक्०' इति सोर्लुक् ३३ १२ **शर्धम्**=बलयुक्तम् (धाम=स्थानम्) १ १२२ १२. बलहेतुम् (रेत) ३३ ११. बलिनम् (युवानम्) १ ७१ ८ **शर्धः**=शरीराऽऽत्मबलम् ७ ४४ ५ सैन्यम् १७ ४१ [शर्ध बलनाम निघ० २ ९ शृधु प्रसहने (चुरा०) धातो पचाद्यच्]

शर्धत् उत्सहेत् ७ २१ ५ [शर्धत्=उत्सहताम् नि० ४ १९ शृधु प्रसहने (चुरा०) धातोर्लेट्]

शर्धतः बलवत (दुर्जनस्य) २ २३ १२ **शर्धताम्**= बल कुर्वताम्, (वीरजनानाम्), प्र०—बलवाचिशर्धशब्दात् करोत्यर्थे क्विप् तत शतृ १५ ४०. **शर्धते**=य शर्द्धं करोति तस्मै (दुर्जनाय) २ १२.१० बलाय ६ २४ ८ **शर्धन्तम्**= बल कुर्वन्तम् (दुष्कर्म) ७ १८ ५ **शर्धन्तः**=बलयन्त (अर्य =अरयदशत्रव) ७ ३४ १८ [शर्ध बलनाम निघ० २ ९. तत करोत्यर्थे क्विवन्ताच्छतृ]

शर्धनीतिः शर्द्धस्य बलस्य नीतिर्नयन प्रापण यस्य स (सभेश) ३३ २६ बलस्य सैन्यस्य नीतिर्नायक (सेनापति), प्र०—अत्र नीतौ कर्त्तरि क्तिच् ३ ३४ ३ [शर्ध-नीतिपदयो समास । शर्ध बलनाम निघ० २ ९ नीति =णीञ् प्रापणे (भ्वा०) धातो स्त्रिया क्तिन्। कर्त्तरि क्तिज् वा]

शर्धमानः सहमान (विद्वज्जन) २० ३८ [शृधु प्रसहने (चुरा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

शर्धस्तरः अतिशयेन बलवान् (शूरवीरो जन) १ १२२ १० [शर्ध बलनाम निघ० २ ९ ततोऽतिशायने तरप्]

शर्ध्यम् शर्द्धेषु बलेषु भवम् (रथ =यानम्) १ ११९ ५ [शर्ध बलनाम निघ० २ ९ ततो भवार्थे यत्]

शर्म शृण्वन्ति दुःखानि यस्मिन् तद् गृहम् २६ १०. सर्वदुःखरहित सुखम्, शृणाति हिनस्ति दुःखानि यत्तत् (सुखम्) १ १७ ८ सुख निवास वा १ ४६ १५ गृहस्वरूप सुखकारक वा (यानम्) १ ३४ ६ श्रेष्ठ शरण सुख वा ३४ २८. सुखसाधक गृहम् १७ ४८. सुखहेतु, अ०—सुखद (यज्ञ) १ १९ **शर्मणा**=विग्रहेण ७.५१ १ गृहसम्बन्धि-सुखेन १ २२ ११ **शर्मणि**=नित्यसुखे, अ०—खल्वाज्ञा-पालनाख्ये व्यवहारे १ ४ ६ आश्रये ३३ १७ [शॄ हिंसायाम् (क्र्या०) धातो 'सर्वधातुभ्यो मनिन्' उ० ४ १४५ सूत्रेण मनिन्। शर्म गृहनाम निघ० ३ ४ सुखनाम निघ० ३ ६ शर्म शरणम् नि० ९ १९ चर्म वाऽएतत् कृष्णस्य (मृगस्य) तन्मानुष शर्म देवत्रा श० ३.२ १ ८ (ऋ० ३ १३ ४) वाग्वै शर्म ऐ० २ ४० (ऋ० ३ १३ ४) अग्निर्वै शर्माण्यन्ना-द्यानि यच्छति ऐ० २ ४१]

शर्म शर्माणि सुखानि १.८५ १२ गृहाणि ६ ४६ १२ [शर्मन् इति व्याख्यातम्। ततो जस 'सुपा सुलुग्०' इति लुक्]

शर्मन् न्यायगृहे, प्र०—अत्र 'सुपा सुलुक्०' अ० ७ १ ३९. इति ङेर्लुक् 'न ङि-सम्बुद्धयो ' अ० ८ २ ८ इति नलोपाभाव ७ ३५ [शर्मन् इति व्याख्यातम्। तत 'सुपा सुलुग्०' इति ङेर्लुक्]

शर्मसदः ये शर्मणि सुखे सीदन्ति ते (वीरजना) १ ७३.३ ये गृहे सीदन्ति ते (वीरा =क्षात्रधर्मयुक्ता जना) ३ ५५ २१ [शर्मन् इत्युपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्। शर्मन्निति व्याख्यातम्]

शर्यणावति शर्यणोऽन्तरिक्षदेशस्तस्याऽदूरभवे (स्थाने) १ ८४ १४ हिंसनीय पदार्थों से युक्त भूमितल मे स० वि० १९५, ९ ११३ १ [शर्यणप्राति० अदूरभवार्थे मतुप् छान्दस । पूर्वस्य च दीर्घ]

शर्यहा हन्ताव्यहन्ता (तिग्मशृङ्ग =सूर्य) ६ १६ ३९ [शर्योपपदे हन हिंसागत्यो. (अदा०) धातो क्विप्। शर्यम्= शॄ हिंसायाम् (क्र्या०) धातोर्यत्]

शश्रमाणः भृश श्रम कुर्वन् (वलाध्यक्षो न्यायाधीश) ४ १२ २ [श्रमु तपसि खेदे च (दिवा०) धातोर्यङ्-लुगन्ताच्छानच् । व्यत्ययेनात्मनेपदम्]

शश्रमाणा तपोऽन्विता (विदुषी स्त्री) १ १७९.१ [शश्रमाण इति व्याख्यातम् । तत स्त्रिया ङीप्]

शश्वचै परिष्वङ्गाय ३ ३३.१० [शश्वचै परिष्व-जनाय नि० २.२७]

शश्वच्छश्वत् व्यापक व्यापक वस्तु ३ ३६ १. [शश्वत्पदस्य वीप्साया द्वित्वम् । शश्वदिति निपातश्चादिषु पठ्यते]

शश्वत् निरन्तरम् ६ २१ ८. अनादिरूपम् (क=सुख-सम्पादक ज्ञानम्) १ ४७ १० अनादिस्वरूपत्वाज्जगत्कार-णात् १ ३० १६ **शश्वतः**=निरन्तरान् (पथिकान्) ५ ५२ २ सनातन जगत्कारण का स० प्र० २३८, १० ४८ १ सनातनविद्यायुक्तान् (विद्वज्जनान्) १ १३५ ७ अनादिभूतस्य (प्रजाजनस्य) ७ १९.१ अनादिस्वरूपान् पदार्थान् २ १२ १०. अनादिस्वरूपस्य परमेश्वरस्य सम्बन्धात् १ ७२ १ **शश्वता**=सनातनेन गुणेन १९ ४ **शश्वन्तम्**=अनादिभूत वेदविद्याविषयम् ६ ६१ १ **शश्वन्तः**=निरन्तर वर्त्तमाना (वाजा =विज्ञानवन्तो जना) १७ ७६ अनादिभूता जीवा ५ १४ ३ अनादिभूता. प्रवाहेप्यनित्या पृथिव्यादय ७ १ ३ निरन्तरा (शत्रव) ७ १८ १८ [शश्वन्तौ शश्वद्गामिनौ विश्वगामिनौ बहु-गामिनौ वा नि० १३ ३७ शश्वत् बहुनाम निघ० ३ १. शश्प्राति० मतुप् । शश्=शश प्लुतगतौ (भ्वा०) धातो क्विप्]

शश्वतः निरन्तरो व्याप्त धर्म ५ १२.४

शश्वतीनाम् अनादिभूताना घटिकानाम् १ ११३ १५ सनातनीनामुषसा प्रकृतीना वा १ १२४ २ प्रवाहरूपेणा-नादीनाम् (उषसाम्) १ ११३ ८ अनादिभूताना प्रकृति-जीवाख्याना प्रजानाम् ३ ५६ ३ **शश्वतीः**=सनातन्य (प्रजा) ३ ९ ४ अविनश्वरा (इष =प्रजा) ६ २९ अनादिस्वरूपा (प्रजा) १ २७ ७ [शश्वत्प्राति० स्त्रिया ङीप्]

शश्वत्तमम् अतिशयेनाऽनादिभूतम् (सोमम्=ऐश्वर्य-योगम्) ३ ३५ ६ अनादिस्वरूपमनुत्पन्न कारणम् २ ८ १ अतिशयितमनादिरूप वेदवोधम् १२ ५१ सदैव वर्त्तमानम् (विज्ञानम्) ३ ७ ११ [शश्वत्प्राति० अतिशायने तमप् । शश्वत्तमा शाश्वतिकतमा नि० ४ १९]

शश्वत्तमा याऽतिशयेन सनातनी (उषा) १ १२४ [शश्वत्तममिति व्याख्यातम् । तत स्त्रिया टाप्]

शश्वधा शश्वदेव ३ ३३ ७

शश्वन्ता सनातनौ (जडचेतनौ) १ १६४ ३८ [शश्वन्तौ शश्वद्गामिनौ नि० १३ १७ द्विवचनस्याकार-श्छान्दस]

शश्वान् शीघ्रगतिमान् (विद्वज्जन), प्र०—शश प्लुतगतौ इति धातो क्विबन्तान्मतुप् २.३८ ६ [शश प्लुतगतौ (भ्वा०) धातो क्विप्-प्रत्यये शश् इति रूपम् । ततो मतुप्]

शष्पाणि आहृत्य सशोध्य ग्राह्याणि धान्यानि १९ १३ **शष्पैः**=हिंसकै (जनै), प्र०—अत्रौणादिको बाहुलकात् कर्त्तरि प २१ ४२ हिंसनै २१ २९ दीर्घ-लोमभि १९ ८१ [शप हिंसायामर्थे (भ्वा०) धातो खष्पशिल्पशष्प०' उ० ३ २८ सूत्रेण प्रत्ययान्तो निपा-त्यते]

शष्पिञ्जराय पडुत्प्लुत पिञ्जर बन्धन येन तस्मै (सेनाधीशाय) १६ १७ **शष्पिञ्जराः**=पड्ढिसक पिञ्जरो वर्णो येषान्ते (सर्पादय) १९ ५८ [शष् पिञ्जरपदयो समास । शष्=शश प्लुतगतौ (भ्वा०) शष हिंसायामर्थे (भ्वा०) धातोर्वा क्विप् । पिञ्जर =पिजि वर्णे (अदा०) धातोर् बाहु० औणा० अर]

शष्प्याय शष्पेषु तृणादिषु साधवे (पुरुषाय) १६ ४२ [शष्पप्राति० साध्वर्थे यत् । शष्पमिति व्याख्यातम्]

शसनम् हिसन ताडनम् १ १६३ १२ शसन्ति हिंसन्ति यस्मिँस्तद् युद्धम् २९ २३ [शसु हिंसायाम् (भ्वा०) धातोरधिकरणे ल्युट्]

शसा प्रशसया ५ ४१ १८ [शसु प्रशसायाम् (भ्वा०) धातो सम्पदादित्वात् क्विप् । ततस्तृतीयैकवचनम्]

शस्त प्रशसत ४ ३७ ८ छिन्त २५ ४१ ताडयत हिंस्त १ १६२ १८ [शसु स्तुतौ (भ्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक् । अथवा शसु हिसायाम् (भ्वा०) धातोर्लोट् । शपो लुक्]

शस्तम् प्रशसनीयम् (श =सुखम्) ५ ४७ ७ प्रशसि-तम् (बर्हि =उत्तमस्थानम्) ३ ५३ ३ स्तुत्य कर्म ३३ २४ **शस्ते**=प्रशसिते (उक्थे=वक्तव्ये) ४ २० १० [शसु स्तुतौ (भ्वा०) धातो क्त]

शस्तिम् प्रशसाम् ४ ३ ३ [शसु स्तुतौ (भ्वा०) धातो स्त्रिया क्तिन्]

१.१००५ [शवस् धननाम निघ० २ १ तत साध्वर्थे यत्]

शविष्ठ बहु शवो बल विद्यते यस्य स शवस्वान् सोऽतिशयितस्तत्सम्बुद्धौ (सभापते), प्र०—अत्र शवशब्दाद् भूम्न्यर्थे मतुप् तत इष्ठन् 'विन्मतोर्लुक्' अ० ५ ३ ६५ इति मतुपो लुक् 'टे' अ० ६ ४ १५५ अनेन टिलोप ६.३७ अतिशयेन बलवत्, प्राप्तविद्य (विद्वज्जन) १ १२७ १. **शविष्ठाः**=अतिशयेन बलवन्त (अ०—राजपुरुषा) १० ४ [शवस् बलनाम निघ० २ ९ ततो मतुवन्तादतिशायन इष्ठन् । 'विन्मतोर्लुक्' अ० ५ ३ ६५ इति मतुपो लुक्]

शविष्ठा अतिशयेन नित्यबलसाधकौ (होतृयजमानौ) ८ ५९ अतिशयेन बलवन्तौ (सभासेनेशौ) ६ ६८ २ [शविष्ठ इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शवीरया वेगवत्या (धिया=क्रियया प्रज्ञया वा), प्र०—शव गतौ इत्यस्माद्धातो रन्-प्रत्यये टापि च शवीरेति सिद्धम् १ ३ २ देशान्तरप्रापिकया गत्या, प्र०—शु गतौ इत्यस्माद्धातोर्बाहुलकादौणादिक ईरन्प्रत्यय १ ३० १७ [शव गतौ (भ्वा०) धातोर्बाहु० औणा० ईरन् । तत. स्त्रिया टाप्]

शशमते शाम्येत् ६ २ ४१ **शशमे**=शाम्यति निरुपद्रवो भवति, प्र०—अत्र एत्वाऽभ्यासलोपाऽभावश्छान्दस ३३ ८७ प्रशसामि, प्र०—शशमान इति अर्चतिकर्मा निघ० ३ १४, ६ १ ९ [शमु उपशमने (दिवा०) धातोर्लेट् । विकरणव्यत्ययेन शप् । द्वित्व छान्दसम् । अन्यत्र लिट् । 'अत एकहल्मध्ये०' इति प्राप्तावेत्वाऽभ्यासलोपौ न भवतश्छान्दसत्वात् । शशमान इति अर्चतिकर्मा निघ० ३ १४]

शशमानम् अन्यायमुल्लङ्घमानम् (सज्जनम्) २ २० ३ अधर्ममुल्लङ्घमानम् (सत्पुरुषम्) २ १२ १४ **शशमानस्य**=विज्ञातव्यस्य (विद्वज्जनस्य), प्र०—अत्र 'अधिगर्थ०' इति शेषत्वविवक्षाया षष्ठी १ ८६ ८ प्रशसितस्य (यज्यो=सत्यव्यवहारस्य) ४ २३ २ दु खमुल्लङ्घत (मेधाविजनस्य) १ १४२ २ **शशमानः**=प्रशसन् (देव=विद्वज्जन) ४ २३ ४ प्लवमान (मनुष्य) ४ २ १० प्राप्तप्रशस सन् (पुरुष) ४ ५१ ७ स्तोतुमर्हः (भग=धनसमूह) १ २४४ वर्द्धमान (वनस्पति) २०.६५ **शशमानाय**=विज्ञानवते (मनुष्याय) १ ८५ १२. अधर्ममाप्लुत्य धर्मं प्राप्नुवते (जनाय) १ १४१ १० सर्वेषा दु खानामुल्लङ्घकाय (वाघते=मेधाविजनाय) ४ २ १३ प्रशसिताय (विदुषे जनाय) ४ ३१ ८ **शशमानाः**=अविद्या उल्लङ्घमाना (नर=नायका जना) ५.२९ १२ **शशमानेभ्यः**=प्रशसमानेभ्य (नृभ्य=मनुष्येभ्य) ४ ४१ ३ **शशमानेषु**=भोगाभ्यासोल्लङ्घमानेषु ३ १८ ४ [शश प्लुतगतौ (भ्वा०) धातो शानच् । व्यत्ययेनात्मनेपदम् । शशमान इति अर्चतिकर्मा निघ० ३ १४ शशमान शसमान नि० ६ ८]

शशमानासः शत्रुबलस्योल्लङ्घका (सेनाऽमात्यादिजना) ४ १९ १५ [शशमानमिति व्याख्यातम् । ततो जसो ऽसुक्]

शशयम् खशय मेघम्, प्र०—अत्र वर्णव्यत्ययेन खस्य श ३ ५७ २ **शशयः**=शेते यस्मिन् स (स्तन=दुग्धाधारमङ्गम्) ३८ ५ शयान इव (स्तन=शुद्धो व्यवहार) १ १६४ ४९ **शशयाः**=कुमारी अवस्था को उल्लङ्घन करने वाली (युवतय=स्त्रिया) स० प्र० ११०, ३ ५५.१६ शयाना इव (धेनव=वाच) ३ ५५ १६ [खोपपदे शीङ् स्वप्ने (अदा०) धातो 'अधिकरणे शेते' अ० ३ २.१४ सूत्रेणाऽच् । वर्णव्यत्ययेन खस्य शकार । अन्यत्र शीङ् स्वप्ने (अदा०) धातो 'एरच्' इत्यच् । 'वा छन्दसी' ति धातोर्द्वित्वम् । अथवा शश प्लुतगतौ (भ्वा०) धातोर्वाऽच् । द्वित्व छान्दसम्]

शशयानः कृतशयन (कुमार) ५ ७८ ९ [शीङ् स्वप्ने (अदा०) धातोर्लिट कानच् । 'वा छन्दसी' ति गुण । शशयाना शिश्याना नि० ९ ६]

शशः पशुविशेष इव वायु २३ ५६ [शश प्लुतगतौ (भ्वा०) धातो पचाद्यच्]

शशाधि शिक्षय ७ १ २० **शशास**=शाधि २ २९ ५ **शशासुः**=शासति ४ २ १२ अनुशासतु ३ १.२ [शासु अनुशिष्टौ(अदा०) धातोर्लोट् । द्वित्व छान्दसम् । अन्यत्र लिट् शशा=उत्प्लवस्व १ ८० १ [शश प्लुतगतौ (भ्वा०) धातोर्लङ् । अटोऽभाव]

शशीयसी अतिशयेन दु ख प्लावयन्ती (स्त्री) ५ ६१ ६ [शश प्लुतगतौ (भ्वा०) धातो कर्त्तरि तृजन्तात् 'तुश्छन्दसि' अ० ५ ३ ५९ सूत्रेणातिशायन ईयसुन् । तत स्त्रिया ङीप् । तृचो लोप]

शशीयांसम् धर्ममुत्प्लवमानम् (शत्रुजनम्) ४ ३२ ३ [शश प्लुतगतौ (भ्वा०) धातोस्तृजन्तादतिशायन ईयसुन् । तृचो लोप]

(भ्वा०) धातो कर्त्तरि तृच् 'तृन्तृची शसिक्षदादिभ्य.' उ० २ ९४ सूत्रेण]

शंस्तिभिः प्रशंसाभि' १ १८६ ३ [शंसु स्तुतौ (भ्वा०) धातो स्त्रियां क्तिन्। नलोपाऽभावश्छान्दस। औणा० वा ति]

शंस्य शंसितु सर्वथा स्तोतुमर्हं (अ०—जगदीश्वर) ३ ३७ **शंस्यम्**=स्तुत्य समिद्धिकरम् (कर्म) १ ११६.११. प्रशंसनीयम् (कर्म) १ ११७ ६ स्तोतु योग्यम् (वच.) ५ ३६ ५ शंसितु योग्यम् (उक्थ=स्तोत्रम्) १.१० ५. [शंसु स्तुतौ (भ्वा०) धातो 'शंसिदुहिगुहिभ्यो वेति वक्तव्यम्' अ० ३.१ १०९ वा० सूत्रेण क्यपो विकल्पेन ण्यत्]

शंस्या प्रशंसनीये कर्मणी १ ८ १० [शंस्यम् इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

शाकाः शक्तिमत्य (गाव) ६ २४ ४. [शाकप्राति० मत्वर्थे अर्श-आदित्वादच्। ततष्टाप् स्त्रियाम्। शाक=शक्लृ शक्तौ (स्वा०) धातोर्घञ्। अथवा शो तनूकरणे (दिवा०) धातोर्बाहु० औणा० कन्]

शाकिनम् शक्तिमन्तम् (इन्द्र=राजानम्) ३ ५१ २. **शाकिने**=प्रशस्ता शाका शक्तिगुणयुक्ता गुणा विद्यन्ते यस्मिंस्तस्मै (शक्राय=सभाद्यध्यक्षाय) १ ५४.२ शक्तिमते (वीरपुरुषाय) ६ ४५ २२ **शाकी**=अवश्य शक्तु शील. भा०—बहुबलसामर्थ्य (गृहस्थ) १७ ८५ प्रशस्त शाक शक्तिर्विद्यते यस्य स (सभाध्यक्ष) १ ५१ ८ परमशक्तियुक्त, शक्ति देने वाला (ईश्वर) आर्याभि० १ १४ [शाकप्राति० प्रशंसायामर्थे भूम्न्यर्थे वा इन्। अथवा शाकीप्राति० मत्वर्थे 'शाकीपलालीदद्द्वा ह्रस्वत्व च' अ० ५ २ १००, वा० सूत्रेण न प्रत्ययो ह्रस्वत्व च। शाकी=शाकप्राति० स्त्रियां गौरादित्वात् ङीप्। शाकमिति व्याख्यातम्]

शाके शक्तिनिमित्ते (धर्मे) ५ १५ २ **शाकैः**=शक्तिविशेषै ६ १९ ४ शक्तिभि ४ १७ ११ [पूर्वपदे व्याख्यातम्]

शाक्वररैवते शाक्वरश्च रैवतश्च ते १० १४ शक्त्यैश्वर्यप्रतिपादिके (सामनी=एतदुक्ते कर्मणी) १५ १४ शक्तिधनप्रतिपादिके (पदार्थसमूहे) १३ ५८ [शाक्वररैवतपदयो समास। शाक्वर=शक्वरप्राति० भवार्थेऽण्। शक्वर=शक्लृ शक्तौ (स्वा०) धातोर्बाहु० औणा० वरट्। छान्दसो वा वरच्। रैवतम्=रैप्राति० मतुबन्ताद् 'तस्येदम्' इत्यर्थेऽण्]

शाक्वराय शक्तिजाय (यन्त्रशिल्पविज्जनाय) २९ ६०. शक्तिजननाय ५ ५ [शक्वरप्राति० भवार्थेऽण्। शक्वर=शक्लृ शक्तौ (स्वा०) धातोर्बाहु० औणा० वरट्। वरच् छान्दसो वा]

शाखा. या: येऽन्तरिक्षे शेरते ता ७ ४३ १ वृक्षावयवा' १ ८ ८. [शाखा अङ्गुलिनाम निघ० २ ५ शाखा खशया शक्नोतेर्वा नि० १ ४]

शाचीन् व्यक्तान् (लोकान्) २३ ८ [शच व्यक्तायां वाचि (भ्वा०) धातो 'इगुपधज्ञाप्रीकिर इण्' 'इणजादिभ्य' अ० ३.३ १०८ वा० सूत्रेण इण्]

शाण्डः य श्यति तनूकरोति तथाऽयम् (विद्वज्जन.), प्र०—अत्र शो तनूकरणे इत्यस्मादौणादिकोऽण्डच् प्रत्यय ६ ६३ ९

शातवनेये शतान्यसङ्ख्यातानि वनय सम्भक्तयो येषान्ते शतवनयस्तैर्निर्वृत्ते (जगति) १ ५९ ७ [शतवनिपदयो समासे निर्वृत्तेऽर्थे ढञ्]

शादम् शीयते छिनत्ति यस्मिंस्त शादम् २५ १ [शद्लृ शातने (भ्वा०) धातोर्घञ्। शो तनूकरणे (दिवा०) धातोर्वा 'शाशपिभ्या ददनौ' उ० ४ ९७ सूत्रेण द]

शाधि शिक्षस्व २ २८ ९ नाट्य प० वि०। [शासु अनुशिष्टौ (अदा०) धातोर्लोट्। 'शा हौ' इति शादेश]

शान्तमया अतिशयेन सुखप्रापिकया (तन्वा=देहेन विस्तृतोपदेशनीत्या वा) १९ २. [शम् सुखनाम निघ० ३ ६ ततोऽतिशायने तमबन्तात् स्त्रियां टाप्। वर्णव्यत्ययेनाकारस्याकार]

शान्तमेन अतिशयेन सुखकारकेण (विज्ञानेन) १४ १२ अतिशयसुखेन १५ ६४ अत्यन्तसुखरूपेण कर्मणा १३ १९ [शम् सुखनाम निघ० ३.६ ततोऽतिशायने तमप्। अकारस्याकारो वर्णव्यत्ययेन]

शान्तिः शान्तिकरम् (अन्तरिक्षम्=आकाशम्) ३६ १७ दुष्टक्रोधादि उपद्रव रहित (जन) आर्याभि० २ २५, ३६.१७ शान्त निरुपद्रव सुखकारक (द्युलोकादि) आर्याभि० २ २५, ३६ १७ आध्यात्मिक शरीर मे ज्वरादि पीडा से होने वाले, आधिभौतिक शत्रु, सर्प, चौरादिको से होने वाले, आधिदैविक मन, इन्द्रिय, अग्नि, वायु, अतिवृष्टि, अनावृष्टि, अतिशीत, अत्युष्णतादि से होने वाले सन्ताप की निवृत्ति आर्याभि० २ १, त० आ० १० १ **शान्त्यै**=सुखाय, भा०— विज्ञानधर्मपुरुषार्थैरैहिकपारमार्थिकसुखससाधनाय ३ ४३ निरुपद्रवता के लिए स० वि० १४७, ३ ४३

शस्तोक्थस्य शस्तानि प्रशसितानि उक्थानि ऋक्सूक्तानि येन तस्य (वीरगृहपते) ८ १२ [शस्त-उक्थ-पदया समास । शस्तम्=शसु स्तुतौ (भ्वा०)+क्त । उक्थम्=वच परिभाषणे (अदा०) पातृतुदिवचि०' उ० २.७ धातो थक्]

शस्त्राणाम् शसन्ति यैस्तेषाम् १६ २५ [शसु स्तुतौ (भ्वा०) धातोर्बाहु० औणा० क्त्र । शस्त्र तद् यदेनच्छंसति तस्माच्छस्त्र नाम श० ४ ३ २ ३ विट् शस्त्रम् ष० १ ४ प्रजा शस्त्रम् श० ५ २ २ २० वाग् हि शस्त्रम् ऐ० ३ ४४]

शस्मन् स्तोतुमर्हे (प्रयामनि=प्रयाणे) १.११६ २ [शसु स्तुतौ (भ्वा०) धातोर्मनिन् । किच्च वहुलवचनात् । ङेर्लुक् च छन्दसि]

शस्यते स्तूयते १ ८६ ४ उच्चार्यते ३ ६२ ७ प्रशसितो भवति १ ५३ १ **शस्यन्ते**=स्तूयन्ते ७ ५६ २३. **शस्यसे**=स्तूयसे ६.५ ६ [शसु स्तुतौ (भ्वा०) धातो कर्मणि लट्]

शस्यमानम् प्रशसित सत् (नाम=पदार्थाना सज्ञा) १७ ६० प्रशसितव्यम् (स्तोम=यश) ४ ४ १५ प्रशसनीयम् (सिद्धान्तम्) ४ ५८.२ **शस्यमाने**=प्रशसनीये (उक्थे=वचने) ६ २३ १. [शसु स्तुतौ (भ्वा०) धातो कर्मणि शानच्]

शस्यमानः स्तूयमान (सज्जनो राजा) ७ ८ ३ [शसु स्तुतौ (भ्वा०) धातो कर्मणि शानच्]

शस्यमाना स्तवनीया (तनू=शरीरम्) ६ २४.७ [शसु स्तुतौ (भ्वा०) धातो कर्मणि शानजन्तात् स्त्रिया टाप्]

शस्यमानासः प्रशसिता (स्तोमास=स्तुतय) ६ ६६ ३ [शस्यमान इति व्याख्यातम् । ततो जसोऽसुक्]

शंयुना सुखमयेन (व्यवहारेण) १६ २६ **शंयोः**=सुखस्य ऋ० भू० ३०८, ३६ १२ कल्याणवत साधनात् कर्मण सुखवतो वा, सुखात्, प्र०—अत्र 'कशभ्या वभयुस्तितुतयस अ० ५ २ १३८ इति शमो युस्प्रत्यय ३ ४३ श लौकिक पारमार्थिक सुख यस्मिँस्तस्य (मोक्षस्य) १ ४३ ४ भा०—सुखाऽमृतस्य ३६ १२ [शम् सुखनाम निघ० ३ ६ ततो मत्वर्थे 'कशभ्या वभयुस्तितुतयस' अ० ५ २ १३८ सूत्रेण युस् प्रत्यय । शयु सुखयु नि० ४ २१]

शंस स्तुहि ४ ३ ३ अनुशाधि १ ३७ ५ प्रशस ७.३१ २ **शसत्**=शसेत् ६ २३ ५ **शंसत**=प्रशसत ४ ३५. स्तुवीत तद्गुणान् प्रकाशयत, प्र०—अत्राऽन्तर्गतो ण्यर्थ १ २१.२ **शंसन्ति**=प्रशसन्ति ५ ७७ १ स्तुवन्ति ३ ३ ८ **शंसन्तु**=सुखकारका भवन्तु १ ५ ७ **शंससि**=स्तौषि २ ४३ २ **शंसा**=प्रशसे ४ ४ १४ **शंसाति**=प्रशसेत् ४ ६ ११ **शसामः**=स्तुम १ ६० ५ **शंसामि**=प्रशसामि ४ ३२ २२ **शंसाव**=प्रशसेव, ३ ५३ ३ **शंसि**=स्तौषि २ ४ ८ **शंसिषम्**=प्रशसेयम् ६ ४८ १६ **शंसिषः**=प्रशसे १ ८४ १६ प्रशस, प्र०—लोड्मध्यमैकवचनप्रयोग ६ ३७ **शसे**=प्रशस ७ ३१ २ [शसु स्तुतौ (भ्वा०) धातोर्लोट् । अन्यत्र लेट्, लट् चापि]

शंसते प्रशसकाय (जनाय) ५ ४२ ७ **शंसन्**=प्रशसन् (पुरुष) ४ ५१ ७ **शसन्तम्**=प्रशसा कुर्वन्तम् (सज्जनम्) २ १२ १४ **शंसन्तः**=स्तुवन्त (व्रतपा=विद्वास) ३ ४ ७ उपदिशन्त (सज्जना) ६ २६ ४ [शसु स्तुतौ (भ्वा०) धातो शतृ]

शंसन्तीम् गुण-कीर्त्तन करने वाली वधू स० वि० १३७, अथर्व० १४ १ ६ [शसु स्तुतौ (भ्वा०) धातो शत्रन्तान् ङीप्]

शंसम् प्रशसनम् ७ ३४ १२ प्रशसाम् ३ १८ २ प्रशस्तम् (व्यवहारम्) १ १२२ ५ शसन्ति येन तम् (अग्निम्) ५ ३ ४ स्तुतिम् १ १८२ ४ प्रशसितम् (मर्त्त=मनुष्यम्) १ १४१ ६ प्रशसनीयम् (सवितार=परमात्मानम्) ५ ४६ ३ शसन्ति येन तं स्तुतिसमूहम् १ २७ ३ शसन्ति येन शास्त्रवोधेन तम् १ ३३ ७ प्रशसकम् (सज्जनम्) ७ ५६ १६ **शंसः**=शसन्ति स्तुवन्ति यस्मिन् स ३ ३० शसन्ति यत्र स १ १८ ३ स्तुत्य (विद्वज्जन) २ २६ १ शस्यते य स (विद्वान् जन) १ ६४ ८ अनुशासन प्रशसा वा ७ ३५ २ स्तुति २ ३४ ६ **शंसाः**=प्रशसा ७ २५ ३ [शसु स्तुतौ (भ्वा०) धातोर्घञर्थे क]

शंसय प्रकृष्टगुणवत कुरु १ २६ २ प्रशसायुक्तान् कुरु १ २६ ४ प्रशस्तान् कुरु १ २६ १ प्रकृष्टज्ञानवत कुरु १ २६ ३ सत्याननपराधान् सम्पादय १ २६ ५ प्रशसय १ २६ ६, सुखिन सम्पादय १ २६ ७ [शसु (भ्वा०) धातोर्णिजन्ताल्लोट्]

शंसा प्रशसिनौ (मातापितरौ) १ १८५ ६ [शसु स्तुतौ (भ्वा०) धातोर्घञ् । ततो द्विवचनस्याकारादेश]

शंस्ता प्रशसक (अध्वर्यु=अहिंसायज्ञमिच्छुर्जन) २५ २८ प्रशसित (विद्वज्जन) १ १६२ ५ [शसु स्तुतौ

शास्महे=इच्छाम १ ३० १० **शास्व**=शिक्ष २१.६१. **शास्सि**=उपदिशसि १ ३१ १४. [शासु अनुशिष्टौ (अदा०) धातोर्लट्। अन्यत्र लोट् लट् लङ् च। अथवा आङ शासु इच्छायाम् (अदा०) धातोर्लटि शास्ते, शास्महे इत्येते रूपे। शासत् प्रशास्ति नि० ३ ४]

शासत् शासन कुर्वन् (सभाध्यक्ष) १.५१.८. [शासु अनुशिष्टौ (अदा०) धातो. शतृ]

शासनम् शसन्ति हिंसन्ति यस्मिँस्तद्युद्धम् २६ २३ **शासने**=शिक्षायामाज्ञाया वा ३ ७ ५ [शासु अनुशिष्टौ (अदा०) धातोरधिकरणे ल्युट् भावे वा। अथवा शसु हिंसायाम् (भ्वा०) धातोरधिकरणे ल्युट्। दीर्घश्छान्दस]

शासनीम् शास्ति सर्वान् विद्याधर्माचरणशीलान् यया सत्यनीत्या ताम्। समी०—अत्राऽपि सायणाचार्येण मनो पुत्री गृहीता तदप्यशुद्धमेव १ ३१ ११. [शासु अनुशिष्टौ (अदा०) धातोर्ल्युडन्तात् स्त्रिया ङीप्]

शासम् शासितारम् (इन्द्र=सम्राजम्) ७ ३६ शास्ति येन त न्यायम् १ ५४.७ शासनम् १ ६८ ५ पक्षपात विहाय शासनकर्त्तारम् (इन्द्रम्) ६.१६.११. **शासा**= शासनेन ७ ४८ ३ **शासाम्**=शासनकर्त्रीणाम् (राज्य-शासकानाम्) २ २३ १२ [शासु अनुशिष्टौ (अदा०) धातो कर्त्तरि क्विप्। घञर्थे को वा। वज्र शास. श० ३ ८.१ ५ असि र्वै शास इत्याचक्षते श० ३ ८.१ ४]

शासुरिव यथा पूर्णविद्यस्याऽध्यापकस्य सकाशात् १ ११६.१३ [शासु-इवपदयो समास। शासु=शासु अनुशिष्टौ (अदा०) धातोर्बाहु० औणा० ऋ]

शासुः न्यायेन प्रजाया प्रशासितु (राज्ञ) १ ६० २ [शासु अनुशिष्टौ (अदा०) धातोर्बाहु० औणा० ऋ]

शासुः शासनकर्त्तोपदेष्टा (मनुष्य) १ ७३ १ [शासु अनुशिष्टौ (अदा०) धातोर्बाहु० औणा० उ]

शास्य शासितु योग्य (दुष्टजन) १ १८६ ७ [शासु अनुशिष्टौ (अदा०) धातोर्ण्यत्]

शिक्वभिः कीलकबन्धनादिभि १ १४१.८. **सेचनैः** प्र०—शीकृधातो क्वनिपि 'वाच्छन्दसि' इत्याद्यचो ह्रस्वत्वम् २ ३५ ४ वीर्यादि से स० वि० १०४, २ ३५.४ **शिक्वसः**=प्रकाशमानस्य (विद्वज्जनस्य) ६ २ ६ शक्तिमन्त (रुद्रा=वायव) ५ ५४ ४ [शीकृ सेचने (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्। धातोर्ह्रस्वत्व छान्दसम्]

शिक्ष अनुशाधि २ ११ २१. सर्वा विद्या ग्राहय १.२७.५. उपदिश २.१७.६ **शिक्षतम्**=विद्यापादान कारयतम् १ १०६ ७ सुशिक्षया विद्या ग्राह्यनम् १ ३४ ४ **शिक्षति**=विद्या गृह्णाति ग्राहयति वा, प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ५६ २. **शिक्षतु**=विद्यामुपाददातु १ ८१.६ **शिक्षते**=विद्या ग्राहयति १ २८ ३ **शिक्षन्ति**=शिक्षा प्रददति १ १७३.१०. **शिक्षसि**= विद्या ददासि १ ८१ २ **शिक्षात्**=साध्वी शिक्षा कुर्यात् १ ६८ १ **शिक्षाः**=शिक्षस्व, प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ४३ ५ **शिक्षेयम्**=सुशिक्षा कुर्याम् ७ ३२.१६. [शिक्ष विद्योपादाने (भ्वा०) धातोर्लोट्। व्यत्ययेन परस्मैपदम्। अन्यत्र लट्, लेट् लङ्, लिङ् च। शिक्षति दानकर्मा नि० ३.२० शिक्ष देहि नि० १.७]

शिक्षन् विद्योपार्जन कारयन् (इन्द्र=राजा) ७ १६ २ विद्या ददन् (विद्वज्जन) ६ २७ ५. विद्यामुपादापयन् (इन्द्र=अध्यापकजन) १ १३२ ४ विद्याग्रहण कारयन् (विद्वान्) ७.२० ७ [शिक्ष विद्योपादाने (भ्वा०) धातो शतृ। व्यत्ययेन परस्मैपदम्]

शिक्षा विद्याग्रहणसाधिका (सत्क्रिया) २.१५ १० शासनम् ७.२७ २ [शिक्ष विद्योपादाने (भ्वा०) धातो 'अ प्रत्ययात्' अ० ३ ३ १०२ सूत्रेण स्त्रियामकार। ततष्टाप्]

शिक्षानरः य. शिक्षा नृणाति प्राप्नोति स शिक्षाया नर. (इन्द्र=विद्वज्जन) १ ५३ २ विद्योपादानेन नेता (इन्द्र=राजा) ४ २० ८ [शिक्षा-नरपदयो समास]

शिक्षिते विद्वद्भिरुपदिष्टे (उपासानक्ता रात्रिदिने) २८ १६ कृतशिक्षे सत्यौ (उपासानक्ता) २८ १५ [शिक्ष विद्योपादाने (भ्वा०) धातो. क्त। तत स्त्रिया टाप्]

शिक्षितौ विज्ञापितौ (देवा=वायुवह्नी) २८ १७ [शिक्ष विद्योपादाने (भ्वा०) धातो क्त.]

शिक्षोः शिक्षकस्य (पूर्णविद्याप्रकाशवत पुरुषस्य) ३ १६ ३ [शिक्ष विद्योपादाने (भ्वा०) धातोर्बाहु० औणा० उ]

शिग्रवः अव्यक्तशब्दकर्त्तार (राजादयो जना), प्र०—अत्र शिजिधातोरौणादिको रुक्-प्रत्यय ७ १८ १६ [शिजि अव्यक्ते शब्दे (अदा०) धातोर्बाहु० औणा० रुक्]

शिङ्क्ते अव्यक्त शब्द करोति ६ ७५ ३ [शिजि अव्यक्ते शब्दे (अदा०) धातोर्लट्। विकरणव्यत्ययेन श्नम्। शिङ्क्ते शब्दायते नि० २ ६.]

[शमु उपशमने (दिवा०) धातो स्त्रिया क्तिन् । 'अनुनासिकस्य क्विझलो क्ङिति' सूत्रेणोपधाया दीर्घः । शान्तिराप श० १२२११]

शापम् शपन्त्याक्रुश्यन्ति येन तम् (निन्दितवचनम्) ७१८५ [शप् आक्रोशे (भ्वा०) धातोर्घञ् । शाप नैन शप्तम् । नाभिचरितमागच्छति य एव वेद तै० ३१२५.१]

शाबल्याम् शबलस्य कर्बुर-वर्णस्य सुताम् (दोषिनी वेश्याम्) ३०२० [शबलप्राति० 'तस्येदम्' इत्यणन्तात् स्त्रिया ङीप्]

शाम्बरम् शम्बरे मेघे भवम् (वसु=जलाख्य द्रव्यम्) ६.४७२२ **शाम्बरे**=शम्बरस्याऽय सङ्ग्रामस्तस्मिन् ३४७४. [शम्बरप्राति० भवार्थेऽण् । शम्बरम् मेघनाम निघ० ११०]

शारदी शरदो व्याख्यात्री (अनुष्टुप्) १३.५७ **शारदीः**=शरत्सुसम्बन्धिनी (पुरः=शत्रुनगर्य) १.१७४२. शरदि भवा (दासी=सेविका) ६२०१० शरद इमा (अपः=जलानि) ११३१४ [शरद्प्राति० व्याख्यानार्थे तस्येदमर्थे भवार्थे वाऽणन्तात् ङीप् स्त्रियाम्]

शारदेन शरदि भवेन (ऋतुना) २१२६ **शारदौ**=शरदि भवौ (आश्विनकार्तिकौ) १४१६ [शरद्प्राति० भवार्थेऽण् । शरद् इति व्याख्यानम्]

शारि हिंस्यात् ६.५४.७ हिंस्या २२८.५ [शॄ हिंसायाम् (क्र्या०) धातो कर्मणि लुङ् । अटोऽभावश्छान्दस]

शारिः शुकी २४३३ [शॄ हिंसायाम् (क्र्या०) धातो 'अ॰ शकुनौ' उ० ४१२८ सूत्रेण इञ्]

शारी शराणामिमा शती १११२.१६ [शॄ हिंसायाम् (क्र्या०) धातो 'ऋदोरप्' इत्यप्-प्रत्यये शर । तत तस्येदमर्थेऽणन्तात् स्त्रिया ङीप्]

शार्गः शारङ्गश्चातक प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति उलोप २४३३ [शॄ हिंसायाम् (क्र्या०) धातो 'शण् शकुनौ' उ० ४.१२७ सूत्रेण गण्प्रत्यये नुडागमे गण्-प्रत्ययस्य णित्वाद् वृद्धौ च शाङ्ग । 'छान्दसो वर्णलोपो वा' इति उकारलोप]

शार्दूलः व्याघ्रविशेष २४३३ **शार्दूलाय**=महासिंहाय २४३० [शॄ हिंसायाम् (क्र्या०) धातो 'शर्जिभिञ्जादिभ्य ऊलोनलौ' उ० ४९० सूत्रेण ऊलन् । बहुलवचनाद् धातोर्दुक् ह्रस्वश्च]

शार्यातस्य यो वीरसमूह शत्रुन् हिनस्ति योऽयान् समन्तान्निरन्तरं गमयति व्याप्नोति तस्य (वीरपुरुषस्य) १५१.१२ **शार्याते**=य शरीरे हिंसकान् याति प्राप्नोति तस्याऽस्मिन् व्यवहारे ३५१७ शर्याभिरङ्गुलिभिर्निर्वृत्तानि कर्माणि शार्याणि, तान्यतति व्याप्नोति स शार्यातस्तस्मिन् (पुरुषार्थे) प्र०—शर्या इत्यङ्गुलिनामसु पठितम् निघ० २५, ७३५ [शार्योपपदे अत सातत्यगमने (भ्वा०) धातो 'कर्मण्यण्' इत्यण् । शार्यम्—शॄ हिंसायाम (क्र्या०) धातोर्ण्यत् अथवा शार्यम्=शर्या अङ्गुलिनाम निघ० २५ ततो निर्वृत्तार्थेऽण्]

शाला शाला को स० वि० १६७, अथर्व० ९२३.१९ **शाले**=हे शालागृह स० वि० १६८, अथर्व० ९२३२२

शाशदानः अतिशयेन शीयते शातयति छिनत्ति स स (इन्द्रः=सूर्य) १३३१३ [शद्लृ शातने (भ्वा०) धातोर्यङ्लुगन्ताच्छानच् । व्यत्ययेनात्मनेपदम्]

शाशदाना छेदकी (सभासेनापती) १११९२ [शाशदान इति व्याख्यानम् । ततो द्विवचनस्याकारादेश]

शाशदाना अतीव सुन्दरी (विदुषी स्त्री) १.१२४.६ व्यवहारेष्वतितीक्ष्णमाचरन्ती (देवी=विदुषी स्त्री) १.१२३१० [शाशदान इति व्याख्यानम् । तत स्त्रिया टाप्]

शाशदुः दुष्टान् छिन्द्यु २२०४ [शद्लृ शातने (भ्वा०) धातोर्यङ्लुगन्तात् लिट्]

शाशद्रे शातये १.१४१.६ [शद्लृ शातने (भ्वा०) धातोर्यङ्लुगन्तात् लिट् । 'इरयो रे' इति रे-आदेश । व्यत्ययेनात्मनेपदम्]

शाश्वतीभ्यः सनातनीभ्योऽनादिस्वरूपाभ्य स्वस्वरूपेणोत्पत्तिविनाशरहिताभ्य (समाभ्य=प्रजाभ्य) ४०८ सर्वदैकरसमानाभ्य (प्रजाभ्य) प० वि० । नित्याभ्य (समाभ्य=प्रजाभ्य) ४०८ ऋ० भू० ३२०, [शश्वत् प्राति० भवार्थेऽणन्तात् स्त्रिया ङीप्]

शाश्वसद्भिः अतिशयेन प्राणवद्भिस्तर्रै (पशुभि) १३०१६ [श्वस प्राणने (अदा०) धातोर्यङ्लुगन्ताच्छतृ]

शासत् शिष्यात् ३३११ [illegible] शादि प० वि० । यथायोग्य शासन (दण्डनिपातन) करो आर्याभि० ११४, ऋ० १.१०८ शासनु=शाधि २३.४० **शासते** शासा कुर्वन्ति ३३.२८ [illegible] १.१६५४ **शासः**=शिष्या ११३१४ **शास्ति** विशेषेणोपदिशति २३३९. **शास्ते**=[illegible] ३१.२

सुशोभिते (हनू=सुरानासिके) ५ ३६ २ [शिप्रे हनू नासिके वा नि० ६ १७]

शिफायाः नद्या, प्र० अत्र शिञ् निशाने धातो-रौणादिक फक्-प्रत्यय १ १०४ ३ [शिञ् निशाने (भ्वा०) धातोर्बाहु० औणा० फक् । तत स्त्रियां टाप्]

शिमीवतः प्रशस्तकर्मयुक्तान् (मयोभून्=सुखीजन्) १ ८४ १६. **शिमीवान्** प्रशस्तानि कर्माणि भवन्ति यस्य सकाशात् (वज्र=शस्त्राऽस्त्रसमूह.) प्र०—अत्र 'छन्दसीर' इति मतुपो मकारस्य वत्वम् 'शिमीति कर्मनाम' निघ० २ १, १ १०० १२ प्रशस्तकर्मयुक्त (शिल्पविद्या-विज्जन) २ २५ ३ प्रशस्तकर्मवान् (जन) ५ ५६ ३ [शिमी कर्मनाम निघ० २.१ तत प्रशंसायामर्थे मतुप् । 'छन्दसीर' इति मतुपो मकारस्य वत्वम् । शिमीति कर्मनाम । शमयतेर्वा शक्नोतेर्वा नि० ५ १२ शिमीवत कर्मवत नि० १३ ३६]

शिम्बलम् शल्मलीपुष्प पत्र वा ३ ५३.२२

शिम्या सुकर्मयुक्तया (क्रियया) १ १५१.३. कर्मणा १ १५१ १ [शिमी कर्मनाम निघ० २.१]

शिम्युम् आत्मन शिमि कर्म कामयमानम् (दुष्ट-जनम्) ७ १८ ५ **शिम्यून्**=शान्तान् प्राणिन १ १०० १८ [शिमी कर्मनाम निघ० २ १ तत इच्छाया-मर्थे क्यजन्तात् 'क्याच्छन्दसि' इत्यु]

शिरः यच्छीर्यते तदुत्तमाङ्गम् १ १६३ ६ शृणाति हिनस्ति दु खानि येन तत् (उत्तमाङ्गम्) १२४ मूर्द्धेव (विद्वान्) ३७ ८. घनाऽऽकारमुपरिभागम् १६ ७१ शिरोवद्वर्त्तमान घनम् ५ ३० ८ मस्तकम् ६ २० ६ दूराच्छिर इव लक्ष्यमाणम् (आत्मानम्) २६.१७ शिरो-वन्मुख्य वचनम् ६ ५६ ६ उत्तमगुणम् ३७ ५ [श्रिञ् सेवायाम् (भ्वा०) धातो 'श्रयते स्वाङ्गे शिर किच्च' उ० ४ १९४ सूत्रेणासुन् शिरादेशश्च । अपि वा शिर आदित्यो भवति यदनुशेते सर्वाणि भूतानि मध्ये चैषा तिष्ठति । इदमपीतरच्छिर एतस्मादेव समाश्रितान्येतद् इन्द्रियाणि भवन्ति नि० ४ १३ यच्छ्रिय समुदौहस्तस्मा-च्छिरस्तस्मिन्नेतस्मिन् प्राणा अश्रयन्त तस्मादेवैतच्छिर श० ६ १ १ ४ शिरो वै प्राणाना योनि श० ७ ५ १ २२ प्राणोऽग्नि शीर्षम् कौ० ८ १ गायत्री छन्दोऽग्निर्देवता शिर श० १० ३ २ १ गायत्र हि शिर श० ८ ६ २ ६ शिरस्तृ-वृतम् जै० उ० ३ ४ त्रिधातु हि शिर इति । तै० ३ ३.७.११. त्रिवृद्धि शिर. श० ८.४ ४ ४. त्रिवृद् ह्येव शिरो गोम ऽस्तमिथ ता० ५.१.३ शिर एवास्य त्रिवृत् । तस्मात् त्रिविध भवति त्वगस्थिमस्तिष्क. श० १२ २.४.६ त्रिवृत ह्येव शिरो भवति त्वगस्थिमज्जामस्तिष्कम् गो० पू० ५.३ शिरो वा अग्रे सम्भवत सम्भवति चतुर्धा विहित वै शिर, प्राणश्चक्षु. श्रोत्र वाक् ता० २२ ९ ४ शिरो वै प्र थम जायमानस्य जायते श० ८ २ ४ १८ शीर्षतो वाऽग्रे जायमानो जायते श० ३.४ १.१६ तस्मान्छीर्षतोऽग्रे पलितो भवति श० ११ ४.१.६. कपाल हि शिर श० १०.५ ४.१२ तस्माद्दृढतमात् पुरुषस्य शिर तै० ३ २७ ८ प्रादेशमात्रमिव हि शिर श० ८ ५ १.२३ मध्ये सङ्गृहीतमिव हि शिर श० १८ १.२ १७ तस्माच्छिरो ऽन्नानि शेरन्ति नानुशेरन्ति न कुर्वन्त्यनुकुर्वन्ति ता० ५ १ ६ अर्वाग् बिलश्चमस ऊर्ध्वबुध्न. । इद तच्छिर श० १४ ५ २.५. शिर एतद् यज्ञस्य यदुखा श० ६ ५.३.८ शिर एव पष्ठी चिति श० ८ ७ ४ २१ श्री (=उत्कृष्ट वस्तु) वै शिर श० १ ४ ५ ५]

शिरिणायाम् हिंसितायाम् (पृथिव्याम्) २ १०.३. [शिरिणा रात्रिनाम निघ० १ ७ शॄ हिंसायाम् (क्र्या०) धातोर्बाहु० औणा० इनन् किच्च । ततष्टाप् स्त्रियाम्]

शिपः नानारूपा (पशु) २६.५८ [शिल्पम् रूपनाम निघ० ३ ७]

शिल्पाः सुरूपा शिल्पकार्यसाधिका (विश्वदेव-देवता लक्ष्यवय) २४.५ **शिल्पे**=सासनप्रसिद्धक्रियया सिद्धे (विश) ४.६ [शिल्पम् कर्मनाम निघ० २ १ रूपनाम निघ० ३ ७. शील समाधौ (भ्वा०) धातो 'खष्पशिल्प०' उ० ३ २८ सूत्रेण प-प्रत्ययान्तो निपात्यते । निपातनादेव धातोर्ह्रस्वादेश]

शिवतमः अतिशयेन सुखकारी (रस=आनन्द) ११ ५१ अतिशयेन मङ्गलकारी (अग्नि=जीव) १२ ३६ **शिवतमाः**=अतिशयेन शिवा कल्याणकारक कर्म कुर्वन्त कारयन्तश्च (नराय) १ ५३ ११ [शिवप्राति० अतिशायने तमप् । शिवम् सुखनाम निघ० ३ ६ शीङ् स्वप्ने (अदा०) धातो 'सर्वनिघृष्व०' उ० १ १५३ सूत्रेण वन्-प्रत्ययान्तो निपात्यते । धातोर्ह्रस्वत्व निपातनात्]

शिवतमाम् अतिशय कल्याण करने वाली स्त्री को स० वि० १३६, अथर्व० १४ २ ३८ **शिवतमाः**=अतिशयेन सुखकरा (दिश) ३५ ६ [शिवप्राति० अतिशायने तमप् ।

शिङ्गीनि ज्ञात प्राप्तु योग्यानि (वस्तूनि), प्र०—अत्र स्रगिधातो पृषोदरादिनाऽभीप्टरूपसिद्धि ३९ ८

शिताम् तीक्ष्णधाराम् (अशनि=विद्युतम्) १.५४.४. [शिञ् निशाने (स्वा०) धातो क्तान्तात् स्त्रिया टाप्]

शितामतः तीक्ष्णस्वभावात् २१ ४४ शितस्तीक्ष्ण आमोऽपरिपक्व यस्मिँस्तस्मात् (अङ्गादङ्गात्=प्रत्यङ्गात्) २१ ४३ तीक्ष्णत्वेनोच्छिन्नरोगात् २१ ४५ [शित-आम-पदयो समास । तत तसि । दो शिताम भवति । दोर्द्रवते । योनि शितामेति शाकपूणि विपितो भवति । श्यामतो, यकृत्त इति तैटीकि । श्याम श्यायते यकृद् यथाकथा च कृत्यते । शितिमासतो मेदस्त इति गालव नि० ४ ३]

शितिकक्षः शिती श्वेतौ कक्षौ पार्श्वौ यस्य स (पशु पक्षी वा) २४ ४ [शिति-कक्षपदयो समास]

शितिकण्ठाय शितिस्तीक्ष्णीभूत कृष्णो वा कण्ठो यस्य तस्मै (पक्षिणे) १६ २८ **शितिकण्ठाः**=शिति श्वेत कण्ठो येपान्ते (शर्वा=हिंसका जीवा) १६ ५७ शितयस्तीक्ष्णा श्वेता वा कण्ठा येपान्ते (रुद्रा=जीवा वायवो वा) १६ ५६ [शिति-कण्ठपदयो समास । शिति=शो तनूकरणे (दिवा०) धातो क्तिच् औणादिक । शिञ् निशाने (स्वा०) धातोर्वा क्तिन् । शिति श्यते नि० ४ ३]

शितिपादः शितय शुक्ला पादा अशा येपा किरणाना ते १ ३५ ५ [शिति-पादपदयो समास । समासान्तलोप]

शितिपृष्ठस्य शिति (सूक्ष्म) पृष्ठ प्रश्नो यस्य तस्य (वह्ने) ३ ७ १ **शितिपृष्ठः**=शितिस्तनूकरण पृष्ठ यस्य स (पशु) २४ ७ कृष्णपृष्ठ (पशु) २९ ५८ **शितिपृष्ठानाम्**=शितयस्तीक्ष्णा गतय पृष्ठे येपा तेपाम् (पशूनाम्) २८ १९ [शिति-पृष्ठपदयो समास]

शितिबाहुः शितयो बाह्वोर्यस्य स (पशु) २४ २ शिती तनूकर्त्तारौ बाहू इव बल यस्य स (पशु) २४ ७ [शिति-बाहुपदयो समास]

शितिभ्रुवः शितिश्श्वेता भ्रूर्भ्रुकुटिर्यासा ता पक्षिण्य २४ ६ [शिति-भ्रूपदयो समास]

शितिरन्ध्रः शिति श्वेतता रन्ध्रे यस्य स (पशु) २४ २ [शिति-रन्ध्रपदयो समास]

शिथिरा शिथिलौ स्थौ (बाहू=भुजौ) ७ ४५ २ [श्रन्थ विमोचनप्रतिहर्पयो (क्र्या०) धातो 'अजिरशिशिरशिथिल०' उ० १ ५३. सूत्रेण किरच् निपात्यते । धातोरुपधाया इत्व रेफस्य लोप निपातनात् । ततो द्विवचनस्याकारश्छान्दस.]

शिथिराम् शिथिलाम् (पदार्थविद्याम्) ६.५८ २ [पूर्वपदे शिथिर इति व्याख्यातम् । तत स्त्रिया टाप्]

शिपिविष्टः शिपिपु पदार्थेपु प्रविष्ट (विष्णु=धनञ्जय) ८ ५५ **शिपिविष्टाय**=शिपिप्वाक्रोशत्सु प्राणिपु व्याप्त्या प्रविष्टाय (विष्णवे=परमेश्वराय) २२ २० शिपिपु पशुपु पालकत्वेन विष्टाय प्रविष्टाय वैश्यप्रभृतये १६ २९ [शिपि-विष्टपदयो समास । शिपिविष्टो विष्णुरिति विष्णोर्द्वे नामनी भवत नि० ५ ८. शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति नि० ५ ८ यज्ञो वै विष्णु शिपिविष्ट ता० ९ ७ १० एपा वै प्रजापते पशुष्ठा तनूर्यच्छिपिविष्ट ता० १८ २ २६ यमुपैत्सीत् तमपाराप्सीत् तच्छिपितमिव यज्ञाय भवति तस्माच्छिपिविष्टायेति श० ११ १ ४ ४]

शिप्रवान् शिप्रे सुन्दरे हनुनासिके विद्येते यस्य स (इन्द्र=राजा) ६ १७ २ [शिप्रप्राति० प्रशसायामर्थे मतुप् । शिप्रे हनू नासिके वा नि० ६ १७]

शिप्राः उष्णिप ५ ५४ ११ [शिप्रे हनू नासिके वा नि० ६ १७]

शिप्रिणीनाम् शिप्रे ऐहिकपारमार्थिकव्यवहारज्ञाने विद्येते यासा ता विदुप्य स्त्रियस्तासाम्, प्र०—शिप्रे इति पदनाम निघ० ४ ३ अनेनात्र ज्ञानार्थो गृह्यते १ ३० ११ [शिप्रे इति पदनाम (निघ० ४.३) ततो मत्वर्थ इनि । तत स्त्रिया ङीप् । तत पष्ठा]

शिप्रिणे उत्तमहनुनासिकाय (वीर-पुरुपाय) ६ ४४ १४ **शिप्रिन्**=शोभनहनुनासिक (इन्द्र=आप्त-विद्वन्) ३ ३६ १० सुमुख (राजन्) ७ २५ ३ शिप्रे प्राप्तुमर्हे प्रशस्ते व्यावहारिकपारमार्थिके सुखे विद्येते यस्य सभापते तत्सम्बुद्धौ, प्र०—अत्र प्रशसार्थ इनि शिप्रे इति पदनाम निघ० ४ १, ३ ३६ १० **शिप्री**=शत्रूणामाक्रोशक (सेनापति) १ ८१ ४ [शिप्रे हनू नासिके वा नि० ६ १७ । तत प्रशसायामर्थे इनिप्रत्ययान्ताच् चतुर्थी]

शिप्रे हनुनासिके, हनुप्रभृत्यङ्गानि, प्र०—शिप्रे इत्युपलक्षणमन्येपाञ्च नि० ६ १७, ८ ३९ मुखावयवाविव ३ ३२ १ सर्वसुखप्रापिके द्यावापृथिव्यौ १ १०१ १०.

शिशाः=शिक्षय ६ १८ १३ **शिशीत**=तीक्ष्णीकरोति ६ ३ ५ तीक्ष्णीकुरुत ६ १६ ४२ **शिशीतम्**=तीक्ष्णीकुर्यानाम् २ ३९ ७ तीक्ष्णबुद्धियुक्तान् कुरुतम् १ १२२.३ **शिशीते**=तनूकरोति ५ ९ ५ तेजते ५ २ ९ कृश करोति, प्र०—शो तनूकरणे इत्यस्माल्लटि विकरणव्यत्ययेन श्यन स्थाने श्लुरात्मनेपद 'बहुल छन्दसि' इत्यभ्यासस्येत्वम् 'ई हल्यघो' अ० ६ ४ ११३ इत्यनभ्यासस्येकारादेश १ ३६ १६. **शिशीहि**=तीक्ष्णान् सम्पादय ३ २४.५ तीक्ष्णप्रज्ञान् कुरु ७ १८ २ सुखेन शयन कुरु, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ४२ ९ शिनु, प्र०—अत्र 'बहुल छन्दसि' इति श्लु 'अन्येषामपि०' इति दीर्घश्च १ ८१ ७ तीव्रोद्योगिन कुरु ७ १६ ६ [शो तनूकरणे (दिवा०) धातोर्लट्। विकरणव्यत्ययेन श्लु। 'बहुल छन्दसी' त्यभ्यासस्येत्वम्। अन्यत्र लोट् चापि। 'शिशाधि' इत्यादौ शासु अनुशिष्टौ (अदा०) धातोर्लोट्। शप श्लुश्छन्दसि। शिशीहि=शिशीतिर्दानकर्मा निघ० ५ २३]

शिशानः तनूकर्त्ता (वृषभ =बलीवर्द) १७ ३३ [शो तनूकरणे (दिवा०) धातोर्लिट कानच्। अभ्यासस्येत्व छान्दसम्]

शिशिराय शिशिरर्त्तौ व्यवहारसाधनाय २४ ११ शिशिराय ऋतवे २४ २० [शश प्लुतगतौ (भ्वा०) धातो 'अजिरशिशिर०' उ० १ ५३ सूत्रेण किरच् निपात्यते। शिशिर शृणाते शम्नातेर्वा नि० १ १० पड्भिरैन्द्राबार्हस्पत्यै (पशुभि) शिशिरे यजते श० १३ ५ ४ २८]

शिशीते उदके १ ५५ १

शिशीमसि शत्रून् सूक्ष्मान् जीर्णान् कुर्म्म, प्र०—अत्र शो तनूकरणे इत्यस्माल्लटि श्यन स्थाने व्यत्ययेन श्लु 'छन्दस्युभयथा' इति श्लोरार्धधातुकत्वादाकारादेश १.१०२ १० [शो तनूकरणे (दिवा०) धातोर्लट्। व्यत्ययेन श्यन श्लु। छन्दसि श्लोरार्धधातुकत्वादाकारादेश। 'इदन्तो मसि' इति मस इदन्तता]

शिशुमती प्रशस्ता शिशवो विद्यन्ते यस्या सा (अश्वा=वडवा) २१ ३३ शिशुमती=प्रशस्ता बालका विद्यन्ते यासा ता (स्त्रिय) ११४० १० [शिशुरिति व्याख्यातम्। ततो मतुबन्तात् स्त्रिया ङीप्]

शिशुमारः बालहन्ता (पक्षिणी) २४ ३० **शिशुमारान्**=ये स्वशिशून् मारयन्ति तान् (जलचरजन्तून्) २४ २१ [शिशूपपदे मृङ् प्राणत्यागे (तुदा०) धातो 'कर्मण्यण्' इत्यण्]

शिश्नथत् हिंसति, प्र०—श्नथतीति हिंसाकर्मा निघ० २ १९, २ २० ५ प्रलयं करोति ६ ४ ३ शिथिलीकरोति ४.३० १० **शिश्नथे**=श्नथति हिनस्ति, प्र०—अत्र व्यत्ययेनात्मनेपदम् ३ ३१ १३ [श्नथति वधकर्मा निघ० २ १९ ततो लेट्। द्वित्वमभ्यासस्येत्व च छान्दसम्]

शिश्नदेवाः=अब्रह्मचर्या कामिनो ये शिश्नेन दीव्यन्ति क्रीडन्ति ते (लम्पटा कामातुरा जना) ७ २१ ५ [शिश्नोपपदे दिवु क्रीडाविजिगीषादिषु० (दिवा०) धातो 'कर्मण्यण्' इत्यण्। शिश्नदेवा अब्रह्मचर्या। शिश्न श्नथते शिश्ना=अस्नानानि सूत्राणि नि० ४ ६]

शिश्ना अशुद्धानि सूत्राणि ११०५ ८ [शिश्न पूर्वपदे व्याख्यातम्। तत शेर्लोपश्छन्दसि। शिश्न वै शोचिष्केश (ऋ० ३ २७ ४) शिश्न हीद शिश्निन भूयिष्ठ शोचयति श० १.४.३ ९ वृत्तमिव हि शिश्नम् श० ७ ५.१ ३८. योनिरुलूखलम्......शिश्न मुसलम् श० ७ ५.१ ३८]

शिश्रथः शिथिलीकुरु वियोजय ४ १२ ४ विज्ञानदानेन शिथिलानि करोतु १ २४.१४ प्रयतस्व हिन्धि वा ५ ८५ ७ श्रथ्नाति ४ ३२.२२ **शिश्रथत्**=श्रथयेत, प्र०—अत्रा ऽडभाव ११२८ ६ [श्रथि शैथिल्ये (भ्वा०) श्रन्थ विमोचनप्रतिहर्षयो (क्र्या०) श्रथ प्रयत्ने (चुरा०) धातोर्वा लेटि लङि वा छान्दसानि रूपाणि]

शिश्रियाणम् श्रयन्तम् (अग्निम्) १५ २८ व्याप्तम् (परमेश्वरम्) ५ ११ ६ विविधाश्रयम् १ ३२ २ [श्रिञ् सेवायाम् (भ्वा०) धातो शानच्। 'बहुल छन्दसी' ति शप श्लु]

शिश्रियाणाम् मेघाऽवयवाना मध्ये स्थिता विद्युतम् १७ १ [शिश्रियाणमिति व्याख्यातम्। तत स्त्रिया टाप्]

शिश्रिये समाश्रये ९ २४ श्रयति ५ ४४ १३. **शिश्रीत**=श्रयेत ११४९.२ [श्रिञ् सेवायाम् (भ्वा०) धातोर्लट्। विकरणव्यत्ययेन श्लु। अन्यत्र लिङ्, शप श्लुश्च]

शिश्वः शासनीया (अध्यक्षप्रजाभृत्या) ११२२ १५ **शिश्वा**=शिशुना वत्सादिना १ ६५ ५ **शिश्वे**=वत्साय २ ३४ ८ [शिशुरिति व्याख्यातम्। 'जसादिषु छन्दसि वेति वक्तव्यम्' अ० ७ ३ १०९ वा०सूत्रेण गुणादिनामभावे यणादेशे च रूपाणि]

शिषः शिष्ट त्यजेत् १७ ४५ शिष्ट त्यज ६ ७५.१६ [शिष असर्वोपयोगे (चुरा०) धातोर्लङ्। व्यत्ययेन श]

तत. स्त्रिया टाप् । शिवम् सुखनाम निघ० ३ ६]

शिवतराय अतिशयेन मङ्गलस्वरूपाय (भा०—सर्व-मङ्गलप्रदाय परमेश्वराय) १६ ४१ अत्यन्त कल्याणस्वरूप और कल्याणकारक (परमेश्वर) के लिए आर्याभि० २ २६, १६ ४१ [शिवप्राति० अतिशायने तरप् । शिवम् सुखनाम निघ० ३ ६]

शिवम् कल्याणम्, भा० =पारमार्थिक सुखम्, प्र०—शिव शग्म चेति सुखनामसु पठितम् निघ० ३ ६, ३ ४३ कल्याणकारकम् (यज्ञ =गृहाश्रमाख्य शुभाचरणम्) १७ ६ सुखकरम् (अन्तरिक्षम्) ३५ ६ मङ्गलकारिणम् (अग्नि=विद्युतम्) ११ ४७ निश्श्रेयस सुखम् ऋ० भू० २४०, ३ ४३. मोक्ष-सुख को आर्याभि० २ ४६, ३ ४३ **शिवः**= कल्याणकारी (अग्नि =वेदविदव्यापकोपदेशक) २५ ४७ मङ्गलस्वरूपो ज्ञाननयो विज्ञानप्रद (रुद्र =उपदेशको जन) ३ ६३ मङ्गलमयो जीवाना मङ्गलकारी (अग्नि =सर्वाभिरक्षकेश्वर) १ ३११ न्यायकारी (सभापति) १७ ११ मङ्गलाचारी (अग्नि =शत्रुविदारको राजा) १२ १७ सुखप्रद (रुद्र =सेनाध्यक्ष) ३ ६१ **शिवेन**=सर्वसुख-निमित्तेन (मनसा =अन्त करणेन) २ २४ [शिवम् सुखनाम निघ० ३ ६ (यजु० १२ १७) शिव शिव इति शमयत्ये-वैनम् (अग्निम्) एतद् हिंसायै तथो हैष (अग्नि) इमाल्लो-काञ्छान्तो न हिनस्ति (शिव =रुद्र =शान्तोऽग्नि) श० ६ ७ ३ १५ श्यति पापमिति विग्रहे शो तनूकरणे (दिवा०) धातोर्बाहु० औणा० वन् । पृषोदरादिना रूपसिद्धि । शिवु कल्याणे (बहुलमेतन्निदर्शनम् इति धातुष्वपठिता अपि धातवो गृह्यन्ते) धातोरौणा० क । कर्त्तरि वा इगुपधलक्षण क । स (परमात्मा) ब्रह्मा स शिव सेन्द्र सोऽक्षर परम स्वराट् तै० आ० १० ११ २]

शिवसङ्कल्पम् शिव कल्याणकारी धर्मविषय सङ्कल्प इच्छा यस्य तत् (मन =सङ्कल्पविकल्पात्मकम्) ३४ १ धर्मेष्टम् (मन =मननविचारात्मकम्) ३४ २. शिवे कल्याणकरे परमात्मनि सङ्कल्प इच्छाऽस्य तत् (मन =सर्वकर्मसाधनम्) ३४.३ शिवो मोक्षरूपसङ्कल्पो यस्य तत् (मन =योगयुक्त चित्तम्) ३४ ४ शिव कल्याणकरो वेदादिसत्यशास्त्रप्रचारसङ्कल्पो यस्मिँस्तत् (भा०—मन =विद्याधर्माचरणेन पवित्रम्) ३४ ५ मङ्गलनियमेष्टम् (भा०—मन =यज्जित सिद्धिप्रदम्) ३४ ६ कल्याणप्रिय सत्यार्थप्रकाशकञ्च (मन) ऋ० भू० १०७, ३४ १ कल्याणेष्टधर्मशुभगुणप्रियम् (मन) ऋ० भू० १५२, ३४ १ अपने और दूसरो के लिए कल्याण की इच्छा करने वाला, धर्म, कल्याण का सङ्कल्प करने वाला, शुद्ध गुणो की इच्छा करके दुष्ट गुणो से पृथक् रहने वाला, योग-विज्ञान मे युक्त होकर अविद्यादि क्लेशो से वियुक्त, अविद्या का अभाव करके विद्याप्रिय, अधर्माचरण से रोक कर इन्द्रियो को धर्म-पथ मे सदा चलाने वाला (मन =मन) ३४ १ ६ स० प्र० २४६-४७. [शिव-सकल्पपदयो समास । शिवम् सुखनाम निघ० ३ ६ सकल्प =सम्+कृपू सामर्थ्ये (भ्वा०) धातोर्घञ् । 'कृपो रो ल ' इति लत्वम्]

शिवा मङ्गलप्रदा (पृथिवी) १ २७ प्रियदर्शना, सुखप्रदा, कल्याणकारिणी च (तनू धर्मनीति) १६ ४६ **शिवाम्**=मङ्गलमयीम् (जरा=वृद्धावस्थाम्) ५ १४१ १७ कल्याणकारिकाम् (तनू =शरीरम्) ४ २ **शिवे**= मङ्गलकारिण्ये (द्यावापृथिवी=सूर्यभूमी) ६ ७५ १० कल्याणसाधिके (क्रिये), प्र०—सर्वनिघृष्व० उ० १ १५१ इत्यय सिद्ध २ १६ [शिव इति व्याख्यातम् । ततष्टाप् स्त्रियाम्]

शिवानि मङ्गलमयानि (सख्यु कर्माणि) १.१०८ ५ [शिव इति व्याख्यातम्]

शिवासः मङ्गलाचरणा (सखाय) ५ १२ ५ [शिव इति व्याख्यातम् । ततो जसोऽसुक्]

शिवेभिः सुखकारकैर्मङ्गलविधायकै (पायुभि = रक्षणै) ६ ७१ ३ [शिवप्राति० 'वहुल छन्दसी' ति भिस ऐस् न भवति]

शिशवे पुत्राय ४ १८ ८ **शिशुम्**=शासनीय कुमार वालकम् ७ १६ वत्सम् १ १८६ ७ वालकमिव वर्त्तमान जगत् १७ ७० **शिशुः**=अविद्यादिदोषाणा तनूकर्त्ता (विद्वज्जन) १ १४५ ३ य श्यति तनूकरोति स (अग्नि.=सूर्यरूप) २२ १६. **शिश्वः**=शासनीया (वर्णा आश्रमा अध्यक्षप्रजाभृत्याश्च) १ १२२ १५ [शो तनूकरणे (दिवा०) धातो 'श कित् सन्वच्च' उ० १ २० सूत्रेण उ । सन्वद्भावेन द्वित्वादिकम् । शिशु शसनीयो भवति । शिशीतेर्वा स्याद् दानकर्मण । चिरलब्धो गर्भो भवति नि० १०.३९ अय वाव शिशुर्योऽय मध्यम प्राण श० १४ ५ २ २]

शिशाति तीक्ष्णीकरोति ७ १८ ११ **शिशातु**= क्षयतु, प्र०—अत्र शो तनूकरणे इत्यस्मात् श्यन स्थाने 'वहुल छन्दसि' इति श्लु, तत 'श्लौ' इति द्वित्वम् १ १११ ५ **शिशाधि**=सम्यक्तया शिक्षय ६ १५ १६.

वीर्यवन् (अग्ने=वह्निरिव राजन्) ७.१ ८. आशुकर्त्त (अग्ने=विद्वन्) ६ ४८ ७ **शुक्रम्**=वीर्यकरमुदकम् २१ ३४ वीर्यम् ३ ६ ३ शीघ्र सुखकरम् (सोम=महौषधि-रसम्) १९ ७९ शुद्ध शुद्धिहेतुर्वा (ब्रह्म यज्ञो वा) १ ३१. पराक्रमप्रदम् (इन्द्रिय=धनम्) १९ ७८ शुद्धिकरम् (इन्द्रिय=चित्तम्) १९ ७७ पवित्राम् (इन्द्रिय=दिव्या वाचम्) १९ ७३ आशु कार्यकरम् (इन्द्रियम्) १९ ७२ वीर्यवत् (भा०—विदुषा जुष्ट शरीरात्मवलम्) १९.७९ सर्वजगत्कर्तृ शुद्धम् (ब्रह्म) प० वि० । वीर्यवन्तम् (पतिम्) ८ ४८ आशुकारित्वाच्छुद्धभावाच्च (ब्रह्म) ३२ १ क्षिप्र कार्यकरम् (वर्ण=स्वीकारम्) ३ ३४ ५ अनन्त सामर्थ्यम् (ब्रह्म) ऋ० भू० १४०, ऋ० ६ १ ६.५ **शुक्रस्य**=शोधक-स्य योगस्य ७ १३ शोपकस्योदकस्य २ ४० ३. शुद्धि-करस्य (वचस=वचनस्य) २ ९ ४ शुद्धस्य धर्मस्य ८ ४९ **शुक्रः**=आशुकारी (अग्नि=विद्युत्) ६ १६ ३४ वीर्यवान् (योगिजन) ७ १३ पवित्र पवित्रकारको वा (विद्वानुपदेशक) ४ २४ शीघ्रकर्त्ता शुद्धस्वरूपो वा (अ०—ईश्वर) १७ ८० भास्वर (भानु=सूर्य) ११ ५४ य आशु पासु-वर्षा-तीव्रतापाभ्यामन्तरिक्ष मलिन करोति स ज्येष्ठ (मास) १४ ६ तेजस्वी (सूर्य) १ ४३ ५ वीर्यसमूह ८.५७ वायु १८ ५० शुद्धस्वभाव (विद्वज्जन) ४ ४७ १ पावक सूर्य आशुकारी बालश्च ३३ ५ शुद्ध पवित्रो बलिष्ठो वा जन ६ ४ ३ [शुक्रम् उदकनाम निघ० १ १२ ईशुचिर् पूतीभावे (दिवा०) धातो 'ऋज्रेन्द्राग्रवज्र०' उ० २.२८ सूत्रेण रन् । शुक्र शोचतेर्ज्वलतिकर्मण नि० ८ ११ (यजु० १८ ५०) असौ वा आदित्य शुक्र श० ९ ४ २.२१ ता० १५ ५ ९ एप वै शुक्रो य एप (आदित्य) तपति श० ४.३ १ २६ एप वै शुक्रो य एप (आदित्य) तपत्येप उऽएव वृहन् श० ४ ५ ९ ६ तद्वाऽएप एव शुक्रो य एप (आदित्य) तपति तद् यदेष तपति तेनैप शुक्र श० ४ २ १ १ तत्र ह्यादित्य शुक्रश्चरति गो० पू० २ ९ अस्य (अग्ने) एवैतानि (घर्म, अर्क, शुक्र, ज्योति, सूर्य) नामानि श० ९ ४.२.२५ अत्ता वै शुक्र (ग्रह.) श० ५ ४ ४ २० अत्तैव शुक्र आद्यो मन्थी (ग्रह) श० ४ २ १ ३ शुक्र सोमः ता० ६ ६ ९ एतौ (शुक्रश्च शुचिश्च) एव ग्रैष्मौ (मासौ) स यदेतयोर्वलिष्ठ तपति तेनो हैतौ शुक्रश्च शुचिश्च श० ४.३.१ १५ ज्योति शुक्रमसौ (आदित्य) ऐ० ७ १२ शुक्र हिरण्यम् तै० १ ७ ६ ३ ज्योतिर्वै शुक्र हिरण्यम् ऐ० ७ १२ शुक्र ह्येतच्छुक्रेण क्रीणाति यत् सोम हिरण्येन श० ३ ३ ३ ६ (यजु० १ ३१) तेजोऽसि शुक्रमस्यमृतमसि (आज्य) श० १ ३ १ २८. शुक्रा ह्याप. तै० १ ७ ६ ३ सत्य वै शुक्रम् श० ३ ९ ३ २५]

शुक्रज्योतिः शुक्र शुद्ध ज्योतिर्यस्य स (अ०—ईश्वर) १७.८० शुक्र शुद्धाचरण ज्योति प्रकाशो यस्य स (विद्वान् राजा) १२ १५ [शुक्र-ज्योतिप्पदयो समास]

शुक्रदुघस्य आशु पूर्त्तिकर्त्र्या (धेनो=वाच) ६ ३५ ५ [शुक्रोपपदे दुह प्रपूरणे (अदा०) धातो 'दुह कप् घश्च' अ० ३ २ ७० सूत्रेण कप् घश्चादेश]

शुक्रपाः शुक्र योगवीर्य योगबल वा पान्ति ते (देवा=योगिजना) ७ १२ **शुक्रपेभ्यः**=शुक्र वीर्य रक्षन्ति तेभ्य (देवेभ्य=विद्वद्भ्य) ६ २७ [शुक्रोपपदे पा रक्षणे (अदा०) धातो. क]

शुक्रपिशम् शुक्र भास्वर, पिश तद्विपरीत कृष्णञ्च (भा०—विलक्षणस्वरूपमहोरात्रम्) २९ ३१ [शुक्र-पेश-पदयो समास । एकारस्येकारश्छान्दस । पेश रूपनाम निघ० ३ ७ शुक्रपिश शुक्रपेशस श्रियम् । शुक्र शोचतेर्ज्वलति-कर्मण । पेश इति रूपनाम, पिंशतेर्विपिशित भवति नि० ८ ११.]

शुक्रवर्चाः शुक्रस्य सूर्यस्य प्रकाश इव वर्चो न्याया-चरण यस्य स. (पुत्र) १२ १०७ [शुक्र-वर्चस्पदयो समास । वर्चस्=वर्च दीप्तौ (भ्वा०) धातोरौणा० असुन्]

शुक्रवर्णम् शुद्धस्वरूपम् (रथम्) १ १४० १ [शुक्र-वर्णपदयो समास]

शुक्रवर्णाम् शुद्धस्वरूपाम् (धिय=प्रज्ञाम्) १ १४३ ७ [शुक्र-वर्णपदयो समासे स्त्रिया टाप्]

शुक्रवासाः शुक्राणि शुद्धानि वासासि यस्या सा शुद्धवीर्या वा (उषा) १ ११३.७ [शुक्र-वासस्पदयो समास]

शुक्रशोचिषम् शुक्रमाशुकर शोचिस्तेजो यस्मिँस्तम् (अग्नि=विद्युदादिस्वरूपम्) २ २ ३ **शुक्रशोचिषा**=शुक्रस्य शोधकस्य सूर्यस्य शोचिर्दीपन तेनेव ७.१३ **शुक्र-शोचिषे**=शुक्रेण वीर्येण शोचिर्दीप्तिर्यस्य तस्मै (देवाय=विदुषे यतये) ७ १४ १ **शुक्रशोचिः**=शुद्धतेजस्क (अग्नि=राजा सेनेशो वा) ७ १५ १० [शुक्र-शोचिष्-पदयो समास । शोचि ज्वलतोनाम निघ० १ १७ शुक्र इति व्याख्यातम्]

शुक्रसद्मनाम् शुद्धस्थानानाम् ६ ४७ ५ [शुक्र-सद्मन्-पदयो समास । सद्मन्=गृहनाम निघ० ३ ४]

शिष्टम् शिष्यते यस्तम् (सोमम्=उत्तमौषध्यभिषवम्) १ २८ ६ [शिष असर्वोपयोगे (चुरा०) धातो क्त]

शिंशपायाम् एतत्काष्ठे वृक्षविशेषे ३.५३ १६ [शिवोपपदे पा रक्षणे (अदा०) धातो क-प्रत्यये टापि च पृषोदरादिना रूपसिद्धि]

शिशुमारः शिशून् धर्मोल्लङ्घिन शत्रून् मारयति येन स (रथ =रमणीयो यानादि) १ ११६ १८ [शिशूपपदे मृङ् प्राणत्यागे (तुदा०) धातो 'कर्मण्यण्' इत्यण् । शिशु शिशुपदेन विज्ञेयम् । शिशु शसनीयो भवति नि० १०.३६.]

शीकायते य शीक सेचन करोति तस्मै (मेघाय) २२ २६ [शीकशब्दादाचारेऽर्थे क्यजन्ताच्छतृ । शीक = शीकृ सेचने (भ्वा०) धातोर्घञर्थे क]

शीघ्रम् तूर्णम् २२ २६.

शीघ्रचाय शीघ्रगतौ साधवे (जनाय) १६ ३१. [शीघ्रप्राति० साध्वर्थे यत्]

शीनम् सङ्कुचितम् (घृतम्) २५ ६ [श्यैङ् गतौ धातो क्तप्रत्यये 'द्रवमूर्त्तिस्पर्शयो श्य' अ० ६ १ २४ सूत्रेण सम्प्रसारणम् 'श्योऽस्पर्शे' इति निष्ठानत्वम्]

शीभम् क्षिप्रम् ३ ३३ १२ [शीभम् क्षिप्रनाम निघ० २ १५]

शीभ्याय शीभेषु क्षिप्रकारिषु भवाय (जनाय), प्र०—शीभ इति क्षिप्रनाम निघ० २ १५, १६ ३१ [शीभम् क्षिप्रनाम निघ० २ १५ ततो भवार्थे यत्]

शीरम् विद्युद्रूपेण सर्वत्र शयानम् (वह्निम् ३ ६ ८ [शीङ् स्वप्ने (अदा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । शीरम् अनुशयिनमिति वा शिनमिति वा नि० ४.१४]

शीर्यते हिंस्यते १ १६४ १३ [शॄ हिंसायाम् (क्र्या०) धातो कर्मणि लट्]

शीर्षणि शिरसि २ १६ २ **शीर्षसु**=शिरस्सु ५ ५४ १ मस्तकेषु ५ ५७ ६ **शीर्षाणि**=शिरासि ७ १८ १६ **शीर्षे**=शिरसी प्रायणीयोदयनीये नित्य कार्यञ्च शब्दात्मानौ वा १७ ६१ शिरसी इव (अभ्युदयनि श्रेयसे) ४ ५८ ३ **शीर्ष्णः**=शिर इवोत्तमसामर्थ्यात् ३१.१३. शिरस १ १६४ ७ शिरोवदुत्तमसामर्थ्यात् प्रकाशमयात् ऋ० भू० १२७, ३१ १३ **शीर्ष्णा**=शिरोवत् कर्मणा १ ११६ १२ **शीर्ष्णे**=उत्तमाङ्गाय (मखाय यज्ञाय) ३७ ३ उत्तमव्यवहाराय (मखाय=गृहस्थकार्यसङ्गतिकरणाय) ३७.८ उत्तमगुणप्रचारकाय (मखाय=शिल्पयज्ञविधानाय) ३७ ६ शिरोवत्सर्वोपरिवर्त्तमानाय (मखाय) ३७ ८ उत्तमसुखप्रदाय (मखाय) ३७ ७ सर्वोत्कर्षाय ३७ ८ शिर सम्बन्धिने वचसे (मखाय) ३७ ६. उत्तमत्वाय (मखाय) ३७ ५ [शिरस्प्राति० सप्तम्या विभक्तौ 'शीर्षश्छन्दसि' अ० ६ १.६०. सूत्रेण शीर्षन् इत्यादेश]

शीर्षण्या शिरसि भवा (रज्जु) २५ ३१ या शीर्ष्णि साधु सा (रज्जु) १ १६२ ८. [शिरस्प्राति० भवार्थे साध्वर्थे वा यत्प्रत्यये 'ये च तद्धिते' अ० ६ १ ६१ सूत्रेण शीर्षन्नादेश]

शीर्षन् शिरसि १६ ६२ [शिरस्प्राति० सप्तम्येकवचनस्य 'सुपा सुलुक्०' सूत्रेण लुक् । शिरस शीर्षन्नादेशश्च]

शीर्षा शीर्षाणि १ १३३ २ शिरासि ६ ६२.१०. [शिरस् शब्दस्य जसि शीर्षन्नादेश । शेर्लोपश्छन्दसि]

शीर्ष्णा शीर्ष्णा शिरसा शिरसा १.१३२.२ [शीर्ष्णापदस्य वीप्साया द्वित्वम् । शीर्ष्णा=शिरस शीर्षन्नादेशष्टा-विभक्तौ परत]

शीर्ष्णे शीर्ष्णे शिरोवदुत्तमायोत्तमाय सुखाय ७ १८ २४. [शीर्ष्णेपदस्य वीप्साया द्वित्वम् । शीर्ष्णे=शिरसश्चतुर्थ्येकवचने शीर्षन्नादेश]

शीलाय जितेन्द्रियत्वादिशीलिने (पुरुषाय) ३० १४ [शील समाधौ (भ्वा०) धातोरिगुपधलक्षण क]

शुक् शोचन्ति विचारयन्ति यया सा प्रदीप्ति, सूर्यस्येव प्रदीप्तिर्वा ३८ १८ शोक, प्र०—अत्र भावे क्विप् १३ ४७ **शुचा**=होमसाधनेन ३ ४ १ **शुचे**=पवित्राय (व्यवहाराय) ३६ ११. [शुच शोके (भ्वा०) धातो सम्पदादित्वात् क्विप् । शोचति ज्वलतिकर्मा निघ० १ १६]

शुकबभ्रुः शुकस्येव बभ्रुर्वर्णो यस्य स (पशु) २४ २ [शुक-बभ्रुपदयो समास । शुक =शुभ दीप्तौ (भ्वा०) धातो 'शुकवल्कोल्का' उ० ३ ४२ सूत्रेण कक्प्रत्ययान्तो निपात्यते । बभ्रु =भृञ् भरणे (भ्वा०) धातो 'कुर्भ्रश्च' उ० १ २२. सूत्रेण कु प्रत्ययो द्वित्वञ्च]

शुकरूपाः शुकस्येव रूपमिव रूप येषान्ते (पशव) २४.७ [शुक-रूपपदयो समास]

शुकः शुद्धिकृत् पक्षिविशेष २४ ३३ **शुकेषु**=शुकवत् कृतेषु कर्मसु १ ५० १२ [शुभ दीप्तौ (भ्वा०) धातो 'शुकवल्कोल्का' उ० ३ ४२. सूत्रेण कक्-प्रत्ययान्तो निपात्यते । याम शुक हरितमालभते गो० उ० २ १]

शुक्र शक्तिमन् (विद्वज्जन) ५ २१ ४ आशुकारिन्

पालक (योगिजन) ७ ७ [शुचि इत्युपपदे पा रक्षणे (अदा०) धातो क्विप्]

शुचिपेशसम् पवित्ररूपाम् (धियम्) १ १४४ १ [शुचि-पेशस्पदयो समास । पेशस् रूपनाम निघ० ३ ७]

शुचिप्रतीकम् पवित्रप्रतीतिकरम् (विद्वज्जनम्) १ १४३ ६ [शुचि-प्रतीकपदयो समास । प्रतीकम् प्रत्यक्तम् नि० ७ ३१]

शुचिभ्राजाः शुचय पवित्रा भ्राजा प्रकाशा यासान्ता (कुमारिका) १ ७९ १ [शुचि-भ्राजपदयो समास । भ्राज.=भ्राजृ दीप्तौ (भ्वा०) धातोर्घञ्]

शुचिवर्णम् पवित्रस्वरूपमतिसुन्दर वा (कुमारम्) ५ २ ३ [शुचि-वर्णपदयो समास]

शुचिव्रतः पवित्रधर्माचरणशील (जन) २१ १३ [शुचि-व्रतपदयो समास]

शुचिव्रता पवित्रकर्म्माणौ (मित्रावरुणा=अध्यापकोपदेशकौ) ३ ६२ १७ पवित्रशीलौ (अध्यापकोपदेशकौ) १ १८२ १ शुचि पवित्रकर व्रत शील ययोस्तौ (अश्विनौ= सूर्याचन्द्रमसौ) १ १५ ११ [शुचि-व्रतपदयो समास । ततो द्विवचनस्याकारश्छान्दस । व्रतम् कर्मनाम निघ० २ १]

शुचिव्रते पवित्रकर्मयुक्ते (रोदसी=सूर्यभूमी) ६.७० २ [शुचि-व्रतपदयो समास । व्रतम् कर्मनाम निघ० २ १]

शुचिषत् य शुचिषु पवित्रेषु पदार्थेषु सीदति स (परमेश्वर) १० २४ पवित्रेषु व्यवहारेषु वर्त्तमान (ब्रह्म जीवो वा) १२ १४ य पवित्रेषु विद्वत्सु रा (हस = विवेकी जन) १९.७४ [शुचि इत्युपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्]

शुचिष्मः दीप्तिमन् (अग्ने=विद्वज्जन) ६ ६ ४ [शुचिष्प्राति० मतुप् । 'मतुवसो रु०' अ० ८ ३ १ इति रुत्वम्]

शुची पवित्रे (द्यावापृथिवी) ४ ५६ ५ [शुचिरिति व्याख्यातम् । ततो प्रथमाद्विवचनम्]

शुची शुचीनि पवित्राणि (धर्माचरणानि) ७ ५६ १२ [शुचिरिति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शुचीनि पवित्राणि (भेषजा=रोगनिवारकौषधानि) २ ३३.१३ [शुचिप्राति० प्रथमाबहुवचनम्]

शुण्ठाकर्णः शुण्ठौ शुष्कौ कर्णौ यस्य स (पशु पक्षी वा) २४ ४ [शुण्ठ-कर्णपदयो समास । शुठि शोषणे (भ्वा०) धातोर्घञ् पूर्वपदस्य सहिताया दीर्घ]

शुतुद्री शु शीघ्र तुदति व्यथयति सा (नदी) ३ ३३ १. [शु क्षिप्रनाम निघ० २ १५ शु इत्युपपदे तुद व्यथने (तुदा०) धातो छान्दसष्टक् । तत स्त्रिया ङीप् । रुडागमश्च छान्दस. । शुतुद्री शुद्राविणी क्षिप्रद्राविण्याशुतुन्नेव द्रवतीति वा नि० ९ २६]

शुद्धम् अविद्यादिदोषरहितत्वात् सदा पवित्रम् (ब्रह्म) ४० ८ अविद्यादिदोषेभ्य. सर्वदा पृथग् वर्त्तमानम् (ब्रह्म) ऋ० भू० ३६, ४० ८ अविद्यादि दोष, जन्म-मरण, हर्ष-शोक, क्षुधा-तृषा आदि दोषोपाधियों से रहित सदैव निर्मल (परमात्मा) आर्याभि० २ २, ४० ८ निर्दोषम् (ब्रह्म) ४० ८, ऋ० भू० ३२०, [शुध शौचे (दिवा०) धातो क्त]

शुद्धवालः शुद्धा वाला यस्य स' (पशु) २४ ३ [शुद्ध-वालपदयो समास]

शुद्धाः सत्कर्माऽनुष्ठानपूता (देवी =विदुष्य सत्स्त्रिय) ६ १३. निर्मला (अप =जलानि) ६ २८ ७ [शुध शौचे (दिवा०) धातो क्त । तत स्त्रिया टाप्]

शुद्धयतु शुद्धयतु ६ १५ [शुध शौचे (दिवा०) धातोर्लोट् । 'व्यत्ययो बहुलम्' इति द्विविकरणता । तेन श प्रत्यय]

शुनम् ज्ञानवृद्धम् (प्रजास्वामिनम्) ३ ३० २२. वर्धकम् (वीरजनम्) ३.३१ २२ सुखम् १२ ६९. सुखप्रदम् (राजानम्) ३ ३४ ११ [टुओश्वि गतिवृद्धचो (भ्वा०) धातो क्त. । यजादित्वात् सम्प्रसारणम् । 'ओदितश्चे' ति निष्ठानत्वम् । 'हल.' अ० ६.४ २ सूत्रेण प्राप्त दीर्घत्वमपि छान्दसत्वान्न भवति । शुनम् सुखनाम निघ० ३ ६ यद् वै समृद्ध तच्छुनम् श० ७.२ २ ६ या वै देवाना श्रीरासीत् साकमेधैरीजानाना तच्छुनम् श० २.६ ३ २]

शुनहोत्रेषु शुन सुख जुह्वति ददति तेषु (द्रव्येषु) २ १८.६ शुनाना विज्ञानवृद्धाना होत्रेषु दानेषु २.४१.१४ प्राप्तयोगजविद्याद्येषु (सर्वविद्वत्पतिषु) २ ४१ १७ [शुन-होत्रपदयो समास । शुन सुखनाम निघ० ३ ६ शुनमिति व्याख्यातम् । होत्रम्=हु दानादानयो (जु०) धातो. 'हुयामाश्रुभसिभ्यस्त्रन्' उ० ४ १६८ सूत्रेण त्रन्]

शुनः कुक्कुरान् १.१८२ ४ कुक्कुरस्य ४ १८ १३ [श्वन्=टुओश्वि गतिवृद्धचो (भ्वा०) धातो 'श्वन्नुक्षन्-पूषन्०' उ० १ १५९ सूत्रेण कनिन् । श्वन्प्राति० शस् । अन्यत्र ङस्]

शुनःशेपम् सुखस्य प्रापकमिन्द्रियाऽऽरामम् (जनम्) ५ २ ७ शुन शेप.=शुनो विज्ञानवत इव शेपो विद्यास्पर्शो

शुक्रा शुद्धाऽन्त करणा आशुकारिणी (कन्या) ७ ३४.१ शुद्धिकरी (उषा) १ १२३ ९ **शुक्राः**= प्रदीप्ता (उपस =प्रभातवेला) ४ ५१ ९ शुद्धा (किरणा) १ १३५ ३ [शुक्रप्राति० स्त्रिया टाप्। शुक्र इति व्याख्यातम्]

शुक्रा शुद्धानि (शोचीपि=तेजासि) २७ ११ शुक्राणि उदकानि ३ ८ ९ शरीरात्मवीर्याणि ३ १ ८ [शुक्रप्राति० शेर्लोपश्छन्दसि। शुक्र इति व्याख्यातम्]

शुक्रासः शुद्धवीर्या (जना) १ १३४ ५ [शुक्रप्राति० जसोऽसुगागम]

शुक्रेभिः शुद्धैरुदकैर्वीर्यैर्वा २.३५.४ वीर्यवद्भि (अङ्गै) ३ १ ५ [शुक्रप्राति० 'वहुल छन्दसि' सूत्रेण भिस ऐसादेशो न भवति]

शुक्लम् शुद्धम् (पिङ्गाक्ष=पीतवर्णाक्ष जनम्) ३० २१. [ईशुचिर् पूतीभावे (दिवा०) धातो 'ऋज्रेन्द्राग्र०' उ० २ २८ सूत्रेण रन्। 'कपिलकादीना सञ्ज्ञाछन्दसोर्वा रो लमापद्यते' अ० ८ २ १८ वा०सूत्रेण लत्वम्। शुक्लम् तद् यच्छुक्ल तद् वाचो रूपमृचोऽग्नेर्मृत्यो जै० उ० १.२५ ८]

शुचतः शोकाऽऽतुरस्य (विद्वज्जनस्य) ६ ३ ३ **शुचन्त.**=पवित्राचरण कुर्वन्त, कारयन्त (राजप्रजाजना) ४ २ १७ विद्याविनयाभ्या पवित्रा प्रशसिता (जना) ४ २ १५ [शुच शोके (भ्वा०) धातो शतृ। विकरणव्यत्ययेन श। शुचन्तम् जाज्वल्यमानम् नि० ५ ३]

शुचते पवित्रयति विचारयति वा ४ २३ १ [शुच शोके (भ्वा०) ईशुचिर् पूतीभावे (दिवा०) धातोर्वा लट्। व्यत्ययेनात्मनेपद श-प्रत्ययश्च]

शुचद्रथाः शुचन्त पवित्रा रथा यानानि येषान्ते (राजपुरुषा.) ४ ३७ ४. [शुचद्-रथपदयो समास]

शुचध्यै शोचितु पवित्रीकर्त्तुम् ४ २ १ [शुच शोके (भ्वा०) ईशुचिर् पूतीभावे (दिवा०) धातोर्वा तुमर्थेऽध्यै-प्रत्यय]

शुचन्तिम् पवित्रकारकम् (विद्वज्जनम्) १ ११२ ७ [शुच शोके (भ्वा०) ईशुचिर् पूतीभावे (दिवा०) धातोर्वा वाहु० औणा० झिच् किच्च]

शुचमानः पवित्र पवित्रयन् (गुरुवत् जन) ४ २३ ८ [शुच शोके (भ्वा०) ईशुचिर् पूतिभावे (दिवा०) धातोर्वा शानच्। विकरणव्यत्ययेन श। व्यत्ययेनात्मनेपदञ्च। शुचमान दीप्यमान नि० १० ४०.]

शुचयद्भिः पवित्रयद्भि (गुणै) ४ ५६ १. शुचिमाचक्षाणै (देवेभि =विद्वद्भिर्दिव्यैर्गुणैर्वा) ४.५६ २ **शुचयन्तः**=ये शुचीनात्मन इच्छन्ति (देवा =विद्वासो जना) १ १४७ १ [शुचिपदाद् आत्मन इच्छायामर्थे क्यजन्ताच्छतृ। 'तत्करोती' ति वा णिजन्ताच्छतृ]

शुचयः पवित्रकारका (जना) १ १३४ ५ पवित्रा (उषास =प्रभातवाता) १ १३४ ४ पवित्रीभूता (विपश्चितो जना) ३३.८१ **शुचये**=पवित्रकरायाऽऽपाढाय २२ ३१ **शुचिः**=पवित्र पवित्रकारको वा (परमेश्वरो विद्वान्वा) १ ९१ ३ **शुचीनाम्**=पवित्राऽऽचाराणाम् (जनानाम्) ७ ५६ १२. **शुचे**=विद्याविनयाभ्या प्रकाशित (अग्ने=राजन्) ६ ४८ १३ [ईशुचिर् पूतीभावे (दिवा०) धातो 'इगुपधात् कित्' उ० ४ १२० सूत्रेण इन् किच्च। शुचि शोचतेर्ज्वलतिकर्मण। अयमपीतर शुचिरेतस्मादेव। निष्षिक्तमस्मात् पापकमिति नैरुक्ता नि० ६ १ एतौ (शुक्रश्च शुचिश्च) एव ग्रैष्मौ (मासौ) स यदेतयोर्वलिष्ठ तपति तेनो हैतौ शुक्रश्च शुचिश्च श० ४ ३ १ १५. यत् (अग्ने) शुचि (रूपम्) तद्दिवि (न्यधत्त) श० २ २ १ १४ वीर्यं वै शुचि यद्वाऽस्य (अग्ने) एतदुज्ज्वलत्येतदस्य वीर्य शुचि श० २ २ १ ८]

शुचाशुचा होमसाधनेन ३ ४ १

शुचि पवित्र शुद्धिकरम् (ऋत=सत्य न्यायम्) ४ २ १६ पवित्र कर्म्म ४ १ १९ [ईशुचिर् पूतीभावे (दिवा०) धातो 'इक् कृष्यादिभ्य' इतीक्। 'इगुपधात् कित्' उ० ४ १२० इति वा इन् किच्च]

शुचिजन्मनः शुचे पवित्राज्जन्म यस्य तस्य (विद्वज्जनस्य) १ १४१ ७ शुचे रवेर्जन्म यस्यास्तस्या (उषस =प्रभातवेलाया) ६ ३९ ३ **शुचिजन्मानः**= पवित्रजन्मवन्त (मरुत =मनुष्या) ७ ५६ १२ [शुचि-जन्मन्पदयो समास]

शुचिजिह्वः शुचि पवित्रा जिह्वा यस्मात् स (अग्नि) २ ९ १ शुचि पवित्रा सत्यभाषणेन जिह्वा वाग् यस्य स (भा०—कुलदेशोद्दीपको नर) ११ ३६ [शुचि-जिह्वापदयो समास। जिह्वा जोहुवा नि० ५ २७]

शुचिदन् पवित्रदन्त (पुत्र) ७ ४ २ शुचय पवित्रा दन्ता यस्य स (मेधावी राजा) ५ ७ ७ [शुचि-दन्तपदयो समास। 'छन्दसि च' अ० ५ ४ १४२ सूत्रेण दन्तस्य दतृ-आदेश]

शुचिपाः शुचि पवित्रता पालयतीति शुचिपा पवित्र-

शुभः कल्याणकरस्य व्यवहारस्य १० ३३ शुम्भमाना (वीरजना) ५ ५४ ११ कल्याणकरस्य कर्मण शुभगुणसमूहस्य वा ५ ७५ ८ यत्कल्याणकारक मनुष्याणा कर्म तस्य, प्र०—अत्र सम्पदादित्वात् क्विप् १ ३४ ६. **शुभा**=शोभनेन (आचरणेन) ७ ५६ ६. शुभगुणकर्मणा १ १६५ १. **शुभे**=कल्याणाय भा०—सुखाय १८ ७६ श्रेष्ठाय व्यवहाराय १ ८८ २ शुभ्यते यस्तस्मै शुभाय विजयाय, प्र०—अत्र कर्मणि क्विप् १ ८७ ३ शुभगुणप्राप्तये १ ११६ ३ शुभाचरणाय ३० ७ उदकाय ५.५७ ३ [शुभ शोभार्थे (तुदा०) धातो सम्पदादित्वात् क्विप्। शुभम् उदकनाम निघ० १ १२]

शुभानैः मङ्गलमयैर्वचनैस्सह, भा०—मृदुवचनै ३३ २७ [शुभ शोभार्थे (तुदा०) धातोर्बाहु० औणा० आनच् स च कित्]

शुभ्र शुद्धाचरण (राजन्) ५ ५ ४ **शुभ्रम्**=भास्वरम् (शुष्म=बलम्) २ ११ ४. **शुभ्रः**=शुद्ध प्रशसनीय (वलयुक्तो देह) ७ ५६ ८. **भ्राः**=शुद्धाऽऽचारा (देवा=विद्वज्जना) ७ ३६ ३ शुद्धस्वरूपाचारा (पत्नी=भार्या) ५ ४२ १२. श्वेता (पुर=नगराणि) ५ ४१ १२ स्वगुणै शोभमाना (मरुत=वायव) १ १६ ५ शुद्धधर्मा (वीरजना) १ ८५ ३ स्वच्छा (मरुत=वायव) १ १६७ ४ विद्युत २ ११ ३ **शुभ्रे**=शोभमाने सुखे १.५७ ३ शोभायमाने (अध्यापकोपदेशिके) ३ ३३ २ [शुभ शोभार्थे (तुदा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक्। शुभ्रा शोभायमाना नि० १२ ४३]

शुभ्रयामा शुभ्रा शुद्धा यामा दिवसा यया सा (धेनु=वाक्) ३ ५८ १ [शुभ्र-यामपदयो समासे स्त्रिया टाप्]

शुभ्रा श्वेतवर्णा (उपा) ५ ८० ५ [शुभ्र इति व्याख्यातम्। तत स्त्रिया टाप्। शुभ्रे शोभने नि० ६ ३६]

शुभ्रासः श्वेतवर्णा (वायव) २ ३६ २ [शुभ्रप्राति० जसोऽसुगागम]

शुभ्रिषु शुभगुणेषु ५ ३४ ८ शुद्धेषु व्यवहारेषु १.२६ ६ शोभनसुखप्रदेषु (गोष्वश्वेषु) १ २६ १ शोभनेषु विमानादियानेषु तत्साधकतमेषु वा १ २६ २ शुभ्रा प्रशस्ता गुणा विद्यन्ते येषु तेषु (गोष्वश्वेषु) १ २६ ३ शुद्धभावेन धर्मव्यवहारेण गृहीतेषु (गोष्वश्वेषु) १ २६ ५ [शुभ्रप्राति० प्रशसायाम् (मत्वर्थे) इनि]

शुम्वा सुशोभमान (महाराज) ४ ३८ ६ [शुभ शोभार्थे (तुदा०) धातो कर्त्तरि क्वनिप्]

शुम्भत सर्वत्र यानादिकृत्येषु प्रदीपयत १ २१ २. **शुम्भति**=शोभयति १ २२ ८ **शुम्भते**=सुशोभते, प्र०=अत्र व्यत्ययेनाऽऽत्मनेपदम् १ १४० ६ **शुम्भन्ति**=शुभाचरणयन्ति ५ ३६.५. पवित्रयन्ति ५.२२ ४ विराजन्ते ५ १०.४. **शुम्भन्ते**=शोभन्ते १ ८५ १ **शुम्भस्व**=शोभायुक्तान् कुरु ५ १० [शुम्भ शोभार्थे (तुदा०) धातोर्लोट्। अन्यत्र लट् चापि]

शुम्भन्तः=प्राप्तशोभा (विद्वज्जना) १ १३० ६ [शुम्भ शोभार्थे (तुदा०) धातो शतृ]

शुम्भमाना सुशोभायुक्ता (देवी=विदुषी स्त्री) ६ ६४.२ प्रकाशवन्ती (उषा) १ ६२ १० **शुम्भमानाः**=शोभमाना (तन्व.=शरीराणि) ७ ५६ ११. सुशोभिता (द्वार=गृहद्वाराणि) २६ ५ [शुम्भ शोभार्थे (तुदा०) धातो शानच्। ततष्टाप् स्त्रियाम्। व्यत्ययेनात्मनेपदम्]

शुम्भमानाः शोभायुक्ता (हसास=हसा) ७ ५६ ७. शुभगुणाढ्या सम्पादयन्त (मनुष्या) १ १६५.५ [शुम्भ शोभार्थे (तुदा०) धातो. शानच्। व्यत्ययेनात्मनेपदम्। शुम्भमाना. सुशोभिषमाणा नि० ८ १०]

शुम्भमाने सुशोभिते (दम्पती=भार्यापती) २ ३६ २. [शुम्भ शोभार्थे (तुदा०) धातो शानजन्तात् स्त्रिया टाप्]

शुरुधः य शुरुमन्धकारनाशक तेजो दधाति स सूर्य. ६ ३.३ [शुरूपपदे डुधाञ् धारणपोषणयो (जु०) धातो क]

शुरुधः सद्यो रोधिका (वाच) ६ ४६ ८ या शुरुधो दु खानि रुन्धन्ति ता (चन्द्राग्रा साधनानि) ३४ ४२ या शु' सद्यो रुन्धन्ति ता स्वसेना, प्र०—शुरुध इति पदनाम निघ० ४ ३, ४ २३ ८. ये सद्यो रुन्धन्ति ते (विद्वज्जना) ७ २३ २ प्राप्तव्यानि सुखानि १ ७२ ७ ये शुरून् हिंसकान् सूर्यकिरणान् दधति धरन्ति ते गो अग्रा अप) १ १६६ ८ [शु इत्युपपदे रुधिर् आवरणे (रुधा०) धातो क्विप्। शु क्षिप्रनाम निघ० २ १५ शुरूपपदे वा दधाते क्विप्। शुरुध आपो भवन्ति। शुच सरुन्धन्ति नि० ६ १६]

शुशुक्वनम् अतिशयेन प्रदीप्तम् (क्षय=निवासम्) १ १३२.३ [शोचति ज्वलतिकर्मा (निघ० १ १६) धातोर्यङ्लुगन्तादौणा० क्वनिप्। ल्युट् प्रत्यये वा वकारोपजन]

शुशुक्वान् विद्याविनयाभ्या प्रकाशित (विद्वान् सद्वैद्य) १ १८६ ४ शोचक (जार=वयोहन्ता सूर्य)

यस्य स (विद्वान् पुरुष) प्र०—शेप: शपते स्पृशतिकर्मणः नि० ३ २१, १ २४ १२ [शुन-शेपपदयो समास । 'शेपपुच्छलाङ्गूलेषु शुन सञ्ज्ञाया षष्ठ्या अलुग् वक्तव्य' अ० ६ ३ २१ वा०सूत्रेण छन्दस्यसञ्ज्ञायामपि षष्ठ्या अलुक्। शुन सुखनाम निघ० ३ ६ श्वन्प्राति० षष्ठ्या एकवचने रूपम् । शुन वायु शु एत्यन्तरिक्षे नि० ९ ३९ शेप शपते स्पृशतिकर्मणः नि० ३ २१]

शुनासीरा यथा वायुसूर्यौ, प्र०—शुनासीरौ शुनो वायु सरत्यन्तरिक्षे, सीर आदित्य सरणात् नि० ९ ४०, १२ ६६ सुखदस्वामिभृत्यौ, कृषीवलौ ४ ५७ ८ [शुन-सीरपदयो समासे द्विवचनस्याकारश्छान्दस । पूर्वपदस्य 'देवताद्वन्द्वे च' इत्यनङ् । शुनासीरौ=शुनो वायु शु एत्यन्त-रिक्षे । सीर आदित्य सरणात् नि० ९ ४० सवत्सरो वै शुनासीर । गो० २ १ २६]

शुनासीरीया: शुनासीरदेवताका कृषिसाधका (पशव) २४ १९ [शुनासीराव् इति व्याख्यातम् । तत 'सास्य देवता' इत्यर्थे 'द्यावापृथिवीशुनासीर०' अ० ४ २ ३२ सूत्रेण छ]

शुनासीरौ क्षेत्रपतिभृत्यौ ४ ५७ ५ [व्याख्यातम् । शुनासीर्यो द्वादशकपाल पुरोडाशो भवति श० २ ६ ३ ५. शान्तिर्वै भेषज शुनासीरौ कौ० ५ ८. सवत्सरो वै शुनासीर गो० उ० १ २६ अथ यस्माच्छुनासीर्येण यजेत । या वै देवाना श्रीरासीत् साममेधैरीजानाना विजिग्यानाना तच्छुनम्, अथ य सवत्सरस्य प्रजितस्य रस आसीत् तत् सीरम् श० २ ६ ३ २]

शुन्धध्वम् शुन्धन्ति शोधयत् वा, प्र०—अत्र व्यत्यय आत्मनेपदञ्च १ १३ पवित्रीकुरुत २९ २४ **शुन्धन्ताम्**= पवित्रीकुरुताम् ५ २६ **शुन्धन्तु**=पवित्रयन्तु २० २० **शुन्धस्व**=शोधय ५ १० **शुन्धामि**=निर्मलीकरोमि पवित्रीकरोमि वा १ १३ [शुन्ध शुद्धौ (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम् । अन्यत्र लडपि]

शुन्धयन्तु बाह्यदेश पवित्र कुर्वन्तु ४ २. [शुन्ध शुद्धौ (भ्वा०) धातोर्णिजन्ताल्लोट्]

शुन्ध्युव: पवित्रहेतवो रश्मयोऽश्वा, प्र०—अत्र 'तन्वादीना छन्दसि बहुलमुपसङ्ख्यानम्' अ० ६ ४ ७० अनेन वार्त्तिकेनोवङादेश १ ५० ९ शोधिका (विद्युत) ५ ५२ ९ आदित्यकिरणा' १ १२४ ४ **शुन्ध्यू:**=शुद्ध (भगवान्) ५ ३२ शुद्धस्वरूप और सबका शोधक (ईश्वर) आर्याभि० २ १७, ५ ३२ [शुन्ध शुद्धौ (भ्वा०) धातो 'यजिमनि-शुन्धि०' उ० ३ २० सूत्रेण युच् । शुन्ध्युप्राति० जसि 'तन्वादीना छन्दसि बहुलमुपसङ्ख्यानम्' अ० ६.४ ७० वा० सूत्रेणोवङ् । शुन्ध्युरादित्यो भवति शोधनात् । शकुनिरपि शुन्ध्युरुच्यते शोधनादेव । ...आपोऽपि शुन्ध्युव उच्यन्ते शोधनादेव नि० ४ १६]

शुप्तौ शयने कृते सति, प्र०—अत्र वर्णव्यत्ययेन श १ ५१ ५ [ञिष्वप् शये (अदा०) धातो क्त । 'वचि-स्वपि०' इति किति सम्प्रसारणम् । वर्णव्यत्ययेन सकारस्य शकार]

शुभम्=कल्याणयुक्त सुखम् १ २३.११ कल्याणम् ४ ५१ ६ उदकम् ६ ६२ ४. धर्म्यं व्यवहारम् ५.५५.१. कल्याण सङ्ग्राम वा ५ ५७.२ **शुभे**=शोभनाय (वपुषे) १ ६४ ४ कल्याणाय ५ ६३ ५ [शुभम् उदकनाम निघ० १ १२ शुभ शोभार्थे (तुदा०) धातोर्घञर्थे क । शुभे प्रयोगे क्विप् कर्मणि]

शुभयद्भि: शुभमाचरद्भि (मरुद्भि =मनुष्यै) ५ ६०.८ [शुभमिति व्याख्यातम् । तत आचारेऽर्थे-क्यजन्ताच्छतृ]

शुभयन्त शुभ इवाऽऽचरन्ति ७ ५६ १६. **शुभयन्ते**= शुभमाचक्षते १ ८५ ३ [शुभप्राति० 'तत्करोति०' इति णिजन्ताल्लङ् । अडभावश्छान्दस । अन्यत्र लट्]

शुभस्पती धर्मस्य पालकौ (अश्विनौ=अध्यापकोपदेशकौ) १ १२० ६ कल्याणकरव्यवहारस्य पालकौ (अश्विना=प्राप्तविद्यौ स्त्रीपुरुषौ) ५ ७५ ८ शुभस्य शिल्प-कार्यप्रकाशस्य पालकौ (अश्विनौ=जलाग्नी), प्र०—शुभ शुम्भ दीप्तौ इत्येतस्य रूपमिदम् १ ३ १ [शुभ-पतिपदयो समास । सकारोपजनश्छान्दस]

शुभंयावा य शुभ जल याति स (मनुष्यगण) ५ ६१ १३ **शुभंयावान:**=ये शुभ कल्याण यान्ति प्राप्नु-वन्ति ते (देवा =विद्वासो जना), प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति द्वितीयाया अलुक् २५ २०. शुभस्य प्रापका (देवा), प्र०—अत्र 'तत्पुरुषे कृति बहुलम्' इति बहुलवचनाद् द्वितीयाया अलुक् १ ८९ ७ [शुभमित्युपपदे या प्रापणे (अदा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप् वनिव् वा । द्वितीयाया अलुक् । शुभम् उदकम् निघ० १ १२]

शुभंये य शुभ याति प्राप्नोति तस्मै (राज्ञे) ४ ३ ६ [शुभमित्युपपदे या प्रापणे (अदा०) धातोर्ट । द्वितीया या अलुक्]

रक्षणाद्या प्रजा) १ ५२ ४ [शुष्ममिति व्याख्यातम् । तत स्त्रिया टाप्]

षोडशिने प्रशस्ता षोडश कला विद्यन्ते यस्मिँस्तस्मै (इन्द्राय=परमैश्वर्याय) ८ ३३ **षोडशी**=येन षोडश कला जगति रचितास्ता विद्यन्ते यस्मिन् यस्य वा स (परमेश्वर.) ऋ० भू० ४४, ८ ३६. प्रशस्ता षोडश कला विद्यन्ते यस्मिन् स (परमेश्वर), प्र० इच्छा, प्राण , श्रद्धा, पृथिव्यापोऽग्निर्वायुराकाशमिन्द्रियाणि, मनोऽन्न, वीर्य, तपो, मन्त्रो, लोको, नाम चैता कला प्रश्नोपनिषदि षष्ठे प्रश्ने प्रतिपादिता ८ ३६ सोलह कला (१ ईक्षण=विचार, २ प्राण, ३ श्रद्धा, ४ आकाश, ५ वायु, ६ अग्नि, ७ जल, ८ पृथिवी, ९ इन्द्रिय, १० अन्न, ११ मन, १२ वीर्य=पराक्रम, १३ तप=धर्मानुष्ठान, १४ मन्त्र= वेदविद्या, १५ कर्मलोक=चेष्टास्थान, १६ लोको के नाम) वाला ईश्वर आर्याभि० २ १४, ८ ३६ षोडशकला-युक्त (इन्द्र =राजा) २६ १० भा०—येन प्राणादीनि षोडश वस्तूनि सृष्टानि स (ईश्वर) ३२ ५ [षोडश इति व्याख्यातम् । ततो मत्वर्थ इनि । षोडशी (शस्त्र स्तोत्र ग्रह) अथो षोडश वा एतत् स्तोत्र षोडश शस्त्र तस्मात् षोडशीत्या-ख्यायते कौ० १७ १. षोडश स्तोत्राणा षोडश शस्त्राणा षोडशभिरक्षरैरादत्ते षोडशभि प्रणौति षोडशपदाम् निविद दधाति तत् षोडशिन षोडशित्वम् ऐ० ४ १ कि षोडशिन षोडशित्व षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिरक्ष-रैरादत्त गो० उ० ४ १९ वृषण्वद्वै षोडशिनो रूपम् ऐ० ४४ सर्वेभ्यो वा एष सवनेभ्य सन्निर्मितो यत् षोडशी ऐ० ४ ४ सर्वेभ्यो वा एष छन्दोभ्य सन्निर्मितो यत् षोडशी ऐ० ४ ३-४) सर्वेभ्यो वा एष लोकेभ्य सन्निर्मितो यत् षोडशी ऐ० ४ ४ त्रिवृद् वै षोडशी कौ० १७ ३ आनुष्टुभो वै षोडशी कौ० १७ २ ३ आनुष्टुभो वा एष वज्रो यत्-षोडशी कौ० १७ १ वज्रो वा एष यत् षोडशी ऐ० ४ १ वज्र षोडशी ता० १९ ६ ३ वज्रो वै षोडशी ता० १२ १३ १४ गो० उ० २ १३ वज्र षोडशी ष० ३.११ (इन्द्रिय वीर्यं षोडशी ता० २१ ५ ६ वीर्यं षोडशी श० १२ २ २ ७ अतिरिक्तो वै षोडशी ता० ६ १ ५ अपच्छि-दिव वा एतद् यज्ञकाण्ड यत् षोडशी (साम) ता० १८ ६ २३ एकविंशायतनो वा एष यत् षोडशी सप्त हि प्रात सवने होत्रा वषट् कुर्वन्ति सप्त माध्यन्दिने सवने सप्त तृतीये

श्वात्र शीघ्र कर्मविज्ञान वर्त्तते यासा ता (पत्नी =विदुष्य स्त्रिय), प्र०—अर्शादित्वादच्, श्वात्रमिति क्षिप्रनाम निघ० ५ ३, ६ ३४ श्वात्र प्रशस्त विज्ञान धन वा विद्यते यासा ता (आप =प्राणा), प्र०—अत्र अर्शादित्वात् प्रशसार्थेऽच् । श्वात्रमिति पदनामसु पठितम् निघ० ४ २, धननामसु च निघ० २ १०, ४.१२ **श्वात्रेण**=धनेन विज्ञानेन वा १ ३१ ४ [शूपपदे अत सातत्यगमने (भ्वा०) धातोर्बाहु० औणा० रक् बहुलवचनाच्च णत्वम् । शू क्षिप्रनाम निघ० २ १५ श्वात्रमिति क्षिप्रनामाशु अतन भवति नि० ५ ३ श्वात्रम् धननाम निघ० २.१० पदनाम निघ० ४ २ श्वात्रति गतिकर्मा निघ० २ १४ (यजु० ६ ३४) शिवा ह्यापस्तस्मादाह (हे आपो यूयम्) श्वात्रा स्थेति (श्वात्रा =शिवा) श० ३ ९ ४ १६]

श्वात्रास: श्वात्र प्रवृद्ध धन येभ्यस्ते (अग्न्यादय पदार्था), प्र०—श्वात्रमिति धननाम निघ० २ १०, ३३ १. [श्वात्र इति व्याख्यातम् । ततो जसोऽसुक्]

श्वानेव यथा चोरादिभ्यो रक्षकौ कुक्कुरौ २ ३९ ४. [श्वाना-इवपदयो समास । श्वाना=श्वन्प्राति० द्विवचनस्याकारादेश]

श्वान्तम् श्रान्त परिपक्वज्ञानम् (विद्वज्जनम्), प्र०—अत्र वर्णव्यत्ययेन रेफस्य स्थाने व १ १४५ ४ [श्रमु तपसि खेदे च (दिवा०) धातो क्त । वर्णव्यत्ययेन रेफस्य वकार]

श्वावित् सेधा (पशुविशेष) २४ ३३ शल्यक, सेह, इति भाषायाम् २४ ३५ पशुविशेष २३ ५६ [शुना आविध्यत इति विग्रहे श्वन् इत्युपपदे आङ्पूर्वाद् व्यध ताडने (दिवा०) धातो क्विप् । ग्रहिज्यादिना सम्प्रसारणम्]

श्वासय प्राणय २९ ५५ [श्वस प्राणने (अदा०) धातोर्णिजन्ताल्लोट्]

श्वितान: शुभ्रवर्ण (पावक) ६ ६ २ [श्विता वर्णे (भ्वा०) धातोर्बाहु० औणा० आनच् स च कित्]

श्वितीचय: ये श्विति श्वेतवर्णं चिन्वन्ति ते (अग्न्यादय पदार्था) ३३ १ [श्वित्युपपदे चिञ् चयने (स्वा०) धातो पचाद्यच् प्रत्यय । श्विति =श्विता वर्णे (भ्वा०) धातोरौणा० इन् किच्च]

श्वितीची या श्विर्ति श्वेतवर्णमञ्चति सा (उषा) १.१२३ ९ [श्वितीच् इति व्याख्यास्यते । तत स्त्रियाम् 'अञ्चतेश्चोपसख्यानम्' इति ङीप्]

श्वितीचे य श्वितिमावरणमञ्चति तस्मै (सद्वैद्याय) २ ३३ ८ **श्वित्यञ्च:**=ये श्विर्ति वृद्धमञ्चन्ति प्राप्नुवन्ति ते (अध्यापकाऽध्येतार) ७ ३३ १ [श्विर्ति इत्युपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' इति क्विन् । 'अनिदिताम्०' इति नलोपे चतुर्थ्येकवचने भसज्ञायाम् 'अच ' इत्यकारलोपे 'चौ' इति पूर्वस्य दीर्घे च रूपम्]

श्वित्न्येभि: श्वेतवर्णयुक्तैस्तेजस्विभि (सखिभि.) १ १०० १८ [श्विता वर्णे (भ्वा०) धातोर्बाहु० औणा० अन्यप्रत्यये कित्वेऽकारलोपे च रूपम्]

श्वित्र. विचित्र पशुविशेष २४ ३९ [श्विता वर्णे (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक्]

श्वित्र्यम् श्वित्राया भूमेरावरणे साधु (वृषभ=मेघम्) १ ३३ १५ [श्वित्र व्याख्यातम् । तत स्त्रिया टापि श्वित्रा । तत साध्वर्थे यत्]

श्वेतनायै प्रकाशाय १ १२२ ४ [श्विता वर्णे (भ्वा०) धातोर्बाहु० औणा० युच् । तत स्त्रिया टाप्]

श्वेतम् वृद्धम्, भा०—बलादिगुणयुक्तम् (पुरुषम्) २७ २४ श्वेतवर्णम् (अरुषम्=अश्वम्) ३ १ ४. प्रवृद्धम् (अश्वम्=अग्निम्) १ ११६ ६ सतत गन्तु प्रवृद्धम् (विद्युद्यानम्) १ ११९ १० अग्निगुणविद्युन्मय शुद्धधातुर्निर्मितम् (तारम्) ऋ० भू० १९९, ऋ० १ ८२११० **श्वेत:**=भास्वर-स्वरूपत्वाच्छुद्ध (अग्नि) १ ६६ ३, गन्ता वर्द्धको वा (अ०—वायु) २७ २३, [टुओश्वि गतिवृद्धचो (भ्वा०) धातोर्बाहु० औणा० त । अथवा श्विता वर्णे (भ्वा०) धातोर्घञ्]

श्वेत्या शुभ्रस्वरूपा (उषा) १ ११३ २ [श्वेत्या उषोनाम निघ० १ ८ श्वेत्या श्वेतते नि० २ २१. श्विता वर्णे (भ्वा०) धातो 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक्]

श्वैतरीम् अतिशयेन शुद्धाम् (धेनु=धारणाम्) ४ ३३ १, [श्वेतप्राति० अतिशायने तरप्-प्रत्यये श्वेततर । तत 'तस्येदम्' (इत्यण्-प्रत्ययान्तात् स्त्रिया ङीप् । तलोपश्छान्दस]

श्वैत्रेयस्य श्वित्रास्वन्तरिक्षस्थासु दिक्षु भवस्य जलस्य ५.१९ ३ **श्वैत्रेय:**=श्वित्राया वर्णकर्त्र्या भूमेरपत्य श्वैत्रेय (मेघ) १ ३३ १४ [श्वित्राप्राति० अपत्यार्थे 'स्त्रीभ्यो ढक्' अ० ४ १ १२० इति ढक् । ढस्यैयादेश । श्वित्रा=श्विता वर्णे (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । तत स्त्रिया टाप्]

(राजप्रजाजन) १०.३१. सुहृत् (इन्द्र=राजपुरुष) ४.२५.६. सर्वदुःखविनाशनेन सहायकारी (अग्नि=जगदीश्वरः) १.३१.१ **सखायम्**=सर्वसुहृदम् (विद्वत्तम जनम्) ६.४५.१६ सुहृद्वद्वर्त्तमानम् (पतिम्) २६.४० सर्वहितकारी मित्र (ईश्वर) को प० वि०। सखाय=परस्पर सुहृद परोपकारकाः (मनुष्या) १.२२.८ परस्परस्य सहायिन (जना) १७.३८ भा०—सर्वे सह मैत्रीमाचरन्त (सज्जना) ३४.१८. मित्रभाव रखने वाले (सज्जन) प० वि० **सखिभिः**=धर्मानुकूल-स्वाऽऽज्ञापालकै मित्रै: १.१००.२ **सखिभ्यः**=मित्रभावेभ्य मित्रशीलेभ्य. (जनेभ्य) १.४४ [समान ख्यातीति विग्रहे समानोपपदे ख्या प्रकथने (अदा०) धातो 'समाने ख्य स चोदात्त' उ० ४.१३७ सूत्रेण इण्प्रत्यये यलोपे समानस्य च 'समानस्य छन्दसि०' इति सादेशे सखि इति रूपम्। सखिप्राति० सौ 'अनङ् सौ' इत्यनङादेशे सखेति रूपम् अन्यत्र 'सख्युरसम्बुद्धौ' अ० ७.१.९२ सूत्रेण सर्वनामस्थानस्य णिद्वद् भावे वृद्धौ च रूपाणि। सखाय समानख्याना नि० ७.३० सखाय. सप्तपदा अभूम तै० ३.७.७.११]

सखाया सुहृदौ (भिषजा=चिकित्सकौ) २८.७. मित्रवद्वर्त्तमानौ (जीवेशौ) १.१६४.२०. परस्पर मित्रता युक्त (ब्रह्म और जीव) स० प्र० २८३, १.१६४.२० [सखिप्राति० प्रथमाद्विवचनस्याकारादेशे रूपम्। सखीति सखा-पदे व्याख्यातम्]

सखित्वनाय सख्युर्भावाय ६.५१.१४ [सखिप्राति० भावे त्वः। पृषोदरादिना रूप साधनीयम्]

सखित्वम् सख्युर्भावम् ३.१.१५ **सखित्वे**= सखीना सुखायाऽनुकूल वर्त्तमानाना कर्मणा भावस्तस्मिन् १.१०.६ [सखिप्राति० भावे त्व]

सखिवान् बहवो सन्त सखायो विद्यन्ते यस्य स (विष्णु=सूर्य) १.१२६.४ [सखिप्राति० भूम्न्यर्थे मतुप्। छन्दसीर इति मतोर्वत्वम्]

सखिविदम् सखीन् सुहृदो विदन्ति येन तम् (यज्ञम्) ११.८ [सखीत्युपपदे विद ज्ञाने (अदा०) धातो करणे क्विप्]

सखीयतः सखेवाऽऽचरत (जनात्) १.१३१.५ **सखीयताम्**=सखेवाऽऽचरताम् (प्रजाजनानाम्) ४.१७.१८ [सखिप्राति० उपमानादाचारे इत्याचारे क्यजन्ताच्छतृ]

सखीयन् आत्मन सखायमिच्छन् (मर्य=मनुष्य) ३.३१.७ सखेवाऽऽचरन् (जन) ५.४९.१. [सखिप्राति० आत्मन इच्छायामर्थे क्यजन्ताच्छतृ। आचारे वा क्यजन्ताच्छतृ]

सख्यम् मित्रभावम् ८.२५.७. सख्युर्भाव कर्म वा ४.२३.५ मित्रत्वम् १.६२.६ **सख्याय**=सखित्वाय १.१३८.२. **सख्येषु**=सखीना कर्मसु, भावेषु, पुत्रस्त्रीभृत्यवर्गादिषु वा १.१०.५ **सख्यैः**=मित्रकर्मभि. ६.१९.१३. [सखिप्राति० भावे कर्मणि चार्थे 'सख्युर्य.' अ० ५.१.१२६ सूत्रेण य]

सख्या सख्यु कर्माणि ७.३२.२ सख्यानि सख्युः कर्माणि १.१०८.५ मित्रभावकर्माणि १.७१.१०. [सख्यमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

सख्येभिः सखिभि कृतै कर्मभि ३.१.१६. सखीना कर्मभि ३.३१.१८ [सख्यमिति व्याख्यानम्। ततो भिस ऐस् न भवति 'बहुल छन्दसी' ति सूत्रेण]

सगणः गणैर्विद्यार्थिना समूहै सह वर्त्तमान (विद्वज्जन) १.१०१.९ गणेन वीरसमूहेन सहित (इन्द्र=राजा) ३.४७.४ गणेन सह वर्त्तमान (इन्द्र) ३.३२.३ गणेन स्वजनसेनापरिकरेण सहितः (इन्द्र=सेनापति) ७.३७ [गणै सहेति विग्रहे सह-गणपदयो समास। 'वोपसर्जनस्य' इति सह शब्दस्य सादेश.]

सगराः सगरोऽन्तरिक्षमवकाशो येषान्ते (अग्नय=नेतारो विद्वज्जना), प्र०—अर्श आदित्वादच् ५.३४ सगरोऽन्तरिक्ष विद्योपदेशाऽवकाशो येषान्ते (अग्नय) ५.३४. **सगरेण**=अन्तरिक्षेण सह ५.३४ [सगरप्राति० अर्श आदित्वादच् सगर अन्तरिक्षनाम निघं० १.३ सगरा रात्रि श० १.७.२.२६]

सगर्भ्यः समानश्चासौ गर्भ सगर्भस्तस्मिन् भव (भ्राता=बन्धु), प्र०—अत्र 'सगर्भसयूथसनुताद्यन्' अ० ४.४.११४ इति सूत्रेण भवाऽर्थे यन् प्रत्यय ४.२० सोदर (भ्राता=बन्धु) ६.९ [समान-गर्भपदयो समासे 'समानस्य छन्दसि०' सूत्रेण समानस्य सादेशे सगर्भ इति रूपम्। ततो भवार्थे 'सगर्भसयूथसनुताद् यन्' अ० ४.४.११४ सूत्रेण यन्]

सग्धिम् समान भोजनम् २८.१६ **सग्धिः**=समानभोजनम् १८.९ [समाना-ग्धिपदयो समासे 'समानस्य छन्दसि०' सूत्रेण समानस्य सादेश। ग्धि=अद भक्षणे (अदा०) धातो स्त्रिया क्तिन्। 'बहुल छन्दसि' अ० २.४.३९ सूत्रेण घस्लृ-आदेश। 'घसिभसोर्हलि चे' त्युपधालोपे, 'झलो झलि' इति सलोपे, 'झषस्तथोर्धोऽध'

सवने ता० १२.१३ ८ असौ वै पोडशी योऽसौ (सूर्य) तपति कौ० १७ १]

षोढा षट् प्रकारा (देवा = विद्वासो जना) ३ ५५ १८ [षष् सख्यावाचिन प्राति० 'सख्याया विधार्थे धा' अ० ५ ३ ४२ सूत्रेण धा । तत 'षष उत्व दतृदशधासूत्तरपदादेष्टुत्व च' इति धा प्रत्यय उत्व ष्टुत्व च]

सकलम् सम्पूर्ण (भद्र = आनन्द् को) स० प्र० ३ समु०, नि० ११८ [कलया सहेति विग्रहे सह-कला पदयो समासे 'वोपसर्जनस्य' अ० ६ ३ ८२ सूत्रेण सहस्थाने सादेश]

सकामान् समानस्तुल्य कामो येषान्तान् (अध्वन = मार्गान्) २६ १ [समान-कामपदयो समासे 'समानस्य 'छन्दस्यमूर्द्ध०' अ० ६ ३ ८४ सूत्रेण समानस्य सादेश]

सकृत् एकवारम् ६ ४८ २२ [सख्यावाचिन एक-शब्दस्य क्रियागणने 'एकस्य सकृच्च' अ० ५ ४ १९ सूत्रेण सकृदादेश]

सकृत्स्वम् या सकृदेकवार सूते ताम् (मही = भूमिम्) ३३ २८ [सकृदुपपदे पूञ् प्राणिगर्भविमोचने (अदा०) धातो क्विप्]

सकेताः समान केत प्रज्ञा येषान्ते (देवा = श्रोत्रादीनीन्द्रियाणि) ६ ९ ५ [समान-केतस्पदयो समास । 'समानस्य छन्दसि०' अ० ६ ३ ८४ सूत्रेण सादेश । केत प्रज्ञानाम निघ० ३ ९]

सक्तवः सत्तू इति भाषायाम् १९.२१ [सच्यन्ते समवेता क्रियन्ते इति विग्रहे षच समवाये (भ्वा०) धातो 'सितनिगमिमसि०' उ० १ ६९ सूत्रेण तुन् । सक्तु सचतेर्दुर्धावो भवति । कस्तेर्वा स्याद् विपरीतस्य विकसितो भवति नि० ४ ९ देवाना वा ऽएतद् रूप यत्सक्तव श० १३ २.१ ३ प्रजापतेर्वा एतद् रूप यत् सक्तव तै० ३ ८ १४ ५]

सक्तुमिव जैसे सत्तू को, प० वि० । [सक्तुम्-इव-पदयो समास । सक्तुरिति व्याख्यातम]

सक्तुश्रीः य सक्तूनि समवेतानि द्रव्याणि श्रयति स (विद्युदादिपदार्थसमूह) ८ ५७ [सक्तूपपदे श्रिञ् सेवायाम् (भ्वा०) धातो 'क्विब्वचिप्रच्छि०' अ० ३ २ १७८ वा० सूत्रेण क्विप् दीर्घश्च]

सक्थानि सक्थीनि ५ ६१ ३ **सक्थ्ना** = शरीराऽवयवेन २३ २९ **सक्थ्योः** = पादाऽवयवयो २४ १ [षञ्ज सङ्गे (भ्वा०) धातो. 'असिसञ्जिभ्या क्थिन्' उ० ३ १५४ सूत्रेण क्थिन् । सक्थिप्राति० तृतीयादौ विभक्तौ 'अस्थिदधि०' अ० ७ १ ७५ सूत्रेणानङ् । 'अल्लोपोऽन.' इत्यल्लोपे रूपाणि भवन्ति । सक्थि सचतेरासक्तोऽस्मिन् काय नि० ९ २०]

सक्मन् य सचति तत्सम्बुद्धौ (अग्ने = सेनापते) १ ३१ ६ [षच् समवाये (भ्वा०) धातो कर्त्तरि मनिन्]

सक्म्यम् सचति सयुनक्ति यस्मिँस्तत्र भवम् (असुर्यं = असुरस्य मेघस्य स्वम्) ३ ३८ ७ [षच् समवाये (भ्वा०) धातोर्मनिन् । ततो भवार्थे यत्]

सक्रतवः समाना क्रतु प्रज्ञा येषान्ते (आदित्यास = पूर्णविद्या अध्यापका) २ २७ २ **सक्रतू** = समानक्रियौ (भा०—वायुविद्युतौ) १ ९३ ५ [समान-क्रतुपदयो समासे 'समानस्य छन्दसि०' अ० ६ ३ ८४ सूत्रेण समानस्य सादेश]

सक्षणः सोढा (मेधाविजन) ५ ४१ ४ [षह मर्षणे (भ्वा०) धातो 'कृत्यल्युटो वहुलम्' इति कर्त्तरि ल्युट् । पृषोदरादित्वात् सकारागम]

सक्षणिम् सोढारम् (शत्रुम्) १ १११ ३ **सक्षणिः** = समवेता (सूर्य), प्र०—अत्र सच-धातोरनि प्रत्यय २ ३१ ४ [षह मर्षणे (भ्वा०) धातोर्बाहु० औणा० अनि । पृषोदरादिना सकारागम । षच समवाये (भ्वा०) धातोर्वाऽनि सकारोपजनश्च]

सक्षत् सम्वध्नीयात् १ १२९ १० समवैति ५ ३० ६ **सक्षि** = सम्वध्नासि ५ ३३ २ **सक्षीमहि** = सम्वध्नीयाम ७ ५४ ३ प्राप्नुयाम ७ ३९ ३ **सक्ष्व** = सक्तो भव १ ४२ १ [षच समवाये (भ्वा०) धातोर्लेट् । सिव्-विकरण । शपो लुक् च । अन्यत्र लट् लिङ् लोट् च । सक्षति गतिकर्मा निघ० २ १४]

सक्षन्तः सहन्त (स्त्रीपुरुषा). प्र०—अत्र सहधातो पृषोदरादिवत्सकारागम १ १३१ ३ [षह मर्षणे (भ्वा०) धातो शतृ । व्यत्ययेन परस्मैपदम् । पृषोदरादिना च सकारागम]

सक्षितः समाननिवासा (ऊतय = रक्षणादीनि कर्माणि) ६ ४४ ६ **सक्षितौ** = सह निवसन्त्यौ (मातरा = धात्रीजनन्यौ) १ १४० ३ [समान-क्षितपदयो समासे 'समानस्य छन्दसि०' अ० ६ ३ ८४ सूत्रेण समानस्य सादेश । क्षित. = क्षि निवासगत्यो (तुदा०) धातोर्भावे क्त]

सखा सुखप्रद (विद्वज्जन) १ ७५ ४ सर्वस्य मित्र सर्वसुखसम्पादकत्वात् (विष्णु = व्यापकेश्वर) १ २२ १९ सौहार्देन सुखप्रद (इन्द्र = परमेश्वर) १ ४ १० मित्र.

लिडि 'वाच्छन्दसि सर्वे विधयो भवन्ति' इतीडागम 'गमहन जन ०' अ० ६ ४ ९८ इत्युपधालोपश्च ३ १९ [सम्+ गम्लृ गतौ (भ्वा०) धातोराशिषि लिङ्]

सङ्ग्रहीतृभ्यः ये युद्धार्थास्सामग्री सम्यग् गृह्णन्ति तेभ्य (राजपुरुषेभ्य) १६ २६ [सम्+ग्रह उपादाने (क्र्या०) धातो कर्त्तरि तृच्। 'ग्रहोऽलिटि दीर्घ' इतीटो दीर्घ]

सङ्घातं सङ्घातम् सम्यग्घन्यन्ते जना यस्मिन् त सङ्ग्राम सङ्ग्रामम् १ १९ [सङ्घातम्-पदस्य वीप्साया द्वित्वम्। सङ्घात इति सग्रामनाम निघ० २ १७ सम्+ हन हिसागत्यो (अदा०) धातोर्घञ्]

सङ्घाते सम्बन्धे २८ १३ [पूर्वपदे व्याख्यातम्]

सचत प्राप्नुत ४ ५ ९ **सचताम्**=समवैतु १३ ३० समवेतान् करोतु ऋ० भू० १४९, २ १० समवैति, भा०—सेवताम् १३ ३० **सचते**=समवैति १ ९१ १४ प्राप्नोति १ १४० ९ सम्बध्नाति ११८० ५ **सचन्त**=प्राप्नुत १ १५६ ४ सङ्गमयन्ति २ ५ ५ सेवन्ताम् १ ७३ ४ लभन्ते १ १६४ ५० समवयन्ति ३ १ १४ सम्बध्नन्ति ५ १७ ५ **सचन्ताम्**=सयुञ्जन्तु १७ ४४ समवयन्तु १३ १ समवेताः प्राप्ता भवन्तु २ १० **सचन्ते**=सेवन्ते १ १०० १३ समवयन्ति १ ६० २ **सचसे**=युनक्षि १५ २३ समवैषि १३ १५ सम्बध्नामि ४ ११ ६ **सचस्व**=समवेहि प्राप्नुहि १ १२९ ९ सयोजय ३ २४ **सचावहै**=सम्बध्नीयाव ६ ५५ १ **सचेत**=सम्बध्नीत ५ ५२ १५ **सचेताम्**=प्राप्नुताम् १ १८५ ९ **सचेते**=सम्बध्नीत २ ४१ ६ समवेत १ १३६ ३ **सचेथे**=सवेते १ १८० १ सङ्गच्छेथाम् १ ११६ १७ सयुङ्क्थ ११८३ २ सङ्गच्छेथे १ १५२ १ सेवेथे ११८० १ सम्बध्नीथ २ ३९ २ **सचेमहि**=समवेयाम ३ ५५ व्याप्नुयाम १ १३६ ६ सङ्गता भवेम २ ८ ६ सयुञ्ज्महि ५ ५० २ **सचेवहि**=कटिबद्ध सदा रहे स० वि० १४०, अथर्व० १४ २ ७२ [षच् समवाये (भ्वा०) धातोर्लोट्। सचति गतिकर्मा निघ० २ १४ पच् सेचने सेवने च (भ्वा०) धातोर्वा लोट्। अन्यत्र लट् लिङ् च। सचता आसेवध्वम् नि० ९ २६ सचते द्विश उत्तरनाम निघ० ३ २९ सचन्ताम्=ससेव्यन्ताम् नि० ९ ३३ सचन्ते सेवन्ते नि० ७ २३ सचस्वा सेवस्व नि० ३ २१]

सचथाय प्राप्तसम्बन्धाय (विद्वज्जनाय) १ १५६ ५ [पच् समवाये (भ्वा०) धातोर्बाहु० औणा० अथ]

सचथ्यैः सचयेषु समवायेषु भवैः (जनैः) ५.५०.२ [सचथ इति व्याख्यातम्। ततो भवार्थे यत्]

सचध्यै सचितु सयोक्तुम् १ १६७ ५ [पच् समवाये (भ्वा०) धातोस्तुमर्थेऽध्यैन्]

सचनस्य समवेतस्य (परमविद्वज्जनस्य) ६ ३९ १ **सचनः**=सर्वैः सेनाङ्गैः स्वाङ्गैश्च समवेत (रथ) १ ११९ १८ **सचनाः**=समवैतु योग्या (राय=धनानि) १ १२७ ११ [पच् समवाये (भ्वा०) धातोर्ल्युट्]

सचमानाः सम्बध्नन्त (धनाढ्या जना) ५ ४२ ८ **सचमानौ**=सम्बद्धौ (रोहितौ=विद्युत्पावकौ) ५ ३९ ६ [षच् समवाये (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

सचा ज्ञानेन, सत्कर्मसु समवायेन वा १ १० ४ शिष्टसमवायेन सह १ ६३ ३ सत्यसयोगेन ४ १ ३ सत्येन ४.५ १० सम्बन्धेन ३ ५४ २ प्रसङ्गेन ४ ३ ९ विज्ञानेन ३ ६० ४ समवेतेन सत्येन ६ ४५ २२ मुखसमवेतेन (वलेन) १ ८१ ८ सत्यसमवायेन ३४ ५६ सङ्गत्या १ ७१ ४ सत्याचारेण ४ ३२ ४ विज्ञानप्रापकेण गुणसमूहेन १ ५१ ११ अत्यन्त प्रेम मे आर्याभि० १.९, ऋ० १ १ ९ २ [पच समवाये (भ्वा०) पच सेचने सेवने च (भ्वा०) अथवा सचति गतिकर्मा (निघ० २ १४) धातो क्विप्। ततस्तृतीयैकवचने रूपम्]

सचा सचन्ति ये ते सचास्तान् सचानग्मान् विदुष', प्र०—अत्र शस स्थाने 'सुपा सुलुक्०' इत्याकारादेश सचेति पदनामसु पठितम् निघ० ४ २ अनेन ज्ञानप्राप्त्यर्थो गृह्यते १ ९ ३ समवेता (शुक्रा=शुद्धा किरणा) १ १३५ ३ सचयो समवेतयो (इन्द्रयो=वायुसूर्ययो) १ ७ २ समूहे ३ ५३ १० सम्बन्धी (जन) ५ ४४ १२ सम्बद्ध (विद्वज्जन) ५ १६ ५ समवेता (राजा) ६ २४ १ यज्ञविज्ञानयुक्तान् (विदुष) १ ९३ ११ सयुक्तान् (शिष्यान्) १ १६१.५ समवेतम् (सद्गुणसम्बद्धम्) १ १४० ७ सम्बन्धि (क्षय=निवासस्थानम्) ५ ४८ ४ समवाये ५ ७४ २ [षच् समवाये (भ्वा०) धातो कर्त्तरि पचाद्यच्। तत शसो जसो ङे सोश्च स्थाने 'सुपा सुलुक्०' सूत्रेणाकारादेश]

सचा सत्यसमवेतौ (अश्विना=सभासेनेशौ) १० ३३ सयुक्तौ (अश्विना=अध्यापकोपदेशकौ) २० ६८. सम्बन्धिनौ (इन्द्राग्नी=अध्यापकोपदेशकौ) ३ १२ २ सम्बद्धौ (रोदसी=भूमिसूर्यौ) ५ ५६.८. [षच् समवाये (भ्वा०)

इनि धत्वे 'न पदान्तद्विर्वचन०' इत्युपधालोपस्य स्थानिवद्-भावनिषेधाद् 'झला जश् झशि' अ० ८ ४ ५३ सूत्रेण जश्त्वे ग्धिरिति रूपम् । सग्धिम् सहजग्धिम् नि० ६.४३]

सग्मे गच्छतीति ग्मा पृथिवी तया सह वर्त्तते तस्मिन् यज्ञे, भा०--परमेश्वरस्योपासनादिलक्षणे यज्ञे, प्र०—ग्मेति पृथिवीनामसु पठितम् निघ० १ १, ४ २६ [ग्मया सहेति विग्रहे सह-ग्मापदयो समासे 'वोपसर्जनस्ये' ति सादेशे रूपम् । ग्मा पृथिवीनाम निघ० ११ सग्मन् सग्रामनाम निघ० २ १७]

सघत् हिंसन् (इन्द्र =जगदीश्वर), प्र०—अत्र 'बहुल छन्दसि' इति श्नोर्लुक् १ ५७.४ [षघ हिंसायाम् (स्वा०) धातो शतृ । विकरणव्यत्ययेन शप्]

सङ्का: सङ्ग्रामस्थान् (पृतना =शत्रुसेना) ६ ७५ ५ समवेता विकीर्णा वा (पृतना) २९ ४२ [सङ्का सग्राम-नाम निघ० २ १७ सङ्का सचते सम्पूर्वाद्वा किरते नि० ९ १४.]

सङ्किर सम्यग् विक्षिप ६ ४६ २ प्रापय २७ ३८ [सम्+कृ विक्षेपे (तुदा०) धातोर्लोट्]

सङ्क्रन्दनः सम्यक् शत्रूणा रोदयिता (इन्द्र =सेनेश) १७ ३३ [सम्+क्रदि आह्वाने रोदने च (भ्वा०) धातो नन्द्यादित्वाल् ल्यु]

सङ्क्रमः सम्यक् क्रमन्ते यस्मिँस्तस्य विज्ञापक (विद्वन्मनुष्य) १५ ९ **सङ्क्रमाय**=पदार्थज्ञानाय १५ ९. [सम्+क्रमु पादविक्षेपे (भ्वा०) धातोर्घञ्]

सङ्क्रोशमानाः आक्रोश कुर्वाणा (नद्य) ४ १८ ६ [सम्+क्रुश आह्वाने रोदने च (भ्वा०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

सङ्क्रोशैः सम्यगाह्वानै २५ २ [सम्+क्रुश आह्वाने रोदने च (भ्वा०) धातोर्घञ्]

सङ्गच्छतु मिश्रीभावेन गच्छति २ २२ **सङ्गच्छ-ध्वम्**=सम्यक् प्राप्नुताऽर्थात् तत्प्राप्त्यर्थं सर्वविरोध विहाय परस्पर सङ्गता भवत ऋ० भू० ९२, १० १९१ २ सम्यक् मिलकर प्राप्त होवो स० वि० १८७, १० १९१ २ **सङ्गमे-महि**=मङ्गच्छेमहि ५ ५१ १५ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लोट् । 'समो गम्यृच्छिभ्याम्' अ० १ ३.२९ सूत्रेण 'वा छन्दसि' इति विकल्पेनात्मनेपदम् । अन्यत्र लिङ्]

सङ्गच्छमाने सहगामिन्यौ (जामी=कन्ये) १.१८५.५. [सम्+गम्लृ गतौ (भ्वा०) धातो शानच् । ततष्टाप् स्त्रियाम् । 'समो गम्यृच्छिभ्याम्' इत्यात्मनेपदम्]

सङ्गत सम्यग् विजानीत ३७ १५ एकीभावेन प्राप्नुत प्र०—अत्र लोटि शपो लुक् ३७ १४ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक्]

सङ्गतेभ्यः योग्येभ्य (पुरुषेभ्य) २१ ६१ [सम्+गम्लृ गतौ (भ्वा०) धातो क्त]

सङ्गत्य एकीभूय १२ ६४ [सम्+गम्लृ गतौ (भ्वा०) क्त्वा । समासे क्त्वो ल्यप्]

सङ्गथे सङ्ग्रामे १ ९१ १९ [सगथे सग्रामनाम निघ० २ १७]

सङ्गमनः य सम्यग् गमयति स (परमेश्वर) १ ९६ ६ सम्यग् गन्ता (पुरुष) १२ ६६ [सम्+गम्लृ गतौ (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट्]

सङ्गमे सङ्ग्रामे समागमे वा ३३ ८६ मेलने २६ १५ [सगमे सग्रामनाम निघ० २ १७ सगमे सगमने नि० १०.३९]

सङ्गवे सङ्गच्छन्ति गावो यस्मिन् सायसमये तस्मिन् ५ ७६ ३ [सम्+गम्लृ गतौ (भ्वा०) धातोर्डु । सङ्गु-प्राति० चतुर्थी । विभक्तिव्यत्यय । अथवा सम्-गोपदयो समासे सङ्गु । ततश्चतुर्थी । विभक्तिव्यत्यय]

सङ्गृणीते सम्यगुपदिशति ४ २५ ७ [सम्+गॄ शब्दे (क्र्या०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

सङ्गृभाय सम्यग् गृहाण १ ८१ ७ **सङ्गृभायति**=सङ्गृह्णाति, प्र०—अत्र हस्य भ., श्न शायच् १ १४० ७ [सम्+ग्रह उपादाने (क्र्या०) धातोर्लोट् । 'छन्दसि शायजपि' इति श्न शायच् । अन्यत्र लटि श्न शायच् । 'हृग्रहोर्भश्छन्दसी' ति धातोर्हकारस्य भकार]

सङ्गृभीता सम्यग् गृहीतानि सेनाङ्गानि, प्र०—अत्र ग्रह-धातोर्हस्य भत्वम् १ १०० ९ [सम्+ग्रह उपादाने (क्र्या०) धातो क्तान्ताच्छेर्लोपश्छन्दसि । धातोर्हस्य भकार । 'ग्रहोऽलिटि दीर्घ' इतीटो दीर्घत्वम्]

सङ्गृभ्णाः सङ्गृह्णीया ३ ३० ५ [सम्+ग्रह उपादाने (क्र्या०) धातोर्लङ् । अटोऽभावो हस्य च भकार । सङ्गृभ्णा सङ्गृभ्णासि नि० ६ १]

सङ्गृभ्य सम्यग् गृहीत्वा ३ ५४ १५ [सम्+ग्रह उपादाने (क्र्या०) धातो क्त्वा । समासे क्त्वो ल्यप् । धातोर्हस्य भकार]

सङ्गे सह २० ४८ [सम्+गम्लृ गतौ (भ्वा०) धातोर्डश्छान्दस]

संगिमषीय सम्यक् प्राप्नुयाम्, प्र०—अत्राऽऽशिषि

समासे 'वोपसर्जनस्ये' ति सादेशे रूपम्। जित्वरी=जि जये (भ्वा०) धातोस्तच्छीलादिषु 'इण्नशजिसर्तिभ्य. क्वरप्' इति क्वरप्। तत स्त्रियाम् 'टिड्ढाणञ्०' अ० ४.१.१५ सूत्रेण ङीप्]

सजित्वानम् समानाना शत्रूणा विजयकारकम् (रयिं=धनम्), प्र०—अत्र 'अन्येभ्योऽपि दृश्यते' अ० ३ २ ७५ अनेन जि-धातो क्वनिप् प्रत्यय १ ८ १. [समान-जित्वन्पदयो समासे समानस्य सादेशे रूपम्। जित्वन्=जि जये (भ्वा०) धातोः कर्त्तरि क्वनिप्]

सजित्वाना जयशीलैं वीरैं सह वर्त्तमानौ (इन्द्राग्नी=सभासेनेशौ) ३ १२ ४ [सजित्वन् इति पूर्वपदे व्याख्यातम् ततो द्विवचनस्याकारादेश]

सजूः समान सेवन यस्य स (इन्द्र.=विद्युदग्नि), प्र०—इद जुषी इत्यस्य क्विबन्त रूपम् 'समानस्य छन्दस्य०' इति समानस्य सकारादेशश्च १ २३ ७. य. समान जुषते प्रीणाति स (अग्नि =भौतिक) ३ १० समानप्रीतिसेवी (विद्वज्जन) ५ ६० ८ य समानान् जुषते स (विद्वज्जन) १ ४४ २ सह वर्त्तमान (उषा =प्रभात') १२ ७४ सहित (सूर =सूर्य) १२ ७४ सयुक्त (विद्वज्जन) ६.४७ १६ मित्रमिव ६ ११. [समान-जुष्पदयो समासे समानस्य सादेशे च रूपम्। जुष्=जुषी प्रीतिसेवनयो (तुदा०) धातोः क्विप्। सजुष्प्राति० सुलोपे रुत्वे च 'र्वोरुपधाया दीर्घ इक' अ० ८ २ ७६ सूत्रेणोपधाया इको दीर्घ। सजू'=सह जोषेण नि० ६ १३ सजू (यजु० १४ ७) अर्थवैतद् यजमान एताभिर्देवताभि (ऋत्वादिभि) सयुग्भूत्वैता प्रजा प्रजनयति तस्माद् सर्वास्वेव राजू सजूरित्यनुवर्त्तते श० ८ २ २ ७]

सजोषसः समानप्रीतिसेविन (विद्वासो जना) ५ २१ ३ समानसेवाप्रीतय, भा०—परस्पर प्रीतिमन्त (अग्नय =विद्वासो जना) १२ ५० समानोत्तमगुणकर्मस्वभावसेविन (ऋभव =मेधाविन) ४ ३४ ८ समान धर्मं सेवमाना (विद्वज्जना) १ १३६ ४ समानो जोष प्रीति सेवन वा येषान्ते (सर्वविद्वास) १ ४३ ३ **सजोषसौ**=समानसेवनौ (अश्विना=प्राणापानाविव दम्पती) १२ ७४. **सजोषाः**=समानप्रीतिसेवन (विद्वज्जन) १ १८६ २ समानप्रेमा (राजा) १ ११८ ११ समानप्रीतिसेवी (ईश्वर आप्तमनुष्यो वा) १ ६०.१. उत्तम प्रीतियुक्त (ईश्वर) आर्याभि० १ १८, ऋ० १ ६ १७ १. समानैं सेविता इडा=स्ताविका वाक्) २९ ८ समानप्रीति (सप्ति=शिल्पी विद्वज्जन) २९.३ आत्मसमानप्रीति सेवमान सन् (इन्द्र =दु खविदारक सज्जन) ३ ३२.२ समानसेवनप्रीति ३ ४ ८ सह वर्त्तमान (इन्द्र.=सूर्य) २०.३९ व्याप्त. सन् प्रीत प्रसन्न (अग्नि =जगदीश्वर.) ७ ५ ९. समानप्रीत्या सेवनीय (मित्र =प्राण.) ७ ६० ४ समानप्रीतिसेविका (कन्या=कमनीया पत्नी) ६ ४९ ७. स्वात्मवदन्येषा प्रीत्या सेवक (यज्ञ'=शिष्य) ६ ६८ १. समान जोष प्रीतिर्यस्य सः (इन्द्र =सेनापति) ७ ३७ समानप्रीतिसेवनी (धिषणा=प्रज्ञा) ५ ४१ ८ सहैव सेवमान (विद्वज्जन.) ५ ४१ ४. समानप्रीतिसेविन (देवास = विद्वासो जना'), प्र०—अत्र वचनव्यत्ययेन जस स्थाने सु ७ ४८.४ सर्वत्र समानप्रीतिसेवना (धीरा जना.) १ ६५ १. समानसुखदु खप्रीतय २ ३१ ४ सह वर्त्तमान (इन्द्र =सूर्य) २० ३९ **सजोषोभ्याम्**=यौ जोषसा सेवनेन सह वर्त्तमानौ ताभ्याम् (इन्द्रवायूभ्या=विद्युत्प्राणाभ्याम्) ७ ८ [समान-जोषस्पदयो समासे समानस्य सादेशे जसि रूपम्। जोषम्=जुषी प्रीतिसेवनयो (तुदा०) धातोरौणा० असुन्। अथवा सह-जोषस्पदयो समासे 'वोपसर्जनस्य' सूत्रेण सादेशे रूपम्। सजोषा =सहजोषण नि० ८ ८ सजोषस =सहजोषणा नि० ११ १५]

सजोषसा समान जोष सेवन ययोस्तौ (अश्विना=अध्यापकोपदेशकौ) २० ९० समानप्रीतिकामौ (इन्द्रवायू=अध्यापकोपदेशकौ) ४ ४६.६ [सजोषस् इति व्याख्यातम्। ततो द्विवचनस्याकारादेशश्छान्दस]

सजोषः समानप्रीतिसेविन (नर =नायका जना) ६ २ ३ [समान-जोष्पदयो समासे समानस्य सादेशे च रूपम्। जोष्=जुषी प्रीतिसेवनयो (तुदा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' अ० ३ २ ७५ सूत्रेण विच्]

सञ्चकानः *सम्यक् कामयमान* (राजा) ५ ३० ७. [सम्+चक तृप्तौ प्रतिघाते च (भ्वा०) धातो शानच्]

सञ्चक्षाणः सम्यक् कामयन्नुपदिशन्वा (देव = विद्वज्जन) ६.५८ २ [सम्+चक्षिङ् व्यक्तायां वाचि (अदा०) धातो शानच्]

सञ्चक्षि समक्षे ६ १४ ४ [सम्+चक्षिङ् व्यक्ताया वाचि, अय दर्शनेऽपि (अदा०) धातो क्विप् भावे]

सञ्चक्षे सम्यक् प्रख्यातुम् ७ १८ २० सम्यगाख्यानाय १ १२७.११ [सम्+चक्षिङ् व्यक्ताया वाचि (अदा०) धातोस्तुमर्थे एश् छान्दस]

सञ्चक्ष्य सम्यगध्याप्योपदिश्य वा १ १६५ १२.

धातो पचाद्यच् । ततो द्विवचनस्याकारादेश । सचा पदनाम निघ० ४.२]

सचा सहार्थे १ १३९ ७ [सचा सह नि० ५ ५.]

सचा समवेता (स्त्री) ५ ५६ ६ [पच् समवाये (भ्वा०) धातो पचाद्यच् । तत स्त्रिया टाप् । औणा० वा अन् प्रत्यय]

सचानः समवेत (सूर्य) ६ २० २ [षच् समवाये (भ्वा०) धातोर्बाहु० औणा० आनच्]

सचाभुवम् सचा विज्ञानादिना भावयन्तीम् (मातर=जननीम्) १ ११११ य समवाये भवति तम्, सत्य भावुकम् (परमेश्वरम्) १ १३१ ३. **सचाभुवः**=ये सचा परस्पर सङ्गचनुषङ्गिनो भवन्ति ते (कर्मकृत=पुरुषार्थिजना) ३ ४७ [सचा पदनाम निघ० ४ २. षच् समवाये (भ्वा०) धातोर्भावे क्विवन्तात् टापि सचेति रूपम् । तदुपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्]

सचाभुवा यौ सत्येन पुरुषार्थेन सह भवतस्तौ (अश्विना=राजप्रजाजनौ) ३४ ४७ यौ सचा समवाय भावयतस्तौ (अश्विना=जलाग्नी), प्र०—अत्रान्तर्गतो ण्यर्थ १ ३४ ११. सहकारिणौ (अश्विना=अध्यापकोपदेशकौ) १ १५७ ४ सचेन गुणसमवायेन सह भवन्तौ (मित्रावरुणा=राजप्रजाजनौ) २ ३१ १ [सचा इत्युपपदे भू सत्तायाम् (भ्वा०) धातो क्विप् । ततो द्विवचनस्याकारादेश । सचा=षच् समवाये (भ्वा०) धातोः क्विप् । ततष्टाप्रत्यय । सचभुवा सहभुवौ नि० ५ ५]

सचिविदम् सब से प्रीति प्रेमभाव से सब को सुख प्राप्त कराने वाले (मित्र परमेश्वर) को प० वि० । [सचा इत्युपपदे विद्लृ लाभे (तुदा०) धातो क्विप् । पूर्वपदस्येत्व वर्णव्यत्ययेन]

सचेतसः ये चेतसा प्रज्ञया सह वर्त्तन्ते ते (देवा.=विद्वज्जना) १८ ७६ **सचेतसौ**=समान चेतस ज्ञान सज्ञापन ययोस्तौ (अध्येत्रध्यापकौ) ५ ३ समानसज्ञानौ (विवाहितस्त्रीपुरुषौ) १२ ६० **सचेताः**=समान चेतो विज्ञान सज्ञापन वा यस्य स (इन्द्र=सेनाधिपति) १ ६१ १० चेतसा प्रज्ञया सहित (सूर्यवद्राजा) ४ १६ ७ [समान-चेतस्पदयो समासे 'समानस्य छन्दसि०' इति समानस्य सादेशे रूपम् । चेतस् प्रज्ञानाम निघ० ३ ९]

सच्छन्दाः समानानि छन्दांसि यासु ता (प्रजा) २३ ३४. [समान-छन्दस्पदयो समासे समानस्य सादेशे रूपम्]

सजन्या समानैर्जन्यै सह वर्त्तमानानि (धनानि) ४ ५० ६ [सजन्यप्राति० शेर्लोपश्छन्दसि । सजन्यम्=समान-जन्यपदयो समास । जन्यम्=जनी प्रादुर्भावे (दिवा०) धातो 'तकिशसिचतियतिजनीनाम्०' उनि वा० सूत्रेण यत्]

सजातवनि जात जात वनति स जातवनि, समानश्चाऽसौ जातवनिस्तम्, भा०—य समानजन्मभिर्मनुष्यैर्वन्यते ससेव्यते तम् (परमेश्वरम्), प्र०—'समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु' अ० ६ ३ ८४ अनेन समानस्य सकारादेश, अत्राऽसो लुक् व १ १७ समाना जाना विद्या, समान जात राज्य वा वनयति येन तम् (परमेश्वर भौतिकमग्नि वा) १ १८, समानान् जातान् वेदान्, क्षत्रधर्मान्, मूर्त्तान् जगत्स्थान् पदार्थान्वा वनयति प्रकाशयति तम् (परमेश्वर भौतिकमग्नि वा) १ १८ [समान-जातवनिपदयो समासे समानस्य सादेश । जातवनि=जातोपपदे वन सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' इतीन् । अथवा समान-जातपदयो समासे सजात । तदुपपदे वन सम्भक्तौ (भ्वा०) धातोरिन्]

सजातः सहैव जात (व्यक्ति) ५ २३ **सजातान्**=सहोत्पन्नान् (विद्यार्थिजनान्) १ १०९ १ समानात्प्रादुर्भावादुत्पन्नान् (पुत्रान्) ११ ५८ **सजातानाम्**=जातै सह वर्त्तमानानाम् (राजप्रजाजनानाम्) १० २९ समानजन्मनाम् (देवानाम्=विदुषा योद्धृणाम्) १७ ५१ **सजाताः**=समानदेशे जाता उत्पन्ना (सखाय=सुहृज्जना) १७ ३८ [समान-जातपदयो, सह-जातपदयोर्वा समास । सहसमानयो स्थाने सादेश क्रमश 'वोपसर्जनस्य, 'समानस्य छन्दसि०' सूत्राभ्याम् । जात=जनी प्रादुर्भावे (दिवा०) धातो क्त । प्राणा वै सजाता प्राणैर्हि सह जायते श० १ ९ ११५ भूमा वै सजाता श० १ २ १ ७]

सजात्यम् समानजातौ भवम् (नाम) ३ ५४ १६ समानासु जातिषु भवम् (प्रेम) २ १ ५ **सजात्यानाम्**=अरमद्विधानाम् (मनुष्याणाम्) ३३ ४७ [समान-जातिपदयो समासे समानस्य सादेशे सजाति । ततो भवार्थे यत् । सजात्य समानजातिता नि० ६ १४]

सजामि सयुनज्मि १ १६१ १० [षञ्ज सङ्गे (भ्वा०) धातोर्लट् । 'दससञ्जस्वञ्जा शपि' अ० ६ ४ २५ सूत्रेणोपधाया नकारस्य लोप]

सजित्वरीः शरीरै सह सयुक्तान् रोगान् जेतु शीला (ओषधी=सोमादीन्) १२ ७७. [सह-जित्वरीपदयो

शत्रवो येन तम् (इन्द्रम्) ३ ३२ १७ सम्यग् जयति येन तम् (इन्द्र=विद्युतम्) ३ ३६ ९ **सञ्जितः**=सम्यग् जेता (इन्द्र =सूर्य.) ५ ४२ ५ [सम्+जि जये (भ्वा०) धातो क्त]

सञ्जिहानस् अधिकरण त्यजन्तम् (सज्जनम्) ७ ३३ १० [सम्+ओहाक् त्यागे (जु०) धातो शानच् व्यत्ययेनात्मनेपदम्]

सञ्जुषताम् भा०—युक्त्या सेवताम् ३८ १६ [सम्+जुषी प्रीतिसेवनयो (तुदा०) धातोर्लोट्]

सञ्ज्ञातरूपः सम्यग् ज्ञात येन स (विद्वज्जन) १ ६९ ५ [सम्-ज्ञातपदयो समास । तत 'प्रशसाया रूपप्' अ० ५ ३.६६ सूत्रेण रूपप्]

सञ्ज्ञानम् सम्यग्विज्ञानम् १२ ४६ अच्छे प्रकार चिताना स० वि० १४२, अथर्व० ३ ३० ४ **सञ्ज्ञानाय**= सम्यग् ज्ञान कामप्रबोध तस्मै ३० ९ [सम्+ज्ञा अववोधने (क्र्या०) धातोर्ल्युट्]

सत् प्रकृत्यात्मकमव्यक्त सत्सज्ञक जगत्कारणम् ऋ० भू० ११६ यद् वर्त्तते तत् (हवि) ५ ४४ ३ वर्त्तमानम् (ब्रह्म) ४ ५ १० प्रमादरहित सत्य ज्ञानम् ६ २७ २ नित्यम् (ईश्वरम्) ३२ ९. यथार्थम् ६ २७ २ विद्यमानम् (ब्रह्म) १ १६४ ४६ **सतः**=अनादिवर्त्तमानस्य विनाश-रहितस्य कारणस्य १ ९६ ७ सत्पुरुषस्य ४ ६ ६ विद्यमानस्य व्यक्तस्य (कार्यजगत) १३ ३ विद्यमानानुत्तमान् पदार्थान् २.३२ सत्यस्वरूपस्य (ईश्वरस्य) ३३ ३९ [अस् भुवि (अदा०) धातो शतृ । सत् उदकनाम निघ० १ १२ तयो (सदसतो) यत् सत् तत् साम तन्मनस्स प्राण जै० उ० १ ५३ २ सदमृतम् श० १४ ४ १ ३१]

सतः सतः विद्यमानस्य विद्यमानस्य (कार्यकारण-रूपाया सृष्टे) ३ ३१ ८ [सत पदस्य वीप्साया द्वित्वम् । सत =अस भुवि (अदा०) धातो शत्रन्तात् पष्ठी]

सती सद्गुणयुक्ता (स्त्री) ६ ३५ वर्त्तमाना (भूमि) ६ ४७ २० पतिव्रता (स्त्री) ४ ३ ९ **सतीः**=विद्यमाना प्रकृती ३ ३१ ५ विद्यासुशिक्षादिशुभगुणसहिता (स्त्रिय) १ १६४ १६ [सती=अस भुवि (अदा०) धातो शत्रन्तान् ङीप्]

सतीनकङ्कतः सतीनमिव चञ्चल (जन), १ १९१ २ [सतीन-कङ्कतपदयो समास । सतीनम् उदकनाम निघ० १ १२ कङ्कत =ककि गत्यर्थे (भ्वा०) धातोर्बाहु० औणा० अतच्]

सतीनसत्वा य सतीन जल सादयति स (इन्द्र = सूर्यलोक) १ १०० १ [सतीनोपपदे षद्लृ विशरणगत्यव-सादनेषु (भ्वा०) धातोर्वनिप् । सतीनम् उदकनाम निघ० १ १२]

सतेन विभक्तेन कर्मणा १९ २७ उत्तमाऽवयवै-र्विभक्तेन शिरसा १९ ८८ [सत इत्युत्तरनाम निघ० ३ ३९ सत इति प्राप्तस्य ··· सत ससृत भवति नि० ३ २०]

सतोवीराः सतो विद्यमानस्य सैन्यस्य मध्ये वीरा प्राप्तयुद्धविद्याशिक्षा राजपुरुषा. २९ ४६ सत्त्वबलोपेता. (राजपुरुषा) ६ ७५ ९ [सत-वीरपदयो समासे षष्ठ्या अलुक् छान्दस । सत =अस भुवि (अदा०) धातो शत्रन्तात् षष्ठी]

सत्तः अविद्यादिदोषान् हिंसित्वा विज्ञानप्रद (विद्वज्जन), प्र०—अत्र बाहुलकात् षद्लृधातोरौणादिक क्त प्रत्यय १ १०५ १३ निषण्ण (मनुष्य) ७ ४२ २ प्रतिष्ठित (होता=दातृजन) २ ३६ ६ विज्ञानवान् दुख-हन्ता (विद्वज्जन) १ १०५ १४ [षद्लृ विशरणगत्यव-सादनेषु (भ्वा०) धातोर्बाहु० औणा० क्त]

सत्ता दत्त (विद्वज्जन) ३ १७.५ [षद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातो तृच् । क्तो वा । तत्राकार-स्याकारादेश]

सत्त्वभिः पदार्थै ५ ३४ ८ [सत्प्राति० भावे त्व । सत्=अस भुवि (अदा०) धातो शतृ । सत्त्वै कर्मभि नि० ६ ३० सत्त्व तु मध्ये विशुद्ध तिष्ठति नि० १३ १६]

सत्पतिम् सदीश्वरस्य वेदस्य धर्मस्य जनस्य वा पालकम् (इन्द्र=परमैश्वर्यम्) १२ ५६ सदविनाशी चाऽसौ पति पालकश्च तम्, यद्वा सतामविनाशिना कारणाना जीवानाञ्च पालकस्तम् (इन्द्र=परमात्मानम्) १७ ६१ य' सता सद्व्यवहाराणा सत्पुरुषाणा वा पति पालकस्त न्यायाधीश राजानम् १ ११ १ सत्यस्य प्रचारेण पालकम् (इन्द्र=राजानम्) २७ ३७ सता पात्रम् (राजानम्) ६ २९ २ **सत्पतिः**—सता पालयिता जन १ ५४ ७ सतोऽविनाशिन कारणस्य, विद्यमानस्य, कार्यस्य, सत्य-पथ्यकारिणा वा पालक (परमेश्वर ओषधिराजो वा) १ ९१ ५ सता धार्मिकाणा पति सत्याचाररक्षको वा (इन्द्र =राजा) १ १३० १ वेदाना सत्पुरुषाणा वा पालक (राजा) १ १७४ १ सत उदकस्य पालक (सूर्य), ६ १३ ३ सता पुरुषाणा वा पालक (इन्द्र =सेनापति) १ १०० ६ [सत्-पतिपदयो समास]

[सम्+चक्षिङ् व्यक्तायां वाचि (अदा०) धातो क्त्वा समासे क्त्वो ल्यप्]

सञ्चरणीः या सम्यक् चरन्ति ता भूमयः ६ २४ ४ [सम्+चर गतौ (भ्वा०) धातोर्ल्युडन्तान् स्त्रिया ङीप्]

सञ्चरणे सङ्गमने १ ५६ २ सम्यग् गमने ४ ५५ ६. [सम्+चर गतौ (भ्वा०) धातोर्ल्युट्]

सञ्चरन्ति सम्यग् गच्छन्ति, प्राप्नुवन्ति ५ १ ४

सञ्चरन्तु=सविलसन्तु ४ ८ ७ [सम्+चर गतौ (भ्वा०) धातोर्लट् । अन्यत्र लोट्]

सञ्चरन्ती सम्यग् गच्छन्ती (अ०—द्यावापृथिव्यौ) १ १४६ ३ सम्यग्गच्छन्त्यौ जानन्त्यौ (मातरा=मातृवद्वर्त्तमानेऽव्यापिकोपदेशिके) ३ ३३ ३ [सम्+चर गतौ (भ्वा०) धातो शत्रन्तान् ङीप् । ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस.]

सञ्चराः ये सम्यक् चरन्ति ते, भा०—नानादेशसञ्चारिण प्राणिन २४ १५ सञ्चरन्ति येषु ते मार्गा भा०—पश्वादिपालनमार्गा २४ १७ [सम्+चर गतौ (भ्वा०) धातो कर्त्तरि पचाद्यच् । अन्यत्राधिकरणे 'गोचरसचरवहव्रज०' अ० ३ ३ ११९ सूत्रेण घ]

सञ्चरेण्यम् सम्यक् चरितु ज्ञातु योग्यम् (चित्तम्) १ १७० १ [सम्+चर गतौ (भ्वा०) धातो कृत्यार्थे केन्य]

सञ्चिकित्वान् सम्यक् चिकीर्षक (विद्वज्जन) ४ ७ ८ [सम्+कित निवासे रोगापनयने च (भ्वा०) धातोर्लिट कानच् । धातूनामनेकार्थकत्वादत्र करोत्यर्थे कित]

सञ्चित्तानि सज्ञप्तानि धर्म्याणि कर्माणि १२ ५८ [सम्-चित्तपदयो समास । चित्तम्=चिती सज्ञाने (भ्वा०) धातो क्त]

सञ्चोदय सम्यक् प्रेरय प्रापय १ ९ ५ [सम्+चुद सञ्चोदने (चुरा०) धातोर्लोट्]

सञ्जग्मानः सङ्गतवान् (योगिजन) ७ १३ धीरतादिशुभगुणेष्वासक्त (न्यायाधीशो राजा) ७ १८ सम्यक् सङ्गत (वायु) १ ६ ७ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लिट कानच्]

सञ्जग्मानासु सङ्गच्छन्तीषु (मनुष्यादिप्रजासु) १ ७४.१ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लिट कानच् । ततष्टाप् स्त्रियाम्]

सञ्जग्मिरे सङ्गच्छन्ते ६ १९ ५ **सञ्जग्मुः**= सम्यग् जानीयु प्राप्नुयुर्वा ३ १ १३ **सञ्जग्मे**=सम्यक् सङ्गच्छते १ १६४ ८. [सम्+गम्लृ गतौ (भ्वा०) धातोर्लिट् । 'समो गम्यृच्छिभ्याम्' इत्यात्मनेपदम् । 'वा छन्दसी'ति क्वचिन्नाप्यात्मनेपदम्]

सञ्जनयन् सम्यक् कार्यरूपेण प्रकटयन् सन् (परमेश्वर) १७ १९ [सम्+जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताच्छतृ]

संजितः सम्यग् जेता (इन्द्र=सूर्य) ५ ४२ ५ [सम्+जि जये (भ्वा०) धातो कर्त्तरि क्त औणादिक]

सञ्जभार सम्यग्घरति १ ११५ ४ सञ्जहार ३३ ३७ [सम्+हृञ् हरणे (भ्वा०) धातोर्लिट् । 'हृग्रहोर्भश्छन्दसी'ति हस्य भकार]

सञ्जर्भुराणः सम्यक् पालयन् धरन् (विद्वज्जन) ५ ४४ ५ [सम्+डुभृञ् धारणपोषणयो (जु०) धातोर्यङ्लुगन्तात् कानच् । अभ्यासस्य कुत्व छान्दसम् । जर्भरी भर्त्तारौ नि० १३.५]

सञ्जयामि सम्यग् विजय करने वाला हूँ स० प्र० २३८, १० ४८.१ [सम्+जि जये (भ्वा०) धातोर्लट्]

सञ्जरताम् सस्तुयात् ४ ४ ८ [सम्+जरते अर्चतिकर्मा (निघ० ३ १४) धातोर्लोट्]

सञ्जानताम् आत्मा से धर्माऽधर्म, प्रियाऽप्रिय को सम्यग् जानने वाले (देवा=विद्वान् लोग) स० वि० १८६, १० १९१ २. [सम्+ज्ञा अवबोधने (क्र्या०) धातो शतृ । 'ज्ञाजनोर्जा' इति शित्प्रत्यये जादेश]

सञ्जानाथाम् सम्यग् जानीत, प्रादुर्भूतविद्यासाधिके भवत प्र०—अत्र व्यत्ययो लडर्थे लोट् च २ १६ [सम्+ज्ञा अवबोधने (क्र्या०) धातोर्लोट् । 'ज्ञाजनोर्जा' इति जादेश]

सञ्जानानाः सम्यग् ज्ञानवन्तो (देवा=विद्वासो जना) ऋ० भू० ९२, १० १९१ २ सम्यग् जानन्त (देवा), प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ ७२ ५ सम्यग् जानने वाले (विद्वान् लोग) स० वि० १८६, १० १९१ २ [सम्+ज्ञा अवबोधने (क्र्या०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

सञ्जिगीवान् सम्यग् विजेता सन् (अग्नि=विद्वान् राजपुरुष) ३ १५ ४. [सम्+जि जये (भ्वा०) धातोर्लिट क्वसु । 'सन्लिटोर्जे' इत्याभ्यासादुत्तरस्य कुत्व गकार]

सञ्जितम् सम्यग् जयशील शूरवीरम् (इन्द्र=राजानम्) ३ ३८ १० सम्यक् पालक दातार वा (इन्द्रम्) ३ ४८ ५ सम्यगुत्कर्षप्रापकम् (इन्द्रम्) ३ ३४ ११ सम्यग् जिता

सूर्येण च ऋ० भू० १४३, अथर्व० १४ १ १ अविनाशि-स्वभावेन कारणेन १ २१ ६ **सत्यैः**=सत्यप्रकाशोज्ज्वलैर्नित्यैः (मन्त्रेभि =ज्ञानयुक्तैर्विचारैः) १ ६७ ३ [अस् भुवि (अदा०) धातो शतरि सदिति रूपम्। सत्प्राति० साध्वर्थे भवार्थे यत्। सत् उदकनाम (निघ० १ १२) ततो वा भवार्थे यत्। सत्यम् उदकनाम निघ० ११२ सत्य कस्मात् सत्सु तायते सत्प्रभव भवतीति वा नि० ३.१३ सत्यम् तदेतत् त्र्यक्षर सत्यमिति स इत्येकमक्षर तीत्येकमक्षरमित्येकमक्षर प्रथमोत्तमे अक्षरे सत्य मध्यतोऽनृतम् श० १४ ८ ६ २ तद् यत् तत् सत्यम्। त्रयी सा विद्या श० ९ ५ १ १८ सत्य वा ऋतम् श० ७ ३ १ २३ तै० ३ ८ ३ ४ ऋतमिति (यजु० १२ १४) सत्यमित्येतत् श० ६ ७ ३ ११ यो वै सधर्म सत्य वै तत् तस्मात् सत्य वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्त सत्य वदतीति श० १४ ४ २ २६ सत्य वै सुकृतस्य लोक तै० ३ ३ ६ ११ एतत् खलु वै व्रतस्य रूप यत्सत्यम् श० १२ ८ २ ४ एक ह वै देवा व्रत चरन्ति सत्यमेव ३.४ २ ८ एक ह वै देवा व्रत चरन्ति यत्सत्य तस्माद् सत्यमेव वदेत् श० १४ १ १ ३३ सत्यसहिता वै देवा ऐ० १ ६ सत्यमया उ देवा कौ० २ ८ सत्यमेव देवा अनृत मनुष्या. श० १ १ १ ४ सत्य देवा अनृत मनुष्या श० १.१ २ १७ एक ह वा ऽअस्य जितमनपजय्यमेव यशो भवति य एव विद्वान्त्सत्य वदति श० ३ ४ २ ८ स य सत्य वदति यथाग्नि समिद्ध त घृतेनाभिषिञ्चेदेव हैन स उद्दीपयति तस्य भूयो भूय एव तेजो भवति श्व श्व श्रेयान् भवत्यथ योऽनृत वदति यथाग्नि समिद्ध तमुदकेनाभिषिञ्चेदेव हैन स जासयति तस्य कनीय कनीय एव तेजो भवति श्व श्व पापीयान् भवति तस्माद् सत्यमेव वदेत् श० २ २ २ १९ तस्माद् हैतद् य आसक्ति सत्य वदत्यैषा वीरतर इवैव भवत्यनाढ्यतर इव सह त्वेवान्ततो भवति देवा ह्येवान्ततो भवन् श० ९ ५ १ १६ (उद्दालक) तस्मै (प्राचीनयोग्याय) हैता शोकतरा व्याहृतिमुवाच यत् सत्य तस्माद् सत्यमेव वदेत् श० ११ ५ ३ १३ स य सत्य वदति स दीक्षित कौ० ७ ३ सत्ये ह्येव दीक्षा प्रतिष्ठिता भवति श० १४ ६ ९ २४ तस्यै वाच सत्यमेव ब्रह्म श० २ १ ४ १० सत्य ब्रह्म श० १४ ८ ५ १ सत्य ब्रह्मणि (प्रतिष्ठितम्) ऐ० ३ ६ गो० उ० ३ २ आप सत्येन (प्रतिष्ठिता) ऐ० ३ ६ गो० उ० ३ २ तद् यत् तत् सत्यम् आप एव तदापो हि वै सत्यम् श० ७ ४ १ ६ सत्य वा एतत् यद् वर्षति तै० १ ७ ५ ३ असावादित्य सत्यम् तै० २ १ ११ १ तद् यत् सत्यम्। असौ स आदित्य श० ६ ७ १ २ तद् यत् तत् सत्यम्। असौ स आदित्यो य एष एतस्मिन् मण्डले पुरुष श० १४ ८ ६.३. सत्यमेव य एष (आदित्य.) तपति श० १४ १ २.२२ (यजु० ११ ४७.) अय वा ऽअग्निर्ऋतमसावादित्य सत्य यदि वासो (आदित्य) ऋतमय (अग्नि) सत्य मुभयम्वेतदयममग्नि श० ६ ४ ४ १० सत्य वै शुक्रम् श० ३ ९ ३ २५. सत्य सत्य वै हिरण्यम् गो० उ० ३.१७ प्राणा वै सत्यम् श० १४ ५.१.२३ चक्षुर्वै सत्यम् तै० ३ ३ ५ २ एतद्वै मनुष्येषु सत्य यच्चक्षु गो० उ० २ २३ इय (पृथिवी) एव सत्यमिय ह्येवैषा लोकानामद्धा तमाम् श० ७.४ १.८ नामरूपे सत्यम् श० १४ ४ ४ ३. श्रद्धा पत्नी सत्य यजमान ऐ० ७ १० सत्य ह होतैषामासीत् यद् विश्वसृज आसत तै० ३ १२.९ ३]

सत्यमन्त्राः सत्यो यथार्थो मन्त्रो विचारो येषान्ते (ऋभव =मेधाविजना) १ २० ४ [सत्य-मन्त्रपदयो समास। मन्त्र =मत्रि गुप्तभाषणे (चुरा०) धातोर्घञ्]

सत्यमन्मा य सत्य मन्यते विजानाति विज्ञापयति स (पूर्णविद्यो जन) १ ७३ २ [सत्योपपदे मन ज्ञाने (दिवा०) धातो कर्त्तरि मनिन्]

सत्ययजम् य सत्यमेव यजति सङ्गच्छते तम् (अग्निं=सूर्यमिव राजानम्) ४ ३ १ यस्सत्य यजति सङ्गमयति तम् (अग्नि=परमात्मानम्) ६ १६.४६. [सत्योपपदे यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो कर्त्तरि पचाद्यच्]

सत्ययोनिः सत्यमविनाशि योनि कारण गृह वा यस्य स (इन्द्र =महाराज) ४ १९ २ [सत्य-योनिपदयो समास.। योनि गृहनाम निघ० ३.४.]

सत्यराजन् सत्यप्रकाशक (सभेश) २० ४ हे सत्य-प्रकाशक, सत्यराज्यप्रदेश्वर ऋ० भू० २१८, २० ४ सत्यकर्त्ता, पक्षपातरहित सबका न्यायकर्त्ता, धर्मराज परमात्मा स० प्र० ४८०, २० ४ [सत्य-राजन्पदयो समास]

सत्यराधसम् सत्य राध्नोति यया ताम् (सुमतिं= शोभना प्रज्ञाम्) २२ ११ **सत्यराधसे**=सत्य राधो धन यस्य तस्मै (सत्पुरुषाय) ७ ३१ २ **सत्यराधः**=सत्य राध प्रकृत्याख्य धन यस्य तत्सम्बुद्धौ (ईश्वर) ७ ४१ ३. सत्यानि राधासि विद्यादिधनानि यस्य तत्सम्बुद्धौ (विद्वज्जन) १ १० १ ८ सत्सु साधूनि राधासि धनानि यस्य तत्सम्बुद्धौ (ईश्वर) ३४ ३६ **सत्यराधाः**=न्यायोपार्जितसत्यधन (इन्द्र =राजा) ४ २४ २. सत्येन राधो धन यस्य स

सत्यकर्मन् सत्य वेदोक्त कर्म करने वाले सन्यासिन्, स० वि० १६५, ६ ११३ ४ [सत्य-कर्मन्पदयो समास]

सत्यगिर्वाहसम् सत्याया गिर प्रापकम् (पतिं=राजानम्) १ १२७ ८ [सत्य-गिर्पदयो समासे ततो वाहसपदेन समास । गी वाङ्नाम निघ० १ ११ वाहस = वह प्रापणे (भ्वा०) धातो 'वहियुभ्या णित्' उ० ३ ११६ सूत्रेणासच्]

सत्यजित् सत्य कारण धर्मश्चोन्नयति, भा०—य सत्यकर्मोन्नयति स (गण =गणनीयो विद्वज्जन) १७ ८३ [सत्योपपदे जि जये (भ्वा०) धातो कर्त्तरि क्विप्]

सत्यज्योतिः सत्यमविनाशि ज्योति प्रकाशो यस्य स (ईश्वर) भा०—सत्योपदेश १७ ८० [सत्य-ज्योतिष्-पदयो समास]

सत्यतर अतिशयेन सत्यस्वरूप (परमात्मन् विद्वन्वा) १ ७६ ५ **सत्यतर.**=अतिशयेन सत्य (विद्वज्जन) ३ ४ १० य सत्येन दुख तरति स (वनस्पति = विद्वज्जन) ७ २ १० [सत्यप्राति० अतिशायने तरप् । अथवा सत्योपपदे तृ प्लवनसतरणयो (भ्वा०) धातो पचाद्यच् कर्त्तरि]

सत्यताते सत्याऽऽचरक (राजन्) ४ ४ १४ [सत्य-प्राति० भावे तातिल् छान्दस]

सत्यधर्मा सत्यो धर्मो यस्य स (देव =ईश्वर) १२ ६६ **सत्यधर्माणम्**=सत्यो नाशरहितो धर्मो यस्य तम् (अग्नि=परमेश्वर भौतिक वा) १ १२ ७ [सत्य-धर्म-पदयो समास । 'धर्मादनिच् केवलात्' अ० ५ ४ १२४ सूत्रेण समासान्तोऽनिच]

सत्यप्रसवसः सत्योऽविनाशी प्रसव प्रकटो बोधो यस्मात्तस्य (बृहस्पते =जगदीश्वरस्य) ६ १० सत्याना न्याय विजयादीना प्रसवो यस्मात्तस्य (इन्द्रस्य =सेनापते) ६ १० सत्यानि प्रसवासि जगत्स्थानि कारणरूपेण नित्यानि यस्य तस्य (देवस्य =जगदीश्वरस्य) ६ १३ सत्य प्रसव ऐश्वर्यं जगत कारण कार्यं यस्य तस्य, सत्यन्याययुक्तस्य (परमेश्वरस्य) ६ १० [सत्य-प्रसवस्पदयो समास । प्रसवस्=प्र+षु प्रसवैश्वर्ययो (भ्वा०) धातोरौणा० असुन्]

सत्यप्रसवः सत्येन कर्मणा प्रसव ऐश्वर्य यस्य स (राजा) १० २८ [सत्य-प्रसवपदयो समास । प्रसव = प्र+षु प्रसवैश्वर्ययो (भ्वा०) धातो ऋदोरप्' इत्यप्]

सत्यम् यद्वेदविद्यया, प्रत्यक्षादिभि प्रमाणै, सृष्टिक्रमेण विदुषा सङ्गेन, सुविचारेणाऽऽत्मशुद्धया वा निर्भ्रम, सर्वहित, तत्त्वनिष्ठ, सत्यप्रभव, सम्यक् परीक्ष्य निश्चीयते तत् (व्रत =सत्यमान, सत्यभाषण, सत्यकरणञ्च) १ ५ सत्सु पदार्थेषु सुखस्य विस्तारक, सत्प्रभव, सद्भिर्गुणैरुत्पन्न व्रतम् १ १ ६ जलम् १ १०५ १२ अव्यभिचारिकर्म १५ ६ यथार्थम् ४ ३३ ६ अव्यभिचारि सुपरीक्षित वेदचतुष्टय-जन्यञ्च (कर्म) १ ५२ १३ सत्सु धर्माचरणेषु साधु (इन्द्रिय=धनम्) १६ ७८ सतीष्वोषधीषु भवम् (रसम्) १६ ७६ सत्सु परमेश्वरादिपदार्थेषु साधु (इन्द्रिय=प्रज्ञानम्) १६ ७४. अविनश्वराम् (इन्द्रिय=दिव्या वाचम्) १६ ७३ वर्त्तमाने साधु (इन्द्रिय=जिह्वादिकम्) १६ ७६ सत्सु नित्येषु पदार्थेषु व्यवहारेषु वा साधुस्त परमेश्वर धर्म वा १६ ३० सत्यभाषणादिक्रियोज्ज्वलम् (महित्व=महिमानम्) ३ ३२ ६ सत्सु साधु वच, भा०—सत्यवचनम् ३६ ४ नित्यम् (अध्वर=यज्ञम्) ७ ५६ १२ अविनाशिनम् (इन्द्र=सूर्यम्) २ २२ १ अविनश्वरम् (भा०—ब्रह्म) ११ ४७ व्रतम् १ ६८ ३ त्रैकाल्याऽबाध्यम् (विद्यासुशिक्षा सत्यधर्माचरणम्) ४ ११८ मोक्षम्, ऋ० भू० १०० नाशरहित पदम् १ १५६ ३ सत्सु पुरुषेषु साधु सत्य मान भाषण कर्म च, भा०—अव्यक्त, जीवाख्य, सत्यभाषणा-दिकम् ११ ४७ स्थूलस्य सूक्ष्मस्य जगत कारण त्रिगुणमय प्रकृत्यात्मकमव्यक्तम् प० वि० । यथार्थ जिसका कभी व्यभिचार विनाश नही होता उस विद्यादि लक्षण धर्म को आर्याभि० २ ४७, १ ५ अविनाशि गमनागमनाख्य कर्म १ ३८ ७ **सत्यः**=सन्तीति सन्त, सद्भ्यो हितस्तत्र साधुर्वा (अग्नि =परमेश्वर भौतिको वा) १ १ ५ सत्सु साधुर्जीवस्वरूपेणाऽनादिस्वरूपो वा (इन्द्र =सभाध्यक्ष) १ ६३ ३ सत्सु पुरुषेषु साधु (इन्द्र =महाराज) ४ २१ १० अस्तीति सत्, सति साधु सत्य सर्वदा विनाश-रहित (ईश्वर) वे० भा० न० १ १ ५ सत्पुरुषेषु भव (मित्र =सर्वसुहृज्जन) ६ ३६ सत्सु व्यवहारेषु विद्वत्सु वा साधु (सभेशो राजा) ३३ ८३ सता वेदाना सत्पुरुषाणा वा पालक (परमेश्वर) १ १७४ १ **सत्याय**=सति वर्त्तमाने भवाय स्थूलाय पदार्थसमूहाय, अ०—नित्यसुखाय १५ ६ **सत्ये**=वेदशास्त्रप्रतिपादिते, प्रत्यक्षादिभि प्रमाणै परीक्षिते पक्षपातरहिते न्याय्ये धर्मे ऋ० भू० ६७, १६ ७७ **सत्याः**=सत्सु कर्मसु साधव (आशिष =सिद्धा इच्छा) १ १७६.६ सत्सु धर्मेषु साधव (कामा = अभिलाषा) १२ ४४ ये प्रतिज्ञा कुर्वन्ति ते (विद्वासो जना) ६ ५० २ **सत्येन**=नित्यस्वरूपेण ब्रह्मणा, वायुना

वा) ५.२४. [सत्र व्याख्यातम्। तदुपपदे राजृ दीप्तौ (भ्वा०) धातो कर्त्तरि क्विप्]

सत्रसदौ सता जीवात्मना त्राण सत्र, तत्र सीदतस्तौ, भा०—जीवात्मरक्षणतत्परौ (देवी=प्राणाऽपानौ) ३४ ५.५ [सत्रसदौ च देवौ वाय्वादित्यौ नि० १२ ३७ सत्रसदौ च देवौ प्राज्ञश्चात्मा तैजसश्चेत्यात्मगतिमाचष्टे नि० १२ ३७ सत्रोपपदे षद्लृ विशरणगत्यवसादनेषु - (भ्वा०) धातो कर्त्तरि क्विप्]

सत्रा नित्यानि सत्यार्थप्रतिपादकानि (काव्यानि) १ ७२ १ सत्यान् गुणकर्मस्वभावान् १ ७१ ६ सत्यकारण-रूपेणाऽविनाशि (विश्वम्) १ ५७.६ सत्या (मदास'= आनन्दका प्रजाजना) ६ ३६ १. सत्यम् ७ ३२ १६ सत्येन कारणेन ६ ३४.४ सत्याचारस्य ४ ३० २ सत्यानि (नृम्णानि=धनानि) ४.२२ ६ सत्या (सभ्या जना) ४ १७ ६ [सत्रमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

सत्राकरः सत्रा सत्य करोतीति (नायक सेनेश) १ १७८ ४ [सत्रोपपदे डुकृञ् करणे (तना०) धातो 'कृञो हेतुताच्छील्य०' अ० ३ २ २० इति ताच्छील्ये ट.। अथवा कर्त्तरि पचाद्यच्। सत्रा सत्यनाम निघ० ३.१०]

सत्राचीम् या सत्रा सत्यमञ्चति प्रापयति ताम् (रातिं=दानम्) ७.५६ १८ [सत्रा सत्यनाम (निघ० ३.१०) तदुपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' इति क्विन्। तत स्त्रियाम् अञ्चतेश्चोप-सख्यानम्' इति ङीप्]

सत्राजितम् सत्रा सत्य जयत्युत्कर्षति येन तम् (यज्ञम्) ११ ८ **सत्राजिते**=य सत्येनोत्कर्षति तस्मै (इन्द्राय=विदुषे सभासेनेशाय) २ २१ १ [सत्रोपपदे जि जये (भ्वा०) धातो क्विप्। 'ह्रस्वस्य पिति कृति०' सूत्रेण तुगागम। सत्रा सत्यनाम निघ० ३.१०]

सत्रादावन् सत्य ददातीति तत्सम्बुद्धौ, सत्र वृष्ट्याख्य यज्ञ समन्ताद् ददातीति स वा (इन्द्र=परमेश्वर, सूर्यो वा) १ ७ ६ [सत्रेति व्याख्यातम्। तदुपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि 'आतो मनिन्क्वनिब्वनिपश्च' इति वनिप्]

सत्राषाट् य सत्राणि बहून् यज्ञान् कर्त्तुं सहते स. (इन्द्र=राजा) ७ २० ३ [सत्रोपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह.' अ० ३ २ ६३ सूत्रेण ण्वि.]

सत्रासाहम् सत्यसहम् (राजानम्) ३ ५१ ३ सत्यानि सह्यन्ते येन तम् (रयिम्) १ ७९ ८ य सत्रा सत्यानि सहते तम् (इन्द्र=राजानम्) ३ ३४ ८ **सत्रा-साहः**=य सत्य सहते स (शुभकर्माचारिजन) २.२१ ३. **सत्रासाहे**=य. सत्रा सत्येन सहते तस्मै (इन्द्राय=सभा-सेनेशाय) २ २१.२. [सत्रा सत्यनाम निघ० ३.१० तदुपपदे षह मर्षणे (भ्वा०) धातो 'कर्मण्यण्' प्रत्यय]

सत्राहणम् य' सत्येनाऽसत्य हन्ति तम् (इन्द्र= राजानम्) ४ १७ ८. [सत्रोपपदे हन हिंसागत्यो (अदा०) धातो कर्त्तरि क्विप्]

सत्राहम् सत्यधर्माचरणदिनम् ५ ३५ ४ [सत्रा-अहन्नुपदयो समास। 'राजाहस्सखिभ्यष्टच्' इति समा-सान्तष्टच्]

सत्राहा सत्यदिनानि ६ ४६.३ [सत्रा-अहन्नुपदयो समासे शेर्लोपश्छन्दसि]

सत्वनाम् सेनाया सीदता प्राणिनाम् १७ ४२ प्राप्ताना पदार्थानाम् १६ २० **सत्वने**=शुद्धाऽन्त.करणाय (राजजनाय) ६.४५ २२ **सत्वनैः**=न्यायादिद्रव्यै ५.३०.४ **सत्वभिः**=विज्ञानवद्भि. (जनै) १.१३३.६. पदार्थै १ १३३.६. प्राणिभि १.१४०.६ सत्वन् सीदयद्भिर्वीरै सह ३.४६ २ **सत्वा**=सर्वत्र स्थित (परमेश्वर.) ६ २२ १ सत्वगुणोपेत (सूरि=विद्वज्जन) ६ ३७ ५ बलवान् (राजपुरुष) ६ १८ २ गन्ता (सविता=सूर्यमण्डलम्) ४ १३ २ प्रापक (राजा) ४.४० २ य सीदति स पुरुषार्थी (इन्द्र.=ईश्वरोपासको राजा) ६.२६ ६ बलिष्ठ. (योद्धा) १.१७३ ५. **सत्वानः**=बलपराक्रमप्राणिभूतगणा १ ६४ २. सत्त्वगुणबलोपेता (भा०—सेनास्था भृत्या) १६.८. [षुञ् अभिषवे (स्वा०) धातो 'सुयजोर्ङ्वनिप्' अ० ३.२.१०३ सूत्रेण ङ्वनिप्। षद्लृ विशरणगत्यव-सादनेषु (भ्वा०) धातोर्वा कर्त्तरि वनिप्। दकारस्य तकार-श्छान्दस]

सत्सि सभायाम् १ ७६ ४ **सदसः**=सीदन्ति यस्मिँस्तस्माद् गृहात् २ १७ ७. सभ्यान् (पुरुषान्) ४ ५१ ८ सभाया ३२ १३ सभासद ४ १७ ४ सभा ३ ३६.६ सभात १ १८२ ८ सीदन्ति विद्वासो धार्मिका न्यायाधीशा यस्मिँस्तत्सद सभा तस्य, प्र०—अत्राऽधिकरणेऽसुन् प्रत्यय १ १८ ६ **सदसि**=सीदन्ति बुद्धिविषया यस्मिन्निति तत्सदोऽध्ययनाऽध्यापननिमित्ता सभा तत्र ६ २४ **सदः**= सीदन्ति प्राप्नुवन्ति सुखानि यस्मिँस्तद् गृहम्, सीदन्ति घ्नन्ति दु खानि येन तदौषधसेवन पथ्याचरणञ्च (तद्वस्तु) सीदति जानाति येन तद् ज्ञान वा २ ६ रहने के लिए उत्तम घर स० वि० १६७, अथर्व०' ६ २ ३ १६ स्थापनम्

(इन्द्र) ४ २६ १ सत्याचरणेन सत्य वा राधो धन यस्य स (राजा) ५ ४० ७ [सत्योपपदे राध ससिद्धौ (स्वा०) धातोरौणा० असुन्। अथवा सत्य-राधस्पदयो समास। राधस् धननाम निघ० २ १०]

सत्यवाचम् सत्या वाग् यस्य तम् (विपश्चित= विद्वज्जनम्) ३ २६.६ सत्या यथार्था वाग् येपान्ते (विद्वज्जना) ३ ५४ ४ [सत्या-वाच्पदयो समास। पूर्वपदस्य ह्रस्वादेश]

सत्यशवसम् सत्य शवो वल यस्य तम् (ऋभ्वस= मेधाविजनम्) ५ ५२ ८ **सत्यशवसः**=नित्यदृढवलस्य (विदुप) १ ८६ ८ नित्य वल येपा तत्सम्बुद्धौ (सभाद्यध्यक्षादय) १ ८६ ६ [सत्य-शवस्पदयो समास। शवस् वलनाम निघ० २ ९ धननाम निघ० २ १० उदकनाम निघ० १ १२]

सत्यशुष्मः सत्यं शुष्म वल यस्मिन् स (विद्युदादिस्वरूपोऽग्नि) ४ ११ ४ सत्यवल (सत्याचारशीलो विद्वज्जन) ३ ३० २१ **सत्यशुष्माय**=सत्यमविनश्वर शुष्म वल यस्य तस्मै (अ०—जगदीश्वराय) १ ५१.१५ नित्यवलाय (इन्द्राय=सेनापतये) १ १०३ ६ [सत्य-शुष्मपदयो समास। शुष्म वलनाम निघ० २ ९]

सत्यश्रवसि सत्याना श्रवणे सत्येऽन्ने वा ५ ७९ १ सत्यस्य श्रवो यस्मिन् तस्मिन् (भा०—आनन्दयुक्ते गृहाश्रमे) ५ ७९ २ सत्येन व्यवहारेण प्राप्ताऽन्नाद्यैश्वर्ये (दुहित= विदुपि स्त्रि) ५ ७९ ३ [सत्य-श्रवस्पदयो समास। श्रव अन्ननाम निघ० २ ७ धननाम निघ० २ १०]

सत्यश्रुतः ये सत्य शृण्वन्ति ते (कवय=विद्वासो जना) ६ ४९ ६ ये सत्य श्रुतवन्त शृण्वन्ति वा ते (कवय) ५ ५७ ८ ये सत्य यथार्थं शृण्वन्ति ते (नर=नायका जना) ५ ५८ ८ [सत्योपपदे श्रु श्रवणे (भ्वा०) धातो कर्त्तरि क्विप्। ह्रस्वस्य पिति कृति तुगिति तुगागम]

सत्यसत्वन् सत्यानि सत्वान्यन्त करणादीनि यस्य तत्सम्बुद्धौ (राजन्) ६ ३१ ५. [सत्य-सत्त्वपदयो समासान् मतुप्। वलोपश्छान्दस। अथवा सत्य-सत्पदयो समासान् मतुप्]

सत्यसवम् सत्योऽविनाशी सव सामर्थ्ययोगो यस्य तम् (सवितार=परमात्मानम्) ५ ८२ ७ सत्य सव ऐश्वर्यं जगद्वा यस्मिन् यस्य वा तम् (ईश्वरम्) ४.२५ **सत्यसवसः**=सत्यन्याययुक्तस्य (इन्द्रस्य=सम्राज) ९ १० सत्य सव ऐश्वर्यं जगत कारण कार्यञ्च यस्य तस्य (सवितु=जगदीश्वरस्य) ९ १० [सत्य-सवपदयो समास। सव=पु प्रसवैश्वर्ययो (भ्वा०) धातो 'ऋदोरप्' त्यप्]

सत्या सत्सु साधूनि त्रैकाल्यावाध्यानि कर्म्माणि २७.१ अविनश्वराणि (कर्माणि) ४ १७ २० सत्यधर्मोज्ज्वलितानि (अपासि=कर्माणि) १ ७० ४ [सत्यमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

सत्या सत्सु पदार्थेपु साध्वी (स्त्री) ६ ६५ ५ यथार्थोक्ता (सवाक्=राजनीतिनिष्ठा सम्यग् वाणी) ६.१२ **सत्याभिः**=सत्याचरणान्विताभि (आह्वानै) १ १२९ ७ **सत्याः**=सत्सु गुणकर्मस्वभावेपु भवा (कुमारिका) १ ७९ १ सिद्धा (आशिप=कामना) २ १० सत्सु साध्व्य (आशिप) ३५ २० **सत्ये**=सत्सु साध्व्यौ हिते कारणरूपे नित्ये वा, (सूर्यभूमी) ३ ६.१० [सत्यमिति व्याख्यातम्। तत स्त्रिया टाप्]

सत्यानि सत्स्वर्थेपु साधूनि (प्रवचनानि) ६ ६७ १० [सत्यप्राति० नपु० प्रथमावहुवचने रूपम्]

सत्यानृते सत्यञ्चाऽनृतञ्च ते, भा०—धर्माधर्मौ १९ ७७ [सत्य-अनृतपदयो समास। सत्यानृते वाचो वा एतौ स्तनौ, सत्यानृते वाव ते (द्वे अक्षरे) गो० उ० ४ १९]

सत्योक्तिः सत्य आज्ञा आर्याभि० १ ४७, ऋ० ७ ८ १२ २ [सत्या-उक्तिपदयो समास। उक्ति=वच परिभापणे (अदा०) धातो स्त्रिया क्तिन्]

सत्यौजाः सत्यमोजो वल यस्य स (राजा) १० २८ [सत्य-ओजस्पदयो समास]

सत्रम् सत्रा सत्य विद्यते यस्मिन् विज्ञाने तत् १५ ४९ **सत्रस्य**=सङ्गतस्य राजव्यवहाररूपस्य यज्ञस्य ८ ५२. **सत्रे**=दीर्घे यज्ञे ७ ३३ १३. [सत्रा सत्यनाम निघ० ३ १० सीदन्ति यत्रेति विग्रहे षद्लृ विशरणगत्यवसादनेपु (भ्वा०) धातो 'गुधृवीपचि०' उ० ४ १६७ सूत्रेण स्त्र। सत सत्पुरुषान् त्रायते तत् सत्रमिति विग्रहे सदोपपदे त्रैङ् पालने (भ्वा०) धातोर्डे। सत्रा सत्यम्, ततो मत्वर्थे वा अर्श आदित्वाद् अच्। आत्मदक्षिण वै सत्रम् कौ० १५ १ आत्मदक्षिण वा एतद् यत्सत्रम् ता० ४ ९ १९ सर्वान् लोकानहीनेन अथो सत्रेण (अभिजयति) तै० ३ १२ ५ ७ सर्वं वै सत्रम् श० ४ ६ १ १५ सद्वै सत्रिणस्स्पृण्वन्ति तत् सत्रस्य सत्रत्व, प्राणा वै सत्, प्राणानेव तत् स्पृण्वन्ति सर्वासा वा एते प्रजाना प्राणैरासते ये सत्रमासते काठ० ३४ ८]

सत्रराट् य सत्रेपु यज्ञेपु राजते स (सूर्यो विद्वज्जनो

४.११. सदा १ १८५ ८. [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोरविकरणे घ । 'पुंसि सञ्ज्ञायां घः प्रायेण' सूत्रेण 'वा छन्दसि' नियमेनासञ्ज्ञायामपि घो भवति । घञर्थे को वा । सदम् संवत्सरम् नि० १२ ३७. सदम्=सदा नि० ४ १९]

सदमादः समानस्थाना (हरयः=अग्न्यादयः) ३ ४३.६. [सह-मादपदयोः समासे 'सधमादस्थयोश्छन्दसि' सूत्रेण सहस्य सधादेशः । धस्य दकारश्छान्दसः]

सदमित् यः सदः वेगमिदेति प्राप्नोतीतीदृशोऽश्वोऽग्नि ऋ० भू० १९४, ऋ० १ ८ ९ १ [सद इत्युपपदे इण् गतौ (अदा०) धातोः क्विप् । विभक्तेश्चालुक् पूर्वपदस्य । सद=षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्घञर्थे क]

सदश्वः सन्तः समीचीना अश्वा यस्य सः (सुवीरजनः) ५ ५८ ४ [सत्-अश्वपदयोः समासः]

सदसस्पतिम् सभापतिं, सभाध्यक्षं, राजा (ईश्वर) को आर्याभि० २ ५२, ३२ १३ **सदसस्पती**=सीदन्ति गुणा येषु द्रव्येषु तानि सदांसि तेषां यौ पालयितारौ तौ (इन्द्राग्नी=वाय्वग्नी) १ २१ ५ [सदस्-पतिपदयोः समासः । षष्ठ्या अलुक् । सदस् इति व्याख्यातम्]

सदस्याः सदसि सभायां भवाः (शुक्=प्रदीप्तिः) ३८.१८ [सदस्प्राति० भवार्थे यत् । ततः स्त्रियां टाप्]

सदस्यैः सदसि भवैः सभ्यैर्जनैः सह ७ ४५ [सदस् प्राति० भवार्थे यत् । सदस् इति व्याख्यातम् । (पुरुषस्य) प्रजातिः सदस्य कौ० १७ ७ (पुरुषस्य) प्रजापतिः सदस्य गो० उ० ५ ४ सदस्या ऋतवोऽभवन् तै० ३ १२ ९ ४]

सदःसदः सीदन्ति यस्मिन् यस्मिन् तत्तद् गृहम् १९.५९ प्रतिगृहं प्रतिसभां च ऋ० भू० २९२, १९ ५९ [सद -पदस्य वीप्सायां द्वित्वम्]

सदा सर्वस्मिन् काले ९ ५. सर्वेषु कालेषु ऋ० भू० **४४.** निरन्तरम् ५ ७३ ५ यथावत् आर्याभि० १ ११, [सर्वसर्वनाम्नः सप्तम्यन्तात् काले वाच्ये 'सर्वैकान्यकियत्तदः काले दा' अ० ५ ३ १५ सूत्रेण दा । 'सर्वस्य सोऽन्यतरस्यां दि' अ० ५ ३ ६ सूत्रेण सर्वस्य सादेशः]

सदानः दानेन सह वर्त्तमानः (वसिष्ठ=पूर्णविद्वज्जनः) ७ ३३ १२ [सह-दानपदयोः समासे 'वोपसर्जनस्य' सूत्रेण सहस्याने सादेशः]

सदापृणः यः सदा पृणाति तर्प्पयति सः (जनः) ५ ४४ १२ [सदोपपदे पृ पालनपूरणयोः (क्र्या०) धातोर्मूलविभुजादित्वात् क]

सदावृध सदैव वर्धक (राजन्) ५ ३९ ३ **सदावृधः**=सदैव वर्धमानः (राजा) ४ ३१ १ सदाऽऽनन्देन वर्धमान (ईश्वर) ऋ० भू० ३०८, २७.३९ [सदोपपदे वृधु वृद्धौ (भ्वा०) धातोर्मूलविभुजादित्वात् क]

सदावृधः यः सर्वदा वर्धते तस्य (पुरुषस्य) २७ ३९. [सदोपपदे वृधु वृद्धौ (भ्वा०) धातोः कर्त्तरि क्विप्]

सदासहम् सर्वदा दुष्टानां शत्रूणां हानिकारकं दुःखानां च सहनहेतुम् (रयिं=धनम्) १ ८ १ [सदोपपदे षह मर्षणे (भ्वा०) धातोः क्विप्]

सदासातमम् सदाऽतिशयेन विभजनीयम् (रयिं=धनम्) ४ ३७ ५ [सदासाप्राति० अतिशायने तमप् । सदासा=सदोपपदे षण सविभक्तौ (भ्वा०) धातोः 'जनसनखनक्रमगमो विट्' इति विट् । 'विड्वनोरनुनासिकस्यात्' इत्यात्वम्]

सदासाम् सदा संसेवनीयम् (रयिं=धनम्) ७ ३९ ६ [सदोपपदे षण सविभक्तौ (भ्वा०) धातोः 'जनसनखन०' इति विट् । 'विड्वनोरनुनासिकस्यात्' इत्याकारान्तादेशः]

सदासाः दासैः सेवकैः सह वर्त्तमानाः (प्रजाजनाः) ४ १९ २१ ससेवकाः (राजपुरुषाः) ४ १९ ११ भृत्यैः सहिताः (राजपुरुषाः) ४ २४ ११ समानदानसेवकाः (अमात्यसेनाप्रजाजनाः) ४ २० ११. [सह-दासपदयोः समासः । 'वोपसर्जनस्ये' ति सहस्थाने सादेशः । दास= दस्यतेरुपदासयति कर्माणि नि० २ १७.]

सदिवः द्यावा सह वर्त्तमानम् (कुयव=कुत्सितसङ्गमम्) २ १९ ६. [सह-दिव्पदयोः समासे सहस्य सादेशः]

सदृक्षासः पक्षपातं विहाय समानदृष्टयः (मनुष्याः) १७ ८४ [समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातोः 'दृशेः क्सश्च वक्तव्य' अ० ३ २ ६० वा०सूत्रेण क्स । ततो जसोऽसुक् । 'दृक्षे चेति वक्तव्यम्' अ० ६ ३ ८९ सूत्रेण समानस्य सादेशः]

सदृङ् यः समानं पश्यति सः (अ०—पुरुषः) १७ ८१. समानदर्शनः (देव=सभाध्यक्षः) १ ९९ ७. [समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातोः 'त्यदादिषु दृशोऽनालोचने कञ् च' अ० ३ २ ६० सूत्रेण क्विन् । 'दृग्दृशवतुषु' अ० ६ ३ ८९ सूत्रेण समानस्य सादेशः]

सदृशीः सदृश्यो रात्र्य उषसश्च १ १२३ ८ समानस्वरूपा रात्री ६ ४७ २१. समाना गती ३ ३५.३.

४ ३० मुखस्थानम् १ ८५ ७ स्थिरम् (महिमानम्) १.८५ २ यज्ञशाला स० वि० २०६, अथर्व० ६ ६ ७. स्थित्यर्हमासनम् ३ २४ ३ सदनम् १३ ८ प्राप्तव्यम् (वर्हि =विज्ञानम्) ७ ११ २ छेद्य वस्तु ५ ६१.२. **सदांसि**=सभा ३ ३८ ६ सीदन्ति येषु तान्यधिकरणानि ३४ ३२ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर-विकरणे 'सर्वधातुभ्योऽसुन्' उ० ४ १८६ सूत्रेणासुन्। सदसी द्यावापृथिवीनाम निघ० ३ ३० सत्सि प्रयोगे 'छान्दसो वर्णलोपो वे' ति नियमेनाकारलोप। तस्य पृथिवी सद तै० २ १ ५ १ तस्मादुदीचीनवश सदो भवति श० ३ ६ १ २३ ऐन्द्र हि सद श० ३ ६ १ २२ तस्मात्सदस्यृक्-सामाभ्या कुर्वन्त्यैन्द्र हि सद श० ४ ६ ७ ३ प्रजापतेर्वा एतदुदर यत्सद ता० ६ ४ ११ (पुरुषस्य) उदर सद कौ० १७ ७ उदरमेवास्य (यज्ञस्य) सद श० ३ ५ ३ ५ उदर वै सद कौ० ११ ८ यदस्मिन् विश्वे देवा असीदस्तस्मात्सदो नाम तऽउऽएवास्मिन्नेते ब्राह्मणा विश्वगोत्रा सीदन्ति श० ३ ५ ३ ५]

सत्सि समवैषि ६ १६ १० निषीदसि ३ १४ २. आसन्नोऽसि २ ६.८ दोषान् हिनस्ति १ १२ ४ **सद**=सीद ७ ११ १ स्थिरो भव २.३६ ४ **सदत्**=सीदति १.१२८ १ प्राप्नुयात् ३ १३ १ **सदत**=आसीदत ७ ५७ २ उपविशत ७ ५९ ६ **सदतम्**=सीदतम् ५ ७२ १ तिष्ठतम् ४ १६ १० **सदताम्**=निषीदतम् ५ ७२ ३ आसीदेत ७ ४२ ५ गच्छत २६ ३१ **सदन्**=परिषीदन्ति ४ ३ ११ **सदन्तु**= तिष्ठन्तु ३ ४ ८ प्राप्नुवन्तु १ १८६ ८ आसीदन्तु ७ ४३ ३ प्रापयन्तु २६ ३३ अवस्थापयन्ति २ ५ **सदः**=सीद १३ ३७ स्थिरो भव ३३ ४ **सदाम**=प्राप्नुयाम ७ ४ ६ सीदेम ७ १ ११ **सदेम**=सीदेम ६ १ ६ प्राप्नुयाम ६ ७५ ८ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो-र्लेट्। 'बहुल छन्दसि' सूत्रेण शपो लुकि सीदादेशोऽपि न। अन्यत्र लोट्, लेट्, लड्, लिड् च। लोडादिषु सत्यपि शपि 'वा छन्दसी' ति सीदादेशो न भवति। लडचडभाव-श्छान्दस। सदन्तु आसीदन्तु नि० ८ १३]

सदतन सीदत २६ २४ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट्। सीदादेशश्छान्दसत्वान्न भवति। तस्य तनवादेशश्छान्दस]

सदनम् उत्पत्ति-स्थिति-भङ्गस्य निमित्तकारणम् (ब्रह्म) १ ६६ ७ सीदन्ति यत्र तत् (गृह, मोक्षाख्य स्थानम्) ३.३१ ९ अधिकरणम् (ब्रह्म) १ ११७ १० स्थानम् १ १२६.११ अवस्थितिम् १.१०४ ५ गर्भस्थानम् १२ ३९ रहने का घर स० वि० १६६, अथर्व० ६ २ ३ २७. सीदन्ति गच्छन्ति यत्र तत् (स्थानम्) १७ ८७ **सदनानि**= स्थानान्युदकानि वा १ ५५ ६ भुवनानि १ १८१ ५ सीदन्ति यस्मिँस्तस्मिन् (स्थाने) ७ ३६ ३ **सदनाय**= स्थितिमते (दिवे=कामयमानाय विदुषे) ५ ४७ ७ **सदने**=उत्तमे स्थले ७ २४ १ मण्डले ३ ३४ ७ सीदन्ति यस्मिन्नाकाशे तस्मिन् १ १४८ ३ सभास्थाने ५.४३.१२ सदसि सभायाम् १ १२२ ६ सर्वस्थित्यर्थे जगति ४ ४२ ४ गृहे १४ २ प्राप्तव्ये (सरिरे=वाचि) १३ ५३ अध्ययन-स्थाने, भा०—न्यायासने १२ १६ दिवि १३ ५३ स्यातव्ये (प्राणे) गन्तव्ये (समुद्रे=मनसि) १३ ५३ सीदन्ति ययोस्ते (द्यावापृथिवी=भूमिविद्युतौ) ७ ५३ २ [षद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातोरधिकरणे ल्युट्। सदनम् उदकनाम निघ० १ १२ सदनात् सहस्थानात् नि० ७ २४]

सदना सीदन्ति गच्छन्ति पुरुषार्थेन येषु तानि गृहाणि ८ १८ [सदनमिति व्याख्यातम्। ततश्शेर्लोपश्छन्दसि]

सदनी दु खविनाशनेन सुखप्रदा (विद्या) १ १८६ ११ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्भावे ल्युडन्तात् स्त्रिया डीप्]

सदन्तः निवासयन्त (राजादयो मनुष्या) ४ २१ ६ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो शतृ। सीदा-देशो न भवति छान्दसत्वात्]

सदन्यम् सदन गृहमर्हति (पितृश्रवण व्यवहारम्) १ ९१ २०. [सदनप्राति० अर्हत्यर्थे यत्। सदनमिति व्याख्यातम्]

सदम् सीदन्ति सुखानि यस्मिँस्त शिल्पव्यवहार, देहादिक वा १ २७ ३ विज्ञान गृह वा १ ८९ १ सीदन्ति विद्वासो यस्मिँस्तत् सत्य वच ६ ६७ ८ प्राप्त वस्तु ४.३ १२ प्राप्तव्यम् (वस्तु) ६ ५० ६ स्थानम् २ ३४.४ ज्ञानस्वरूपम् (रुद्रम्=ईश्वरम्) प० वि०। स्थिर वर्त्तमान ज्ञानमात्मम् १ ११४ ८ शत्रुहिंसकसैन्यम् १ १२२ १० सद्यते विज्ञायते प्राप्यते यस्तम् (हव्य पदार्थम्) ५ ४ सीदन्ति यस्मिन् याने तत् १ ११६ ६ प्राप्त दु खम् ५ ७७.४ यो न्याये सीदति तम् (सेनापतिम्) १६ १६ अवस्थितम् (वह्निम्) ३ २ १५ सीदन्ति प्राप्नुवन्ति यस्या ताम् (सभाम्) २५ १४ य सीदति तम् (अग्नि=पावक इवेश्वरम्) ७ ११.२ गृहमिव स्थितिपदम् (अग्नि=विद्वज्जनम्)

सधवीर समानस्थाने वर्त्तमान वीरपुरुष (इन्द्र=राजन्) ६ २६ ७ [सह-वीरपदयो समास । हस्य धकारश्छान्दस]

सधस्तुति सह प्रशसितम् (विज्ञानम्) ५.१८.५ [सह-स्तुतिपदयो समास.। हस्य धकारश्छान्दस]

सधस्तुतिम् स्तुत्या सह वर्त्तते ताम् (शिल्पक्रियाम्), प्र०—अत्र वर्णव्यत्ययेन हकारस्य धकार १ १७ ६ सह-कीर्त्तिम् ४ ४४ ६ [सह-स्तुतिपदयो. समास । हस्य धश्छान्दस]

सधस्थ समानस्थान (सभ्यजन) १८ ५६ **सधस्थम्**=सहस्थानम् (अ०—गर्भाशयम्) ११ ४८ यत्सह तिष्ठति तत्कारणम् ५.१८ तत्त्वावयवै सहस्थानम् १ १५४ ३ **सधस्थात्**=सहस्थानात्तलात् ११.६. **सधस्थे**=सह तिष्ठति यत्र (दुरोणे=गृहे) ३३ ७२. समान शय्या मे स० प्र० १० ४० २ समानस्थाने मेघमण्डले ६ ५२.१५ अन्तरिक्षे १३ ५३ लोके शरीरे च ऋ० भू० ३०५, १५ ५४ [सहोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क । हकारस्य धकारश्छान्दस । सधस्थे सहस्थाने नि० ३ १५ (यजु० १८ ५६) स्वर्गो वै लोक सधस्थ श० ६ ५ १ ४६ 'सधमादस्थयोश्छन्दसि' अ० ६.३ ६६ सूत्रेण सहस्य सधादेश]

सधस्था सहस्थानानि (जलस्थलान्तरिक्षाणि) ३.५६ ५. समानस्थानानि ३ २० २ [सधस्थ इति व्याख्यातम् । ततश्शेर्लोपश्छन्दसि]

सधस्थानि समानस्थानानि (तविषाणि=बलानि) ३ १२.८ [सधस्थ इति व्याख्यातम् । तत प्रथमाबहुवचन नपुसके]

सधिषि समानान् शब्दान् शृणोति येन तस्मिन् श्रोत्रे १३ ५३ [समान-धिष्पदयो समासे समानस्य सादेश । धिष्=धिष शब्दे (जु०) धातो क्विप् करणकारके]

सधिः पोढा (अग्नि =विद्वान् जीव) प्र०—अत्र वर्णव्यत्ययेन हस्य ध, इश्च प्रत्यय १२ ३६ [षह मर्षणे (भ्वा०) धातोर्बाहु० औणा० इ । हस्य धो वर्णव्यत्ययेन]

सधुराः धुरन्धर हुए (हे गृहस्थादिमनुष्यो !) स० वि० १४२, अथर्व० ३ ३० ५ [सह-धुर्पदयो समासे समासान्तोऽकार]

सध्रीः समानस्थाना (आप =जलानि) २ १३ २. **सध्रेः**=सहस्थानस्य (क्षत्रस्य=राष्ट्रस्य) ५ ४४ १०. ['सहस्य सध्रि ' अ० ६ ३ ६५ सूत्रेण 'वा छन्दसि' सहायेनाऽप्रत्ययेऽपि सहशब्दस्य सध्रिरित्यादेश:]

सध्रीचीना सहाऽञ्चन्ती (रात्रि) ३ ५५ १५ [सहोपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' इति क्विन् । 'अनिदिताम्०' इति नलोपे 'सहस्य सध्रि ' अ० ६ ३ ६५ सूत्रेण सहस्य सध्रिरादेशे 'विभाषाञ्चेरदिक्स्त्रियाम्' अ० ५ ४ ८ सूत्रेण स्वार्थेऽञ्च्यन्तात् ख । खस्य ईन इत्यादेश । तत 'अच ' इत्यकारलोपे 'चौ' इति पूर्वस्य दीर्घे सध्रीचीन इति रूपम् । तत स्त्रिया टाप्]

सध्रीचीना सहाऽञ्चत सङ्गतौ भवत (इन्द्राग्नी=वायुसवितारौ) १.१०८ ३ [सध्रीचीनेति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छान्दस]

सध्रीचीनान् समान लाभाऽलाभ से एक दूसरे के सहायक (गृहस्थ मनुष्यो) को स० वि० १४२, अथर्व० ३ ३० ५ सह वर्त्तमान (गृहस्थ मनुष्यो) को स० वि० १४३, अथर्व० ३ ३० ७ **सध्रीचीना:**=सहवर्त्तमाना (गुणा) १.१०५ १० सहाऽञ्चन्त (विद्वासो जना) १ १३४ २ **सध्रीचीनेन**=सहाऽञ्चति गच्छति तत्सध्रचङ्, सध्रयङ् एव सध्रीचीन तेन (मनसा=मनोवद्वेगेन), प्र०—'सहस्य सध्रि ' अ० ६ ३.६५ अनेन सध्र्यादेश 'चौ' अ० ६ ३.१३८ इति दीर्घत्वम् १ ३३.११. सज्ञापकेनाऽनुष्ठापकेन वा (मनसा=अन्त करणेन) ४ २४ ६ [सध्रीचीनेति व्याख्यातम् । तत शसि रूपम्]

सध्रीचीः सहवर्त्तमाना (दिश) ३७ १७ सहैवाऽञ्चन्ती (व्याप्तविद्या जना) ३ ३१ १६ सह गच्छन्ती (विविधा गती) १ १६४ ३१ या सहाऽञ्चन्ति ता (ऊतय =रक्षाद्या क्रिया) ६ ३६ ३ [सहोपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विक्०' इति क्विन् । अनिदिताम्०' इति नलोपे 'सहस्य सध्रि ' इति सध्रिरादेश । तत स्त्रियाम् 'अञ्चतेश्चोपसख्यानम्' इति ङीप् । तत 'अच ' इत्यकारलोपे 'चौ' इति पूर्वस्य दीर्घत्वे सध्रीचीति रूपम् । ततो जस स्थाने पूर्वसवर्णदीर्घ 'सुपा सुलुक्०' इति सूत्रेण]

सध्र्यक् य सध्रि समान स्थान प्राप्नोति स (विद्वज्जन) २ १७ ३ य सहाऽञ्चति स (यजमान) ४ ४७ २ सह सेवमानम् (राध =धनम्) १ ५१ ७ यत्सहाऽञ्चति (पाथ =अन्नमुदक वा) ३ ३१ ६ **सध्रयञ्चः**=सहाऽञ्चन्त (मरुत =मनुष्या) ५ ६० ३ ये सहाऽञ्चन्ति ते (राजभृत्या) ४ ४ १२ [सहोपपदे अञ्चु गतिपूजनयो. (भ्वा०) धातो कर्त्तरि क्विप् । 'सहस्य सध्रि'

[समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो. 'त्यदादिपु दृशोऽनालोचने कञ् च' इति कञ्। 'दृग्दृशवतुपु' इति समानस्य सादेश । तत स्त्रिया 'टिड्ढाणञ्०' सूत्रेण ङीप्]

सद्म सीदन्ति यस्मिन् गृहे तत् १ ३८ १० स्थानम् ७ १८ २२ गृहवद्वर्त्तमान शरीर वा १ ७३ १ **सद्मनोः**=सर्वेपा निवासस्थानयो (विद्युदाकाशरूपयो प्रकृत्यो) ३ ५५.२. **सद्मनी**=सर्वेपा निवासाधिकरणे (द्यावापृथिवी) १ १८५.६ **सद्मानि**=प्राप्तव्यानि (वस्तूनि) १ १३६.१० साकाराणि स्थानानि १२ १३ [पद्लृ विशरणगत्यवसादनेपु (भ्वा०) धातोरविकरणे मनिन्। सद्म उदकनाम निघ० १ १२ गृहनाम निघ० ३ ४ सग्रामनाम निघ० २ १७]

सद्म सद्मानि स्थानानि १ १७३ ३ उत्तमानि कर्माणि स्थानानि वा ४.१ ८ [सद्मन् इति व्याख्यातम्। तत 'सुपा सुलुक्०' सूत्रेण जसो लुक्]

सद्मन् सीदन्ति यस्मिँस्तस्मिन् गृहे ७ १८ ११ [सद्मन्-प्राति० 'सुपा सुलुक्०' सूत्रेण ङेर्लुक्। सद्मनी द्यावापृथिव्योर्नाम निघ० ३ ३०.]

सद्मबर्हिषः सद्म स्थान बर्हिरुत्तम यासा ता (भा० सरित इव प्रजा) १ ५२ ३ [सद्मन्-बर्हिष्पदयो. समास.। बर्हिष्=अन्तरिक्षनाम निघ० १ ३ उदकनाम निघ० १ १२ पदनाम निघ० ५ २]

सद्ममखसम् सीदन्ति यस्मिँस्तत् सद्म जगत्, तन्मख प्राप्त यस्मिन्निति तम् (सदसस्पतिं=परमेश्वरम्) १ १८ ९. [सद्मन्-मखस्पदयो समास । मख. यज्ञनाम निघ० ३ १७ मखस्=मख गत्यर्थे (भ्वा०) धातोरसुन् औणादिक]

सद्मानम् सीदन्ति यस्मिँस्तम् (गोशालम्) १ १७३ १ यस्मिन् सीदति तम् (गृहम्) ६ ५१ १२ [सद्मन् इति व्याख्यातम्। ततो द्वितीयैकवचनम्]

सद्मेव गृहमिव सङ्ग्राममिव १.६७ ५ [सद्म-इव-पदयो समास]

सद्य पूर्ण करके स० वि० ८०, अथर्व० ११.५ ६

सद्य-ऊतयः क्षिप्राणि रक्षणादीनि येपान्ते (मरुत=मनुष्या) ५ ५४ १५ [सद्यस्-ऊतिपदयो समास । सद्यस् इति व्याख्यास्यते। ऊति=अव रक्षणगत्यादिपु (भ्वा०) धातो स्त्रिया क्तिन्]

सद्यः क्षिप्रम् ४ ७ १० शीघ्रमेव, प्र०—'सद्य परुत्परारि०' अ० ५ ३ २२, 'समानेऽहनि इति सद्य' इति भाष्यवचनात् समानेऽहन्येतस्मिन्नर्थे सद्य इति शब्दो निपातित १ ८ ९ तूर्णम् १ १२२ १४ [अहन्यभिधेये समानस्य सभावो द्यश्च प्रत्ययो निपात्यते 'सद्यः परुत्०' अ० ५ ३ २२ सूत्रेण]

सद्यो अर्थम् शीघ्रगामिपृथिव्यादिद्रव्यम् १ ६० १ [सद्यस्-अर्थपदयो समास]

सद्योवृधम् य सद्यो वर्धयति तम् (परमात्मानम्) ३ ३१ १३ [सद्यस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

सधनित्वम् धनिना भावेन सह वर्त्तमान राज्यम् ४ १ ९ [सह-धनित्वपदयो समास । 'वोपसर्जनस्ये' ति सभाव । धनित्वम्=धनिन्प्राति० भावे त्व]

सधन्यः समान धन विद्यते येपान्ते (राजभृत्या) प्र०—अत्र मत्वर्थीय ईप् ४ ४ १४. [समान-धन्यपदयो समासे समानस्य सादेश । धन्य=धनप्राति० यत्]

सधन्यः धन्यै सह वर्त्तमान (सज्जन) ६.५१.३ [सह-धन्यपदयो समास । सह स्थाने सादेश । धन्य=धनप्राति० अर्हत्यर्थे यत्]

सधमात् समानस्थानात् २० ४७ [सहोपपदे मदी हर्षे (दिवा०) धातोश्छान्दसो ण्वि । हस्य धकार]

सधमात् समानस्थानाद् य सह माद्यति ४ २१ १ **सधमादम्**=सहाऽऽनन्दम् ४ २३ २ यत्र सह माद्यन्ति आनन्दन्ति तम् (सुखम्) ७ ३२ १ सह मादयितारम् (ईश्वरम्) १ १८७ १ **सधमादः**=समानस्थाना (प्रजा-जना) ७ ४३ ५ या सह माद्यन्ति हृष्यन्ति ता (विदुष्य स्त्रिय) १० ७ महाऽऽनन्दिताः (सद्गुणकर्मस्वभावा मनुष्या) १ १२१ १५ समानस्थानानि ६ ६९.४ सह-स्थाना (जना) ५ २०.४ **सधमादेषु**=सुखेन सह वर्त्तमानेपु स्थानेपु १ ५१ ८ महस्थानेपु १९ ४४ उत्कृष्ट स्थानो मे आर्याभि० १ १४, [सहोपपदे मदी हर्षे (दिवा०) धातोश्छान्दसो ण्वि । हकारस्य धकारादेश । सहमादेपु प्रयोगे सहोपपदे मदी हर्षे (दिवा०) धातो 'कर्मण्यण्' इत्यण्। 'सधमादस्थयोश्छन्दसि' सूत्रेण सहस्य सधादेश । सधमादम् सहमदनम्। नि० ७ ३१ (यजु० १० ७.) अनतिमानिन्य इत्येवैतदाह सधमाद इति श० ५ ३ ५ १९]

सधमाद्यानि सहस्थानेपु साधूनि (सत्या=कर्माणि भावा वा) ४.३ ४ [सधमादिति व्याख्यातम् । तत साध्वर्थे यत्]

सधमाः समानस्थाने मन्यमान (इन्द्र=राजा) ७ १८ ७ [सहोपपदे मन ज्ञाने (दिवा०) धातो क्विप्। नस्याकारादेशश्छान्दस]

(दिवा०) धातो क्विप् । 'वहुल छन्दसि' अ० ७.१ १०३. सूत्रेण ऋकारस्योत्व रपरत्व च । ततो द्विवचनस्याकारादेश]

सनाजुवः सनातनी जूर्वेगो यासा ता (ओषधी.) १.१४१ ५ [सना-जूपदयो समास । सनेति व्याख्यातम् । जू =जु गतौ (सौत्रो धातु) तत 'भ्राजभास०' इति क्विप्]

सनात् सम्भजनात् १ ५१ ६ **सनानि**=सविभागयुक्तानि वस्तूनि १ ६५ १० कर्मभि सभक्तानि (ऐश्वर्यधनानि) ३ १ २० [षण सभक्तौ (भ्वा०) धातोर्घलर्थे क । तत पञ्चम्येकवचने रूपम्]

सनात् सर्वदा १ ५५ २ सनातनात् कारणात् १ ६२ ८ सनातन (इन्द्र =जीवात्मा) ७ ३२ २४ नित्यम् ३४.५४ निरन्तरम् २ १६ १ [सनादित्यव्यय स्वरादिषु पाठात् । सनात् चिरम् नि० १२ ३६]

सनाभिः समाना नाभिर्बन्धन यस्य स. (काल) १ १६४ १३. [समाना-नाभिपदयो समासे पूर्वपदस्य ह्रस्वादेशे 'ज्योतिर्जनपदरात्रिनाभि०' अ० ६ ३ ८५ सूत्रेण समानस्य सादेशे रूपम् । सनाभय' अगुलिनाम निघ० २ ५ नाभि सन्नहनात् नाभ्या सनद्धा गर्भा जायन्त इत्याहुरेतस्मादेव ज्ञातीन्त्सनाभय इत्याचक्षते सबन्धव इति च नि० ४ २१]

सनायते सना सनातन इवाचरति १ ६२ १३ [सनेति व्याख्यातम् । तत आचारेऽर्थे क्यङन्ताल्लट्]

सनायुवः सनातनस्य कर्मण. कर्त्तार इवाचरन्त (मतय =विद्वज्जना) १.६२ ११ [सनेति व्याख्यातम् । तत आचारेऽर्थे क्यङ् । तत 'क्याच्छन्दसि' सूत्रेण उ । 'जसादिषु छन्दसि 'वा वचनम्' इति गुणस्य विकल्पेन तदभाव उवङ्]

सनाः भोक्त्र्य (युवतय स्त्रिय) ३ १ ६ [षण सभक्तौ (भ्वा०) धातो पचाद्यच् । ततष्टाप् स्त्रियाम्]

सनिता विभाजक (न्यायाधीशो राजा) २.२३ १३ सविभाजक (इन्द्र =सेनेश) १ १२६ २ सविभक्ता (सेनेश) १ १७५ ३ विभक्ता (जन) ५ ५० ४ ज्ञानस्य सुखस्य विभक्ता (सेनाध्यक्ष) १ २७ ६ **सनितुः**=रक्षणानि यमस्य, भा०—शफाना रक्षणायायसो निर्मितस्य (क्षुरस्य) २६ १६. [षण सभक्तौ (भ्वा०) धातो कर्त्तरि तृच् । सनितु हस्तग्राहस्य नि० ३ ६]

सनिता सभक्तानि (धनानि), प्र०—अत्र वन सन सभक्तौ इति धातोर्बाहुलकात्तन् प्रत्यय १ १०० ६ [सनितप्राति० शेर्लोपश्छन्दसि]

सनितौ भोगसविभाग लाभे, प्र०—अत्र 'नितुन्नतथ०' अ० ७.२ ९. उत्यस्य 'अग्रहादीनामिति वक्तव्यम्' इति वार्त्तिकेनेडागम' १ ८ ६ [षण सम्भक्तौ (भ्वा०) धातोर्बाहु० तन्]

सनिषन्त विभजन्ते ५ १२ ४. **सनिषामहे**—सभज्य प्राप्नुयाम ३ ११ ६ [षण सम्भक्तौ (भ्वा०) धातोर्लेटि सिपि च रूपम् । व्यत्ययेनात्मनेपदम्]

सनिष्णत सभजेयु, सभजन्तु वा १ १३१.५. [षण सभक्तौ (भ्वा०) धातोर्लोट् । 'व्यत्ययो वहुलम्' इति द्विविकरणता सिप् श्ना च]

सनिष्यति सभजेत् ५ ३१ ११ **सनिष्यसि**=सभजिष्यसि ४ २० ३. [षण सम्भक्तौ (भ्वा०) धातोर्लृट्]

सनिष्यन् सभक्ष्यमाण (यजमान सज्जन) ३ २ ३. **सनिष्यन्तः**=सविभाग करिष्यन्त (सज्जना) ३ २ ४. सेवन करिष्यमाणा (सज्जना) ३ १३ २ [षण सम्भक्तौ (भ्वा०) धातो. 'लृट सद्वा' सूत्रेण लृट स्थाने शतृ]

सनिष्यन्तीनाम् सभजन्तीनाम् (ओषधीना=सोमयवादीनाम्) १२.८२ [षण सभक्तौ (भ्वा०) धातोर्लृट शत्रन्तात् स्त्रिया ङीप्]

सनिष्यवः विभाग करिष्यमाणा (नद्य =सरित) ४.५५ ६. सम्भजमाना (जना) १ १३१ २ सविभागमिच्छव: (गूर्तय =उद्यमयुक्ता कन्या.) १ ५६ २ आत्मन सनिं सविभागमिच्छव (राजपुरुषा), प्र०—सनिशब्दात् क्यचि लालसाया सुक्, तत उ ६ १७ [सनि =षण सभक्तौ (भ्वा०) धातोरीण० ३ । सनिपदाद् आत्मन इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसि' इत्यु. । क्यचि 'सुग्वक्तव्य' अ० ७ १ ५१ वा०सूत्रेण सुगागम]

सनीडाः समाना नीडा बन्धनाधारा गृहविशेषा अग्न्यागारविशेषा वा येषु ते (बन्धुरा =बन्धनविशेषा) १ ३४ ६ समीपस्था (विद्वासो जना) १ १६५ १ समान नीड प्रशसनीय गृह येषान्ते (नर =श्रेष्ठा मनुष्या) ७ ५६ १ समानस्थाना (विश =प्रजाजना) १ ६६ ३ एकेश्वराधिकरणसमानस्थाना (जनय =प्रजा) १ ७१ १ समीपे वर्त्तमाना (अमृता.=विद्वज्जना) १ ६२ १० **सनीडे**= समीपे १ ६२ ७ **सनीडेभिः**=समीपवर्त्तिभि (रुद्रेभि.= वीरजनै) १ १०० ५ [समाननीडपदयो समासे 'समानस्य छन्दसि०' अ० ६.३ ८४ सूत्रेण समानस्य सादेश । नीड = नितराम् इलन्ति स्वपन्ति यत्रेति विग्रहे नि+इल स्वप्न-

रिति सहस्य सध्रिरित्यादेश]

सध्र्यञ्चा सह प्रशसनीयौ (इन्द्राग्नी=वायुसवितारौ) १ १०८ ३ [सध्र्यक् इति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छान्दस । 'उगिदचा सर्वनामस्थाने०' इति नुम्]

सन् वर्त्तमान (विद्वज्जन) १ ७६.५ भवन् (परमेश्वर सभाध्यक्षो वा) १ १०० ४ [अस् भुवि (अदा०) धातो शतृ]

सनकात् सनातनात्कारणात् ३ २९ १४ **सनकाः**= सनन्ति सेवन्ते परपदार्थान् ये ते (दस्यवो जना), प्र०—अत्र 'क्वुन् शिल्पिसञ्ज्ञयोरपूर्वस्यापि' उ० २ ३२, १ ३३ ४ [षण सम्भक्तौ (भ्वा०) धातो 'क्वुन् शिल्पिसञ्ज्ञयोरपूर्वस्यापि' उ० २ ३२ इति क्वुन् । सनात्=चिरम् नि० १२ ३६]

सनजा या सनेति सनातनाज्जायते सा (द्विता) १ ६२ ७ सनेन विभागेन जाता (धी=प्रज्ञा) ३ ३९.२ [सनोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड । तत स्त्रिया टाप् । सनेत्यव्यय सदार्थे । अथवा षण सम्भक्तौ (भ्वा०) धातोर्घञर्थे क]

सनत् सनातनम् (अश्वादिपशुम्) ५ ६१ ५ सदा, यथावन्निरन्तर वा १ १०० १८ [सनदिति स्वरादिपाठाद्व्ययत्वम्]

सनत् सेवेत १ १०० १८. सम्भजेत्, प्र०—लेट्प्रयोगोऽयम् १ १०० ६ [षण सम्भक्तौ (भ्वा०) धातोर्लेट्]

सनता सनतनानि सनातनानि (रत्ना=रमणीयानि धनानि) ३ ३ १ नतेन सह वर्त्तमानानि (अपासि=कर्माणि) २ ३ ६ [सन् इत्यव्यय स्वरादिपु पाठात् । सन् इत्युपपदे अत सातत्यगमने (भ्वा०) धातोर्घञर्थे क । सनतप्राति० शेर्लोपश्छान्दस । अथवा सह-नतपदयो समासे 'वोपसर्जनस्ये' ति सहस्य सादेश । ततश्शेर्लोपश्छन्दसि]

सनन्तः सेवमाना (मनुष्या) ७.५२.१ [षण सम्भक्तौ (भ्वा०) धातो शतृ]

सनयः सनातना (पृथिव्यादिपदार्था) ३ २० ४ उत्तमा सेवा १ १००.१३ विभक्तय (उपस) ४ ५१ ४ सम्भक्तय (वाजा=व्यवहारा) ३ ३० २१ **सनये**= सविभागाय ४ २० ३ विभागाय ६ २६ ८ राज्यसेवनाय १ ११६ २१. सुखाना सम्भोगाय १ ३० १६ सुखसेवनाय १.११६.१२ **सनिम्**=सेवनीया सत्यासत्ययोर्विभाजिका वाणीम् ५ २७ ४ पापपुण्याना विभागेन फलप्रदातारम् (परमेश्वरम्) १ १८ ६ सत्यासत्यविभाजिका धियम् ६ ६१ ६ सनन्ति सम्भजन्ति सुखानि यस्मिन् व्यवहारे तम् प्र०—अत्र सनधातो 'खनिकष्यजसिवसिवनिसनि०' उ० ४ १४५ इति अविकरण इ प्रत्यय १ २७ ४ सम्भजमानाम् (इडा=वाचम्) ३ ७ ११ विभक्ताम् (इडाम्) ३ १ २३ सनन्ति सविभजन्ति सत्यासत्ये यया ताम् (मेधा=प्रज्ञाम्) ३२ १३ विद्यादिशुभगुणदानम् ३ २३.५ याचमानम् (लक्ष्यम्) ३ २२ ५ सम्यग् भजनीय और सेव्य (ईश्वर) को आर्याभि० २ ५२, ३२ ३ सविभागम् ६ ७० ६ सविभाजकम् (सर्वविद्यामन्थनसारम्) ३.५ ११. [षण् सम्भक्तौ (भ्वा०) धातो 'खनिकष्य' उ० सूत्रेण इ । सनये सवनाय नि० ६ २२ सनय पुराणम् नि० ४ १९]

सनरस्य सभज्यमानस्य (पदार्थस्य व्यवहारस्य वा), प्र०—अत्र सनधातोर्बाहुलकादौणादिकोऽरन्-प्रत्यय १ ९६ ८ [षण सम्भक्तौ (भ्वा०) धातोर्बाहु० औणा० अरन्]

सनवथ ओषधिदानेन सेवध्वम्, प्र०—अत्र विकरणद्वयम् १२ ७९ [षण सम्भक्तौ (भ्वा०) धातोर्लट् । 'व्यत्ययो बहुलम्' इति द्विविकरणता । तेन उ-शप्-विकरणौ]

सनवित्तः य सनातनेन वेगेन वित्तो लब्ध (अध्वा=मार्ग) ७.४२ २ [सन-वित्तपदयो समास । सनेत्यव्यय सदार्थे । वित्त=विद्लृ लाभे (तुदा०) धातो. क्त]

सनश्रुत सत्यासत्यविवेकिना सकाशाच्छ्रुत येन यद्वा सन सत्यासत्यविभाजक वचन श्रुत तत्सम्बुद्धौ (इन्द्र=विद्यैश्वर्ययुक्त राजन्) ३ ५२ ४ **सनश्रुतम्**=य सनातनानि शास्त्राणि शृणोति तम् (सन्तानम्) ३ ११ ४ [सन-श्रुतपदयो समास । सन=षण सभक्तौ (भ्वा०) धातोर्घञर्थे क । अथवा सनेत्यव्ययम् सदार्थे । सनोपपदे श्रु श्रवणे (भ्वा०) धातो कर्त्तरि क्विप् । ह्रस्वस्य तुगागमे द्वितीयैकवचने सनश्रुतमिति रूपम्]

सना सनानि प्रसिद्धानि शौर्याणि १ १७४ ८ सनातनानि (पौस्यानि=बलानि) १ १३९ ८ सदा ५ ७५ २ सनातनम् (महदनादिभूत ब्रह्म) ३ ५४ ९. [सदा इति व्याख्यातम् । दस्य नकारो वर्णव्यत्ययेन]

सना ससेविनौ (पितरा=पितरौ) ४ ३३ ३. [षण सभक्तौ (भ्वा०) धातो पचाद्यच् । ततो द्विवचनस्याकार]

सनाजुरा सदा जरावस्थास्थौ (पितरा=पितरौ) ४ ३६ ३ [सना इति व्याख्यातम् । तदुपपदे जृष् वयोहानौ

क्षेपणयो (तुदा०) धातोर्घञर्थे क । लम्य डकारो वर्ण-व्यत्ययेन]

सनुतरः सनातनविद्य (राज्याधिकारिजन) ४ ३८ ४ [सनुत निर्णीतान्तर्हितनाम निघ० ३'२५ सनुतर् स्वरादिषु पाठादव्ययम् । तत अर्श आदित्वान् मत्वर्थेऽच्]

सनुतः सदैव ६ ४७ १३. नैरन्तर्ये २ २९ २ सततम् १ ९२ ११ सनातनात् (कालात्) ५ २ ४ सदा २० ५२ [सनुतर् स्वरादिषु पाठादव्ययम्]

सनुत्यः सनुतेषु नम्रादिगुणै सह वर्त्तमानेषु भव (प्रजारक्षको जन) २ ३० ९ निर्णीतान्तर्हितेषु सिद्धान्तेषु भव साधुर्वा (महाविद्वज्जन), प्र०—सनुतरिति निर्णीतान्तर्हितनाम निघ० ३ ५, ६ ५ ४ **सनुत्येन**=सत्प्रेरणीयेन (त्यजसा=त्यागेन) ६ ६२ १० [सनुतर् निर्णीतान्तर्हितनाम निघ० ३ २५ ततो भवार्थे साध्वर्थे वा यत् । रेफस्य लोपश्छान्दस]

सनुत्री विभाजिका (युवति स्त्री) १ १२३ २ [षण सभक्तौ (भ्वा०) धातोर्बाहु० औणा० उत्र । तत स्त्रिया ङीप् छान्दस]

सनुयाम दद्याम, सभजेम, प्र०—अत्र पक्षे विकरण-व्यत्यय १ १०० १९ सभजेमहि १ १० १ ११ याचेम ७.२५ ५ **सनेत्**=सम्यक् सेवयेत्, अ०—ससेवयेत् १ ५ ९ **सनेम**=विभजेम ७ ५२ १ सभजेम १ १८९.८ अन्येभ्यो दद्याम १ १२४ १३ सुखानि भजेम १ ११७ ६ [षण सभक्तौ (भ्वा०) धातोर्लिङ् । विकरणव्यत्ययेन उ । अथवा षणु दाने (तना०) धातोर्लिङ्]

सनेन विभक्तेन (वस्तुना) २ २९ ३ [षण सभक्तौ (भ्वा०) धातोर्घञर्थे क]

सनेमि सनातनम्, पुराणम् (श=सुखकारका विद्वास) २१.१० पुरातनम् (दिद्यु=शस्त्राऽस्त्रम्) ७ ५६ ९ सनातनेन नेमिना धर्मेण सह वर्त्तमान राज्यमण्डलम् ९ २५ [सनेमि पुराणनाम निघ० ३ २७ सनेमि क्षिप्रम् निघ० १२ ४४ अथवा सह-नेमिपदयो समास । नेमि वज्रनाम निघ० २ २० णीञ् प्रापणे (भ्वा०) धातो 'नियो मि' उ० ४ ४३ सूत्रेण मि]

सनेमि समानो नेमिर्यस्मिँस्तत् (चक्रम्) १ १६४ १४ [समान-नेमिपदयो समास । नेमिरिनि पूर्वपदे व्याख्यातम्]

सनेयम् सभजेयम् १८ ३५ [षण सम्भक्तौ (भ्वा०) धातोर्लिङ्]

सनोति सम्पन्न करोति ४ १७ ९ प्राप्नोति ६ ६० १ विभजति, ददाति ३ २५ २ **सनोतु**=ददातु ६ ५४ ५ [षण संभक्तौ (भ्वा०) धातोर्लट् । विकरणव्यत्ययेन उ । अथवा षणु दाने (तना०) धातोर्लट्]

सन्तनिः सम्यक् विस्तारक. (नियमपालको जन) ५ ७३ ७ [सम्+तनु विस्तारे (तना०) धातोर्बाहु० औणा० इ]

सन्तपन्ति सम्यक् क्लेशयन्ति १ १०५ ८ [सम्+तप सन्तापे (भ्वा०) धातोर्लट्]

सन्तम् वर्त्तमानम् (चतुर्वय व्यवहारम्) १ ११० ३ विद्यमानम् (अग्नि=विद्युदाख्यम्) ४ ७ ६ अभिव्याप्य स्थितम् (राजानम्) ५ ८ २. **सन्तः**=वर्त्तमाना (असुरा = दुष्टा मनुष्या) २ ३० [अस भुवि (अदा०) धातो शतृ । सत्प्राति० द्वितीयैकवचनम् । अन्यत्र जस्]

सन्तरन्तः दु खस्याऽन्त प्राप्नुवन्त (जना) ४ १ [सम्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो शत्रन्ताज्जस्]

सन्तराम् अतितराम् २७ ८ [सन्=अस भुवि (अदा०) धातो शत्रन्तात् सु । सन् सुबन्तादतिशायने तरप् । सन्तरप्राति० आमु-प्रत्ययश्छान्दस. । 'किमेत्तिङ-व्ययघाद्०' इति सूत्रेणाप्राप्तोऽपि 'वा छन्दसि' नियमेनामु]

सन्तरुत्रम् दु खात् सम्यक् तारकम् (रयि=श्रियम्) ३ ११ ९ [सम्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो कर्त्तरि तृचि 'ग्रसितस्कभित०' अ० ७ २ ३४. सूत्रेण उडागम]

सन्तवीत्वत् बहुबल सन् (वाजी=तुरङ्ग) ४ ४०.४ [सम्+तनु विस्तारे (तना०) धातोर्लिङ् । धातोरनुनासिक-लोप, प्रत्ययतकारस्य त्वद् आदेशश्छान्दस । अथवा सम्+तनु विस्तारे (तना०) धातो शतृ । 'बहुल छन्दसि' सूत्रेण श्लौ, अभ्यासस्य बीगागम, धातोश्च अनुभागस्य लोपश्छान्दस]

सन्तः सत्पुरुषा ६ ६६ ४ [अस भुवि (अदा०) धातो शत्रन्ताज् जस् । अथवा षण सम्भक्तौ (भ्वा०) धातोर्बाहु० औणा० तन्]

सन्ता वर्त्तमानौ (इन्द्राग्नी=वाय्वग्नी) १ २१ ४ विद्यमानौ (पितरा=पितरौ) ४ ३६ ३ [अस् भुवि (अदा०) धातो शत्रन्ताद् द्विवचनस्याकारादेश]

सन्ताप्तम् सम्यक् तपे, प्र०—अत्र लिडर्थे लुङ् ५ ३३ सन्ताप युक्त रखो आर्याभि० २ १३, ५ ३३ [सम्+तप सन्तापे (भ्वा०) धातोर्लुङ् । अडभावश्छान्दस]

सन्ताय्यमाने सम्यक् विस्तार्यमाणे पाल्यमाने वा

सन्निनेथ सम्यक् नयसि ७ २८.३ **सन्नेषि**=उत्तमतया नयसि ५ ४२.४ [सम्+णीञ् प्रापणे (भ्वा०) धातोर्लिट् । अन्यत्र लटि शपो लुक्]

सन्नुद सबको प्रसिद्धि से प्रेरणा कीजिए स० वि० १४०, अथर्व० १४ २ ६४ [सम्+णुद प्रेरणे (तुदा०) धातोर्लोट्]

सन्न्या समानान् पदार्थान् नयति यया तया (मेधया=प्रज्ञया) ५ ७ सर्वासा विद्याना सविभागकर्त्र्या (मेधया) १२ ७ **सन्याम्**=सत्य नीयते यया तस्याम् (वाचि=वेदवाण्याम्) ८ ५४ [सम्+णीञ् प्रापणे(भ्वा०) धातो क्विप् । सन्नीप्राति० टा]

सन्यसे सना विभजता मध्ये प्रयत्नाय ३ ३१ १६ [सन्-यस्पदयो समास । सन्=षण सम्भक्तौ (भ्वा०) धातो क्विप् । यस्=यसु प्रयत्ने (दिवा०) धातोर्भावे क्विप् । ततश्चतुर्थी]

सन्वन्तु सभजन्तु १ १२२ १२ [षण सम्भक्तौ (भ्वा०) धातोर्लोट् । विकरणव्यत्ययेन उ]

सपत्नक्षित् सपत्नान् शत्रून् क्षयति यया सा, अ०—सपत्नक्षिता (अनिशिता=क्रियया) १ २९ समी०—अत्र 'कृतो बहुलमि' ति वार्त्तिकेन करणकारके क्विप् । क्षि क्षये इत्यस्य रूपम् । एतदुव्वटमहीधराभ्या क्षिणु हिसायामित्यस्य भ्रान्त्या व्याख्यातम् । सपत्नान् शत्रून् क्षयति येन स (सङ्ग्राम) १ २९ [सपत्नोपपदे क्षि क्षये (भ्वा०) धातो 'कृतो बहुलमि' ति करणे क्विप् । ह्रस्वस्य पिति कृति तुगागम]

सपत्नदम्भनम् य. सपत्नान् दम्भयतीति तम् (जगदीश्वर भौतिकमग्नि वा) ३ १८ [सपत्नोपपदे दम्भु दम्भने (स्वा०) धातो 'कृत्यल्युटो बहुलम्' कर्त्तरि ल्युट्]

सपत्नसाही यया सपत्नान् दोषान् सहन्ते मृष्यन्ति दूरीकुर्वन्ति सा, यया दुष्टानि शीलानि सहन्ते सा, यया शत्रून् सहन्ते सा (अ०—वाक्) ५ १० [सपत्नोपपदे षह मर्षणे (भ्वा०) धातो 'कर्मण्यण्' तत स्त्रिया ङीप्]

सपत्नहा य सपत्नानरीन् हन्ति स (विद्वज्जन) १२ ५ शत्रुदोषहन्ता विद्वज्जन २७ ३ य सपत्नान् शत्रून् मेघाऽवयवान् वा हन्ति स (सूर्य सभाद्यध्यक्षो वा) ५ २४ [सपत्नोपपदे हन हिसागत्यो (अदा०) धातो क्विप् । तत सौ 'सौ च' इति दीर्घ]

सपत्नान् सपत्नीव वर्त्तमानानरीन् १५ १ विरोधे वर्त्तमानान् सम्बन्धिन १५ २ **सपत्ना**:=शत्रव १७ २२ [सह एकार्थे पततीति विग्रहे सहोपपदे पत्लृ गतौ (भ्वा०) धातोर्न प्रत्यय औणादिक । सहस्य सादेश । सपत्नो वा ऽभिमाति (यजु० ९ ३७) श० ३ ९ ४ ९. पाप्मा वै सपत्न श० ८ ५ १.६ इम देवा असपत्न सुवध्वमितीम देवा अभ्रातृव्य सुवध्वमित्येव तदाह श० ५ ४ २ ३]

सपत्नी समाना पत्नी यस्या सा (स्त्री) ३ १ १० [समाना-पत्नीपदयो समासे समानस्य सभाव]

सपत्नी सपत्नी इव वर्त्तमाने (अहोरात्रे) ३ ६ ४ [व्याख्यातम् पूर्वपदे]

सपत्नीरिव यथाऽनेका पत्न्य समानमेक पति दु ख-यन्ति तद्वत् १ १०५ ८ [सपत्नी -इवपदयो समास]

सपन्त आक्रोशन्ति ५ ३ ४ **सपन्ते**=आक्रुश्यन्ति ७.३८ ५. **सपामि**=आक्रुशामि ५ १२ २, **सपेम**=शपथैर्नियमयेम ५ ४३ १२ आक्रुश्याम निन्द्येम ४ ४ ९ आक्रुश्येम ६ १५ १० सम्बन्ध कुर्याम ३७ २० [शप आक्रोशे (भ्वा०) धातोर्लङ् । अटोऽभाव । अन्यत्र लट् लिङ् च । 'शप उपलम्भन इति वक्तव्यम्' इत्यात्मनेपद व्यत्ययेन वा । शस्य सकारो वर्णव्यत्ययेन । षप् समवाये (भ्वा०) धातोर्वा रूपम्]

सपन्त: दुष्टानाक्रोशन्त (सज्जना) २ ११ १२. समवयन्त (विद्वासो जना) १ ६८ २ [शप आक्रोशे (भ्वा०) धातो शतृ । अथवा पप समवाये (भ्वा०) धातो शतृ । सपति परिचरणकर्मा निघ० ३ ५ अर्चतिकर्मा निघ० ३ १४]

सपर्य प्रीत्या सम्यक् सेवय, ऋ० भू० २१४ अथर्व० १४ २ १८ सेवन किया कर, स० प्र० १५२ अथर्व० १४ २ १८ **सपर्यत**=सेवध्वम् ५ १४ ५ परिचरत ४ ३५ **सपर्यत**:=सेवेते ६ ४४ ५ **सपर्यति**=सेवते १ १२.८ **सपर्यन्**=परिचरन्ति १ ७० ५ **सपर्यन्ति**=सेवन्ते १ ८४ १२ **सपर्यात्**=सेवेत १ ६३ ८ **सपर्यान्**=परिचरेयु, सेवेरन् १ ७२ ३ **सपर्यामि**=परिचरामि १ ५८ ७ सेवयामि ३ ५४ ३ **सपर्येम**=सेवेमहि २ ६.३ [सपर्यति परिचरणकर्मा निघ० ३ ५ ततो लोट् । अन्यत्र लट् लङ् लेट् लिङ् च । सपर्यत =परिचरत नि० ११ ६]

सपर्यजित् य सपर्यान् सङ्ग्रामान् जयति स (ऋभु =प्रशस्तो विद्वज्जन), प्र०—सपर्य इति सङ्ग्राम-नाम निघ० २ १७, १ १११ ५ [सपर्योपपदे जि जये (भ्वा०) धातो क्विप् । सपर्य सग्रामनाम निघ० २ १७. मस्य पकारो वा]

धातोर् धी-स्थाने दि इत्यादेश पृपोदरादित्वात्]

सन्दृक् सम्यग् दर्शयिता (अग्नि) १ ६६ १ समानदृष्टि ४ ६ ६ य. सम्यक् पश्यति (अग्नि =विद्वज्जन) ४ १ ६ यथावत् सब के पाप-पुण्यो को देखने वाला (परमात्मा) आर्याभि० २ ४०, १७ २६ **सन्दृशम्**= सम्यग्दर्शनम् ६ १६ ८ **सन्दृशि**=समीचीन दिग्दर्शन यस्मिन् व्यवहारे तस्मिन् ४ २३ सम्यग्-दर्शने समानदर्शनविषये वा ३६ १६ साङ्क्ये ५ ७४ ६. सम्यग् द्रष्टव्ये (वर्णे=शुक्लादिगुणे) २ ११ २ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातो 'त्यदादिषु दृशोऽनालोचने कञ् च' सूत्रेण 'वा छन्दसि' नियमेनालोचनेऽपि क्विन् । सदृक् सद्रष्टा नि० १० २६ सन्दृशि सन्दर्शनाय नि० १० ४०]

सन्दृशे सम्यग् दर्शनाय ३ ३८ १ सम्यग् द्रष्टुम् २ १३ ५ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातोस्तुमर्थे 'दृशे विख्ये च' अ० ३ ४ ११ सूत्रेण के-प्रत्यय]

सन्दृक्षसे सम्यग् दृश्यसे, अ०—सङ्गत्य दृश्यते, दृष्टिपथमागच्छति, प्र० – अत्र लडर्थे लेट् मध्यमैकवचनप्रयोग 'अनित्यमागमशासनम्' इति वचनप्रामाण्यात् 'सृजिदृशो०' इत्यम् न भवति १ ६ ७ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लेट् । सिब्विकरण । 'सृजिदृशोर्झल्यम्०' इत्यमागमो न भवति छान्दसत्वात्]

सन्दृष्टि: सम्यक् पश्यन्ति यया सा (विद्या) ६ १६ २५ सम्यग् दृष्टि प्रेक्षणम् ४ १० ५ **सन्दृष्टौ**= सम्यग्दर्शने ६ १ ४ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातो स्त्रिया क्तिन्]

सन्द्युम्नेन श्रेष्ठतया विद्याधर्मादिगुणप्रकाशवता (राया) १ ४८ १६. [सत्-द्युम्नपदयो समास । द्युम्नम् धननाम निघ० २ १०]

सन्द्रवन्ति सम्यग् गच्छन्ति २६ ४८ [सु+द्रु गतौ (भ्वा०) धातोर्लट्]

सन्धमति सम्यक् प्राप्नोति १७ १६ यथायोग्य जन्ममरणादि को प्राप्त करा रहा है आर्याभि० २ ३४, १७ १६. [सम्+धमति गतिकर्मा (निघ० २ १४) धातोर्लट्]

सन्धये परस्त्रीसमागमनाय ३०.६ [सम्+डुधाञ् धारणपोषणयो (जु०) धातो 'उपसर्गे घो कि' अ० ३ ३ ९२ सूत्रेण भावे कि]

सन्धिना सन्धानेन (अन्तरिक्षेण=आकाशेन) १५ ६ [सन्धिरिति व्याख्यातम् पूर्वपदे । सन्धि (स्तोत्रम्) एषा वा उक्थस्य सम्मायद् रात्रि (=सन्धिस्तोत्रम्) त्रीण्युक्थानि, (अग्निरुषा अश्विनाविति) त्रिदेवत्य सन्धि ता० ९ १.२५-२६]

सन्धिध्व सम्यक्तया धर १ ६१.१८ [सम्+डुधाञ् धारणपोषणयो (जु०) धातो: 'सुधितवसुधित०' अ० ७ ४ ४५ सूत्रेण लोटि मध्यमैकवचने दधातेरित्त्वमिडागमो वा प्रत्ययस्य, द्विर्वचनाभावञ्च निपात्यते]

सन्धु: सम्यग् धरन्ति १ ७३ ७ [सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लुङ् । अटोऽभाव]

सन्धूनुहि सम्यक् प्रेरय १ १० ८ [सम्+धूञ् कम्पने (क्र्या०) धातोर्लोट् । विकरणव्यत्ययेन श्नु]

सन्धेहि सम्यक् सयोजय १ ६ ७. [सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट् । 'घ्वसोरेद्धावभ्यासलोपश्च' इत्येकारादेशोऽभ्यासलोपश्च]

सन्नते अनुकूले २६ १ [सम्+णम प्रह्वत्वे शब्दे (भ्वा०) धातो क्त]

सन्नद्ध: तत्पर सम्बद्धो वा (वनस्पति =राजा) २९ ५२. सम्यग् बद्ध (जीव) १ १६४ ३७ सम्यक् सज्ज (=राजा) ६ ४७ २६ [सम्+णह बन्धने (दिवा०) धातो क्त]

सन्नद्धा सम्यग् बद्धा (वेगवती भूमि) ६ ७५.११ [सम्+णह् बन्धने (दिवा०) धातो क्त तत स्त्रिया टाप्]

सन्नमन्त सन्नमन्ति ७ ३१ ९. **सन्नमन्ताम्**= सम्यक् प्राप्नुवन्तु, भा०—सर्वतो वर्द्धन्ताम् ३५ २० [सम्+णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लङ् अडभाव, व्यत्ययेन आत्मनेपदञ्च]

सन्नयथ: प्रापयथ ५ ६५ ६ [सम्+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

सन्नय: सम्यक् नयो नीतिर्यस्य स (राजपुरुष) २ २४ ९ [सम्-नयपदयो समास । नय =णीञ् प्रापणे (भ्वा०) धातो 'एरच्' इत्यच्]

सन्नवन्त सस्तुवन्ति ६ ७ २ **सन्नवन्ते**=सम्यक् स्तुवन्ति ६ ७ ४ [सम्+ष्टुञ् स्तुतौ (अदा०) धातोर्लङ् । अडभावश्छान्दस । अन्यत्र लट् । व्यत्ययेनात्मनेपद शप् च]

सन्नशे सम्यक् नश्येत् २३ १५ [सम्+णश अदर्शने (दिवा०) धातोर्लिङ् । त्-लोपश्छान्दस शप् च]

सन्न: अवस्थापित (समुद्र =अन्तरिक्षम्) ८ ५९ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्त । 'रदाभ्याम्०' अ० ८ २ ४२ सूत्रेण दकारतकारयोर्नकारौ]

ता० २ १० ५ सप्तदश प्रजापति तै० १ ३ ३.२. सप्तदशो वै प्रजापति ऐ० १ १६ कौ० ८ २ श० १ ५ २ १७ गो० उ० १ १६. सप्तदशो वै प्रजापतिर्द्वादश मासा पञ्चर्त्तवो हेमन्तशिशिरयोः समासेन तावान्त्संवत्सर संवत्सर प्रजापति ऐ० १ १ द्वादश वै मासा संवत्सरस्य पञ्चर्त्तव एष एव प्रजापति सप्तदश श० १ ३.५ १० संवत्सर एव सप्तदश-स्यायतन द्वादशमासा पञ्चर्त्तव एतदेव सप्तदशस्यायतनम् ता० १० १.७ सप्तदशो वै संवत्सरो द्वादशमासा पञ्चर्त्तव श० ६ २ २ ८ संवत्सर सप्तदश ता० ६ २ २ तस्माऽएतस्मै सप्तदशाय प्रजापतये एतत् सप्तदशमन्न समस्कुर्वन् य एष सौम्योऽध्वरोऽथ या अस्य ता. षोडश कला एते ते षोडशर्त्विज श० १० ४ १ १९ तद्वै लोमेति द्वे अक्षरे । त्वगिति द्वेऽसृगिति द्वे मेद इति द्वे मांसमिति द्वे स्नावेति द्वेऽस्थीति द्वे मज्जेति द्वे ता षोडश कला अथ य एतदन्तरेण प्राण सञ्चरति स एव सप्तदश प्रजापति श० १० ४ १ १७ अन्न वै सप्तदश । ता० २ ७ ७ सप्तदश ह्यन्नम् श० ८ ४.४ ७ प्रजाति सप्तदश ऐ० ८ ४ त (सप्तदशस्तोम) उ प्रजातिरित्याहु ता० १० १ ६. सप्त-दश एव स्तोमो भवति प्रतिष्ठायै प्रजात्यै ता० १२ ६ १३ विट् सप्तदश ता० १८ १० ६ विड् वै सप्तदश ता० २ ७ ५ विश सप्तदश ऐ० ८ ४ पशवो वै सप्तदश ता० १९ १० ७. तान् (पशून्) विश्वे देवा सप्तदशेन स्तोमेन नाप्नुवन् तै० २ ७ १४ २ सप्तदशो वै पुरुषो दश प्राणा-श्चत्वार्यङ्गान्यात्मा पञ्चदशो ग्रीवा षोडश्य शिर सप्तदशम् श० ६ २ २ ९ उर सप्तदश । अष्टावन्ये जत्रवोऽष्टावन्य ऽउर सप्तदशम् श० १२ २ ४ ११ वर्णाभिऋतुनादित्या स्तोमे सप्तदशे स्तुत वैरूपेण विशौजसा तै० २ ६ १९ १-२ गायत्र सप्तदशस्तोम ता० ५ १ १५ उदर वा एष स्तोमाना यत्सप्तदश ता० ४ ५ १५ राष्ट्र सप्तदश तै० १ ८ ८ ५. सप्तदश (स्तोम) एव यश गो० पू० ५ १५ यत् सप्तदशो यदेवास्य (यजमानस्य) मध्यतोऽपूत तत्तेना-पहन्ति ता० १७ ५ ६ सर्व सप्तदशो भवति ता० १७ ५ ६]

सप्तदशाक्षरेण निचृदाख्यया गायत्र्या (छन्दसा) ६ ३४ [सप्तदशन्-अक्षरपदयो समास.]

सप्तधा सप्तभि प्रकारै १७ ७९ [सप्तन्प्राति० विधार्थे 'सख्याया विधार्थे धा' अ० ५ ३.४२ सूत्रेण धा]

सप्तधातु सुवर्णादय सप्त धातवो यस्मिँस्तत् (धनम्) ४ ५ ६ [सप्तन्-धातुपदयो समास । ततो नपुसके प्रथमैकवचने रूपम्]

सप्तधातुः सप्त प्राणादयो धातवो यस्या सा (वाक्) ६ ६१ १२ [सप्तन्-धातुपदयो समास । तत. प्रथमैक-वचनम्]

सप्तनामा सप्तनामानि यस्य स. (अश्व=वायु-रग्निर्वा) १.१६४ २ [सप्तन्-नामन्पदयो समास । सप्तनामा=आदित्य सप्तास्मै रश्मयो रसानभिसन्नामयन्ति सप्तैनमृषय स्तुवन्तीति वा नि० ४ २७]

सप्तपुत्रम् सप्तविधैस्तत्त्वैर्जातम् (सूर्यम्) १.१६४.१. [सप्तन्-पुत्रपदयो समास । सप्तपुत्रम्=सप्तमपुत्र सर्पण-पुत्रमिति वा नि० ४.२६.]

सप्तमातृभिः सप्ताभ्यो पृथिव्यग्निसूर्यवायु-विद्युदुदकाऽऽकाशा मातरो जनका याभ्य ताभि (निर्मुभि-र्युभिरङ्गुभिश्च) १ ३४.८ [सप्तन्-मातृपदयो समास]

सप्तमी सप्ताना पूरणी (क्रिया) २५ ४ [सप्तन्-प्राति० पूरणार्थे डट् । तत 'नान्तादसंख्यादेर्मट्' इति मडागम । तत स्त्रिया ङीप्]

सप्तय. संयुक्ता शीघ्र गमयितारोऽग्निवायुजलादयो ऽश्वा १ ८५ ६. वाणादयोऽश्वा येषान्ते (अध्वरश्रिय = नानर्त्तिराज्यलक्ष्मी) १ ४७ ८ **सप्तिम्**=अश्वम् १२ ४७ **सप्तिः**=मूर्त्तद्रव्यगमन्वी (अग्नि = सूर्यरूप.) २२ १९ **सप्ती**=गत्य सर्पन्तौ (हरी = हरणशीलावश्वौ), प्र०— अत्र 'वाच्छन्दसि' इति सुपो सुने रेफलोप ३ ३५.२ **सप्ते**=अश्व इव पुरुषार्थिन् (अ०—शिल्पविज्जन) २९ ३ अश्व इव वेगकारक (विद्वज्जन) २९ २. [सप्ति = अश्वनाम निघ० १ १४ सप्ते सरणस्य नि० ९.२ सृप गतौ (भ्वा०) धातोर्बाहु० औणा० ति । रेफस्य लोप-श्छान्दस । सप्ति (हेऽश्व त्व) सप्तिरसि ता० १ ७ १ सप्ति =आयु सप्तिरित्याह। अश्व एव जव दधाति। तस्मात् पुरा सुरश्वो ऽजायत तै० ३ ८ १३ २ सप्ति= वायु सप्ति तै० १ ३ ६ ४]

सप्तरश्मिम् सप्तसु छन्दस्सु लोकेषु वा रश्मयो यस्य तम् (अग्नि=विद्वास जनम्) १ ४६ १ सप्तविधा विद्यारश्मयो यस्मिँस्तम् (रथ=सूर्यलोकम्) ६ ४४ २४ **सप्तरश्मिः**=सप्तविधा रश्मय किरणा यस्य स (रथ = सूर्य) २ १८ १ सप्तविधकिरण (बृहस्पति =सूर्य) ४ ५० ४ [सप्तन्-रश्मिपदयो समास । रश्मिरश्मि स एष (आदित्य) सप्तरश्मिर्वृषभस्तुविष्मान् जै० उ० १.२८.२ (ऋ० २ १२ १२) यत्सप्तरश्मिरिति सप्त ह्येव

सपर्यन् सेवमान (विद्वज्जन) ३.३११. **सपर्यन्तः**=परिचरन्त (विद्वांसो जना) ५.२१ ३ [सपर्यति परिचरण-कर्मा निघ० ३ ५ तत शतृप्रत्यय । सपर्यन् पूजयन् नि० ३.४ सपर्यत परिचरत नि० ११ ९]

सपर्यवः सेवका (देवा=विद्वज्जना) ३ ५ २ सत्य सेवमाना (विद्यार्थिजना) ७ २ ४. आत्मन सपर्यामिच्छव (सज्जना) २ ६.३.. **सपर्यू**=सेवकौ (जनौ) ३ ५० २ [सपर्याशब्दाद् आत्मन इच्छायामर्थे क्यच् । तत 'क्या-च्छन्दसि' इति उ]

सपर्येण्यः सेवितुमर्ह (अग्नि=पावक) ६ १ ६ [सपर्यति परिचरणकर्मा निघ० ३ ५ तत कृत्यार्थे केन्य]

सपित्वम् समानश्च तत्पित्व प्रापण वा विज्ञान च तत्, प्र०—अत्र पि गतौ इत्यस्माद्धातोरौणादिकस्त्वन् प्रत्यय १ १०६ ७ [समान-पित्वपदयो समास । 'समानस्य छन्दसि०' सूत्रेण समानस्य सभाव । पित्वम्=पि गतौ (तुदा०) धातोर्बाहु० औणा० त्वन्]

सपीतिम् पानेन सह वर्त्तमानम् (सखि=समान-भोजनम्) २८ १६. **सपीतिः**=समाना पीति पान यस्या सा (सखि) १८ ६ [सह-पीतिपदयो समासे सहस्य सभाव. । समाना पीतिपदयो समासे वा समानस्य सभाव - पीति=पा पाने (भ्वा०) धातो स्त्रिया भावे क्तिन् 'स्था-गापापचो भावे' सूत्रेण । 'घुमास्थागापाजहातिसा हलि' इतीत्त्वम् । सपीतिम्=सहपीतिम् नि० ६ ४३]

सप्त सप्तसंख्याकान् (सिन्धून्) १ ३५ ८ सप्त-विधा किरणा १ ५०.८ षडृतवो वायुश्च सप्तम (पितर=पालका) ४.४२ ८ सप्तत्वविशिष्टा गणना १८ २४ सप्तसङ्ख्याका (पत्नीयजमानाभ्या सहिता विप्रा=मेधाविजना) ३ ७ ७. सप्तछन्दोऽन्विता (पुर=शत्रुनगर्य) १.१७४.२ गायत्र्यादीनि सप्त छन्दोऽन्विता (वाणी.=वेदवाच) १ १६४ २४ पृथिवीजलाग्निवायु-विराट्-परमाणु-प्रकृत्याख्यै सप्तभि (धामभि=पदार्थै) प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेर्लुक् १ २२ १६. सप्तसंख्याकानि गायत्र्यादीनि छन्दांसि १७ ७९ सप्त-तत्त्वाङ्गमिश्रितस्य भावा सप्तधा १ १०५ ९ साङ्गोपाङ्गां-श्चतुरो वेदान् त्रीन् क्रियाकौशल-विज्ञानपुरुषार्थान् १ ७२ ६ सप्तविधे (रोदसी=द्यावापृथिव्यौ) ७ १८ २४ **सप्तभिः**=नाग-कूर्म-कृकल देवदत्त-धनञ्जयेच्छाप्रयत्नै १४ २८ [सप्त सृप्ता संख्या, सप्तादित्य रश्मय इति वदन्ति नि० ४.२६]

सप्त ऋषयः पञ्च मुख्य-प्राणा महत्तत्त्वमहङ्कार-श्चेति १४ २८ **सप्त ऋषीन्**=सप्तप्राणादीन् (प्राणादय पञ्च, सूत्रात्मा धनञ्जयश्चेति) १७ २६ [सप्तन्-ऋषि-पदयो समास । सप्त ऋषय रश्मिनाम निघ० १ ५. पदनाम निघ० ५ ६ सप्त ऋषय=रश्मय आदित्ये सप्त । नि० १२ ३७ षड् इन्द्रियाणि विद्या सप्तमी नि० १२ ३७]

सप्तचक्रम् सप्त चक्राणि यस्मिँस्तम् (रथ=रमणीय यानम्) २ ४० ३ **सप्तचक्रे**=सप्तविधानि चक्राणि भ्रमणपरिधयो यस्मिँस्तस्मिन् (सूर्ये) १ १६४ १२. [सप्तन्-चक्रपदयो समास.]

सप्तजिह्वाः काल्यादय सप्त जिह्वा इव ज्वाला येषा ते (वह्नय=वोढार पावका) ३ ६ २ [सप्तन्-जिह्वा-पदयो समास]

सप्तथम् सप्तमम् (महत्तत्त्वम्) १.१६४.१५ [सप्तन्प्राति० पूरणार्थे डट्प्रत्यये 'थट् च छन्दसि' अ० ५ २ ५० सूत्रेण थडागम । सप्तथम्=सप्तम नि० १३ ३२]

सप्तथी सप्तमी (सरस्वती=उत्तमा वाणी), प्र०—अत्र 'वाच्छन्दसि' इति मस्य स्थाने थ ७ ३६ ६ [सप्तन्-प्राति० पूरणार्थे डट् प्रत्यये 'थट् च छन्दसि' सूत्रेण थडागम । तत स्त्रिया ङीप्]

सप्तदश सप्ताधिका दश (संख्या) १८ २४ **सप्तदशभिः**=दश पाद्या अङ्गुलयश्चत्वार्यूर्वष्ठीवानि, द्वे प्रतिष्ठे यदर्वाङ् नाभेस्तत्सप्तदश तै १४ २९. [सप्तन्-दशन्पदयो समास]

सप्तदशम् चत्वारो वर्णाश्चत्वार आश्रमा श्रवण-मनन-निदिध्यासनानि कर्माणि, अलब्धस्य लिप्सा, लब्धस्य प्रयत्नेन रक्षण, रक्षितस्य वृद्धिर्वृद्धस्य सन्मार्गे सर्वोपकारके सत्कर्मणि व्ययकरणमेष चतुर्विध पुरुषार्थो, मोक्षानुष्ठान-ञ्चेति सप्तदशम् (स्तोम=अतिप्रशसनीय व्यवहारम्) ९ ३४ **सप्तदशः**=सप्तदशाना पूरण (स्तोम=स्तावको मित्रस्य भाग) १४ २४. सप्तदशविध (धरुण.=धारणगुण) १४ २३ सप्तदशाना पूरक (विज्ञानम्) १३ ५६ पञ्च कर्मेन्द्रियाणि, पञ्च विषया, पञ्च महाभूतानि, कार्य, कारणञ्चेति सप्तदशाना पूरक (स्तोम=स्तुतिसमूह) १० १२ [सप्तन् दशन्-पदयो समासात् पूरणार्थे 'तस्य पूरणे डट्' अ० ५ २ ४८ सूत्रेण डट् । सप्तदश (स्तोम) प्रजापतिर्वै सप्तदश । गो० उ० २ १३ तै० १ ५.१०.६.

आदित्यस्य रश्मय (सप्तरश्मि=इन्द्र=आदित्य) जै० उ० १.२९ ८]

सप्तवध्रये पञ्च ज्ञानेन्द्रियाणि मनो बुद्धिश्च सप्त हता यस्य तस्मै (जनाय) ५ ७८ ६ **सप्तवध्रिम्**=हत-सप्तेन्द्रियम् (भा०—अन्त करणादविद्याम्) ५ ७८ ५ [सप्तन् वध्रिपदयो' समास. । वध्रि=हन हिंसागत्यो (अदा०) धातोरिन् । रेफागमश्छान्दस धातोर्वधादेशश्च]

सप्तविंशतिः सप्ताऽधिका विंशति (सख्या) १८.२४ एतत्सख्याका (गन्धर्वा=वायव इन्द्रियाणि च), भा०— प्राणापानव्यानोदानसमान-नाग-कूर्म-कृकल-देवदत्त-धनञ्जया दश, जीवो, द्वादश मन, तत्सहचरितानि श्रोत्रादीनि दशेन्द्रियाणि, पञ्चसूक्ष्मभूतानि च मिलित्वा सप्तविंशति ९.७. **सप्तविंशत्या**=आरण्यपशुगुणै १४ ३० [सप्तन्-विंशतिपदयो समास]

सप्तशिवासु सप्तविधासु कल्याणकारिणिषु (मातृषु) १ १४१.२ [सप्तन्-शिवापदयो समास । शिवा=शिव-प्राति० स्त्रिया टाप्]

सप्तशीर्षाणम् सप्तविधानि शिरासि किरणा यस्मिँस्तम् (अग्निम्) ३ ५ ५ [सप्त-शिरस्पदयो समास । 'शीर्षश्छन्दसि' सूत्रेण शिरस शीर्षन् आदेश]

सप्तस्वसा सप्तार्थात् पञ्च प्राणा मनो बुद्धिश्च स्वसेव यस्या सा (सरस्वती=सत्या वाणी) ६ ६१ १० [सप्तन्-स्वसृपदयो समास । सप्तस्वसा=सप्तस्वसारम् नि० १० ५]

सप्तहोता सप्त प्राणा होतार आदातारो यस्य स. (अग्नि) ३ २९.१४ (अग्निष्टोम (यज्ञ) ३४ ४ [सप्तन्-होतृपदयो समास । होतृ=हु दानादानयो (जु०) धातो कर्त्तरि तृच् । सप्तहोता=सप्तास्मै रश्मयो रसानभिसन्नामयन्ति, सप्तैनमृषय स्तुवन्तीति वा नि० ११ २३ तस्मै (ब्रह्मणे) सप्तम हूत प्रत्यशृणोत् । स सप्तहूतोऽभवत् । सप्तहूतो ह वै नामैष । त वा एत सप्तहूत सन्तम् । सप्त-होतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवा तै० २ ३ ११ २ इन्द्रिय वै सप्तहोता तै० २ २ ८ २ इन्द्र सप्तहोता तै० २ ३ ११ इन्द्र सप्तहोत्रा तै० २ २ ८.५ सौम्योऽध्वर सप्तहोतु (निदानम्) तै० २ २ ११ ६ अर्यमा सप्तहोतृणा होता तै० २ ३ ५ ६.]

सप्ताक्षरेण दैव्या जगत्या (छन्दसा) ९ ३२ [सप्तन्-अक्षरपदयो समास]

सप्ताश्वः सप्तविधा अश्वा आशुगामिन किरणा यस्य स (सूर्य) ५.४५.९. [सप्तन्-अश्वपदयो समास]

सप्तास्यः सप्त किरणा आस्यानि यस्य स (बृहस्पति=सूर्य) ४ ५० ४ **सप्तास्ये**=सप्त प्राणा आस्ये यस्य तस्मिन् (पत्यौ) ४ ५१ ४ [सप्तन्-आस्यपदयो समास]

सप्तिमिव यथा वेगवानश्व १.६१ ५ [सप्तिम्-इव-पदयो समास]

सप्ती इव यथा युग्मावश्वौ ६ ५९ ३ [सप्ती-इव-पदयो' समास । सप्ती=सप्तिप्राति० प्रथमाद्विवचनम् । सप्तिरिति व्याख्यातम्]

सप्रथसम् प्रख्यातेन सह वर्त्तमानम् (अग्नि=पावकम्) २२.३. **सप्रथाः**=प्रथसा विस्तृतेन जगता सह वर्त्तमान (मित्र=जगदीश्वर) ३ ५९ ७ प्रसिद्धकीर्त्ति (विद्वान् जन) ५ १३ ४ सप्रख्याति (विद्वज्जन) १ १५९ १. सुकीर्त्तिप्रख्यातियुक्त (अग्नि=विद्वज्जन) ३८ १७ विस्तीर्णसुख (विद्वज्जन ईश्वरो वा) ३८ २० विस्तरेण सह वर्त्तमान (विद्वान् परमेश्वरो वा) ३८ २० विस्तारेण सह वर्त्तमाना (स्त्री) ३९.१३ प्रथसा प्रख्यया सह वर्त्तमान (विद्वज्जन) १८ ५४ विस्तीर्णेन प्रशसनेन सह वर्त्तमाना (गृहिणी) ३५ २१ सर्वसामर्थ्य से विस्तीर्ण (ईश्वर) आर्याभि० २ ४१, ३८ २० [सह-प्रथस्पदयो समासः । 'वोपर्सजनस्य' सूत्रेण सहस्य सादेश । सप्रथा सर्वत पृथु नि० ६ ७ प्रथस् प्रथ प्रख्याने (भ्वा०) धातोर् औणा० असुन्]

सप्रथस्तमम् य प्रथोभिर्विस्तृतैराकाशादिभि महाऽभि-व्याप्तो वर्त्तते सोऽतिशयितस्तम् (सदसस्पतिं=परमेश्वरम्) १.१८ ६ य प्रथसा विद्याविस्तरेण सह वर्त्तते सोऽतिशयितस्तम् (बहुश्रुत सज्जनम्) १ ४५ ७ अतिशयेन विस्तारयुक्त व्यवहारम्) १ ७५ १ प्रथसा विस्तरेण सह वर्त्तमान ,सप्रथास्तमतिशयितम् (अग्नि=विद्वाम जनम्) १२ १११. **सप्रथस्तमः**=अतिशयेन विस्तृतसुखकारक (सखा=मित्रजन) १२ ११४ **सप्रथस्तमे**=अतिविस्तार-युक्ते (अवसि=रक्षणादौ कर्मणि) ५ ६५ ५ अतिशयितैं प्रथोभि सुविस्तृतैं श्रेष्ठैर्गुणकर्मस्वभावैस्सह वर्त्तमाने (शर्मन्=सुखे) १ ९४ १३ [सप्रथस् इति व्याख्यातम् । ततोऽतिशायने तमप्]

सप्रथः प्रख्यात्या सह वर्त्तमान (अग्नि=सद्गृहस्थ-जन) ६.१६ ३३ सत्कीर्त्या प्रख्यात (महाराज) ६ ६८ ९ प्रख्यातगुणैं सह वर्त्तमानम् (शर्म=गृहम्)

सम्यक् स्वेच्छया गृह्णामि १ ६४ १ [सम्+अञ्जू व्यक्ति-म्रक्षणकान्तिगतिषु । (रुधा०) धातोर्लट् । विकरणव्यत्ययेन शप् । अन्यत्र लङ्, लोट्, लेट् लट् च । लेटि लटि च व्यत्ययेनात्मनेपदम् । समञ्जन्ति समश्नुवन्ति नि० ६ ३५]

समञ्जन् सम्यक् प्रकटीभवन् (भीतिकोऽग्नि) २९ २ सम्यक् प्रकटयन् (शमिता=यजमान) २८ १० सम्यक् मिश्रीकुर्वन् (विद्वज्जन) २९ ३५ सम्यग्रक्षन् (अग्नि =विद्वान् राजा) १२ ३३ सम्पृचान (शमिता=यज्ञ) २० ४५ सम्यग् व्यक्तीकुर्वन् (विद्वज्जन) २० ३७ सम्यक् प्रकाशयन् (सविता=सूर्य) १२ ६. [सम्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातो शतृ]

समत्ति सम्यक्तया भक्षयति ७ ४ २ [सम्+अद भक्षणे (अदा०) धातोर्लट्]

समत्सु युद्धेषु १ ५ ४ सङ्ग्रामेषु २९ ५० धार्मिकाऽधार्मिकविरोधाख्येषु युद्धेषु ३ ४३ ८ धर्म्यसङ्ग्रामेषु ३ ४८ ५ **समदः**=सङ्ग्रामान् ६ ७५ २ **समदाम्**= सह मदेन हर्षेण वर्त्तन्ते यत्र युद्धेषु तेषाम् २९ ३८ मदैस्सह वर्त्तन्ते येषु तेषा सङ्ग्रामाणाम् ६ ७५ १ [समत्सु सग्रामनाम निघ० २ १७ समदो वार्त्ते, सम्मदो वा मदते नि० ९ १७]

समदनस्य मदन हर्षेण यस्मिन्नस्ति तेन सहितस्य (भा०—सैनापत्याधिकारस्य) १ १०० ६ [सह-मदनपदयो समासे सहस्य सादेश । मदनम्=मदी हर्षे (दिवा०) धातोर्ल्युट् । तत अर्श-आदित्वादच्]

समदः मदेन सह वर्त्तमाना (शत्रूणा सेना) २९ ३९ [सह-मदपदयो समासे सहस्य सादेश । वचनव्यत्यय]

समद्यौत् सम्यग् द्योतयति ३ ५ २ [सम्+द्युत दीप्तौ (भ्वा०) धातो[illegible] । च्लेर्लुक्]

समद्वा यो मदेने[illegible] सह वर्त्तमानान् वनति सम्भजति स (इन्द्र =राजा) ७ २० [illegible] य सम्यगत्ति स्वादु भुङ्क्ते स (राजकर्मचारी जन) [illegible] ६ १८ २ [सम्+अद् भक्षणे (अदा०) धातो कर्त्तरि व[illegible] निप् । अथवा समद इत्युपपदे वन सम्भक्तौ (भ्वा०) धातो कर्त्तरि विच् । 'विड्वनोरनुनासिकस्यात्' इत्याकारान्तादे[illegible]श । पूर्वपदस्यान्त्यलोपश्छान्दस]

समधत्त सम्यग् धरत १ १[illegible]६५ ६ **समधात्**= समादधाति १९ ९३ **समधातम्** =भा०—सगृह्णीतम् २० ६६ [सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लङ् । मध्यमबहुवचनम् । अन्यत्र लुङ् । 'गातिस्थाघु०' इति सिचो लुक्]

समनक्तु सम्यक् कामयताम् २०.४४ उत्तम सुख को प्राप्त कर म० वि० १३४, १० ८५ ४३. [सम्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातोर्लोट्]

समनगा इव समनमवधारित स्थान गच्छन्तीव (उषा) १ १२४ ८ [समगा-उपपदयो समास । समनगा इति व्याख्यास्यते]

समनगाः य समन सङ्ग्राम गच्छति स (नरोत्तम) ७.९४ [समनोपपदे गम्लृ गतौ (भ्वा०) धातोर्ड । वचनव्यत्यय । समनम् सग्रामनाम निघ० २ १७]

समनम् समीचीन सङ्ग्रामम् १ ४८ ६ [समनम् सग्रामनाम निघ० २ १७ समननाद्वा सम्माननाद्वा नि० ७ १७]

समनमन्त एकीभावेन नमन्तु १७ ६४ सनमन्ते, प्र०—अत्र लडर्थे लङ् ८ ४६ [सम+णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लङ् । व्यत्ययेनात्मनेपदम्]

समनसः समान मन स्वान्त यासा ता (विश = प्रजा) ७ २५. समानविज्ञाना (नर =नायका जना) २७ २३. [समान-मनस्पदयो. समासे समानस्य सादेशश्छान्दस]

समनसः समान मनो येभ्यस्ते (जना) १४ २७ मनसा सह वर्त्तमाना (अग्नय =पावका) १४ ६ समान मनो विज्ञान येषान्ते (पितर =प्रजापालका जना) १९ ४५ समानमनोनिमित्ता (अग्नय) १५ ५७ सज्ञाना समानमनस (विद्वज्जना) ७ ४३ २ समाने धर्मे मनो येषान्ते (जीवा) १९ ४६ समान सहकारि साधन मनो येषान्ते (देवा =श्रोत्रादीनीन्द्रियाणि) ६ ९ ५ **समनसौ**=समानविचारौ (स्त्रीपुरुषौ) १२ ६० [समान-मनस्पदयो समासे समानस्य सादेश । सह-मनस्पदयोर्वा समास । सहस्य सादेशश्छान्दस]

समनसा समानेन मनसा विचारेण सह वर्त्तमानौ (अश्विनौ=अग्निजले) १ ९२ १६ समान मनो विज्ञान ययोस्तौ (अश्विनौ=सभा[illegible]) १ ११६ १६ समानमनस्कौ दृढप्रीतौ (स्त्रीपुरुषौ) [illegible] [समान-मनस्पदयो समासे समानस्य सादेश । ततो [illegible] वचनस्याकारादेश]

समना सङ्ग्रामे, प्र०—अत्र विभक्तेराकारादेश ६ ४ १ समाना (देवी =विदुष्य स्त्रिय), प्र०—अत्र 'सुपा सुलुक्०' इति जसो लुक् ४ ५१ ८ सदृशी (कन्या)

सभास्थाणुम् सभाया स्थितम् (पुरुषम्) ३० १८ [सभा-स्थाणुपदयो समास । स्थाणुम्=ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थो णु' उ० ३ ३७ सूत्रेण णु]

सभृतयः समाना भर्त्तारो यासा ता (युवतय स्त्रिय) ६ ६७ ७ [समान-भृतिपदयो समासे समानस्य सादेश । भृति=डुभृञ् धारणपोषणयो (जु०) धातोर्बाहु० औणा० ति किच्च]

सभेयम् सभाया साधुम् (राजानमध्यापकमुपदेशक वा) ३४ २१ [सभाप्राति० साध्वर्थे 'ढश्छन्दसि' अ० ४ ४ १०६ सूत्रेण ढ सभेयो युवा (यजु० २२ २२) एष वै सभेयो युवा य प्रथमवयसी तस्मात् प्रथमवयसी स्त्रीणा प्रियो भावुक श० १३ १ ९ ८ सभेयो यो वै पूर्ववयसी । स सभेयो युवा । तस्माद् युवा पुमान् प्रियो भावुक तै० ३ ८ १३ ३]

सभ्य हे सभा के योग्य (सभापते राजन्), स० वि० १८२, अथर्व० १९ ५५ ६ **सभ्याः**=सभा के योग्य (धार्मिक आप्त लोग) स० वि० १८२, अथर्व० १९ ५५ ६ [सभाप्राति० साध्वर्थे 'सभाया य' अ० ४ ४ १०५ इति य]

सम् सम्यगर्थे १ ९ ५ क्रियार्थे १ ८ ३ सङ्घाते २.१ १५ एकीभावे ८ १६ अच्छा अथर्व० १४ २ ३७ स० वि० १७० वेदार्पे [समित्येकीभावम् नि० १ ३]

समकृण्वन् सम्यक् शिक्षितान् कुर्यु १७ २८ [सम्+डुकृञ् करणे (तना०) धातोर्लङ् । विकरणव्यत्ययेन श्नु । समकृण्वन्=कुर्वन्ति नि० ६ १५]

समक्तम् सहतम् (हवि=होतव्य द्रव्यम्) २ ३ १० **समक्तः**=सम्यक् प्रकटयन् (अश्व=आशुगामी वह्नि) २९ १० [सम्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातो क्त । 'यस्य विभाषा' इत्यनिट्त्वम्]

समक्तुभिः सम्यग् रात्रिभि ३ १७ १ [सम्-अक्तु-पदयो समास । अक्तु रात्रिनाम निघ० १ ७]

समख्ये समक्तया प्रकथयामि, प्र०— अत्र व्यत्ययेनाऽऽत्मनेपद, लडर्थे लुङ् च ४ २३ अ०—प्रख्याता कुर्याम् ४ २३ [सम्+ख्या प्रकथने (अदा०) धातोर्लुङ् । 'अस्यति-वक्तिख्यातिभ्योऽङ्' इत्यङ् । व्यत्ययेनात्मनेपदम्]

समगच्छन्त सम्यक् प्राप्नुवन्ति १७ ३० **सम-गथाः**=समागमेन गच्छसि प्राप्नोति वा, अ०—सङ्गतो भूत्वा राजते, प्र०—अत्र पक्षे व्यत्यय, वर्त्तमाने लुङ् 'मन्त्रे घसह्वर०' अ० २ ४ ८० अनेन च्लेर्लुक् च ३ १९

